नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः - २८

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नमः

आगम सुत्ताणि (सटीकं)

भागः २८	
४३-१	उत्तराध्ययनानि-मूलसूत्रम्-१-

-: संशोधक : सम्पादकश्च :-

मुनि दीपरत्नसागर

ता. १४-४-२००० रविवार २०५६ चैत्र सुद ११

४५-आगम सुत्ताणि-सटीकं
मूल्य रू. ११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं. - १३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तराध्ययन-मूलसूत्रस्य विषयानुक्रमः

मूलाङ्कः	अध्ययनानि	पृष्ठाङ्कः	मूलाङ्कः	अध्ययनानि	पृष्ठाङ्कः
१-४८	१-विनयश्रुतं	३	-२९०	९-नमि प्रवज्या	२४८
-९५	२-परीषह विभक्ति	६७	-३२७	१०-द्रुमपत्रकं	२६९
-११५	३-चातुरङ्गीय	१२०	-३५९	११-बहुश्रुतपूज्यं	२८६
-१२८	४-असंस्कृतं	१५७	-४०६	१२-हरिकेशीयं	२९८
-१६०	५-अकाममरणं	१८६	-४४१	१३-चित्रसंभूतीयं	३१६
-१७८	६-क्षुल्लक निर्ग्रन्थीयं	२३५	-४९४	१४-इषुकारीयं	३३४
-२०८	७-औरभ्रीयं	२२३	-५१०	१५-स-भिक्षुः	३५१
-२२८	८-काविलियं	२३६	-५३८	१६-ब्रह्मचर्यसमाधिः	३५९

अध्ययनानि-१ आरम्भात् १६-अत्र एव भागे वर्तते
अध्ययनानि-१७ आरम्भात् ३६-आगामी (२९) भागे वर्तते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स
पंचम गणधर श्री सुधर्मा स्वामिने नमः

४३ उत्तराध्ययनानि-मूलसूत्रम् -१-

सटीकं

[चतुर्थं मूलसूत्रं]
[पूर्वोद्धृत्-जिनभाषित-ऋषि प्रणित मूलम्+भद्रबाहुस्वामि रचितानिर्युक्तिः + शान्त्याचार्य विरचिता वृतिः]

शिवदाः सन्तु तीर्थेशा, विघ्नसङ्घातघातिनः ।
भवकूपोद्धृतौ येषां, वाग् वरत्रायते नृणाम् ॥१॥
समस्तवस्तुविस्तारे, व्यासर्पत्तैलवज्जले ।
जीयात् श्रीशासनं जैनं, धीदीपोद्दीप्तिवर्द्धनम् ॥२॥
यत्प्रभावादवाप्यन्ते, पदार्थाः कल्पनां विना ।
सा देवी संविदे नः स्तादस्तकल्पलतोपमा ॥३॥
व्याख्याकृतामखिलशास्त्रविशारदानां, सूच्यग्रवेधकधियां शिवमस्तु तेषाम् ।
यैरत्र गाढतरगूढविचित्रसूत्रग्रन्थिर्विभिद्य विहितोऽद्य ममापि गम्यः ॥४॥
अध्ययनामामेषां यदपि कृताश्चूर्णिवृत्तयः कृतिभिः ।
तदपि प्रवचनभक्तिस्त्वरयति मामत्र वृत्तिविधो ॥५॥

वृ.इह खलु सकलकल्याणनिबन्धनं जिनागममवाप्य विवेकिनैवं विवेचनीयं-यदुत महार्थोऽयं मनोरथानामप्यपथभूतो भूरिजन्मान्तरोपचितपुण्यपरिपाकतो महानिधिरिव मयाऽधिगतः, तथाहि-महति संसारमण्डलेऽस्मिन् मानसादिदण्डैरभिहन्यमानाः कष्टेनेष्टविशिष्टार्थां महापुरीमिव मनुजगतिमनुप्रविशन्ति जन्तवः, अनुप्रविश्यापि चास्यामौध्र्वरथ्यिका इवाकृतसुकृतसम्भारा निरीक्षितुमपि नैनं क्षमन्ते, किमङ्ग पुनरवाप्तुमिति ?, एतदवाप्तौ सर्वथा कृतार्थोऽस्मि, सम्भवति चास्यां स्वोपकारवत्परोपकारेऽपि शक्तिरिति नेदानीं युक्ता कदर्यता, किन्तु ?, भवितव्यमुदाराशयेन, परोपकारपूर्विकैव च स्वोपकारप्रवृत्तिरुदाराशयतां ख्यापयतीति परोपकारएवादितः प्रवर्तितुमुचितम् । सन्ति चास्मिन् महितमाहात्म्याः समीहितसम्पादकाश्च मणय इव चरणकरणादिगोचराचाराद्यङ्गानुयोगाः, न चैत इदानीं सम्यग्दर्शनादिहेतुं मिथ्यात्वादिपिशाचशमनं धर्मकथात्मकोत्तराध्ययनायोगं रक्षाविधानमिवापहाय स्वयं ग्रहीतुमन्यस्मै वा दातुं युज्यन्ते, इत्यारभ्यत उत्तराध्ययनानुयोगः-तत्र च न तथाविधफलादिपरिज्ञान विकला प्रेक्षावतां प्रवृत्तिः, तस्यास्तद्व्यापकत्वाद्, व्याप्यस्य च व्यापकाविनाभावित्वात्, अतः प्रेक्षवत्प्रवृत्त्यङ्गत्वात् फलयोगमङ्गलसमुदायार्थानुयोगद्वारतद्भेदनिरुक्तिक्रमप्रयोजनानि वाच्यानि । यच्च शब्दस्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणत्वमभिधाय तदभिधानस्यानर्थकत्वमिह कैश्चिदुक्तं, तदसाधु, शब्दस्याप्रमाणत्वे तत्प्रामाण्यमूलत्वेन सकल-व्यवहाराणामुच्छेदप्रसङ्गात्, उक्तं हि-

"लोकिकव्यवहारोऽपि, यस्मिन्न व्यवतिष्ठते।
तत्र साधुत्वविज्ञानं, व्यांमोहोपनिबन्धनम्॥" इति

तथा च शास्त्रादौ फलादिप्रतिपादिका पूर्वाचार्यगाथा-

"तस्स फलजोगमंगलसमुदायत्था तहेव दाराहं।
तब्भेयविरुत्तिक्कमपयोयणाइं च वच्चाइं॥"

फलाभिलाषिणां च सकलप्रेक्षावतां प्रवृत्तिरिति प्रथमतः फलस्याभिधानं, तत्रापि किमिदं सम्बद्धमुतासम्बद्धमिति विचारत एव विपश्चितः प्रवर्तन्त इति तदनु योगस्य, इत्यादि क्रमप्रयोजनं सर्वत्र योज्यं, तत्र फलं कर्तुः श्रोतुश्चाव्यवहितं विनेयानुग्रहो यथावदर्थावबोधश्च, व्यवहितं पुनरुभयोरपि तदुत्तरोत्तरगुणप्रकर्षप्राप्त्याऽपवर्गावाप्तिरिति। योगः सम्बन्धः, स च हेतुतः फलतश्च, तत्र हेतुत उत्तराध्ययनानुयोगस्य साक्षात्कृतधर्माणः सूत्रकृत एव यथास्वं प्रणेतारः ततस्तदवबोधिततदर्थास्तच्छिष्याः ततोऽपि तद्विनेयास्तावद् यावद् भगवान् भद्रबाहुः ततो भाष्यकृतस्ततश्चूर्णिकृतः ततोऽपि वृत्तिकृतो यावदस्मद्गुरव इति गुरुपर्वक्रमलक्षणः। फलतस्तूपायोपेयभावरूपः अभिहितफलस्योपेयत्वात् प्रस्तुतानुयोगस्य च तदुपायत्वादिति। मथ्नातिविनाशयति शास्त्रपारगमनविघ्नान् गमयति-प्रापयति शास्त्रस्थैर्यं लालयति च श्लेषयति तदेव शिष्यप्रशिष्यपरम्परायामिति मङ्गलं, यद्वा मन्यन्ते अनापायसिद्धिं गायन्ति प्रबन्धप्रतिष्ठितिं लान्ति वाऽव्यवच्छिन्नसन्तानाः शिष्यप्रशिष्यादयः शास्त्रमस्तिन्निति मङ्गलम्, आदिमध्यावसानवर्तिनस्तस्योक्तरूपार्थप्रसाधकत्वेन प्रसिद्धत्वात्, उक्तं हि-

"तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स।
पढमं सत्थस्साविग्घपारगमनाय निद्दिट्ठं॥१॥
तस्सेव उ थिज्जत्थं मज्झिमयं अंतिमं च तस्सेव।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स॥२॥"

तच्च नामादिचतुर्भेदं, तत्र मङ्गलमिति नामैव नाममङ्गलं, स्थापनामङ्गल मङ्गलकारः मङ्गलानि च दर्पणादीनि, यथोक्तम्-

"दप्पणभद्दासण वद्धमाण वरकलसमच्छसिरिवच्छा।
सोच्छिय नंदावत्ता लिहिया अट्ठट्ठ मंगलगा॥" इति

द्रव्यभावमङ्गले त्वावश्यकभाष्यानुसारतोऽवबोद्धव्ये। तत्र चेह भावमङ्गलेनाधिकारः, तच्च कृतमेव, नन्दिरूपत्वात् तस्य, नन्दिव्याख्यानपूर्वकत्वाच्च सकलानुयोगस्य, अपवादत उत्क्रमेणापि यदाऽनुयोगस्तदा भावत आदिमङ्गलं 'संजोगा विप्पमुक्कस्स अनगारस्स' त्ति अनगारग्रहणं, मध्यमङ्गलं, 'कपिल्ले नयरे राया' इत्यादिनाऽनगारगुणवर्णनम्, अन्त्यमङ्गलम् 'इइ पाउकरे बुद्धे' इत्यादिना बुद्धाद्यभिधानं। समुदायो-वर्णपदवाक्यश्लोकाध्ययनकदम्बकात्मकश्रुतस्कन्धरूपतस्याभिधेयोऽर्थः समुदायार्थः, स चेह धर्मकथात्मकः, विशेषतस्त्वेनं 'पढमे विनओ' इत्यादिना निर्युक्तिकार एव वक्ष्यति। द्वाराणीति प्रक्रमादनुयोगद्वाराणि, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चानुगतमनुरूपं वा श्रुतस्य स्वेनाभिधेयेन योजनं--सम्बन्धनं तस्मिन् वाऽनुरूपोऽनुकूलो वा योग: श्रुतस्यैवाभिधानव्यापारोऽनुयोग:, तदुक्तम्-

"अनुजोयणमनुजोगो सुयस्स नियएण जमभिधेयेणं।
ववारो वा जोगो जो अनुरूवोऽनुकूलो वा ॥"

तस्य द्वाराणि-उपक्रमादीनि अनुयोगद्वाराणि तानि तद्भेदनिरुक्तिक्रमप्रयोजनानि च 'तत्थ-ज्झयणं पढम' मित्यत्र वक्ष्याम:। आह-प्रकृतोऽयमुत्तराध्ययनानुयोग:, तत्र किमेतान्युत्तरा-ध्ययनान्यङ्गमङ्गानि श्रुतस्कन्ध: श्रुतकन्धा अध्ययनमध्ययनानि उद्देशक उद्देशका: ?, उच्यते, नाङ्गं नाङ्गानि, श्रुतस्कन्धो न श्रुतस्कन्धा:, नाध्ययनमध्यनानि, नोद्देशको नोद्देशका इति। अस्य च नामनिक्षेपे 'उत्तराध्ययनश्रुतस्कन्ध' इति नाम, तत्रोत्तरं निक्षेप्तव्यमध्ययनं श्रुतस्कन्धश्च, तत्रोत्तरनिक्षेपाभिधानायाह भगवान् निर्युक्तिकार:-

नि.[१] नामं ठवणा दविए खित्त दिसा तावखित्त पन्नवए।
पइकालसंचयपहाणनाणकमगणणओ भावे ॥

वृ.-इह च सुपो यत्रादर्शनं तत्र सूत्रत्वेन छान्दसत्वात् लुक्, तथोत्तरनिक्षेपप्रस्तावात् सूचक-त्वात्सूत्रस्य 'कमउत्तरेण पगय' मित्युत्तरश्रवणाच्च 'नामं'ति नामोत्तरं 'ठवणं'ति स्थापनोत्तर-मित्याद्यमिलाप: कार्य:। तत्र नामोत्तरमिति नामैव यस्य वा जीवादेरुत्तरमिति नाम क्रियते, स्थापनोत्तरमक्षादि, उत्तरमिति वर्णविन्यासो वा, द्रव्योत्तरमागमतो ज्ञाताऽनुपयुक्तो नोआगमतो ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तं च, तत्र तद्व्यतिरिक्तं त्रिधा-सचित्ताचित्तमिश्रभेदेन, तत्र सचित्तं पितु: पुत्र:, अचित्तं क्षीरात् दधि, मिश्रं जननीशरीरतो रोमादिमदपत्यम्, इह च द्रव्यपर्यायोभया-त्मकत्वेऽपि वस्तुनो द्रव्यप्राधान्यविवक्षया पित्रादेरूर्ध्वंभवनतश्च पुत्रादीनां द्रव्योत्तरत्वं भावनीयं, क्षेत्रोत्तरं मेर्वाद्यपेक्षया यदुत्तरं, यथोत्तरा: कुरव:, यद्वा पूर्वं शालिक्षेत्रं तदेव पश्चादिक्षुक्षेत्रं, दिगुत्तरमुत्तरा दिग्, दक्षिणदिगपेक्षत्वादस्य, तापक्षेत्रोत्तरं यत्तापदिगपेक्षयोत्तरमित्युच्यते, यथा-सर्वेषामुत्तरो मन्दराद्रि:, प्रज्ञोपकोत्तरं यत् प्रज्ञापकस्य वामं, प्रत्युत्तरमेकदिगवस्थितयोर्देवदत्त-यज्ञदत्तयोर्देवदत्तात् परो यज्ञदत्त उत्तर:, कालोत्तर: समया दावलिका आवलिकातो मुहूर्त-मित्यादि, सञ्चयोत्तरं यत्सञ्चयस्योपरि, यथा धान्यराशे: काष्ठं, प्रधानोत्तरमपि त्रिविधंसचित्ता-चित्तमिश्रभेदात्, सचित्तप्रधानोत्तरमपि त्रिधैव, तद्यथा-द्विपदं चतुष्पदमपदं च, तत्र द्विपदमनु-त्तरपुण्यप्रकृतितीर्थकरनामाद्यनुभवनत: तीर्थकर:, चतुष्पदमनन्यसाधारणशौर्यधैर्यादियोगत: सिंह:, अपदं रम्यत्वसुरसेव्यत्वादिभिर्जात्यजाम्बूनदादिमयी जम्बूद्वीपमध्यस्थिता सुदर्शना-जम्बू:, अचित्तमचिन्त्यमाहात्म्यमाहात्म्यश्चिन्तामणि:, मिश्रं तीर्थकर एव गृहस्थावस्थायां सर्वा-लङ्कारालङ्कृत:, ज्ञानोत्तरं केवलज्ञानं, विलीनसकलावरणत्वेन स्मस्तवस्तुस्वभावाभासितया च, यद्वा श्रुतज्ञानं, तस्य स्वपरप्रकाशकत्वेन केवलादपि महर्द्धिकत्वात्, उक्तं च-

"सुयनाणं महिड्ढीयं, केवलं तयनंतरं।
अप्पणो य परेसिं च, जम्हा तं परिभावनं ॥"ति

क्रमोत्तरं क्रममाश्रित्य यद्भवति, तच्चतुर्वधं-द्रव्यत: क्षेत्रत: कालतो भावतश्च, तत्र द्रव्यत: परमाणोर्द्विप्रदेशिक: ततोऽपि त्रिपदेशिक: एवं यावदन्त्योऽनन्तप्रदेशिक: स्कन्ध:, क्षेत्रत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकप्रदेशावगाढात् द्विप्रदेशावगाढः ततोऽपि त्रिप्रदेशावगाढः एवं यावदवसानवर्त्यसङ्ख्येप्रदेशावगाढः, कालत एकसमयस्थितेर्द्विसमयस्थितिः ततोऽपि त्रिसमयस्थितिः एवं यावदसङ्ख्येयसमयस्थितिः, भावत एकगुणकृष्णात् द्विगुणकृष्णः ततोऽपि त्रिगुणकृष्णः एवं यावदनन्तगुणकृष्णः, यतो वा-क्षायोपशमिकादिभावादनन्तरं यः क्षायिकादिर्भवति, 'गणणओ'त्ति गणनात उत्तरमेककाद् द्विकस्ततोऽपि त्रिक एवं यावच्छीर्षप्रहेलिका, भावोत्तरं क्षायिको भावः, तस्य केवलज्ञानदर्शनाद्यात्मकत्वेन सकलौदयिकादिभावप्रधानत्वाद-

आह-एवमस्य प्रधानोत्तर एवान्तर्भावादयुक्तं भेदेनाभिधानं, यद्येवमत्यल्पमिदमुच्यते, एवं हि नामादिचतुष्टय एव सर्वनिक्षेपाणामन्तर्भावात्तदेवाभिधेयं, तत इहान्यत्र च यन्नामादिचतुष्टयाधिकनिक्षेपाभिधानं तच्छिष्यमतिव्युत्पादनार्थं सामान्यविशेषोभयात्मकत्वख्यापनार्थं च सर्ववस्तूनामिति भावनीयमिति गाथार्थः ॥ इहानेकधोत्तराभिधानेऽपि क्रमोत्तरमेवाधिकरिष्यति, विषयज्ञाने च विषयी सुज्ञानो भवति इति मन्वानो यत्रास्य सम्भवो यत्र चासम्भवो यत्र चोभयं तदेवाह-

नि.[२] जहन्नं सुत्तरं खलु उक्कोसं वा अनुत्तरं होइ।
सेसाइं उत्तराइं अनुत्तराइं च नेयाणि ॥

वृ.-जघन्यं सोत्तरं 'खलु' अवधारणे, सोत्तरमेव 'उक्कोसे'ति उत्कृष्टं, वाशब्दस्यैवकारार्थस्य भिन्नक्रमत्वाद् अनुत्तरमेव भवति, 'शेषाणि' मध्यमानि 'उत्तराणि' इति अर्शआदित्वेनाजन्तवत्वात् मतुबलोपाद्वोत्तरवन्ति अनुत्तराणि च ज्ञेयानि। द्रव्यक्रमोत्तरादिनि हि जघन्यान्येकप्रदेशिकादीनि उपरि द्विप्रदेशिकादिवस्त्वन्तरभावात् सोत्तराण्येव, तदपेक्षयैव तेषां जघन्यत्वात्, उत्कृष्टानि त्वन्त्यानन्तप्रदेशिकादीन्यनुत्तराण्येव, तदुपरिवस्त्वन्तराभावाद, अन्योथोत्कृष्टत्वायोगात्, मध्यमानि तु द्विप्रदेशिकादीनि त्रिप्रदेशिकाद्यपेक्षया सोत्तराणि एकप्रदेशापेक्षया त्वनुत्तराणि, उपरितनवस्त्वपेक्षयैव सोत्तरत्वात् इति गाथार्थः ॥ उत्तरस्यानेकविधत्वेन येनात्र प्रकृतं तदाह-

नि.[३] कमउत्तेरण पगयं आयारस्सेव उवरिमाइं तु।
तम्हा उ उत्तरा खलु अज्झयणा हुंति नायव्वा ॥

वृ. क्रमापेक्षमुत्तरं क्रमोत्तरं, शाकपार्थिवादित्वान्मध्यपदलोपी समासः, तेन प्रकृतम्-अधिकृतम्, इह च क्रमोत्तरेणेति भावतः क्रमोत्तरेण, एतानि हि श्रुतात्मकत्वेन क्षायोपशमिकभावरूपाणि तद्रूपस्यैवाऽऽचाराङ्गस्योपरि पठ्यमानत्वेनोत्तराणीत्युच्यन्ते, अत एवाह-'आयारस्सेव उवर्माइं'ति एवकारो भिन्नक्रमेः, ततश्चाचारस्योपर्येव-उत्तरकालमेव 'इमानी'ति हृदि विपरिवर्तमानतया प्रत्यक्षाणि, पठितवन्त इति गम्यते, 'तुः' विशेषणे, विशेषश्चायं यथा-शय्यम्भवं यावदेष क्रमः, तदाऽऽरतस्तु दशवैकालिकोत्तरकालं पठ्यन्त इति, 'तम्हा उ'त्ति 'तुः' पूरणे, यत्तदोश्च नित्यमभिसम्बन्धः, ततो यस्मादाचारस्योपर्येवेमानि पठितवन्तस्तस्माद् 'उत्तराणि' उत्तरशब्दवाच्यानि, 'खलुः' वाक्यालङ्कारेऽवधारणे वा, तत उत्तराण्येव 'अध्ययनानि' विनयश्रुतादीनि भवन्ति 'ज्ञातव्यानि' अबबोद्धव्यानि, प्राकृतत्वाच्च लिङ्गव्यत्यय इति गाथार्थः ॥आह-यद्याचारस्योपरि पठ्यमानत्वेनोत्तराण्यमूनि, तात्किं? यत एवाचारस्य प्रसूतिरेषामपि तत एव अभिधेयमपि यदेव तस्य तदेवोतान्यथेति संशायापनोदायाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. [४] अंगप्पभवा जिनभासिया य पत्तेयबुद्धसंवाया।
बंधे मुक्खे य कया छत्तीसं उत्तरज्झयणा ॥

वृ. अङ्गाद्--दृष्टिवादादेः प्रभव-उत्पत्तिरेषामिति अङ्गप्रभवानि, यथा परीषहाध्ययनं,
"कम्मप्पवायपुव्वे सत्तरसे पाहुडंमि जं सुत्तं।
सनयं सोदाहरणं तं चेव इहंपि नायव्वं ॥"

जिनभाषितानि यथा द्रुमपुष्पिकाऽध्ययनं, तद्धि समुत्पन्नकेवलेन भगवता महावीरेण प्रणीतं, यद्वक्ष्यति-"तंनिस्साए भगवं सीसाणं देइ अनुसट्टिं" त्ति, 'चः' समुच्चये, प्रत्येकबुद्धाश्च संवादश्च प्रत्येकबुद्धसंवादं तस्मादुत्पन्नानीति शेषः, तत्र प्रत्येकबुद्धाः-कपिलादयः तेभ्य उत्पन्नानि यथा कापिलीयाध्ययनं, वक्ष्यति हि-'धम्मद्वया गीयं' तत्र हि कपिलेनेति प्रक्रमः, संवादः-सङ्गतप्रश्नोत्तरवचनरूपस्तत उत्पन्नानि, यथा-केशिगौतमीयं, वक्ष्यति च-"गोतमकेसीओ य संवायसमुट्ठियं तु जम्हेय" मित्यादि।

ननु स्थविरचितचितान्येवैतानि, यत आह चूर्णिकृत्-"सुत्ते थेराण अत्तागमो" त्ति नन्द्यध्ययनेऽप्युक्तम्-"जस्स जेत्तिया सीसा उप्पत्तियाए वेणइयाए कम्मयाए परिणामियाए चउव्विहाए बुद्धीए उववेया तस्स तेत्तियाइं पइन्नगसहस्साइं" प्रकीर्णाकानि चामूनि तत्कथं जिनदेशितत्वादि न विरुध्यते ?, उच्यते, तथास्थितानामेव जिनादिवसचसामिह दृब्धत्वेन तद्देशितत्वाद्युक्तमिति न विरोधः। बन्ध-आत्मकर्मणोरत्यन्तसंश्लेषस्तस्मिन्, मोक्षः तयोरेवाऽऽत्यन्तिकः पृथग्भावस्तस्मिंश्च कृतानि, कोऽभिप्रायः ?-यथा बन्धो भवति यथा च मोक्षस्तथा प्रदर्शकानि, तत्र बन्धे यथा-"आणाअनिद्देसकरेत्ति" मोक्षे यथा-"आणानिद्देसकरे" त्ति, आभ्यां यथाक्रममविनयो विनयश्च प्रदर्श्यते, तत्राविनयो मिथ्यात्वाद्यविनाभूतत्वेन बन्धस्य विनयश्चान्तरपौरुषत्वेन मोक्षस्य कारणमिति तत्त्वतस्तौ यथा भवतस्तदेवोक्तं भवति, मोक्षप्राधान्येऽपि बन्धस्य प्रागुपादानमनादित्वोपदर्शनार्थं, यद्वा 'बंधे मोक्खे य त्ति' चशब्द एवकारार्थो भिन्नक्रमश्च, ततो बन्ध एव सति यो मोक्षस्तस्मिन् कृतानि, अनेनानादिमुक्तमतव्यवच्छेदश्च कृतः, तत्र हि मोक्षशब्दार्थानुपपत्तिः सकलानुष्ठानवैफल्यापत्तिश्च, किमेवं कतिचिदेव ?, नेत्याह-'षट्त्रिंशत्' षट्त्रिंशत्सङ्ख्यानि, कोऽर्थः ?-सर्वाणि उत्तराध्ययनानि इति गाथार्थः ॥ इत्थं प्रसङ्गत उक्तरूपं संशयमपाकृत्याध्ययननिक्षेपं विनेयानुग्रहाय तत्पर्यायनिक्षेपातिदेशं चाह-

नि. [५] नामं ठवणज्झयणे दव्वज्झयणे य भावज्झयणे।
एमेव य अज्झीणे आयज्झवणेविय तहेव ॥

वृ. 'नामं ठवणज्झयणे' त्ति प्रत्येकमध्ययनशब्दसम्बन्धान्नामाध्ययनं स्थापनाध्ययनं द्रव्याध्ययनं च स्य भिन्नक्रमत्वाद् भावाध्ययनं च, तत्र नामस्थापने गतार्थे, द्रव्याध्ययनमागमतो ज्ञातानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तं च पुस्तकादिन्यस्तं, भावाध्ययनमागमतो ज्ञातोपयुक्तः, नोआगमतस्तु प्रस्तुताध्ययनान्येव, आगमैकदेशत्वादेषाम्। एवं चाक्षीणमायः क्षपणाऽपि च तथैव, कोऽर्थः ?-अध्ययनवदेतान्यपि नामादिभेदभिन्नान्येव ज्ञेयानीति गाथार्थः ॥ साम्प्रतं नामाध्ययनादीनि त्रीणि प्रसिद्धान्येवेति मन्यमानो निर्युक्तिकारो निरुक्तिद्वारेणे नोआगमतो भावाध्ययनं व्याख्यातुमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[६] अज्झप्पस्साणयणं कम्माणं अवचओ उवचियाणं।
अनुवचओ व नवाणं तम्हा अज्झयणमिच्छंति ॥

वृ. 'अज्झप्पस्स'त्ति सूत्रत्वादध्यात्ममात्मनि, कोऽर्थः ?-स्वस्वभावे, आनीयतेऽनेनेति आनयनं प्रस्तावादात्मनोऽध्ययनं, निरुक्तिविधिना चात्माकारनकारलोपः, कुत एतदित्याह-यतः 'कर्मणां' ज्ञानावरणीयादी नाम् 'अपचयः' चयापगमोऽभाव इत्यर्थः, 'उपचितानां' प्राग्बद्धानाम् 'अनुपचयश्च' अनुपचीयमानताऽनुपादानमितियावत्, 'नवानां' प्रत्यग्राणां, कोऽर्थः ?-प्राग्बद्धानाम्, एतदुपयुक्तस्येति गम्यते, उपसंहारमाह-तस्मात् प्राग्बद्धबध्यमान-कर्माभावेनाऽऽत्मनः स्वस्वभावानयनाद्धेतोः अध्ययनम् 'इच्छन्ति' अभ्युपगच्छन्ति, पूर्वसूरय इति गम्यते, यद्वाऽध्यात्ममिति रूढितो मनः, तच्च प्रस्तावात् शूभं, तस्याऽऽनयनमध्ययनम्, आनीयते ह्यनेन शुभं चेतः, अस्मिन् उपयुक्तस्य वैराग्यभावात्, शेषं प्राग्वत्, नवरं वैराग्यभावात् कर्मणामिति क्लिष्टानामिति गाथार्थः ॥ निरुक्त्यन्तरेणैतदेव व्याख्यातुमाह-

नि.[७] अहिगम्मंति व अत्था अनेन अहियं व नयनमिच्छंति।
अहियं व साहु गच्छइ तम्हा अज्झयणमिच्छंति ॥

वृ. 'अधिगम्यन्ते वा' परिच्छिद्यन्ते वा 'अर्था' जीवादयः अनेनाधिकं वा नयनं-प्रापण-मर्थादात्मनि ज्ञानादीनामनेन इच्छन्ति, विद्वासं इति शेषः 'अधिकम्' अर्गलं शीघ्रतरमितियावत्, 'वा' सर्वत्र विकल्पार्थः, 'साधु'त्ति साधयति पौरुषेयीभिर्विशिष्टक्रियाभिरपवर्गमिति साधुः 'गच्छति' यात्यर्थान्मुक्तिम्, अनेनेत्यत्रापि योज्यते, यस्मादेवमेवं च ततः किमित्याह-तस्माद-ध्ययनमिच्छन्ति, निरुक्तविधिनाऽर्थनिर्देशपरत्वाद्वाऽस्य, अयतेरेतेर्वाऽधिपूर्वस्याध्ययनम्, इच्छन्तीति चाभिधानं सर्वत्र सूत्रार्थाबाधया व्याख्याविकल्पानां पूर्वाचार्यसम्मतत्वेनादुष्ट-त्वख्यापनार्थमिति गाथार्थः ॥ नामाक्षीणादित्रयं प्रतीतमेवेति दृष्टान्तद्वारेण भावाक्षीणमाह-

नि.[८] जह दीवा दीवसयं पईप्पए सो य दीप्पए दीवो।
दीवसमा आयरिया अप्पं च परं च दीवंति ॥

वृ. यथा दीपाद्दीपशतं 'प्रदीप्यते' ज्वलति सोऽपि च दीप्यते दीपो, न पुनरन्यान्यदीपोत्प-त्तावपि क्षीयते, तथा किमित्याह-दीपसमा आचार्या 'दीप्यन्ते' समस्तशास्त्रार्थविनिश्चयेन स्वयं प्रकाशन्ते 'परं च' शिष्यं 'दीपयन्ति' शास्त्रार्थप्रकाशनशक्तियुक्तं कुर्वन्ति, इह च 'तात्स्थ्यात् तद्व्यपदेश' इत्याचार्यशब्देन श्रुतज्ञानमेवोक्तं, भावाक्षीणस्य प्रस्तुतत्वात्तस्यैव चाक्षयत्वसम्भ-वादिति गाथार्थ ॥ नामाऽऽयादयस्त्रयःसुज्ञाना इति भावायं व्याचष्टे-

नि.[९] भावे पसत्थमियरो नाणाई कोहमाइओ कमसो।
आउत्ति आगमुत्ति य लाभुत्ति य हुंति एगट्ठा ॥

वृ. 'भावे' विचार्ये इति शेषः, प्रशस्तः मुक्तिपदप्रापकत्वेन 'इतरः' अप्रशस्तो भवनिबन्धन-त्वेन, प्रक्रमादायः, किंरूपः पुनरयं द्विविधोऽपीत्याह-'ज्ञानादिः' आदिशब्दाद्दर्शनादिपरिग्रहः, 'कोहमाइओ'त्ति मकारस्यालाक्षणिकत्वात् क्रोधादिकः, आदिशब्दान्मानादिपरिग्रहः, 'कमसो'त्ति आर्षत्वात् क्रमतः, किमुक्तं भवति ?-प्रशस्तो ज्ञानादिः, अप्रशस्तः क्रोधादिः। इह च ज्ञानादेः क्रोधादेश्च आयत्वमायविषयत्वाद्विषयविषयिनोरभेदोपचारेण आयते तमि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्याह इति कर्मसाधनत्वेन वा, ज्ञानादिप्रशस्तभावायहेतुत्वाच्चाध्ययनमपि भावाय: । 'तत्त्व-भेदपर्यायैर्व्याख्ये'त्ति पर्यायकथनमपि व्याख्याङ्गमिति पर्यायानाह-आय इत्यागम इति च लाभ इति च भवन्त्येकार्थिका:, शब्दा इति गम्यते, 'इति' प्रत्येकं पर्यायस्वरूपनिर्देशार्थ:, 'च:' समुच्चय इति गाथार्थ: ।। नामस्थापनाक्षपणे प्रसिद्धे इति द्रव्यक्षपणामाह-

नि.[१०] पल्लत्थिया अपत्था तत्तो उप्पिट्टणा अपत्थयरी ।
निप्पीलणा अपत्था तिन्नि अपत्थाइ पुत्तीए ।।

वृ. 'पर्यस्तिका' प्रसिद्धा 'अपथ्या' अहिता, 'तत:' इति पर्यस्तिकात उत्प्राबल्येन पिट्टना उत्पिट्टनाउत्पिट्टनकादिना कुट्टनोत्पिट्टना अपथ्यतरा, 'निष्पीडना' अत्यन्तमावलनात्मिका 'अपथ्या' इति प्रस्तावादपथ्यतमा, सर्वत्र वस्त्रस्येति गम्यते, निगमयितुमाह-त्रीण्यपथ्यानि 'पोत्तीए'त्तिवस्त्रस्य, इह चाल्याल्पतराल्पतमकालत आभिर्वस्त्रद्रव्यं क्षप्यत इति पर्यस्तिकादी-नामपथ्यापथ्यतरापथ्यतमत्वं द्रव्यक्षपणत्वं चोक्तम्, अपथ्यानीति च निगमनं सामान्यस्या-शेषविशेषसङ्ग्रहकत्वाददुष्टमिति गाथार्थ: ।। भावक्षपणामाह-

नि.[११] अट्ठविहं कम्मरयं पोराणं जं खवेइ जोगेहिं ।
एयं भावज्झयणं नेयव्वं आनुपुव्वीए ।।

वृ. 'अष्टविधम्' अष्टप्रकारं, क्रियत इति कर्म्म-ज्ञानावरणादि, रज इव रजो जीवशुद्ध-स्वरूपान्यथात्वकरणेन, इह चोपमावाचकशब्दमन्तरेणापि परार्थप्रयुक्तत्वात् अग्निर्माणवक इतिवदुपमानार्थोऽवगन्तव्य:, कर्मरज इति समस्तं वा पदं, 'पुराणम्' अनेकभवोपात्तत्वेन चिरन्तनं 'यत्' यस्मात् क्षपयति जन्तु: 'योगै:' भावाध्ययन चिन्तनादिशुभव्यापारै:, तस्मादि-दमेव भावरूपत्वात् क्षपणाहेतुत्वाद्भावक्षपणेत्युच्यते इति प्रक्रम: । प्रकृतमुपसंहर्तुमाह-'एतद्' इत्युक्तपर्यायाभिधेयं भावाध्ययनं 'नेतव्यं' प्रापयितव्यम् 'अनुपूर्व्या' शिष्यप्रशिष्य-परम्परात्मिकायां, यद्वा-'नेतव्यं'संवेदनयविषयतां प्रापणीयमानुपूर्व्या-क्रमेणेति गाथार्थ ।। तदित्थमुत्तराध्ययनानीति व्याख्यातम्, अधुना श्रुतस्कन्धयोर्निक्षेपं प्रत्यध्ययनं नामान्यर्थाधि-कारांश्च वक्तुमवसर इति तदभिधानाय प्रतिज्ञामाह-

नि.[१२] सुयखंधे निक्खेवं नामाइ चउव्विहं परूवेउं ।
नामाणि य अहिगारे अज्झयणाणं पवक्खामि ।।

वृ. श्रुतं च स्कन्धश्चेति समाहारद्वन्द्वस्तस्मिन् निक्षेपं नामादयश्चत्वारो विधा:-प्रकारा यस्य स तथा तं 'प्ररूप्य' प्रज्ञाप्य नामान्यधिकारांश्चाध्ययनानां प्रवक्ष्यामि इति गाथार्थ: ।। इह च श्रुतस्कन्धनिक्षेपस्यान्यत्र सुप्रपञ्चितत्वात् प्रस्तावज्ञापनायैव श्रुतस्कन्धे निक्षेपं प्ररूप्येति निर्युक्तिकृतोक्तं, न तु प्ररूपयिष्यत इति । स्थानाशून्यार्थं किञ्चिदुच्यते-तत्र श्रुतं नामस्थापना-पनात्मकं क्षुन्नं, द्रव्यश्रुतं तु द्विविधम्-आगमनोआगमभेदात्, तत्र यस्य श्रुतमिति पदं शिक्षितादि-गुणान्वितं ज्ञातं न च तत्रोपयोग: तस्य आगमतो द्रव्यश्रुतम्, 'अनुपयोगो द्रव्य'मिति वचनात्, नोआगमतस्तु श्रुतपदार्थज्ञशरीरं भूतभविष्यत्पर्यायं, तद्व्यतिरिक्तं च पुस्तकादिन्यस्तम् अभि-धीयमानं वा, भावश्रुतहेतुतया द्रव्यश्रुतं, तथा चाह-

"भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ॥"

भावश्रुतमप्यागमनोआगमभेदतो द्विधैव, तत्राऽऽगमतस्तज्ज्ञस्तत्र चोपयुक्तः, नोआगमतस्त्वेतान्येव प्रस्तुताध्ययनानि, आगमैकदेशत्वात् क्षायोपशमिकभाववृत्तित्वाच्चामीषामिति ॥ स्कन्धोऽपि नामस्थापनात्मकः प्रसिद्ध एव, द्रव्यस्कन्धः आगमतस्तज्ज्ञोऽनुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे, तद्व्यतिरिक्तो द्रुमस्कन्धादिः, भावस्कन्ध आगमतस्तज्ज्ञस्तत्रोपयुक्तः, नोआगमतः प्रक्रान्ताध्ययनसमूह इत्यलं प्रसङ्गेन ॥ प्रतिज्ञातमनुसरन्नामान्याह-

नि.[१३] विनयसुयं च परीसह चउरगिज्जं असंखयं चेव ।
अकाममरण नियंठि ओरब्भं काविलिज्ज च ॥

नि.[१४] नमिपव्वज्ज दुमपत्तयं च बहुसुयपुज्जं तहेव हरिएस ।
चित्तसंभूइ उसुआरिज्जं सभिक्खु समाहिठाणं च ॥

नि.[१५] पावसमणिज्जं तह संजईज्जं मियचारिया नियठिज्जं ।
समुद्दपालिज्जं रहनेमियं केसिगोयमिज्जं च ॥

नि.[१६] समिइओ जन्नइज्जं सामायारी तहा खलुकिज्जं ।
मुक्खगइ अप्पमाओ तव चरण पमायठाणं च ॥

नि.[१७] कम्मप्पयडी लेसा बोद्धव्वे खलु नगारमग्गे य ।
जीवाजीवविभत्ति छत्तीसं उत्तरज्झयणा ॥

वृ. निगदसिद्धाः । नवरमाभिरध्ययनविशेषनामान्युक्तानि, एतन्निरुक्त्यादि च नामनिष्पन्ननिक्षेपप्रस्ताव एवाभिधास्यते ॥ अधिकारानाह-

नि.[१८] पढमे विनओ बीए परिसहा दुल्लहंगया तइए ।
अहिगारो य चउत्थे होइ पमायप्पमाएत्ति ॥

नि.[१९] मरणविभत्ती पुण पंचमम्मि विज्जा चरणं च छट्ठअज्झयणे ।
रसगेहिपरिच्चाओ सत्तमे अट्ठमि अलाभे ॥

नि.[२०] निक्कंपया य नवमे दसमे अनुसासणोवमा भणिया ।
इक्कारसमे पूया तवरिद्धी चेव बारसमे ॥

नि.[२१] तेरसमे अ नियाणं अनियाणं चेव होइ चउदसमे ।
भिक्खुगुणा पन्नरसे सोलसमे बंभगुत्तीओ ॥

नि.[२२] पावाण वज्जणा खलु सत्तरसे भोगिड्ढिविजहणट्ठारे ।
एगुणि अप्परिकम्मे अनाहया चेव वीसइमे ॥

नि.[२३] चरिया च विचित्ता इक्कवीसि बावीसिमे थिरं चरणं ।
तेवीसइमे धम्मो चउवीसइमे य समिइओ ॥

नि.[२४] बंभगुण पन्नवीसे सामायारी य होइ छव्वीसे ।
सत्तावीसे असढया अट्ठावीसे य मुक्खगई ॥

नि.[२५] एगुणतीस आवस्सगप्पमाओ तवो अ होइ तीसइमे ।
चरणं च इक्कतीसे बत्तीसि पमायठाणाइं ॥

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

नि.[२६] तेत्तीसइमे कम्मं चउतीसइमे य हुंति लेसाओ।
भिक्खुगुणा पणतीसे जीवाजीवा य छत्तीसे ॥

वृ. आसामर्थः सुखावगम एव। नवरं विनयमूलोऽयं धर्मः, यत आगमः-

"मूलाउ खंधप्पभवो दुमस्स, संधाउ पच्छा समुविंति साहा।
साहप्पसाहा विरुहंति पत्ता, ततो उ पुप्फं च फलं रसो ॥१॥
एवं धम्मस्स विनओ मूलं परमो से मोक्खो।
जेण कित्तिं सुयं सिग्घं, नीसेसं चाभिगच्छई ॥२॥"

इत्यतः प्रथमाध्ययने विनयोऽधिकृतः, विनयवतश्च तेषु तेषु गुरुनियोगेषु प्रवर्तमानस्य कदाचित् परीषहा उत्पद्येरन् ते च सम्यक् सोढव्या इति द्वितीयाध्ययने परीषहा इत्यादि क्रम-प्रयोजनमभ्यूह्यम्, अध्ययनसम्बन्धाभिधानप्रस्तावे चाभिधास्यामः। उपसंहरन्नाह-

नि.[२७] उत्तरज्झयणाणेसो पिंडत्थो वन्निओ समासेणं।
इत्तो इक्किक्कं पुन अज्झयणं कित्तइस्सामि ॥

वृ. उत्तराध्ययनानाम् 'एषः' अनन्तराभिहितस्वरूपः 'पिण्डार्थः' समुदायार्थः 'वर्णितः' उक्तः 'समासेन' सङ्क्षेपेण, 'इतः' पिण्डार्थवर्णनाद्, अनन्तरमिति गम्यते, एकैकं 'पुनः' विशेषणे अध्ययनं 'किर्तयिष्यामि' व्याख्याद्वारेण संशब्दयिष्यामीति गाथार्थः ॥ तत्र चाद्यं विनयश्रुतमिति तस्य कीर्तनावसरः, न च तद् उपक्रमाद्यनुयोगद्वारतद्भेदनिरुक्तिक्रमप्रयोजन-प्रतिपादनमन्तरेण शक्यं कीर्तयितुमिति मन्वानः प्रस्तुताध्ययनस्यानुयोगविधानक्रममर्थाधि-कारं चाह-

अध्ययनं-१ विनयश्रुतं

नि.[२८] तत्थऽज्झयणं पढमं विनयसुयं तस्सुवक्कमाईणि।
दाराणि पन्नेवेउं अहिगारो इत्थ विनएणं ॥

वृ. 'तत्र' एतेष्वध्ययनेषु मध्ये अध्ययनं 'प्रथमम्' आद्यं विनयाभिधानकं श्रुतं विनयश्रुतं मध्यपदलोपीसमासः, 'तस्य' इति विनयश्रुतस्य उपक्रमादीनि द्वाराणि 'प्ररूप्य' तद्भेदनिरु-क्तिक्रमप्रयोजनप्रतिपादनद्वारेण प्रज्ञाप्य, एतदनुयोगः कार्य इति शेषः, अधिकारश्चात्र विनयेन, तस्येहानेकधाऽभिधानात्। आह-'पढमे विनओ' इत्यनेनोवोक्तत्वात् पुनरुक्तमेतद्, उच्यते, शास्त्रपिण्डार्थविषयं तत्, एतच्च प्रस्तुतैकाध्ययनगोचरमिति न पौनरुक्त्यमिति गाथार्थः ॥ अत्रापि 'प्ररू प्ये'त्यवसरज्ञापनार्थमेव निर्युक्तिकृतोक्तं, न तु प्ररूपयिष्यत इति, अनुयोग-द्वारेषूक्तत्वात्, तदुक्तानुसारेण किञ्चिदुच्यते-इह चत्वार्यनुयोगद्वाराणि-उपक्रमो निक्षेपोऽनुगमो नयश्चेति, तद्भेदा यथाक्रमं द्वौ द्वौ चेति, निरुक्तिश्चैवम्-उपक्रमणं दूरस्थस्य सतो वस्तुनस्तैस्तैः प्रकारैः समीपानयनमुपक्रमः, नियतं निश्चितं वा नामादिसम्भवत्पक्षरचनात्मकं क्षेपणं-न्यसनं निक्षेपः, अनुरूपं सूत्रार्थाबाधया तदनुगुणं गमनं-संहितादिक्रमेण व्याख्यातुः प्रवर्तनमनुगमो, नयनम्-अनन्तधर्मात्मकस्य वस्तुनो नियतैकधर्मावलम्बेन प्रतीतौ प्रापणं नयः। क्रमप्रयोजनं च-नानुपूर्व्यादिभिर्न्यासदेशमनानीतं शास्त्र निक्षेप्तुं शक्यं, न चौधनिष्पन्नादिभिर्निक्षेपैरनिक्षिप्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुगन्तुं, नापि सूत्राद्यनुगमेनाननुगतं नयैर्विचारयितुमित्ययमेवैषां क्रमः, तथा च पूज्याः-

"दारक्कमोऽयमेव उ निक्खिप्पइ जेन नासमीवत्थं।
अनुगम्मइ नानत्थं नानुगमो नयमयविहुणो ॥"

अत्र सङ्ग्रहश्लोकाः-

"उपक्रमोऽथ निक्षेपोऽनुगमश्च नयाः क्रमात्।
द्वाराण्येतानि भिद्यन्ते, द्वेधा त्रेधा द्विधा द्विधा ॥१॥
उपक्रम उपक्रान्तिर्दूरस्थनिकटक्रिया।
निक्षेपणं तु निक्षेपो, नामादिन्यसनात्मकः ॥२॥
सूत्रस्यानुगतिश्चित्राऽनुगमो नयनं नयः।
अनन्तधर्मणोऽर्थस्यैकांशेनेति निरुक्तयः ॥३॥
न्यासदेशागतं शास्त्र, न्यस्यते न्यस्तमेव तत्।
अन्वीयतेऽन्विते नीतिस्तेनैतेषामयं क्रमः ॥४॥'

इत्थं विनेयस्मरणार्थं भेदनिरुक्तिक्रमप्रयोजनभाञ्जि द्वाराणि वर्णितानि, तद्वर्णनाच्च फलादीनि वाच्यानीति प्रतिज्ञातं निर्वाहितम्। सम्प्रत्येभिरित्थं प्ररूपितैरेषामेव भेदप्रपञ्चनपुरस्सरं प्रक्रान्ताध्ययनं विचार्यते, तत्रोपक्रमो द्विधा-लौकिको लोकोत्तरश्च, तत्राद्यो नामस्थापनाद्रव्य-क्षेत्रकालभावभेदतः षोढा, तत्र च नामतश्चिरितरकालभाविनः सन्निहितकाल एव कारणं नामोपक्रमः, एवं स्थापनोपक्रमोऽपि, द्रव्योपक्रमः सचित्ताचित्तमिश्रभेदात् त्रिविधः, प्रत्येकोऽपि परिकर्मनाशभेदतो द्विविधः उक्तं च भाष्यकारेण-

"नामाई छब्भेओ उवक्कमो दव्वओ सचित्ताई।
तिविहो दुविहो य पुणो परिक्कमे वत्थुनासे य ॥"

तत्र परिकर्मणि सचित्तद्रव्योपक्रमोऽवस्थितस्यैव द्विपदचतुष्पदापदरूपस्य नरतुरगतरु-प्रभृतिसचित्तवस्तुनोऽविवक्षिताचित्तकेशाद्यवयवस्य यथाक्रमं रसायनशिक्षायुर्वेदादिवशतः तथाविधकर्मोदयादेः कालान्तरभाविनो वयःस्थैर्यविनयनप्रसूनोद्गमादिपरिणतिविशेषस्या-पादनम्, अचित्तद्रव्योपक्रमः कनकादेः कटककुण्डलादिक्रिया, मिश्रद्रव्योपक्रमः सचित्तस्यैव द्विपदादेः अचित्तकेशादिसहितस्य स्नानादिसंस्कारकरणम्, एवं विनाशेऽपि द्रव्योपक्रमस्त्रिधा-तत्र सचित्तद्रव्योपक्रमोऽवस्थितस्यैव सचित्तद्रव्यस्याविवक्षितपर्यायान्तरोत्पत्ति प्रत्यभिज्ञानि-वर्तकमसिपरश्वादितः प्राक्तनपर्यायापनयनम्, अचितद्रव्योपक्रम एवमेवाचित्तस्य रजतादेः पारदादिसम्पर्कतः स्वरूपादिभ्रंशनं, मिश्रद्रव्योपक्रमोऽपि तथैव शङ्खशृङ्खलाद्यलङ्कृतद्विरदादेः सचेतनस्य मुद्गरादिभिरभिधातः। एवं क्षेत्राद्युपक्रमा अपि परिकर्मविनाशभेदतो द्विभेदाः, तत्र यद्यपि क्षेत्रं नित्यममूर्तं च, ततो न तस्य परिकर्मविनाशौ स्तस्तथापि तदाधेयस्य जलादेर्नावादि-हेतुतस्तौ सम्भवत इत्युपचारतस्तदुपक्रमः, उक्तं च-

"खित्तमरूवं निच्चं न तस्स परिकम्मणं न य विनासो।
आहेयगयवसेण उ करणविनासोवयारोऽत्थ ॥१॥
नावाए उवक्कमणं हलकुलियाईहि वावि खेत्तस्स।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संमज्जभूमिकम्मे य पंथतलागाइयाणं च ॥२॥"

कालो वर्तनादिरूपत्वेन द्रव्यपर्यायात्मक एव, द्रव्यपर्यायौ च नरसिंहवदन्योऽन्यसंवलितौ, ततस्तद्द्वारेण तस्य गुणविशेषाऽऽधानविनाशावुपक्रमशब्दवाच्यौ, आह च-

"जं वत्तणादिरूवो कालो दव्वाण चेव पज्जाओ।

तो तक्करणविनासे कीरइ कालोवयारो उ॥

आह-मनुष्यक्षेत्रे सूर्यक्रियाव्यङ्ग्यो वर्तनादिद्रव्यपरिणतिनिरपेक्षोऽद्धाकालाख्यः कालोऽस्ति, यथोक्तम्-

"सूरकिरियाविसिट्ठो गोदोहादिकिरियासु निरवेक्खो।

अद्धाकालो भन्नइ समयक्खेत्तंमि समयाई॥"त्ति,

तत्र का वार्ता?, उच्यते, तस्यापि शङ्कुच्छायादिना यथावत्परिज्ञानत ऋक्षादिचारैरतिपाततश्चामूर्तत्वेऽपि परिकर्मविनाशम्भवादुपक्रमः, तथा च पूज्याः-

"छायाइ नालियाइ व परिकम्मं से जहत्थविन्नाणं।

रिक्खाईचारेहि य तस्स विनासो विवज्जासो॥"

भावोपक्रमस्तु यद्यपि भावस्य पर्यायत्वात् तस्य च द्रव्यात् कथञ्चिदनन्यत्वात्तदुपक्रमाभिधानत उक्त एव, तथापि जीवद्रव्यपर्यायोऽभिप्रायाख्यो भावशब्दाभिधेयोऽस्ति, यदुक्तम्-भावाभिख्याः पञ्च स्वरूपसत्तात्मयोन्यभिप्रायाः" इति, ततस्तस्य परचित्तवर्तिनः संवेदनाविषयतया विप्रकर्षवत इङ्गिताकारादिना परिज्ञानतः सन्निहितकरणं ज्ञातस्य वा तथाऽननुगुणानुगुणचित्रचेष्टातः कुपितप्रसन्नतापादनं भावपक्रम एव, स चावश्यमिहाभिधेयः, तदन्तर्गतत्वात् गुरुभावोपक्रमस्य, तस्य च सकलानुयोगप्रथमाङ्गत्वात्, उक्तं च-"भन्नइ वक्खाणंगं गुरुचित्तोवक्कमो पढमं"ति, शेषोपक्रमाणामपि चैतदङ्गत्वात्, तथा चाह-

"जुत्तं गुरुमयगहणं को सेसोवक्कमोवयारोऽत्थ?।

गुरुचित्तपसायत्थं तेऽवि जहाजोगमाजोज्जा॥१॥

परिकम्मणासणाओ देसे काले य जे जहा जोगा।

तो ते दव्वाईणं कज्जाऽऽहाराइकज्जेसुं॥२॥"

तत एतदभिधानाय द्रव्योपक्रमाद्भावोपक्रमः पृथगुच्यते, स च द्विविधः-प्रशस्ताप्रशस्तभेदात्, तत्राप्रशस्तो ब्राह्मणीगणिकाऽमात्यदृष्टान्ततोऽवसेयः, प्रशस्तश्च शिष्यस्य श्रुतादिहेतोर्गुरुभावोन्नयनं, यत आह-

"सीसो गुरुणो भावं जमुवक्कमए सुहं पसत्थमनो।

सहियत्थं स पसत्थो इह भावोवक्कमोऽहिगतो॥"

इत्युक्तो लौकिक उपक्रमः, शास्त्रीयस्त्वानुपूर्वीनामप्रमाणवक्तव्यताऽर्थाधिकारसमवतारात्मकः, तत्रानुपूर्वी नामादिदशप्रकारा अन्यत्र प्रपञ्चत उक्ता, इह पुनरुत्कीर्तनगणनात्मिकया तयाऽधिकार इति सैव भण्यते-तत्रोत्कीर्तनं विनयश्रुतं परीषहाध्ययनं चतुरङ्गीयमित्यादि संशब्दनं, गणनं सङ्ख्यानं, तच्च पूर्वानुपूर्वीपश्चानुपूर्वीअनानुपूर्वीभेदतस्त्रिविधं, तत्र पूर्वानुपूर्व्या गण्यमानमिदमध्ययनं प्रथमं, पश्चानुपूर्व्या षट्त्रिंशत्तमम्, अनानुपूर्व्या त्वस्यामेवैकाद्येकोकोत्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट्त्रिंशद्गच्छगतयां श्रेण्यामन्योऽन्याभ्यासतो द्विरूपोनसङ्ख्याभेदं भवति, उक्तं च-

"एकाद्या गच्छपर्यन्ताः, परस्परसमाहताः ।
राशयस्तिद्धि विज्ञेयं, विकल्पगणिते फलम् ॥"

इह चासम्मोहाय षट्पदाङ्गीकारतः प्रस्तारानयनोपाय उच्यते-तत्र चैकादीनि षडन्तानि षट् पदानि स्थाप्यन्ते, तानि चान्योऽन्यं गुण्यन्ते, ततश्च जातानि सप्त शतानि विंशत्युत्तराणि, तेषां चान्त्येन षट्केन भागहारः, तत्र लब्धं विंशत्युत्तरं शतं १२०, इयन्तः षष्ठपङ्क्तौ षट्का न्यस्यन्ते, तदधस्तावन्त एव क्रमेण पञ्चकचतुष्ककत्रिकद्विकैककाः स्थाप्याः, इत्थं जातानि षष्ठङ्क्तौ सप्त शतानि विंशत्युत्तराणि। ततो विंशत्युत्तरशतस्य पञ्चकेन भागहारः, तत्र च लब्धा चतुर्विंशतिः २४, तावत्सङ्ख्याः पञ्चमपङ्क्तौ क्रमेण पञ्चकचतुष्कत्रिकद्विकैकका न्यस्याः, जातं विंशत्युत्तरं शतं, तस्य चाधस्तादग्रेतनपङ्क्तिस्थमङ्कमपहाय यथामहत्सङ्ख्यमङ्कविन्यासः, तत्रोग्रेत-नपङ्क्तिस्थऋ पञ्चकस्तत्परित्यागतश्च सर्वबृहत्सङ्ख्यः षट्कश्चतुर्विंशतिवारानधः स्थाप्यते, ततस्त्रिकापेक्षया चतुष्को द्विकापेक्षया च त्रिक एककापेक्षया च द्विको बृहत्सङ्ख्यः तत एककश्च तावत एव वारान् न्यसनीयः, जातं पुनर्विंशत्युत्तरं शतम्, एवमग्रेतनपङ्क्तिस्थचतुष्कत्रिक-द्विकैकपरिहारतस्तथैव तावन्नेय यावत्पञ्चमपङ्क्तावपि पूर्णानि सप्त शतानि विंशत्युत्तराणि। ततश्चतुर्विशतेश्चतुष्केण भागहारः, तत्र लब्धाः षट् ६, ततश्चतुर्थपङ्क्तौ तावन्त एवाधौऽधश्चतुष्क-त्रिकद्विकैककाः स्थाप्याः, यावज्जाता चतुर्विंशतिः, ततश्चाग्रेतनपङ्क्तिस्थाङ्कपरिहारादि-प्रागुक्तयुक्तित एव पङ्क्तिः पूरणीया।

भूयः षट्कस्य त्रिकेण भागहारः, ततश्च लब्धो द्विकः, ततस्तृतीयपङ्क्तौ द्वौ त्रिको पुनर्द्वावेव द्विको भूय एककौ च द्वावधः स्थापनीयौ, अधस्ताच्च पुरःस्थिताङ्कत्यागतो बृहत्सङ्ख्याङ्कन्या-सतश्च विंशत्युत्तरसप्तशतप्रमाणैव पङ्क्तिः पूरणीया। षड्भागहारलब्धस्य द्विकस्य विभजने लब्ध एकः, ततो द्वितीयपङ्क्तौ द्विक एककश्चैको विरचनीयः, तदधश्च पुरोदितपुरस्याङ्क-परिहारादिन्यायतस्तावत्सङ्ख्यैवं द्वितीयपङ्क्तिः कार्या। प्रथमपङ्क्तिस्तु पुरस्थाङ्कपरिहारतः पूरणीया। उक्तं च -

"गणितेऽन्त्यविभक्ते तु, लब्धं शेषैर्विभाजयेत्।
आदावन्ते च तत्स्थाप्यं, विकल्पगणिते क्रमात्॥"

इह च परस्परगुणनागतराशिर्गणितमुच्यते, शेषास्तु षट्कापेक्षया पञ्चकादयः, 'आदा'-विति च षष्ठपङ्क्तौ, 'अन्त'इति च पञ्चमादिपङ्क्ताविति। उक्ताऽऽनुपूर्वी, सम्प्रति नाम, तत्र नमति-ज्ञानरूपादिपर्यायभेदानुसारतो जीवपरमाण्वादिवस्तुप्रतिपादकतया प्रह्वीभवतीति नाम,

"जं वत्थुणोऽभिहाणं पज्जवभेयानुसारि तं नाम।
पइभेयं जं नमए पइभेयं जाइ जं भणियं॥"

तच्चैकनामादि दशनामान्तम्, इह तु षड्विधनामन्दयिकादिषड्भावरूपेणाधिकारः, तदन्त-र्भूतक्षायोपशमिकभावे श्रुतज्ञानात्मकत्वेन प्रस्तुताध्ययनस्यावतारात्, आह च-

"छव्विहनामे भावे खओवसमिए सुयं समोयरइ।
जं सुयनाणावरणक्खओवसमजं तयं सव्वं॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमीयते-परिच्छिद्यतेऽनेनेति प्रमाणं, तच्च द्रव्यक्षेत्रकालभावभेदाच्चतुर्विधं, तत्रास्य क्षायोपशमिकभावरूपत्वेन भावप्रमाणेऽवतारः, यत आह-

"दव्वाइ चउब्भेयं पमीयए जेन तं पमाणंति।
इणमज्झयणं भावोत्ति भावमाणे समोयरइ ॥"

भावप्रमाणं च गुणनयसङ्ख्याभेदतस्त्रिधा, तत्रास्य गुणप्रमाणसङ्ख्याप्रमाणयोरेवावतारः, नयप्रमाणे तु यद्यपि श्रुतकेवलिनोक्तम्-

"अहिगारो तिहि उ गोसत्रं'ति, तथा 'नत्थि नएहिं विहूणं सुत्तं अत्थो व जिनमए किं च।
आसज्ज उ सोयारं नए नयविसारओ बूया ॥"

तथापि सम्प्रति तथाविधनयविचारणाव्यवच्छेदतोऽनवतार एव, तथा च तेनैव भगवतोक्तम्-

मूढनइयं सुयं कालियं तु न नया समोयरंति इहं।
अपहुत्ते समोयारो नत्थि पहुत्ते समोयारो ॥१॥"
(तथा)-"जावंति अज्जवयरा अपहुत्तं कालियोनुओगस्स।
तेनारेण पहुत्तं कालियसुयदिट्ठिवाए य ॥२॥"

महामतिनाऽप्युक्तं-मूढनयं तु न संपइ नयप्पमाणेऽवयारो से" । गुणप्रमाणं तु द्विधा-जीवगुणप्रमाणजीवगुणप्रमाणं च, तत्रास्य जीवोपयोगरूपत्वाज्जीवगुणप्रमाणेऽवतारः, तस्मिन्नपि ज्ञानदर्शनचारित्रभेदतस्त्र्यात्मकेऽस्य ज्ञानरूपतया ज्ञानप्रमाणे, तत्रापि प्रत्यक्षानु-मानोपमानाऽऽगमात्मके प्रकृताध्ययनस्याप्तोपदेशरू पतयाऽऽगमप्रमाणे, तत्रापि लौकिक-लोकोत्तरभेदे परमगुरुप्रणीतत्वेन लोकोत्तरे सूत्रार्थोभयात्मनि, तथा चाह-

"जीवानन्नत्तणओ जीवनुनेनेह भावओ नाणे।
लोउत्तरसुत्तत्थो भयागमे तस्स भावाओ ॥"

तत्राप्यात्मानन्तरपरम्परागमभेदतस्त्रिविधे अर्थतस्तीर्थकरगणधरतदन्तेवासिनः सूत्रतस्तु स्थविरतच्छिष्यतत्प्रशिष्यानपेक्षय यथाक्रममस्यात्मानन्तरपरम्परागमेष्ववतारः, सङ्ख्याप्रमाण-मनुयोगद्वारादिषु प्रपञ्चितमिति तत एवावधारणीयं, तत्र चास्य परिमाणसङ्ख्यायामवतारः, तत्रापि कालिकश्रुतदृष्टिवादश्रुतपरिमाणभेदतो द्विभेदायां कालिकश्रुतपरिमाणसङ्ख्यायां सङ्ख्यातपरिमाणात्मिकायां पर्यायापेक्षया त्वनन्तपरिमाणात्मिकायाम्, अनन्तगमपर्याय-त्वादागमस्य, तथा चाह-"अनंता गमा अनंता पज्जवा" इत्यादि। वक्तव्यता-पदार्थविचारः, सा च खपरोभयसमयभेदतस्त्रिधा, तत्र स्वसमयः-अर्हन्मतानुसारिशास्त्रात्मकः, परसमयः-कपिलाद्यभिप्रायानुवर्तिग्रन्थस्वरूपः, उभयसमयस्तूभयमतानुगतशास्त्रस्वभावः, तत्रास्य स्व-समयवक्तव्यतायामेवावतारः, स्वसमयपदार्थानामेवात्र वर्णनात्, यत्रापि परोभयसमयपदार्थ-वर्णनं तत्रापि स्वसमयवक्तव्यतैव, परोभयसमययोरपि सम्यग्दृष्टिपरिगृहीत्वेन स्वसमयत्वात्, अत एव सर्वाध्ययनानामपि स्वसमयवक्तव्यतायामेवावतारः, तदुक्तम्-

"परसमओ उभयं वा सम्मद्दिट्ठिस्स ससमओ जेणं।
तो सव्वज्झयणाइं ससमयवत्तव्वनिययाइं ॥"ति

अर्थाधिकारः 'पढमे विनओ' इत्यनेन स्वत एव निर्युक्तिकृताऽभिहित इति नोच्यते। इह

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

च वक्तव्यता प्रतिसूत्राभिधेयार्थविषया, अर्थाधिकारस्तु 'अहिगारो इत्थ विणएण' मित्यनेनैवाभिहितः । समवतारस्त्वानुपूर्व्यादिषु लाघवार्थं यथासम्भवमुक्त एव इति न पुनरुच्यते,

"अहुणा य समोयारो जेन समोयारियं पइद्दारं ।
विनयसुयं सोऽनुगतो लाघवओ न उण वच्चेति ॥"

निक्षेपस्त्रिधा-ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च, आह च-

भन्नइ घेप्पइ य सुहं निक्खेवपयानुसारओ सत्थं ।
ओहो नामं सुत्तं निक्खेयव्वं तओऽवस्सं ॥"

(ओघः) अध्ययनादि सामान्यनाम, आह च-

ओहो जं सामन्नं सुयाभिहाणं चउव्विहं तं च ।
अज्झयणं अज्झीणं आओ झवणा य पत्तेय ॥१॥
नामादि चउब्भेयं वन्नेऊणं सुयानुसारेणं ।
विनयसुयं आउज्जं चउसुंपि कमेण भावेसुं ॥२॥
जेन सुहप्पज्झयणं अज्झप्पाणयणमहिय नयनं वा ।
बोहस्स संजमस्स य मोक्खस्स व तो तमज्झयणं ॥३॥
अक्खीणं दिज्जंतं अव्वोच्छित्तिणयतो अलोगो व्व ।
आओ नानाईणं झवणा पावाण कम्माणं ॥४॥

प्रकटार्था एव, नवरं येन हेतुना शुभात्माध्ययनं शुभस्य-पुण्यस्यात्मन्याधिक्येनायनं-गमनं ततो भवति, पठ्यते वा-'सुहज्झप्पयणं'ति, तत्र शुभं-सङ्क्लेशविरहितमध्यात्मं-मनः तत्रायनमर्थादात्मनः ततः, तथाऽधिकं नयनं-प्रकर्षवत्प्रापणं, कस्य ?-बोधस्य-तत्त्वावगमस्य संयमस्य वा-पृथिव्यादिसंवरक्षणात्मकस्य मोक्षस्य वा-कृत्स्नकर्मक्षयलक्षणस्य ततो भवति, आत्मनीति गम्यते, 'ततः' तस्माद्धेतोः, प्राग्वदध्ययनमुच्यत इति शेषः, तथा 'अव्यवच्छित्तिनयतः' अव्यवच्छित्तिनयमाश्रित्य द्रव्यास्तिकनयाभिप्रायेणेत्यर्थः, 'अलोकवत्' इत्युपलक्षणत्वादलोकाकाशवदिति । नामनिष्पन्ननिक्षेपेऽस्य विनयश्रुतमिति द्विपदं नाम, ततो विनयस्य श्रुतस्य च निक्षेपः शास्त्रान्तर उक्तोऽप्यवश्यमिह वक्तव्यः । तत्र च विनयनिक्षेपो बहुवक्तव्य इति तमतिदेष्टुं श्रुतनिक्षेपस्तु न तथेति तमभिधातुमाह-

नि. [२९] विनओ पव्वद्दिट्ठो सुयस्स चउक्कओ उ निक्खेवो ।
दव्वसुय निण्हगाइ भावसुय सुए उ उवउत्तो ॥

वृ. विनीयते-अपनीयतेऽनेन कर्मेति विनयः, स च पूर्वं-दशवैकालिकविनयसमाधिनामाध्ययने उद्दिष्टउक्तः पूर्वोद्दिष्ट, स्थानाशून्यार्थं तदुक्तमेव किञ्चिदुच्यते-

"विनयस्स य सुत्तस्स य निक्खेवो होइ दुण्ह य चउक्को ।
दव्वविनयम्मि तिनिसो सुवन्नमिति एवमातीते ॥१॥
लोकोवयारविनओ अत्थनिमित्तं च कामहेउं च ।
भयविनयमोक्खविनओ विनओ खलु पंचहा नेओ ॥२॥
अब्भुट्ठाणं अंजलि आसनदानं च अतिहिपूया य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोगोवयारविनओ देवयपूया य विभवेणं ॥३॥
अब्भासवत्तिछंदानुत्तणा देसकालदानं च ।
अब्भुट्ठाणं अंजलि आसनदानं च अत्थकए ॥४॥
एमेव कामविनओ भए य नेयव्व आनुपुव्वीए ।
मोक्खंमिवि पंचविहो परूवणा तस्सिमा होइ ॥५॥
दंसणनाणचरित्ते तवे य तह ओवयारिए चेव ।
एसो य मोक्खविनओ पंचविहो होइ नायव्वो ॥६॥
दव्वाण सव्वभावा उवइट्ठा जे जहा जिणिंदेहिं ।
ते तह सद्दहइ नेरो दंसणविणओ भवइ तम्हा ॥७॥
नाणं सिक्खइ नाणं गुणेइ नानेण कुणइ किच्चाइं ।
नाणी नवं न बंधइ नाणविनीओ हवइ तम्हा ॥८॥
अट्ठविहं कम्मचयं जम्हा रित्तं करेइ जयमानो ।
नवमन्नं च न बंधइ चरित्तविनओ हवइ तम्हा ॥९॥
अवनेइ तवेण तमं उवनेइ य सग्गमोक्खमप्पाणं ।
तवनियमनिच्छियमई तवोविनीओ हवइ तम्हा ॥१०॥
अह ओवयारिओ पुन दुविहो विनओ समासओ होइ ।
पडिरूवजोगजुंजण तहय अनासायणाविनओ ॥११॥
पडिरूवो खलु विनओ काइयजोगो य वायमानसिओ ।
अट्ठचउव्विहदुविहो परूवणा तस्सिमा होइ ॥१२॥
अब्भुट्ठाणं अंजलि आसनदानं अभिग्गह किती य ।
सुस्सूसण अनुगच्छण संसाहण काय अट्ठविहो ॥१३॥
हियमियअफरुसवाई अनुवीईभास वाइओ विनओ ।
अकुसलमनोनिरोहो कुसलमणउदीरणा चेव ॥१४॥
पडिरूवो खलु विनओ परानुवित्तिमइओ मुनेयव्वो ।
अप्पडिरूवो विनओ नायव्वो केवलीणं तु ॥१५॥
एसो भे परिकहिओ विनओ पडिरूवलक्खणो तिविहो ।
बावन्नविहिविहाणं बिंति अनासायणाविनयं ॥१६॥
तित्थयर १ सिद्ध २ कुल ३ गण ४ संघ ५ किरिय ६ धम्म ७ नाण ८ नाणीणं ९ ।
आयरिय १० थेर ११ उवज्झाय १२ गणीणं १३ तेरस पयाइं ॥१७॥
अनसायणा य भत्ती बहुमाणो वण्णसंजलणया य ।
तित्थयराई तेरस चउग्गुणा होंति बावन्ना ॥१८॥

स्पष्टार्था:, नवरं 'तिनिशो' वृक्षविशेष:, लोकोपचारविनय: लोकपङ्क्तिफल:, अर्थनिमित्तं चेति, विनय इति गम्यते, ततोऽर्थप्राप्तिहेतोरीश्वराद्यनुवर्तनमर्थविनय:, कामहेतोश्चेति इहापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनय इति प्रक्रमः, ततश्च शब्दादिविषयसम्पत्तिनिमित्तं तथा तथा प्रवर्तनं कामविनयः, दुष्प्रधर्ष-नृपतिसामन्तादेः प्राणादिभयेनानुवर्तनं भयविनयः, इहलोकानपेक्षस्य श्रद्धानज्ञानशिक्षादिषु कर्मक्षयाय प्रवर्तनं मोक्षविनयः, स च दर्शनज्ञानचारित्रतपउपचारभेदात् मञ्चप्रकारः, तत्र चौपचारिकोऽनुरूपव्यापारसम्पादनानाशतनाभेदतो द्विभेदः, तत्र चाद्ये अभ्युत्थानम्-आगच्छति गच्छति च दृष्टे गुरावासनमोचनम्, अभिग्रहो-गुरुविश्रामणादिनियमः, कृतिः-द्वादशावर्ता-दिवन्दनं, शुश्रूषणं 'न पक्खओ न पुरओ' इत्यादिविधिना गुरुवचनश्रवणेच्छा, पर्युपासन-मित्यर्थः, अनुगमनम्-आगच्छतः प्रत्युद्गमनं, संसाधनं-गच्छतः सम्यगनुव्रजनं, 'कुलं'नागे-न्द्रादिः 'गणः' कोटिकादिः, 'क्रिया' अस्ति परलोकोऽस्त्यात्माऽस्ति च सकलक्लेशलेशा-कलङ्कितं मुक्तिपदमित्यादिप्ररूपणात्मिकेह गृह्यते, 'धर्मः' श्रुतचारित्रात्मकः 'ज्ञानं' मित्यादि 'आचार्यः' अनुयोगाचार्यः 'गणी' गणाचार्यः अनाशानता-मनोवाक्कायैरप्रतीपप्रवर्तनं, भक्तिः-अभ्युत्थानादिरूपा, बहुमानोमानसोऽत्यन्तप्रतिबन्धः, वर्णनं वर्णः-श्लाघनं तेन सञ्जवलना-ज्ञानादिगुणोद्दीपना वर्णसंज्वलना ॥ श्रुतस्य चत्वार परिमानमस्येति चतुष्कः, सङ्ख्याया अतिशदन्तायाः कन्निति कन्, तुशब्दश्चतुर्विधनिक्षेपोऽवश्यं सर्वत्र वक्तव्य इति विशेषद्योतकः,

"जत्थ उ जं जाणेज्जा निक्खेवं निक्खेवे निरवसेसं।
जत्थवि नवि जाणिज्जा चउक्कयं निक्खिवे तत्थ ॥"

निक्षेपो-न्यासः, तत्राद्ययोः सुगमत्वात्तृतीयमाह-द्रव्यतो द्रव्यरूपं वा श्रुतं द्रव्यश्रुतम्, आगमतो नोआगमतश्च, तत्रागमतोज्ञाताऽनुपयुक्तः, नोआगमतस्त्वाह-निह्युते-आगमाभिहित-मर्थमतिक्लिष्टकर्मोदयात् कुयुक्तिभिरपनयतीति निह्नवो-जमालिप्रभृतिः पश्चात्कृतश्रुत-परिणतिः, आदिशब्दात्पुरस्कृतश्रुतपरिणतिसत्त्वपरिग्रहः, भावश्रुतमप्यागमनोआगमभेदतो द्विधा, तत्रागमतोऽभिधातुमाह-भावतो भावरूपं वा श्रुतं भावश्रुतं, प्राकृतत्वादिह पूर्वत्र च बिन्दुलोपः, 'श्रुते' श्रुतविषये, 'तुः' अवधारणे भिन्नक्रमः, तत उपयुक्त एव, कोऽर्थः ?-यस्य श्रुतमिति पदं ज्ञातं तत्र चोपयोगः स भावश्रुतं, तदुपयोगानन्यत्वाद, अग्न्युपयुक्तमानव-काग्निवदिति गाथार्थः ॥

उक्तावोघनामनिष्पन्ननिक्षेपौ, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपः प्राप्तावसरः, तथापि स नोच्यते, यतः सति सूत्रेऽसौ सम्भवति, सूत्रं च सूत्रानुगमे, स चानुगमभेद इति अनुगम एव तावदुपवर्ण्यते-द्विविधोऽनुगमः-निर्युक्त्यनुगमः सूत्रानुगमश्च, तत्राद्यो निक्षेपनिर्युक्ति-उपोद्घातनिर्युक्तिसूत्रस्पर्शिकनिर्युक्त्यनुगमविधानतस्त्रिविधः, तत्र च निक्षेपनिर्युक्त्यनुगम उत्तरादिनिक्षेपप्रतिपादनादनुगत एव, उपोद्घातनिर्युक्त्यनुगमस्तु द्वारगाथाद्वयादवसेयः, तच्चेदम्-

"उद्देसे निद्देसे य निग्गमे खेत्त काल पुरिसे य।
कारण पच्चय लक्खण नए समोयारणानुमए ॥१॥
किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं ?।
कइ संतरमविरहियं भवागरिस फासण निरुत्ती ॥२॥

एतदर्थः सामायिकनिर्युक्तितोऽवसेयः, सूत्रस्पर्शिकनिर्युक्त्यनुगमस्तु सूत्रावयवव्याख्या-नरूपत्वात् सूत्रस्पर्शिकनिर्युक्तेः सति सूत्रे सम्भवति, तच्च सूत्रानुगम एवेति तत्रैव वक्ष्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्वेवमस्थानमिदमस्येति कस्मादिहोद्देशः ? उच्यते, निर्युक्त्यनुगममात्रसामान्यात्, तदुक्तम्-

"संपइ सुत्तप्फासियनिज्जुत्ती जं सुयस्स वक्खाणं।
तीसेऽवसरो सा पुण पत्तावि न भन्नए इहइं ॥१॥
किं जेनासइ सुत्ते कस्स तई तं जया कमप्पत्तो।
सुत्तानुगमो वोच्छं होही तीसे तया भावो ॥२॥
अत्थाणमियं तीसे जइ तो सा कीस भन्नई इहयं ?।
सा भन्नइ निज्जुत्तीमेत्तसामन्नओ नवरं ॥३॥"

साम्प्रतं सूत्रानुगमः, तत्रालीकोपघातजनकत्वादिदोषरहितं निर्दोषसारत्वा(वत्त्वा)दि-गुणान्वितं सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(१) संजोगा विप्पमुक्कस्स अनगारस्स भिक्खुणो।
विनयं पाउक्करिस्सामि आनुपुव्विं सुणेह मे ॥

वृ. अस्य च संहितादिक्रमेण व्याख्या-तत्र चास्खलितपदोच्चारणं संहिता, सा चानुगतैव, सूत्रानुगमस्य तद्रूपत्वात्, तथा चाह-"होइ कयत्थो वोत्तुं सपयच्छेयं सुयं सुयानुगमो"त्ति। पदं तु नामिकनैपातिकादि स्वधियैव भावनीयं, पदार्थस्त्वयम्-अन्यसंयुक्तस्यासंयुक्तस्य वा सचित्तादिवस्तुनो द्रव्यादिना संयोजनं-संयोगः, स च संयुक्तसंयोगादिभेदेनानेकधा वक्ष्यते, तस्मान्मात्रादिसंयोगरूपादौदयिकादिक्लिष्टतरभावसंयोगात्मकाच्च विविधैः-ज्ञानभावनादि-भिर्विचित्रैः प्रकारैः प्रकर्षेण-परीषहोपसर्गादिसहिष्णुतालक्षणेन मुक्तो-भ्रष्टो विप्रमुक्तः, तस्य, 'अनगारस्ये'तिअविद्यमानमगारमस्येत्यनगार इति व्युत्पन्नोऽनगारशब्दो गृह्यते, यस्त्वव्युत्पन्नो रूढिशब्दो यतिवाचकः, यथोक्तम्-

'अनगारो मुनिर्मौनी, साधुः प्रव्रजितो व्रती।
श्रमणः क्षपणश्चैव, यतिश्चैकार्थवाचकाः ॥१॥ इति,

स इह न गृह्यते, भिक्षुशब्देनैव तदर्थस्य गतत्वात्, तत्र चागारं द्विधा-द्रव्यभावभेदात्, तत्र द्रव्यागारमगैः-द्रुमदृषदादिभिर्निर्वृत्तं, भावागारं पुनरगैः-विपाककालेऽपि जीवविपाकतया शरीरपुद्गलादिषु बहिःप्रवृत्तिरहितैरनन्तानुबन्ध्यादिभिनिर्वृत्तं कषायमोहनीयं, तत्र च द्रव्या-गारपक्षे तन्निषेधे ततोऽनगारस्याविद्यमानगृहस्येत्यर्थः, भावागारपक्षे त्वल्पताभिधायी, ततः स्थितिप्रदेशानुभागतोऽत्यल्पकषायमोहनीयस्येत्यर्थः, कषायमोहनीयं हि कर्म, न च कर्मणः स्थित्यादिभूयस्त्वे विरतिसङ्गमः, यत आगमः-

"सत्तण्हं पयडीणं अब्भितरओ उ कोडिकोडीओ।
काऊण सागराणं जइ लहइ चउण्हमन्नयरं ॥"

इत्यादि, क्लिष्टतरभावसंयोगमुक्तत्वेनैव चास्य गतत्वे पुनरभिधानं कषायमोहनीयस्याति-दुष्टताख्यापनार्थं, विशेष्यमाह-'भिक्षो'रिति, अत्र च पचनपाचनादिव्यापारोपरमतः साधुर्भिक्षते तद्धर्मा चेत्यर्थ "सनाशंसभिक्ष उ"रिति ताच्छीलिक उप्रत्ययः, अस्य च वर्तमानाधिकार-विहितत्वेऽपि 'सञ्ज्ञाप्रकारास्ताच्छीलिका' इति भाष्यकारवचनाद्भिक्षुशब्दस्त्रिकालविषयो यतिपर्यायः सिद्धो भवति, शेषविवक्षायां च षष्ठी, अथवा-'अनगारस्सभिक्खुणो'त्ति अस्वेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्षुरस्वभिक्षुः-जात्याद्यनाजीवनादनात्मीकृतत्वेनानात्मीयानेव गृहिणोऽन्नादि भिक्षत इतिकृत्वा, स च यतिरेव, ततोऽनगारश्चासावस्वभिक्षुश्च अनगारास्वभिक्षुस्तस्य, किमित्याह-विशिष्टो विविधो वा नयो-नीतिर्विनयः-साधुजनासेवितः समाचारस्तं, विनमनं वा विनतं 'नीयं सेज्जं गइं ठाणं' इत्याद्यागमात्, द्रव्यतो नीचैर्वृत्तिलक्षणं प्रह्वत्वं भावतश्च साध्वाचारं प्रति प्रवणत्वं 'प्रादुष्करिष्यामि' प्रकटयिष्यामि, कथमित्याह-पूर्वस्य पश्चादनुपूर्वं तस्य भाव इत्यर्थे "गुण-वचनब्राह्मणादिभ्यः" कर्मणि चेति ष्यञ्, तस्य च षित्करणसामर्थ्यात् स्त्रीत्वे "षिद् गौरादि-भ्यश्चे"ति ङीष्यानुपूर्वी क्रमः परिपाटीतियावत् तया, द्वितीया तु 'छन्दोवत् सूत्राणी'ति न्यायतः छान्दसत्वे 'सुपां सुपो भवन्ती'ति वचनात् तृतीयार्थे, 'शृणुत' आकर्णयत श्रवणं प्रत्यवहिता भवत, यद्वा शृणु 'इहे'ति जगति जिनमते वा, व्याख्याद्वयेऽपि शिष्याभिमुखी करणमित्यर्थः।

अनेन च पराङ्मुखमपि प्रतिबोधयतो व्याख्यातुर्धर्म्म एवेति ख्यापितं भवति, तथा च-

"नभवति धर्मः श्रोतुः सर्वस्यैकान्तता हितश्रवणात्।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति॥"

'मे' मम विनयं विनतं वा प्रादुष्करिष्यत इति प्रक्रमः। उक्तः पदार्थस्तदभिधानात् सामा-सिकपदान्तर्गतः पदविग्रहश्च (उक्त इति), ततश्चालनावसरः, सा च सूत्रार्थगतदूषणात्मिका, "सुत्तगयमत्थविसयं व दूसणं चालणं मयं तस्स" इति वचनात्, तत्र सूत्रचालना-संयोगस्य विप्रमुक्तक्रियां प्रति कर्तृत्वात् संयोगादिति कथं पञ्चमी?, अर्थचालना च 'विनयं प्रादुष्क-रिष्यामी'ति प्रतिज्ञातम्, उत्तरत्र च 'आणाऽनिद्देसकरे' इत्यादिना 'खड्डुयाहिं चवेडाहिं' इत्यादिना च विपर्ययप्रतिपादनमपि दृश्यते, इति कथं न प्रतिज्ञाक्षितिः?. प्रत्यवस्थानं-शब्दार्थन्यायतः परोपन्यस्तदोषपरिहाररूपं, यत आह-

"सद्दत्थन्नायाओ परिहारो पच्चवत्थाणं" तत्र च यद्यपि संयोगेन विमुच्यमानो भिक्षुः कर्म तथापि कर्तृत्वेनात्र विवक्ष्यते, ततश्च तस्य तं विप्रमुञ्चतो विश्लेषोऽस्तीति विश्लेषक्रियायां संयोगस्य ध्रुवत्वेनापादानत्वान्न्याय्यैव पञ्चमी, अत एव विप्रमुक्त इत्यत्र कर्मकर्तुः कर्मवद्-भावात् कर्मणि क्तोऽपि सिद्धो भवति इति न सूत्रदोषो, नाप्यर्थदोषः, यतो यद् यल्लक्षणं तत्तद्वि-पर्ययाभिधान एव तल्लक्षणमल्केशेन ज्ञातुं शक्यमिति अत्र विनयाभिधानप्रतिज्ञानेऽप्यविनया-भिधानं, तथा च शय्यम्भवप्रणीताचारकथायामपि "वयछक्कायछक्क"मित्यादिनाऽऽचार-प्रक्रमेऽप्यनाचारवचनम्। अथवा एकमपीदं सूत्रमावृत्त्या 'श्वेतो धावती'तिवदर्थद्वयाभिधायकं, ततश्चायमन्योऽर्थः-संयोगेन-कपायादिसम्पर्कात्मकेनाप्यविप्रमुक्तः-अपरित्यक्तः, संयोगा-विप्रमुक्तस्तस्य, ऋणमिव कालान्तरक्लेशानुभवहेतुतया ऋणम्-अष्टप्रकारं कर्म तत् करोतीति, कोऽर्थः?-तथा तथा गुरुवचनविपरीतप्रवृत्तिभिरुपचिनोतीति ऋणकारस्तस्य, 'भिक्षोः' कषायादिवशतो जीववीर्यविकलस्य पौरुषघ्नीमेव भिक्षां तथाविधफलनिरपेक्षतया भ्रमणशीलस्य 'विनयं प्रादुष्करिष्यामी'ति "प्राकाश्यसम्भवे प्रादु"रिति वचनात् प्रादुःशब्दस्य सम्भवार्थस्यापि दर्शनादुत्पादयिष्यामि, सम्भवति हीदमध्ययनमधीयानानां गुरुकर्मणामपि प्रायो विनीताविनीतगुणदोषविभावनातो ज्ञानादिविनयपरिणतिः, अथवा विरुद्धो नयो विनयोऽसदाचार इत्यर्थः, तं प्रादुष्करिष्यामि-प्रकटयिष्यामि, कस्य?-'भिक्षोः' उक्तन्यायेन

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भिक्षणशीलस्य, सम्यग्-अविपरीतो योगः-समाधिः संयोगः, ततो विविधैः परीषहासहन-गुरुनियोगासहिष्णुत्वालस्यादिभिः प्रकारैः प्रकर्षेण मुक्तो विप्रमुक्तः तस्य, शेषं प्राग्वत्।

एवं चाविनयप्रतिपादनस्यापि प्रतिज्ञातत्वात् सर्वं सुस्थम्। अपरस्त्वाह-प्रतिज्ञातमपि विनयमभिधित्सोरप्रस्तुतम्, इदमपि बालप्रजल्पितं, यतः शास्त्रारम्भेऽभिधेयाद्यवश्यमभिधेयम्, अन्यथा प्रेक्षावत्प्रवृत्त्यसम्भवात्, तत्प्रदर्शनात्मकं चैतत् प्रतिज्ञानं, तथाहि-विनयं प्रादुष्करिष्यामीत्युक्ते विनयोऽस्याध्ययनस्याभिधेयः, तत्प्रादुष्करणं फलं, तथा चेदमुपेयम्, उपायश्चास्यप्रस्तुताध्ययनम्, इत्यनयोरुपायोपेयभावलक्षणः सम्बन्ध इति च दर्शितं भवति, ततो नाप्रस्तुतत्वं प्रतिज्ञानस्येति स्थितम्। सम्प्रति सूत्राऽऽलापकनिष्पन्ननिक्षेपस्य सूत्रस्पर्शिकनिर्युक्तेश्च प्रस्ताव इति मन्यमानः संयोग इत्याद्यं पदं स्पृशन्निक्षेप्तुमाह निर्युक्तिकृत्-

नि.[३०] संजोगे निक्खेवो छक्को दुविहो उ दव्वसंजोगे।
संजुत्तगसंजोगो नायव्वियरेयरो चेव॥

वृ. 'संयोग' इति संयोगविषयः 'निक्षेपः' न्यासः, षट् परिमाणमस्येति षट्कः प्राग्वत्कन्, एतद्भेदाश्च नामस्थापनाद्रव्यक्षेत्रकालभावाः प्रसिद्धत्वादुत्तरत्र व्याख्यानत उन्नीयमानत्वाच्च नोक्ताः, अत्र च-

"संहितादिर्यतो व्याख्याविधिः सर्वत्र दृश्यते।
नामादिविधिनाऽऽरब्धुं, न व्याख्या युज्यते ततः॥१॥
इत्याहुरविभाव्यैव, स्याद्वादं वादिनोऽपरे।
यत्तदत्र निराकार्यमाचक्षाणेन तद्विधिम्॥२॥
स्यादस्तीत्यादिको वादः, स्याद्वाद इति गीयते।
नयौ न च विमुच्यायं, द्रव्यपर्यायवादिनौ॥३॥
अतश्चैतद्द्वयोपेतं, स्वं मतं समुदाहृतम्।
सञ्ज्ञाततत्त्वसंविद्भिः, स्याद्वादः परमेश्वरैः॥४॥
ते हि तीर्थविधौ सर्वे, मातृकाख्यं पदत्रयम्।
उत्पत्तिविगमध्रौव्यख्यापकं सम्प्रचक्षते॥५॥
उत्पत्तिविगमावत्र, मतं पर्यायवादिनः।
द्रव्यार्थिकस्य तु ध्रौव्यं, मातृकाख्यपदत्रये॥६॥
ततश्च-द्रव्यत्वमन्वयित्वेन, मृदो यद्वद् घटादिषु।
तद्वदेवान्वयित्वेन, नामस्थापनयोरपि॥७॥
अन्वयित्वं तु सर्वत्र, सङ्केतान्नाम्न उच्यते।
स्थापनायाश्च तद्रुपक्रियातो बुद्धितोऽपि वा॥८॥
तन्नामस्थापनाद्रव्यनिक्षेपैरनुवर्तितः।
द्रव्यार्थिकनयो भावनिक्षेपादितरः पुनः॥९॥
तथा च महामतिः-"तित्थयरवयणसंगहविसेसपत्थारमूलवागरणी।
दव्वट्ठिओवि पज्जवणओ य सेसा वियप्पा सिं॥१०॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(तथा) "नामंठवणादवियत्ति एस दव्वद्वियस्स निक्खेवो।
भावत्ति पज्जवद्विय परूवणा एस परमत्थो ॥११॥"
यद्वा किन्न: किलैताभ्यां, किन्त्वेष विधिराश्रितः।
यद्याख्या वस्तुतत्त्वस्य, बोधायैव विधीयते ॥१२॥
तच्च नामादिरूपेण, चतूरूपं व्यवस्थितम्।
नामाद्येकान्तवादानामयुक्तत्वेन संस्थितेः ॥१३॥
(तथाहि-नामनय आह-) यतो नाम विना नास्ति, वस्तुनो ग्रहणं ततः।
नामैव तद्यथा कुम्भो, मृदेवान्यो न वस्तुनः ॥१४॥

(तथाहि)-यत् प्रतीतावेव यस्य प्रतीतिस्तदेव तस्य स्वरूपं, यथा मृत्प्रतीतावेव प्रतीयमानस्य घटस्य मृजेव रूपं, नामप्रतीतावेव च प्रतीयते वस्तु, न च विनापि नाम निर्विकल्पकविज्ञानेन वस्तुप्रतीतिरस्तीति हेतोरसिद्धता, सर्वसंविदां वाग्रूपत्वात्, तथा च भर्तृहरिः-

वाग्रूपता चेद्बोधस्य, व्युत्क्रामेतेह शाश्वती।
न प्रकाशः प्रकाशेत, सा हि प्रत्यवमर्शिनी ॥"

यदि च नामरूपमेव वस्तु न स्यात ततश्च तदवगतावपि वस्तुनि संशयादीनामन्यतमदेव स्यात, तथा च पूज्याः-

"संसय विवज्जओ वाऽणज्झवसाओऽवि वा जहिच्छाए।
होज्जऽत्थे पडिवत्ती न वत्थुधम्मो जया नामं ॥"

स्थापनानय आह-

स्थापनेत्याकारः, ततश्चप्रमाणमिदमेवार्थस्याऽऽकारमयतां प्रति।
नामादि न विनाऽऽकारं, यतः केनापि वेद्यते ॥

तथाहि-नाम्नोऽर्थान्तरेऽपि वर्तयितुं शक्यत्वान्न तदुल्लेखेऽप्याकारावभासमन्तरेण नियत-नीलाद्यर्थग्रहणमित्याकारग्रहण एव ग्रहात् सर्वस्य सिद्धमाकारमयत्वं, ततो ज्ञानज्ञेयाभिधानाभिधेयादिसकलमाकाररूषितमेव संव्यवहारावतारि, तद्विकलस्य खपुष्पस्येवासत्त्वात्, उक्तं-

"आगारो च्चिय मइसद्दवत्थुकिरियाफलाभिहाणाइं।
आगारमयं सव्वं जमनागारं तयं नत्थि ॥१॥
न परानुमयं वत्थुं आगाराभावओ खपुप्फं व।
उवलंभव्ववहाराभावओ नाणगारं च ॥२॥"

(द्रव्यनय आह-) यथा नामादि नाकारं, विना संवेद्यते तथा।
नाऽऽकारोऽपि विना द्रव्यं, सर्वं द्रव्यात्मकं ततः ॥

तथाहि-द्रव्यमेव मृदादिनिखिलस्थासकोशकुशूलकुटकपालाद्याकारानुयायि वस्तु सत्, तस्यैव तत्तदाकारानुयायिनः सद्बोधविषयत्वात्, स्थासकोशाद्याकाराणां तु मृद्द्रव्यातिरेकिणां कदाचिदनुपलम्भात्, तच्चोत्पादादिसकलविकारविरहितं तथा तथाऽऽविर्भावतिरोभावमात्रान्वितं सम्मूर्च्छितसर्वप्रभेदनिर्भेदवीजं द्रव्यमगृहीततरङ्गादिप्रभेदस्तिमितसरःसलिलवत्,

"दव्वपरिणाममेत्तं मोत्तूणागारदरिसणं किं तं ?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उप्पायव्वयरहियं दव्वं चिय निव्वियारंति ॥१॥
आविब्भावतिरोभावमेत्तपरिणामकारणमचिंतं।
निच्चं बहुरूवंपिय नडोव्व वेसंतरावन्नो ॥२॥"

(भावनय आह-) सम्यग् विवेच्यमानोऽत्र, भाव एवावशिष्यते।
पूर्वापरविविक्तस्य, यतस्तस्यैव दर्शनम् ॥

तथाहि-भावः पर्यायः, तदात्मकमेव च द्रव्यं, तदतिरिक्तमूर्तिकं हि तद दृश्यमदृश्यं वा?, यदि दृश्यं, नास्ति तद्यतिरेकेण अनुपलभ्यमानत्वात्, खरविषाणवत्, न हि वलितमीलितपटी-कृतत्रुटितसङ्घटितादिविचित्रभवनबहिर्भूतमिह सूत्रादि द्रव्यमुपलभ्यमस्ति, अदृश्यमपि नास्ति, तत्साधकप्रमाणाभावात्, षष्ठभूतवत्, ततः प्रतिसमयमुदयव्ययात्मकं स्वयंभवनमेव भावाख्यमस्ति, उक्तं च-

"भावत्थंतरभूयं किं दव्वं नाम? भाव एवायं।
भवणं पइक्खणं चिय भाववत्ती विवत्ती य ॥"

परमार्थतस्त्वयम्-संविन्निष्ठैव सर्वापि, विषयाणां व्यवस्थितिः। संवेदनं च नामादिविकलं नानुभूयते ॥ तथाहि-

घटोऽयमिति नामैतत्, पृथुबुघ्नादिनाऽऽकृतिः।
मृद्द्रव्यं भवनं भावो, घटे दृष्टं चतुष्टयम् ॥१॥
तत्रापि नाम नाकारमाकारो नाम नो विना।
तौ विना नापि चान्योऽन्यमुत्तरावपि संस्थितौ ॥२॥
मयूराण्डरसे यद्वद्वर्णा नीलादयः स्थिताः।
सर्वेऽप्यन्योऽन्यमुन्मिश्रास्तद्वन्नामादयो घटे ॥३॥

इत्थं चैतत्, परस्परसव्यपेक्षितयैवाशेषनयानां सम्यग्नयत्वात्, इतरथा 'उत्पादव्ययध्रौव्ययुक्तं सदि'ति प्रत्यक्षादिप्रमाणप्रतीतसल्लक्षणानुपपत्तेश्च। किञ्च-शब्दादपि घटादेर्नामादिभेदरूपेणैव घटाद्यर्थे बुद्धिपरिणामो जायते, इत्यतोऽपि नामादिचतूरूपतैव सर्वस्य वस्तुनः,

"नामादिभेदसद्दत्थबुद्धिपरिणामभावओ निययं।
जं वत्थु अत्थि लोए चउपज्जायं तयं सव्वं ॥"

(ततश्च)-चतुष्काभ्यधिकस्येह, न्यासो योऽन्यस्य दर्श्यते।
एतदन्तर्गतः सोऽपि, ज्ञातव्यो धीधनान्वितैः ॥१॥

इत्यलं प्रसङ्गेन। सम्प्रति निर्युक्तिरनुश्रि(स्त्रि)यते-तत्र नामस्थापने आगमतो नोआगमतश्च ज्ञशरीरभव्यशरीररूपश्च द्रव्यसंयोगः सुगम इति मन्वानो व्यतिरिक्तद्रव्यसंयोगमभिधातुमाह- 'द्विविधस्त्वि'ति द्विविध एव, द्रव्येण द्रव्यस्य वा, 'स'मिति सङ्गतो योगः संयोगः, संयोगद्वैविध्यमेवाह-संयुक्तमेव संयुक्तकम्-अन्येन संश्लिष्टं, तस्य संयोगो-वस्त्वन्तरसम्बन्धः संयुक्तकसंयोगो ज्ञातव्यः, 'इतरेतर' इति इतरेतरसंयोगः, चः समुच्चये 'एवः' अवधारणे, इत्थमेव द्विविधे एष संयोग इति गाथासमासार्थः ॥ विस्तरार्थं त्वभिधित्सुः 'यथोद्देशं निर्देश' इति न्यायतः संयुक्तकसंयोगं भेदेनाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[३१] संजुत्तगसंजोगो सच्चित्तादीण होइ दव्वाणं।
दुममनुसुवन्नमाई संतइकम्मेण जीवस्स ॥

वृ. 'संयुक्तकसंयोगः' अनन्तराभिहितस्वरूपः, 'सचित्तादीनां' सचित्ताचित्तमिश्राणां भवति द्रव्याणाम्, अमीषामुदाहरणान्याह- 'दुममनुसुवन्नमाइ' त्ति अत्र मकारस्यालाक्षणिकत्वात् सुब्व्यत्ययाच्च 'द्रुमाणुसुवर्णादीनां' प्रत्येकं चादिशब्दसम्बन्धात्सचित्तद्रव्याणां द्रुमादीनाम् अचित्तद्व्याणामण्वादीनां सुवर्णादीनां च मिश्रद्रव्यस्य तु सन्ततिकर्मणोपलिक्षितस्य जीवस्य, अत्र चाण्वादीनां सुवर्णादीनामित्युदाहरणद्वयमचित्तद्रव्याणां सचित्तमिश्रद्रव्यापेक्षया भूयस्त्वख्यापनार्थम्, एतद्भूयस्त्वं च जीवेभ्यः पुद्गलानामनन्तगुणत्वात्, उक्तं च-

"जीवा पोग्गल समया दव्व पएसा य पज्जवा चेव।
थोवाऽनंतानंता विसेसमहिया दुवेऽनंता ॥"

इति, अनेन च सचित्तादेः संयोगद्रव्यस्य त्रैविध्यात् संयुक्तकसंयोगस्य त्रैविध्यमुक्तामिति गाथार्थः ॥ तत्र द्रुमादीनां सचित्तसंयुक्तद्रव्यसंयोगं विवरीतुमाह-

नि.[३२] मूले कंदे खंधे तया य सालेपवालपत्तेहिं।
पुप्फफलेबीएहि अ संजुत्तो होइ दुममाई ॥

वृ. 'मूले कन्दे स्कन्धे' इति सर्वत्र सूत्रत्वात् तृतीयार्थे सप्तमी, ततश्च 'मूलेन' अधःप्रसर्पिणा स्वावयवेन 'कन्देन' तेनैव मूलस्कन्धान्तरालवर्तिना 'स्कन्धेन' स्थुडेन 'त्वचा' छविरूपया 'साले'त्ति एकारोऽलाक्षणिकः, ततः 'शालाप्रवालपत्रैः' शाखापल्लवपलाशैः, फले इत्यत्राप्येकार-स्तथैव, ततः 'पुष्पफलबीजैश्च' प्रसिद्धैरेव 'संयुक्तः' सम्बद्धो भवति 'दुममाइत्ति' मकारोऽलाक्षणिकः ततो द्रुमादिः, आदिशब्दाद्गुच्छगुलम्मादिश्च संयुक्तकसंयोग इति प्रक्रमः। स हि प्रथममुद्गच्छत्रङ्कुरात्मकः पृथिव्याः संयुक्त एव मूलेन संयुज्यते, ततो मूलसंयुक्तक एव कन्देन, कन्दसंयुक्त एव स्कन्धेन एवं त्वक्शाखाप्रवालपत्रपुष्पफलवीजैरपि पूर्वसंयूक्त एवोत्तरोत्तरैः संयुज्यते इति भावनीयम, नन्वेवं द्रुमादेर्द्रव्यत्वात् संयुक्तकसंयोगस्य च गुणत्वात्कथं द्रुमादिरेव स इति, अत्रोच्यते, धर्मधर्मिणोः कथञ्चिदनन्यत्वादेवमुक्तमित्यदोषः, एवमुत्तरभेदयोरपीति गाथार्थः ॥ अण्वादीनामचित्तसंयुक्तकद्रव्यसंयोगं स्पष्टयितुमाह-

नि.[३३] एगरस एगवन्ने एगेगंधे तहा दुफासे अ।
परमाणू खंधेहि अ दुपएसाईहि नायव्वो ॥

वृ. एकः-अद्वितीयस्तिक्तादिरसान्यतमो रसोऽस्येति एकरसः, तथैकः कृष्णादिवर्णान्यतमो वर्णोऽस्येति एकवर्णः, एवम् 'एकगन्धः' सुगन्धीतरान्यतरगन्धान्वितः, 'एगे' इत्येकारस्यालाक्षणिकत्वात्, तथा द्वौ चाविरूद्धो स्निग्धशीताद्यात्मकौ स्पर्शावस्येति द्विस्पर्शः, चशब्दः स्वगतानन्तभेदोपलक्षकः, क एवंविधः ? इत्याह- परमः-तदन्यसूक्ष्मतरासम्भवात् प्रकर्षवान् स चासावणुश्च परमाणुः, उपलक्षणत्वाद् द्युनुकादिश्च, 'स्कन्धैश्च' स्कन्धशब्दाभिधेयैः, कैरित्याह-द्वौ प्रदेशावारम्भकावस्येति द्विप्रदेशो-द्यणुकः, स आदिर्षेषां त्रिप्रदेशादीनामचित्तमहास्कन्धपर्यन्तानां ते तथा तैः, चशब्दात्परमाण्वन्तरैर्वर्णान्तरादिभिश्च, संयुज्यमान इति गम्यते, 'विज्ञेयः' विशेषेणसङ्ख्यातासङ्ख्यातानन्तभङ्गविबावनात्मकेनावबोद्धव्यः, पाठान्तरतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञातव्यः, अचित्तसंयुक्तकसंयोग इति प्रक्रमः, अयमर्थः-

कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥

इत्येवंलक्षणपरमाणुर्यदा त्र्यणुकादिस्कन्धपरिणतिमनुभवति तदा रसादिसंयुक्त एव द्व्यणुकादिभिः स्कन्धैः संयुज्यते, यदा वा तिक्ततादिपरिणतिमपहाय कटुकत्वादिपरिणतिं प्रतिपद्यते तदाऽपि वर्णादिभिः संयुक्त एव कटुकत्वादिना संयुज्यते इति संयुक्तसंयोग उच्यते। अत्र च कृष्णपरमाणुः कृष्णत्वमपहाय नीलत्वं प्रतिपद्यत इत्येको भङ्गः, एवं रक्तत्वं पीतत्वं शुक्लत्वं चेति चत्वारः, तथाऽयमेव रसपञ्चकगन्धद्वयाविरुद्धस्पर्शैस्तारतम्यजनितैश्च स्वस्थान एव द्विगुणकृष्णत्वादिभिः परमाण्वन्तरद्विप्रदेशादिभिश्च योजनाद्विवक्षावशतः सङ्ख्यातासङ्ख्यातानन्तात्मिकां भङ्गरचनामवाप्नोति, एवं वर्णान्तररसस्पर्शगन्धस्वगततारतम्ययुक्तोऽपि, तथा द्विप्रदेशादिश्च। यच्च-'वण्णरसगंधफासा पोग्गलाणं च लक्खणं' इत्यादिसूत्रेषु वर्णस्यादित्वेन दर्शनेऽपि 'एगरसएगवण्णे'त्ति रसस्य प्रथमत उपादानं तदनानुपूर्व्या अपि व्याख्याङ्गत्वेन गाथाबन्धानुलोम्येन वेति भावनीयम्। सुपर्णादीनां च प्राच्यवर्णकासंयुक्तानामेव विशिष्टवर्णिकादिभिः संयोगोऽचित्तसंयुक्तसंयोग उक्तानुसारेण सुज्ञान एवेति निर्युक्तिकृता न व्याख्यात इति गाथार्थः ॥ दृष्टान्तपूर्वकं सन्ततिकर्मणा जीवस्य मिश्रसंयुक्तकद्रव्यसंयोगं व्यक्तीकर्तुमाह-

नि.[३४] जह धाऊ कनगाई सभासंजोगसंजुया हुंति।
इअ संतइकम्मेणं अनाइसंजुत्तओ जीवो ॥

वृ. 'यथा' इत्युदाहरणोपन्यासार्थः, यथा 'धातवः' कनकादियोनिभूतो मृदादयः 'कनगाइ'त्ति सूत्रत्वात्कनकादिभिः, आदिशब्दात्ताम्रादिभिश्च, किमित्याह-स्वभावेन संयोगः-प्रकृतीश्वराद्यराथान्तरव्यापारनपेक्षयोपलक्ष्यानुपलक्ष्यरूपो यः सम्बन्धस्तेन संयुता-मिश्रिताः स्वभावसंयोगसंयुताः 'भवन्ति' विद्यन्ते 'इती'त्यमुनैवार्थान्तरनिरपेक्षत्वलक्षणेन प्रकारेण सन्ततिः-उत्तरोत्तरनिरन्तरोत्पत्तिरूपः प्रवाहस्तयोपलक्षितं कर्म-ज्ञानवरणादि सन्ततिकर्म तेन, न विद्यते आदिः-प्राथम्यमस्येत्यनादिः स चेह प्रक्रमात्संयोगस्तेन 'स' मिति अन्नोन्नानुगयाणं इमं च तं चत्ति। विभयणमजुत्तं' इत्यागमाद्विभागाभावतो युक्तः-शिलष्टोऽनादिसंयुक्तः स एव अनादिसंयुक्तकः, यद्वा-संयोगः संयुक्तं ततोऽनादिसंयुक्तमस्येति अनादिसंयुक्तकः, क इत्याह-जीवति जीविष्यति जीवितवांश्चेति जीवः, मिश्रसंयुक्तकद्रव्यसंयोग इति प्रक्रमःच इदमुक्तं भवति-जीवा ह्यनन्तकर्मानुवर्गणाभिरावेष्टितप्रवेष्टितोऽपि न स्वरूपं चैतन्यमतिवर्तते, न चाचैतन्यं कर्माणव इत तद्युक्ततया विवक्ष्यमाणोऽसौ संयुक्तकमिश्रद्रव्यं, ततोऽस्य कर्मप्रदेशान्तरैः संयोगो मिश्रसंयुक्तकद्रव्यसंयोग उच्यते, इह च जीवकर्मणोरनादिसंयोगस्य धातुकनकादिसंयोगदृष्टान्तद्वारेणाभिधानं तद्वदेवानादित्वेऽप्युपायतो जीवकर्मसंयोगस्याभावख्यापनार्थम्, अन्यथा मुक्त्यनुष्ठानवैफल्यापत्तेरिति भावनीयमिति गाथार्थः ॥

उक्तः संयुक्तकसंयोगः, इतरेतरसंयोगमाह-

नि.[३५] इयरेयरसंजोगो परमाणूणं तहा पएसाणं।

अभिपेयमणभिपेओ अभिलावो च्चेव संबंधो ॥

वृ. इतरेतरस्य-परस्परस्य संयोगो-घटना इतरेतरसंयोगः 'परमाणूनाम्' उक्तरूपाणां, तथा प्रकर्षेणसूक्ष्मातिशयलक्षणेन दिश्यन्ते-कथ्यन्त इति प्रदेशाः-धर्मास्तिकायादिसम्बन्धिनो निर्विभागा भागास्तेषाम्, 'अभिपेयं' ति प्राकृतत्वादभिप्रेतः, इतरेतरसंयोगइति योज्यते, एवमुत्तरत्रापि, अभिप्रेतत्वं चास्याभिप्रेतविषयत्वाद्, एतद्विपरीतोऽनभिप्रेतः, अभिलप्यते-आभिमुख्येन व्यक्तमुच्यतेऽनेनार्थ इत्यभिलापो-वाचकः शब्दस्तद्विषयत्वात् अभिलापः, चः समुच्चये, 'एवः' अवधारणे, सम्बन्धशब्दानन्तरं चैतौ योज्यौ, ततः सम्बन्धनं-सम्बन्धः, स चैव स्वस्वामित्यादिरनेकधा वक्ष्यमाणः, एतावद्भेद एवायमितरेतरसंयोग इति चावधारणस्यार्थ इति गाथासमासार्थः ॥ परमाणूनां संयोगमाह-

नि. [३६] दुविहो परमाणूणं हवइ य संठाणखंधओ चेव।
संठाणे पंचविहो दुविहो पुन होइ खंधेसु ॥

वृ. द्वौ विधौ प्रकारावस्येति द्विविधः-द्विभेदः, कोऽसौ !-'परमाणूनाम्' इति परमाणुसम्बन्धी, प्रक्रमादितरेतरसंयोगो भवति, 'चः' पूरणे, कथं द्विविध इत्याह- 'संठाणखंधतो' त्ति संतिष्ठतेऽनेन रूपेण पुद्गलात्मकं वस्त्विति संस्थानम्-आकारविशेषः ततस्तमाश्रित्य, 'स्कन्धतः' स्कन्धमाश्रित्य, चः समुच्चये, 'एवः' भेदावधारणे। द्विविधस्यापि प्रत्येकं भेदानाह-'संस्थाने' संस्थानविषयः 'पञ्चविधः' पञ्चप्रकारः 'द्विविधः' द्विप्रकारः, पुनःशब्दो वाक्यान्तरोपन्यासे भवति 'स्कन्धेषु' स्कन्धविषय इति गाथार्थः ॥ इह च संस्थानस्कन्धभेदद्वारक एवायमितरेतरसंयोगभेद इति तदभिधानमुचितं, तत्र 'यथोद्देशं निर्देश' इति न्यायतः संस्थानभेदाभिधानप्रस्तावेऽप्यल्यवक्तव्यत्वात् स्कन्धभेदं हेतुभेदद्वारेणाह-

नि. [३७] परमाणुपुग्गला खलु दुन्नि व बहुगा य संहता संता।
निव्वत्तयंति खंधं तं संठाणं अनित्थंत्थं ॥

वृ. परमाणुपुद्गलौ खलु दौ वा वहव एव बहुकाः-त्रिप्रभृतयः, ते च परमाणुपुद्गलाः 'संहताः' एकपिण्डतामापन्नाः सन्तो 'निर्वर्तयन्ति' जनयन्ति, किमित्याह-'स्कन्धं' द्व्यनुकादिकम्, अनेन च द्विपरमानुजन्यतया बहुपरमानुजन्यत्वेन च स्कन्धस्य द्विभेदत्वमुक्तं, खलुशब्दोऽत्र विशेषं द्योतयति, स चायम्-इह रूक्षः स्निग्धो वा एकगुणः सम्बध्यमानो द्विगुणाधिकेनैव स्वस्वरूपापेक्षया सम्बध्यते, न तु समगुणेनैकगुणाधिकेन वा, किमुक्तं भवति ? एकगुणस्निग्धस्त्रिगुणस्निग्धेन सम्बध्यते त्रिगुणस्निग्धः पञ्चगुणस्निग्धेन पञ्चगुणस्निग्धः सप्तगुणस्निग्धेनेत्यादि, तथा द्विगुणस्निग्धश्चतुर्गुणस्निग्धेन चुतुर्गुणस्निग्धः षड्गुणस्निग्धेनेत्यादि, एवमेकगुणरूक्षगुणरूक्षेण त्रिगुणरूक्षः पञ्चगुणरूक्षेनेत्यादि, तथा द्विगुणरूक्षश्चतुर्गुणरूक्ष चतुर्गुणरूक्षः षड्गुणरूक्षेनेत्यादि, एव द्विगुणाधिकसम्बन्धो भावनीयः, न त्वेकगुणस्निग्ध एकगुणस्निग्धेन द्विगुणस्निग्धेन वा सम्बध्यते द्विगुणस्निग्धो द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा यावदनन्तगुणस्निग्धोऽप्यनन्तगुणस्निग्धेन समगुणेनैकगुणाधिकेन वा, एवमेकगुणरूक्ष एकगुणरूक्षेण द्विगुणरूक्षेण वा द्विगुणरूक्षो द्विगुणरूक्षेण त्रिगुणरूक्षेण वा यावदनन्तगुणरूक्षोऽप्यनन्तगुणरूक्षेण समगुणैनकगुणाधिकेन वेति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वाहुः- एकगुणादि स्वस्थानापेक्षया द्विगुणेन रूपाधिकेन सम्बध्यत इति, अयमत्र विशेषः खलुशब्देन सूच्यते, तथा चैककस्य स्वस्थानापेक्षया द्विगुणो द्विक एव स च रूपाधिकस्त्रिक एव इति त्रिगुणेनैकवैकगुणस्य सम्बन्धः, तथा द्विगुणस्य पञ्चगुणेन त्रिगुणस्य सप्तगुणेन चतुर्गुणस्य नवगुणेन पञ्चगुणस्यैकादशगुणेनेत्यादि, उक्तं च-

"समनिद्धयाइ बंधो न होइ समलुक्खयावि य न होइ।
वेमाइनिद्धलुक्खत्तणेण बंधो उ खंधाणं ॥१॥"
(तथा) "दोण्ह जहन्नगुणाणं निद्धाणं तह य लुक्खदव्वाणं।
एगाहिएवि य गुणे न होति बंधस्स परिणामो ॥२॥
निद्धविउणाहिएणं बंधा निद्धस्स होइ दव्वस्स।
लुक्ख बिउणाहिएम य लुक्खस्स समागमं पप्प ॥३॥"

स्निग्धरूक्षपरस्परबन्धविचारणायां तु समगुणयोर्विषमगुणयोर्वा जघन्यवर्जयोर्बन्धपरिणतिरिति विशेषः। तथा चाह-

"बज्झंति निद्धलुक्खाविसमगुणा अहव समगुणो जेऽवि।
वज्जितु जहन्नगुणे बज्झंती पोग्गला एवं ॥"

इत्यादि, येन विशेषण संस्थानात् स्कन्धस्य भेदेनोपादानं तमाविष्कर्तुमाह- 'तं संठाणंति' प्राकृतत्वादेवं पाठः, तस्य-स्कन्धस्य संस्थानम्-आकारस्तत्संस्थानम्, अनेन-हृदि विवर्तमानतया प्रत्यक्षेण परिमण्डलादिनाऽनन्तरोक्तप्रकारेणेत्थमित्थं तिष्ठति इत्थंस्थं, न तथा अनित्थंस्थम्, अनेन नियतपरिमण्डलाद्यन्यतराकारं संस्थानं शेषोऽनियताऽऽकारस्तु स्कन्ध इत्यनयोर्विशेष इत्युक्तं भवति। आह-स्कन्धानामपि परस्परं बन्धोऽस्ति, यदुक्तम्- "एमेव य खंधाणं दुपएसाईण बंधपरिणामो' त्ति अतः किं न तेषामपीरतरेतरसंयोग इहोक्तः ?, उच्यते, उक्त एव, तेषां प्रदेशसद्भावात्, प्रदेशानां च 'इयरेतरसंजोगो परमाणूणं तहा पएसाणं' इत्यनेन तदभिधानादिति गाथार्थः ॥ संस्थानभेदानाह-

नि.[३८] परिमंडले य वट्टे तंसे चउरंसमायए चेव।
घनपयर पढमवज्जं ओयपएसे य जुम्मे य ॥

वृ. लिङ्गं व्यभिचार्यपी'ति प्राकृतलक्षणात् सर्वत्र लिङ्गव्यत्ययः, ततः परिमण्डलं, प्रक्रमात् संस्थानमेवमुत्तरत्रापि, तच्च बहिर्वृत्ततावस्थितप्रदेशजनितमन्तःशुषिरं, यथा वलकस्य, चशब्द उत्तरभेदापेक्षया समुच्चये, वृत्तं तदेवान्तःशुषिरविरहितं यथा कुलालचक्रस्य, त्र्यस्रं-त्रिकोणं, यथा शृङ्गाटकस्य, चतुरस्रं-चतुष्कोणं, यथा कुम्भिकायाः, आयतं-दीर्घं, यथा दण्डस्य, चः पूर्वभेदापेक्षया समुच्चये 'एव' अवधारणे, तत इयत एव संस्थानभेदाः, 'घनपयर'त्ति घनं च प्रतरं च घनप्रतरं, प्राकृतत्वाद्बिन्दुलोपः, सर्वत्र च प्रतरपूर्वक एव घनः प्ररूप्यते, इहापि तथैवोपदर्शयिष्यते, ततः प्रतरघन इति निर्देशः प्राप्तः, अल्पाक्ष(च्त)रत्वात्तु घनशब्दस्य पूर्वनिपातः, ततश्चैकैकं परिमण्डलादि प्रतरं घनं च, भवतीति गम्यते, तथा प्रथमम्-आद्यं वर्जयति-त्यजतीति प्रथमवर्जं-परिमण्डलरहितं वृत्तादिसंस्थानचतुष्कमित्यर्थः 'आयपएसे य'त्ति ओजःप्रदेशं च-विषयसङ्ख्यपरमाणुकं 'जुम्मे य' त्ति प्रक्रमाद् युग्मप्रदेशं च, उभयत्र चः समुच्चये।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह च धनप्रतरभेदमेव वृत्तादीत्थं भिद्यते, ततः प्रतरवृत्तमोजःप्रदेशं युग्मप्रदेशं च, तथा घनवृत्तमोजःप्रजेशं यग्मप्रदेशं च, एवं त्र्यस्रादिष्वपि चतुर्विधं भावनीयं, परिमण्डलं वर्जनीयं च, समसङ्ख्यानुष्वेव तस्य सम्भवेनैवंविधभेदासम्भवात्, तथा च द्विविधमेव परिमण्डलमिति गाथार्थः ॥ इह च परिमण्डलादि प्रत्येकं जघन्यमुत्कृष्टं च, तत्रोत्कृष्टं सर्वमनन्ताणुनिष्पन्नसङ्ख्य-प्रदेशावगाढं चेत्येकरूपतयाऽनुक्तमपि सम्प्रदायाज्ज्ञातुं शक्यमिति तदुपेक्ष्य जघन्यं तु प्रतिभेद-मन्यान्यरूपतया न तथेति तदुपदर्शनार्थमाह-

नि.[३९] पंचग बारसगं खलु सत्तग बत्तीसगं तु वट्टंमि।
तिय छक्कग पनतीसा चत्तारि य हुंति तंसंमि ॥

नि.[४०] नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे।
तिगदुगपन्नरसेऽवि य छच्चेव य आयए हुंति ॥

नि.[४१] पणयालीसा बारस छब्भेया आययंमि संठाणे।
वीसा चत्तालीसा परिमंडलि हुंति संठाणे ॥

वृ. आसामर्थः स्पष्ट एव, नवरमायते पड्भेदाभिधानम्यापित्वेन प्रागनुद्दिष्टस्यापि श्रेणिगत-भेदद्वयस्याधिकस्य तत्र सम्भवात्, तथा परिमण्डलादित्वेऽपि संस्थानानां वृत्तादिभेदाना-मोजःप्रदेशप्रतरादीनामनन्तरोद्दिष्टत्वात् प्रत्यासत्तिन्यायेन यथाक्रमं पञ्चकादिभिः प्रथममुपदर्शनं, पश्चात् परिमण्डलभेदद्वयस्य। तत्रौजःप्रदेशप्रतरवृत्तं पञ्चाणुनिष्पन्नं पञ्चाकाशप्रदेशावगाढं च, तत्रैकोऽनुरन्तरेव स्थाप्यते, चतसृपु पूर्वादिदिक्षु चैकैकः, युग्मप्रदेशप्रतरवृत्तं द्वादशप्रदेशं द्वादश-प्रदेशावगाढं च, तत्र हि चतुर्पु प्रदेशेषु निरन्तरमन्तश्चतुरोऽनूंन्निधाय तत्परिक्षेपेनाष्टौ स्थाप्यन्ते, ओजःप्रदेशं घनवृत्तं सप्तप्रदेशं सप्तप्रदेशावगाढं च, तच्चैवम्-तत्रैव पञ्चप्रदेशे प्रतरवृत्ते मध्य-स्थितस्याणोरुपरिष्टादधस्ताच्चैकैकोऽनुरवस्थाप्यते, ततो द्वयसहिताः पञ्च सप्त भवन्ति ३, युग्म-प्रदेशं धनवृत्तं द्वात्रिंशत्प्रदेशं द्वात्रिंशत्प्रदेशावगाढं च, तत्र प्रतरवृत्तोप्रदर्शितद्वारदशप्रदेशोपरि द्वादशान्ये, तदुपरि चत्वारोऽधस्ताच्च तावन्त एवाणवः स्थाप्याः, एते मीलिता द्वात्रिंशद्भवन्ति ४। ओजःप्रदेशं प्रतरत्र्यस्रं त्रिप्रदेशं त्रिप्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरमनुद्वयं विन्य-स्याऽऽद्यस्याध एकोऽणुः स्थाप्यः, युग्मप्रदेशं प्रतरत्र्यस्रं पट्प्रदेशं पट्प्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरं त्रयोऽणवः स्थाप्यन्ते तत आद्यस्याधस्तादधऊर्ध्वभावेन द्वयं द्वितीयस्य त्वध एकोऽणुः स्थाप्यः, ओजःप्रदेशं घनत्र्यस्रं पञ्चत्रिंशत्प्रदेशं पञ्चत्रिंशत्प्रदेशावगाढं च, तत्र च तिर्यग्निरन्तराः पञ्चाणवो न्यस्यन्ते, तेपां चाधोऽधः क्रमेण तिर्यगेव चत्वारस्तरयो द्वावेकश्चाणुः स्थाप्यन्ते, अस्य च प्रतरस्योपरि सर्वपङ्क्तिष्वन्त्यान्त्यपरमाणुपरिहारेण दश, तथैव तेपामुपर्युपरि पट् त्रय एकश्चेति क्रमेणाणवः स्थाप्याः एते मीलिताः पञ्चत्रिंशद्भवन्ति ३,

युग्मप्रदेशं घनत्र्यस्रं चतुष्प्रदेशं चतुष्प्रदेशावगाढं च, तत्र च प्रतरत्र्यस्र एव त्रिप्रदेशे एकतरस्योपर्येकोऽणुर्दीयते, ततो मीलिताश्चत्वारो भवन्ति ४। ओजःप्रदेशं प्रतरचतुरस्रं नवप्रदेशं नवप्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरं त्रिप्रदेशास्तिस्रः पङ्क्तयः स्थाप्याः, युग्मप्रदेशं प्रचरचतुरस्रं च चतुष्प्रदेशं चतुष्प्रदेशावगाढं च, तत्र चतिर्यग्निरन्तरं द्विप्रदेशे द्वे पङ्क्ती स्थाप्येते, ओजःप्रदेशं धनचतुरस्रं सप्तविंशतिप्रदेशं सप्तविंशतिप्रदेशावगाढं च, तत्र च नवप्रदेश्य

प्रतरचतुरस्रस्यैवाध उपरि च तथैव नव नवानव: स्थाप्या:, तत स्त्रिगुणा नव सप्तविंशतिर्भवति ३, युग्मप्रदेशं घनचतुरस्रम् अष्टप्रदेशमष्टप्रदेशावगाढं च, तत्र चतुष्प्रदेशस्य प्रतरस्यैवोपरि चत्वारोऽन्ये स्थाप्या:, ततो द्विगुणाश्चत्वारोऽष्टौ भवन्ति ४। ओज:प्रदेशं श्रेण्यायतं त्रिप्रदेशं-त्रिप्रदेशावगाढं च, तत्र च तिर्यग् निरन्तरास्त्रयोऽणव: स्थाप्या:, युग्मप्रदेशं श्रेण्यायतं द्विप्रदेश द्विप्रदेशावगाढं च, तत्र च तथैवाणुद्वयं न्यस्यते, ओज:-प्रदेशं प्रतरायतं पञ्चदशप्रदेशं पञ्चदश-प्रदेशावगाढं च, तत्र प्राग्वत् पङ्क्तित्रये पञ्च पञ्चाणव: स्थाप्या:, युग्मप्रदेशं प्रतरायतं षट्प्रदेशं षट्प्रदेशावगाढं च, तत्र च प्राग्वत् पङ्क्तिद्वये त्रयस्त्रोयोऽणव: स्थाप्या:, ओज:प्रदेशं घनायतं पञ्चचत्वारिंशत्प्रदेशं पञ्चचत्वारिंशत्प्रदेशावगाढं च, तत्र पञ्चदशप्रदेशस्य प्रतरायतस्यैवाझ उपरि च तथैव पञ्चदश पञ्चदशाणव: स्थाप्या:, ततस्त्रिगुणा: पञ्चदश पञ्चत्वारिंशद्भवन्ति ५,

युग्मप्रदेशं घनायतं द्वादशप्रदेशं द्वादशप्रदेशावगाढं च, तत्र च षट्प्रदेशस्य प्रतरायतस्यैवोपरि तथैव तावन्तोऽणव: स्थाप्या:, ततो द्विगुणा: षट् द्वादश भवन्ति ६। परिमण्डलमुक्तन्यायतो द्विभेदमेव, तत्र प्रतरपरिमण्डलं विंशतिप्रदेशं विंशतिप्रदेशावगाढं च, तत्र च प्राच्यादिपु चतुसृपु दिक्षु चत्वारश्चत्वारो विदिक्षु चैकैक: स्थाप्य:, मीलिताश्चैते विंशतिर्भवन्ति, घनपरिमण्डलं चत्वारिंश-त्प्रदेशं चत्वारिंशत्प्रदेशावगाढं च, तत्र च तस्या एव विंशतेरुपरि तथैव विंशतिरन्या स्थाप्यते, विंशतिश्च द्विगुणा चत्वारिंशद्भवन्ति २। इत्थं चैषां प्ररूपणमितोऽपि न्यूनदेशतायां यथोक्त-संस्थानासम्भवात्, न चैतान्यतीन्द्रियत्वेनातिशायिगम्यत्यात् सर्वथाऽनुभवमारोपयितुं शक्यन्ते, स्थापनादिद्वारेण च कथञ्चिच्छक्यानीति तथैव दर्शितानीति गाथात्रयभावार्थ: ॥ उक्त: परमानू-नामितरेतरसंयोग:, सम्प्रति तमेव प्रदेशानामाह-

नि.[४२] धम्माइपएसाणं पंचण्ह उ जो पएससंजोगो।
तिण्हपुण अणाईओ साईओ होति दुण्हं तु ॥

वृ. धर्मादीनां-धर्माधर्माकाशजीवपुद्गलानां प्रदेशा:-उक्तरूपा धर्मादिप्रदेशास्तेषां, 'पञ्चानाम्' इति सम्बन्धिनां धर्मादीनां पञ्चसङ्ख्यत्वेन पञ्चसङ्ख्यानां 'तु:' पुनरर्थ:, संयोग इति गम्यते, स च श्रुतत्वाद्धर्मादिभि: स्कन्धैस्तया तदन्तर्गतैर्देशै: प्रदेशान्तरैश्च सजातीयेतरै:, असौ किमित्याह-प्रदेशानां संयोग: प्रकृतत्वादितरेतरसंयोगाख्य: प्रदेशसंयोग:, उच्यते इति शेप:, अस्यैव विभागमाह-'त्रयाणां पुन:' पुन:शब्दस्य विशेषद्योतकत्वात् धर्माधर्माकाश-प्रदेशानां धर्मादिभिरेव त्रिभिस्तेषामेव देशै: प्रदेशान्तरैश्च प्रकृतत्वादितरेतरसंयोग: 'अनादि:' आदिविकल: सदा संयुक्तत्वादेषां, 'सादिक:' आदियुक्तो भवति 'द्वयो:' पारिशेष्याज्जीव-प्रदेशपुद्गलप्रदेशयो:, तथाहि-संयुज्यन्ते वियुज्यन्ते संसारिजीवप्रदेशा: कर्मपुद्गलप्रदेशाश्च परस्परं धर्मादिप्रदेशैश्च सह, तुशब्दो विशेषं द्योतयति, स चायं-जीवप्रदेशानां धर्मादित्रयदेश-प्रदेशापेक्षया पुद्गलस्कन्धाद्यपेक्षया च सादिसंयोग:, धर्मादिस्कन्धत्रयापेक्षया त्वनादि:, पुद्गलप्रदेशानामपि धर्मादिस्कन्धत्रयापेक्षयाऽनादि:, शेषापेक्षया तु सादि:।

इह च धर्मादिस्कन्धानां तद्देशानां च य: परस्परं संयोग: स न प्रदेशसंयोगमन्तरेणेति तदभि-धानत एवोक्तो मन्तव्य:, अप्रदेशस्य तु परमाणोर्धर्मादिभि: संयोग उक्तानुसारत: सुज्ञान एव इति नोक्त इति गाथार्थ: ॥ उक्त: प्रदेशानामितरेतरसंयोग:, सम्प्रत्यभिप्रेतानभिप्रेतभेदरूपं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[४३] अभिपेयमनभिपेओ पंचसु विसएसु होइ नायव्वो।
अनुलोमाऽभिप्पेओ अनभिप्पेओ अ पडिलोभो ॥

वृ. 'अभिपेय'त्ति अभिप्रेतः 'अनभिप्पओ'त्ति चस्य गम्यमानत्वादनभिप्रेतश्च, प्रक्रमादितरेतरसंयोगः, किमित्याह-'पञ्चसु' विषयेषु शब्दादिपञ्चकगोचरे, अर्थादिन्द्रियमनसां तद्ग्रहणप्रवृत्तौ ग्राह्यग्राहकभावः, स चाभिप्रेतार्थविषयोऽभिप्रेतः अनभिप्रेतार्थविषयस्त्वनभिप्रेतः भवति ज्ञातव्यः, आह-आस्त्वेवाभिप्रतानभिप्रतार्थविषयत्वेनाभिप्रेतः अनभिप्रेतश्चेतरेतरसंयोगः, अभिप्रतानभिप्रेतार्थौ तु काविति, अत्रोच्यते, 'अनुलोम' इन्द्रियाणां प्रमोदहेतुतयाऽनुकूलश्रवयकाकलीगीतादिरभिप्रेतः, अनभिप्रेतश्च प्रतिलोम उक्तविपरीतकाकस्वरादिरिति गाथार्थः ॥ इह गाथापश्चार्द्धेन मनोनिरपेक्षप्रवृत्त्यभावेऽपीन्द्रियाणां प्राधान्यमाश्रित्य तदपेक्षयाऽभिप्रतोऽनभिप्रेतश्चार्थ उक्तः, सम्प्रति मनोऽपेक्षया तमेवाह-

नि.[४४] सव्वा ओसहजुत्ती गंधजुत्ती य भोयणविही य।
रागविहि गीयवाइयविही अभिप्पेयमनुलोमो ॥

वृ. 'सर्वाः' समस्तां, कोऽर्थः ?-इन्द्रियाणामनुकूलाः प्रतिकूलाश्च, अस्य चौषधयुक्त्यादिभिः प्रत्येकं सम्बन्धः, ततश्च औषधादीनाम-अगुरुकुङ्कुमादीनां सज्जिकाराजिकादीनां च युक्तयो-योजनानि समविषमविभागनीतयो वा औषधयुक्तयः, गन्धानां-गन्धद्रव्याणां श्रीखण्डादीनां ल्हसणादीनां च युक्तयः गन्धयुक्तयः ताश्च, भोजनस्य-अन्नस्य विधयः-शाल्योनादयः कोद्रवभक्ताद्यश्च भेदाः भोजनविधयः ते च, 'रोगविहिगीयवाइयविहि'त्ति सूत्रत्वाद्वचनव्यत्यये रागविधयश्च गीतवादित्रविधयश्च रागविधिगीतवादित्रविधयः, तत्र रञ्जनं रागः-कुसुम्भादिना वर्णान्तरापादनं तद्विधयः-स्निग्धत्वादयो रूक्षत्वादयश्च गीतवादित्रविधय इति, तत्र विधिशब्दस्योभयत्र योगात्, गीतं-गानं तद्विधयः-कोकिलारुतानुकारित्वादयः काकस्वरानुविधायित्वादयश्च, वादित्रम-आतोद्यम्, इह चोपचारात्तद्ध्वनिः दद्विधयो-मृदङ्गादिस्वनाः केवलकरटिकादिस्वनाश्च, चशब्दो नृत्तादिविधिसमुच्चयार्थः, एते किमित्याह-'अभिप्पेयं'ति अभिप्रेतार्था उच्यन्ते, कीदृशाः सन्त इत्याह-अनुलोमाः, कोऽर्थः ? शुभा अशुभा वा मनोऽनुकूलतया प्रतिभासमानाः, एतेनैतदप्याह-यथैत एव देशकालावस्थादिवशतो विचित्राभिसन्धितया जन्तूनां मनसोऽननुलोमाः सन्तोऽनभिप्रेतोऽर्थः।

इत्थं व्याख्यानतो विशेषप्रतिपत्तिमाश्रित्येन्द्रियापेक्षया मनोऽपेक्षया च भेदेनाभिप्रेतोऽनभिप्रेतश्चार्थो व्याख्यातः, अथवाऽनन्तरगाथापश्चार्द्धेनाविशेषणेन्द्रियाणां मनसश्चानुकूलोऽभिप्रेतोऽर्थः इतरस्त्वनभिप्रेत उक्तः, एतद्गाथयाऽपि स एव विशेषतो दर्शित इति व्याख्येयम्, अत्र च सर्वा इति सर्वप्रकारा अनुलोमा इति चेन्द्रियमनसामनुकूलाः, शेष प्राग्वत्। उपेक्षणीयस्य त्विहानभिधानं नयस्य कस्यचिन्मतेनानभिप्रेत एव तस्यान्तर्भावादिति गाथार्थः ॥ उक्तोऽभिप्रेतानभिप्रेतभेदरूप इतरेतरसंयोगः, साम्प्रतममुमेवाभिलापविषयमाह-

नि.[४५] अभिलावे संजोगो दव्वे खित्ते अ कालभावे अ।
दुगसंजोगाईओ अक्खरसंजोगमाईओ ॥

वृ. 'अभिलापः' उक्तस्वरूपः, तद्विषयः 'संयोगः' प्रक्रमादभिलापेतरेतरसंयोगः, अयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च त्रिधा सम्भवति, तत्रैकोऽभिलापस्याभिलाप्येन द्वितीयोऽभिलाप्यस्याभिलाप्यान्तरेण तृतीयो वर्णस्य वर्णान्तरेण। तत्राद्योऽभिलाप्यस्य द्रव्यादिभेदेन चतुर्विधत्वात् 'द्रव्ये' इति द्रव्यविषयः, स चार्थाद् घटादिशब्दस्य पृथुबुध्नोदराद्याकारपरिणतद्रव्येण वाच्यवाचकभावलक्षणः सम्बन्धः, एवं 'क्षेत्रे च' क्षेत्रविषयः, आकाशध्वनेरवगाहदानलक्षणक्षेत्रेण 'कालभावे' इति समाहारद्वन्द्वः, ततः 'काले' कालविषयः समयादिश्रुतेर्वर्तनादिव्यङ्ग्येन कालपदार्थेन, 'भावे च' भावविपय-औदयिकादिवचसो मनुष्यत्वादिपर्यायेण, चशब्दोऽत्र पूर्वत्र च समुच्चये।

द्वितीयमाह-द्विकस्य संयोगो द्विकसंयोगः स आदिर्यस्य त्रिकसंयोगादेः सोऽयं द्विकसंयोगा-दिकः, इहाभिलापसंयोगस्य त्रिविधत्वात् तत्र चाद्यस्यानन्तरमेवोक्तत्वात् तृतीयस्य चाभिधास्य-मानत्वाद् अर्थाद् द्विकग्रहणेनाभिलाप्यद्वयमेव गृह्यते, तत्र द्विकसंयोगो यथा-स च स च तौ, त्रिकसंयोगो यथा-स च तौ च ते, अत्र तौ च ते चेत्युक्ते स च स च तथा स च तौ चेत्यनुक्ताव-प्येकत्राभिलाप्यार्थद्वयमन्यत्र चाभिलाप्यार्थत्रयं सह प्रतीयते, अभिलापसंयोगत्वं चास्या-भिलापद्वारकत्वादभिलाप्येन सह प्रतीतेः।

तृतीयमाह-अक्षरे च अक्षराणि च अक्षराणि तेषां संयोगः अक्षरसंयोगः स आदिर्यस्यो-दात्ताद्यशेषवर्णधर्मसंयोगस्य सोऽयमक्षरसंयोगादिकः, मकारोऽलाक्षणिकः, तत्राक्षरयोः संयोगो यथा- क इति, अक्षराणां संयोगः यथा श्रीरिति, उदात्तादिवर्णधर्मसंयोगास्तु स्वधिया भावनीयाः, अस्याप्यभिला॰संयोगत्वं वर्णादीनां कथञ्चिदभिलापानन्यत्वेन तदात्मकत्वात्, यद्वाऽक्षरसंयोग इत्यनेन सर्वोऽपि व्यञ्जनसंयोग उक्तः, आदिशब्देन त्वर्थसंयोगः, एतद्विशेषणं च द्विकसंयोगादि-रिति योजनीयम्, अन्यत् प्राग्वत्, द्रव्यसंयोगत्वं चास्याभिलापस्य द्रव्यत्वात्, द्रव्यत्वं चास्य स्पर्शवत्त्वेन गुणाश्रयत्वात्, वक्ष्यति हि-"गुणाणमासओदव्वं"ति, न च स्पर्शवत्त्वमसिद्धं, प्रतिघातजनकत्वात्, तथाहि-यत् प्रतिघातजनकं तत्स्पर्शवत् दृष्टं, यथा लोष्टादि, प्रतिघातजनकश्च शब्दः अन्यथा तथाविधशब्दश्रुतावनुभवसिद्धश्रोत्रान्तःपीडाया असम्भवादिति गाथार्थः॥

उक्तोऽभिलापविषय इतरेतरसंयोगः, सम्प्रति सम्बन्धनसंयोगरूपस्य तस्यावसरः, सोऽपि द्रव्यक्षेत्रकालभावभेदतश्चतुर्धा, तत्र द्रव्यसंयोगसम्बन्धनमाह-

नि. [४६] संबंधणसंजोगो सच्चित्ताचित्तमीसओ चेव।
दुपयाइ हिरन्नाई रहतुरगाई अ बहुहा उ॥

वृ. सम्बध्यते प्रायो ममेदमित्यादिबुद्धितोऽनेनास्मिन् वाऽऽत्माऽष्यविधेन कर्मणा सहेति सम्बन्धनः स चासौ संयोगश्च सम्बन्धनसंयोगः, 'सच्चित्ताचित्तमीसओ चेव'त्ति प्राग्वत् सुपो लुकि सचित्तोऽचित्तो मिश्रकः, चः समुच्चये, एवः भेदावधारणे, यथाक्रममुदाहरणान्याह द्विपदेत्यादिना, सचित्ते द्विपदादिः, आदिशब्दाच्चतुष्पदापदपरिग्रहः, तत्र च द्विपदसंयोगो यथा-पुत्री, चतुष्पदसंयोगो यथा-गोमान्, अपदसंयोगो यथा-पनसवान्। अचित्ते हिरण्यादिः, आदिशब्दान्मणिमुक्तादिग्रहः, स च हिरण्यवानित्यादि। मिश्रे रथयोजितस्तुरगः मध्यपदलोपे रथतुरगस्तदादिः, आदिशब्दाच्छकटवृषभादिपरिग्रहः, स च रथिक इत्यादि, 'चः' समुच्चये, 'बहुधा तु' इति बहुप्रकार एव, तुशब्दस्यैवकारार्थत्वात्, इह च सचित्तविषयत्वात् सम्बन्धन-संयोगोऽपि सचित इत्यादि सर्वत्र भावनीयम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह-यदि सचित्तादिविषयत्वादसौ सचित्तादिरिति व्यपदिश्यते, एवं सत्यात्मन एवासौ तैः सह, तत उभयनिष्ठत्वात्तेनापि किं न व्यपदिश्यते ?, उच्यते, यवाङ्कुरादिवदसाधारणेनैव व्यपदेशः, आत्मनश्च सर्वैरप्यमीभिरसाविति तस्य साधारणत्वान्न तेनेह व्यपदेशः पृथिव्यादिभिरिवाङ्कुरस्येति न दोषः, एवमुत्तरत्रापि, इति ॥ अमुमेव क्षेत्रकालभावविषयमभिधित्सुराह-

नि.[४७] खेत्ते काले य तहा दुण्हवि दुविहो उ होइ संजोगो।
भावंमि होइ दुविहो आएसे चेवऽनाएसे ॥

वृ. 'क्षेत्रे' क्षेत्रविषयः, 'काले च' कालविषयश्च 'तथा' इति तेनागमप्रसिद्धप्रकारेण 'द्वयोरपि' इत्यनयोरेव क्षेत्रकालयोः 'द्विविध·' द्विभेदः, चशब्दो भावम्मि इत्यत्र योक्ष्यते, भवति संयोगः प्रक्रमात् सम्बन्धनसंयोगः, न च क्षेत्रे काले इत्युक्ते द्वयोरपीति पौनरुक्त्याद् दुष्टं, लोकेऽपि हस्तिन्यश्वे च द्वयोरपि राज्ञो दृष्टिरित्येवंविधप्रयोगदर्शनाद्, 'भावे च' भावविषयश्च, संयोग इति संटङ्कः, भवति द्विविधः, कथं क्षेत्रादिद्वैविध्यमित्याह-'आएसे चेवऽनाएसे'त्ति आङिति मर्यादया-विशेषरूपानतिक्रमात्मिकया दिश्यते-कथ्यत इति आदेशो विशेषस्तस्मिन्, तदन्यस्त्वनादेशः-सामान्यं, पूर्वत्र चैवशब्दयोः समुच्चयावधाणार्थयोर्भिन्नक्रमात्वात्तस्मिंश्चैव, तत्र क्षेत्रविषयोऽनादेशे यथा-जम्बूद्वीपजोऽयम्, आदेशे तु यथा-भारतोऽयं, कालविषयोऽनादेशे यथा-दौष्यमिकोऽयम्, आदेशे तु-वासन्तिकोऽयं, भावविषयोऽनादेशे भाववानयम्, आदेशे त्वौदयिकादिभाववानिति।

सामान्यावगमपूर्वकत्वाद्विशेषावगमस्यैवमुदाहियते, निर्युक्तौ तु विपर्ययाभिधानं जम्बूद्वीप इति सामान्यमपि लोकापेक्षया विशेषो भरतमिति वेशेषोऽपि मगधाद्यपेक्षया सामान्यमित्यादिरूपेण सर्वत्र सामान्यविशेपयोरनियतत्वख्यापनार्थं, भावे च भवति द्विविध इति भिन्नवाक्यताऽभिधानमनन्तरग्रन्थस्यैतद्विषयत्वख्यापनार्थमिति गाथार्थः ॥ अत्र क्षेत्रकालगतयोरादेशानादेशयोरल्पवक्तव्यत्वेन सम्प्रदायादपि सुज्ञानत्वात् तद्विषयः सम्बन्धनसंयोगोऽपि सुज्ञान एवेति मत्वा भावगतादेशानादेशविषयं तमभिधित्सुरुक्तहेतोरेव प्रथममनादेशविषयं भेदत आह-

नि.[४८] ओदइअ ओवसमिए खइए य तहा खओवसमिए य।
परिणाम सन्निवाए छव्विहो होअनाएसो ॥

वृ. तत्रोदयः-शुभानां तीर्थकरनामादिप्रकृतीनाम् अशुभानां च मिथ्यात्वादीनां विपाकतोऽनुभवनं तेन निर्वृत्तः औदयिकः, क्वचित्तु 'उदयिए'त्ति पठ्यते तत्र च पदावसानवर्तिन एकारस्य गुरुत्वेऽपि विकल्पतो लघुत्वानुज्ञानात् नात्र छन्दोभङ्गः, उक्तं हि-

"इहियारा बिंदुजुया एओ सुद्धा पयावसाणंमि।
रहवंजणसंजोए परंमि लहुओ विभासाए ॥"

विपाकप्रदेशानुभवरूपतया द्विभेदस्याप्युदयस्य विष्कम्भणमुपशमस्तेन निर्वृत्त औपशमिकः, क्षयः-कर्मणामत्यन्तोच्छेदः तेन निर्वृत्तः क्षायिकः स च, तथा क्षयश्च-अभाव उदयावस्थस्य उपशमश्च-विष्कम्भितोदयत्वं तदन्यस्य क्षयोपशमौ ताभ्यां निर्वृत्तः क्षायोपशमिकः स च, परीति-सर्वप्रकारं नमनं-जीवानामजीवानां च जीवत्वादिस्वरूपादिस्वरूपानुभवनं प्रति प्रह्वीभवनं परिणामः, 'एदोद्रलोपा विसर्जनीयस्ये'ति विसर्गलोपा विसर्जनीयस्ये'ति विसर्ग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोपः, 'स' मिति संहतरूपतया नीतिजनियतं पतनं-गमनं, कोऽर्थः ? - एकत्र वर्तनं, सन्निपातः- औदयिकादिभावानामेव द्याादिसंयोगः, 'चः' सर्वत्र समुच्चये, इत्थं षड् विद्याः-प्रकाराअस्येति षड्विधो भवति 'अनादेशः' सामान्यं, सामान्यत्वं चौदयिकादीनां गतिकषायादिविशेषेष्व-नुवृत्तिधर्मकत्वाद्, अनादेशस्य षड्विधत्वे तद्विषयः संयोगोऽपि षड्विध इत्युक्तं भवति इति गाथार्थः ॥ इदानीमादेशविषयं तमेव भेदत आह-

नि. [४९] आएसो पुन दुविहो अप्पिअववहारऽनप्पिओ चेव।
इक्किक्को पुन तिविहो अत्तान परे तदुभए य॥

वृ. 'आदेशः' अभिहितरूपः, पुनःशब्दो विशेषणष 'द्विविधः' द्विभेदः, कथमित्याह- 'अप्पियववहारऽनप्पिओ चेव'त्ति व्यवहारशब्दोऽत्र डमरुकमनिन्यायेनोभयत्र सम्बन्ध्यते, ततश्चार्पित इति व्यवहारो यस्मिन् सोऽयमर्पितव्यवहारः, मयूरव्यंसकादित्वात् समासः, अनर्पित-व्यवहारस्तु तद्विपरीतः, तत्रार्पितो नाम क्षायिकादिर्भावः स्वाधारे भाववति ज्ञाताऽयमित्यादिरूपेण ज्ञानमस्येत्यादिरूपेण वा वचनव्यापारेण वक्त्रा स्थापितः, अनर्पितस्तु वस्तुनः साधारणत्वेऽपि निराधार एव प्ररूपणार्थं विवक्षितो यथा-सर्वभावप्रधानः क्षायिको भावः। अनयोरपि भेदानाह- 'एकैकः' इत्यर्पितव्यवहारः अनर्पितव्यवहारश्च पुनस्त्रिविधः, कथमित्याह-'अत्ताण'त्ति आर्षत्वादात्मनि परस्मिन् तयोरात्मपरयोरुभयं तस्मिंश्च, विषयसप्तम्यश्चैताः, ततो विषयत्रै-विध्येनानयोस्त्रैविध्यम्, इहाप्यादेशभेदाभिधानद्वारेण सम्बन्धनसंयोगस्य भेद उक्तो भवति, तत्र चानर्पितस्य प्ररूपणामात्रसत्त्वेऽप्यर्पितप्रतिपक्षत्वेनैवात्रोपादानम्, अतो वस्तुतस्तस्यास-त्त्वान्न तेन कस्यचित्संयोगसम्भव इति न तद्भेदेन संयोगभेदः, अर्पितस्य त्वात्मपरोभया-र्पितभेदतस्त्रैविध्यात् तद्भेदेन त्रिविधः सम्बन्धनसंयोग इति गाथार्थः॥

तत्राऽऽत्माऽर्पितसम्बन्धनसंयोगमाह-

नि. [५०] ओवसमिए य खइए खओवसमिए य पारिणामे अ।
एसो चउव्विहो खलु नायव्वो अत्तसंजोगो॥

वृ. औपशमिके यस्य भिन्नक्रमत्वात् क्षायिके च क्षायोपशमिके च सर्वत्र सम्यक्त्वादिरूपे जीवस्य(स्व) भावे 'तथा' तेनागमोक्तप्रकारेण चस्यास्यापि भिन्नक्रमत्वात् परिणामे च जीवत्वा-द्यात्मके च, सर्वत्र संयोग इति प्रक्रमः, पठ्यते च-'खओवसमिए य पारिणामे य' त्ति स्पष्टमेव, 'एषः' अनन्तरोक्त औपशमिकादिसंयोगः 'चतुर्विधः' चतुष्प्रकारः, 'खलु' निश्चितं 'ज्ञातव्यः' अवबोद्धव्यः, 'आत्मसंयोगः' इत्यात्मार्पितसम्बन्धनसंयोगः, अत्र ह्यात्मशब्देना-र्पितभाव एव धर्मधर्मिणोः कथञ्चिदनन्यत्वादुक्तः, तथा च वृद्धाः-'एए हि जीवमया भवंति, एएसु भावेसु जीवो नन्नो हवइ' तदात्मक इत्यर्थः, औपशमिकादिभावानां च प्रागनादेशतो-क्तावप्यत्रादेशत्वेनाभिधानं सम्यक्त्वादिविशेषनिष्ठत्वेन विवक्षितत्वाद् भावसामान्यापेक्षया वेति गाथार्थः॥ किञ्च-

नि. [५१] जो सन्निवाइओ खलु भावो उदएण वज्जिओ होइ।
इक्कारससंजोगो एसो चिय अत्तसंजोगो॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. यः सान्निपातिकः 'खलु' वाक्यालङ्कारे भावः 'उदयेन' औदयिकभावेन 'वर्जितः' रहितो भवति, एकादश-एकादशसङ्ख्याः संयोगा-द्वयादिमीलनात्मका यस्मिन् स एकादश-संयोगः, सूचकत्वात् सूत्रस्यैतद्विषयो यः संयोगः, एषोऽपि, न केवलमौपशमिकादिसंयोग इत्यपिशब्दार्थः, 'चः' पूरणे, 'आत्मसंयोगः' प्राग्वदात्मार्पितसंयोगः, एकादशसंयोगाश्चैवं भवन्ति-औपशमिकक्षायिकक्षायोपशमिकपारिणामिकानां चतुर्णां षट् द्विकसंयोगाश्चत्वारस्त्रिकसंयोगा एकश्चतुष्कसंयोगः, एते च मीलिता एकादशेति गाथार्थः ॥

बाह्यार्पितसम्बधनसंयोगमाह-

नि.[५२] लेसा कसायवेयण वेओ अन्नाणमिच्छ मीसं च।
जावइया ओदइया सव्वो सो बाहिरो जोगो ॥

वृ. 'लेश्या' लेश्याध्ययनेऽभिधास्यमानाः, कषायाश्च वक्ष्यमाणाः 'वेदना' च सातासातानुभवात्मिका कषायवेदनं, प्राकृतत्वाद्विन्दुलोपः, 'वेदः' पुंस्त्र्युभयाभिलाषाभिव्यङ्ग्यः, मिथ्यात्वोदयवतामसदध्यवसायात्मकं सत् ज्ञानमप्यज्ञानम्, उक्तं हि-

"जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए।
भन्नइ तह नाणंपि हु मिच्छद्दिट्ठिस्स अन्नाणं ॥"

अत एव मिथ्यात्वोदयभावित्वादस्यौदयिकत्वं, तद्दलिकेषु चार्पितत्वविवक्षया बाह्यार्पितत्वमिति भावीनयं, 'मिथ्ये'ति भावप्रधानत्वान्निर्देशस्य मिथ्यात्वम्,-अशुद्धिदलिकस्वरूपं, 'मिश्रं' शुद्धाशुदधदलिकस्वभावं, चशब्दः शेषौदयिकभेदसमुच्चये, अत एवोपसंहारमाह-'यावन्तो' यत्परिणामा औदयिकाः, भावा इति गम्यते, प्रक्रमादेतद्विषयो यः संयोगः 'सर्वः' निर्वेशेषः सः 'बाह्यः' परः तद्विषयत्वाद्, बाह्यसंयोग इति प्रकृतत्वात्सम्बन्धनसंयोगो ज्ञातव्य इति शेषः, इहापि बाह्यशब्देन प्राग्वद् बाह्यार्पित उक्तः।

आह-'भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव' इतिवचनादौदयिकोऽपि जीवभावत्वेन जीवार्पित एवेति कथं बाह्ये कर्मण्यर्पित इति, अत्रोच्यते, कर्मानुभवनमुदयः, अनुभवनं चानुभवितरि जीवेऽनुभूयमाने च कर्मणि स्थितं, तत्र यदाऽनुभवितरि जीवे विवक्ष्यते तदोदयः जीवगतो लेश्यादिपरिणामः प्रयोजनमस्येत्यौदयिकः-कर्मणः फलप्रदानाभिमुख्यलक्षणो विपाक एव तमाश्रित्य कर्मणि बाह्येऽर्पितत्वमिहौदयिकभावस्योक्तं, यदा त्वनुभूयमानस्थतया विवक्ष्यते तदोदये-कर्मणि फलप्रदानाभिमुख्यलक्षणे भव औदयिको लेश्याकषायादिरूपो जीवपरिणामः, तदाश्रयणेन चोच्यते-भावा भवन्ति जीवस्यौदयिक इत्यादि। इहापि चोदेशान्तरेण वक्ष्यन्ति-'छव्विहो अत्तसंजोगो'त्ति 'सर्वः स' इति चैकवचनं बाह्यसंयोगस्य विधीयमानतया प्राधान्यात् प्रधानानुयायित्वाच्च व्यवहाराणामिति गाथार्थः ॥ उभयार्पितसम्बन्धसंयोगमाह-

नि.[५३] जो सन्निवाइओ खलु भावो उदएण मीसिओ होइ।
पन्नारससंजोगो सव्वो सो मीसिओ जोगो ॥

वृ. यः सान्निपातिकः खलु भावः 'उदयेन' औदयिकभावेन 'मिश्रितः' संयुतो भवति, कियत्संख्य इत्याह-पञ्चदश संयोगा अस्मिन्निति पञ्चदशसंयोगः, सर्वः सः किमित्याह-आत्मकर्मणोर्मिश्रत्वात्तदर्पितभावा अप्यौदयिकसहितौपशमिकादयो मिश्राः, ततस्तद्विषयत्वात्सं-

योगोऽपि मिश्रः, स एव मिश्रको योगः, प्रक्रमात् सम्बन्धनसंयोगो ज्ञेय इति शेषः, ते च पञ्चदश संयोगा औदयिकममुञ्चता औपशमिकादिपञ्चकस्य द्विकत्रिकचतुष्कपञ्चकसंयोगतः कार्याः, तत्र चत्वारो द्विकसंयोगाः षट् त्रिकसंयोगाश्चत्वारश्चतुष्कसंयोगा एकः पञ्चकसंयोग एते च मीलिताः पञ्चदश, भावना तु वक्ष्यमाणेति गाथार्थः ॥

पुनरात्मसंयोगादीनेव प्रकारान्तरेणाभिधित्सुः प्रस्तावनामाह-

नि.[५४] बीओऽवि य आएसो अत्ताणे बाहिरे तदुभए य।
संजोगो खलु भणिओ तं कित्तेऽहं समासेणं ॥

वृ. द्वितीयोऽपि च न केवलमेक एव इत्यपि शब्दार्थः, चः पूरणेः 'आदेशः' प्रकारः, प्रस्तावत्, प्ररूपणीयः, कीदृश इत्याह-आत्मनि बाह्ये तदुभयस्मिंश्च, संयोग इति सम्बन्धनसंयोगः, 'खलु' निश्चित 'भणित' उक्तो, गणधरादिभिरिति गम्यते, अनेन च गुरुपारतन्त्रयमाविष्करोति, 'तम्' इति द्वितीयमादेशं 'कीर्तये' संशब्दये' वर्तमानसामीप्ये वर्तमानवद् वे' ति भविष्यत्सामीप्ये लट्, 'अहम्' इत्यात्मनिर्देशः, 'समासेन' संक्षेपेणेति गाथार्थः ॥

तत्र तावदात्मसंयोगमाह-

नि.[५५] ओदइय ओवसमिए खइए य तहा खओवसमिए य।
परिणामसन्निवाए अ छव्विहो अत्तसंजोगो ॥

वृ. 'औदयिके' औदयिकविषये, एवम् औपशमिके च क्षायिके तथा क्षायोपशमिके च परिणामसन्निपाते च, सर्वत्र संयोग इति प्रक्रमः, तत एष 'षड्विधः' षड्भेदः आत्मभिः,-आत्मरूपैः संयोग इति सम्बन्धनसंयोगउ आत्मसंयोगः, न चैषामेकैकेनात्मनः संयोगः सम्भवति, अपि तु द्वाभ्यां त्रिभिश्चतुर्भिः, पञ्चभिर्वा, तत्र द्वाभ्यां क्षायिकेण सम्यक्त्वेन ज्ञानेन वा पारिणामिकेन च जीवत्वेन, त्रिभिरौदयिकेन देवगत्यादिना क्षायोपशमिकेन मत्यादिना पारिणामिकेन च जीवत्वेन, चतुर्भिस्त्रिभिरे(वमे) व चतुर्थेनौपशमिकेन क्षायिकेण वा सम्यक्त्वेन, पञ्चभिर्यदा क्षायिकसम्यग्दृष्टिरेवोपशमश्रेणिमारोहति तदौदयिकेन मनुष्यत्वेन क्षायिकेण सम्यक्त्वेन क्षायोपशमिकेन मत्यादिना औपशमिकेन चारित्रेण पारिणामिकेन जीवत्वेनेति, अत्र च त्रिकभङ्गक एकः चतुष्कभङ्गौ च द्वावेते त्रयोऽपि गतिचतुष्टयभाविन इति गतिचतुष्टयेन भिद्यमाना द्वादश भवन्ति, उक्तं च-

"ओदइय खओवसमो तइओ पुण पारिणामिओ भावो।
एसो पढमवियप्पो देवाणं होइ नायव्वो ॥१॥
ओदइय खओवसमो ओवसमिपारिणामिओ बीओ।
उदइयखइपारिणामियखओवसमो भवे तइओ ॥२॥
एए चेव वियप्पा नरतिरिणरएसु हुंति बोद्धव्वा।
एए सव्वे मिलिया बारस होंती भवे भेया ॥३॥"

पञ्चभिर्मनुष्यस्यैव, तस्यैव तथोपशमश्रेण्यारम्भकत्वात्, तस्यामेव च तत्सम्भवात्, तथा चाह-

"ओदइए ओवसमिए खओवसमिए खए य परिणामे।
उवसमसेढिगयस्सा एस वियप्पो मुणेयव्वो ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यथाऽपि च त्रिभिः सम्भवति, तद्यथा-औदयिकेन मनुष्यत्वेन क्षायिकेण ज्ञानेन पारिणामिकेन जीवत्वेन, अयं च केवलिनाम्, उक्तं हि-"उदइयखइयप्परिणामिय भावा होंति केवलीणं तु" प्रागुक्तभावोभयेन च सिद्धानामेव, उक्तं हि-"खाइय तह परिणामा सिद्धाणं होंति नायव्वा" एवं चैते पञ्चकत्रिकद्विकसंयोगभङ्गास्त्रयः पूर्वे च द्वादशेति मीलिताः पञ्चदश सम्भवन्ति, एत एव चाविरुद्धसान्निपातिकभेदाः पञ्चदश तत्र तत्रोच्यन्ते, तथा चाहुः-

"एए संजोएणं भावा पन्नरस होंति नायव्वा ।
केवलिसिद्धुवसमसेढिएसु सव्वासु य गईसु ॥"

आह-एवं सान्निपातिके नैवात्मनः सदा संयोगसम्भवात् कथं षड्विधत्वमात्मसंयोगस्य ?, उच्यते, सहभावित्येऽपि भावनां यदैकस्य प्राधान्यं विवक्ष्यते तदैकेनाप्यात्मसंयोगसम्भव इत्यदोष इति गाथार्थः ॥ बाह्यसम्बन्धनसंयोगमाह-

नि.[५६] नामंमि अ खित्तंमि अ नायव्वो बाहिरो य(उ) संजोगो ।
कालेन बाहिरो खलु मीसोऽवि य तदुभए होइ ॥

वृ. 'नाम्ना' वस्त्वभिधायिध्वनिस्वभावेन, चकारात् द्रव्येण क्षेत्रेण चाकाशदेशात्मकेन, प्राकृतत्वात्, तृतीयार्थे सप्तमी, प्रकृतत्वात् संयोगः, किमित्याह-ज्ञातव्यः बाह्यविषयत्वाद्, 'बाह्यः' तुः पुनरर्थः 'संयोग' इति सम्बन्धनसंयोगः, 'कालेन' इति चस्य गम्यमानत्वात् कालेन च समयाऽऽवलिकादिना, तत एव संयोगो-बाह्यसम्बन्धनसंयोगः 'खलु' निश्चितं, ज्ञातव्य इति योज्यम्, इदमिहैदम्पर्यम्-यः पुरुषादेर्देवदत्तानाम्ना सम्बन्धोऽयं देवदत्त इत्यादिः द्रव्येण च दण्डीत्यादिः क्षेत्रेणारण्यजो नगरज इत्यादि कालेन दिनजो रजनिज इत्यादि, स सर्वो नामादिभिर्बाह्यैरेवेति बाह्यः सम्बन्धनसंयोगः, भावेन तु संयोग आत्मसंयोगत्वेनोक्त एव, भवितुरनन्यत्वात्, भावस्य, अन्यथा तस्याभावत्वप्रसङ्ग इतीह तस्यानभिधानं, तथा कालेन बाह्य इति च भिन्नवाक्यताकरणं केषाञ्चिन्मतेन कालस्यासत्त्वख्यापनार्थं, यद्वा नाम्नि क्षेत्र इति च विषयसप्तम्येव, यो हि येन सह भवति स तद्विषय एवेतिकृत्वा ।

आह-नाम्नोऽप्यभिलापत्वात् तद्विषयोऽपि संयोगोऽभिलापसंयोगः, स चोक्त एवेति कथं न पौनरुक्त्यम् ?, उच्यते, अभिलापसामान्यविषयोऽभिलापसंयोगः, अयं तु सम्बन्धनसंयोगस्य प्रकृतत्वात् तस्य च सकषायजीवसम्बन्धित्वात्, वक्ष्यति हि-"संबंधणसंजोगो कसायबहुलस्य होइ जीवस्स" त्ति, कस्यचिन्नाम्न्यप्यभिष्वङ्गसम्भवादभिष्वङ्गहेत्वभिलापविषय एवेति न पौनरुक्त्यं, 'मीसोऽवि य'त्ति 'अपिः' पुनरर्थे, 'चः' पूरणे, ततो मिश्रविषयत्वान्मिश्रः सम्बन्धसंयोगः पुनर्ज्ञातव्यः, यः कीदृगित्याह-'तदुभए'त्ति प्राग्वत्तदुभयेन-आत्मबाह्यलक्षणेन तदुभयस्मिन् वोक्तरूप एव भवति, यः संयोग इति शेषः, यथा-क्रोधी देवदत्तः क्रोधी कौन्तिको मानी सौराष्ट्रः क्रोधी वासन्तिकः, अत्र क्रोधादिभिरौदयिकभावान्तर्गतत्वेनात्मरूपैर्नामादिभिस्त्वात्मनोऽन्यत्वेन बाह्यरूपैः संयोग इत्युभयसम्बन्धनसंयोग उच्यते ।

नन्वेवं न कदाचिन्नामादिविकलैरौदयिकादिभिरौदयिकादिरहितैर्वा-नामादिभिरात्मनः संयोग इति सर्वदोभयसम्बन्धनसंयोग एव प्राप्तः, सत्यमेतत्, किन्तु वक्तुरभिप्रायवैचित्र्यात्कदाचिदौदयिकादिभिः कदाचिन्नामादिभिः कदाचित्तदुभयेन संयोगविवक्षेति नात्मपरोभय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बन्धनसंयोगत्रयविरोध इति गाथार्थः ॥ प्रकारान्तरेण बाह्यसम्बन्धनसंयोगमाह-

नि. [५७] आयरिय सीस पुत्तो पिया य जननी य होइ धूया य।
भज्जा पइ सीउण्हं तमुज्जछायाऽऽयवे चेव ॥

वृ. आङित्यभिव्याप्त्या मर्यादया वा स्वयं पञ्चविधाचारं चरत्याचारयति वा परान् आचर्यते वा मुक्त्यर्थिभिरासेव्यत इति आचार्यः, 'अन्यत्रापी'ति वचनात् कर्तरि कर्मणि वा कृत्यप्रत्ययः, तथा शासितुं शक्यः शिष्यः पुनाति पितुराचारानुवर्तितयाऽऽत्मानमिति पुत्रः पाति-रक्षत्य-पत्यमिति पिता स च जनयति-प्रादुर्भावयत्यपत्यमिति जननी सा च भवति बाह्यसम्बन्धन-संयोगविषयत्वाद्बाह्यसम्बन्धनसंयोग इति वृद्धाः, इदं च सर्वत्र योज्यं, दोग्धि च केवलं जननीं स्तन्यार्थमिति दुहिता, ततश्च 'दुहितरि धो हिलोपश्च' इतिवचनादादेर्धत्वे हिलोपे च 'उदूत् सुपुष्पोत्सवोत्-सुकदुहितृषु" इति वचनात्, उत ऊत्त्वे च धूया, सा च, चकारत्रयं पूरणे, भ्रियते, पोष्यते भर्त्रैति भार्या पाति-रक्षति तामिति पतिः स्त्यायते धातूनामनेकार्थत्वात् कठिनी-भवत्यस्मिन् जलादिति शीतम् उषति-दहति जन्तुमिति उष्णं तमयति-खेदयति जनलोचनानीति तमः औणादिकोऽसन् 'उज्ज' त्ति आर्षत्वादुद्द्योतयतीति उद्द्योतः पचादित्वादच्, छूयति छिनत्ति वाऽऽतपमिति छाया, आ-समन्तात्तपति संतापयति जगदिति आपतः, चशब्दो राज-भृत्याद्यनुक्ताशेषसम्बन्धिसमुच्चये, लक्षणानुपपत्तौ च सर्वत्र नैरुक्तो विधिः, सुपश्च यत्राश्रवणं तत्र प्राग्वल्लुक्, इदमत्रैदम्पर्यम्-

आचार्यः शिष्यादन्यत्वेन बाह्यः, ततो यस्तेन शिष्यस्य संयोगः शिष्य इत्युरिक्तवश्यमा-चार्यमाक्षिपति यस्यायं शिष्य इत्याक्षेप्याक्षेपकभावलक्षणः स बाह्येनेतिकृत्वा बाह्यसम्बन्धन-संयोगः, ततस्तद्विषयआचार्योऽप्युपचारात्तथोच्यते, एवं शिष्योऽप्याचार्यादन्यत्वेन बाह्यः, तेनाप्याचार्यस्य यः संयोगः-आचार्य इत्युक्तिरवश्यं शिष्यमाक्षिपति यस्यायमाचार्य इत्याक्षेप्या-क्षेपकभावरूपः सोऽपि बाह्येनेतिकृत्वा बाह्यसम्बन्धनसंयोगः, ततत्सद्विषयः शिष्योऽप्युचारात्, तथोच्यते, एवं पुत्रपित्रादिद्वयेष्वपि भावनीयं, सर्वत्र सामान्येन परस्पराक्षेप्याक्षेपकभावः सम्बन्धः, विशेषनिरूपणायां त्वाचार्याशिष्यभार्यापतीनामुपकार्योपकारकभावः पितृपुत्रजननी-दुहितृणां जन्यजनकभावः शीतोष्णादीनां च विरोधः सम्बन्धः, अत एव च विशेषाद् द्रव्यसंयोग-त्वेऽप्यस्य भेदेनोपादानमिति गाथार्थः ॥

सम्प्रति संयोगप्रक्रमेऽप्याचार्यशिष्यमूल-त्वादनुयोगस्य तयोः स्वरूपमाह-

नि. [५८] आयरिओ तारिसओ जारिसओ नवरि हुज्ज सो चेव।
आयरियस्सवि सीसो सरिसो सव्वेहिवि गुणेहिं ॥

वृ. आचार्यः, 'तादृशः' तथाविधः, यादृशः क इत्याह-यादृशो 'नवर' मिति यदि परं भवेत् 'स चेव' त्ति चः पूरणे, स एव-आचार्य एव, किमुक्तं भवति ?-आचार्यस्याचार्य एवान्यः सदशो भवति, न पुनरनाचार्यः, आचार्यगुणानामन्यत्राविद्यमानत्वात्, न ह्याचार्यदन्यः षट्त्रिंश-तसंख्यगणिगुणसमन्वित इहास्ति, तत्समन्वितत्वे त्वन्याऽपि तत्त्वत आचार्य एवेति। अथ क एते षट्त्रिंशद्गुणा ?, उच्यन्ते, प्रत्येकं चतुष्प्रकारा अष्टौ गणिसम्पदो द्वात्रिंशत्, तत्र चाचारादि-चतुर्विधविनयमीलनात् षट्त्रिंशद्भवन्ति, उक्तं च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अट्ठविहा गणिसंपइ चउग्गुणा नवरि होंति बत्तीसा।
विनओ य चउब्भेओ छत्तीस गुणा हवंतेए॥"

तत्राष्टौ गणिसम्पद इमाः-आचारसम्पत् १ श्रुतसम्पत् २ शरीरसम्पत् ३ वचनसम्पत् ४ वाचनासम्पत् ५ मतिसम्पत् ६ प्रयोगमतिसम्पत् ७ संग्रहपरिज्ञासम्पत् ८ तथा चाह-

"आयारसुयसरीरे वयणे वायणमतीपतोगमती।
एएसु संपया खलु अट्ठमिया संगहपरिन्ना॥"

तत्र चाचारसम्पत् चतुर्धा-संयमध्रुवयोगयुक्तता १ असम्प्रग्रहता २ अनियतवृत्तिः ३ वृद्धशीलता चेति ४ तत्र संयमः -चरणं तस्मिन् ध्रुवो-नित्यो योगः-समाधिस्तद्युक्तता, कोऽर्थः ?-सन्ततोपयुक्तता संयमध्रुवयोगयुक्तता १, असम्प्रग्रहः-समन्तात् प्रकर्षेण जात्यादिप्रकृष्टतालक्षणेन ग्रहणम्-आत्मनोऽवधारणं सम्प्रग्रहस्तदभावोऽसम्प्रग्रहः, जात्याद्यनुत्सिक्ततेत्यर्थः, २, अनियतवृत्तिः-अनियतविहाररूपा ३, वृद्धशीलता-वपुषि मनसि च निभृतस्वभावता निर्विकारतेतियावत् ४, १ श्रुतसम्पच्चतुर्धा-बहुश्रुतता १ परिचितसूत्रता २ विचित्रसूत्रता ३ घोषविशुद्धिकरणता ४ च, तत्र बहुश्रुतता-युगप्रधानागमता १ परिचितसूत्रता-उत्क्रमक्रमवाचनादिभिः स्थिरसूत्रता २ विचित्रसूत्रता-स्वपरसमयविविधोत्सर्गापवादादिवेदिता ३ घोषविशुद्धिकरणता-उदात्तानुदात्तादिस्वरशुद्धिविधायिता ४, २

शरीरसम्पच्चतुर्धा-आरोहपरिणाहयुक्तता १ अनवत्राप्यता २ परिपूर्णेन्द्रियता ३ स्थिरसंहननता च ४, इह चाऽऽरोहो-दैर्ध्यं परिणाहो-विस्तरः ताभ्यां तुल्याभ्यां युक्तताऽऽरोहपरिणाहयुक्तता १ अविद्यमानमवत्राप्यम्-अवत्रपणं लज्जनं यस्य सोऽयमनवत्राप्यः, यद्वाऽवत्रापयितुं-लज्जयितुमर्हः शक्यो वाऽवत्राप्यो लज्जनीयः न तथाऽनवत्राप्यस्तद्भावोऽनवत्राप्यता २ उभयत्राहीनसर्वाङ्गत्वं हेतुः, परिपूर्णेन्द्रियता-अनुपहतचक्षुरादिकरणता ३ स्थिरसंहननता-तपःप्रभृतिषु शक्तियुक्तता ४, ३ वचनसम्पच्चतुर्भेदा-आदेयवचनता १ मधुरवचनता २ अनिश्रितवचनता ३ असन्दिग्ध-वचनता ४, तत्राऽऽदेयवचनता-सकलजनग्राह्यवाक्यता १, मधुरं रसवद् यदर्थतो विशिष्टार्थवत्तयाऽर्थावगाढत्वेन शब्दतश्चापरुषत्वसौस्वर्यगाम्भीर्यादिगुणोपेतत्वेन श्रोतुराह्लादमुपजनयति तदेवंविधं वचनं यस्य स तथा तद्भावो मधुरवचनता २ अनिश्रितवचनता-रागाद्यकलुषित-वचनता ३ असन्दिग्धवचनता-परिस्फुटवचनता ४, ४

वाचनासम्पच्चतुर्धा-विदित्वोद्देशनं १ विदित्वा समुद्देशनं २ परिनिर्वाप्य वाचना ३ अर्थनिर्यापणेति ४, तत्र विदित्वोद्देशने विदित्वा समुद्देशने ज्ञात्वा परिणामिकत्वादिगुणोपेतं शिष्यं यद् यस्य योग्यं तस्य तदेवोद्दिशति समुद्दिशति वा, अपरिणामिकादावपक्वघटनिहितजलोदाहरणतो दोषसम्भवात्, २ परीति-सर्वप्रकारं निर्वापयतो निरो निर्दग्धादिषु भृशार्थस्यापि दर्शनात् भृशं गमयतः-पूर्वदत्तालापकादि सर्वात्मना स्वात्मनि परिणमयतः शिष्यस्य सूत्रगताशेषविशेषग्रहणकालं प्रतीक्ष्य शक्त्यनुरूपप्रदानेन प्रयोजकत्वमनुभूय परिनिर्वाप्य वाचना-सूत्रप्रदानं परिनिर्वाप्यवाचना ३, अर्थः-सूत्राभिधेयं वस्तु तस्य निरिति भृशं यापना-निर्वाहणा पूर्वापरसाङ्गत्येन स्वयं ज्ञानतोऽन्येषां च कथनतो निर्गमना निर्यापणा ४, ५।

मतिसम्पत् अवग्रहेहापायधारणारूपा चतुर्द्धा, अवग्रहादयश्च तत्र तत्र प्रपञ्चिता एवेति न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विव्रियन्ते ६। प्रयोगमतिसम्पच्चतुर्धा-आत्मपुरुषक्षेत्रवस्तुविज्ञानात्मिका, तत्राऽऽत्मज्ञानं-वादादिव्यापारकाले किममुं प्रतिवादिनं जेतुं मम शक्तिरस्ति नवा ? इत्यालोचनं ?, पुरुषज्ञानं-किमयं प्रतिवादि पुरुषः सांख्यः सौगतोऽन्यो वा ?, तथा प्रतिभादिमानितरो वेति परिभावनं २, क्षेत्रज्ञानंकिमिदं मायाबहुलमन्यथा वा ?, तथा साधुभिरभावितं भावितं वा नगरादीति विमर्शनं ३, वस्तुज्ञानं-किमिदं राजाऽमात्यादि सभासदादि वा वस्तु दारुण्यमदारुणं भद्रकमभद्रकं वेति निरूपणं ४, ७

संग्रहपरिज्ञा तु बालदुर्बलग्लाननिर्वाहबहुजनयोग्यक्षेत्रग्रहणलक्षणैका १ निषद्यादि-मालिन्यपरिहाराय फलकपीठोपादानाऽऽत्मिका द्वितीया २ यथासमयमेव स्वाध्यायोपधिस-मुत्पादनप्रत्युपेक्षणभिक्षादिकरणात्मिका तृतीया ३ प्रव्रजकाध्यापकरत्नाधिकादिगुरूणामुप-धिवहनविश्रामसंपूजनाभ्युत्थानदण्डकोषादानादिरूपा चतुर्थीति ४, ८।

इत्युक्ता अष्टौ चतुर्गुणा आचारादिगणिसम्पदः, विनयस्तूत्तरत्राचार्यविनयप्रस्तावेऽभिधा-स्यते, इति गतं प्रासङ्गिकं, प्रकृतमुच्यते-तत्राऽऽचार्यस्य स्वरूपमभिहितं, शिष्यस्याह-आचार्यस्य, अपिर्भिन्नक्रमः, ततः शिष्योऽपि, न केवलमाचार्यस्ताऽदृशा यादृशो नवरं स एवेति वचनादाचार्य इत्यपिशब्दार्थः, 'सदृशः' तुल्यः, सर्वैरपि न कतिपयैरेव, कैः ?, 'गुणैः' साधारणैः क्षान्त्यादिभिरिति गम्यते, यद्वा लक्षणे तृतीया, ततः सर्वैरपि स्वगुणैर्लक्षितः शिष्य आचार्यस्य सदृश इति योज्यं, सादृश्यं च स्वगुणमाहात्म्यविभूतित उभयोरपि यथोक्तान्वर्थमुक्तत्त्व)मेव, अथवाऽऽचार्यस्यापीति अपेरेवकारार्थत्वात् स्वगुणोपलक्षितः शिष्यः सदृश एव-अनुरूप एव, अनुरूपार्थस्यापि सदृशशब्दस्य दर्शनात्, यथाऽऽत्मसदृशं कुर्याः, कुलानुरूपमित्यर्थः, अननुरूपस्तु तत्त्वतोऽशिष्य एवेति भावः, अथ के अमी शिष्यगुणाः, ? उच्यन्ते,

'भावविया‌नानमनुयत्तणा उ भत्ती गुरूण बहुमानो।
दक्खत्तं दक्खित्रं सीलं कुलमुज्जमो लज्जा ॥१॥
सुस्सूसा पडिपुच्छा सुननं गहणं च ईहणमवाओ।
धरणं करणं सम्मं एमाई होंति सीसगुणा ॥२॥"

इति गाथार्थः ॥ इत्थमनुयोगोपयोगित्वादाचार्यशिष्ययोः स्वरूपक्तं, प्रकारान्तरेणोभय-सम्बन्धनसंयोगमाह-

नि. [५९] एवं नाणे चरणे सामित्ते अप्पणो उ(य) पिउनोत्ति।
मज्झं कुलेऽयमस्स य अहयं अब्भितरो मित्ति ॥

वृ. 'एवम्' अनन्तरोक्तबाह्यसंयोगवदाक्षेप्याक्षेपकभावेन 'ज्ञाने' ज्ञानविषयः 'चरणे' चरण-विषयः, आत्म न उभयसम्बन्धनसंयोगो ज्ञातव्य इति वृद्धाः, अत्र भावना-ज्ञानेनात्मभूतेन संयोगो, ज्ञानमित्युक्तिर्निराश्रयस्य निर्विषयस्य च ज्ञानस्यासम्भवादवश्यं ज्ञानिनं च चाऽऽ-क्षिपतीति, ज्ञानाक्षिप्तेन च ज्ञेयेन बाह्येन तद्द्वारकः संयोग इत्युभयसंयोगः। एवं चरणे-नाप्यात्मभूतेनोक्तवत्तदाक्षिप्तेन चर्यमाणेन च बाह्येन संयोग इत्युभयसम्बन्धनसंयोगः, अयमाक्षे-प्याऽऽक्षेपकभावे उभयसम्बन्धनसंयोग उक्तः, अमुमेव प्रकारान्तरेणाह-'स्वामित्वेन' स्वामित्वविषयः, उभयसम्बन्धनसंयोग इति प्रक्रमः, किंरूप ? इत्याह- 'आत्मनः' मम 'चः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूरणे, पितुः' जनकस्य, पुत्र इति गम्यते, एवंविधोल्लेखव्यङ्ग्ये, अत्रात्मनः पित्रा सहात्मकद्वारकः स्वस्वामिभावलक्षणः सम्बन्धः, तत्पुत्रेण परद्वारकः, मम पितुरयं, पुत्र इति पितृद्वारेणास्याविति कृत्वा तत उभयद्वारकत्वादुभयविषयसंयोग उभयसम्बन्धनसंयोगः, इतिशब्दो मम पितुः मम भ्रातुः मम दासस्य कम्बल इत्येवंप्रकारसम्बन्धान्तरव्यञ्जकान्योल्लेखसूचकः,

अनेन लौकिके स्वामित्व उभयसम्बन्धनसंयोग उक्तः, लोकोत्तरमेवाह-मम 'कुले' नागेन्द्रादावयं साध्वादिरिति गम्यते, यद्वा कुलमेव कुलकं तस्य, 'चः' समुच्चये योक्ष्यते, ततोऽहमेव अहकम् अभ्यन्तरः 'अस्मि' भवामि, चशब्दादयं च साध्वादिरित्येवंविधोल्लेखद्वयव्यङ्ग्य एषोऽप्युभयसम्बन्धनसंयोग इति वृद्धाः, अत्र हि मच्छब्दवाच्यस्य कुलेन सहात्मद्वारकः स्वस्वामिभावसम्बन्धः, कुलान्तर्वर्तिना च साध्वादिना परद्वारको, मम कुलेऽयमिति कुलद्वारकत्वादस्य, ततोऽयमपि प्राग्वदुभयसम्बन्धनसंयोगः, इहापि इतिशब्दोऽयं मम गुरोः साध्वादिरित्याद्येवंप्रकारसम्बन्धान्तरव्यञ्जकान्योल्लेखसूचकार्थः, इह चोल्लेखद्वयाभिधानमेकत्राप्यनेकोल्लेखसम्भवख्यानार्थमिति गाथार्थः ॥ पुनरन्यथा तमेवाह-

नि.[६०] पच्चयओ य बहुविहो निव्वित्ती पच्चओ जिनस्सेव ।
देहा य बद्धमुक्का माइपिइसुआइ अ हवंति ॥

वृ. प्रतीयतेऽनेनार्थ इति पत्ययः-ज्ञानकारणं घटादिः, सर्वथा निरालम्बनज्ञानाभावेन तदविनाभावित्वात ज्ञानस्य, ततस्तमाश्रित्य, चकारात् ज्ञानतश्च-ज्ञानं चाश्रित्य 'बहुविधः' बहुप्रकारः, प्रक्रमादात्मनो यः संयोगः स उभयसम्बन्धसंयोगः, तद्बहुत्वं च प्रत्ययानां तद्विशिष्टज्ञानानां च बहुविधत्वात्, तथा च वृद्धाः-घटं प्रतीत्य घटज्ञानं पटं प्रतीत्य पटज्ञानम् एवमादीनि प्रत्ययात् ज्ञानानि भवन्ति, तथा च सति ज्ञानेनात्मद्वारको, ममेदं ज्ञानमिति प्रत्ययेन परद्वारको, मम ज्ञानस्यायं विषय इति ज्ञानद्वारकत्वात्तस्य तत उभयविषयत्वादुभयसम्बन्धनसंयोगः ।

आह-एवं केवलिनोऽप्युभयसंयोग एवेति, अत्रोच्यते, 'निर्वृत्तिः' इत्युत्तरत्रैवकारस्य भिन्नक्रमत्वान्निर्वृत्तिरेव-सकलावरणक्षयादुत्पत्तिरेव प्रत्ययो जिनस्य, जिनसम्बन्धिज्ञानस्येति गम्यते, इदमाकूतम्-छद्मस्थानं हि मत्यादिकं लब्धिरूपतयोत्पन्नप्युपयोगरूपतायां बाह्यमति घटादिकमपेक्षते, तथाहि-घटं प्रतीत्य घटज्ञानं पटं प्रतीत्य पटज्ञानं, केवलिनस्तु ज्ञानं लब्धिरूपतयोत्पन्नं पुनरुपयोगरूपतां प्रति न बाह्यं घटादिकमपेक्षते-तज्ज्ञानस्योत्पत्तिसमकालमेव सकलातीतानागतदूरान्तरितस्थूलसूक्ष्मार्थयाथात्म्यवेदितयैवोपयोगभावात्, यदुक्तम्-

"उभयवरणाईतो केवलवरनाणदंसणसहावो ।
जाणइ पासइ य जिनो सव्वं नेयं सयाकालं ॥"

ततः केवलज्ञानस्य सर्वत्र सततोपयोगेन नोपयोगं प्रति बाह्यापेक्षेति निर्वृत्तिरेव प्रत्ययः, ततो न छद्मस्थज्ञानस्येव प्रत्ययत उभयसंयोगः । आह-उक्त एव ज्ञानस्योभयसंयोगः, तत् किं पुनरुच्यते?, सत्यम्, उक्तः स तत्राक्षेप्याक्षेपकभावेन, इह त्वेकस्यापि वस्तुन उपाधिभेदेनानेकसम्बन्धसम्मभवख्यापनाय जन्मजनकभावेनोच्यते इति न दोषः ।

उभयसम्बन्धनसंयोगमेव पुनः स्वस्वामिभावेनाह-'दिह्यन्ते-उपचीयन्ते पुद्गलैरिति देहाः-कायाः ते च बद्धा-इह जन्मनि जीवेन सम्बद्धा मुक्ता अन्यजन्मनि तेनैवोज्झिता अनयोर्द्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्द्वे बद्धमुक्ताः, 'माइपितिसुयाइ'त्ति 'नो जसूशसोर्लोपे' आर्षत्वाच्च 'लोपे दीर्घ' इति दीर्घत्वस्याभावे पितृमातृसुतादयः, आदिशब्दाद् भ्रातृभगिन्यादयो, बद्धमुक्ता इत्यत्रापि योज्यते, चशब्दोऽयं पूर्वश्च समुच्चये, एते च किमित्याह-'भवंति'त्ति जायन्ते, प्राग्वदुभयसम्बन्धनसंयोगः, जीवस्येति गम्यते, इयमत्र भावना-बद्धा देहा मात्रादयश्चात्मरूपाः, तत्र देहात्मनोः क्षीरनीरवदन्योऽन्यानुगतत्वेन मात्रादयश्चात्यन्तस्नेहविषयतयाऽऽत्मवद् दृश्यमानत्वेन, मुक्तास्तूभये बाह्याः, तत्र देहा आत्मनः पृथग्भूतत्वेन मात्रादयश्च तथाविधस्नेहाविषयतयाऽऽत्मवद्दृश्यमानत्वेन, अतो देहैर्मात्रादिभिश्च बद्धमुक्तैः स्वस्वाभिवालक्षणसम्बन्धो जीवस्योभयसम्बन्धसुयोगः ।

आह-देहादयो मुक्ताश्च स्वस्वामिविषयाश्चेति विरुद्धमेतत्, एवमेतद्, यदि भावतोऽपि मुक्ताः स्युः, अथ भावतोऽप्यहमेषां स्वामी ममैते स्वमितिभावाभावान्मुक्ता एव ते, नन्वेवमैहिकेष्वप्यमीष्वपरापरोपयोगवत आत्मनो न सततमेवं भावोऽस्तीति कथं तेष्वपि तद्विषतया?, अथ तेष्वेवं भावाभावेऽपि व्युत्सर्गाकरणतस्तद्विषयत्वम्, एतदिहापि समानं, व्युत्सर्गाकरणत एव तद्विषयत्वस्येहापि विवक्षितत्वादिति ॥ इत्थमनेकधा सम्बन्धनसंयोग उक्तः,

नि.[६१] संबंधणसंजोगो कसायबहुल्लस होइ जीवस्स ।
पहुणो वा अपहुस्स व मज्झंति ममज्जमाणस्स ॥

वृ. 'सम्बन्धनसंयोगः' उक्तरूपः, कषायाः-क्रोधादयस्तेर्बहुलस्य-व्याप्तस्य, प्रभूतकषायस्येत्यर्थः, 'भवति' जायते, कस्य ?-जीवस्य, पुनः कीदृशस्य ?,-प्रभवति-सम्बन्धिवस्तु तत्र तत्र स्वकृत्ये नियोक्तुं समर्थो भवतीति प्रभुस्तस्य वा 'अप्रभोर्वा' उक्तविपरीतस्य, वाशब्दौ समुच्चये, उभयोरपि संयोगसाम्यं प्रति कारणमाह-'मज्झंति ममज्जमानस्स'त्ति ममेदं नगरजनपदादीति ममत्वाचारतः, इदमुक्तं भवति-सत्यसति वा मत्सम्बन्धितया बाह्यवस्तुनि तत्त्वतोऽभिष्वङ्ग एव सम्बन्धनसंयोगः, अनेन च काक्वा कषायबहुलत्वे हेतुरुक्तः, कषायबहुलस्येति च ब्रुवता कषायद्वारेण सम्बन्धनसंयोगस्य कर्मबन्धहेतुत्वं ख्यापितं भवति, आहमिथ्यात्वादयो हि बन्धहेतवः, तत्कथं कषायसत्तामात्रेणैव तद्धेतुख्यापनम्?, उच्यते, तेषामेव तत्र प्राधान्यात्, तत्प्राधान्यं च तत्तारतम्येनैव वत् कषायबहुलस्य जीवस्येत्युच्यते, ततोऽकषायहेतुकत्वेऽप्यौपशमिकादिभावे नामादिसंयोगानामजीवविषयत्वेऽपि च शीतोष्णादिविरोधिसंयोगानां सम्बन्धनसंयोगत्वं न विरुध्यते ।

आह-एवमभिप्रेतानभिप्रेतसंयोगयोरपि तत्त्वतः सकषायजीवविषयत्वात् सम्बन्धनसंयोगत्वप्राप्तिः, सत्यं, तथापीन्द्रियमनसोः साक्षात्तावुक्तौ, अयं तु जीवस्येति न दोषः । अन्यस्त्वाह-संयुक्तकसंयोगोऽपि दिष्ठत्वेनेतरेतरस्यैव तथेतरेतरसंयोगोऽपि स्वपरधर्मैः संयुक्तत्वात्, सर्ववस्तुनः संयुक्तस्यैवेति नानयोः प्रतिविशेषः, एवमेतत्, तथाऽप्येकस्कन्धताऽऽपन्नद्रव्यविषयः संयुक्तसंयोगः, इतरेतरसंयोगस्तु तथाऽन्यथा च, तत्र परमाणुसंयोगस्तथा प्रदेशादिसंयोगस्तु प्रायोऽन्यथेति युक्त एव तयोर्भेदः, एवं तर्हि परमाणुसंयोगस्य संयुक्तसंयोगभेदोऽस्तूभयोरपिएकस्कन्धताऽऽपन्नद्रव्यविषयत्वात्, अयमपि न दोषः, यतो निष्पाद्यमानविषय इतरेतरसंयोगः, परिमण्डलादिसंस्थितद्रव्यस्य तेनैव(वि) निष्पाद्यमानत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयुक्तसंयोगस्तु प्रायो निष्पन्नद्रव्यविषयः, निष्पन्नं हि मूलादिरूपेण वृक्षादिद्रव्यं कन्दादिना युज्यते, इत्यस्त्यनयोर्विशेष इति गाथार्थः ॥ इत्थं सम्बन्धसंयोगः स्वरूपत उक्तः, सम्प्रति तस्यैव फलतः प्ररूपणापूर्वकं विप्रमुक्तस्येति प्रकृतसूत्रपदं व्याख्यानयन् यथा ततो विप्रमुक्ता भवन्ति यच्च तेषां फलं तदाह-

नि.[६२] संबंधनसंजोगो संसारओ अनुत्तरणवासो ।
तं छित्तु विप्पमुक्का माइपिइसुआइ य हवंति ॥

वृ. 'सम्बन्धसंयोगः' उक्तरूपः, संसरन्त्यस्मिन् कर्मवशवर्तिजन्तव इति संसारस्तस्मात्, न विद्यते उत्तरणं-पारगमनमस्मिन् सतीत्यनुत्तरणः, स चासौ वासश्च-अवस्थानमनुत्तरणवासः, अनुत्तरणवासहेतुत्वादायुर्घृतमित्यादिवदनुत्तरणवासः, अथवा 'अनुत्तरणवासो'त्ति आत्मनः पारतन्त्रयहेतुतया पाशवत् पाशः, ततोऽनुत्तरणश्चासौ पाशश्च अनुत्तरणपाशः, उभयत्र च सापेक्षत्वेऽपि गमकत्वात् समासः, अनेन संसारावस्थितिः पारवश्यं वा सम्बन्धसंयोगस्यार्थतः फलमुक्तं, 'तम्' एवंविधं सम्बन्धसंयोगम्, अर्थादौदयिकभावविषयं मात्रादिविषयं च 'छित्त्वा' द्विधा विधाय निर्णश्येतियावत्, किमित्याह-विप्रमुक्ताः, श्रुतत्वादनन्तोक्तसम्बन्धनसंयोगादेव, के ते ?,-'साधवः' अनगाराः, येनैवं तेन किमित्याह-मुक्ताः 'ततः' संसारात्, तद्धेतकत्वात्तस्य, 'तेन' हेतुना, अनेन च गाथापश्चार्धेन सम्बन्धच्छेदनलक्षणेन प्रकारेण विप्रमुक्ता भवन्ति, तेषां च फलं मुक्तिरित्यर्थत उक्तं भवति । यच्च विप्रमुक्तस्येत्येकत्वप्रक्रमेऽपि विप्रमुक्ता इतीह बहुवचनं तदेवंविधभिक्षोः पूज्यत्वख्यापनार्थमिति गाथार्थः ॥

एवं 'संजोगे निक्खेवो' इत्यादिमूलगाथोपक्षिप्तसंयुक्तकसंयोगेतरेतरसंयोगभेदतो द्विविधं द्रव्यसंयोगं निरूप्यं तत्र संयुक्तकसंयोगं सचित्तादिभेदतस्त्रिविधम् इतरेतरसंयोगं तं परमाणुप्रदेशाभिप्रेतानाभिप्रेताभिलापसम्बन्धनविधानतः षड्विधमभिधाय सम्बन्धसंयोग एव च साक्षात् कर्मसम्बनिबन्धनतया संसारहेतुरिति तत्त्याज्यतां च सम्प्रति तत्प्रतिपादनत एवान्यदुक्तप्रायमिति मन्वानः क्षेत्रादिनिक्षेपमविशिष्टमतिदेष्टुमाह-

नि.[६३] संबंधणसंजोगे खित्ताईणं विभास जा भणिया ।
खित्ताइसु संजोगो सो चेव विभासियव्वो अ(उ) ॥

वृ. सम्बन्धसंयोगे क्षेत्रादीनाम्, आदिशब्दात् कालभावपरिग्रहः, विविध-आदेशानामदेशादिभेदादनेकभेदा भाषा विभाषा, या इति प्रस्तुतपरामर्शः, 'भणिता' अभिहिता, 'क्षेत्रादिषु' क्षेत्रादिविषयः संयोगः प्रथमद्वारगाथासूचितः, स चैव विभाषितव्यः, 'तुः पूरणे, संयोगत्वं चात्र विभाषाया वचनरूपत्वाद्वचनपर्यायाणां कथञ्चिद्वाच्यादभेदख्यापनार्थमुक्तं, ततोऽयमर्थः-सम्बन्धनसंयोगविषयक्षेत्रादिविभाषायां यत्संयोगस्वरूपमुक्तम्, इहापि तदेव वक्तव्यं, चकारस्यानुक्तसमुच्चयार्थत्वात्, संयुक्तसंयोगः सम्भवन्त इतरेतरसंयोगशेषभेदाश्च वाच्याः, तत्र क्षेत्रस्य संयुक्तकसंयोगो यथा-जम्बूद्वीपः स्वप्रदेशसंयुक्तक एव लवणसमुद्रेण युज्यते, इतरेतरसंयोगः क्षेत्रप्रदेशानामेव परस्परं धर्मास्तिकायादिप्रदेशैर्वा संयोगः, एवं कालभावयोरपि नेयमिति गाथार्थः ॥

इह चोक्तनीत्या सम्बन्धसंयोग एव साक्षादुपयोगी, इतरेषां तु तदुपकारितया तेषामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथञ्चित्याज्यतया च शिष्यमतिव्युत्पादनाय चोपन्यास इति भावनीयम्, । उक्तः संयोगः, तदभिधानाच्च व्याख्यातं प्रथमसूत्रम्॥ सम्प्रति यदुक्तं 'विनयं प्रादुष्करिष्यामी'ति, तत्र विनयो धर्मः, स च धर्मिणः, कथञ्चिदभिन्न इति धर्मिद्वारेण तत्स्वरूपमाह-

मू. (२) *आणानिद्देसयरे, गुरुणमुववायकारए।*
इंगियागारसंपन्ने, से विनीएत्ति वुच्चइ॥

वृ. आङिति स्वस्वभावावस्थानात्मिकया मयादयाऽभिव्याप्ता वा ज्ञायन्तेऽर्था अनयेत्याज्ञा-भगवदभिहितागमरूपा तस्या निर्देश-उत्सर्गापवादाभ्यां प्रतिपादनमाज्ञानिर्देशः, इदमित्थं विधेयमिदमित्थं वेत्येवमात्मकः तत्करणशीलस्तदनुलोमानुष्ठानो वा आज्ञानिर्देशकरः, यद्वाऽऽ-ज्ञा-सौम्य ! इदं कुरु इदं च मा कार्षीरिति गुरुवचनमेव, तस्या निर्देश-इदमित्थमेव करोमि इति निश्चयाभिधानं तत्करः, आज्ञानिर्देशेन वा तरति भवाम्भोधिमित्याज्ञानिर्देशतर इत्यादयोऽ-नन्तगमपर्यायात्वाद्भगवद्वचनस्य व्याख्याभेदाः, सम्भवन्तोऽपि मन्दमतीनां व्यामोहहेतुतया बालाबलादिबोधोत्पादनार्थत्वाच्चास्य प्रयासस्य न प्रतिसूत्रं प्रदर्शयिष्यन्ते, तथा 'गुरूणां' गौरवार्हाणामाचार्यादीनामुप-समीपे पतनं-स्थानमुपपातः-दृग्वचनविषयदेशावस्थानं तत्कारकः-तदनुष्ठाता, न तु गुर्वादेशादिभीत्या तद्व्यहितदेशस्थायीतियावत्, तथेङ्गितं-निपुणमतिगम्यं प्रवृत्तिनिवृत्तिसूचकमीषद्भूशिरः कम्पादि आकारः-स्थूलधीसंवेद्यः प्रस्थाना-दिभावाभिव्यञ्जको दिगवलोकनादिः, आह च-

"अवलोयणं दिसाणं वियंमणं साडयस्स संठवणं।
आसनसिढिलीकरणं पट्ठियलिंगाइं एयाइं॥"

अनयोर्द्वन्द्वे इङ्गिताकारौ तौ अर्थाद्गुरुगतौ सम्यक् प्रकर्षेण जानाति इङ्गिताकारसम्प्रज्ञः, यद्वा-इङ्गिताकाराभ्यां गुरुगतभावपरिज्ञानमेव कारणे कार्योपचारादिङ्गिताकारशब्देनोक्तं, तेन सम्पन्नो-युक्तः, 'स' इत्युक्तविशेषणान्वितः 'विनीतः' विनयान्वितः, 'इति' सूत्रपरामर्शे, उच्यते, तीर्थकृद्गुणधरादिभिरिति गम्यते, अनेन च स्वमनीषिकाऽपोहमाह इति सूत्रार्थः॥ इह विनयोऽभिधित्सितः, स च विपर्ययाभिधान एव तद्विविक्ततया सुखेन ज्ञातुं शक्यत इत्यविनयं धर्मिद्वारेणाह-

मू. (३) *आणाऽनिद्देसकरे, गुरुणमनुववायकारए।*
पडिनीए असंबुद्धे, अविनीएत्ति वुच्चइ॥

वृ. पादद्वयं प्राग्वत्, नवरं नञ्योजननाद्व्यतिरेकतो व्याख्येयं, 'प्रत्यनीकः' प्रतिकूलवर्ती शिलाऽऽक्षेपककूलवालकश्रमणवत्, दोषानीकं प्रति वर्तत इति प्रत्यनीकः, किमित्येवं-विधोऽसावित्याह-'असम्बुद्धः' अनवगततत्त्वः 'अविनीतः' अविनयवान् 'इत्युच्यते' इति पूर्ववदिति सूत्रार्थः॥ साम्प्रतं दृष्टान्तपूर्वकमिहैवास्य सदोषतामाह-

मू. (४) *जहा सुणी पुईकन्नी, निक्कसिज्जइ सव्वसो।*
एवं दुसीलपडिनीए, मुहरि निक्कसिज्जइ॥

वृ. 'यथा' इत्युपदर्शने, श्वसितीति शुनी, स्त्रीनिर्देशोऽत्यन्तकुत्सोपदर्शकः, पूती-परिपाकतः कुथितगन्धौ कृमिकुलाकुलत्वाद्युपलक्षणमेतत्, तथाविधौ कर्णौ-श्रुती यस्याः पक्वरक्तं वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूतिस्तद्व्यासौ कर्णौ यस्याः सा पूतिकर्णा, सकलावयवकुत्सोपलक्षणं चैतत्, सा चेदृशी शुनी किमित्याह-'निष्काश्यते' निर्वास्यते वहिर्निः सार्यत इतियावत्, कुतः ?, 'सव्वसो'त्ति सर्वतः सर्वेभ्यो गोपुरगृहाङ्गणादिभ्यः सर्वान् वा हतहतेत्यादिविरूक्षवचनलतालकुटलेष्टु-घातादिकान् प्रकारानाश्रित्य 'छन्दोवत् सूत्राणि भवन्ती'ति छान्दसत्वाच्च सूत्रे शस्तप्रत्ययः। उपनयमाह'एवम्' अनेनैव प्रकारेण, दुष्टमिति-रागद्वेषादिदोषविकृतं शीलं-स्वभावः समाधि-राचारो वा यस्यासौ दुःशीलः, प्रत्यनीकः प्राग्वत्, मुखेनारिमावहति मुखमेव वेहपरलोकाप-कारितया-ऽरिरस्य मुधैव वा कार्यु विनैवारयो यस्यासौ मुखारिर्मुधारिर्वा-बहुविधासम्बद्धभाषी, सूत्रत्वाद्वा 'मुहरि'त्ति मुखरो-वाचाटो निष्काश्यते 'सर्वतः' इतिहापि योज्यते, ततश्च सर्वतो निष्काश्यते, सर्वथा कुलगणसङ्घसमवायबहिर्वर्ती विधीयत इति सूत्रार्थः ॥ आह-दौःशील्य-निमित्त एवायमविनीतस्य दोषः, प्रत्यनीकतामुखरत्वयोरपि तत्प्रभवत्वात् तत्र चैवमनर्थहेतो किमसौ प्रवर्तत इति, अत्रोच्यते, पापोपहतमतित्वेन तत्रैवास्याभिरतिरितिकृत्वा, तामेवाह-

मू. (५) *कणकुंडगं जहित्ता णं, विट्ठं भुंजइ सूयरो।*
एवं सील जहित्ता णं, दुस्सिले रमइ मिए॥

वृ. कणाः-तन्दुलास्तेषां तन्मिश्रो वा कुण्डकः-तत्क्षोदनोत्पन्नकुक्कुसः कणकुण्डकस्तं 'हित्वा' पाठान्तरतस्त्यक्त्वा वा 'विष्ठां' पुरीषं 'भुंक्ते' अभ्यवहरति 'सूकर' इति गर्तासूकरो, यथेति गम्यते, एवं 'शीलम्' उक्तरूपं प्रस्तावाच्छोभनं 'हित्वा' प्राग्वत्त्यक्त्वा वा दुष्टं शीलं दुःशीलं तस्मिन् भावप्रधानत्वाद्वा निर्देशस्य दुष्टं शीलमस्येति दुःशीलस्तद्भावो दौःशील्यं तस्मिन्, उभयत्र दुराचारादौ 'रमते' धृतिमाधत्ते मृग इव मृगः अज्ञत्वादविनीत इति प्रक्रमः, इदमत्र हृदयं-यथा मृग उद्गीर्णासिपुत्रिकगौरिगायनपुरुषहेतुकमायतौ मृत्युरूपमपायम-पश्यन्नज्ञः, एवमयमपि दौःशील्यहेतुकमागामिनं भवभ्रमणलक्षणमपायमनालोकयन्नज्ञ एव सन् गर्तासूकरोपमः सदा पुष्टिदायिकणकुण्डकसदृशं शीलमपहाय विवेकिजनगर्हिततया विष्ठोपमे दुःशीले दौःशील्ये वा रमते, इह च दृष्टान्तेऽपि विभुक्त्यभिरतिरेवार्थत उक्ता, तदविना-भावित्वात्तस्याः, यद्वा शुभपरिहारेणाशुभाश्रयणमुभयत्रापि सादृश्यनिमित्तस्तीति नोपमानो-पमेयभावाविरोध इति सूत्रार्थः ॥ उक्तोपसंहारपूर्वकं कृत्योपदेशमाह-

मू. (६) *सुणियाभावं साणस्स, सूयरस्स नरस्स य।*
विनए ठविज्ज अप्पाणं, इच्छंतो हियमप्पाणो॥

वृ. 'श्रुत्वा' आकर्ण्य 'अभावं' नञः कुत्सायामपि दर्शनादशोभनं भावं-सर्वतो निष्काश-नलक्षणं पर्यायं 'सानस्स'त्ति प्राकृतत्वादिवेत्यस्य गम्यमानत्वात् शून्या एव 'सूकरस्य' उक्तन्या-येन शूकरोपमस्य नरस्य 'चः' पूरणे, यद्वा शून्याः शूकरस्य च दृष्टान्तस्य नरस्य च दार्ष्टान्ति-कस्याशोभनं भावं त्रयाणामप्युक्तरूपं श्रुत्वा, किमित्याह-'विनये' वक्ष्यमाणस्वरूपे, स्थापयेदात्मानम्, आत्मनैवेति गम्यते, 'इच्छन्' वाञ्छन् 'हितम्' ऐहिकमामुष्मिकं च पथ्यम् 'आत्मनः' स्वस्य, इह च पुनर्दृष्टान्ताभिधानमुपसंहारत्वेनाविनये शिष्यस्याशुभभावस्योत्पादना-र्थत्वेन वा नाप्रकृतमिति सूत्रार्थः ॥ यतश्चैवं ततः किमित्याह-

मू. (७) *विनयमेसिज्जा, सीलं पडीलभे जओ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धउत्ते नियागट्ठी, न निक्कसिज्जइ कण्हुइ ॥

वृ. 'तस्माद्' इति यस्मादविनयदोषदर्शनादात्मा विनये स्थापनीयस्तस्मात् विनयम् 'एषयेत्' अनेकार्थत्वेन धातूनां पर्यवसितवृत्त्या वा कुर्यात्, एवं ह्यात्मा विनये स्थाप्यत इति, किं पुनरस्य विनयस्य फलं ?, येनैवमत्रात्मनोऽवस्थापनमुद्दिश्यत इत्याशंक्याह-'शीलम्' उक्तरूपं 'प्रतिलभेत' प्राप्नुयात् 'यत' इति विनयात्, अनेन विनयस्य शीलावाप्तिः फलमुक्तम्, अस्यापि किं फलमित्याह-बुद्धैः-अवगततत्त्वैस्तीर्थकरादिभिरुक्तम्-अभिहितं, तच्च तन्निजमेव निजकं च-ज्ञानादि तस्यैव बुद्धैरात्मीयत्वेन तत्त्वत उक्तत्वात्, बुद्धोक्तनिजकं, तदर्थयते-अभिलषतीत्येवंशीलः बुद्धोक्तनिजकार्थी सन्, पठन्ति च-'बुद्धवुत्ते नियागट्ठि त्ति' उक्त-रूपैर्व्युक्तो-विशेषेणाभिहितः, स च द्वादशाङ्गरूप आगमस्तस्मिन् स्थित इति गम्यते, यद्वा बुद्धानाम्-आचार्यादीनां पुत्र इव पुत्रो बुद्धपुत्रः, 'पुत्ता य सीसा य समं विहित्ता' इति वचनात्, स्वरूपविशेषणमेतत्, नितरां यजनं यागः-पूजा यस्मिन् सोऽयं नियोगो-मोक्षः, तत्रैव नितरां पूजासम्भवात्, तदर्थी सन्, किमित्याह-'न निष्काश्यते' न बहिष्क्रियते, कुतश्चिद् गच्छगणादेः, किन्तु विनीतत्वेन सर्वगुणाधारतया सर्वत्र मुख्य एव क्रियते इति भावः, इति सूत्रार्थः ॥

मू. (८) *निसंते सिया अमुहरि, बुद्धाणमंतिए सया ।*
अट्ठजुत्ताणि सिक्खिज्जा, निरट्ठाणि उ वज्जए ॥

वृ. नितराम्-अतिशयेन शान्तः-उपशमवान् अन्तः क्रोधपरिहारेण बहिश्च प्रशान्ताकारतया निःशान्तः 'स्याद्' भवेत्, तथा 'अमुखारिः' प्राग्वत् अमुखरो वा सन् 'बुद्धानाम्' आचार्यादीनाम् 'अन्तिके' समीपे, न तु विनयभीत्याऽन्यथैव 'सदा' सर्वकालमर्यते-गम्यत इति अर्थः, अर्तेरौ-णादिकस्थन् स च हेय उपादेयश्चोभयस्याप्यर्य्यमाणत्वात्, तेन युक्तानि-अन्वितानि अर्थ-युक्तानि, तानि च हेयोपादेय याभिधायकानि, अर्थादागमवचांसि, यद्वा-मुमुक्षुभिरर्थ्य-मानत्वादर्थो-मोक्षस्तत्र युक्तानि-उपायतया सङ्गतानि अर्थं वा-अभिधेयमाश्रित्य युक्तानि-यतियोजनोचितानि 'शिक्षेत' अभ्यस्येत्, प्रपञ्चितज्ञविनेयानुग्रहाय व्यतिरेकत आह-'निरर्थ-कानि' उक्तविपरीतानि डित्थडवित्थादीनि, यद्वा वैश्यिकवात्स्यायनादीनि स्त्रीकथादीनि वा 'तुः' पुनरर्थे 'वर्जयेत्' परिहरेत्, इह च निशान्त इत्यनेन प्रशमादीनामुपलक्षितत्वात् तेषां च दर्शनाविनाभावित्वाद् दर्शनस्य च जिनोक्तभावश्रद्धानरूपत्वात् तस्यैव दर्शनविनयत्वात्, अर्थतो दर्शनविनयो दर्शितः, उक्तं हि प्राक्-

"दव्वाण सव्वभावा उवइट्ठा जे जहा जिणिंदेहिं ।
तं तह सद्दहइ नरो दंसणविनओ हवति तम्हा ॥"

शेषेण तु श्रुतज्ञानशिक्षाऽभिधायिना ज्ञानदर्शन(ज्ञान)विनय उक्तः, तत्स्वरूपमाह-"नाणं सिक्खइ नाणं गुणेइ नाणेन" त्ति सूत्रार्थः ॥ कथं पुनरर्थयुक्तानि शिक्षेतेत्याह-

मू. (९) *अनुसासिओ न कुप्पिज्जा, खंतिं सेवेज्ज पंडिए ।*
बालेहिं सह संसग्गिं, हासं कीडं च वज्जए ॥

वृ. 'अनुशिष्ट' इति अर्थयुक्तानि शिक्ष्यमाणः कथञ्चित् स्खलितादिषु गुरुभिः, परुषोक्त्या-ऽपि शिक्षितः 'न कुप्येत्' न कोपं गच्छेत्, किं तर्हि कुर्यादित्याह-'क्षान्तिं' परुषभाषणादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहनात्मिकां 'सेवेत' भजेत, पण्डाबुद्धिः सा सञ्जाताऽस्येति पण्डितः, तथा 'क्षुद्रैः' बालैः शीलहीनैर्वा पार्श्वस्थादिभिः 'सह' समं 'संसिग्गं' ति प्राकृततत्वात्संसर्गं, हसनं हासस्तं, क्रीडां च अन्ताक्षरिकाप्रहेलिकादानादिजनितां च 'वर्जयेत्' परिहरेत् सर्वेषामप्येषा विशिष्टशिक्षाक्षितिहेतुत्वात् लोकागमविरुद्धत्वाच्चेति सूत्रार्थः ॥ पुनरन्यथा विनयमाह-

मू. (१०) *मा य चंडालियं कासी, बहुयं मा य आलवे।*
कालेन य अहिज्जित्ता, तत्तो झाइज्ज इक्कओ ॥

वृ. 'मा' निषेधे 'चः' समुच्चये, चण्डः-क्रोधस्तद्वशादलीकम्-अनृतभाषणं चण्डालीकं, भयालीकाद्युपलक्षणमेतत्, यद्वा-चण्डेनाऽऽलमस्य चण्डेन वा कलितश्चण्डालः, स चातिक्रूरत्वाच्चडालजातिस्तस्मिन् भवं चाण्डालिकं कर्मेति गम्यते, अथवा अचण्ड ! सौम्य ! अलीकम्-अन्यथात्वविधानादिभिरसत्यं, गुरुवचनमागमं चेति गम्यते, 'मा कार्षीः' मा विधाः, भगवदुद्दिष्टतिलोत्पाटकस्वेच्छालापिगोशालकवत्, बह्वेव बहुकम्-अपरिमित मालजालरूपं 'मा च' इति प्राग्वत्, आङिति-स्त्र्यादिकथाऽभिव्याप्त्या लपेत्-भाषेत, बह्वालापनात् ध्यानाध्ययनक्षितिवातक्षोभादिसम्भवात्, किं पुनः कुर्यादित्याह-कालः अध्ययनाद्यवसरः प्रथमपौरुष्यादिस्तेन, 'चः' पुनरर्थे, 'अधीत्य' पठित्वा, प्रच्छनाद्युपलक्षणमेतत्, 'ततः' अध्ययनात्, अनन्तरमिति गम्यते, 'ध्यायेत्' चिन्तयेत्, 'एकक' इति भावतो रागद्वेषादिसाहित्यरहितः, द्रव्यतस्तु विविक्तशय्यादिसंस्थः, इत्थं हि चाण्डालिककरणाद्यनुत्थानमधीतार्थस्थिरीकरणं च कृतं भवतीति भावः।

इह च पादत्रयेण साक्षाद्वाग्गुप्तिरुक्ता, ध्यायेदित्यनेन मनोगुप्तिः, आद्यपादोत्तरव्याख्यानद्वयेन तु कायगुप्तिरपि, एताश्च चारित्रान्तर्गता एव, यदुक्तम्-

"पणिहाणजोगजुत्तो पंचहि समितीहि तिहिं गुत्तीहिं।
एस चरित्तायारो अट्ठविहो होइ नायव्वो ॥"

न च चारित्राचारस्तत्त्वतश्चरित्रविनयादतिरिच्यते इति देशतस्तस्याप्यनेनाभिधानमिति सूत्रार्थः इत्थमकृत्यनिषेधः कृत्यविधिश्चोपदिष्टः, कदाचिदेतद्विपर्ययसम्भवे च किं करणीयमित्याह-

मू. (११) *आहच्च चंडालियं कट्टु, न निन्हविज्ज कण्हुइ।*
कडं कडंति भासिज्जा, अकडं नो कडंति ॥

वृ. 'आहत्य' कदाचित् चण्डालीकं च चाण्डालिकं चोक्तरूपं यद्वा चण्डश्चालीकं च चण्डालीकं 'कृत्वा' विधाय 'न निन्हुवीत' न कृतमेवेति नापलपेत्, कदाचिदपि, यदा परैरुपलक्षितो यदा वा नोपलक्षितस्तदापीत्यर्थः, किं तर्हि कुर्यादित्याह-'कृतं' विहितं चाण्डालिकादि 'कृतमिति' इति कृतमेव, न भयलज्जादिभिरकृतमपि 'भाषेत' ब्रूयात्, 'अकृतं' तदेवाविहितं 'नो कृतमिति' अकृतामेव भाषेत, न तु मायोपरोधादिना कृतमपि, अन्यथा मृषावादादिदोषासम्भवात्, उपलक्षणत्वाच्चास्य बह्वालपनकालाध्ययनादिविपर्यसम्भवेऽप्येतदेव कृत्यम्, इदं चात्राकृत-कथञ्चिदतिचारसम्भवे लज्जाद्यकुर्वन् स्वयं गुरुसमीपमागत्य-

"जह बालो जंपंतो कज्जम कज्जं च उज्जुयं भणति।
तं तह आलोएज्जा मायामयविप्पमुक्को उ ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याद्यागममनुस्मरन् कथञ्चित् परैः प्रतीतमप्रतीतं वा मनःशल्यं यथावदालोचयेत्, ततश्चानेन्तरतपोऽन्तर्गताऽऽलोचनाख्याप्रायश्चित्तभेदाभिधानम्, अनेन च शेषतपोभेदानामप्युलक्षितत्वात् तपोविनयमाह इति सूत्रार्थः ॥ इहैवं पुनः पुनरुपदेशश्रवणाद् यदैव गुरोरुपदेशस्तदैव प्रवर्त्तितव्यं निवर्तयितव्यं चेति स्यादाशङ्का, तदपनोदायाह–

मू. (१२) *मा गलियस्सेव कसं, वयणमिच्छे पुनो पुनो।*
कसं व दट्ठुमाइन्ने, पावगं परिवज्जए ॥

वृ. 'मा' निषेधे, गलिः-अविनीतः, स चासावश्वश्च गल्यश्वः स इव, कशतीति कशस्तम्, उपलक्षणत्वात् कशप्रहारं, 'वचनं' प्रवृत्तिनिवृत्तिविषयमुपदेशं, प्रस्तावाद्गुरूणाम्, 'इच्छेत्' अभिलषेत्, 'पुनः पुनः' वारं वारं, कोऽभिप्रायः ?-यथा गल्यश्वो दुर्विनीततया न पुनः पुनः कशप्रहारु विना प्रवर्तते निवर्तते वा, नैवं भवताऽपि प्रवृत्तिनिवृत्त्योः पुनः पुनर्गुरुवचनमपेक्षणीयं, किन्तु 'कसं व दट्ठुमाइन्ने'त्ति इवशब्दस्य भिन्नक्रमत्वात् कशं-चर्मयष्टिं दष्ट्वाऽऽकीर्णो-विनीतः, स चेह प्रस्तावादश्वः, स इव, सूचकत्वात् सूत्रस्य, सुशिष्यो गुरोराकारादि दृष्ट्वा, पापमेव पापकं, गम्यनमानत्वादनुष्ठानं परिवर्जयेत्' सर्वप्रकारं परिहरेत्, उपलक्षणत्वादितरच्चानुतिष्ठेत, पठन्ति च-पावगं पडिवज्जइ' त्ति तत्र च पुनातीति पावकं-शुभमनुष्ठानं 'प्रतिपद्येत' अङ्गीकुर्यात्, इहापि प्राग्वदितरत्, परिहरेत्, किमुक्तं भवति ?, यथाऽऽकीर्णोऽश्वः कशग्रहणादिनाऽऽरोहकाभिप्रायमुपलभ्य कशेनाताडित एव तदभिप्रायानुरूपं प्रवर्तते निवर्तते वा, तथा सुशिष्येणा(ष्योऽ)प्याकारादिभिराचार्याशियमवगम्य, वचनेनाप्रेरित एव प्रवर्तते, मा भूदन्यथाऽऽरोहकस्येव गुरोरायास इति सूत्रार्थः ॥ अत्र च निर्युक्तिकृत् गल्याकीर्णो व्याचिख्यासुः 'तत्त्वभेदपर्यायैर्व्याख्या' इति तत्पर्यायानाह–

नि. [६४] गंडी गली मराली अस्से गोणे य हुंति एगट्ठा।
आइन्ने य विनीए य भद्दए वावि एगट्ठा ॥

वृ. गच्छति प्रेरितः प्रतिपथादिना डीयते च कूर्दमानो विहायोगमनेनेति गण्डिः, गिलत्येव केवलं न तु वहति गच्छति वेति गलिः, म्रियत इव शकटादौ योजितो राति च-ददाति लत्तादि लीयते च भुवि पतनेनेति मरालिः, अमी च 'अश्वे' तुरगे 'गोणे च' बलीवर्द्दे भवन्ति 'एकार्थाः' एकोऽर्थो-दुष्टतालक्षणः अनन्तरोक्तनीत्या प्रवृत्तिनिमित्तभेदेऽप्यमीषामितिकृत्वा। 'आकीर्यते' व्याप्यते विनयादिभिर्गुणैरिति आकीर्णः, 'चः' पूरणे, विशेषेणनीतः-प्रापितः प्रेरकचित्तानुवर्तनादिभिः, श्लाघादीति विनीतः, भाति-शोभते स्वगुणैर्ददाति च प्रेरयितुश्चित्तनिर्वृतिमिति भद्रः स एव भद्रकः, चशब्द इहाप्यश्वे गोणे चेति विषयानुवृत्त्यर्थः, अपिशब्द इह पूर्वत्र चानुक्तपर्यायान्तरसमुच्चयार्थः, 'एकार्थां' इति प्राग्वदिति गाथार्थः ॥ न चैवं गल्याकीर्णतुल्यशिष्ययोर्गुरोरायासजननाजनने एव गुणदोषौ, किन्तु गलिसदृशस्यानाश्रवत्वादेराकीर्णतुल्यस्य चित्तानुगतत्वादेः सम्भव इति तद्वशतः कोपनप्रसादने अपि, अत एवाह–

मू. (१३) *अनासवा थूलवया कुसीला मिउंपि चंडं पकरंति सीसा।*
चित्तानुया लहु दक्खोववेया पसायए ते हु दुरासयंपि ॥

वृ. 'अनासव'त्ति आ-समन्तात् शृण्वन्ति-गुरुवचनमार्णयन्तीत्याश्रवा न तथा प्रतिभासा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयस्य तस्याश्रवणादनाश्रवाः, पठयते च-'अनासुण'त्ति अस्यार्थः, स एव, स्थूलम्-अनिपुणं यतस्ततो भाषितया वचो येषां ते स्थूलवचसः 'कुशीला' इति दुःशीलाः, 'मृदुमपि' अकोपनमपि कोमलालापिनमपि वा 'चण्डं' कोपनं परुषभाषिणं वा 'प्रकुर्वन्ति' प्रकर्षेण विदधति 'शिष्याः' विनेयाः, सम्भवति ह्येवंविधशिष्यानुशासनाय पुनः पुनर्वचनात्मकं खेदमनुभवतो मुदोरपि गुरोः कोप इति। इत्थं गलितुल्यस्य दोषमभिधायेतरस्य गुणमाह-'चित्तं-हृदयं प्रक्रमात् प्रेरकस्यानुगच्छन्ति-कसपातानपेक्ष्य जात्याश्ववदनुवर्तयन्तीति चित्तानुगाः, 'लघु' शीघ्रमेव दक्षस्य भावो दाक्ष्यम् अविलम्बितकारित्वं तेन 'उववेय'त्ति उपपेता-युक्त दाक्ष्योपपेताः 'प्रसादयेयुः' सप्रसादं कुर्युः 'ते' इति शिष्याः, 'हुः' पुनरर्थः, दुःखेनाऽऽश्रयन्ति तमतिकोपनत्वादिभिरिति दुराश्रयस्तमपि, प्रक्रमाद्गुरुं, किं पुनरनुत्कटकषायमित्यपिशब्दार्थः।

अत्रोदाहरणं चण्डरुद्राचार्यशिष्यः, तत्र च सम्प्रदायः-अवंतीजनवए उज्जेनीनयरीए न्हवणुज्जाणे साहुणो समोसरिया, तेसिं, सगासं एगो जवा उदत्तवेसो वयंससहिओ उवागतो, सो ते वंदिऊण भणति-भयवं! अम्हे संसाराउ उत्तारेह, पव्वयामित्ति, एस एमेव पवंचतित्ति काऊण 'घृष्यतां कलिना कलिरि'त्ति चंडरुद्दं आयरियं उवदिसंति, एस ते नित्थारेहित्ति, सोऽवि य सभावेणं फरुसो, तओ सो वंदिऊण भणइ-भगवं! पव्वावेह (हि) ममंति, तेण भणितो-छारं आनेहत्ति, आनिए लोयं काऊण पव्वाविओ, वयंसगा से अद्धीइं काऊण पडिगया, तेऽवि उवस्सयं नियगं गया, विलंबिए सूरे पंथं पडिलेहेइ, परं पच्चूसे वच्चामित्ति विसज्जिओ, पडिलेहिउमागओ, पच्चूसे निग्गया, पुरतो वच्चति(त्ति) भणितो, वच्चंतो पंथातो फिडितो चंडरुद्दो खाणुए पक्खलितो, रुसिएण हा दुट्ठसेहत्ति दंडएण मत्थए आहतो, सिरं फोडितं, तहावि सम्मं सहइ, विमले पहाए चंडरुद्देण रुहिरोग्गलंतमुद्धाणो दिट्ठो, हा! दुट्ठु कयंति संवेगमावण्णेण खामिओ। एवं गुरुप्रसादात् चण्डरुद्राचार्यशिष्यस्येव सकलसमीहितावाप्तिरिति मत्वा मनोवाक्कायैर्गुरुचित्तानुवृत्तिपरैर्भाव्यमिति, अनेनान्तरेण च सूत्रेण प्रतिरूपयोगजनात्मक औपचारिको विनय उक्त इति सूत्रार्थः॥ कथं पुनर्गुरुचित्तमनुगमनीयमित्याह-

मू. (१४) नापुट्ठो वागरे किंचि, पुट्ठो वा नालियं वए।
कोहं असच्चं कुव्विज्जा, धारिज्जा पियमप्पयं॥

वृ. 'नापृष्टः' कथमिदम्? इत्याद्यजल्पितः, गुरुणेति गम्यते, 'व्यागृणीयात्' वदेत्, तथाविधं कारणं विना, 'किञ्चित्' स्तोकमपि, पृष्टो वा न 'अलीकम्' अनृतं 'वदेत्' कारणान्तरेण च गुरुभिरतिनिर्भर्तितस्ततोऽपि न तावत् क्रुध्येत्, कथञ्चिदुत्पन्नं वा क्रोधम् 'असत्यं' तदोत्पन्नकुविकल्पविफलीकरणेन 'कुर्वीत' विदध्यात्, कथम्?- 'धारयेत्' स्थापयेत्, मनसीति शेषः, 'पियमप्पियं'ति इवाप्योर्गम्यमानत्वात् प्रियमिवेष्टमिव सदा गुणकारणतया अप्रियमपि कर्णकटुकतया तदाऽनिष्टमपि, गुरुवचनमिति गम्यते, अत्र श्लोकपूर्वार्धेन वाचा यथा गुरुरनुवर्तनीयः तथोक्तमुत्तरार्धेन तु मनसेति, अथवा नापृष्ट इति न गुरुणैव किन्तु येन केनचिदपीत्यादिक्रमेण पादत्रयं सामान्येन प्राग्वन्नेयं, नवरं क्रोधम् उपलक्षणत्वान्मानादिकषायं चोत्पन्नमसत्यं कुर्वीत, क्रोधासत्यतायामुदाहरणसम्प्रदायः-कस्सवि कुलपुत्तयस्स भाया-वेरिएण वावाइओ, तओ सो जननीए भन्नइ-पुत्त! पुत्तघायय घायसुत्ति, तओ सो तेन जीवग्गहो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गिण्हिऊण जननीसमीवमुवणीओ, भणिओ अनेन-भावघायय ! कहिं ते आहणामित्ति, तेन भणिओ-जहिं सरणागया आहम्मंति, तेण जननी अवलोकिया, ताए भण्णइ-ण पुत्त ! सरणागया आहम्मंति, तेण भण्णइ-कहं रोसं सफलं करेमित्ति, तेण भण्णइ-न पुत्त ! सव्वत्थ रोसो सफलो कज्जइ, पच्छा सो तेन विसज्जिओ।

एवं क्रोधमसत्यं कुर्वीत, मानादिविफलीकरणे उदाहरणान्यागमादवधारणीयानि, इत्थ-मुदितानां क्रोधादीनां विफलीकरणमुपदिष्टं, सम्प्रति यथैषामुदय एव न स्यात् तथोपदेष्टुमाह-'धारयेत्' स्वरूपेणावधारयेत्, न तद्वशतो रागं द्वेषं वा कुर्यात्, 'प्रियं' प्रीत्युत्पादकं शेषजनापेक्षया स्तुत्यादि, 'अप्रियं' तद्विपरीतं निन्दादि, तत्रोदाहरणसम्प्रदाय:-असिवोवद्दुए नयरे तिन्नि भूयवाईया रायाणमुवगया भणंति-अम्हे असिव उवसमेमोत्ति, राइणा भणियं-सुणिमो केणोवाएणंति, तत्थेगो भणइ-अत्थि महेगं भूयं, तं सुरूवं विऊण व्विऊणं गोपुररत्थाइसु परियडइ, तं न निहालेयव्वं, तं निहालियं रुसइ, जो पुण तं निहालेति सो विनस्सइ, जो पुण पिच्छिऊण अहोमुहो ठाइ सो रोगाओ मुच्चइ, राया भणति-अलाहि एएण अइरोसणेणंति।

बिइओ भणति-महच्चयं भूयं महतिमहालयं रूवं विउव्वति, लंबोयरं विवृतकुक्षि पंचशिरं एगपादं विसिहं विस्सरुवं अट्टट्टहासं मुयंतं गायंतं पणच्चंतं, तं विकृतरूपं दट्ठूणं जो पहसति पवंचेति वा तस्स सत्तहा सिरं फुट्टइ, जो पुण तं सुहाहिं वायाहिं अभिणंदति धूवपुप्फाईहिं पूएइ सो सव्वहाऽमयातो मुच्चइ, राया भणइ-अलमेएणंपि।

ततितो भणइ-ममवि एवंविहमेव नातिविसेसकरं भूयमत्थि, प्रियाप्रियकारिणं दरिसणादेव रोगेहिंतो मोचयति, एवं होउत्ति, तेन तहाकए असिवं उवसंतं।

एवं साधूवि असारूप्यत्वे सति शब्दादिप्रतिकूलत्वे च परेहिं परिभूयमाणो पवंचिज्जमाणो हसिज्जमाणो वा तथा थुव्वमाणो वा पूइज्जमाणो वा तं प्रियाप्रियं सहेत। अनेन च मनोगुप्त्यभि-धानाच्चारित्रविनय उक्त:, इति सूत्रार्थ:॥ आह-क्रोधासत्यताकरणादिभिरात्मदमनोपाय उक्त:, तत्र च बाह्येष्वपि दमनीयेषु सत्सु किमिति तस्यैव दमनोपाय उद्दिश्यते ? किं वा तद्दमने फलमिति,

मू.(१५) *अप्पामेव दमेयव्वो, अप्पा हु खलु दुद्दमो।*
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य॥

वृ. अतति-सन्ततं गच्छति शुद्धिसंक्लेशात्मकपरिणामान्तराणीत्यात्मा तमेव 'दमयेत्' इन्द्रियानोइन्द्रियदमेन मनोज्ञेतरविषयेषु रागद्वेषवशतो दुष्टगजभिवोन्मार्गगामिनं स्वयं विवेकांकु-शेनोपशमनं नयेत्, पठन्ति च-'अप्पा चेव दमेयव्वो'त्ति स्पष्टं, किमेवमुपदिश्यत इत्याह-आत्मैव, हुशब्दस्यैवकारार्थत्वात् 'खलु' इति यस्मात् 'दुर्दम:' दुर्जय:, ततस्तद्दमने दमिता एव बाह्यदमनीया इति, न तद्दमनमुपदिश्यत इति भाव:, उक्तं हि-''सव्वमप्पे जिए जियं'', क: पुनरेवं गुण इत्याह-आत्मा 'दान्त' उपशममानीत:, सुखमस्यास्तीति सुखी, भवति, क्व ?-'अस्मिन्' इत्यनुभूयमानायुषि विनेयाध्यक्षे 'लोके' भवे 'परत्र च' इत्यागामिनि भवान्तरे, दान्ताऽऽत्मानो हि परमर्षय इहैव सुरैरपि पूज्यन्ते, अदान्ताऽऽत्मानस्तु चौरपारदारिकादयो विनश्यन्ति, तथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सद्देण मओ रूवेण पयंगो महुयरो(य) गंधेणं।
आहारेण य मच्छो बज्झइ फरिसेण य गइंदो ॥"

तद्विपर्ययतस्तु-इह परत्र च नन्दन्ति, तत्र चोदाहरणम्-दो भायरो चोरा, तेसिं उवस्सए साहुणो वासावासं उवागया, तेहिं वासारत्तपरिसमत्तीए गच्छंतेहिं तेसिं चोराणं अन्नं वयं किंचि अपडिवज्जमाणाणं रत्तिं न भोत्तव्वंति वयं दिण्णि। अन्नया तेहिं उद्दाइएहिं सुबहुयं गोमाहिसं आनियं, तत्थ अन्ने महिसिं मारेउं पइउमारद्धा, अन्ने मज्जस्स गया, मंसइत्ता संपहारेन्ति-अद्धगे मंसे विसं पक्खिवामो तो मज्जइत्ताणं दाहामो, तओ अम्हं सुबहुं गोमाहिसं भागेण आगमिस्सइ, मज्जइत्तावि एवं चेव सामत्थेहिंति, एवं तेहिं विसं पक्खित्तं, आइच्चो य गत्थं गतो, ते भायरो न भुत्ता, इयरे परोप्परं विससंजुत्तेण मज्जमंसेण उवभुत्तेण मया, मरिऊण य कुगइं गया, इयरे इह परलोए य सुहभागिणो जाया, एवं ताव जिब्भिंदियदमे, एवं सेसेसुवि इंदिएसु, 'अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य' इति सूत्रार्थः ॥ किं पुनः परिभावयन्नात्मानं दमयेदित्याह-

मू. (१६) वरं मे अप्पा दंतो, संजमेन तवेन य।
माऽहं परेहिं दम्मंतो, बंधनेहि वहेहि य ॥

वृ. 'वरं' प्रधानं 'मे' मया 'आत्मा' अभिहितरूपस्तदाधाररूपो वा देहः, 'दान्त' इति दमं ग्राहितः असमञ्जसचेष्टातो व्यावर्तितः, केन हेतुना ?-'संयमेन' पञ्चाश्रवविरमणादिना, 'तपसा च' अनशनादिना, चशब्दो द्वयोरप्यनपेक्षितायां मुक्तिहेतुताविरहात् परस्परसापेक्षतासूचनार्थः सम्यग्ज्ञानसमुच्चायार्थो वा, विपर्यये दोषदर्शनाह-'मा' प्राग्वत्, 'अहम्' इत्यात्मनिर्देशः, 'परैः' आत्मव्यतिरिक्तैः 'दम्मंतो'त्ति आर्षत्वाद्दमितः, कैः ?, 'बन्धनैः' वर्ध्रादिविरचितैर्मयूरबन्धादिभिः 'वधैश्च' लतालकुटादिताडनैः, अत्रोदाहरणं सेयणाओ गंधहत्थी-अडवीए हत्थिजूहं महल्लं परिवसइ, तत्थ जूहवती जाए जाए गयकलभए विणासेइ, तत्थेगा करिणी आवण्णसत्ता चिंतेइ-जइ कहंचि गयकलभतो जायइ, सोऽवि एतेन विणासिज्जित्तिकाउं लंगंती ओसरइ, जूहाहिवेण जूहे छुब्भइ, पुणो ओसरइ, ताहे बितियततियदिवसे जूहेण मिलइ, ताहे एगं रिसिआसमपयं दिट्ठं, सा तत्थ अल्लीणा संविणया य अणाए रिसओ, सा पसूया गयकलहं, सो तेहिं रिसिकुमारेहिं सहिओ पुप्फारमं सिंचइ, सेयणउत्ति से नामं कयं, वयत्थो जातोअ, जूहं दट्टूण जूहपतिं हंतूणं जूहं णेण पडिवण्णं, गंतूण य अणेण सो आसमो विनासितो, नो अन्नावि कावि एवं काहितित्ति।

ताहे ते रिसितो रुसिया, पुप्फफलगहियपाणी सेणियस्स रन्नो सयासं उवगया, कहियं चऽनेहिं-एरिसो सव्वलक्खणसंपुण्णो गंधहत्थी सेयणतो नाम, सेणिओ हत्थिगहणाय गतो, सो य हत्थी देवयाए परिगाहितो, ताहे(ए) ओहिणा आभोइयं-जहा अवस्सं एसो घेप्पति, ताहे ताए सो भण्णए-पुत्त ! वरं ते अप्पा दंतो, न यऽसि परेहिं दंभंतो बंधनेहिं वहेहि य, सो एवं भणिओ सयमेव रत्तीए गंतूण आलाणखंभं अस्सितो। यथा हि अस्य स्वयंदमनान्महागुणः तथा मुक्त्यर्थिनोऽपि विशिष्टनिर्जरातः, इतरथा त्वकामनिर्जरातो न तथेति सूत्रार्थः ॥

मू. (१७) पडिनीयं च बुद्धाणं, वाया अदुव कम्मुणा।
आवी वा जइ वा रहस्से, नेव कुज्जा कयाइवि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'प्रत्यनीकम्' इति प्रतिकूलं, चः पूरणे, चेष्टितमित्युपस्कारः, भावप्रधानत्वाद्वा निर्देशस्य प्रत्यनीकत्वं, केषाम् ?-'बुद्धानाम्' अवगतवस्तुतत्त्वानां गुरूणामितियावत्, कया ?-वाचा, किं त्वमपि किञ्चिज्जानीषे ? इत्येवंरूपया विपरीतप्ररूपणायां प्रेरितस्त्वयैवेतदित्थमस्माकं प्ररूपितमित्याद्यात्मिकया वा, अथवा 'कर्मणा' संस्तारकातिक्रमणकरचरणसंस्पर्शनादिना 'आविः' जनसमक्षं प्रकाशदेश इतियावत्, यदिवा 'रहस्ये' विविक्तोपाश्रयादौ 'न' इति निषेधे 'एवः' अवधारणे, स च 'शत्रोरपि गुणा ग्राह्याः, दोषा वाच्या गुरोरपि' ति कुमतनिराकरणार्थः, 'कुर्यात्' इति विदध्यात्, 'कदाचित्' परुषभाषणादावपि इति। पुनः शुश्रूषणात्मकं तमेवाह-

मू. (१८) *न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ।*
न जुंजे उरुणा ऊरं, सयणे न पडिस्सुणे॥

वृ. 'न पक्षतः' दक्षिणादिपक्षमाश्रित्य, उपविशेदिति सर्वत्रोपस्कारः, तथोपवेशने तत्पंक्ति-समावेशतः तत्साम्यापादनेनाविनयभावात्, गुरोरपि वक्रावलोकने स्कन्धकन्धरादिबाधा-सम्भवात्, न 'पुरतः' अग्रतः, तत्र वन्दकजनस्य गुरुवदनानलोकनादिनाऽप्रीतिभावात्, 'नैव' इति पूर्ववत्, कृतिः-वन्दकं तदर्हन्ति कृत्याः 'दण्डादित्वाद् यप्रत्ययः' ते चार्थादाचार्यादयस्तेषां पृष्ठतः' पृष्ठदेशमाश्रित्य, द्वयोरपि मुखादर्शने तथाविधरसवत्ताऽभावादिदोषसंभवात्, 'न युञ्ज्यात्' न संघट्टयेद् अत्यासन्नोपवेशादिभिः, 'उरुणा' आत्मीयेन, 'उरुं' कृत्यसम्बन्धिनं, तथाकर-णेऽत्यन्ताविनयसम्भवात्, उपलक्षणं चैतत् शेषाङ्गस्पर्शपरिहास्य, 'शयने' शय्यायां शयित आसीनो वेति शेषः, किमित्याह-न प्रतिशृणुयात्, किमुक्तं भवति ?-कदाचिच्छय्यागतो गुरुणाऽऽकारित उक्तो वा कृत्यं प्रति न तथास्थित एवावज्ञया कुर्म एवमित्यादिवचनतः प्रति-जानीयत्, किन्तु गुरवचनसमनन्तरमेव सम्भ्रान्तचेता विनयविरचितकराञ्जलिः समीपमागत्य पादपतनपुरस्सरमनुगृहीतोऽहमिति मन्यमानो भगवन्निच्छामोऽनुशिष्टिमिति वदेदिति सूत्रार्थः॥

मू. (१९) *नेव पल्हत्थियं कुज्जा, पक्खपिंडं व संजए।*
पाए पसारिए वावि, न चिट्ठे गुरुनंतिए।

वृ. नैव 'पर्यस्तिकां' जानुजंघोपरिवस्त्रवेष्टनाऽऽत्मिकां कुर्यात् 'पक्षपिण्डं वा' बाहुद्वय-कायपिण्डात्मकं, 'संयतः' साधुः, तथा पादौ प्रसारयेत् वाऽपि नैव, वा समुच्चयार्थः, अपिः किं पुनरित इतो विक्षिपेदिति निदर्शनार्थः, अन्यच्च-'न तिष्ठेत्' नाऽऽसीत, क्व ?, गुरूणामन्तिके इति, प्रक्रमादतिसन्निधौ, किन्तूचितदेश एव, अन्यथाऽविनयदोषसम्भवात्, अथवा 'पाए पसारिए वावि' त्ति पाठात्, पादौ प्रसारितौ वाऽपि, कृत्वेति शेषः, एकारस्यालाक्षाणिकत्वात् प्रसार्य वा न तिष्ठेद्गुरुणामन्तिके उचितप्रदेशेऽपीति, उपलक्षणं चैतद्दण्डपादिकाऽवष्टम्भादी-नामिति सूत्रार्थः॥ पुनः प्रतिश्रवणविधिमेव सविशेपमाह-

मू. (२०) *आयरिएहिं वाहिंतो, तुसिणीओ न कयाइवि।*
पसायट्ठी नियागट्ठी, उवचिट्ठे गुरुं सय॥

वृ. 'आचार्यैः' उपलक्षणत्वादुपाध्यायादिभिः 'वाहिंतो' त्ति व्याहृतः-शब्दितः 'तुसिणीओ'-त्ति तूष्णीकः तूष्णीशीलः, 'न कदाचिकपि' ग्लानाद्यावस्थायामपि, भवेदिति गम्यते, किन्तु-

"धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुवदनमलयनिसृतो वचनरसश्चन्दनस्पर्शः ॥"

इति प्रसादोऽयं यदन्यसद्भावेऽपि मामादिशन्ति गुरव इति प्रेक्षितुम्-आलोचित्तुं शीलमस्येति प्रसादप्रेक्षी, पाठान्तरतः 'प्रसादार्थी' वा गुरुपरितोषाभिलाषी'नियागट्ठी'त्ति पूर्ववत्, 'उपतिष्ठेत' मस्तकेनाभिवन्द इत्यादि वदन् सविनयमुपसर्प्पेत्, गुरुं 'सदा' सर्वकालमिति।

मू. (२१) *आलवंते लवंते वा, न निसीज्जा कयाइवि।*
चइत्ता आसनं धीरो, जओ ज़त्तं पडिस्सुणे॥

वृ. आङिति ईषल्लपति-वदति 'लपति वा' वारं वारमनेकधा वाऽभिदधति 'न निषीदेत्' न निषन्नो भवेत्, 'कदाचिदपि' व्याख्यानादिना व्याकुलतायामपि, किन्तु?-'त्यक्त्वा' अपहाय 'आसनं' पादपुञ्छनादि, धिया राजते धीरः, अक्षोभयो वा परीषहादिभिः, 'यत' इति यतो यत्नवान् 'जत्तं' ति प्राकृतत्वाद्बिन्दुलेपि तस्य च द्वित्वे यद्गुरव आदिशन्ति तत् 'प्रतिशृणुयात्' अवश्यविधेयतया अभ्युपगच्छेदितियावत्, यद्वा यत इति यत्र गुरवः, तत्र गत्वेति गम्यते, 'यात्रां' संयमायात्रां प्रस्तावाद् गुरूपदिष्टां प्रतिशृणुयादिति सूत्रार्थः ॥ पुनः प्रतिरूपविनयमेवाऽऽह-

मू. (२२) *आसनगओ न पुच्छिज्जा, नेव सिज्जागओ कया।*
आगम्मुक्कुडुओ संतो, पुच्छिज्जा पंजलीगडे॥

वृ. 'आसनगतः' इति आसनासीतो न पृच्छेत्, सूत्रादिकमिति गम्यते, नैव 'शय्यागत' इति संस्तारकस्थितः, तथाविधावस्थां विनेत्युपस्कारः, 'कदाचिदपि' बहुश्रुतत्वेऽपि, किमुक्तं भवति?-बहुश्रुतेनापि संशये सति न न प्रष्टव्यं, पृच्छताऽपि नावज्ञया, सदा गुरुविनयस्यानतिक्रमणीयत्वात्, तथा चाऽऽगमः-

"जहाहिअग्गी जलणं नमंसे, नानाहुईमंतपयाहिसित्तं।
एवायरियं उवचिट्ठएज्जा, अनंतनाणोवगओऽवि संतो॥"

किं तर्हि कुर्यादित्याह-'आगम्य' गुर्वन्तिकमेत्य 'उत्कुटुक' इति मुक्तासनः, कारणतो वा पादपुञ्छनादिगतः सन् शान्तो वा 'पृच्छेत्' पर्यनुयुञ्जीत, सूत्रादिकमितीहापि गम्यते, प्रकर्षेण-अन्तःप्रीत्यात्मकेन कृतो-विहितोऽञ्जलिः-उभयकरमीलनात्मकोऽनेनेति प्रकृताञ्जलिः, प्राकृतत्वाच्च कृतशब्दस्य परनिपातः, 'पंजलिउड'त्ति पाठे च प्रकृष्ट-भावान्वितितयाऽञ्जलिपुटमस्येति प्राञ्जलिपुट इति सूत्रार्थः ॥ ईदृशस्य शिष्यस्य गुरुणा यत् कृत्यं तदाह-

मू. (२३) *एवं विनयजुत्तस्स, सुत्तं अत्थं तदुभयं।*
पुच्छमाणस्स सिस्सस्स, वागरिज्ज जहासुयं॥

वृ. 'एवम्' इत्युक्तप्रकारेण 'विनययुक्तस्य' विनयान्वितस्य् 'सूत्रं' कालिकोत्कालिकादि 'अर्थं च' तस्यैवाभिधेयं 'तदुभयं' सूत्रार्थोभयं 'पृच्छतः' ज्ञीप्सतः 'शिष्यस्य' स्वयंदीक्षितस्योपसम्पन्नस्य वा 'व्यागृणीयात्' विविधमभिव्याप्त्याऽभिदध्यात् व्याकुर्याद्वा प्रकटयेत्, यथा-येन प्रकारेण श्रुतम्-आकर्णितं, गुरुभ्य इति गम्यते, न तु स्वबुद्धैवोत्प्रेक्षितमित्यभिप्रायः,

"आयारे सुयविनए विक्खिवणे चेव होइ वोद्धव्वे।
दोसस्स य निग्घाए विनए चउहेस पडिवत्ती॥"

इत्यागमाभिहितचतुर्विधाचार्यविनयान्तर्गतस्य -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सुत्तं अत्थ च तहा हियकर निस्सेसयं च वाएइ।
एसो चउव्विहो खलु सुयविनओ होइ नायव्वो ॥
सुत्तं गाहेति उज्जुत्तो अत्थं च सुणावए पयत्तेणं।
जं जस्स होइ जोगं परिणामगमाइ तं तु सुयं ॥
निस्सेसमपरिसेसं जाव समत्तं च ताव वाएइ।
एसो सुयविनओ खलु निद्दिट्ठो पुव्वसूरीहिं ॥"

इत्याद्यागमाभिहितस्य श्रुतविनयस्य साक्षादभिधानं, यच्च विनयं प्रादुष्करिष्यामीति प्रतिज्ञाय 'अब्भुट्ठाणं अंजलि' तथा 'दंसणनाणचरित्ते' इत्यादिना ग्रन्थेनेव न तस्य शुद्धस्वरूपाभिधानं, किन्तु 'निसंते सिया अमुहरी' इत्यादि लिङन्तादिपदैरुपदेशरूपतया, तदपि प्रसङ्गत एव यथायोगमाचार्यविनयोपदर्शनपरमिति भावनीयमिति सूत्रार्थः ॥ पुनः शिष्यस्य वाग्विनयमाह-

मू. (२४) *मुसं परिहरे भिक्खू, न य ओहारिणीं वए।*
भासादोसं परिहरे, मायं च वज्जए सया ॥

वृ. 'मृषा' इत्यसत्यं भूतनिह्नवादि 'परिहरेत्' सर्वप्रकारमपि त्यजेत्, भिक्षुः, 'न च' नैव 'अवधारणीं' गम्यमानत्वाद् वाचं गमिष्याम एव वक्ष्याम एव इत्येवमाद्यवधारणात्मिकां 'वदेत्' भाषेत्, किं बहुना ?, 'भाषादोषम्' अशेषमपि वाग्दूषणं सावद्यानुमोदनादिकं परिहरेत्, न च कारणोच्छेदं विना कार्योच्छेद इत्याह- 'मायां, चशब्दात् क्रोधादींश्च तद्धेतून् वर्जयेत् 'सदा' सर्वकालमिति सूत्रार्थः ॥ किञ्च-

मू. (२५) *न लविज्ज पुट्ठो सावज्जं, न निरट्ठं न मम्मयं।*
अप्पणट्ठा परट्ठा वा, उभयस्संतरेण वा ॥

वृ. 'न लपेत्' न वदेत् 'पृष्ट' इति पर्यनुयुक्तः 'सावद्यं' सपापं न 'निरर्थम्' अर्थविरहितं दशदाडिमादि एष वन्ध्यासुतो यातीत्यादि वा 'न' नैव, म्रियतेऽनेन राजादिविरुद्धेनोचारितेनेति मर्म तद्गच्छति वाचकतयेति मर्मगं, वचनमिति सर्वत्र शेषः, अतिसंक्लेशोत्पादकत्वात् तस्याः,

"तहेव काणं काणत्ति, पंडगं पंडगत्ति वा।
वाहियं वावि रोगित्ति, तेनं चोरेत्ति नो वए ॥१॥
एएणऽन्नेण अट्ठेनं, परो जेनुवहम्मई।
आयारभावदोसन्नू न तं भासेज्ज पन्नवं ॥२॥"

'आत्मार्थम्' आत्मप्रयोजनं 'परार्थं वा' परप्रयोजनम् 'उभयस्स'त्ति आत्मनः परस्य च, प्रयोजनमिति गम्यते, 'अंतरेण व'त्ति विना वा प्रयोजनमित्युपस्कारः, भाषादोषं परिहरेदित्यनेनैव गते पृष्टविषयत्वादस्यापौनरुक्त्वं, यद्वा भाषादोषो जकारमकारादिरेव तत्र गृह्यत इति न दोषः, सूत्रद्वयेन चानेन वाग्गप्त्यभिधानतश्चारित्रविनय उक्त इति सूत्रार्थः ॥

इत्थं स्वगतदोषपरिहार- मभिधायोपाधिकृतदोषपरिहारमाह-

मू. (२६) *समरेसु अगारेसु, गिहसंधिसु अ महापहेसु।*
एगो एगित्थीए सद्धिं, नेव चिट्ठे न संलवे ॥

वृ. 'समरेषु' स्वरकुटीषु, तथा च चूर्णिकृत्- 'समरं नाम जत्थ हेट्ठा लोयारा कम्मं करेंति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलक्षणत्यादस्यान्येष्वपि नीचास्पदेषु 'अगारेषु' गृहेषु 'गृहसन्धिषु च' गृहद्वयान्तरालेषु च 'महापथेषु' राजमार्गादौ, किमित्याह-'एकः' असहायः एका-असहाया सा चासौ स्त्री च एकस्त्री तथा 'सार्द्धं' सह 'नैव तिष्ठेत्' असंलपन्नेव चोर्द्ध्वस्थानस्थो न भवेत्, 'न संलपेत्' न तयैव सह संभाषं कुर्यात्, अत्यन्तदुष्टतोद्भावनपरं चैकग्रहणम्, अन्यथा ससहायास्यापि ससहायया अपि च स्त्रिया सहावस्थानं सम्भाषणं चैवंविधास्तदेषु दोषायैव, प्रवचनमालिन्यादिदोषसम्भवात्, अथवा सममरिभिर्वर्तन्त इति समरा द्रव्यतो जनसंहारकारिणः संग्रामाः भावात्तु स्त्रीणामरिभूतत्वात् ज्ञानादिजीवस्वतत्त्वघातिनः तासामेव दृष्ट्वा दृष्टिसम्बन्धाः, तत्रेह भावसमरैरधिकारः, सप्तमी चेयं, ततोऽयं भावार्थः-द्रव्यसमरा हि न स्युरपि प्राणापहारिणः, भावसमरास्तु ज्ञानादिभावप्राणापहारिण एव, विशेषतस्त्वेकाकितायां, तत एवमेतेष्वपि दारुणेषु भावसमरेषु सत्सु नैक एकस्त्रिया सार्द्धमगारादिषु तिष्ठेत् संलपेद्वा, अनेनापि चारित्रविनय एवोक्तः, उपदेशाधिकाराच्च न पौनरुक्त्यम्, एवमन्यत्रापि भावनीयमिति सूत्रार्थः। कदाचित् स्खलिते च गुरुभिः, शिक्षितो यत्कुर्यात् तदेवाह-

मू. (२७) जं मे बुद्धानुसासंति, सीएण फरुसेण वा।
मम लाभुत्ति पेहाए, पयओ य (तं) पडिस्सुणो॥

वृ. यन्मां बुद्धा 'अनुशासन्ति' शिक्षां ग्राहयन्ति 'शीतेन' सोपचारावचसा, 'शीलेन वे'ति पाठः, तत्र शीलं-महाव्रतादि उपचारात्तज्जनकं वचोऽपि शीलं तेन, यद्वा 'शील समाधौ' ततः शीलेन-समाधानकारिणा-भद्र! भवादृशामिदमनुचितमित्यादिना, 'परुषेण' कर्कशेन, उभयत्र वचसेति गम्यते, तत् 'प्रतिशृणुयात्' विधेयतया अङ्गीकुर्यादित्युत्तरेण सम्बन्धः, किमभिसन्धायेत्याह-मम 'लाभः' अप्राप्तार्थप्राप्तिरूपः, यन्मामनाचारकारिणममी शासन्तीति 'पेहाएत्ति' एकारस्यालाक्षणिकत्वात् प्रेक्ष्य-आलोच्य प्रेक्षया वा एवंविधबुद्धया 'पयतो'त्ति प्रयतः-प्रयत्नवान्, पदतो वा-तथाविधानुस्मर्यमाणसूत्रालापकादिति सूत्रार्थः॥ किमिह परत्र चात्यन्तोपकारि गुरुवचनमपि कस्यचिदन्यथा सम्भवति?, येनैवमुपदिश्यते इत्याह-

मू. (२८) अनुसासणमोवायं, दुक्कडस्स य पेरणं।
हियं तं मन्नए पन्नो, वेस्सं भवइ असाहुणो॥

वृ. 'अनुशासनम्' उक्तरूपम् 'ओवायं'ति उपाये-मृदुपरुषभाषणादौ भवमौपायं, यद्वा 'ओवायंति' सूत्रत्वात् उपपतनमुपपातः-समीपभवनं तत्र भवमौपपातं-गुरुसंस्तारास्तरणविश्रामणादिकृत्यं 'दुष्कृतस्य च' कुत्सिताचरितस्य प्रेरणं-हा! किमिदमित्थमाचरितमित्याद्यात्मकं, गुरुविहितमिति गम्यते, 'हितम्' इहपरलोकोपकारि, 'तदि'त्यनुशासनादि मन्यते 'प्राज्ञः' प्रज्ञावान् 'द्वेष्यं' द्वेषोत्पादकं 'भवति' जायते, कस्य?, 'असाधोः' अपगतभावसाधुत्वस्य, तदनेनासाधोर्गुरुवचनस्याप्यन्यथात्वसम्भव उक्त इति सूत्रार्थः॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (२९) हियं विगयभया बुद्धा, फरुसमप्पनुसासनं।
वेस्सं तं होइ मूढाणं, खंतिसुद्धिकरं पयं॥

वृ. 'हितं' पथ्यं 'विगतभयाः' सप्तभयरहिताः 'बुद्धाः' अवगततत्त्वाः, मन्यन्त इति शेषः, 'परुषमपि' कर्कशमपि, अनुशासनं शिष्याणां गुरुविहितमिति प्रक्रमः, 'द्वेष्यं' द्वेषोत्पादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तद्' इत्यनुशासनं भवति 'मूढानाम्' अज्ञानानां, क्षान्तिः-क्षमा शुद्धिः-आशयविशुद्धता तत्करणं, यद्वा-क्षान्तेः शुद्धिः-निर्मलता क्षान्तिशुद्धिस्तत्करम्, अमूढानां विशेपतः क्षान्तिहेतुत्वाद् गुर्वनुशासनस्य, मार्दवादिशुद्धिकरत्वोपलक्षणं चैतद्, अत एव पद्यते-गम्यते गुणैर्ज्ञानादिभिरिति पदं-ज्ञानादिगुणस्थानमित्यर्थः, अथवा-परुषमपीत्यपिशब्दो भिन्नक्रमः, ततश्च हितमप्यायत्यां विगतभयाद् 'बुद्धाद्' आचार्यादेः, उत्पन्नमिति शेपः, परुषं यच्छुत्यसुखदमनुशासनं, तत्किमित्याह-द्वेष्यं तद् भवति मूढानां, शेषं प्राग्वदिति सूत्रार्थः ॥ पुनर्विनयमेवाह-

मू.(३०) *आसने उवचिट्ठिज्जा, अनुच्चेऽकुक्कुए थिरे।*
अप्पुत्थाई निरुत्थाई, निसीज्जा अप्पकुक्कुई॥

वृ. 'आसनं' पीठादि वर्पासु ऋतुबद्धे तु पादपुञ्छनं तत्र पीठादौ 'उपतिष्ठेत्' उपविशेत्, 'अनुच्चे' द्रव्यतो नीचे भावतस्त्वल्पमूल्यादौ, गुर्वासनात् इति गम्यते, 'अकुक्कुचे' अस्पन्दमाने, न तु तिनिशफलकवत् किञ्चिच्चलति, तस्य शृङ्गाराङ्गत्वात्, 'स्थिरे' समपादप्रतिष्ठिततया निश्चले, अन्यथा सत्त्वविराधनासम्भवात्, ईदृश्यप्यासने अल्पमुत्थातुं शीलमस्येति अल्पोत्थायी, प्रयोजनेऽपि न पुनः पुनरुत्थानशीलः, 'निरुत्थायी' न निमित्तं विनोत्थानशीलः, उभयत्रान्यथाऽनवस्थितत्वसम्भवात्, एवंविधश्च किमित्याह-'निपीदेत्' आसीत, 'अप्पकुक्कुइ'त्ति अल्पस्पन्दनः, करादिभिरल्पमेव चलन्, यद्वा-अल्पशब्दोऽभावाभिधायी, ततश्चाल्पम्-असत्, कुक्कुयं'ति कौत्कुचं-करचरणभ्रूभ्रमणाद्यसच्चेष्टात्मकमस्येत्यल्पकौत्कुचः, अनेनाप्यौपचारिकविनयः प्रकारान्तरेणोक्तं इति सूत्रार्थः ॥

सम्प्रति चरणकरणविनयात्मिकामेपणासमितिमाह-

मू.(३१) *कालेन निक्खमे भिक्खू, कालेन य पडिक्कमे।*
अकालं च विवज्जित्ता, काले कालं समायरे॥

वृ. 'कालेन'त्ति सप्तम्यर्थे तृतीया, काले प्रस्तावे 'निष्क्रामेत्' गच्छेत् भिक्षुः, अकालनिर्गमे आत्मक्लामनादिदोपसम्भवात्, तथा कालेन च 'प्रतिक्रामेत्' प्रतिनिर्वर्त्तेत, भिक्षाटनादिति शेपः, इदमुक्तं भवति-अलाभेऽपि 'अलाभोत्ति न सोइज्जा, तवोत्ति अहियासए' इति समयमनुस्मरन्, अल्पं मया लब्धं न लब्धं वेति लाभार्थी नाटन्नेव तिष्ठेत्, किमित्येवमत आह-'अकालं' तत्तत्क्रियाया असमयं चेति, यस्माद्विपर्ययकाले प्रस्तावे प्रत्युप्रेक्षणादिसम्बन्धिनि 'कालमि'ति तत्तत्कालोचितं क्रियाकाण्डं 'समाचरेत्' कुर्यात्, अन्यथा कृषीबलकृषीक्रियाया इवाभिमतफलोपलम्भासम्भव इति गर्भार्थः, अनेन च कालनिष्क्रमणादौ हेतुरुक्तः, प्रसङ्गात् शेपक्रियाविपयतया वा नेयं, समुच्चयार्थश्च तदा चशब्द इति सूत्रार्थः ॥ निर्गतश्च यत्कुर्यात्तदाह-

मू.(३२) *परिवाडिए न चिट्ठिज्जा, भिक्खू दत्तेसनं चरे।*
पडिरूवेण एसित्ता, मियं कालेण भक्खए।

वृ. 'परिपाटी' गृहपंक्तिः, तस्यां 'न तिष्ठेत्' न पंक्तिस्थगृहभिक्षोपादानायैकत्रावस्थितो भवति, तत्र दायकदोपाऽनवगमप्रसङ्गात्, यद्वा-पंक्तयां-भोक्तुमुपविष्टपुरुषादिसम्बन्धिन्यां न तिष्ठेत्, अप्रीत्यदृष्टकल्याणतादिदोपसम्भवात्, किञ्च ? 'भिक्षुः' यतिः, दत्तं-दानं तस्मिन् गृहिणा दीयमाने 'एपणां' तद्गतदोपान्वेषणात्मिकां 'चरेत्' आसेवेत, 'चरतिः आसेवायामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्त्तते' इति वचनात्, अनेन ग्रहणैषणोक्ता, किं विधाय दत्तैषणां चरेत्त ?–'प्रतिरूपेण' प्रधानेन रूपेणेति गम्यते, 'यद्वा-प्रतिप्रतिबिम्बं चिरन्तनमुनीनां यद्रूपं तेन, उभयत्र पतद्ग्रहादिधारणात्मकेन सकलान्यधार्मिकविलक्षणेन, न तु –

'वस्त्रं छत्रं छात्रं पात्रं यष्टिं च वर्जयेद् भिक्षुः।
वपेण परिकरेण च कियताऽपि विना न भिक्षाऽपि॥'

इत्यादिवचनाकर्णनाद् विभूषणात्मकेनैपयित्वा, अनेन च गवेषणा विधिरुक्तः, ग्रासैषणा-विधिमाह–'मितं' परिमितमतिभोजनात् स्वाध्यायविधातादिबहुदोषसंभवात्, 'कालेन' इति-

'नमोक्कारेण पारित्ता, करित्ता जिनसंथवं।
सज्झायं पट्ठवित्ता णं, वीसमेज्ज खणं मुनी॥'

इत्याद्यागमोक्तप्रस्तावेनाद्रुताविलम्बितरूपेण वा 'भक्षयेत्' भुञ्जीतेति सूत्रार्थः॥ यत्रान्यभिक्षुकासंभवस्तत्र विधिरुक्तः, यत्र तु पुराऽऽयातान्यभिक्षुकसम्भवस्तत्र विधिमाह-

मू. (३३) नाइदूरे अनासन्ने, नन्नेसिं चक्खुफासओ।
एगो चिट्ठेज्ज भत्तट्ठं, लंघित्ता तं नइक्कमे॥

वृ. 'नातिदूरं' सुब्व्यत्ययात् नातिदूरे-अतिविप्रकर्षति देशे, तिष्ठेदिति सम्बन्धः, तत्र च तन्निर्गमावस्थानानवगमप्रसङ्गाद् एषणाशुद्ध्यसम्भवाच्च, तथा 'अनासन्ने'त्ति प्रस्ज्यप्रतिपेधा-र्थत्वात् नञोऽनासन्ने प्रस्तावान्नातिनिकटवर्त्तिनि भूभागे तिष्ठेत्, तत्र पुराप्रविष्टापरभिक्षुका-प्रीतिप्रसक्तेः 'नान्येषां' भिक्षुकापेक्षया परेषां गृहस्थानां 'चक्षुःस्पर्शत' इति सप्तम्यर्थे तसिः, ततः चक्षुःस्पर्शे-दग्गोचरे चक्षुःस्पर्शगो वा दृग्गोचरगतः 'तिष्ठेत्' आसीत, किन्तु विविक्त-प्रदेशस्थो यथा न गृहिणो विदन्ति, यदुत-एष भिक्षुको निष्क्रमणं प्रतीक्षतं इति, तथा 'एगो'त्ति किम मी मम पुरतः प्रविष्टा इति तदुपरि द्वेषरहितः 'भक्तार्थं' भोजननिमित्तं, न च 'लंघित्त'त्ति उल्लंघ्य, 'तम्' इति भिक्षुकम्, 'अतिक्रामेत्' प्रविशेत्, तत्रापि तदप्रीत्यपवादादिसम्भवाद्। इह च मितं कालेन भक्षयेदिति भोजनमभिधाय यत्पुनार्भिक्षाटनाभिधानं तत् ग्लानादिनिमित्तं स्वयं वा बुभुक्षावेदनीयमसहिष्णोः पुनर्भ्रमणमपि न दोषायेति ज्ञापनार्थम्, उक्तं च-"जइ तेन न'संथरे। तओ कारणमुप्पण्णे, भत्तपाणं गवेसए॥"पुनस्तद्गतविधिमेवाभिधित्सुराह-

मू. (३४) नाइउच्चे नाइनीए, नासन्ने नाइदूरओ।
फासुयं परकडं पिंडं, पडिगाहिज्ज संजए॥

वृ. 'नात्युच्चे' प्रासादोपरिभूमिकादौ नीचे वा-भूमिगृहादौ, तत्र तदूत्क्षेपनिक्षेपनिरीक्षणा-सम्भवाद् दायकापायसम्भवाच्च, यद्वा 'नात्युच्चः' उच्चस्थानस्थितत्वेन ऊर्द्धवीकृतकन्धरतया वा द्रव्यतो भावतस्त्वहो ! अहं लब्धिमानिति मदाध्यातमानसः, नीचोऽत्यन्तावनतकन्धरो निम्नस्थानस्थितो वा द्रव्यतः भावतस्तु न मयाऽद्य किञ्जित् कुतोऽप्यवाप्तमिति दैन्यवान्, उभयत्र वा समुच्चये, तथा 'नासन्ने' समीपवर्तिनि 'नातिदूरे' अतिविप्रकर्षवति प्रदेशे, स्थित इति गम्यते, यथायोगं जुगुप्साशंकैषणाशुद्ध्यसम्भवादयो दोषाः, अथवा अत एव नासन्नो नातिदूरगः, प्रगता असव इति सूत्रत्वेन मतुब्लोपादसुमन्तः-सहजसंसक्तिजन्मानो यस्मात् तत् प्रासुकं, परेण-गृहिणाऽऽत्मार्थं परार्थं वा कृतं-निर्वर्त्तितं परकृतं-किं तत् ?-'पिण्डम्' आहारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'प्रतिगृह्णीयात्' स्वीकुर्यात्, 'संयतः' यतिरिति सूत्रार्थः ॥ इत्थं सूत्रद्वयेन गवेषणाग्रहणैषणाविषयं विधिमुक्त्वा ग्रासैषणाविधिमाह-

मू. (३५)   *अप्पपानेऽप्पबीए वा, पडिच्छन्ने य संवुडे ।*
समयं संजओ भुंजे, जयं अप्परिसाडियं ॥

वृ. अल्पशब्दोऽभावाभिधायी, तथेहापि सूत्रत्वेन मत्वर्थीलोपात् प्राणाः-प्राणिनस्तत-श्चाल्पा-अविद्यमानाः प्राणाः-प्राणिनो यस्मिंस्तदल्पप्राणां तस्मिन्-अवस्थितागन्तुकजन्तु-विरहिते, उपाश्रयादाविति गम्यते, तथा अल्पानि-अविद्यमानानि बीजानि-शाल्यादीनि यस्मिं-स्तदल्पबीजं तस्मिन्, उपलक्षणत्वाच्चास्य सकलैकेन्द्रियविरहिते, ननु चाल्पप्रमाण इत्युक्ते अल्पबीज इति गतार्थं, बीजानामपि प्राणत्वाद्, उच्यते, मुखनासिकाभ्यां यो निर्गच्छति वायुः स एवेह लोके रूढितः प्राणो गृह्यते, अयं च द्वन्द्रियादीनामेव संभवति, न बीजाद्येकेन्द्रियाणामिति कथं गतार्थता ?, तत्रापि 'प्रतिच्छन्ने' उपरिप्रावरणान्विते, अन्यथा सम्पातिमसत्त्वसम्पात-सम्भवात्, 'संवृत्ते' पार्श्वतः कटकुट्यादिना सङ्कटद्वारे, अटव्यां कुडङ्गादिषु वा, अन्यथा दीनादियाचने दानादानयोः पुण्यबन्धप्रद्वेषादिदर्शनात्, संवृतो वा सकलाश्रववविरमणात्, 'समकम्' अन्यैः सह, न त्वेकाक्येव रसलम्पटतया समूहासहिष्णुतया वा, अत्राह च-

''साहवो तो चियत्तेणं, निमंतिज्ज जहक्कमं ।
जइ तत्थ कोइ इच्छेज्जा, तेहिं सद्धिं तु भुंजए ॥''त्ति,

गच्छास्थितसामाचारी चेयं गच्छस्यैव जिनकल्पिकादीनामपी मूलत्वख्यापनायोक्ता, उक्तं हि-'गच्छे च्चिय निम्माओ'इत्यादि, यद्वा 'समयं'ति सममेव समकं-सरसविरसादिष्वभिष्व-ङ्गादिविशेषरहितं, सम्यग् यतः संयतः यतिरित्यर्थः, 'भुञ्जीत' अश्नीयात् 'जयं'ति यतमानः 'अप्परिसाडियं'ति परिसाटविरहितमिति सूत्रार्थः ॥ यदुक्तं 'यतमानं'इति, तत्र वाग्यतनामाह-

मू. (३६)   *सुकडंति सुपक्कंति, सुछिन्नं सुहडे मडे ।*
सुनिट्ठिए सुलट्ठित्ति, सावज्जं वज्जए मुनी ॥

वृ. 'सुकृतं'सुष्ठु निर्वर्तितमन्नादि 'सुपक्वं ' घृतपूर्णादि, 'इतिः' उभयत्र प्रदर्शने, 'सुच्छिन्नं' शाकपत्रादि 'सुहृतं' शाकपत्रादेस्तिक्ततत्वादि घृतादि वा सूपविलेपिकादीनां, तथा 'मडे'त्ति प्रक्रमात् सुष्ठु मृतं घृताद्येव सक्तुसुपादौ, तथा सुष्ठु निष्ठितमित्यतिशयेन निष्ठां-रसप्रकर्षप-र्यन्तात्मिकां गतं, 'सुलट्ठि'त्ति सर्वैरपि रसादिभिः प्रकारैः शोभनमिति, 'इति' एवंप्रकारार्थः, एवंप्रकारामन्यदपि सावद्यं प्रक्रमाद्वचो, वर्जयेन्मुनिः ।

यद्वा-सुष्ठु कृतं यदनेनारातेः प्रतिकृतं, सुष्ठु पक्वं मांसाशनादि, सुच्छिन्नोऽयं न्यग्रोधपादपा-दिः, सुहृतं कदर्यादर्थजातं, सुहतो वा चौरादिः, सुमृतोऽयं प्रत्यनीकधिग्वर्णादिः, सुनिष्ठितोऽयं-प्रासादकूपादिः, 'सुलट्ठि'त्ति शोभनोऽयं करितुरगादिरिति सामान्येनैव सावद्यं वचोवर्जयेन्मु-निः । निरवद्यं तं सुकृतमनेन धर्मध्यानादि, सुपक्वमस्य वचनविज्ञानादि, सुच्छिन्नं स्नेहनिगडादि, सुहृतमुपकरणमशिवोपशान्तये, सुहतं वा कर्मानीकादि, सुमृतस्य पण्डितमरणमर्तुः, तथा सुनि-ष्ठितोऽसौ साध्वाचारविषये., 'सुलट्ठि'त्ति शोभनमस्य तपोऽनुष्ठानमित्यादिरूपं, कारणतो वा-

''पयत्तपक्वेत्ति व पक्कमालवे, पयत्तछिन्नत्ति व छिन्नमालवे ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पयत्तलद्वेत्ति व कम्महेउयं, पहारगाढेत्ति व गाढमालवे ॥"

इत्याप्तोपदेशात् प्रयत्नकृतपक्वादिरूपं वदेदसुविनीतेतरोपदेशदानतो यद्‌गुरोर्भवति तदुपदेशयितुमाह-

मू. (३७) *रमए पंडिए सासं, हयं भद्दं व वाहए।*
बालं सम्मइ सासंतो, गलिअस्समिव वाहए ॥

वृ. 'रमते' अभिरतिमान् भवति, 'पण्डितान्' विनीतविनेयान्, 'शासत्' इत्याज्ञापयन् कथञ्चित प्रमादस्खलिते शिक्षयित्वा, गुरुरिति शेषः, कमिव कः ?, इत्याह-'हयमिव' अश्वमिव, कीदृशम् ?-भाति भन्दते वा भद्रस्तं-कल्याणावहं 'वाहकः' अश्वन्दमः' 'बालम्' अज्ञं 'श्राम्यति' खिद्यते शासत्, स हि सकृदुक्त एव न कृत्येषु प्रवर्तते, तत इदं कुरु इदं च मा कार्षीरित्यादि पुनः पुनस्तमाज्ञापयन् शिक्षयित्वा, कमिव कः ?, इत्याह-'गलिम्' उक्तरूपमश्वमिव वाहक इति सूत्रार्थः ॥ गुरोः श्रमहेतुत्वमुद्‌भावयन् बालस्याभिसन्धिमाह-

मू. (३८) *खड्डुयाहिं चवेडाहिं, अक्कोसेहि वहेहि य।*
कल्लाणमनुसासंतं, पावदिट्ठित्ति मन्नइ ॥

वृ. 'खड्डुकाभिः' टक्कराभिः 'चपेटाभिः' करतलाघातैः 'आक्रोशैः' असत्यभाषणैः 'वधैश्चः' दण्डिकादिघातैः, चशब्दादन्यैश्चैवंप्रकारैर्दुःखहेतुभिरनुशासनप्रकारैस्तमाचार्यं 'कल्याणम्' इहपरलोकहितम् 'अनुसासन्तं' शिक्षयन्तं, पापा दृष्टिः-बुद्धिरस्येति पापदृष्टिः, अयमाचार्य इति मन्यते, यथा-पापोऽयं मां हन्ति निर्घृणत्वात्, चारकपालकवत्, पठन्ति च-'खड्डुया मे'इत्यादि, अत्र व्यवच्छेदफलत्वाद्, वाक्यस्य खड्डुकादय एव मम नापरं किञ्चित् समीहितमस्तीत्यभिसन्धिना कल्याणमनुशानस(त)माचार्यंअ पापदृष्टिं मन्यते, यद्वावाग्भिरप्यनुशास्यमानोऽसौ खड्डुकादिरूपा वाचो मन्यत इति सूत्रार्थः ॥ गुरोरतिहितत्वं प्रचिकाशयिपुर्विनीताभिसन्धिमाह-

मू. (३९) *पुत्तो मे भाय नाइत्ति, साहू कल्लाण मन्नइ।*
पावदिट्ठि उ अप्पाणं, सासं दासं व मन्नइ ॥

वृ. पुत्रो मे भ्राता ज्ञातरिति, अत्रेवार्थस्य गम्यमानत्वात् पुत्र इवेत्यादिवुद्धाऽऽचार्यो मामनुशास्तीति 'साधुः' सुशिष्यः 'कल्याणं' कल्याणहेतुमाचार्यमनुशासनं वा मन्यते, स हि विवेचयति शिष्यः-सौहार्दादसौ मां शास्ति, दुर्विनीतत्वे हि मम किमस्य परिहीयते ?, ममैव त्वर्थभ्रंश इति। बालोऽप्येवं किं न मन्यत इत्याह-'पापदृष्टिस्तु' कुशिष्यः पुनरात्मानं 'सासं'ति प्राकृतत्वाद्धितानुशासनेनापि शास्यमानं दासमिव मन्यते, यथा असौ दासवन्मामाज्ञापयति, ततोऽस्य शास्तरि पापदृष्टिताऽभिसन्धिरेव सम्भवतीति सूत्रार्थः ॥ विनयसर्वस्वमुपदेष्टुमाह-

मू. (४०) *न कोवए आयरियं, अप्पाणंपि न कोवए।*
बुद्धोवघाई न सिया, न सिया तोत्तगवेसए ॥

वृ. 'न कोपयेत्' न कोपोपेपं कुर्यात्, आचार्यम्, उपलक्षणत्वादपमपि विनयार्हम्, 'आत्मानमपि' गुरुभिरतिपरुपभाषणादिनाऽनुशिष्यमाणं न कोपयेत्, कथञ्चित् सकोपतायामपि 'बुद्धोपघाती' आचार्योपधातकृत् 'न स्यात्' न भवेत्, तथा न स्यात् तुद्यते-व्यथ्यतेऽनेनेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोत्रं-द्रव्यतः प्राजनको भावतस्तु तद्दोपोद्भावकतया व्यथोपजनकं वचनमेव, तद् गवेपयति किमहममीषां जात्यादिदूषकु वच्मि ?, इत्यन्वेपयतीति तोत्रगवेषकः, प्रक्रमाद्गुरूणां, न स्यादिति चादरख्यापनार्थत्वान्नं पुनरुक्तं-वुद्धोपघाती न स्यात्तत्रोदाहरणं-कश्चिदाचार्यादिगणि-गुणसम्पत्समन्वितो युगपधानः पक्षीणप्रायकर्माऽऽचार्योऽनियतविहारितया विहर्तुमिच्छन्नपि परिक्षीणजंघाबलः क्वचिदेकस्थान एवावतस्थे, तत्रत्य श्रावकजनेन चैतेषु भगवत्सु सत्सु तीर्थं सनाथमिति विचिन्तयता तद्वयोऽवस्थासमुचितस्निग्धमधुराहारादिभिः प्रतिदिवसमुपचर्यते स्म, तच्छिष्याश्च गुरुकर्मतया कदाचिदचिन्तयन्, यथा-कियच्चिरमयमजङ्गमोऽस्माभिरनुपालनीयः, ततस्तमनशनमादापयितुमिच्छवोऽतिभक्तश्रावकजनानुदिनदीयमानमुचितमशनादि तस्मै न समर्पयामासुः, अन्तप्रान्तादि च समुपनीय सविषादमिव तत्पुरत उक्तवन्तः-किमिह कुर्मः ?, यदीदृशामपि भवतामुचितमशनादि नामी विवेकविकलतया सदपि सम्पादयितुमीशते, श्राद्धानभिदधति च, यथा-अत्यन्तनिःस्पृहतया शरीरयापनामपि प्रत्यनपेक्षिणः प्रणीतं भक्त-पानमाचार्या नेच्छन्ति, किन्तु संलेखनामेव विधातुमध्यवस्यन्तीति ।

ततस् तद्वचनमाकर्ण्य मन्युभरनिभृतचेतसस्तमुपसृत्य सगद्गदं जगदुः-भगवन्! भुवनभव-भावस्वभावावभासिष्वर्हत्सुचिरतरातीतेष्वपि प्रतपत्सु भवत्सु भुवनमवभासवदिवाभाति, तत्किमयमत्र भवद्भिरकाल एव संलेखनाविधिराब्धः ?, न च वयममीषां निर्वेदहेतव इति मन्तव्यं, यतः-शिरः स्थिता अपि भवन्तो न भारमस्माकममीषां वा शिष्याणां कदाचिदादधति, ततस्तैरिङ्गितज्ञैरवगतं-यथाऽस्मन्शिष्यमति विजृम्भितमेतत्, किममीषामप्रीतिहेतुना प्राणधार-णेन ?, न खलु धर्मार्थिनां कस्यचिदप्रीतिरुपादयितुमुचितेति चेतसि विचिन्त्य मुकुलितमेव तत्पुरत उक्तं-कियच्चिरमजङ्गमैरस्माभिरुपरोधनीयास्तपस्विनो भवन्तश्च, तद्वरमुत्तमांचरित-मुत्तमार्थमेव च प्रतिपद्यामहे इति तानसौ संस्थाप्यभक्तमेव प्रत्याचचक्षे । इत्येवं बुद्धोपघाती न स्यादिति सूत्रार्थः ॥ एवं तावदाचार्यं न कोपयेदित्युक्तं, कथञ्चित्

मू. (४१) *आयरिय कुवियं नच्चा, पत्तिएणं पसायए ।*

विज्झविज्जा पंजलिउडे, वएज्जा न पुणोत्ति ।

वृ. 'आचार्यम्' उक्तस्वरूपम्, उपलक्षणत्वादुपाध्यायादिकमपि 'कुपितम्' इति सकोपमनुशासनोदासीनताभिः,-

"पुरिसजाएवि तहा विनीयविनयम्मि नत्थि अभिओगो ।

सेसंमि उ अभिओगो जनवयजाए जहा आसे ॥"

इत्यागमात्, कृतबहिष्कोपं वा दृष्टप्रदानादिना 'ज्ञात्वा' अवगम्य 'पत्तिएणं'ति आर्पत्वात् प्रतीतिः, प्रयोजनमस्येति प्रातीतिकं-शपथादि, अपिशब्दस्य चेह लुप्तनिर्दिष्टत्वात् तेनापि प्रसादयेत् इदमुक्तं भवति-गुरुकोपहेतुकमबोध्याशातनामुक्त्वभावादिकं विगणयन् यया तया गत्याम तत्प्रसादनमेवोत्पादयेत, सर्वमपि वा प्रतीत्युत्पादकं वचः प्रातीतिकं तेन प्रसादयेत्, यद्वा 'पत्तिएणं'ति प्रीत्या साम्नैव, न भेददण्डाद्युपदर्शनेन, एतदेवाह-'विध्यापयेत्'कथञ्चि-दुदीरितकोपानलानप्युशमयेे, प्रकर्षेण-अन्तःप्रीत्यात्मकेन कृतो-विहितोऽञ्जलिः-उभयकर-मीलनात्मकोऽनेनेति प्रकृताञ्जलिः, प्राकृतत्वाच्च कृतशब्दस्य परनिताः, प्रकृष्टं वा-भावन्वि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततयाऽञ्जलिपुटमस्येति प्राञ्जलिपुटः, इत्थं कायिकं मानसं च विध्यापनोपायमभिधाय वाचिकं वक्तुमाह- 'वदेत्' ब्रूयात् न पुनरिति, चशब्दो भिन्नकम्ः, वेददित्यस्यानन्तरं द्दष्टव्यः, ततोऽ-यमर्थः- कथञ्चित कृतकोपानपि गुरून् विध्यापयन् वदेत् यथा - भगवन्! प्रमादाचरितमिदं मम क्षमितव्यं, न पुनरित्थमाचरिष्यामीति सूत्रार्थः ॥ साम्प्रतं यथा निरपवादतयाऽऽचार्यकोप एव न स्यात् तथाऽऽह-

मू. (४२) धम्मज्जियं च ववहारं, बुद्धोहाऽऽयरियं सया।
तमायरंतो ववहारं, गरहं नाभिगच्छइ ॥

वृ. धर्मेण-क्षान्त्यादिरूपेणार्जितम्-उपार्जितं धर्मार्जितं, न हि क्षान्त्यादिधर्मविरहितं इमं प्राप्नोतीति, 'चः' पूरणे, विविधं विधिअवह्राऽवहरणमनेकार्थत्वादाचारणं व्यहारस्तं-यतिकर्तव्यतारूपं, 'बुद्धैः' अवगततत्त्वैः आचरितं, 'सदा' सर्वकालं, 'त'मिति सदावस्थिततया प्रतीतमेव 'आचरन्' व्यवहरन्, यद्वा-यत्तदोर्नित्याभिसम्बन्धात् सुब्व्यत्ययाच्च धर्माजितो बुद्धैराचतिरश्च यो व्यवहारस्तमाचरन-कुर्वन्, विशेषेणापहरति पापकर्मेति व्यवहारस्तं, व्यवहारविशेषणमेतत्, एवं च किमित्याह- 'गर्हाम्' अविनीतोऽयमित्येवंविधां निन्दा 'नाभिग-च्छति' न प्राप्नोति, यतिरिति गम्यते। यद्वा-आचार्यविनयमनेनाह, तत्र धर्मादनोपेतो धर्म्यो-न धर्मातिक्रान्तः, 'जियं च ववहारं'ति पाकृतत्वाच्चस्य भिन्नक्रमत्वाज्जीतव्यवहारश्च, अनेन चागमादिव्यवहारव्ययच्छेदमाह, अत एव 'बद्धैः' आचार्यैराचरितः सदा-सर्वकालं त्रिकाल-विषयत्वत् जीवव्यवहारस्य, य एवंविधो व्यवहास्तं व्यवहारं-प्रमादात् स्खलितादौ प्रायश्चित्त-दानरूपमाचरन् 'गर्हां' दण्डरुचिरयं निर्घृणो वेत्येवंरूपां जुगुप्सां नाभिगच्छति, आचार्य इति शेषः, न चायं निजक उपकारी वा मम विनेय इति न द्णडनीय इति ज्ञापनार्थं च धर्म्यजीत-विशेषणं, पठन्ति च- 'तमायरंतो मेहावि'त्ति सुगममेवेति सूत्रार्थः ॥ किं बहुना ?-

मू. (४३) मनोगयं वक्कगयं, जाणित्ताऽऽयरियस्स उ।
तं परिगिज्झ वायाए, कम्मुणा उववायए ॥

वृ. मनसि-चेतसि गतं-स्थितं मनोगतं तथा वाक्ये-वचनरचनात्मनि गतं वाक्यगतं, कृत्य-मिति शेषः, वाक्यग्रहणं तु पदस्यापरिसमाप्तार्थाभिधायित्वेन क्वचिदप्रयोजकत्वात्, 'ज्ञात्वा' अवबुध्य 'आचार्यस्य' विनयार्हस्य गुरोः तुशब्दः कायगतकृत्यपरिग्रहार्थः, 'तत्' मनोगतादि 'परिगृह्य' अङ्गीकृत्य 'वाचा' वचसा इदमित्थं करोमीत्यात्मकेन 'कर्मणा' क्रियया तन्निर्वर्तना-त्मिकया तदुपपादयेत्-विदधीत, पठन्ति च - 'मनोरुइं वक्करुइं, जाणित्ताऽऽयरियस्स उ' अत्र च मनसि रुचिः-अभिलापस्तामाचार्यस्य ज्ञात्वा-इदममीषां भगवतामभिमतमित्यवगम्य, वाक्ये रुचिः-पर्यवसितकार्यवाञ्छा तां च, शेषं प्रागवत्, अनेन सूक्ष्मो विनय उक्त इति सूत्रार्थः ॥ स चैवं विनीताविनयतथा याद्दक् स्यात्तदाह-

मू. (४४) वित्ते अचोइए निच्चं, खिप्पं हवइ सुचोयए।
जहोवइट्ठं सुकडं, किच्चाइं कुव्वई सया।

वृ. 'वित्ते' विनीतविनयतयैव सकलगुणाश्रयतया प्रतीतः प्रसिद्ध इतियावत् 'अचोइए'त्ति यथा हि बलवद्विनीतधुर्यः प्रतोदोत्क्षेपमपि न सहते, कुस्तन्निपतनम्, एवमयमप्यचोदित एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिप्रस्तावं गुरुकृत्यषं प्रवर्तत इति कुतः प्रेरितत्वमस्य ?, 'नित्यं' सदा, न कदाचिदेव, स्वयं प्रवर्तमानोऽपि प्रेरिताऽनुशयवानपि स्यादिति कदाशङ्कापनोदाहायाह- 'क्षिप्रम्' इति शीघ्रं भवति 'सुचोयए'त्ति शोभने प्रेरयितरि, गुराविति गम्यते, सोपस्कारत्वाच्च क्षिप्रमेव प्रेरके सति कृत्येषं वर्तते, नानुशयतो विलम्बितमेव, पठ्यते च- 'वित्ते अचोइए खिप्पं, पसन्ने थामवं करे' इति, अत्र च 'प्रसन्नः' प्रसत्तिमान, नाहमाज्ञपित इत्यप्रसन्नो भवति, किन्तु ममायमनुग्रह इति मन्यते, क्षिप्रमेव च तत्कुरुते, 'थामवं'ति स्थाम-बलं तद्वान्, किमुक्तं भवति ?, सति बले करोति, असति च सद्भावमेवाऽऽख्याति, यथाऽहमनने कारणेन न शक्नोमीति । क्षिप्रमपि कुर्वन् कदाचिद्विपरीतमर्धविहितं वा विदध्यात् तद्व्ययच्छेदायाह- 'यथोपदिष्टम्' उपदिष्टानतिक्रमेण, 'सुकृतं सुष्ठु परिपूर्णं कृतं यथा भवत्येवं कृत्यानि 'करोति' निर्वर्तयति, सदा सता वा शोभनेन प्रकारेणेति सूत्रार्थः ।। साम्प्रत्युपसंहर्तुमाह-

मू. (४५) *नच्चा नमइ मेहावी, लोए कित्ती य जायइ ।*
किच्चाणं सरणं होई, भूयाणं जगई जहा ।।

वृ. 'ज्ञात्वा' अनन्तरमखिलमध्ययनार्थमवगम्य 'नमति' तत्कृत्यकरणं पति प्रह्वीभवति 'मेधावी' एतदध्ययनार्थावधारणशक्तिमान् मर्यादावर्ती वा, तद्गुणं वक्तुमाह-लोके कीर्तिः- सुलब्भमस्य जन्म निस्तीर्णरूपो भवोदधिरनेनेत्यादिका श्लाघा चशब्दः- 'एकदिग्व्यापिनी कीर्तिः, सर्वदिग्व्यापकं यशः' इति प्रसिद्धेर्यशश्चेति समुच्चिनोति, उभयमपि प्रक्रमान्नन्तुरेव 'जायते' प्रादुर्भवति, स एव भवति 'कृत्यानाम्' उचितानुष्ठानामना कलुषान्तःकरणवृत्तिभिर- विनीताविनयैरतिदूरमुत्सादितानु 'शरणम्' आश्रय इत्यर्थः, केषां केव ?, 'भूतानां' प्राणिनां 'जगती' पृथ्वी यथेति सूत्रार्थः ।। ननु विनयः पूज्यप्रसादनफलः, ततोऽपि च किमवाप्यत इत्याह-

मू. (४६) *पूज्जा जस्स पसीयंति, संबुद्धा पुव्वसंथुया ।*
पसन्ना लंभइस्संति, विउलं अट्ठियं सुयं ।।

वृ. पूजयितुमर्हाः पूज्या-आचार्यादयः 'यस्य' इति विवक्षितशिष्योपदर्शकं सर्वनाम 'प्रसी- दन्ति' तुष्यन्ति 'सम्बुद्धाः' सम्यगवगतवस्तुतत्त्वाः, पूर्वं-वाचनादिकालादारतो न तु वाचनादि- काल एव, तत्कालविनयस्स कृतप्रतिक्रियारूपत्वेन तथाविधप्रसादाजनकत्वात्, संस्तुता- विनयविषयत्वेन परिचिताः सम्यक्स्तुता वा सद्भुतगुणोत्कीर्तनादिभिः पूर्वसंस्तुताः, शेषविन- योपलक्षणमेतत्, 'प्रसन्ना' इति सप्रसादाः, पठ्यते च- 'सम्पनाः' ज्ञानादिगुणपरिपूर्णाः सम्यग्- अविपरीता प्रज्ञा येषां ते सत्प्रज्ञा वा, 'लम्भयिष्यन्ति' प्राययिष्यन्ति, किमित्याह- 'विपुलं'- विस्तीर्णम्, अर्यत इत्यर्थो-मोक्षः स प्रयोजनमस्येत्यार्थिकं, तदस्य 'प्रयोजन' मिति ठक्, अथवा अर्थः स एव प्रयोजनरूपोऽस्यास्तीत्यार्थिकः, अत इनिठना विति ठन् 'श्रुतम्' अङ्गो- पाङ्गप्रकीर्णकादिभेदमागमं, न तु हरहरिहिरण्यगर्भादिवत् साक्षात् स्वर्गादिकम्, अनेन पूज्य- प्रसादस्यानन्तरफलं श्रुतमुक्तं, व्यवहहितफलं तु मुक्तिरिति सूत्रार्थः ।।

सम्प्रति श्रुतवासौ तस्यैहिकफलमाह-

मू. (४७) *स पुज्जसत्थे सुविनीयसंसए, मनोरुई चिट्ठइ कम्मसंपया ।*
तवोसमायारीसमाहिसंवुडे, महज्जुई पंच वयाइं पालिया ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'स' इति शिष्यः प्रसादितगुरोरधिगतश्रुतः पूज्यं-सकलजनश्लाघादिना पूजार्हं शास्त्रमस्येति पूज्यशास्त्रः, विनीतस्य हि शास्त्रं सर्वत्र विशेषेण पूज्यते, यदि वा प्राकृतत्वात्पूज्यः शास्ता गुरुरस्येति पूजाशास्तृकः, विनीतो हि विनेयः शास्तारं पूज्यमपि विशेषतः पूजां प्रापयति, अथवा पूज्यश्चासौ शस्तश्च सर्वत्र प्रशंसास्पदत्वेन पूज्यशस्तः, सुष्ठु-अतिशयेन विनीत,-अपनीतः प्रसादितगुरुणैव शास्त्रपरमार्थसमर्पणेन संशयो-दोलायमानमानसात्मकोऽस्येति सुविनीतसंशयः, सुविनीता वा संसत्, परिषदस्येति सुविनीतसंसत्कः, विनीतस्य हि स्वयमतिशयविनीतैव परिषद्भवति, 'मनोरुई'त्ति मनसः चेतसः प्रस्तावद् गुरुसम्बन्धिनी रुचिः-प्रतिभासोऽस्मिन्निति मनोरुचिः, 'तिष्ठति' आस्ते, विनयाधिगतशास्त्रो हि न कथञ्चिद्गुरूणामप्रीतिहेतुरिति, तथा 'कम्मसंपय'त्ति कर्म-क्रिया दशविधचक्रवालसामाचारीप्रभृतिरितिकर्तव्यता तस्याः सम्पत-सम्पन्नता तया, लक्षणे तृतीया, ततः कर्मसम्पदोपलक्षितस्तिष्ठतीति सम्बन्धः, हेतौ वा तृतीया, मनोरुचित्वापेक्षया च हेतुत्वम्, अथवा मनोरुचितवे मनोरुचिता तिष्ठति -आस्ते कर्मणां-ज्ञानावरणादीनां सम्पद् उदयादीरणादिरूपा विभूतिः कर्मसम्पद्, अस्येति गम्यते, तदुच्छेदशक्तियुक्तयाऽस्य प्रतिभासमानतयेव तत्स्थितेरुपलक्ष्यमाणत्वात्,

पठ्यते च-'मनोरुई'त्ति तत्र मनसो रुचिः-अभिलाषो यस्मिंस्तन्मनोरुचि-स्वप्रतिभासानुरूपं यथा भवत्येवं तिष्ठति, कया ?, 'कर्मसम्पदा' यत्यनुष्ठानमाहात्म्यसमुत्पन्नपुलाकादिलब्धिसम्पत्त्या, पठन्ति च -'मनोरुइं चिट्ठइ कम्मसंपयं' तत्र च मनोरुचितफलसम्पादकत्वेन मनोरुचितां कर्मसम्पदं-शुभप्रकृतिरूपाम्, अनुभवन्निति शेषः, नागार्जुनीयास्तु पठन्ति-'मनिच्छियं संपयमुत्तमं गय'त्ति इह च सम्पदं-यथाख्यातचारित्रसम्पदं, अन्यत्अ सुगममेव, तपसः-अनशनाद्यात्मकस्य सामाचारीति समाचरणं, यद्वा-तपश्च सामाचारी च-न्यक्षतो वक्ष्यमाणस्वरूपा समाधिश्च-चेतसः स्वास्थ्यं तैः संवृत्तः निरुद्धाश्रवः तपःसामाचारीसमाधिसंवृत्तः, यद्वा-तपःसामाचारीसमाधिभिः संवृत्त-संवरणं यस्य स तथाविधः, महती द्युतिः-तपोदीप्तिस्तेजोलेश्या वाऽस्येति महाद्युतिः, भवतीति गम्यते, किं कृत्वेत्याह-'पञ्च व्रतानि' प्राणातिपाविरमणादीनि, 'पालयित्वा'निरतिचारं संस्पृश्येति सूत्रार्थः ॥

पुनरस्यैवैहिकमामुष्मिकं च फलं विशेषेणाह-

मू. (४८) *स देवगंधव्वमनुस्सपूइए, चइत्तं देहं मलपंकपुव्वयं।*
सिद्धे वा हवइ सासए, देवे वाऽप्परए महिड्ढिए ॥ त्तिबेमि

वृ. 'स' ताद्दश विनीतविनयः, देवैः-वैमानिकज्योतिष्कैः गन्धर्वैश्च-गन्धर्वनिकायोपलक्षितैर्व्यन्तरभुवनपतिभिः मनुष्यैश्च-महाराजाधिराजप्रभृतिभिः पूजितः-अर्चितो देवगन्धर्वमनुष्यपूजितः, 'त्यक्त्वा' अपहाय 'देहं'शरीरं 'मलपंकपुव्वं'ति जीवशुद्ध्यपहारितया मलवन्मलः स चासौ 'पावे वज्जे वेरे पंके पणए य'त्ति वचनात् पङ्कश्च कर्ममलपङ्कः स पूर्वकार्यात् प्रथमभावितया कारणमस्येति मलपङ्कपूर्वकं, यद्वा-'माओउयं पिऊसुक्कं'त्ति वचनात रक्तशुक्रे एव मलपङ्कौ तत्पूर्वकं, 'सिद्धो वा' निष्ठितार्थो वा 'भवति' जायते 'शाश्वतः' सर्वकालवस्थायी, न तु परपरिकल्पिततीर्थनिकारादिकारणतः पुनरिहागमवानशाश्वतः, सावशेषकर्मवांस्तु देवो वा भवति, 'अप्परए'त्ति अल्पमितिअविद्यमानं रतमिति-क्रीडितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहनीयकर्मोदयजनितमस्येति अल्परतो-लवसप्तमादिः, अल्परजा वा प्रतनुबध्यमानकर्मा, महती-महाप्रमाणा प्रशस्या वा ऋद्धिः-चक्रवर्तिनमपि योधयेत् इत्यादिका विकरणशक्तिः तृणाग्रादपि हिरण्यकोटिरित्यादिरूपा वा समुद्धिरस्येति मदर्द्धिकः, देवविशेषणं वा, 'इतिः' परिसमाप्तावेवमर्थे वा, एतावद्विनयश्रुतमनेन वा प्रकारेण 'ब्रवीमि' इति गणभृदादिगुरूपदेशतः, न तु स्वोत्प्रेक्षया इति ॥ उक्तोऽनुगमः, सम्प्रति चतुर्थमनुयोगद्वारं नया इति, नयति-अनेकांशात्मकं वस्त्वेकांशावलम्बनेन प्रतीतिपथमारोपयति नीयते वा तेन तस्मिंस्ततो वा नयनं वा नयः-प्रमाणप्रवृत्त्युत्तरकालभावी परामर्श इत्यर्थः, उक्तं च-

"स नयइ तेन तहिं वा ततोऽहवा वत्थुणो व जं नयनं।
बहुहा पज्जायणं संभवओ सो नतो नामं॥

ननु सन्त्वमी नयाः, एषां तु क इहोपयोगः?, उच्यते, उपक्रमेणोपक्रान्तस्य निक्षेपेण च यथासम्भवं निक्षिप्तस्य अनुगमेनानुगतस्य चास्यैवाध्ययनस्य विचारणा, उक्तं च-

"संबंधोवक्कमतो समीवमाणीय नत्थनिक्खेजं।
सत्थं तओऽनुगम्मइ नएहि नानाविहाणेहिं॥"

अस्तु नयैर्विचारणा, साऽपि प्रतिसूत्रं समस्ताध्ययनस्य वा?, न तावत् प्रतिसूत्रं, प्रतिसूत्रं, नयावतारनिषेधस्यात्रैवाभिधानात्, अथ समस्ताध्ययनस्य, तदपि न, सूत्रव्यतिरिक्तस्य तस्मासम्भवाद्, उच्यते, यदुक्तंप्रतिसूत्रं नयावतारनिषेध इति, तदित्थमेव, यत्तु सूत्रव्यतिरिक्तस्याध्ययनस्यैवासम्भव इति, तदसत्, कथञ्चित् समुदायस्य समुदायिभ्योऽन्यत्वात्, शिबिकावाहकपुरुषसमूहवत्, इतरथा प्रत्येकावस्थाविलक्षणकार्यानुदयप्रसङ्गाद्, अस्त्वेवं तथाऽपि किमस्य समस्तनयैर्विचार उत कियद्भिरेव?, न तावत् समस्तैरिति पक्षः क्षमः तेषामसंख्यत्वेन तैर्विचारस्य कर्तुमशक्यत्वात्, तथाहि-यावन्तो वचनमार्गास्तावन्त एव नयाः, यथोक्तं-

"जावइया वयणपहा तावइया चेव होंति नयवाया।
जावइया नयवाया तावइया चेव परसमया॥"

न च निजनिजाभिप्रायविरचितानां वचनमार्गाणां सङ्ख्याऽस्ति प्रतिप्राणिभिन्नत्वादभिप्रायाणां, नापि कियद्भिरिति वक्तु शक्यम् अनवस्था प्रसङ्गात् संङ्ख्यातीतेषु हि तेषु यावदेभिर्विचारणा क्रियते तावदेभिरपि किं नेत्यनवस्थाप्रेरणायां न नैयत्यावस्थापकं हेतुमुत्पश्यामः, अथापि स्याद्-सङ्ख्येयत्वेऽप्येषां सकलनयासंग्राहिभिर्नयैर्विचारः, ननु तेषामप्यनेकविधत्वात् पुन-रवस्थैव, तथाहि-पूर्वविद्भिः सकलनयसंग्राहीणि सप्त नयशतानि विहितानि, यत् प्रतिबद्धं सप्तशतारं नयचक्राध्ययनमासीत्, तत्संग्रहाहिणः पुनर्द्वादश विध्यादयो, यत्प्रतिपादकमिदानीमपि नयचक्रमास्ते, तत्संग्राहिणोऽपि सप्त नैगमादयो, यावत् तत्संग्रहेऽपि द्वयमेवेति संग्राहिनयानामपि तेषामनेकविधत्वात् पूर्ववदनवस्थैय, अथ संक्षिप्तरुचित्वादैदंयुगीनजनानामनेकविधत्वेऽपि संग्राहिनयानां द्वयेनैव विचारो न शेषैरिति नानवस्था, ननु द्वयमपि द्रव्यपर्यायार्थशब्दव्यवहारनिश्चयज्ञानक्रियादिभेदेनानेकधैवेति तत्रापि स एवानवस्थालक्षणो दोष इति, अत्र प्रतिविधीयते-इहाध्ययने विनयो विचार्यते, स च मुक्तिफलः, ततो यदेवास्य मुक्तिप्राप्तिनिबन्धनं रूपं तदेव विचारणीयं, तच्च ज्ञानक्रियात्मकमेवेति ज्ञानक्रियानयाभ्यामेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचारो न पुनरन्यैरिति।

तत्र ज्ञाननय आह-ज्ञानमेव मुक्त्यवाप्तिनिबन्धनं, तथा च तल्लक्षणाभिधायिनी निर्युक्तिगाथा-

"नायंमि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि।
जइयव्वमेव इह जो उवएसो सो नमो नाम॥"

अस्याश्चार्थः-'ज्ञाते' बुद्धे 'गिण्हियव्वि'त्ति गृह्यते-उपादीयते कार्यार्थिभिरिति ग्रहीतव्यः, कार्यसाधकं इत्युक्तं भवति, उक्तं हि-'गेज्झो सो कज्जसाहतो होइ' तस्मिन्, अग्रहीतव्यः-तद्विपरीतः, स च हेय उपेक्षणीयश्च, उभयोरपि कार्यासाधकत्वात्, तस्मिंश्च, 'चः' समुच्चये, 'एव' इति पूरणे, कस्मिन् पुनर्ग्राह्येऽग्राह्ये वेत्याह-'अत्थंमि'त्ति अर्थ्यत इत्यर्थः तस्मिन्-द्रव्ये गुणे वा, यत आह-"अत्थो दव्वं गुणो वावि" 'यतितव्य'मिति यत्नः कार्यः, किमुक्तं भवति ?-ग्राह्यः ग्रहीतव्यः इतरश्च परिहर्तव्यः, 'एवः' अवधारणे, स च व्यवहितसम्बन्धः, ततोऽयमर्थः-ज्ञात एव ग्रहीतव्येऽग्रहीतव्ये वाऽर्थे यतितव्यम्, अन्यथा प्रवर्तमानस्य फलविसंवाददर्शनात्, तथा चान्यैरप्युच्यते-"सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धि"रिति, अज्ञानस्यैव च बहुदोषत्वदर्शनात्, यतो बालैरप्युदूघुष्यते-

"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः।
अर्थं हितमहितं वा न वेत्ति येनाऽऽवृतो लोकः॥"

आगमोऽप्येवमेवावस्थितः, यतस्तत्र कर्मनिर्जरणाधीना मुक्तिरुक्त, कर्मनिर्जरणे च ज्ञानमेवाऽऽत्यन्तिको हेतुः, तद्विरहितानां तामलिप्रभृतीनां कष्टानुष्ठायिनामपि अल्पफलत्वाभिधानात्, उक्तं हि-

"जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं।
तं नाणी तिहिं गुत्तो खवेइ ऊसासमेत्तेणं॥"

यदपि दर्शनसत्तायां चारित्ररहितस्यापि 'सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति' इत्यागमेन मुक्तिप्रतिपादनं, तदपि ज्ञानप्राधान्यख्यापनपरं, दर्शनरहितस्य हि द्वादशाङ्गमप्यज्ञानमेवेति न तत्र कष्टक्रियासम्भवेऽपि मुक्तिः, दर्शनोत्पत्तौ तु क्रियां विनाऽपि मरुदेव्यादीनामिव सम्यग्ज्ञानमात्रादेव मुक्त्यवाप्तिरित्यर्थप्रतिपादकत्वादस्य, अत एव बहुश्रुतपूजाध्ययने बहुश्रुतस्यैव तथा तथा पूज्यताभिधानं, तथा च प्रयोगः-यद् येन विना न भवति तत् तन्निबन्धनमेव, यथा बीजाद्यविनाभावी तन्निबन्धन एवांकुरः, ज्ञानाविनाभाविनी च मुक्त्यवाप्तिः, 'इति'त्येवं यः 'उपदेशः' सर्वस्य ज्ञाननिबन्धन्त्वाभिधानरूपः, स किमित्याह-'नय' इति प्रस्तावात् ज्ञाननयः, नामेति वाक्यालङ्कारे, उक्तं हि-'इति जो'त्ति एवमिह जो उवएसो जाणणाणतो सो त्ति। अयं च ज्ञानदर्शनचारित्रतपपउपचारात्मनि पञ्चविधे विनये ज्ञानदर्शनविनयावेवेच्छति, चारित्रतपउपचारविनयांस्तु तत्कार्यत्वात् तदायत्तत्वाच्च गुणभूतानेवेति गाथार्थः।

क्रियानयस्त्वाह-

"सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामेत्ता।
तं सव्वयविसुद्धं जं चरणगुणट्ठिओ साहू॥"

'सर्वेषामपी'ति नैगमादिनयोत्तरोत्तरभेदानामविशुद्धानां विशुद्धानां च, किं पुनर्मूलनयानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशुद्धानामेवेत्यपिशब्दार्थः, 'नयानाम्' उक्तरूपाणां बहवो विधाः-प्रकारा यस्यां सा बहुविधा तां, 'वक्तव्यतां' सामान्यमेव विशेषा एव उभयनिरपेक्षं चो(वो)भयं, यदिवा द्रव्यं पर्यायाः प्रकृतिः पुरुषो विज्ञानं शून्यमित्यादिस्वस्वाभिप्रायानुरूपार्थप्रतिपादनपरां निशम्य-आकर्ण्य, किमित्याह-'तदि'ति वक्ष्यमाणं सर्वे निरवशेषास्ते च ते नयाश्च सर्वनयास्तेषां, विशुद्धं-निर्दोषतया सम्मतं, यत् किमित्याह-चर्यत इति चरणं-चारित्रं, गुणः साधनमुपकारकमित्यनर्थान्तरं, ततश्चरणं चासौ गुणश्च निर्वाणात्यन्तोपकारितया चरणगुणस्तस्मिन् स्थितः-तदासेवितया निविष्टः, 'साधु'रिति साधयति पौरुषेयीभिः क्रियाभिरपवर्गमित्यन्वर्थनामतयोच्य ते, अस्यायमाशयः-बहुविधायामपि वक्तव्यतायां क्रियात एव फलप्राप्तिः, तथाहि-तृप्त्यर्थी जलादिकमवलोकयन्नपि न यावत् पानादिक्रियायां प्रवृत्तस्तावत्तृप्तिलक्षणफलमवाप्नोति, अत एव सम्यग्ज्ञानमपि तदुपयोगितयैव विचार्यते, तथा च तद्विचारप्रवृत्तैरुक्तम्-"न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियानां विसंवाद्यत" इति, आगमोऽप्येवमेवावस्थितः, यतस्तत्रापि क्रियाविकलं विफलमेव ज्ञानम्, उक्तं हि-

"जहा खरो चंदनभारवाही, भारस्स भागी न हु चंदनस्स।
एवं खु नाणी चरणेन हीनो, नाणस्स भागी न हु सुग्गई॥"

यदि च ज्ञानमेव मुक्तिसाधनं ज्ञानाविनाभाव्यनुत्तरदर्शनसम्पत्समन्वितानां दशार्हसिंहादीनामपी स्यात्, अथ चाधोगतिगामिन एवैते श्रूयन्ते, यत आह-

"दसारसीहस्स य सेणियस्स, पेढालपुत्तस्स य सच्चइस्स।
अनुत्तरा दंसणसंपया तया, विना चरित्तेणऽहरं गइं गया॥"

किञ्च-यदि ज्ञानमेव मुक्तिकारणमिष्यते, तदा यदुच्यते, 'विहरति मुहूर्तकालं, देशोनां पूर्वकोटिंच' इत्येतदपि विरुध्येत, ज्ञानेषु निखिलवस्तुविस्तरपरिच्छेदकरूपतां बिभ्रत केवलज्ञानमेवोत्तममिति तत्समनन्तरमेव मुक्त्यवाप्तौ कथं विहरणसम्भवः ?, अतः सत्यपि ज्ञाने शैलेश्यवस्थाऽवाप्तौ सर्वसंवररूपक्रियाऽनन्तरमेव मुक्त्यवाप्तिरिति क्रियाया एव मुक्तिकारणत्वं, प्रयोगश्चात्र-यद् यत्समनन्तरभावि तत् तत्कारणं, यथा पृथिव्यादिसामग्यनन्तरभावी पृथिव्यादिकारणोऽङ्कुरः, क्रियाऽनन्तरभाविनी च मुक्तिरिति, अयं च पञ्चविधेऽपि विनये चारित्रतपउपचारविनयानेवेच्छति, ज्ञानदर्शानविनयौ तु तत्कारणत्वाद् गुणभूतावेवेति।

आह-एवं सति किं ज्ञान तत्त्वमस्तु, आहोस्वित् क्रिया ?, उच्यते, परस्परव्यपेक्षमुभयमिदं मुक्तिकारणं, निरपेक्षं तं न कारणमिति तत्त्वम्, एतदर्थाभिधायिका चेयमेव गाथा 'सव्वेसिंपि नयाणं' इत्यादि, इह च गुणशब्देन ज्ञानमुच्यते, 'बहुविधवक्तव्यात्म्' उक्तरूपां नामादीनां कः कं साधुमिच्छतीत्येवंरूपां वा, निशम्य-श्रुत्वा 'तत् सर्वनयविशुद्धं' तत् सर्वनयसम्मतं यच्चरणगुणस्थितः, साधुरिति, अयमभिप्रायः-यत्तावद् ज्ञानवादिनोक्तम्-यद् येन विना न भवति तत्तन्निबन्धनमेव, यथा बीजाद्याविनाभावि तन्निबन्धन एवांकुरः, ज्ञानाविनाभाविनी च मुक्तिरिति, अत्राविनाभावित्यमनेकान्तितको हेतुः, तथाहि-यथाऽनेन ज्ञाननिबन्धनत्वं मुक्तेः साध्यते, तथा क्रियानिबन्धनत्वमपि, यथा हि ज्ञानं विना नास्ति मुक्तिरिति ज्ञानविनाभाविनी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं क्रियामपि विना नासौ भवतीति तदविनाभावित्वमपि समानमेवेति कथं नोभयनिबन्धनत्वसिद्धिः ?, तथा चाह-

"नाणं सविसयनिययं न नाणमित्तेण कज्जनिप्फत्ती।
मग्गन्नू दिट्ठंतो होइ सचिट्ठो अचिट्ठो य॥"
जाणंतोऽवि य तरिउं काइयजोगं न जुंजइ जो उ।
सो बुज्झइ सोएणं एवं नाणी चरणहीनो॥"

न च मरुदेव्यादीनामपि सर्वसंवररूपा क्रिया नास्ति, एवं क्रियावादिनाऽपि-'यद् यत्समनन्तरभावि तत् तत्कारणं, यथा पृथिव्यादिसामग्रयनन्तरजन्मा तत्कारणोऽंकुरः, तथा च क्रियानन्तरभाविनी मुक्तिरिति यो हेतुरुपन्यस्तः सोऽप्यनेकान्तिकः, यतः स एवं वाच्यः-यदा शैलेश्यवस्थायां सर्वसंवररूपा क्रिया यदनन्तरं मुक्त्यवाप्तिस्तदा ज्ञानमस्ति वा न वेति ?, नास्ति चेच्छैलेश्यवस्थाऽपि कथम्, न हीयं केवलज्ञानं विनाऽवाप्यते, अथास्त्येव तदा सकलभावस्वभावावभासि केवलज्ञानम्, एवं च सति कथमुभयाविनाभावित्वेऽपि नोभयफलत्वं मुक्तेः, उक्तं च-"सहचारित्तेऽवि कहं कारणमेगं न उण एगं" आह-एवं ज्ञानक्रिययोः प्रत्येकं मुक्तेरवापिका शक्तिरसती कथं समुदायेऽपि भवति ?, न हि यद् येषु प्रत्येकं नास्ति तत्तेषां समुदायेऽपि भवति, तथा प्रत्येकमसत् समुदितास्वपि सिकतासु तैलं, प्रत्येकमसती च ज्ञानक्रिययोः मुक्तेरवापिका शक्तिः, तदुक्तम्-

'पत्तेयमभावाओ निव्वाणं समुदियासुवि न सुत्तं।
नानकिरियासु वुत्तुं सिकयासमुदाय तिल्लं व॥"

उच्यते, स्यादेवं यदि सर्वथा प्रत्येकं तयोर्मुक्त्यनुपकारितोच्येत, यदा तु तयोः प्रत्येकं देशोपकारिता समुदाये तु सम्पूर्णहेतुतोच्यते तदा न कश्चिदोषः, आह च-

"वीसु न सव्वहु च्चिय सिकयातिल्लं व साहणाभावो।
देसोवकारिया जा सा समवायंमि संपुण्णा॥"

अतः स्थितमेतत्-ज्ञानक्रिये समुदिते एव मुक्तिकारणु न तु प्रत्येकमिति तत्त्वं, तथा च पूज्याः-

"नाणाहीनं सव्वं नाणनओ भणति किं च किरियाए ?।
किरियाए चरणनओ तदुभयगाहो य सम्मत्तं॥"
क्वचित् सौत्र्या शैल्या क्वचिदधिकृतप्राकृतभुवा
क्वचिच्चार्थापत्त्या क्वचिदपि समारोपविधिना।
क्वचिच्चाध्याहारात् क्वचिदविकलप्रक्रमबलादियं
व्याख्या ज्ञेया क्वचिदपि तथाऽऽम्नायवशतः॥१॥

अध्ययनं १ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे प्रथम अध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्ति एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययन -२ परीषह विभक्तिः

वृ.॥ श्रीजिनाय नमः । नमः सर्वविदे । व्याख्यातं विनयश्रुताख्यं प्रथमअध्ययनम्, इदानीं द्वितीयं व्याख्यायते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने विनयः सप्रपञ्चः पञ्चप्रकारः उक्तः, स च किं स्वस्थावस्थैरेव समाचरितव्य उत परीषहमहासैन्यसमरसमाकुलितमनोभि-रपि?, उभयावस्थैरपीति ब्रूमः । ननु तर्हि केऽमी परीषहाः?, किंरूपाः?, किञ्चालम्बनमुररी-कृत्यैतेषु सत्स्वपि न विनयविलङ्घनमित्याशङ्कापोहाय परिषहास्तत्स्वरूपादि चाभिधेयमित्यनेन सम्बन्धेनायातस्यास्य महार्थस्य महापुरस्येव चतुरनुयोगद्वारस्वरूपमुपवर्णनीयं, तत्र च नाम-निष्पन्ननिक्षेपस्य परीषह इति नाम, अतस्तन्निक्षेपदर्शनायाह भगवान्निर्युक्तिकारः-

नि. [६५] नासो परीसहाणं चउव्विहो दुव्विहो य(उ) दव्वंमि ।
आगमनोआगमतो नोआगमओ य सो तिविहो ॥

वृ. नियतं निश्चितं वाऽऽसनं-नामादिरचनात्मकं क्षेपणं न्यासो-निक्षेप इत्यर्थः, अयं च केषामित्याह-परीति-समन्तात् स्वहेतुभिरुदीरिता मार्गाच्यवननिर्ज्जरार्थं साध्वादिभिः, सह्यन्त इति परीषहास्तेषां, चत्वारो विधाः-प्रकारा अस्येति चतुर्विधो, नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे इत्यनादृत्य द्रव्यपरीषहमाह- 'द्विविधो' द्विभेदः, तुः पूरणे, भवति 'द्रव्य' इति द्रव्यविषयः, प्रक्रमात्परिषहः, स च 'आगमनोआगमतो'त्ति आगमतो नोआगमतश्च, तत्र आगमतो ज्ञाता तत्र चानुपयुक्त इत्यागमस्वरूपमतिपरिचितमिति परिहृत्य नोआगमत आह-'नोआगमतस्तु' नोआगमं पुनराश्रित्य 'स' इति परीषहः 'त्रिविधः' त्रिप्रकार इति गाथार्थः ॥

नि.[६६] जाणगसरीर भविए तव्वइरित्ते य से भवे दुविहे ।
कम्मे नोकम्मे या कम्मंमि य अनुदओ भणिओ ॥

वृ. 'जाणगसरीर'त्ति ज्ञायको ज्ञो वा तस्य शरीरं ज्ञायकशरीरं ज्ञशरीरं वा जीवरहितं सिद्धशिलातलगतं निषीधिकागतं वा अहो ! अमुना शरीरसमुच्छ्रयेणोपात्तेन परीषह इति पदं शिक्षितम्, अयं घृतघटोऽभूदितिवत्संभाव्यमानं, तथा 'भविय'त्ति शरीरशब्दस्य काकाक्षिगोल-कन्यायेनोभयत्र सम्बन्धात् भव्यशरीरं, तत्र भविष्यति-तेन तेनावस्थात्मना सत्तां प्राप्स्यति यः स भव्यो जीवस्तस्य शरीरं यदद्यापि परीषह इति पदं न शिक्षते एष्यति तु शिक्षिष्यते तदयं घृतघटो भविष्यतीतिवत्संभाव्यमानं नोआगमतो द्रव्यपरीषहः, 'तव्वतिरित्ते य'त्ति ताभ्यां-ज्ञशरीरभव्यशरीराभ्यां व्यतिरिक्तः-पृथग्भूतः तद्व्यतिरिक्तः, स च प्रकृतत्वाद् द्रव्यपरीषहो भवेत्, 'द्विविधः' द्विभेदः, कथमित्याह-क्रियते-मिथ्यात्वाविरतिकषाययोगानुगतेनात्मना निर्वर्त्त्यत इति कर्म तत्र-ज्ञानावरणादिरूपे, 'नोकर्मणि च' तद्विपरितरूपे, चः समुच्चये, दीर्घत्वं च 'ह्रस्वदीर्घौ मिथ' इति प्राकृतलक्षणात्, तत्राद्यमाह-कर्मणि विचार्ये, चः पूरणे, द्रव्यपरीषहः 'अनुदयः' उदयाभावः, प्रक्रमात् परीषहवेदनीयकर्मणामेव, 'भणितः' उक्त इति गाथार्थः ॥

नि.[६७] नोकम्मंमि य तिविहो सच्चित्ताचित्तमीसओ चेव ।
भावे कम्मस्सुदओ तस्स उ दारानिमे हुंति ॥

वृ. नोकर्मणि पुनर्विचार्येः चस्य पुनरर्थत्वाद्रव्यपरीषहः 'त्रिविधः' त्रिभेदः, 'सचित्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्तमीसओ'त्ति लुप्तनिर्द्दिष्टत्वाद्विभक्तेः सचित्तोऽचित्तो मिश्रक इति, समाहारो वा सचित्ताचित्त-मिश्रकमिति, प्राकृतत्वाच्च पुंल्लिङ्गता; चः स्वगतानेकभेदसमुच्चये, एवोऽवधारणे इयन्त एवामी भेदाः, तत्र नोकर्मणि सचित्तद्रव्यपरीषहो गिरिनिर्झ्झरजलादिः अचित्तद्रव्यपरीषहश्चित्रक-चूर्णादिर्मिश्रद्रव्यपरीषहो गुडार्द्रकादि, त्रयस्यापि कर्माभावरूपत्वात् क्षुत्परीषहजनकत्वाच्च, इत्थं पिपासादिजनकं लवणजलाद्यप्यनेकधा नोकर्म्मद्रव्यपरीषह इति स्वधिया भावनीयं, भावपरीषह आगमतो ज्ञाता तत्र चोपयुक्तो, नोआगमतस्तु नोशब्दस्यैकदेशवाचित्वे आगमैक-देशभूतमिदमेवाध्ययनं, निषेधवाचित्वे तु तदभावरूपः परीषहवेदनीयस्य कर्म्मण उदयः, तथा चाह-'भावे कम्मस्स उदओ'त्ति कर्म्मणइति परीषहवेदनीयकर्म्मणां बहुत्वेऽपि जात्यपेक्ष-यैकवचननिर्देशः 'तस्य च' भावपरीषहस्य 'द्वाराणि' व्याख्यानमुखानि 'इमानि' अनन्तरव-क्ष्यमाणानि भवन्तीति गाथार्थः ॥ तान्येवाह-

नि.[६८] कत्तो कस्स व दव्वे समोआर अहिसास नए य वत्तणा कालो ।
खित्तुद्देसे पुच्छा निद्देसे सुत्तफासे य ॥

वृ. 'कुत' इति कुतोऽङ्गादेरिदमुद्धृतं १, 'कस्य' इति कस्य संयतादेरमी परीषहाः २, 'द्रव्यम्' इति किममीषामुत्पादकं द्रव्यं ३, 'समवतर' इति क्व कर्मप्रकृतौ पुरुषविशेषे वाऽमीषां स-म्भवः ?, ४, 'अध्यास' इति कथममीषामध्यासना सहनात्मिका ? ५, 'नय' इति को नयः कं परिषहमिच्छति ?, ६ चः समुच्चये, 'वर्त्तना' इति कति क्षुदादयः एककैस्मिन् स्वामिनि वर्त्तन्ते ७, 'काल' इति कियन्तं कालं यावत् परीषहास्तित्वं ८, 'खेत्ते'त्ति कतरस्मिन्कियति वा क्षेत्रे ९, 'उद्देशो' गुरोः सामान्याभिधायि वचनं १०, 'पृच्छा' तज्जिज्ञासोः शिष्यस्य प्रश्नः ११, 'निर्देशः' गुरुणा पृष्टार्थविशेषभाषणं १२, 'सूत्रस्पर्शः'सूत्रसूचितार्थवचनं १३, 'चः' समुच्चये, इति गाथासमासार्थः ॥ तत्र कुत इति प्रश्नप्रतिवचनमाह-

नि.[६९] कम्मप्पवायपुव्वे सत्तरसे पाहुडंमि जं सुत्तं ।
सणयं सोदाहरणं तं चेव इहंपि नायव्वं ॥

वृ. कर्म्मणः प्रवादः-प्रकर्षेण प्रतिपादनमस्मिन्निति कर्मप्रवादं तच्च तत् पूर्वं च तस्मिन्, तत्र बहूनि प्राभृतानीति कतिथे प्राभृते इत्याह-सप्तदेशे प्राभृते-प्रतिनियतार्थाधिकाराभिधायिनि, यत् 'सूत्रं' गणधरप्रणीतश्रुतरूपं 'सनयं' नैगमादिनयान्वितं, 'सोदाहरणं' सदृष्टान्तं, 'तं चेव'त्ति चः पूरणे एवोऽवधारणे, ततस्तदेव 'इहापि' परीषहाध्ययने 'ज्ञातत्वम्' अवगन्तव्यं, न त्वधिकं, किमुक्तं भवति ? निरवशेषं तत एवेदमुद्धृत् न पुनरन्यत इति। कस्येति यदुक्तं तदुत्तरमाह-

नि.[७०] तिण्हंपि नेगममनओ परीसहो जाव उज्जुसुत्ताओ ।
तिण्हं सद्दनयाणं परीसहो संजए होइ ॥

वृ. 'त्रयाणामपि' अविरतविरताविरतानां न तु विरतस्यैव नैगमनयः 'परिषहः' क्षुदादिरिति, मन्यत इति शेषः, त्रयाणामपि परीषहवेदनीयासातादिकर्मोदयजनितस्य क्षुधादेस्तत्सहनस्य च यथायोगं सकामाकामनिर्जराहेतोः सम्भवाद्, अनेकगमत्वेन चास्य सर्वप्रकारसंग्रहाहित्वात्, 'जाव उज्जुसुत्ताउ'त्ति सोपस्कारत्वादस्यैवं यावदृजुसूत्रः, कोऽर्थः ?, संग्रहव्यहारऋजुसूत्रा अपि त्रयाणामपि परीषहं मन्यन्ते, एकैकनयस्य शतभेदत्वेनैतद्भेदानामपि केषाञ्चित् परीषहं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रति नैगमेन तुल्यमतत्वात्, 'त्रयाणां' त्रिसङ्ख्यानां, केषाम् ?-शब्दप्रधाना नयाः शब्दनयाः, शाकपार्थिवादिवत् समासः, तेषां-शब्दसमभिरूढैवम्भूतानां, मतेनेति शेषः, परीषहः 'संयते' विरते भवति 'मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहा'' इति लक्षणोपेतनिरुपचरितपरीषह-शब्दवृत्तेस्तत्रैव सम्भवादिति गाथार्थः ।। द्रव्यद्वारमधिकृत्य नयमतमाह-

नि.[७१] पढमंमि अट्ठ भंगा संगहि जीवो व अहव नोजीवो ।
ववहारे नोजीवो जीवदव्वं तु सेसाणं ।।

वृ. 'प्रथमे' प्रक्रमान्नैगमनये अष्टौ भङ्गाः, स हि 'णे'गेहिं मानेहिं मिणइत्ती नेगमस्स नेरुत्ती'' इतिलक्षणादनेकधा कारणमिच्छन् यदैकेन पुरुषादिना चपेटादिना परीषह उदीर्यते तदा परीषह-वेदनीयकर्मोदयनिमित्तत्वेऽपि तस्य तदविवक्षया जीवेनासौ परीषह उदीरित इति वक्ति १, यदा बहुभिस्तदा जीवैः २, यदा अचेतनेनैकेन दृषदादिना जीवप्रयोगरहितेन तदाऽजीवेन ३, यदा तैरेव बहुभिस्तदा अजीवैः ४, यदैकेन लुब्धकादिना बाणादिनैकेन तदा जीवेनाजीवेन च ५, यदा तेनैकेनैव बहुभिः वाणादिभिस्तदा जीवेनाजीवैश्च ६, यदा बहुभिः पुरुषादिभिरेकं शिलादिकमुत्क्षिप्य क्षिपद्भिस्तदा जीवैरजीवने च ७, यदा तु तैरेव मुद्गरादीन् बहून् मुञ्चद्भिस्तदा जीवैश्चाजीवैश्चेति ८ 'संग्रहे' संग्रहनाम्नि नये विचार्यमाणे जीवो 'वा' अथवा नोजीवो हेतुरिति प्रक्रमः, किमुक्तं भवति ?-

जीवद्रव्येणाजीवद्रव्येण वा परीषह उदीर्यते, स हि ''संगहियपिंडियत्थं संगहवयणं समासतो वेंती''ति वचनात् सामान्यग्राहित्वैनैकत्वमेवेच्छति न पुनर्द्वित्वबहुत्वे, अस्यापि च शतभेद-त्वाद्यदा चिद्रूपतया सर्वं गृह्णाति तदा जीवद्रव्येण, यदा त्वचिद्रूपतया तदा अजीवद्रव्येण, 'व्यवहारे' व्यवहारनये 'नोजीव' इति अजीवो हेतुः, कोऽर्थः ?, अजीवद्रव्येण परीषह उदीर्यत इत्येकमेव भङ्गमयमिच्छति, तथाहि-'वच्चइ विणिच्छियत्थं ववहारो सव्वदव्वेसुं'' इति तल्लक्षणं, तत्र च 'विनिश्चितं'मित्येनकरूपत्वेऽपि वस्तुनः सांव्यवहारिकजनप्रतीतमेव रूपमुच्यते, तद्ग्राहकोऽयम्, उक्तं च-

''भमराइ पंचवण्णाइं निच्छिए जम्मि वा जनवयस्स ।
अत्थे विनिच्छओ जो विनिच्छयत्थुत्ति सो गेज्झो ।।१।।
बहुयरउत्ति व तं चिय गमेइ संतेऽवि सेसए मुयइ ।
संववहारपरतया ववहारो लोगमिच्छंतो ।।२।।''त्ति,

(ततोऽयमाशयः-) 'कालो सभाव नियई पुव्वकयं पुरिसकारणेगंता ।
मिच्छत्तं ते चेव उ समासओ होंति सम्मत्तं ।।''

इत्यागमवचनतः सर्वस्यानेककारणत्वेऽपि कर्म्मकृतं लोकवैचित्र्यमिति प्रायः प्रसिद्धेर्यत् कर्म कारयिष्यति तत्करिष्याम इत्युक्तेश्च कर्मैव कारणमित्याह, तच्चाचेतनत्वेनाजीव एवेति।

'जीवदव्वं'तुशब्दस्यैवकारार्थत्वात् जीवद्रव्यमेव 'शेषणाम्' ऋजुसूत्रशब्दसमभिरूढैव-म्भूतानां पर्यायनयानां मतेन, हेतुरिति गम्यते, अयमर्थः-जीवद्रव्येण परीषह उदीर्यत इत्येष एवैषां भङ्गोऽभिमतः, ते हि पर्यायास्तिकत्वेन परीषह्यमाणमेव परीषहमिच्छन्ति, परीषहणं चोपयोगात्मकम्, उपयोगस्य च जीवस्वाभाव्यात् जीवद्रव्यमेव सन्निहितमव्यभिचारि च कारणं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्विपरीतं तु अजीवद्रव्यं दण्डादीत्यकारणं, जीवद्रव्यमिति तु द्रव्यग्रहणं पर्यायनयस्यापि गुणसंहतिरूपस्य द्रव्यस्येष्टत्वात्, तदुक्तम्-"पर्यायनयोऽपि द्रव्यमिच्छति गुणसन्तानरूप"-मिति गाथार्थः ॥ सम्प्रति समवतारद्वारमाह-

नि.[७२]　　समोयारो खलु दुविहो पयडिपुरिसेसु चेव नायव्वो ।
एएसिं नाणत्तं वुच्छामि अहानुपुव्वीए ॥

वृ. 'समवतारः खलु द्विविधः' इति खलुशब्दस्यैवकारार्थत्वात् द्विविध एव, द्वैविध्यं च विषयभेदत इति तमाह-प्रकृतयश्च पुरुषाश्च प्रकृतिपुरुषास्तेषु, कोऽर्थः ?-प्रकृतिषु ज्ञानावरणादिरूपासु पुरुषेषु, चशब्दात् स्त्रीपण्डकेषु च, तत्तद्गुणस्थानविशेषवर्तिषु 'एवे'ति पूरणे, 'ज्ञातव्यः' अवबोद्धव्यः, 'एतेषां' प्रकृत्यादीनां 'नानात्वं' भेदं वक्ष्ये 'अथ' अनन्तरम् 'आनुपूर्व्या' क्रमेणेति गाथार्थः ॥ तत्र प्रकृतिनानात्वमाह-

नि.[७३]　　नाणावरणे वेए मोहंमिय अंतराइए चेव ।
एएसुं बावीसं परीसहा हुंति नायव्वा ॥

वृ. ज्ञानावरणे वेद्ये मोहे चान्तरायिके चैव एतेषु चर्तुर्षु कर्मसु वक्ष्यमाणस्वरूपेषु द्वाविंशतिः परीषहा भवन्ति । अनेन प्रकृतिभेद उक्तः, सम्प्रति यस्य यत्रावतारस्तमाह-

नि.[७४]　　पन्नान्नाणपरिसहा नाणावरणंमि हुंति दुन्नेए ।
इक्को य अंतराए अलाहपरीसहो होइ ॥

वृ. प्रज्ञा चाज्ञानं च प्रज्ञाज्ञाने ते एवोत्सेकवैक्लव्याकरणतः परीषह्यमाणे परीषहौ, 'ज्ञानावरणे' कर्मणि भवतो 'द्वौ' एतौ, तदुदयक्षयोपशमाभ्यामनयोः सद्भावाद्, एकश्च 'अन्तराये' अन्तरायकर्मण्यलाभपरीषहो भवति, तदुदयनिबन्धनत्वादलाभस्येति गाथार्थः ।

मोहनीयं द्विधेति यत्र तद्भेदे वेदनीये च यत्परिषहावतारस्तमाह-

नि.[७५]　　अरई अचेल इत्थी निसीहिया जायणा य अक्कोसे ।
सक्कारपुरक्कारे चरित्तमोहंमि सत्तेए ॥

नि.[७६]　　अरईइ दुगुंछाए पुंवेय भयस्स चेव मानस्स ।
कोहस्स य लोहस्स य उदएण परीसहा सत्त ॥

नि.[७७]　　दंसणमोहे दंसणपरीसहो नियमसो भवे इक्को ।
सेसा परीसहा खलु इक्कारस वेयणीज्जंमि ॥

वृ. 'अरतिः' इति अरतिपरीषहः, एवमुत्तरेष्वपि परीषहशब्दः सम्बन्धनीयः, 'अचेल'त्ति प्राकृतत्वाद्बिन्दुलोपः, अचेलं, 'स्त्री नैषेधिकी याचना चाक्रोशः सत्कारपुरस्कारः' सप्तैते वक्ष्यमाणरूपाः परीषहाः, 'चरित्रमोहे' चरित्रमोहनाम्नि मोहनीयभेदे, भवन्तीति गम्यते, तदुदयभावित्यादेषां ॥ चारित्रमोहनीयस्यापि बहुभेदत्वाद्यस्य तद्भेदस्योदयेन यत्परीषहसद्भावस्तमाह-'अरतेः' अरतिनाम्नश्चारित्रमोहनीयभेदस्य, अचेलस्य जुगुप्सायाः, 'पुंवेय'त्ति सुपोलोपात् पुंवेदस्य, भयस्य चैवं मानस्य क्रोधस्य लोभस्य च उदयेन परीषहाः सप्त, इह चारत्युदयेनारतिपरीषहः जुगुप्सोदयेनाचेलपरीषह इत्यादि यथाक्रमं योजना कार्येति, तथा दर्शनमोहे 'दर्शनपरीषहः' वक्ष्यमाणरूपो, 'नियमसो'त्ति आर्षत्वेन नियमात् भवेद् 'एकः' अद्वितीयः,

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

'शेषाः' एतदुद्धरिताः, परीषहाः पुनः एकादश 'वेदनीय' वेदनीयनाम्नि कर्मणि संभवन्तीत्ति गाथात्रयार्थः ॥ के पुनस्ते एकादशेत्याह-

नि.[७८] पंचेव आनुपुव्वी चरिया सिज्जा वहे व(य) रोगे य ।
तणफासजल्लमेव य इक्कारस वेयणीज्जंमि ॥

वृ. 'पञ्चैव' पञ्चसंख्या एव, ते च प्रकारान्तरेणापि स्युरित्याह-'आनुपूर्व्या' परिपाट्य, क्षुत्पिपासाशीतोष्णदंशमशकाख्या इति भावः, चर्य्या शय्या वधश्च रोगश्च तृणस्पर्शो जल्ल एव च इत्यमी एकादश वेदनीयकर्मण्युदयवति परीषहा भवन्तीति शेष इति गाथार्थः ॥

सम्प्रति पुरुषसमवतारमाह-

नि.[७९] बावीसं बायरसंपराए चउदस य सुहुमरागंमि ।
छउमत्थवीयराए चउदस इक्कारस जिनंमि ॥

वृ. 'द्वाविंशतिः' द्वाविंशतिसंङ्ख्याः प्रक्रमात्परीषहाः 'बादरसंपराये' बादरसम्परायनाम्नि गुणस्थाने, किमुक्तं भवति ?, बादरसम्परायं यावत्सर्वेऽपि परीषहाः सम्वन्ति, 'चतुर्दश' चतुर्दशसङ्ख्याः, चः पूरणे, 'सूक्ष्मसंपराये' सूक्ष्मसम्परायनाम्नि गुणस्थाने, 'सप्तानां' चारित्रमोहनीयप्रतिबद्धानां दर्शनमोहनीयप्रतिबद्धस्य चैकस्य तत्रासम्भवादिति भावः, 'छद्मस्थवीतरागे' छद्मस्थवीतरागनाम्नि गुणस्थाने, 'चतुर्दश' उक्तरूपा एव, 'एकादश' एकादशसङ्ख्याः 'जिने' केवलिनि, वेदनीयप्रतिबद्धानां क्षुदादीनामेव तत्र भावादिति गाथार्थः ॥

नि.[८०] एसणमनेसणीज्जं तिण्हं अग्गहणऽभोयण नयाणं ।
अहिआसण बोद्धव्वा फासुय सद्दुज्जुसुत्ताणं ॥

वृ. एष्यत इत्येषणम्-एषणाशुद्धं, अनेषणीयं-तद्विपरीतं, सोपस्कारत्वाद्यदन्नादि तस्य, यद्वा 'सुपां संपो भवन्ती'ति न्यायादेषणीयस्य अनेषणीयस्य च, 'अग्गहणऽभोयण'त्ति अग्रहणम्-अनुपादानं, कथञ्चिद् ग्रहणे वा अभोजनम्-अपरिभोगात्मकं 'त्रयाणाम्' अर्थान्नैगमसंग्रहव्यवहाराणां नयानां मतेनाध्यासना बोद्धव्येति सम्बन्धः, अभीहि स्थूलदर्शिनः बुभुक्षादिसहनमन्नादिपरिहारात्मकमेवेच्छन्ति, 'फासुग सद्दुज्जुसुत्ताणं'ति शब्दनयानां त्रयाणामृजुसूत्रस्य च मतेन प्रासुकमन्नादि उपलक्षणत्वात् कल्प्यं च गृह्णतो भुञ्जानस्याप्यध्यासनेति प्रक्रमः; ते हि भावप्रधानतया भावाध्यासनामेव मन्यन्ते, सा च नाभुञ्जानस्यैव, किन्तु शास्त्रानुसारिप्रवृत्त्या समतावस्थितस्य प्रासुकमेषणीयं च धर्म्मधूर्वहनार्थं भुञ्जनस्यापीति गाथार्थः। सम्प्रति नयद्वारमाह-

नि.[८१] जं पप्पं नेगमनओ परीसहो वेयणा य दुण्हं तं ।
वेयण पडुच्च जीवे उज्जुसुओ सद्दस्स पुण आया ॥

वृ. 'यद्'वस्तुगिरिनिर्झरजलादि'प्राप्य आसाद्य क्षुदादिपरीषहा उत्पद्यन्ते नैगमो-नैगमनयो यत्तदोर्नित्याभिसम्बन्धात् तत्परीषह इति वक्तीति शेषः, स ह्येवं मन्यते-यदि तत् क्षुदाद्युत्पादकं वस्तु न भवेत्तदा क्षुदादय एव न स्युः, तदभावाश्च किं केन सह्यत इति परीषहाभाव एव स्यात्, ततस्तद्भावभावित्यात् परीषहस्य तत् प्रधानमिति तदेव परीषहः, प्रस्थकोत्पादककाष्ठप्रस्थकवत्, आह-नैकगमत्वान्नैगमस्य कथमेकरूपतैव परीषहाणामिहोक्ता ?, उच्यते, शतशाखत्वादस्य न सर्वभेदाभिधानं शक्यमिति कश्चिदेव क्वचिदुच्यते, एवं शेषनेष्वपि यथोक्ताशङ्कायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यमिति। 'वेदना' क्षुदादिजनिता असातवेदना, चशब्दात्तदुत्पादकं च परीषहः, 'द्वयोस्तु' पारिशेषयात् संग्रहव्यवहारयोः पुनर्मतेनेति गम्यते, अयं चानयोरभिप्रायः-यदि तावद्गिरिनिर्झरजलादि क्षुदादिवेदनाजनकत्वेन परीषहः, कथमिव क्षुदादिवेदना न परीषहो, निरुपचरितं परीषह्यत इति परीषहलक्षणं वेदनाया एव सम्भवति, उपचरितं तु गिरिनिर्झरजलादौ, तात्त्विकवस्तुनिबन्धन-श्चोपचार इति तदभावे तस्याप्यभाव एव स्यात्, 'वेदनां' क्षुदाद्यनुभवात्मिकां 'प्रतीत्य' आश्रित्य जीवे परीषह इति ऋजुसूत्रः मन्यत इतीहापि गम्यते, अयमस्याशयः-सति हि निरुपचरितलक्षणान्वितेऽपि परीषहे स एव परीषहोऽस्तु, किमुपचरितकल्पनया ?, ततो निरुपचरितलक्षणयोगाद्वेदनैव परीषहः, सा च जीवधर्मत्वाज्जीवे नाजीव इति वेदनां प्रतीत्य जीवे परीषह उच्यते, न तु पूर्वेषामिवाजीवेऽपीति, 'शब्दस्ये'ति शब्दाख्यनयस्य साम्प्रतसमभिरूढैवम्भूत-भेदतस्त्रिरूपस्य मतेनात्मा-जीवः, परीषह इति प्रक्रमः, पुनः-शब्दो विशेषं द्योतयति, विशेषश्च परीषहोपयुक्तत्वम्, अयं ह्युपयोगप्रधानः, उपयोगश्चात्मन एवेति परीषहोपयुक्त आत्मैव परीषह इति मन्यते इति गाथार्थः ॥ इदानीं वर्त्तनाद्वारमाह-

नि.[८२] वीसं उक्कोसपए वट्टंति जहन्नओ हवइ एगो।
सीउसिण चरियं निसीहिया य जुगवं न वट्टंति ॥

वृ. विंशतिः उत्कृष्टपदे चिन्त्यमाने परीषहाः वर्त्तन्ते, युगपदेकत्र प्राणिनीति गम्यते 'जघन्यतः' जघन्यपदमाश्रित्य भवेदेकः परीषहः, ननूत्कृष्टपदे द्वाविंशतिरपि किं नैकत्र वर्त्तन्त इत्याह-'सीउसिण'त्ति शीतोष्णे चर्यानैषेधिक्यौ च 'युगपद्' एककालं 'न वर्त्तते' न भवतः, परस्परं परिहारस्थितिलक्षणत्वादमीषां, तथाहि-न शीतमुष्णे न चोष्णं शीते न चर्यायां नैषेधिकी नैषेधिक्यां वा चर्येत्यतो यौगपद्येनामीषाकत्रासम्भवान्नोत्कृष्टतोऽपि द्वाविंशतिरिति, आह-नैषैधिकीवत्कथं शय्याऽपि न चर्यया विरुध्यते ?, उच्यते, निरोधबाधादितस्त्वङ्गनिकादेरपि तत्र सम्भवान्नैषेधिकी तु स्वाध्यायादीनां भूमिः, ते च प्रायः स्थिरतायामेवानुज्ञाता इति तस्या एव चर्यया विरोध इति गाथार्थः ॥ कालद्वारमाह-

नि.[८३] वासग्गसो अ तिण्हं मुहुत्तमंतं च होइ उज्जुसुए।
सद्दस्स एगसमयं परीषहो होइ नायव्वो ॥

वृ. 'वासग्गसो य'त्ति आर्षत्वाद्वर्षाग्रतः, कोऽर्थः ?-वर्षलक्षणं कालपरिमाणमाश्रित्य, परीषहो भवति इति गम्यते, चः पूरणे, 'त्रयाणां' नैगमसंग्रहव्यवहारनयानां मतेन, ते ह्यनन्तरोक्तन्यायतस्तदुत्पादकं वस्त्वपि परीषहमिच्छन्ति, तच्चैतावत्कालस्थितिकमपि सम्भवत्येवेति, 'मुहुत्तमंतं च' इति प्राकृतत्वादन्तर्मुहूर्तं पुनर्भवति, प्रक्रमात्परीषहः, ऋजुसूत्रे ऋजुश्रुते वा-विचार्यमाणे, स हि प्रागुक्तनीतितो वेदना परीषह इति वक्ति, सा चोपयोगात्मिका, उपयोगश्च 'अंतुमुहुत्ताउ परं जोगुवओगा न संती'ति वचनात् आन्तर्मुहूर्तिक एव, 'शब्दस्य' साम्प्रतादित्रिभेदस्य मतेनैकसमयं परीषहो भवति 'ज्ञातव्यः' अवबोद्धव्यः, स ह्युक्तनीतितो वेदनोपयुक्तमात्मानमेव परीषहं मनुते, स चैतस्य पर्यायात्मकतया प्रतिसमयमन्यान्य एव भवतीति समयमेवैतन्मतेन परीषहो युक्त इति गाथार्थः। 'वर्षाग्रतः त्रयाणां परीषह' इति यदुक्तं, तदेव दृष्टान्तेन दृढयितुमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[८४] कंडू अभत्तच्छंदो अच्छीणं वेयणा तहा कुच्छी।
कासं सासं च जरं अहिआसे सत्त वाससए॥

वृ. 'कंडूं' कण्डूतिम्, 'अभक्तच्छन्दं' भक्तारुचिरूपम् 'अक्ष्णोः' लोचनयोः, 'वेदनां' दुःखानुभवं, सर्वत्र द्वितीयार्थे प्रथमा, 'तथे'ति समुच्चये, 'कुच्छि'त्ति सुब्व्यत्ययात् कुक्ष्योर्वेदना-शूलादिरूपं 'काशं श्वासं च ज्वरं' त्रयमपि प्रतीतमेव 'अध्यास्त' इति अधिसहते, सप्त वर्षशतानि यावत्।

अनेन तु सनत्कुमारचक्रवर्त्युदाहरणं सूचितं, स हि महात्मा सनत्कुमारचक्रवर्त्ती शक्र-प्रशंसाऽसहनसमायातामरद्वयनिवेदितशरीरविकृतिरुत्पन्नवैराग्यवासनः पटप्रान्तावलग्नतृण-वदखिलमपि राज्यमपहायाभ्युपगतदीक्षः प्रतिक्षणमभिनवाभिनवप्रवर्द्धमानसंवेगो मधुकर-वृत्त्यैव यथोपलब्धान्नपानोपरचितप्राणवृत्तिरनन्तरोक्तसप्तोद्दण्डकण्ड्वदिवेदनाविधुरित-शरीरोऽपि संयमात्र मनागपि सञ्चचाल, पुनस्तत्सत्त्वपरीक्षणायातभिषग्वेषामरोपदर्शित-द्वादशांशुमालिसमांगुल्यवयवश्च तत्पुरतः 'पुव्वि'कडाणं कम्माणं वेइत्ता' इत्यादि संवेगोत्पाद-कमागमवचः प्ररूपयन् स्वयमागत्य शक्रेणाभिवन्दित उपबृंहितश्चेति गाथार्थः॥ सम्प्रति क्व परीषह इति क्षेत्रविषयप्रश्नप्रतिवचनमाह-

नि.[८५] लोए संथारंमि य परीषहा जाव उज्जुसुत्ताओ।
तिण्हं सद्दनयाणं परीसहा होइ अत्ताणे॥

वृ. लोके संस्तारके च परीषहः 'जाव उज्जुसुत्ताउ'त्ति सूत्रत्वात् ऋजुसूत्रं यावद्, अस्य च पूर्वार्द्धस्य सूचकत्वादविशुद्धनैगमस्य मतेन लोके परीषहाः, तत्सहिष्णुयतिनिवासभूतक्षेत्रस्यापि चतुर्द्दशरज्ज्वात्मकलोकानर्थान्तरत्वात्, इत्थमपि च व्यवहारदर्शनाद्, एवमुत्तरोत्तरादिविशुद्ध-विशुद्धतरतद्भेदापेक्षया तिर्यग्लोकजम्बूद्वीपभरतदक्षिणार्द्धपाटलीपुत्रोपाश्रयादिषु भावनीयं, यावदत्यन्तविशुद्धतमनैगमस्य यत्रोपाश्रयैकदेशे अमीषां सोढा यतिस्तत्रामी इति, एवं व्यवहार-स्यापि, लोकव्यवहारपरत्वादस्य, लोके च नेह वसति प्रोषित इति व्यवहारदर्शनात्, संग्रहस्य संस्तारके परीषहाः, स हि संगृह्णातीति संग्रह इति निरुक्तिवशात् संग्रहोपलक्षितमेवाधारं मन्यते, संस्तारक एव च यतिशरीरप्रदेशैः संगृह्यते न पुनरुपाश्रयैकदेशादिरिति संस्तारक एवास्य परीषहाः, ऋजुसूत्रस्य तु येष्वाकाशप्रदेशेष्वात्माऽवगाढस्तेष्वेव परीषहाः, संस्तारकादिप्रदेशानां तदणुभिरेव व्याप्तत्वात्, तत्रावस्थानाभावात्, त्रयाणां शब्दनयानां परीषहो भवति आत्मनि, स्वात्मनि व्यवस्थितत्वात्सर्वस्य, तथाहि-सर्वं वस्तु स्वात्मनि व्यवतिष्ठते सत्त्वाद् यथा चैतन्यं जीवे, आह-किमेवं नयैर्व्याख्या?, निषिद्धा ह्यसौ, यदुक्तम्-'नत्थि पुहुत्ते समोयारे'त्ति, उच्यते, दृष्टिवादोद्धृतत्वादस्य न दोषः, तथा च प्रागुक्तम्-'कम्मप्पवायपुव्वे'त्यादि, दृष्टिवादे हि नयैर्व्याख्येत्यत्रापि तथैवाभिधानमिति गाथार्थः॥ इदानीमुद्देशादिद्वारत्रयमल्पवक्तव्य-मित्येकगाथया गदितुमाह-

नि.[८६] उद्देसो गुरुवयणं पुच्छा सीसस्स उ मुणेयव्वा।
निद्देसो पुणिमे खलु बावीसं सुत्तफासे य॥

वृ. उद्दिश्यत इति उद्देशः, क इत्याह-'गुरुवचनं' गुरोः विवक्षितार्थसामान्यभिधायकं वचो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा प्रस्तुतमेव 'इह खलु बावीसं परीसह'त्ति 'पृच्छा शिष्यस्य तु' गुरूद्दिष्टार्थविशेषजिज्ञासो-र्विनेयस्य, तुः पुनः प्रक्रमाद्वचनं 'मुणितव्या' ज्ञातव्या, यथा 'कयरे खलु ते बावीसं परीसहा ?' इति, निर्दशश्चेति निर्देशः-पुनः इमे खलु द्वाविंशतिः, परीषहा इति गम्यते, अनेन च शिष्य-प्रश्नानन्तरं गुरोर्निर्वचनं निर्देश इत्यर्थादुक्तं भवति, अत्र चैवमुदाहरणद्वारेणाभिधानं पूर्वयोरप्युक्तोदाहरणद्वयसूचनार्थं वैचित्र्यख्यापनार्थं चेति किञ्चिन्न्यूनगाथार्थः ॥ इत्थं 'कुत' इत्यादिद्वादशद्वारवर्णनादवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति 'सूत्रस्पर्श' इति चरमद्वारस्य सूत्रा-लापकनिष्पन्ननिक्षेपस्य चावसरः, तच्चोभयं सूत्रे सति भवतीति सूत्रानुगमे सुत्रमुच्चारणीयं,

मू.(४९/१) 'सुयं मे आउसंतेणं भगवया एवमक्खायं-इह खलु बावीसं परीसहा समणेण भगवया महावीरेणं कासवेणं पवेइया जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विनिहन्नेजा।

वृ. श्रुतम् आकर्णितमवधारितमितियावत् 'मे' मया 'आयुष्मन्नि'ति शिष्यामन्त्रणं, कः कमेववाह ?, सुधर्मस्वामी जम्बूस्वामिनं, किं तत् श्रुतमित्याह-'तेने'ति त्रिजगत्प्रतीतेन 'भगवता' अष्टमहाप्रातिहार्यरूपसमग्रेश्वर्यादियुक्तेन, 'एव'मित्यमुना वक्ष्यमाणन्यायेन 'आख्यातं' सकलजन्तुभाषाभिव्याप्त्या कथितम्, उक्तं च-

"देवा दैवीं नरा नारीं, शबराश्चापि शाबरीम्।
तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम् ॥"

किमत आह-'इहे'ति लोके प्रवचने वा 'खलुः' वाक्यालङ्कारे अवधारणे वा, तत इहैव अन्यस्मै प्रतिपादनीयमित्याह, अन्यथाऽभिधाने प्रत्युतापायसम्भवात्, उक्तं च-

"किं एत्तो पावयरं सम्मं अनहिगयधम्मसब्भावो।
अन्नं कुदेसणाए कठ्ठतरायंमि पाडेइ ॥"त्ति,

'मये'त्येननार्थतोऽनन्तरागमत्वमाह, 'भगवते'त्यनेन च वक्तुः केवलज्ञानादिगुणत्त्वसूचकेन प्रकृतवचसः प्रामाण्यं ख्यापयितुं वक्तुः प्रामाण्यमाह, वक्तुप्रामाण्यमेव हि वचनप्रामाण्ये निमित्तं, यदुक्तम्-'पुरुषप्रामाण्यमेव शब्दे दर्प्पणसंक्रान्तं मुखभिवोपचारादभिधीयते" 'तेन'ति च गुणवत्त्वप्रसिद्धयभिधानेन प्रस्तुताध्ययनस्य प्रामाण्यनिश्चयमाह, संदिग्धे हि वक्तुर्गुणवत्त्वे वचसोऽपि प्रामाण्ये संदिह्येतेति, समुदायेन तु आत्मौद्धत्यपरिहारेण गुरुगुणप्रभावनापरैरेव विनेयेभ्यो देशना विधेया, एतद्भक्तिपरिणामे च विद्यादेरपि फलसिद्धिः, यदुक्तम्-"आयरि-भत्तिराएण विज्जा मन्ता य सिज्झंति" अथवा-'आउसंतेनं'ति भगवद्विशेषणम्, आयुष्मता भगवता, चीरजीविनेत्यर्थो, मङ्गलवचनमेतत्, यद्वा-'आयुष्मते'ति परार्थप्रवृत्त्यादिना प्रशस्त-मायुर्धारयता, न तु मुक्तिमवाप्यपि तीर्थनिकारादिदर्शनात्पुनरिहायातेन, यथोच्यते कैश्चित्-

"ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम्।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥"

एवं हि अनुन्मूलितनिःशेषरागादिदोषत्वात्तद्वचसोऽप्रामाण्यमेव स्यात्, निःशेषोन्मूलने हि रागादीनां कुतः पुनरिहागमनसम्भव इति। यदिवा-'आवसंतेनं'ति मयेत्यस्य विशेषणं, तत आङिति-गुरुदर्शितमर्यादया वसता, अनेन तत्त्वतो गुरुमर्यादावर्त्तित्वरूपत्वाद्गुरुकुलवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सस्य तद्विधानमर्थत उक्तं, ज्ञानादिहेतुत्वात्तस्य, उक्तं च-

"नाणस्स होइ भागी थिरयरतो दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥"

अथवा 'आमुसंतेन' आमृशता भगवत्पादारविन्दं भक्तिः करतलयुगादिना स्पृशता, अनेनैतदाह-अधिगतसमस्तशास्त्रेणापि गुरुविश्रामणादिविनयकृत्यं न मोक्तव्यम्, उक्तं हि-

"जहाहिअग्गी जलणं नमंसे, नानाहुईमंतपयाहिसित्तं।
एवायरियं उवचिट्ठएज्जाअ, अनंतनानोवगतोऽवि संतो ॥"त्ति,

यद्वा-'आउसंतेनं'ति प्राकृतत्वेन तिङव्यत्ययादाजुषमाणेन-श्रवणविधिमर्यादया गुरून् सेवमानेन, अनेनाप्येतदाह-विधिनैवोचितदेशस्थेन गुरुसकाशात् श्रोतव्यं, न तु यथाकथञ्चिद्, गुरुविनयभीत्या गुरुपर्षदुत्थितेभ्य् वा सकाशात्, यथोच्यते-"परिसुद्वियाण पासे सुणेइ सो विनयपरिभंसि"त्ति यदुक्तं 'भगवता आख्यातं द्वाविंशतिः परीषहाः' सन्तीति, तत्र किं भगवता अन्यतः पुरुषविशेषादपौरुषेयोगमात् स्वतो वा अमी अवगता इत्याह-श्रमणेन भगवता महावीरेण काश्यपेन 'पवेइय'त्ति सूत्रत्वात् प्रविदिताः, तत्र श्राम्यतीति श्रमणः तपस्वी तेन, न तु

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम् ॥"

इतिकणादादिपरकल्पितसदाशिववदनादिसंसिद्धेन, तस्य देहादिविरहात् तथाविध-प्रयत्नाभावेनाऽऽख्यानायोगाद्, उक्तं च-

"वयणं न कायजोगाभावे न य सो अनादिसुद्धस्स।
गहणम्मि य नो हेतू सत्थं अत्तागमो कह नु ॥"

'भगवंते'ति च समग्रज्ञानैश्वर्यादिसूचकेन सर्वज्ञतागुणयोगित्वमाह, तथा च यत् कैश्चिदुच्यते-

'हेयोपादेयतत्त्वस्य, साध्योपायस्य वेदकः।
यः प्रमाणमसाविष्टो, न तु सर्वस्य वेदकः ॥' इति,

तद्व्युदस्तं भवति, असर्वज्ञो हि न यथावत्सोपायहेयोपादेयतत्त्वविद्भवति, प्रतिपाणि भिन्ना हि भावनामुपयोगशक्त्यः, तत्र कोऽपि कस्यापि कथमपि क्वाप्युपयोगीति कथं सोपाय-हेयोपादेयतत्त्ववेदनं सर्वज्ञतां विना सम्भवतीति, 'महावीरेण'ति शक्रकृतनाम्ना चरमतीर्थकरेण, 'काश्यपेन' काश्यपगोत्रेण, अनेन नियतदेशकालकुलाभिधायिना सकलदेशकालकलाव्यापि-पुरुषाद्वैतनिराकरणं कृतं भवति, तत्र हि सर्वस्यैकत्वादयमाख्याताऽस्मै व्याख्येयमित्यादि-विभागाभावत आख्यानस्यैयसम्भव इति, 'प्रविदिताः' प्रकर्षेणअ-स्वयंसाक्षात्कारित्वलक्षणेन ज्ञाताः, अनेन बुद्धिव्यवहितार्थपरिच्छेदवादः परिक्षिप्तो भवति, स्वयसाक्षात्कारी हि प्रदीपहस्तान्धपुरुषवद्व्यतिरिक्तिबुद्धियोगोऽपि कथं कञ्चनार्थं परिच्छेत्तु क्षमः स्याद् ?, एवं चैतदुक्तं भवति-नान्यतः पुरुषविशेषादेतेऽवगताः, स्वयंसम्बुद्धत्वाद्भगवतः, नाप्यपौरुषे-यागमात्, तस्यैवासम्भवाद्, अपौरुषेयत्वं ह्यागमस्स्य स्वरूपापेक्षमर्थप्रत्यायनापेक्षं वा ?, तत्र यदि स्वरूपापेक्षं तदा ताल्वादिकरणव्यापारं विनैवास्य सदोपलम्भप्रसङ्गः, न चावृतत्वात् नोपलम्भ इति वाच्यं, तस्य सर्वथा नित्यत्वे आवरणस्याकिञ्चित्करत्वात्, किञ्चिकरत्वे वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथञ्चिदनित्यत्वप्रसङ्गाद्, अर्थाथप्रत्यायनापेक्षम्, एवं कृतसङ्केता बालादयोऽपि ततोऽर्थं प्रतिपद्येरन्निति नापोरुषेयागमसम्भव इति।

ते च कीदृशा इत्याह-'यानि'ति परीषहान् 'भिक्षुः' उक्तनिरुक्तय्, 'श्रुत्वा' आकर्ण्य, गुर्वन्तिक इति गम्यते, 'ज्ञात्वा' यथावदवबुद्ध, 'जित्वा' पुनः पुनरभ्यासेन परिचितान् कृत्वा 'अभिभूय' सर्वथा तत्सामर्थ्यमुपहत्य, भिक्षोश्चर्या-विहितक्रियासेवनं भिक्षुचर्या तथा 'परिव्रजन्' समन्ताद्विहरन् 'स्पृष्टः' आश्लिष्टः, प्रक्रमात्परीषहैरेव, 'नो' नैव 'विनिहन्येत' विविधैः प्रकारैः संयमशरीरोपघातेन विनाशं प्राप्नुयात्, पठन्ति च 'भिक्खायरियाए परिव्वयंतो'त्ति भिक्षाचर्यायां-भिक्षाटने परिव्रजन्, उदीर्यन्ते हि भिक्षाटने प्रायः परीषहाः, उक्तं हि-"भिक्खायरियाए बावीसं पिसहा उदीरिज्जंति"त्ति, शेषं प्राग्वत्॥ इत्युक्तः उद्देश्ः पृच्छामाह-

मू. (४९-२) कयरे तु खलु बावीसं प० जे०

वृ. 'कयरे' किंनामानः 'ते' अनन्तरसूत्रोद्दिष्टाः 'खलुः' वाक्यालङ्कारे, शेषं प्राग्वदिति।

मू. (४९-३) इमे खलु ते बावीसं प० जे०

वृ. 'इमे' अनन्तरं वक्ष्यमाणत्वात् हृदि विपरिवर्तमानतया प्रत्यक्षाः इमे 'ते' इति ये त्वया पुष्टाः, शेषं पूर्ववत्।

मू. (४९-४) तंजहा दिगिंछापरिसहे १ पिवासापरीसहे २ सीयपरीसहे ३ उसिणपरीसहे ४ दंसमसगपरीसहे ५ अचेलपरीसहे ६ अरइपरीसहे ७ इत्थीपरीसहे ८ चरियापरीसहे ९ निसीहियापरीसहे १० सिज्जापरीसहे ११ अक्कोसपरीसहे १२ वहपरीसहे १३ जायणापरीसहे १४ अलाभपरीसहे १५ रोगपरीसहे १६ तणफासपरीसहे १७ जल्लपरीसहे १८ सक्कारपुरक्कारपरीसहे १९ पन्नापरीसहे २० अन्नाणपरीसहे २१ सम्मत्तपरीसहे २२

वृ. 'तद्यथे'त्युदाहरणोपन्यासार्थः दिगिञ्छापरीषहः १, पिपासापरीषहः २, शीतपरीषहः ३, उष्णपरीषहः ४, दंशमशकपरीषहः ५, अचेलपरीषहः ६, अरतिपरीषहः ७, स्त्रीपरीषहः ८, चर्यापरीषहः ९, नैषेधिकीपरीषहः १०, शय्यापरीषहः ११, आक्रोशपरीषहः १२, वधपरीषहः १३, याचनापरीषहः १४, अलाभपरीषहः १५, रोगपरीषहः १६, तृणस्पर्शपरीषहः १७, जल्लपरीषहः १८, सत्कारपुरस्कारपरीषहः १९, प्रज्ञापरीषहः २०, अज्ञानपरीषहः २१, दर्शनपरीषहः २२।

इह च 'दिगिंछ'त्ति देशवचनेन बुभुक्षोच्यते, सैवात्यन्तव्याकुलत्वहेतुरप्यसंयमभीरुतया आहारपरिपाकादिवाञ्छाविनिवर्त्तनेन परीति-सर्वप्रकारं सह्यत इति परीषहः दिगिंछापरीषहः?, एवं पातुमिच्छा पिपासा सैव परीषहः पिपासापरीषहः २, 'श्यैङस्पर्शे' इति नत्वाभावे शीतं-शिशिरः स्पर्शस्तदेव परीषहः शीतपरीषहः ३, 'उष दाह' इत्यस्यौणादिकनक्प्रत्ययान्तस्य उष्णं-निदाघादितापात्मकं तदेव परीषहः उष्णपरीषहः ४, दशन्तीति दंशाः पचादित्वादच्, मारयितुं शक्नुवन्ति मशकाः, दंशाश्च मशकाश्च दंशमशकाः, यूकाद्युपलक्षणं चैतत्, त एव परीषहो दंशमशकपरीषहः ५, चेलाभावो जिनकल्पिकादीनाम् अन्येषां तु भिन्नमल्पमूल्यं च चेलमप्यचेलमेव, अवस्त्राशीलादिवत्, तदेव परीषहोऽचेलपरीषहः ६, रमणं रतिः-संयमविषया धृतिः तद्विपरीता त्वरतिः, सैव परीषहः अरतिपरीषहः ७, स्त्यायतेः स्तृणोतेर्वा त्रटि टित्वाच्च

डीपि स्त्री सैव तद्गतरागहेतुगतिविभ्रमेङ्गिताकारविलोकनेऽपि-

त्वगुरुधिरमांसभेदस्त्रय्वस्थिरात्रणै: सुदुर्गन्धम्।
कुचनयनजघनवदनोरुमूर्च्छितो मन्यते रूपम्॥१॥
(तथा) निष्ठिवितं जुगुपसत्यधरस्थं पिबति मोहित: प्रसभम्।
कुचजघनपरिश्रावं नेच्छति तन्मोहितो भजने॥२॥

इत्यादि भावनातोऽपिभिधास्यमाननीतितश्च परिषह्यमाणत्वात्परीषह: स्त्रीपरीषह: ८, चरणं चर्या-ग्रामानुग्रामं विहरणात्मिका सैव परीषह: चर्यापरीषह: ९, निषेधनं निषेध: पापकर्म्मणां गमनादिक्रियायाश्च स प्रयोजनमस्या नैषेधिकी-स्मशानादिका स्वाध्यायादिभूमि: निषेद्येति-यावत् सैव परीषहो नैषेधिकीपरीषह: १०, तथा शेरतेऽस्यमिति शय्या-उपाश्रय: सैव परीषह: शय्यापरीषह: ११, आक्रोशनमाक्रोश:-असत्यभाषात्मक: स एव परीषह: आक्रोशपरीषह: १२, हननं वध:-ताडनं स एव परीषहो वधपरीषह: १३, याचनं याञ्चा प्रार्थनेत्यर्थ:, सैव परीषह: याञ्चापरीषहो १४, लभनं लाभो न लाभोऽलाभ:-अभिलषितविषयाप्राप्ति: स एव परीषह: अलाभपरीषह: १५, रोग:-कुष्ठादिरूप: स परीषहो रोगपरीषह: १६, तरन्तीति तृणानि, औणादिको नक् हूस्वत्वं च, तेषां स्पर्श: तृणस्पर्श: स एव परीषहस्तृणस्पर्शपरीषह: १७, जल्ल इति मल: स एव परीषहो जल्लपरीषह: १८,

सत्कारोवस्त्रादिभि: पूजनं पुरस्कार:-अभ्युत्थानासनादिसम्पादनं, यद्वा सकलैवाभ्युत्थाना-भिवादनदानादिरूपा प्रतिपत्तिरिहसत्कारस्तेन पुरस्करणं सत्कारपुरस्कार: ततास्तावेव स एव वा परीषह: सत्कारपुरस्कारपरीषह: १९, प्रज्ञापरीषह: अज्ञानपरीषहश्च प्राग्भावितार्थौ, नवरं प्रज्ञायतेऽनया वस्तुतत्त्वमिति प्रज्ञा-स्वयंविमर्शपूर्वको वस्तुपरिच्छेद: तथा ज्ञायते वस्तुतत्त्व-मनेनेति ज्ञानं-सामान्येन मत्यादि तदभावोऽज्ञानं २०-२१, दर्शनं-सम्यग्दर्शनं तदेव क्रियादिवा-दिना विचित्रतमश्रवणेऽपि सम्यक् परीषह्यमाणं-निश्चलचित्ततया धार्यमाणं परीषहो दर्शन-परीषह:, यद्वा दर्शनशब्देन दर्शनव्यामोहहेतुरैहिकामुष्मिकफलानुपलम्भादिरिह गृह्यते, तत: स एव परीषहो दर्शनपरीषह: २२॥ इत्थं नामत: परीषहानभिधाय तानेव स्वरूपतोऽवक्ष्यते-

मू. (५०) *परीसहाणं पविभत्ती, कासवेण पवेइया।*
तं भे उदाहरिस्स्मि, आनुपुव्विं सुणेह मे॥

वृ. 'परीषहाणाम्' अनन्तरोक्तनाम्नां 'प्रविभक्ति:' प्रकर्षेण-स्वरूपसम्मोहाभावलक्षणेन विभाग:-पृथक्ता 'काश्यपेन' काश्यपगोत्रेण महावीरेणेतियावत्, 'प्रवेदिता' प्ररूपिता 'ता'मिति काश्यपप्ररूपितां परीषहप्रविभक्तिं 'भे' इति भवताम् 'उदाहरिष्यामि' प्रतिपादयिष्वामि' 'आनुपूर्व्या' क्रमेण शृणुत 'मे' मम प्रक्रमादुदाहरत:, शिष्यादरख्यापनार्थं च काश्यपेन प्रवेदि-तेति वचनमिति सूत्रार्थ :॥ इह चाशेषपरीषहाणां क्षुत्परीषह एव दु:सह इत्यादितस्तमाह-

मू. (५१) *दिगिंछापरियावेण, तवस्सी भिक्खु थामवं।*
न छिंदे न छिंदावए, न पए न पयावए॥

वृ. दिगिञ्छा-उक्तरूपा तया परिताप:-सर्वाङ्गीणसन्तापो दिगिञ्छापरितापस्तेन, छिदादि-क्रियापेक्षा हेतौ तृतीया, पाठान्तरं 'दिगिंछापरिगते' बुभुक्षाव्याप्ते 'देहे' शरीर सति, तपोऽस्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तीति अतिशायने विनिस्तपस्वीविकृष्टाष्टमादितपोऽनुष्ठानवान्, स च गृहस्थादिरपि स्यादत आह-'भिक्षुः' यतिः, सोऽपि कीदृक्-स्थाम-बलं तदस्य संयमविषयमस्तीति स्थामवान्, भूम्नि प्रशंसायां वा मतुप्प्रत्ययः, अयं च किमित्याह-'न छिन्द्यात्' न द्विधा विदध्यात्, स्वयमिति गम्यते, न छेदयेद्वा अन्यैः, फलादिकमिति शेषः, तथा न पचेत् स्वयं, न चान्यैः पाचयेत्, उपलक्षत्वाच्च नान्यं छिन्दन्तं वा पचन्तं वाऽनुमन्येत, तत एव च स्वयं क्रीणीयात्, नापि क्रापयेत् न च परं क्रीणन्तमनुमन्येत, छेदस्य हननोपलक्षणत्वात् क्षुत्प्रपीडितोऽपि न नवकोटी-शुद्धिबाधां विधत्ते इति गाथार्थः ॥

मू.(५२) कालीपव्वंगसंकासे, किसे धमणिसंतए।
मत्तन्नोऽसनपानस्स, अदीनमनसो चरे॥

वृ. काली-काकजङ्घा तस्याः पर्वाणि स्थूराणि मध्यानि च तनूनि भवन्ति ततः कालीपर्वाणीव पर्वाणिजानुकूर्प्परादीनि येषु तानि कालीपर्वाणि, उष्ट्रामुखीवन्मध्यपदलोपी समासः, तथा-विधैरङ्गैः-शरीरवायवैः सम्यक्काशते-तपःश्रिया दीप्यत इति कालीपर्वाङ्गसङ्काशः, यद्वा प्राकृते पूर्वापरनिपातस्यातन्त्रवाद्ग्रामो दग्ध इत्यादिवत् अवयवधर्मेणाप्यवयविनि व्यपदेशदर्शना-च्चाङ्गसन्धीनामपि कालीपर्वसदृशतायां कालीभिः सङ्काशानि सदृशान्यङ्गानि यस्य स तथा, स हि विकृष्टतपोऽनुष्ठानतोऽपचितपिशितशोणित इत्यस्थिचर्मावशेष एवंविध एव भवति, अत एव च 'कृशः' कृशरीरः, धमनयः-शिरास्ताभिः सन्ततो-व्याप्तो धमनिसंततः, एवंविधाव-स्थोऽपि मात्रां-परिमाणरूपां जानाति इति मात्राज्ञो-नातिलौल्यतोऽतिमात्रोपयोगी, कस्येत्याह-अश्यत इत्यशनम्-ओदनादि पीयत इति पानं-सौवीरादि अनयोः समाहारेऽशनपानं तस्य, तथा 'अदीनमनसो'त्ति सूत्रत्वाददीनमनाः अदीनमानसो वा-अनाकुलचित्तः 'चरेत्त' संयमा-ध्वनि यायात्, किमुक्तं भवति ?, अतिबाधितोऽपि क्षुधा नवकोटीशुद्धमप्याहारमवाप्य न लौल्यतोऽतिमात्रोपयोगी तदप्राप्तौ वा दैन्यवान् इत्येवं क्षुत्परिषह्यमाणा क्षुत्परीषहः सोढो भवतीति सूत्रार्थः ॥ सम्प्रति प्राग्द्वारगाथोपक्षिप्तं सूत्रस्पर्श इति त्रयोदशद्वारं व्याचिख्यासुः सूत्रस्पर्शिक-निर्युक्तिमाह-'सुत्तफासे य'त्ति। तथा-

नि.[८७] कुमारए नई लेणे, सिला पंथे महल्लए।
तावस पडिमा सीसे, अगनि निव्वेअ मुग्गरे॥

नि.[८८] वने रामे पुरे भिक्खे, संथारे मल्लधारणं।
अंगविज्जा सुए भोमे, सीसस्सागमने इय॥

वृ. तत्र सूत्रस्पर्शश्चेति द्वारोपक्षेपः, कुमार इत्यादिना च तद्वर्णनं स्पष्टमेव, नवरं कुमारकादिभिः, प्रत्येकं द्वाविंशतेरपि परीषहाणामुदाहरणोपदर्शनं, तथाहि-'कुमारकः' क्षुल्लकः, 'लेणं'ति लयनं गुहा 'महल्लए'त्ति आर्यरक्षितपिता, सूत्रस्पर्शित्वं चास्य सूत्रसूचितोदाहरणप्रदर्शकत्वादिति किञ्चिदधिकगाथाद्वयार्थः ॥ इदानीं निर्युक्तिकार एव 'न छिन्दे' इत्यादिसूत्रावयवसूचितं कुमार-केत्यादिद्वारोपक्षिप्तं च क्षुत्परिषहोदाहरणमाह-

नि.[८९] उज्जेनी हत्थिमित्तो भोगपुरे हत्थिभूइखुड्डो अ।
अडवीइ वेयणट्टो पाओवगओ य सादिव्वं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. उज्जयिनी हस्तिमित्रो भोगकटकपुरं हस्तिभूतिक्षुल्लकश्चाटव्यां वेदनार्त्तः पादपोपगतश्च सादिव्यं-देवसन्निधानमिति गाथाक्षरार्थः ॥ भावार्थो वृद्धसम्प्रदायादवसेयः, स चायम्-

तेणं कालेणं तेणं समएणं उज्जेनीए नगरीए हत्थिमित्तो नाम गाहावई, सो मतभज्जिओ, तस्स पुत्तो हत्थिभूइ नाम दारगो, सो तं गहाय पव्वइओ। ते अन्नया कयाइ उज्जेनीओ भोगकडं पत्थिया, अडविमज्झे सो खंते पाए खयक्काए विद्धो, सो असमत्थो जातो, तेन साहुणो वुत्ता-वच्चह तुब्भेऽपि ताव नित्थरह कंतारं, अहं महया कट्ठेण अभिभूतो, जइ ममं तुब्भे वहह तो भज्जिहिह, अहं भत्तं पच्चक्खामि, निब्बंधेण ट्ठितो एगपासे गिरिकंदराए भत्तं पच्चक्खाउं। साधू पट्ठिया, सो खुड्डुतो भणति-अहंपि इच्छामि, सो तेहिं बला नीतो, जाहे दूरं गतो ताहे वीसंभेऊण पव्वइए नियत्तो, आगतो खंतस्स सगासं, खंतएण भणियं-तुमं कीस आगआ ?, इहं मरिहिसि, सोऽपि थेरो वेयणत्तो तद्दिवसं चेव कालगतो, खुड्डुगो न चेव जाणइ जहा कालगतो।

सो देवलोएसु उववन्नो, पच्छा तेन ओही पउत्ता-किं मया दत्तं तत्तं वा ?, जाव तं सरीरयं पेच्छइ खुड्डुगं च, सो तस्स खुड्डुगस्स अनुकंपाए तहेव सरीरगं अनुपविसित्ता खुड्डुएण सद्धिं उल्लावितो अच्छइ, तेन भणिओ-वच्चह पुत्त! भिक्खाए, सो भणइ-कहिं ?, तेन भण्णइ-एए धवनिग्गोहादि पायवा, एएसु तन्निवासी पागवंतो, जे तव भिक्खं देहिंति, तहत्ति भणिउं गतो, धम्मलाभेति रुक्खहेट्टेसु, ततो सालंकारो हत्थो निग्गच्छिउं भिक्खं देइ, एवं दिवसे भिक्खं गिण्हंतो अच्छितो जाव ते साहुणो तंभि देसे दुब्भिक्खे जाए पुणोवि उज्जेणिगं देसं आगच्छंता तेनेव मग्गेण आगया बितिए संवच्छरे, जाव तं गया पएसं, खुड्डुगं पेच्छंति वरिसस्स अंते, पुच्छितो भणइ-खंतोऽपि अच्छइ, गया जाव सुक्कं सरीरयं पेच्छंति, तेहिं नायं-देवेन होऊणमनुकंपा कइल्लिया होहित्ति। खंतेन अहियासितो परीसहो न खुड्डुण्ण, अहवा खुड्डुएणवि अहियासितो, न तस्स एवं भावो भवइ-जहाऽहं न लभिस्सामि भिक्खं, पच्छा सो खुड्डुगो साहूहिं नीओ। यथा च ताभ्यामयं परीषहः सोढस्तथा साम्प्रतस्थमुनिभिरपि सोढव्य इत्यैदम्पर्यार्थः। उक्तः क्षुत्परीषहः, एवं चाधिसहमानस्य न्यूनकुक्षितयैषणीयाहारार्थं वा पर्यटतः श्रमादिभिरवश्यंभाविनी पिपासा, सा च सम्यक् सोढव्येति तत्परीषहमाह-

मू. (५३) *तओ पुट्ठो पिवासाए, दुगुंछी लद्धसंजमे।*
सीओदगं न सेवेज्जा, वियडस्सेसणं चरे॥

वृ. 'तत' इति क्षुत्परीषहात् तको वा उक्तविशेषणो भिक्षुः 'स्पृष्टः' अभिद्रुतः 'पिपासया' अभिहितस्वरूपया 'दोगुंछी'ति जुगुपसी, सामर्थ्यादनाचारस्येति गम्यते, अत एव लब्धः-अवाप्तः संयमः-पञ्चाश्रवादिविरमणात्मको येन स तथा, पाठान्तरं वा 'लज्जसंजमेत्ति' लज्जा-प्रतीता संयमः-उक्तरूपः एताभ्यां स्वभ्यस्ततया सात्मीभावसमुपगताभ्यामनन्य इति स एव लज्जासंयमः, पठ्यते च 'लज्जासंजए'त्ति तत्र लज्जया सम्यग्यतते-कृत्यं प्रत्यादृतो भवतीति लज्जासंयतः, सर्वधातूनां पचादिषु दर्शनात्,

स एवंविधः किमित्याह-शीतं-शीतलं, स्वरूपस्थतोयोपलक्षणमेतत्, ततः स्वकीयादि-शस्त्रानुपहतम्, अप्रासुकमित्यर्थः, तच्च तदुदकं च शीतोदकं, 'न सेवेत' न पानादिना भजेत, किन्तु 'विडस्स'त्ति विकृतस्य-वह्नयादिना विकारं प्रापितस्य प्रासुकस्येतियावत्, प्रक्रमादुद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्य 'एसणं'ति चतुर्थ्येर्थे द्वितीया, ततश्चैषणाय-गवेषणार्थं 'चरेत्, तथाविधकुलेषु पर्यटेत्, अथवा एषणाम्-एषणासमितिं चरेत्, चरतेरासेवायामपि दर्शनात्, पुनः पुनः सेवेत, किमुक्तं भवति?-एकवारमेषणाया अशुद्धावपि न पिपासातिरेकतोऽनेषणीयमपि गृह्णंस्तामुल्लङ्घयेदिति सूत्रार्थः ॥ कदाचिज्जनाकुल एव निकेतनादौ लज्जातः स्वस्थ एव चैवं विदधीतेत्यत आह-

मू.(५४)　　　*छिन्नावाएसु पंथेसुं, आउरे सुपिवासिए।*
परिसुक्कमुहे दीने, तं तितिक्खे परीसहं ॥

वृ. छिन्नः-अपगतः आपातः-अन्यतोऽन्यत आगमनात्मकः अर्थाज्जनस्य येषु ते छिन्नापाताः, विविक्ता इत्यर्थः, तेषु, 'पथिषु' मार्गेषु, गच्छन्निति गम्यते, कीदृशः सन्नित्याह-'आतुरः' अत्यन्ताकुलतनुः, किमिति?, यतः सुष्ठु-अतिशयेन पिपासितः-तृषितः सुपिपासितः, अत एव च परिशुष्कं-विगतनिष्ठीवनतयाऽनार्द्रतामुपगतं मुखमस्येति परिशुष्कमुखः स चासौ अदीनश्च-दैन्याभावेन परिशुष्कमुखादीनः 'त'मिति तृट्परीषहं 'तितिक्षेत' सहेत पठ्यते च-'सव्वतो य परिव्वएत्ति' सर्वत इति सर्वान्-मनोयोगादीनाश्रित्य, चः पूरणे 'परिव्रजेत्' सर्वप्रकारसंयमाध्वनि यायात्, उभयत्रायमर्थो-विवक्तदेशस्थोऽप्यत्यन्तं पिपासितोऽस्वास्थ्यमुपगतोऽपि च नोक्तविधि मुल्लङ्घयेत्, ततः पिपासापरीषहोऽध्यासितो भवतीति सूत्रार्थः ॥ इदानीं नदीद्वारमनुसरन् 'सीओदगं न सेवेज्जा' इत्यादिसूत्रावयवसूचितं निर्युक्तिकृत् दृष्टान्तमाह-

नि.[९०]　　　उज्जेनी धनमित्तो पुत्तो से खुड्डओ अ धनसम्मो।
तण्हाइत्तोऽपीओ कालगओ एलगच्छपहे ॥

वृ. उज्जयिन्यां धनमित्रः 'से' इति तस्य पुत्रः क्षुल्लकश्च धनपुत्रशर्म्मा 'तण्हाएत्तो'त्ति तृषितोऽपीतः कालगत एडकाक्षपथ इत्यक्षरार्थः ॥ भावार्थस्तु सम्पदायादवसेयः, स चायम् -

एत्थ उदाहरणं किंचि पडिवक्खेण किंचि अनुलोमेण। उज्जेनी नाम नयरी, तत्थ धनमित्तो नाम वाणियतो, तस्स पुत्तो धनसम्मो नाम दारतो, सो धणमित्तो तेन पुत्तेण सह पव्वइओ। अन्नया ते साहू मज्झण्हवेलाए एलगच्छपहे पट्ठिया, सोऽवि खुड्डुगो तण्हाइतो एति, सोऽपि से खंतो सिनेहानुरागेण पच्छओ एति, साहुणोऽपि पुरतो वच्चंति, अन्तरावि नदी समावडिया, पच्छा तेन वुच्चइ-एहि पुत्त! इमं पाणियं पियाहि, सोऽवि खंतो नइं उत्तिन्नो चिंतेति य-मणागं ओसरामि, जावेस खुड्डओ पाणियं पियइ, मा मे संकाए न पाहित्ति एगंते पडिच्छइ, जाव खुड्डुतो पत्तो नइं न पियति।

केइ भणंति-अंजलीए उक्खित्ताए अह से चिंता जाया-पियामित्ति, पच्छा चिंतेइ-कहमहं एए हालाहले जीवे पिविस्सं?, न पीयं, आसाए छिन्नाए कालगतो, देवेसु उववण्णो, ओहिं पउत्तो, जाव खुड्डगसरीरं पासति, तहिं अनुपविट्ठो, खंतं ओलग्गति, खंतोऽपि एतित्ति पत्थितो, पच्छा तेन तेसिं देवेनं साहूणं गोउलाणि विउव्वियाणि, साहूवि तासु वइयासु तक्काईणि गिण्हन्ति, एवं वईयापरंपरेण जाव जनवयं संपत्ता, पच्छिल्लाए वईयाए तेना देवेन विंटिया पम्हुसाविया जाणणनिमित्तं, एगो साहू नियत्तो, पेच्छति विंटियं, नत्थि वइया, पच्छा तेहिं नायं-सादिव्वंति, पच्छा तेन देवेन साहुणो वंदिया, खंतो न वंदिओ, तओ सव्वं परिकहेइ, भणइ-एएण अहं परिचत्तो-तुमं णं पाणियं पियाहित्ति, जदि मे तं पाणियं पियं होन्तं तो संसारं भमंतो, पडिगतो।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

एवं अहियासेयव्वं। इत्यवसित: पिपासपरीषहः, क्षुत्पिपासासहनकर्शितशरीरस्य च नितरां शीतकाले शीतसम्बन्ध इति तत्परीषहमाह-

मू.(५५) *चरंतं विरयं लूहं, सीयं फुसइ एगया।*
नाइवेलं विहन्निज्जा, पावदिट्ठी विहन्नइ॥

वृ. 'चरन्तम्' इति ग्रामानुग्रामं मुक्तिपथे वा व्रजन्तं, धर्ममासेवमानं वा, 'विरतम्' अग्निसमारम्भादेर्निवृत्तं विगतरतं वा 'लूहं'ति स्नानस्निग्धभोजनपरिहारेण रूक्षं, किमित्याह-श्रृणाति इति शीतं, 'स्पृशति' अभिद्रवति, चरदादिविशेषणविशिष्टो हि सुतरां शीतेन बाध्यते, 'एकदे'ति शीतकालादौ प्रतिमाप्रतिपत्त्यादौ वा, ततः किम् ?-'न' नैव वेला-सीमा मर्यादा सेतुरित्यनर्थान्तरु, ततश्चातीति शेषसमयेभ्यः स्थविरकल्पिकापेक्षया जिनकल्पिकापेक्षया च स्थविरकल्पाच्चातिशायिनी वेला शक्त्यपेक्षतया च सर्वथानपेक्षतया च शीतसहनलक्षणा मर्यादा तां विहन्यात्, कोऽर्थः-अपध्यानस्थानान्तरसर्प्पणादिभिरतिक्रामेत्, किमेवमुपदिश्यत इत्याह-पासयति पातयति वा भवावर्त इति पापा तादृशी दृष्टिः-बुद्धिरस्येति पाददृष्टिः 'विहन्नइ' इति सूत्रत्वाद्विहन्ति-अतिक्रामत्यतिवेलामिति प्रक्रमः,

अयमत्र भावार्थः-पापदृष्टिरेवोक्तरूपमर्यादातिक्रमकारी, ततः पापबुद्धिकृतत्वादस्य सद्गुरुपदेशात् परिहारो विधेयः, पठ्यते च-'नाइवेलं मुणी गच्छे, सुच्चा णं जिनसासनं' तत्र वेला-स्वाध्यायादिसमयात्मिका तामतिक्रम्य शीतेनाभिहतोऽहमिति 'मुनिः' तपस्वी न 'गच्छेत्' स्थानान्तरमभिसर्प्पेत्, 'सोच्चे'ति श्रुत्वा णमिति वाक्यालङ्कारे 'जीनशासनं' जिनागमम्-अन्यो जीवोऽन्यश्च देहस्तीव्रतराश्च नरकादिषु शीतवेदनाः प्राणिभिरनुभूतपूर्वा इत्यादिकम्

मू.(५६) *न मे निवारणं अत्थि, छवित्ताणं न विज्जइ।*
अहं तु अग्गि सेवामि, इइ भिक्खू न चिंतए॥

वृ. न 'मे' मम नितरां वार्यते-निषिध्यतेऽनेन शीतवातादीति निवारणं-सौधादि 'अस्ति' विद्यते, तथा छविः-त्वक् त्रायते-शीतादिभ्यो रक्ष्यतेऽनेनेति छवित्राणं-वस्त्रकम्बलादि न विद्यते, वृद्धस्तु शरणं-वस्त्रादि तथा छविः-त्वक् त्राणं न विद्यते-न भवति, असौ हि शीतोष्णादीनां ग्राहिकेति व्याचक्षते, अतः 'अह'मित्यात्मनिर्देशः तुः पुनरर्थः, तद्भावना च येषां निवारणं छवित्राणं वा समस्ति ते किमिति अग्निं सेवेयुः ?, अहं तं तदभावादत्राणः तत्किमन्यत्कोर-मीत्यग्निं सेवे 'इती'त्येवं 'भिक्षुः' यतिः 'न चिन्तयेत्' न ध्यायेत्, चिन्तानिषेधे च सेवनं दूरापास्तमिति। इदानीं लयनद्वारं, तत्र च 'नातिवेलं मुनिर्गच्छेदि'त्यादिसूत्रावयवसूचित्तमाह-

नि.[९१] रायगिहंमि वयंसा सीसा चउरो उ भद्दबाहुस्स।
वेभारगिरिगुहाए सीयपरिगया समाहिगया॥

वृ. राजगृहे नगरे वयस्याः शिष्याश्चत्वारस्तु भद्रबाहोर्वैभारगिरिगुहायां शीतपरिगताः समाधिगता इत्यक्षरार्थः॥ भावार्थस्तु वृद्धविवरणादवसेयः, तच्चेदम्-

रायगिहे नयरे चत्तारि वयंसा वाणियगा सहवड्डियया, ते भद्दबाहुस्स अंतिए धम्मं सोच्चा पव्वइया, ते सुयं बहुं अहिज्जित्ता अन्नया कयाइ एगल्लविहारपडियं पडिवन्ना, ते समावत्तीए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरंता पुणोवि रायगिहं नयरं सपत्ता, हेमंतो य वट्टति, ते य भिक्खं काउं तइयाए पोरिसीए पडिनियत्ता, तेसिं च वैभारगिरिंतेनं गंतव्वं, तत्थ पढमस्स गिरिगुहादारे चरिमा पोरिसी ओगाढा, सो तत्थेव ठिओ, बिययस्स उज्जाने, ततियस्स उज्जानसमीवे, चउत्थस्स नगरब्भासे चेव, तत्थ जो गिरिगुहब्भासे तस्स निरागं सीयं सो सम्मं सहंतो खमंतो अ पढमजामे चेव कालगतो, एवं जो नगरसमीवे सो चउत्थे जामे कालगतो, तेसिं जो नगरब्भासे तस्स नगरुण्हार न तहा सीअं तेन पच्छा कालगतो, ते सम्मं कालगया, एवं सम्मं अहियासियव्वं जहा तेहिं चउहिं अहियासियं॥ इदानीं शीतविपक्षभूतमुष्णमिति यदिवा शीतकाले शीतं तदनन्तरं ग्रीष्मे उष्णमिति तत्परीषहमाह-

मू. (५७) *उसिणपरितावेण, परिदाहेन तज्जिओ।*
घिंसु वा परितावेणं, सायं न परिदेवए॥

वृ. उष्णम्-उष्णस्पर्शवत् भूशिलादि तेन परितापः तेन, तथा 'परिदाहेन' बहिः स्वेदमलाभ्यां वह्निना वा अन्तश्च तृष्णया जनितदाहस्वरूपेण 'तर्जितः' भर्त्सितोऽत्यन्तपीडित इतियावत्, तथा 'ग्रीष्मे' वाशब्दात् शरदि वा 'परितापेन' रविकिरणादिजनितेन तर्जित इति सम्बन्धः, किमित्याह-'सातं' सुखं, प्रतीति शेषः, न परिदेवेत्, किमुक्तं भवति ?-'नारीकुचोरुकर-पल्लवोपगूढैः क्वचित्सुखं प्राप्ताः। क्वचिदङ्गारैर्ज्वलितैस्तीक्ष्णैः पक्वाः स्म नरकेषु॥' इत्यादि परिभावयन् हा ! कथं मम मन्दभाग्यस्य सुखं स्यादिति प्रलपेत्, यद्वा-'सात'मिति सातहेतुं प्रति, यथा हा ! कथं कदा वा शीतकालः शीतांशुकरकलापादयो वा मम सुखोत्पादकाः सम्प-त्स्यन्त इति न परिदेवेतेति सूत्रार्थः॥ उपदेशान्तरमाह-

मू. (५८) *उण्हाहितत्तो मेहावी, सिनाणं नाभिपत्थए।*
गायं न परिसिंचेज्जा, न विंजिज्जा य अप्पयं॥

वृ. 'उष्णाभितप्तः' उष्णेनात्यन्तं पीडितो 'मेधावी' मर्यादानतिवर्ती 'स्नानं' शौचं देश--सर्वभिदभिन्नं 'नाभिप्रार्थयेत्' नैवाभिलषेत् पठन्ति च-'णोऽवि पत्थए'त्ति अपेर्भिन्नक्रमत्वात् प्रार्थयेदपि न, किं पुनः कुर्यादिति ?, तथा 'गात्रं' शरीरं 'न परिषिञ्चेत्' न सूक्ष्मोदकबिन्दु-भिरार्द्रीकुर्यात्, 'न वीजयेच्च' तालवृन्तादिना 'अप्पयं'ति आत्मानम्, अथवाऽल्पमेवाल्पकं, किं पुनर्बह्विति सूत्रार्थः॥

साम्प्रतं शिलाद्वारमनुस्मरन् 'उसिणपरितावेणे' त्यादिसूत्रावयवसूचितमुदाहरणमाह-

नि.[९२] तगराइ अरिहमित्तो दत्तो अरहन्नओ य भद्दा य।
वणियमहिलं चइत्ता तत्तंमि सिलायले विहरे॥

वृ. तगरायामर्हन्मित्रो दत्तोऽर्हन्नकश्च भद्रा च वणिग्महेलां त्यक्त्वा तप्ते शिलातले 'विहरे'त्ति व्यहार्षीदिति गाथाक्षरार्थः। भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-अरहन्नएण सद्धिं पव्वइओ, सो तं खुड्डगं न कयाइ भिक्खाए हिंडावेइ, पढमालियाईहिं किमिच्छएहिं पोसेति, सो सुकुमालो, साहूण अप्पत्तियं, न तरंति किंचि भणिउं।

अन्नया सो खंतो कालगतो, साहूहिं दो तिन्नि वा दिवसे दाउं भिक्खस्स ओयारिओ, सो सुकुमालसरीरो गिम्हे उवरिं हिट्ठा य डज्झति पासे य, तिण्हाभिभूतो छायाए वीसमंतो पउत्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वतियाए वणियमहिलाए दिट्ठो, ओरालसुकुमालसरीरोत्तिकाउं तीसे तहिं अज्झोववाओ जाओ, चेडीए सद्दावितो, किं मग्गसि ?, भिक्खं, दिन्ना से मोयगा, पुच्छितो-कीस तुमं धम्मं करेसि ?, भणइ-सुहनिमित्तं, सा भणइ-तो मए चेव समं भोगे भुंजाहि, सो य उण्हेण तज्जिओ उवसग्गिज्जंतो य पडिभग्गो भोगे भुंजति। सो साहूहि सव्वहिं मग्गितो न दिट्ठो अप्पसागरियं पविट्ठो, पच्छा से माया उम्मत्तिया जाया पुत्तसोगेण, नयरं परिभमंती अरहन्नयं विलवंती जं जहिं पासइ तं तहिं सव्वं भणति-अत्थि ते कोइ अरहन्नओ दिट्ठो ?, एवं विलवमाणी भमइ, जाव अन्नया तेन पुत्तेण ओलोयणगएण दिट्ठा, पच्चभिन्नाया, तहेव ओयरित्ता पाएसु पडिओ, तं पिच्छिऊण तहेव सत्थचित्ता जाया, ताहे भण्णइ-पुत्त! पव्वयाहि, मा दुग्गइं जाहिसि, सो भणइ-न तरामि काउं संजमं, जदि परं अणसणं करेमि, एवं करेहि, मा य असंजओ भवाहि, मा संसारं भमिहिसि, पच्छा सो तहेव तत्ताए सिलाए पाओवगमनं करेइ, मुहुत्तेण सुकुमालसरीरो उण्हेण विलाओ, पुव्विं तेन नाहियासिओ पच्छा तेनऽहियासितो। एवं अहियासियव्वं। उष्णं च ग्रीष्मे तदनन्तरं वर्षासमयः, तत्र च दशमशकसम्भव इति तत्परीषहमाह-

मू. (५९) *पुट्ठो य दंसमसएहिं, समरे व महामुनी।*
नागो संगामसीसे व, सूरे अभिभवे परं॥

वृ. 'स्पृष्टः' अभिद्रुतः 'चः' पूरणे दंशमशकैः, उपलक्षणत्वात् यूकादिभिश्च 'समरे व'त्ति 'एदोदुरलोपाविसर्ज्जनीयस्ये'ति रेफात्, ततः सम एव-तदगणनया स्पृष्टास्पृष्टावस्थयोस्तुल्य एव, यद्वा समन्तादरयः-शत्रवो यस्मिंस्तत्समरं तस्मिन्निति संग्रामशिरोविशेषणं, वेति पूरणे, 'महामुनिः' प्रशस्तयतिः, किमित्याह-'नागो संगामसीसे वे'ति इवार्थस्य वाशब्दस्य भिन्नक्रमत्वान्नाग इव-हस्तीव संग्रामस्य शिर इव शिरः-प्रकर्षावस्था संग्रामशिरस्तस्मिन् 'शूरः' पराक्रमवान्, यद्वा शूरो-योधः ततोऽन्तर्भावितोपमार्थत्वाद्वाशब्दस्य च गम्यमानत्वात् शूरवद्वाऽभिहन्यात्, कोऽर्थः ?-अभिभवेत् 'परं' शत्रुम्, अयमभिप्रायः-यथा शूरः करी यद्वा यथा वा योधः शरैस्तुद्यमानोऽपि तदगणनया रणशिरसि शत्रून् जयति, एवमयमपि दंशादिभिरभिद्रूयमानोऽपि भावशत्रुं-क्रोधादिकं जयेदिति सूत्रार्थः ॥ यथा च भावशत्रुर्जेतव्यस्तथोपदेष्टुमाह-

मू. (६०) *न संतते न वारिज्जा, मनंपि नो पउस्सए।*
उवेहे नो हणे पाणे, भुंजंते मंससोणिए॥

वृ. 'न संत्रसेत्' नोद्विजेत्, दंशादिभ्य इति गम्यते, यद्वाऽनेकार्थत्वाद्धातूनां न कम्पयेत्तैस्तुद्यमानोऽपि, अङ्गानीति शेषः, 'न निवारयेत्' न निषेधयेत्, प्रक्रमाद्दंशादीनेव तुदतो, मा भूदन्तराय इति, मनः-चित्तं तदपि, आस्तां वचनादि, 'न प्रदूषयेत्' न प्रदुष्टं कुर्यात्, किन्तु 'उवेहे'त्ति उपेक्षेत-औदासीन्येन पश्येद्, अत एव न हन्यात् 'प्राणान्' प्राणिनो 'भुञ्जानान्' आहारयतो मांसशोणितम्, अयमिहाशयः-अत्यन्तबाधकेष्वपि दंशकादिषु-

शृगालवृकरूपैश्च, नदद्भिर्घोरनिष्ठुरम्।
आक्षेपत्रोटितस्नायु, भक्ष्यन्ते रुधिरोक्षिताः ॥१॥
स्वरूपैः श्यामशबलैर्वालपुच्छैर्भयान्वितैः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परं विरुध्यद्भिर्विलुप्यन्ते दिशोदिशम् ॥२॥
काकगृध्रादिरूपैश्च, लोहतुण्डैर्बलान्वितैः ।
विनिकृष्टाक्षिजिह्वान्त्रा, विचेष्टन्ते महीतले ॥३॥
प्राणोपक्रमणैर्घोरैर्दुःखैरेवंविधैरपि ।
आयुष्यक्षपिते नैव, म्रियन्ते दुःखभागिनः ॥४॥ इत्यादि,

तथा असंज्ञिन एते आहारर्थिनश्च भोज्यमेतेषां मच्छरीरं बहुसाधारणं च यदि भक्षयन्ति किमत्र प्रद्वेषेणेति च विचिन्तयन् तदुपेक्षणपरो न तदुपघातं विदध्यादिति सूत्रार्थः ॥

इदानीं पथिद्वारं, तत्र 'स्पृष्टो दंशमशकै'रित्यादिसूत्रसूचितमुदाहरणमाह-

नि.[९३] चंपाए सुमणुभद्दो जुवराया धम्मघोससीयो य ।
पंथंमि मसगपरिपीयसोणिओ सोऽवि कालगओ ॥

वृ. चम्पायां सुमनोभद्रो युवराजो धर्म्मघोषशिष्यश्च पथि मशकपरिपीतशोणितः सोऽपि कालगत इति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

चंपाए नयरीए जियसत्तुस्स रन्नो पुत्तो सुमणभद्दो जुवराया, धम्मघोसस्स अंतिए धम्मं सोऊण निव्विण्णकामभोगो पव्वइतो, ताहे चेव एगल्लविहारपडिमं पडिवन्नो, पच्छा हेट्ठाभूमीए विहरन्तो सरयकाले अडवीए पडिमागतो रत्तिं मसएहिं खज्जइ, सो ते न पमज्जइ, सम्मं सहइ, रत्तीए पीयसोणितो कालगतो। एवं अहियासेयव्वं ॥ इत्यवसितो दंशमशकपरीषहः ॥ अधुना अचेलः संस्तैस्तुद्यमानो वस्त्रकम्बलाद्यन्वेषणपरो न स्यादित्यचेलपरीषहमाह-

मू.(६१) परिजुन्नेहि वत्थेहिं, होक्खामित्ति अचेलए ।
अदुवा सचेलए होक्खं, इह भिक्खं न चिंतए ॥

वृ. 'परिजीर्णैः' समन्तात् हानिमुपगतैः 'वस्त्रैः' शाटकादिभिः, 'होक्खामित्ति' इतिर्भिन्नक्रमः ततो भविष्यामि 'अचेलकः' चेलविकलः अल्पदिनभावित्वादेषामिति भिक्षुर्न विचिन्तयेत्, अथवा 'सचेलकः' चेलान्वितो भविष्यामि, परिजीर्णवस्त्रं, हि मा दृष्ट्वा कश्चित् श्राद्धः सुन्दरतराणि वस्त्राणि दास्यतीति भिक्षुर्न चिन्तयेत्, इदमुक्तं भवति-जीर्णवस्त्रः सन्न मम प्राक्परिगृहीतमपरं वस्त्रमस्ति न च तथाविधो दातेति न दैन्यं गच्छेत्, न चान्यलाभसम्भावनया प्रमुदितमानसो भवेदिति सूत्रार्थः ॥ इत्थं जीर्णादिवस्त्रतया अचेलं स्थविरकल्पिकमाश्रित्याचेलपरीषह उक्तः, सम्प्रति तमेव सामान्येनाह-

मू.(६२) एगया अचेलए होइ, सचेले यावि एगया ।
एयं धम्महियं नच्चा, नाणी नो परिदेवए ॥

वृ. 'एकदा' एकस्मिन् काले जिनकल्पप्रतिपत्तौ स्थविरकल्पेऽपि दुर्लभवस्त्रादौ वा सर्वथा चेलाभावेन सति वा चेले विना वर्षादिनिमित्तप्रावरणेन जीर्णादिवस्त्रतया वा 'अचेलक' इति अवस्त्रोऽपि भवति, पठ्यते च 'अचेलए सयं होइ' त्ति तत्र स्वयम्-आत्मनैव न पराभियोगतः, 'सचेलः' सवस्त्रश्चाप्येकदा स्थविरकल्पिकत्वे तथाविधालम्बनेनावरणे सति, यद्येवं ततः किमित्याह-'एतदि'त्यवस्थौचित्येन सचेलत्वमचेलत्वं च धर्म्मो-यतिधर्म्मः तस्मै हितम्-उपकारकं धर्म्महितं 'ज्ञात्वा' अवबुद्ध्य, तत्राचेलकत्वस्य धर्म्महितत्वमल्पप्रत्युपेक्षादिभिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पंचहिं ठाणेहिं पुरिमपच्छिमाणं अरहंताणं भगवंताणं अचेलए पसत्थे भवइ, तं जहा-अप्पा पडिलेहा १, वेसासिए रूवे २, तवे अनुमए ३, लाघवे पसत्थे ४, विउले इंदियनिग्गहे ५"त्ति, सचेलत्वस्य तु धर्मोपकारित्वमन्यायाद्यारम्भनिवारकत्वेन संयमफलत्वात्, 'ज्ञानी' नग्ना एव प्रायस्तिर्यग्नारकाः तद्भवभयादेव च मया सन्त्यपि वासांस्यपास्यन्त इत्येवं बोधवान्नो परिदेवयेत्, किमुक्तं भवति?,-अचेलः सन् किमिदानीं शीतादिपीडितस्य मम शरणमिति न दैन्यमालम्बेत इति सूत्रार्थः ॥ इह च केचिन्मिथ्यात्वाकुलितचेतस इदमित्थं महार्थकर्म्मप्रवादपूर्वोद्धृतप्रस्तुताध्ययनाधीतमपि सचेलत्वं तथा-

सम्यक्त्वज्ञानशीलानि, ततश्चेतीह सिद्धये।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥१॥
जटी कूर्ची शिखी मुण्डी, चीवरी नग्न एव च।
तप्यन्नपि तपः कष्टं, मौढ्यद्धिंस्रो न सिद्धयति ॥२॥
सम्यग्ज्ञानी दयावांस्तु, ध्यानी यस्तप्यते तपः।
नग्नश्चीवरधारी वा, स सिद्धयति महामुनिः ॥३॥ इति

वाचकवचनानूदितं चानुचितमित्याहुः, तान् प्रति वक्तुमुपक्रम्यते-इह यो यदर्थी न स तन्निमित्तोपादानं प्रत्यनादृतो, यथा घटार्थी मृत्पिण्डोपादानं प्रति, चारित्रार्थिनश्च यतयस्तन्निमित्तं च चीवरमिति, न चास्यासिद्धत्वं, तद्धि तस्य तदनिमित्ततया स्यात्, सा च तत्रास्य बाधाविधायितयौदासीन्येन वा?, न तावद्बाधाविधायितया, यतोऽसौ पञ्चमव्रतविघातकत्वेन संसक्तिविषयतया कषायकारणत्वेन वा?, यदि पञ्चमव्रतविघातकत्वेन, तदपि कुतः?, युक्ति इति चेत्, नन्वियं स्वतन्त्रा सिद्धान्ताधीना वा?, यदि स्वतन्त्रा ततः सलोमा मण्डूकश्चतुष्पात्त्वे सत्युत्प्लुत्य गमनात्, मृगवत्, अलोमा वा हरिणः, चतुष्पात्त्वे सत्युप्लुत्य गमनात्, मण्डूकवदित्यादिवन्न निर्मूलयुक्तेः साध्यसाधकत्वम्, उक्तं हि-

"यत्नेनानुमितोऽप्यर्थः, कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥"

सिद्धान्ताधीनयुक्तिस्तु तथाविधसिद्धान्ताभावादसम्भविनी, अथास्त्यसौ 'गामे वा नगरे वा अप्पं वा बहुं वा जाव नो परिगिण्हेज्जा' इत्यादिः, तदनुगृहीता युक्तिश्च-यद्यत्परिग्रहस्वरूपं तत्तदुपादीयमानं पञ्चमव्रतविघाति, यथा धनधान्यादि, परिग्रहस्वरूपं च चीवरमिति, नन्वसिद्धोऽयं हेतुः, तथाहि-परिग्रहस्वरूपत्वमस्य किं मूर्च्छाहेतुत्वेन धारणादिमात्रेण वा?, यदि मूर्च्छाहेतुत्वेन, शरीरमपि मूर्च्छाया हेतुर्न वा?, न तावदहेतुः, तस्यान्तरङ्गत्वेन दुर्लभतरतया च विशेषतस्तद्धेतुत्वाद्, उक्तं च-

"अह कुणसि थुल्लवत्थाइएसु मुच्छं धुवं सरीरेऽवि।
अक्केज्जदुल्लभरते काहिसि मुच्छं विसेसेण ॥"

अथास्तु तन्निमित्तमेतत्, तर्हि चीवरवत्तस्यापि किं दुस्त्यजत्वेन मुक्त्यङ्गतया वा न प्रथमत एव परिहारः?, दुस्त्यजत्वेन चेत् तदपि किमशेषपुरुषाणामुत केषाञ्चिदेव?, न तावदशेषपुरुषाणां, दृश्यन्ते हि बहवो वह्निप्रवेशादिभिः शरीरं परित्यजन्तः, अथ केषाञ्चित्, तदा वस्त्रमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केषाञ्चित् दुस्त्यजमिति तदपि न परिहार्यं, मुक्त्यङ्गतापक्षाश्रयणे च किं चीवरेणापराद्धम् ?, तस्यापि तथाविधशक्तिविकलानां शीतकालादिषु स्वाध्यायाद्युपष्टम्भकत्वेन मुक्त्यङ्गत्वाद्, अभ्युपगम्य च मूर्च्छाहेतुत्वमुच्यते-न हि निगृहीतात्मनां क्वचिन्मूर्च्छाऽस्ति, तदुक्तम्-

"सव्वत्थुवहिणा बुद्धा, संरक्खणपरिग्गहे।
अवि अप्पणोऽवि देहम्मि, नायरंति (यं) ॥"ति,

नापि धारणादिमात्रेण, एवं हि शीतकालादौ प्रतिमापप्रतिपत्त्यादिषु केनचिद्भक्त्यादिनोपरि क्षिप्तस्यापि चीवरस्य परिग्रहताप्रसङ्गः, अथ तत्र स्वयंग्रहाभावाददोषः, तर्हि स्वयंग्रहः परिग्रहत्वे हेतुः, तथा च कुण्डिकाद्यपि नोपादेयं, दृष्टेष्टविरोधि चेदम्, अथ तत्र मूर्च्छाया अभावादपरिग्रह-त्वम्, एवं सति संयमरक्षणायोपादीयमाने चीवरे तदभावात्तदस्तु, उक्तं च-

"जंपि वत्थं व पायं वा, कंबलं पायपुंछणं।
तंपि संजमलज्जट्ठा, धरंति परिहरंति य॥"

अथ संसक्तिविषयतया, यद्येवमाहारेऽपि सा किमस्ति नास्ति वा ?, न तावन्नास्ति, कृमि-कण्डूपदाद्युत्पातस्य तत्र प्रत्रिपाणि प्रतीतत्वात्, अथास्ति परं यतनया न दोषः, तदितरत्रापि तुल्यं। कषायकारणत्वेन चेत्, तत्किमात्मनः परेषां वा ?, यद्यात्मनस्तदा श्रुतमपि केषाञ्चिद-हङ्कारहेतुत्वेन कषायकारणमिति तदपि नोपादेयं स्यात्, अथ विवेकिनां त तदहंकृतिहेतुः, "प्रथमं ज्ञानं ततो दये"ति नीतितो धर्मोपकारि चेति तदुपादानं, चीवरेऽपि समानमेतत्, अथ चीवरस्य धर्मानुपकारित्वादतुल्यता, ननु कुत एतदवसितं, किमचीवरास्तीर्थकृत इति श्रुतेरुत जिनकल्पाकर्णनात्, 'जिताचेलपरीषहो मुनि' रिति वचनतो वा ?, न तावदाद्यो विकल्पः, सूत्रे हि तीर्थकृतामचीवरत्वं कदाचित्सर्वदा वा ?, कदाचिच्चेत्को वा किमाह ?, कदाचिद-स्माकमप्यस्याभिमतत्वात्, अथ सर्वदा, तन्न, 'सव्वेऽपि एवगदूसेन निग्गया जिनवरा उ चउवीस' मिति वचनात्, अथ तत्र 'एगदोसेणं' तिपाठः, सर्वेऽपि संसारदोषेण एकेन निर्गता इतिकृत्वा, नन्वेवमनवस्था, सर्वत्र सर्वैरपि स्वेच्छारचितपाठानां सुकरत्वात्, किं च-तीर्थकृतामचीवरत्वे तेषामेव तद्धर्मोपकारीति निश्चयोऽस्तु, नापरेषां, न हि यदेव तेषां धर्मोपकारी तदेवेतरेषामपि, अन्यथा यथा न ते परोपदेशतः प्रवर्त्तन्ते यथा च छद्मस्थावस्थायां परोपदेशं दीक्षां वा न प्रयच्छन्ति, तथाऽन्यैरपि विधेयमिति मूलच्छेद एव तीर्थस्य्, उक्तं च-

"न परोवएसविसया न य छउमत्था परोवएसंपि।
देंति न य सिस्सवग्गं दिक्खंति जिना जहा सव्वे॥१॥
तह सेसेहि य सव्वं कज्जं जइ तेहिं सव्वसाहम्मं।
एवं च कओ तित्थं ? न चेदचेलत्ति कोगाहो ?॥२॥"

अथ जिनकल्पाकर्णनात्, तत्र हि न किञ्चिदुपकरणमिति चीवरस्याप्यभावः, तथा च न तस्य धर्मोपकारिता, ननु जिनकल्पिकानामुपकरणाभावः, प्रवादतः आगमतो वा ?, न तावदाद्य-पक्षो, न हि वसति किलात्र वटवृक्षे रक्ष इत्यादिनिर्मूलप्रवादानां प्रमाणता, नाप्यागमतः, तेषामपि तत्र शक्त्यपेक्षयोपकरणप्रतिपादनात्, तदुक्तम्-

"जिनकप्पियादओ पुण सोवहओ सव्वकालमेगंतो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवगरणमामेसिं पुरिसावेक्खाए बहुभेयं ॥"

अथवा अस्तु जिनकल्पिकानामुपकरणाभावः, तथापि धृतिशक्तिसंहननश्रुतातिशययुक्तानामेव तत्प्रतिपत्तिः अथ रथ्यापुरुषाणामपि ?, यद्याद्यो विकल्पस्तत्किमेवंविधाः सम्प्रत्यपि सन्ति न वा ?, सन्ति चेदुपलब्धिलक्षणप्राप्ता उपलभ्येरन्, अनुपलब्धिलक्षणप्राप्ताश्च कुतः सत्त्वेन निश्चीयन्ते ?, अथ न सन्ति, तादृशामेव जिनकल्पप्रतिपत्तिः, तर्हि वृथैव -

"मनपरमोहिपुलाए आहारग खवग उवसमे कप्पे।
संजमतिय केवलि सिज्झणा य जंबुम्मि वोच्छिन्ना ॥"

इत्याप्तवचनानाश्रयणं, यदि रथ्यापुरुषाणामपीति कल्प्यते, तिरश्चामपि तत्कल्पनाऽस्तु, अथ देशविरतिभाज एव त इति न तेषां तत्प्रतिपत्तिः, तर्हि सर्वविरतिस्तत्कारणं, तथा च तद्वता एकेन यत्कृतं तत्किमखिलैरपी तद्वद्भिराचरणीयमथ तथाविधशक्तियुक्तैरेव ?, यद्याद्यो विकल्पस्तदैकस्मिन् मासषण्मासादिकं तपश्चरत्यन्यैरपि तच्चरणीयं स्याद्, अथ द्वितीयः पक्षस्तर्हि जिनकल्पोऽपि तथाविधशक्तियुक्तैरैव प्रतिपत्तव्यः, अथ तथाविधशक्तिविकलानां तत्तपश्चरतां बहुतरदोषसम्भव इति न तच्चरणं, तदिहापि तुल्यं, तथाहि- सम्भवत्येवेदानीन्तनयतीनां तथाविधशक्तिसंहननविकलतया हिमकणानुषक्तशीतादिषु बहुतरदोषहेतुकमनग्यारम्भादिकं तथा तथाविधाच्छादनाभावातः शीतादिखेदितानां शुभध्यानाभावेन सम्यक्त्वादिविचलनम्, उक्तं च वाचकैः-

"शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः।
मा सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥"

यच्च 'जिताचेलपरीषहो मुनि' रिति वचनतो न चीवरं धर्मोपकारीति, तत्र जिताचेलपरीषहत्वं चेलाभावनैवाहोश्विदेषणाशुद्धतत्परिभोगेनापि ?, यदि चेलाभावेनैव, ततः क्षुत्परीषहजयनमप्याहाराभावेनैवेति व्रतग्रहणकाल एवानशनमायातम्, एतच्च भवतोऽपि नाभिमतं, ततः परिशुद्धोपभोगितया जिताचेलपरीषहत्वमिति द्वितीय एव पक्षः, स चास्मत्पथवर्त्येवेति न कुतोऽपि चीवरस्य धर्मानुपकारित्वनिश्चयः, अथ परेषां कषायकारणत्वेन चारित्रबाधकत्वं चीवरस्य, तर्हि धर्मादयोऽपि कस्यचित् कषायकारणं न वा ?, न तावन्न, तेऽपि कस्यचित्कषायहेतव इति चीवरवत्तेऽपि हातव्याः, आह च-

"अत्थि य किं किंचिजए जस्स व कस्स व कसायबीजं तं।
वत्थुं न होज्ज ? एवं धम्मोऽवि तुमे न घेतव्वो ॥१॥
जेन कसायनिमित्तं जिनोऽवि गोसालसंगमाईणं।
धम्मो धम्मपरावि य पडिनीयाणं जिनमयं च ॥२॥

अथैषां मुक्त्यङ्गतया कषायहेतुत्वेऽपि न हेयता, तदिहापि समानम्, उक्तं च वाचकसिद्धसेने-

"मोक्षाय धर्मसिद्ध्यर्थं, शरीरं धार्यते यथा।
शरीरधारणार्थं च, भैक्षग्रहणमिष्यते ॥१॥
तथैवोपग्रहार्थाय, पात्रं चीवरमिष्यते।
जिनैरुपग्रहः साधोरिष्यते न परिग्रहः ॥२॥" इत्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औदासीन्येनापि न चीवरस्य चारित्रं प्रत्यनिमित्तता, तस्य तदुपकारित्वात्, यच्च यत्रोपकारि न तत्तस्मिन्नुदासीनं, यथा तन्त्वादयः पटे, चारित्रोपकारि च चीवरं, तथाहि-संयमात्मकं चारित्रं, न च तस्य तत्परिहेण शुद्धिरिति, आगमश्च-

"किं सञ्जमोवयारं करेइ वत्थाइ जइ मई सुणसु।
सीयत्ताणं ताणं जलणतणगयाण सत्ताणं ॥१॥
तह निसि चाउक्कालं सज्झायज्झाणसाहणमिसीणं।
हिममहियावासोसारयाइरक्खाणिमित्तं तु ॥२॥"

इत्यतः स्थितमेतत्-चारित्रनिमित्तं चीवरमिति नासिद्धता हेतोः, विरुद्धत्वानैकान्तिकत्वे तूक्तानुसारतः परिहर्तव्ये। ततश्च-

"निर्ग्रन्थानाममलज्ञानयुतैस्तीर्थकृद्भिरुक्तानि।
सम्यग्व्रतानि यस्मान्नैर्ग्रन्थ्यमतः प्रशंसन्ति ॥१॥
रागाद्यपचयहेतुं नैर्ग्रन्थ्यं स्वप्रवृत्तितस्तेषाम्।
तद्वृद्धिरतोऽवश्यं वस्त्रादिपरिग्रहयुतानाम् ॥२॥

इत्यादि दुर्मतिपरिस्पन्दितमपकर्णनीयम्। सम्प्रति 'महल्लेत्तिद्वारं, तत्र च 'एयं धम्महियं नच्चे'त्यादिसूत्रसूचितं दृष्टान्तमाह-

नि.[९४] वीयभय देवदत्ता गंधारं सावयं पडियरित्ता।
लहइ सयं गुलियाणं पज्जोएण नी(नानि) ओज्जेनिं॥

नि.[९५] दट्ठूण चेडिमरणं पभावई पव्वइत्तु कालगया।
पुक्खरकरणं गहणं दसउरपज्जोयमुयणं च।

नि.[९६] माया म रुद्दसोमा पिया य नामेन सोमदेवत्ति।
भाया य फग्गुरक्खिय तोसलिपुत्ता य अयरिया॥

नि.[९७] सिंहगिरि भद्दगुत्ते वयरक्खमणा पढित्तु पुव्वगयं।
पव्वाविओ य भाया रक्खियखमणेहि जनओ य॥

वृ. वीतभये देवदत्ता गन्धारं श्रावकं प्रतिजागर्य लभते शतं गुलिकानां प्रद्योतेनानीतोज्जयिनीं, दृष्ट्वा चेटीमरणं प्रभावती प्रव्रज्या कालगता पुष्करकरणं ग्रहणं दशपुरप्रद्योतमोचनं च, माता च रुद्रसोमा पिता च नाम्ना सोमदेव इति भ्राता च फल्गुरक्षितः तोसलिपुत्राश्चाचार्याः सिंहगिरिभद्रगुप्ताभ्यां च वज्रक्षमणात्पठित्वा पूर्वगतं प्रव्रजितश्च भ्राता रक्षितक्षमणैर्जनकश्चेति गाथाचतुष्टयाक्षरार्थः॥

भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-जीवसामिपडिमावत्तव्वयं दसपुरुप्पत्तिं च भाणिऊणं ताव भाणियव्वं जाव अज्जवयरसामिनो सयासे नव पुव्वाणि दसमस्स य पुव्वस्स किंचि अहिज्जिऊण अज्जरक्खिया दसपुरमेव गया, तत्थ सव्वो सयणवग्गो पव्वावितो-माया भाया भगिनी, जो सो तस्स खंतो सोऽवि तेसिं अनुरागेणं तेहिं चेव सम्मं अच्छइ, नो पुण लिंगं गेण्हइ लज्जाए, किह समणतो पव्वइस्सं?, इत्थं मम धूयातो सुण्हातो णत्तुगीतो, तासिं पुरतो न तरामि नग्गो अच्छिहं, एवं सो तत्थ अच्छइ, बहुसो आयरिया भणंति, ताहे सो भणति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ मम जुबलएणं कुंडियाए छत्तेणं उवहणाहिं जन्नोवइएण य समं पव्वावेह तो पव्वयामि, पव्वइतो सो पुण चरणकरणसज्झायं अनुयत्तंतेहि गिण्हावियव्वो, ताहे ते भणंति-अच्छह तुब्भे कठिपट्टएणं, सोऽवि थेरो भणइ-छत्तएणं विना न तरामि अच्छिउं, छत्तयंपि, करगेण विना दुक्खं उच्चारपासवणं वोसिरिउं, बंभसुत्तगंपि अच्छउत्ति, अवसेसं सव्वं परिहरइ।

अन्नया य चेइयाइं वंदिउं गया, आयरिया चेडगरूवाणि गाहंति, भणह-सव्वे वंदामो एगं छत्तइल्लं मोत्तुं, एवं भणितो, ताहे सो जाणति-इमे मम पुत्ता णत्तुया य वन्दिज्जंति, अहं कीस न वंदिज्जामि ?, ताहे भणति-किमहं अपव्वइओत्ति ?, ताणि भणंति-किं पव्वइयगाणोवाण-हकरगबंभसुत्तछत्तगाणि भवंति ?, ताहे सो जाणति-एयाणिवि ममं पडिचोएंति, ता छड्डेमि, ताहे पुत्तं भनति-अलाहि पुत्तगा ! छत्तेणं, ताहे ते भनंति-अलाहि, जाहे उण्हं होहिति ताहे कप्पो उवरिं करेहत्ति, एवं ताणि मोत्तुं करइल्लुं, तत्थ से पुत्तो भणति-मत्तएणं चेव सन्नाभूमिं गम्मइ, एवं जन्नोवइयं च मुयइ,

ताहे आयरिया भणंति-को वा अम्हे न जाणइ जहा बंभणा, एवं ताणि तेन मुक्काणि, पच्छा ताणि पुणो भणंति सव्वे वंदामो मोत्तूण कडिपट्टइल्लं, ताहे सो रुट्ठो भणति-सह अज्जयपज्जएहिं मा वन्दह, अन्ने वंदिहंति ममं, एयं कडिपट्टयं न छड्डेमि, तत्थ य साहू भत्तपच्चक्खायतो, ताहे तस्स निमित्तं कडिपुट्टवोसिरणट्टयाए आयरिया भणंति-एयं महाफलं हवइ जो साधुं, वहइ, तत्थ य पढमपव्वइया सन्निया-तुमे भणिज्जह-अम्हे एयं वहामो, एवं ते उवट्ठिया, तत्थ य आयरिया भणंति-अम्हं सयणवग्गो मा निज्जरं पावउ ?, भो तुब्भे चेव सव्वे भणह अम्हे च्चेव वहामो, ताहे सो थेरो भणति-किं पुत्ता ! एत्थ बहुतरया निज्जरा ?, आयरिया-भणंति-बाढं, किं एत्थ भणियव्वं ?, ताहे सो भणति-तो खाइ खहंपि वहामि, आयरिया भणंति-एत्थ उवसग्गा उप्पज्जंति, चेडरूवाणि लग्गेंति, यदि तरसि अहियासिउं, अह नाहियासेसि ताहे अम्हं न सुंदरं ताहे अम्हं न सुंदरं भवति, एवं सो थिरो कओ, जाहे सो उक्खित्तो साहू मग्गओ वच्चइ, पच्छओ संजईओ ठिआतो, ताहे खुड्डगा भणिआ-एत्ताहे कडिपट्टयं मुयह, ताहे सो मुत्तुमारद्धो, ताहे अन्नेहिं भणिओ-मा मोच्चिहि, तत्थ से अन्नेण कडिपट्टओ पुरओ काऊण दोरेण बद्धो, ताहे सो लज्जिओ तं वहइ, मग्गतो मम पिच्छंति सुण्हाओ अ, एवं तेनवि उवसग्गो उट्ठिओत्तिकाऊण वूढं, पच्छा आगतो तहेव, ताहे आयरिया भणंति-किं अज्ज खंता ! इमं ?, ताहे सो भणइ-सो एस अज्ज पुत्त ! उवसग्गो उवट्ठिओ, आनेह साडयं, ताहे भणइ-किं व साडएणंति ?, जं दट्ठवं तं दिट्ठं, चोलपट्टओ चेव मे भवउ, एवं ता सो चोलपट्टंपि गिण्हा-विओ। तेन पुव्वं अचेलपरिसहो नाहियासितो पच्छाऽहियासिओत्ति। अचेलस्य चाप्रतिबद्ध-विहारिण: शीतादिभिरभिभूयमानत्वेनारतिरप्युत्पद्येतातस्तत्परीषहमाह-

मू. (६३) *गामानुगामं रीयंतं, अनगारमकिंचनं।*
अरई अनुप्पविसे, तं तितिक्खे परीसहं॥

वृ. ग्रसते बुद्ध्यादीन् गुणान् इति ग्राम: स च जिगमिषत: अनुग्रामश्च-तन्मार्गानुकूल: अननुकूलगमने प्रयोजनाभावाद् ग्रामानुग्रामं, यद्वा ग्रामश्च महान् अनुग्रामश्च स एव लघुर्ग्रामाणु-ग्रामम्, अथवा-ग्राममिति रूढिशब्दत्वादेकस्माद्ग्रमादन्यो ग्राम: ततोऽपि चान्यो ग्रामानुग्राम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुच्यते, नगरोपलक्षणमेतत्, ततो नगरादींश्च, किमित्याह-'रीयंतं'ति तिङ्व्यत्ययाद्रीयमाणं-विहरन्तम् 'अनगारम्' उक्तस्वरूपम् 'अकिञ्चनं' नास्य किञ्चन प्रतिबन्धास्पदं धनकनकाद्य-स्तीत्य-किञ्चनो-निष्परिग्रहः, तथाभूतम् 'अरतिः' उक्तरूपा 'अनुप्रविशेत्' मनसि लब्धास्पदा भवेत्, 'त'मित्यरतिस्वरूपं 'तितिक्षेत' सहेत परीषहमिति सूत्रार्थः ॥ तत्सहनोपायमेवाह-

मू. (६४)　　अरइं पिट्ठओ किच्चा, विरओ आयरक्खिए।
धम्मारामे निरारंभे, उवसंते मुनी चरे॥

वृ. 'अरतिं' संयमविषयां मोहनीयकर्म्मप्रकृतिरूपां पृष्ठतः कृत्वा कोऽर्थः ?, धर्मविघ्नहेतु-रियमितिमत्या तिरस्कृत्य, किमित्याह-'विरतः' हिंसादिभ्य उपरतः, आत्मा रक्षितः, दुर्गति-हेतोरपध्यानादेरनेनत्यात्मरक्षितः, आहिताग्न्यादिषु दर्शनात् क्तान्तस्य परनिपातः, आयो वा-ज्ञानादिलाभो रक्षितोऽनेनेत्यायरक्षितः धर्म्मे-श्रुतधर्मादौ आङित्यभिव्याप्त्या रमते-रतिमान् भवतीति धर्मारामः, यद्वा-धर्म एव सततमानन्दहेतुतया प्रतिपाल्यतया वा आरामो धर्मारामस्तत्र, स्थित इति गम्यते, निर्गत आरम्भाद्-असत्क्रियाप्रवर्त्तनलक्षणणात् निरारम्भः 'उपशान्तः' क्रोधाद्युपशमात् 'मुनिः' सर्वविरतिप्रतिज्ञाता चरेत्, 'पलिओवमं झिज्जइ सागरोवमं, किमंग पुन मज्झ इमं मनोदुहं'ति विचिन्तयन्संयमाध्वनि यायात्, न पुनरुत्पन्नारतिरपि अवधावनानु-प्रेक्षी भवेद्। इह च विरतादिविशेषणानि अरतितिरस्करणफलतया, यद्वा यत एव विरतोऽत एवात्मरक्षित इत्यादिहेतुफलतया नेयानीति सूत्रार्थः ॥

इदानीं तापसद्वारमनुस्मरन् 'अरई अनुप्पवेसे' इत्यादि-सूत्रसूचितमुदाहरणमाह-

नि. [९८]　　अयलपुरे जुवराया सीसो राहस्स नगरीमुज्जेनिं।
अज्जा राहक्खमणा पुरोहिए रायपुत्तो य॥

नि. [९९]　　कोसंबीए सिट्ठी आसी नामेन तावसो तहियं।
मरिऊण सूयरोरग जाओ पुत्तस्स पुत्तोत्ति॥

वृ. अचलपुरे युवराजः शिष्यो राधस्य नगरीमुज्जयिनीम् आर्या राधक्षमणाः पुरोहितो राजपुत्रश्च कौशाम्ब्यां श्रेष्ठी आसीन्नाम्ना तापसः तत्र मृत्वा 'सूयरोरगो' त्ति सुपो लापः शूकर उरगो जातः पुत्रस्य पुत्र इति गाथाद्वयाक्षरार्थः ॥ एतदर्थस्तु सम्प्रदायादवसेयः, स चायम्-

अचलपुरं नाम पतिट्ठाणं, तत्थ जियसत्तू राया, तस्स पुत्तो जुवराया, सो राहायरियाण अंतिए पव्वइओ। सोय अन्नया विहरंतो गतो तगरं नगरिं, तस्स य राहायरियस्स सज्झंतेवासी अज्जरा-हस्वमणा नाम उज्जेनीए विहरंति, तओ आगया साहुणो तगरं, गया रासमीवं, ते पुच्छिया-निरुवस्सगंति, भणंती-रायपुत्तो पुरोहियपुत्तो य वाहिंति, तस्स जुवरायपव्वतियगस्स सो रायपुत्तो भत्तिज्जतो, मा संसारं भमिहितित्ति आपुच्छिऊण आयरिए गओ उज्जेणिं, भिक्खवेलाए उग्गा-हेऊण पट्टितो, आयरिएहिं भणिओ-अच्छाहि, सो भणइ-न अच्छामि, नवरं दाएह तं पंडनीयघरं, चेल्लगो भणिओ-वच्च दाएहि, तेन दाइयं, सो तत्थ गतो, वीसत्थो पविट्ठो, तत्थ ते दोऽवि अच्छंति,

ते तं पिच्छिऊण उट्ठिया, तेनवि महया सद्देणं धम्मलाभियं, ते भणंति-अहो! लट्ठं पव्वइयगो अम्हंतेन गतो, वंदामोत्ति, भणंति ते आयरिया! तुब्भे गाइउं जाणह ?, तेन भणियं-आमं जाणामो, तुब्भे वाएह, ते आढत्ता, जाव न जाणंति, तेन भण्णइ-एरिसगा चेव तुब्भे कोलियगा,

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

न किंचि जाणह, ते रुट्ठा उद्धाइया, तेन घेत्तुं तेसिं निजुद्धं जाणंतएण सव्वे संधी खोइया, पढमं ताव पिट्टिया, ते हम्मंता राडिं करेंति, परियणो जाणइ-सो एस पव्वइओ हम्मंतो राडिं करेइ, सोऽवि गतो, पच्छा तेहिं दिट्ठा, नवि जीवंति, नवि मरंति, नवरं निरिक्खंति एक्केक्कं दिट्ठीए, पच्छा रन्नो सिट्ठं पुरोहियस्स य-जहा कोऽवि पव्वइयगो, तेन दोऽवि जणा संखलेत्तूण मुक्का, पच्छा राया सव्वबलेनागतो पव्वइगाण मूले, सोऽवि साहू एक्कपासे अच्छइ परियट्टंतो, राया आयरियाणं पाए पडिओ, पसायमावज्जह, आयरिओ भणइ-अहं न याणामि, महाराय! इत्थ एगो साहू पाहुणो, जइ परं तेन होज्जा, राया तस्स मूलमागतो, पच्चभिन्नाओ य, ततो तेन साहुणा भणितो-धिरत्थु ते रायत्तणस्स, जो तुमं अप्पणो पुत्तमंडाणवि निग्गहं न करेसि, पच्छा राया भणइ-पसायं करेह, भणइ-जइ परं पव्वयंति तो णं मोक्खो, अन्नहा नत्थि, राइणा पुरोहिएण य भण्णइ-एवं होउ, पव्वयंतु, पुच्छिआ भणंति-पव्वयामो, पुव्वं लोओ कतो, पच्छा मुक्का, पव्वइया। सो य रायपुत्तो निस्संकिओ चेव धम्मं करेइ, पुरोहियपुत्तस्स पुण जाइमओ, अम्हे मड्डाए पव्वाविया, एवं ते दोऽवि कालं काऊण देवलोगेसु उववन्ना।

इओअ य कोसंबीए नयरीए तावसो नाम सेट्ठी, सो मरिऊण नियघरे सूयरो जाओ, जातिस्सरो, ततो तस्स चेव दिवसगे पुत्तेहिं मारितो, पच्छा तहिं चेव घरे उरगो जाओ, तहिंपि जाइस्सरो जातो, तत्थऽवि अंतो घरे मा स्वाहितित्ति मारितो, पच्छा पुणोऽपि पुत्तस्स पुत्तो जातो, तत्थवि जाइं सरमाणो चिंतेइकिंहमहं अप्पणो सुण्हं अंमंति वाहरिहामि, पुत्तं वा तायंति, पच्छा मूयत्तणं करेइ, पच्छा महंतीभूओ साहूणं अल्लीणो, धम्मोऽनेन सुतो।

इतो य सो धिज्जाइयदेवो महाविदेहे तित्थयरं पुच्छइ-किमहं सुलहबोहिओ दुल्लभबोहिओत्ति?, ततो सामिणा भणितो-दुल्लभबोहिओऽसि, पुणोऽवि पुच्छइ-कत्थऽह उववज्जिउकामो?, भगवया भण्णइ-कोसंबीए मूयस्स भाया भविस्ससि, सो य मूओ पव्वइस्सइ, सो देवो भगवंतं वंदिऊण गओ मूयगस्सगासं, तस्स सो बहुयं दव्वजायं दाऊण भणइ-अहं तुज्झ पिउधरे उववज्जिस्सामि, तीसे य दोहलओ अंबएहिं भविस्सइ, अमुगे पव्वए अंबगो सयापुप्फफलो कओ मए, तुमं ताए पुरओ नामगं लिहिज्जासि, जहा-तुब्भं पुत्तो भविस्सइ, जइ तं मम देसि तो ते आनेमि अंबफलाणित्ति, तओ ममं जायं संतं तहा करिज्जासि जहा धम्मे संबुज्झामित्ति, तेन पडिवन्ने गतो देवो।

अन्नया कतिवयदिवसेसु चउऊण तीए गब्भे उववन्नो, अकाले अंबदोहलो जाओ, स मूयगो नामगं लिहति-जइ मम गब्भं देसि ता आनेमि अंबगाणि, ताए भण्णइ-दिज्जत्ति, तेन आनिआणि अंबफलाणि, अवनीओ दोहलो, कालेन दारगो जाओ, सो तं खुड्डुगं चेव होतं साहूण पाएसु पाडेइ, सो धाहातो, करेति, न य वंदति, पच्छा संतपरितंतो मूगो पव्वइतो, सामन्नं काऊण मतो, तेन ओही पउत्ता, जाव नेण सो दिट्ठो, पच्छा नेन तस्स जलोयरं कयं, जेन न सक्केति उट्ठिउं, सव्वेवेज्जेहिं पच्चक्खातो, सो देवो डोंबरूवं काऊण घोसंतो हिंडइ-अहं वेज्जो सव्वगाही उवसमेमि, सो भणइ-मज्झं पोट्टं सज्जवेहि, तेन भणियं-तुब्भं असज्झो वाही, यदि परं तुमं ममं चेव ओलग्गसि तो ते सिज्झावेमि, सो भणति-वच्चामि, तेन सज्झवितो, गतो तेन सद्धिं, तेन तस्स सत्थकोसगो अल्लवितो, सो ताए देवमायाए अतीव भारितो, जाव पव्वइया एगंमि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पएसे पढंति, विज्जेण भण्णइ-जइ पव्वयसि तो मुयामि, सो तेन भारेण अतीव परिताविज्जंतो चिंतेइ-वरंमे पव्वइउं, भणइ-पव्वयामि, पव्वइओ, देवे गतेनाचिरस्स उप्पव्व-इओ, तेन देवेन ओहिणा पिच्छिऊण सो चेव से पुणाऽवि वाही कओ, तेनेव उवाएण पुणोऽवि पव्वाविओ,

एवं एक्कसिं दो तिन्नि वारा उप्पव्वइतो, तइया वाराए गच्छइ देवोऽवि तेनेव समं, तणभारं गहाय पलित्तयं गामं पविसति, तेन भण्णइ-किं तणभारएण पलित्तं गामं पविससि ?, तेन भण्णइ-कहं तमं कोहमानमायालोभसंपलित्तं गिहिवासं पविससि ?, तहावि न संबुज्झइ, पच्छा दोऽवि गच्छंति, नवरं देवो अडविए उप्पहेणं संपट्ठितो, तेन भण्णइ-कहं एत्तो तं पंथं मोत्तूण पविससि ?, देवेण भण्णइ-कहं तुमं मोक्खपहं मोत्तूणं संसाराडविं पविससि ?, तहावि न संबुज्झइ, पुणो एगंमि देवकुले वाणमंतरो अच्चितो हिट्ठाहुत्तो पडइ, सो भणइ-अहो वाण-मंतरो ! अधन्नो अपुण्णो य जो उवरिहुत्तो कओ अच्चियओ य हेट्ठाहुत्तो पडइ, तेन देवेन भण्णइ-अहो ! तुमंपि अधन्नो जो उप्पराहुत्तो ठविओ अच्चणिज्जे य ठाणे पुनो पुनो उप्पव्व-यसि, तेन भण्णइ-कोऽसि तुमं ?, तेन मूयगरूवं दंसियं, पुव्वभवो से कहितो, तो सो भणइ-को पच्चओ ?, जहाऽहं देवो आसि, पच्छा सो देवो तं गहाय गओ वेयड्ढपव्वयं, सिद्धाययानं कूडं च, तत्थ तेन पुव्वं चेव संगारो कतिल्लओ जहा-यदि अहं न संबुज्झेज्ज तो एयं ममच्चयं कुंडलजुयलं नामयंकियं सिद्धाययनपुक्खरिणीए दरिसिज्जासि, तेन से दंसियं, सो तं कुंडलं सनामकियं पिच्छिऊण जाइस्सरो जातो, संबुद्धो पव्वइतो जाओ, संजमे य से रती जाया, पुव्वं अरती आसि, पच्छा रति जाया। उत्पन्नसंयमारतेश्च स्त्रीभिरुपनिन्त्र्यमाणस्य तदभिलाष प्रादुः-ष्यादतस्तत्परीषहमाह-

मू. (६५) *संगो एस मनुस्साणं, जाओ लोगंसि इत्थिओ।*
जस्स एया परिन्नाया, सुकडं तस्स सामन्नं॥

वृ. सजन्ति-आसक्तिमनुभवन्ति रागादिवशगा जन्तवोऽत्रेति सङ्गः 'एषः' अनन्तरं वक्ष्यमाणो 'मनुष्याणां' पुरुषाणां, तमेवाह-'या' इत्यविशेषाभिधानं ततो याः काश्चन मानुष्यो देव्यस्तिरश्चयो वा, 'लोगंसि'त्ति लोके तिर्यग्लोकादौ 'स्त्रियो' नार्यश्च, एताश्च हावभावादिभिः अत्यन्तमासक्तिहेतवो मनुष्याणामित्येवमुक्तम्, अन्यथा हि गीतादिष्वपि सजन्त्येव मनुष्याः, मनुष्योपादानं च तेषामेव मैथुनसंज्ञातिरेकः प्रज्ञापनादौ प्ररूपित इति, अतः किमित्याह-'यस्य' इति यतेः 'एताः' स्त्रियः परीति-सर्वप्रकारं ज्ञाताः परिज्ञाताः, तत्र ज्ञपरिज्ञयेह परत्र च महानर्थ-हेतुतया विदिताः, तथा चागमः-

"विभूसा इत्थिसंसग्गी, पणीयं रसभोयणं।
नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा॥"

प्रत्याख्यानपरिज्ञय च, तत एव च प्रत्याख्याताः, 'सुकडं'ति सुकृतं सुष्ठवनुष्ठितं, पाठान्त-रतः-'सुकरं' वा सुखेनैवानुष्ठातुं शक्यं 'तस्स' त्ति सुब्व्यत्ययात्तेन 'सामण्णं'ति श्रामण्यं-व्रतं, किमुक्तं भवति ?-अवद्यहेतुत्यागो हि व्रतं, रागद्वेषावेव च तत्त्वतस्तद्धेतू, उक्तनीतितश्च न स्त्रीभ्यः परं तन्मूलमिति तत्प्रत्याख्यानत एव सुकृतत्वं श्रामण्यस्य, यथोक्तनीतितः स्त्रिय एव दुस्त्यजाः ततस्तत्त्यागे त्यक्तमेवापरमिति तत्प्रत्याख्यानतः सुकृतत्वं श्रामण्यस्योच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यति हि-

"एए उ संगे समइक्कमित्ता, सुहुत्तरा चेव हवंति सेसा।
जहा महासागरमुत्तरित्ता, नई भवे अवि गंगासमाणा॥"

इति सूत्रार्थः। अतः किं विधेयमित्याह-

मू. (६६) *एवमाणाय मेहावी, पंकभूयाउ इत्थीओ।*
नो ताहिं विनिहन्निज्जा, चरे अत्तगवेसए॥

वृ. 'एवम्' इत्यनन्तरोक्तेन प्रकारेणात्यन्तासक्तिहेतुत्वलक्षणेन 'आज्ञाय' स्वरूपाभिव्याप्ता अवगम्य 'मेधावी' अवधारणशक्तिमान् पङ्कः-कर्दमः तद्भूताः-मुक्तिपथप्रवृत्तानां विबन्धकत्वेन मालिन्यहेतुत्वेन च तदुपमाः, तुरवधारणार्थः, ततः पङ्कभूता एव स्त्रियः, पठ्यते च-'एवमादाय मेहावी जहा एया लहुस्सग'त्ति 'एवम्', अनन्तर एव वक्ष्यमाणमर्थम् 'आदाय' बुद्धा गृहीत्वा मेधावी, तमेवाह-'यथे'त्युपदर्शने, 'एताः'स्त्रियः 'लहुस्सग'त्ति तुच्छाशयत्वादिना लध्व्यः, ततः किमित्याह-'नो' नैव 'ताभिः' 'स्त्रीभिः' 'विनिहन्यात्' विशेषेणसंयमजीवितव्यव्यपरोपणात्मकेनातिशयेन च-सामस्त्यतदुच्छेदरूपेणतिपातयेत्, आत्मानमिति गम्यते, कृत्यमाह-'चरेत्' धर्मानुष्ठानमासेवेत, आत्मानं गवेषयते-कथं मयाऽऽत्मा भवान्निस्तारणीय इत्यन्वेषयते आत्मगवेषकः, 'सिद्धिः स्वरूपापत्ति'रिति वचनात् सिद्धिर्वा आत्मा, ततः कथं ममासौ स्यादित्यन्वेषकः आत्मवगेषको, यद्वा आत्मानमेव गवेषयते इत्यात्मगवेषकः, किमुक्तं भवति ?-चित्रालङ्कारशालिनीरपि स्त्रियोऽवलोक्य तद्दृष्टिन्यासस्य दुष्टतावगमात् झगिति ताभ्यो दृगुपसंहारत आत्माऽन्वेष्टैव भवति, उक्तं हि-

"चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकियं।
भक्खरंपिव दट्ठूणं दिट्ठिं पडिसमाहरे॥"

इति सूत्रार्थः॥ सम्प्रति प्रतिमाद्वारं विवृण्वन् 'यस्यैताः परिज्ञाता' इत्यादिसूत्रसूचितं चैदंयुगीनजनदाढर्योत्पादकं दृष्टान्तमाह-

नि.[१००] उसभपुरं रायगिहं पाडलिपुत्तस्स होइ उप्पत्ती।
नंदे सगडाले थूलभद्द सिरिए वररुई य॥

नि.[१०१] तिण्हं अनगाराणं अभिग्गहो आसि चउण्ह मासाणं।
वसहीमित्तनिमित्तं को कहि वुत्थो ? निसामेह॥

नि.[१०२] गणियाघरम्मि इक्को वुत्थो बीओ उ वग्घवसहीए।
सप्पवसहीइ तइओ को दुक्करकारओ इत्थं ?॥

नि.[१०३] वग्घो वा सप्पो वा सरीरपीडाकारा उ भइयव्वा।
नाणं व दंसणं वा चरित्तं(यं) व न पच्चला भित्तुं॥

नि.[१०४] भयवंपि थूलभद्दो तिक्खे चंकम्मिओ न उण छिन्नो।
अग्गिसिहाए वुत्थो चाउम्मासे न उण दड्ढो॥

नि.[१०५] अन्नोऽवि य अनगारो भणमाणोऽहंपि थूलभद्दसमो।
कंबलओ चंदनयाइ मइलिओ एगराईए॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. वृषभपुरं राजगृहं पाटलिपुत्रस्य भवत्युत्पत्तिः, नन्दः शकडालः स्थूलभद्रः सिरियको वररुचिश्च, त्रयानामनगाराणां अभिग्रह आसीत् 'चउण्हं मासाणं' सुब्व्यत्ययाच्चतुर्षु मासेषु वसतिमात्रनिमित्तं, कः कुत्रोषितः ?, निशामयत-गणिकागृह एको, द्वितीय उषितस्तु व्याघ्रवसतौ, सर्पवसतौ तृतीयः, को दुष्करकारकोऽत्र ?, तेषु मध्ये व्याघ्रो वा सर्प्पो वा शरीरपीडाकरौ तु भक्तव्यौ, ज्ञानं वा दर्शनं वा चारित्रं वा न प्रत्यलौ भेत्तुं, भगवानपि स्थूलभद्रः तीक्ष्णेनिशितासिभारादौ चंक्रमितो न पुनश्छिन्नः, अग्निशिखायामुषितश्चातुर्मास्यां न पुनर्दग्धः, अन्योऽपि चानगारो भणन्नहमपि स्थूलभद्रसमः कम्बलश्चन्दनिकायाम्-उच्चाभूमौ मलिनित इति गाथाषट्कार्थः ॥ एतदर्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

पुव्विं खिइप्पइट्ठियं नाम नयरं, तत्थ वत्थुंमि खीणे चणगपुरं निविट्ठं, ततो उसहपुरं, ततो रायगिहं, ततो चंपा, ततो पाडलिपुत्रं इच्चाइ भाणियव्वं जाव सगडाले पंचत्तमुवगते नंदेन सिरितो भणितो-कुमारामच्चत्तणं पडिवज्जाहि, सो भणइ-मम भाया जेट्ठो थूलभद्दो बारसमं वरिसं गणियाघरं पविट्ठस्स, सो सद्दावितो भणइ-चिंतेमि, राया भणइ-असोगवणियाए चिंतेहि, सो तत्थ अतिगतो चिंतेति-केरिसं भोगकज्जं वक्खित्ताणं ?, पुनरवि नरगं जातियव्वं होहित्ति, एए नाम परिनामदुस्सहा भोगत्ति पंचमुट्ठियं लोयं काऊण पाऊयं कंबलरयणं छिंदित्ता रओहरणं काउं रन्नो मूलं गतो, एयं चिंतिय, राया भणइ-सुचिंति, विनिग्गतो, राया चिंतेइ-पिच्छामि किं कवडत्तनेण गणियाघरं पविस्सइ न वत्ति ? पासायतलगओ पेच्छइ, नवरं मयगकलेवरस्स जनो ओसरइ, मुहाणि य ठवए, सो मज्झेण गतो, राया भणइ-निव्विण्णकामभोगो भगवंति सिरिओ ठावितो । सो संभूयगविजयस्स मूले पव्वतितो, थूलभद्दसामीवि संभूयविजयाणं मूले घोरागारं तवं करेइ, विहरंता पाडलिपुत्रं आगया, तिण्णि अनगारा अभिग्गहे गिण्हंति-एक्को सीहगुहाए, तु पेहंतओ सीहो उवसंतो, अन्नो सप्पगुहाए, सोऽवि दिट्ठीविसो उवसंतो, थूलभद्दो कोसाघरे, सा तुट्ठा, परीसहपराजिओ आगओत्ति, भणइ-किं करेमि ?, उज्जाणघरे ठाणं देहि, दिन्नं, रत्तिं सव्वालङ्कारविभूसिया आगया, चाडुयं पकया, सो मंदरोपमो अकंपो, ताहे सब्भावेण पडिसुणेइ, धम्मो कहितो, साविगा जाया, भणति-जति रायवसेणं अन्नेणं समं वसेज्जा, इयरहा बंभचारिणीवयं गिण्हति ।

ताहे सीहगुहाओ आगओ चत्तारि मासे उववासं काऊणं, आइरिएहिं ईसत्ति अब्भुट्ठिओ, भणिओ य-सागयं दुक्करकारगस्सत्ति, एवं सप्पईत्तोऽवि, थूलभद्दसामी तत्थेव गणियाघरे भिक्खं गिण्हइ, सोऽवि चउमासेसु पुन्नेसु आगतो, आयरिया संभमेण उट्ठिया, भणिओ य-सागयं ते अइदुक्करदुक्करकारगस्सत्ति, ते भणंति दोण्णिवि-पेच्छह आयरिया रागं वहति अमच्चपुत्तोत्ति, वितियए वरिसारत्ते सिहगुहाखमनो भणति-गणियाघरं वच्चामित्ति अभिग्गहं गिण्हइ, आयरिया उवउत्ता, वारिओ, अप्पडिसुणंतो गतो, वसही मग्गिया, दिण्णा, सा सब्भावेण ओरालियसरीरा विभूसिया अविभूसियआ वा, सुणति धम्मं, सो तीसे सरीरे अज्झोववन्नो, ओभासइ, सा न इच्छति, भणति-जति नवरि किंचि देसि, किं देमि ?, सयसहस्सं, सो मग्गिउमारद्धो, नेवालविसये सावतो, जो तहिं जाइ तस्स सयसहस्समुल्लं कंबलं देइ, तहिं गतो, तेन दिन्नं सड्ढरायाणएणत्ति, एगत्थ चोरेहिं पंथो बद्धो, सउणो वासति-सयसहस्संति, चोरसेनावई जाणइ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरि संजयं पेच्छइ, वोलीणो, पुणो वासति-सयहसहस्सं गतं, तेन सेनावइणा गंतूण पलोइओ, सब्भावं पुच्छिओ भणति-अत्थि कंबलो, गणिकाए नेमि, मुक्को गतो, तीसे दिन्नो, ताए चंदनिकाए छूढो, सो भणइ-मा विनासेहि, सा भणइ-तुमंपि एरिसओ चेव होहिसि, उवसामेति लद्धबुद्धी, इच्छामि अनुसट्ठिं, गतो, पुणो आलोएत्ता विहरइ।

आयरिएणं भणिओ-एवं दुक्करदुक्करकारओ थूलभद्दो पुव्विं खरीका(दुअक्खरिया)इच्छइ, इदानीं सड्ढी जाया, अदिट्ठदोसा तुमे पत्थियत्ति उवालद्धो, एवं चेव विहरंति। सा गणिका रहियस्स रन्ना दिन्ना, तं अक्खाणं जहा नमोक्कारे। जहा थूलभद्देणित्थीपरीसहो अहियासितो तहा अहियासिगव्वो, न उ जहा तेन नो अहियासितोत्ति। अयं चैकत्र वसतस्तथा स्त्रीजनसंसर्गतो मन्दसत्त्वस्य भवति अतो नैकस्थेन भाव्यं, किन्तु चर्यापरीषहः सोढव्य इति तमाह-

मू. (६७) एग एव चरे लाढे, अभिभूय परीसहे।
गामे वा नगरे वावि, निगमे वा रायहानीए॥

वृ. 'एक एवे'ति रागद्वेषविरहितः 'चरेत्' अप्रतिबद्धविहारेण विहरेत्, सहायवैकल्यतो वैकस्तथाविधगीतार्थो, यथोक्तम्-

"न या लभिज्जा निउणं सहायं, गुणाहियं वा गुणतो समं वा।
एक्कोऽपि पावाइं विवज्जयंतो, विहरेज्ज कामेसु असज्जमाणो॥"

'लाढे'त्ति लाढयति प्रासुकैषणीयाहारेण साधुगुणैर्वाऽऽत्मानं यापयतीति लाढः, प्रशंसाभिधायि वा देशीपदमेतत्, पठ्यते च-'एग एगे चरे लाढं'ति तत्र चैकः-असहायः प्रतिमाप्रतिपन्नादिः स चैको रागादिवैकल्याद् 'अभिभूय' निर्जित्य 'परिषहान्' क्षुदादीन्, क्व पुनश्चरेदित्याह-'ग्रामे' चोक्तरूपे 'नगरे वा' करविरहितसन्निवेशे 'अपिः' पूरणे 'निगमे वा' वणिग्निवासे 'राजधान्यां' वा प्रसिद्धायाम्, उभयत्र वाशब्दानुवृत्तेः, मडम्बाद्युपलक्षणं चैतद्, आग्रहाभावं चानेनाहेति सूत्रार्थः॥ पुनः प्रस्तुतमेवाह-

मू. (६८) असमाणो चरे भिक्खू, नेव कुज्जा परिग्गहं।
असंसत्तो गिहत्थेहिं अनिकेओ परिव्वए॥

वृ. न विद्यते समानोऽस्य गृहिण्याश्रयामूर्च्छितत्वेन अन्यतीर्थकेषु वाऽनियतविहारादिनेत्यसमानः-असदृशो, यद्वा समानः-साहङ्कारो न तथेत्यसमानः, अथवा '(अ)समाणो'त्ति प्राकृतत्वादसन्निवासन्, यत्रास्ते तत्राप्यसंनिहित एवेति हृदयं, सन्निहितो हि सर्वः स्वाश्रयस्योदन्तमावहति अयं तु न तथेत्येवंविधः सन् 'चरेत्' अप्रतिबद्धविहारतया विहरेत्, 'भिक्षुः' यतिः, कथमेतत् स्यादित्याह-नैव कुर्यात् 'परिग्रहं' ग्रामादिषु ममत्वबुद्धात्मकम्, अत्राह च-"गामे कुले वा नगरे व देसे, ममत्तभावं न कहिंचि कुज्जा", इदमपि यथा स्यात्तथाह-'असंसक्तः' असम्बद्धो 'गृहस्थैः' गृहिभिः 'अनिकतः' अविद्यमानगृहो, नैकत्र बद्धास्पदः, 'परिव्रजेत्' सर्वतो विहरेत्, न (ना) नियतदेशादौ गृहिसम्पर्कः, एकत्र बद्धास्पदत्वे नियतदेशादिविहारितायां वा स्यादपि ममत्वबुद्धिः, तदभावे तु निरवकाशैवेयमिति भाव इति सूत्रार्थः॥ अत्र च शिष्यद्वारमनुसरन् 'असमानो चरे' इत्यादि-सूत्रसूचितमुदाहरणमाह-

नि.[१०६] कोल्लयरे वत्थव्वो दत्तो सीसो अ हिंडओ तस्स।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवहरइ धाइपिंडं अंगुलिजलणा य सादिव्वं ॥

वृ. 'कोल्लयरे' कुल्लयरनाम्नि नगरे वास्तव्यः, आचार्य इति शेषः, दत्तः शिष्यश्च हिण्डकः तस्य उपहरति धात्रीपिण्डमंगुलिज्वलनाच्च सादेव्यमिति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-कोल्लयरे नयरे वत्थव्वा सङ्गमथेरा आयरिया, दुब्भिक्खे तेहिं संजया विसज्जिया, तं नगरं नवभागे काऊण जंघाबलपरिहीणा विहरन्ति, नगरदेवया य तेसिं किर उवसंता, तेसिं सीसो दत्तो नामं आहिंडितो, चिरेणं कालेणं उदंतवाहतो आगतो, सो तेसिं पडिस्सयं न पविट्ठो निययावासत्ति, भिक्खवेलाए उवग्गाहियं हिंडंताणं संकिलिस्सति, कुंढो सड्ढकुलाइं न दावेइत्ति, तेहिं णायं, एगत्थ सिट्ठिकुले रेवतियाए गहियतो दारतो, छम्मासा रोवंतस्स, आइरिएहिं चप्पुडिया कया, मा रोवत्ति, वाणमंतरीए मुक्को,

तेहिं तुट्ठेहिं पडिलाहिया जहिच्छिएणं, सो विसज्जितो, एयाणि कुलाणित्ति, आयरिया सुचिरं हिंडिऊण अंतपंतं गहाय आगया, समुद्दिट्ठा, आवस्सए आलोयणाए आलोएहि, भणति-तुब्भेहिं सभं हिंडिओ मि, धाईपिंडो ते भुत्तो, भणति-अह सुहमाइं पिच्छहत्ति पदुट्ठो, देवयाए अड्ढरत्ते वासं अंधकारो य विगुव्वितो, एसो हीलेइत्ति, आयरिएहिं भणिओ-अतीहित्ति, सो भणइ-अंधकारोत्ति, आयरिएहिं अंगुली दाइया, सा पज्जलिया, आउट्टो आलोएइ, आयरियावि से नवभागे कहेंति। ततश्च यथा महात्मभिरमीभिः सङ्गमस्थविरैश्चर्यापरीषहोऽध्यासितः तथान्यैरपि अध्यासितव्य इति ॥ यथा चायं ग्रामादिष्वप्रतिबद्धेनानिसह्यते एवं नैषेधिकीपरीषहोऽपि शरीरादिष्वप्रतिबद्धेनाधिसहनीय इति तमाह-

मू. (६९) सुसाणे सुन्नगारे वा, रुक्खमूले य एगओ।
अकुक्कुए निसीएज्जा, न य वित्तासए परं॥

वृ. शबानां शयनमस्मिन्निति श्मशानं तस्मिन्-पितृवने, श्वभ्यो हितमिति वाक्ये 'उगवादिभ्यो यदि'त्यत्र 'शुनः संप्रासरणं वा दीर्घत्व'मिति वचनतो यति संप्रसारणे दीर्घत्वे च शून्यम्-उद्वसं तच्च तत् अगारं च शून्यागारं तस्मिन्वा, वृश्च्यत इति वृक्षः तस्य मूलं-अधोभूभागो वृक्षमूलं तस्मिन्वा, 'एकः' उक्तरूपः स एवैककः, एको वा प्रतिमाप्रतिपत्त्यादौ गच्छतीत्येकगः, एकं वा कर्म्मसाहित्यविगमतो मोक्षं गच्छति-तत्प्राप्तियोग्यानुष्ठानप्रवृत्तेर्यातीत्येकगः, 'अकुक्कुचः' अशिष्टचेष्टारहितो 'निषीदेत्' तिष्ठेत्, 'न च' नैव वित्रासयेत् 'परम्' अन्यं, किमुक्तं भवति?-

'पडिमं पडिवज्जया मसाणे, नो भायए भवभेरवाइं दिस्स।
विविहगुणतवोरए य निच्चं, न सरीरं चाभिकंखए सभिक्खू॥'

इत्यागममनुस्मरन् श्मशानादावप्येककोऽप्यनेकभयानकोपलम्भेऽपि न स्वयं संबिभीयात्, न च विकृतस्वरमुखिकारादिभिरन्येषां भयमुत्पादयेत्, यद्वा 'अकुक्कुए' त्ति अकुत्कुचः कुन्थ्वादिविराधनाभयात्कर्मबन्धहेतुत्वेन कुत्सितं हस्तपादादिभिरस्पन्दमानो निषीदेत्, न च 'वित्रासयेत्' विक्षोभयेत् 'परम्' उन्दूरादि, मा भूदसंयम इति सूत्रार्थः ॥

तत्र च तिष्ठतः कदाचिदुपसर्गोत्पत्तौ यत् कृत्यं तदाह-

मू. (७०) तत्थ से चिट्ठमाणस्स, उवसग्गोऽभिधारए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संकाभीओ न गच्छेज्जा, उट्ठित्ता अन्नमासणं ॥

वृ. 'तत्र'इति श्मशानादौ 'से' तस्य तिष्ठतः, पठ्यते च-'अच्छमाणस्स'त्ति आसीनस्य उप-सामीप्येन सृज्यन्ते-तिर्यग्मनुष्यामरैः कर्म्मवशगेनात्माना क्रियन्त इत्युपसर्गाः ते 'अभिधारयेषुः' अन्तर्भावितेवार्थत्वादभिधारयेयुरिव, कोऽर्थः ?, उत्कटतयाऽत्यन्तोत्सिक्तरिपुवत् अभिमुखीकुर्युरिव, यथैते सज्जा वयं तत् प्रगुणीभूयाभिमुखैः स्थैयमिति, यद्वा सोपस्कारत्वात् सूत्रानामुपसर्ग्गाः सम्भवेयुः ततस्तानभिधारयेत्-किमेते ममाचलितचेतसः कर्तुमलमिति चिन्तयेत्, पठ्यते च-'उवसग्गभयं भवे' इति सुगमं, 'शङ्कामीत इति' तत्कृतापकारशङ्कातो भीतः-त्रस्तो 'न गच्छेत्' न यायादुत्थाय, कोऽर्थः ?, तत् स्थानमपहाय अन्यदपरं आस्यते अस्मिन्नति आसनं-स्थानमिति सूत्रार्थः ॥ अग्निद्वारमधुना, तत्र च 'शङ्काभीतो न गच्छेज्ज'त्ति सूत्रावयवमर्थतः, स्पृशन् उदाहरणमाह-

नि.[१०७] निक्खंतो गयउराओ कुरुद्त्तसुओ गओ य साकेयं ।
पडिमाट्ठियस्स कुडिआ आगया अग्गि जालिंति ॥

वृ. 'निष्क्रान्तः' प्रव्रजितो गजपुरात् कुरुदत्तसुतो गतश्च साकेतं प्रतिमास्थितस्य 'कुडिय'त्ति हृतगवेपका (आगता) अग्निं शिरसि ज्वलायन्ति इति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

हत्थिणाउरे नयरे कुरुदत्तसुत्तो नाम इब्भपुत्तो तहारूवाणं थेराणमंतिए पव्वतितो, सो कयाइ एगल्लविहारपडिमं पडिवन्नो, साएयस्स नयरस्स अदूरसामंते चरिमा ओगाढा, तत्थेव पडिमं ठिओ चच्चरे, तओ एगाता गामातो गावितो हिरियातो, तेन ओगासेण नीयातो, जाव मग्गमाणा कुढिया आगया, जाव साहू दिट्ठो, तत्थ दुवे पंथा, पच्छा ते न जाणंति-कयरेण मग्गेण नीयातो ?, ते साहुं पुच्छंति-कयरेण मग्गेण नीयाओ ?, ताहे सो भगवं न वाहरति, तेहिं रुट्ठेहिं न वाहरतित्तिकाऊण सीसे मट्टियाए पालिं बंधिऊण चियागते अंगारे घेत्तूण सीसे छूढा, गया य, सो भगवं सम्मं सहइ। तेन स यथा सम्यक् सोढो नैषिधिकीपरीषहः तथाऽन्यैरपि साधुभिः सहनीय इति ॥ नैषेधिकीतश्च स्वाध्यायादि कृत्वा शय्यां प्रति निर्वर्तेतातस्तत्परीषहमाह-

मू.(७१) *उच्चावयाहिं सिज्जाहिं, तवस्सी थामवं ।*
नाइवेलं विहन्निज्जा, पावदिट्ठी विहन्नइ ॥

वृ. ऊद्धर्वं चिता उच्चा, उपलिप्ततलाद्युपलक्षणमेतत्, यद्वा शीतातपनिवारकत्वादिगुणैः शय्यान्तरोपरिस्थितत्वेनोच्चाः तद्विपरीतास्त्ववचाः, अनयोर्द्वन्द्वे उच्चावचाः, नानाप्रकारा वोच्चावचास्ताभिः, 'शय्याभिः' वसतिभिः, 'तपस्वी' प्रशस्यतपोऽन्वितो, भिक्षुः प्राग्वत्, 'स्थामवान्' शीतातपादिसहनं प्रति सामर्थ्यवान्, 'नातिवेलं' स्वाध्यायादिवेलातिक्रमेण 'विहन्यात्' हनेर्गतावपि वृत्तेरत्राहं शीतादिभिरभिभूत इति स्थानान्तरं गच्छेत्, यद्वा 'अतिवेलाम्' अन्यसमयातिशायिनीं मर्यादां-समतारूपामुच्चां शय्यामवाप्याहा ! सभाग्योऽहं यस्येदृशी सकलर्तुसुखोत्पादिनी मम शय्येति अवचावासौ वा अहो ! मम मन्दभाग्यता येन शय्यामपि शीतादिनिवारिकां न लभे इति हर्षविषादादिना 'न विहन्यात्' नोल्लङ्घयेत्, किमित्येवमुपदिश्यत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह-'पावदिट्ठी विहन्नइ'त्ति प्राग्वदिति सूत्रार्थः ॥ किं पुनः कुर्यादित्याह-

मू. (७२) पइरिक्कमुवस्सयं लद्धुं, कल्लाणं अदुव पावगं।
किमेगरायं करिस्सइ?, एवं तत्थऽहियासए॥

वृ. 'पइरिक्कं'स्त्र्यादिविरहितत्वेन विविक्तमव्याबाधं वा 'उपाश्रयं' वसतिं 'लब्ध्वा' प्राप्य 'कल्याणं' शोभनम् 'अदुव'त्ति अथवा 'पापं' पांशूत्कराकीर्णत्वादिभिरशोभनं, किं ?, न किञ्चित्, सुखं दुःखं चेति गम्यते, एका रात्रिर्यत्र तदेकरात्रं 'करिष्यति' विधास्यति ?, कल्याणः पापको वोपाश्रय इति प्रक्रमः, कोऽभिप्रायः ?-केचित् पुरोपचितसुकृता विविधर्माणकिरणोद्योतितासु महाधन्समृद्धासु महारजतरजतोपचितभित्तिषु मणिनिर्मितोरुस्तम्भासु तदितरे तु जीर्णविशीर्णभग्नकटकस्थूणापटलसंवृत्तद्वारासु तृणकचवरतुषपूषकोत्करपांशुबुसभस्मविन्मूत्रावसङ्कीर्णासु श्वनकुलमार्जारमूत्रप्रसेकदुर्गन्धिष्वाजन्म वसतिषु वसन्ति, मम त्वद्यैवेयमीदृशी श्वोऽन्या भविष्यतीति किमत्र हर्षेण विषादेन वा ?, मया हि धर्मनिर्वाहाय विविक्तत्वमेवाश्रयस्यान्वेष्यं, किमपरेण ?, 'एवमि' त्यमुना प्रकारेण 'तत्रे' ति कल्याणे पापके वाऽऽश्रये 'अध्यासीत' सुखं दुःखं वाऽधिसहेत, प्रतिमाकल्पिकापेक्षं चैकरात्रमिति, स्थविरकल्पिकापेक्षया तु कतिपया रात्रयः, दिवसोपलक्षणं च रात्रिग्रहणमिति सूत्रार्थः ॥ अत्र निर्वेदद्वारम्, इह च 'अदुव पावगं' ति सूत्रावयमर्थतः स्पृशन् उदाहरणमाह निर्युक्तिकारः-

नि. [१०८] कोसंबी जन्नदत्तो सोमदत्तो य सोमदेवो य।
आयरिय सोमभूई दुण्हंपि य होइ नायव्वं॥

नि. [१०९] सन्नाइगमण वियडवेरग्गा दोवि ते नईतीरे।
पाओवगया नईपूरएण उदहिं तु उवनीया॥

वृ. कौशाम्बी यज्ञदत्तः सोमदत्तश्च सोमदेवश्च आचार्यः सोमभूतिर्द्वयोरपि च भवति ज्ञातव्यः, स्वज्ञातिगमनं विकटवैराग्यात् द्वावपि तौ नदीतीरे पादपोपगतौ नदीपूरकेणोदधिं तूपनीतौ इति गाथाद्वयाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम् -

कोसंबीए नयरीए जन्नदत्तो धिज्जाइओ, तस्स दो पुत्ता, सोमदत्तो सोमदेवो य, ते दोऽवि निव्विण्णकामभोगा पव्वतिया सोमभूई अणगारस्स अंतिए, बहुस्सुया बहुआगमा य जाया, ते अन्नया य सन्नायपल्लिमागया, तेसिं मायापियरो उज्जेणिं गतेल्लिया, तहिं च विसए धिज्जाइणो वियडं आवियंति, तेहिं तेसिं वियडं अन्नेण दव्वेण मेलेऊण दिन्नं, केऽवि भणंति-वियडं चेव अयाणंताण दिन्नं, तेहिवि य तं विसेसं अयाणमाणेहिं पीयं, पच्छा वियडत्ता जाया, ते चिंतेति-अम्हेहिं अंजुत्तं कयं, पमाओ एस, वरं भत्तं पच्चक्खायंति ते एगाए नदीए तीरे तीसे कट्ठाण उवरिं पाओवगया, तत्थ अकाले वरिसं जायं, पूरो य आगतो, हरिया, वुज्झमाणा य उदएण समुद्दं नीया। तेहिं संमं अहियासियं, अहाउयं पालियं, सेज्जापरीसहो अहियासतो समविसमाहिं सेज्जाहिं। एवं एसो अहियासियव्वोत्ति। शय्यास्थितस्य तदुपद्रवेऽप्युदासीनस्य तथाविधशय्यातरोऽन्यो वा कश्चिदाक्रोशेदतस्तत्परीषहमाह-

मू. (७३) अक्कोसेज्ज परो भिक्खुं, न तेसिं पइ संजले।
सरिसो होई बालाणं, तम्हा भिक्खू न संजले॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'अक्कोसेज्ज' त्ति आक्रोशेत-तिरस्कुर्यात् 'परः' अन्यो धर्मापेक्षया धर्मबाह्य आत्मव्यतिरिक्तो वा 'भिक्षुं' यतिं, यथा धिग्मुण्ड! किमिह त्वमागतोऽसीति ?, 'न तेसिं' ति सुपो वचनस्य च व्यत्ययात्र तस्मै 'प्रतिसज्ज्वलेत्' निर्यातने प्रतिभूतश्चाक्रोशदानतः सज्ज्वलते, तन्निर्यातनार्थं देहदाहलौहित्यप्रत्याक्रोशाभिधातादिभिरग्निवन्न दीप्येत, सज्ज्वलनकोपमपि न कुर्यादिति सज्ज्वलेदित्युपादानं, किमेवमुपदिश्यत इत्याह-'सद्दशः' समानो भवति, सज्ज्वलन्निति प्रक्रमः, केषां! 'बालानाम्' अज्ञानां, तथाविधक्षपकवत्, यथा-कश्चित् क्षपको देवतया गुणैरावर्जितया सततमभिवन्द्यते, उच्यते च-मम कार्यमावेदनीयम्, अन्यदैकेन धिग्जातिना सह योद्धुमारब्धः, तेन च बलवता क्षुत्क्षामशरीरो भुवि पातितः ताडितश्च, रात्रौ देवता वन्दितुमायाता, क्षपकस्तूष्णीमास्ते, ततश्चासौ देवतयाऽभिहितो-भगवन्! किं मयाऽपराद्धं ?, स प्राह-न तस्य त्वया दुरात्मनो ममापकारिणः किञ्चित्कृतं, सा चावादीत्- मया विशेषः कोऽप्युपलब्धो यथाऽयं श्रवणोऽयं च धिग्जातिरिति, यतः कोपाविष्टौ द्वावपि समानौ सम्पन्नाविति, ततः सति प्रेरणेति प्रतिपन्नं क्षपकेणेति। उक्तमेवार्थं निगमयितुमाह-'तम्ह' त्ति यस्मात्सद्दशो भवति बालानां तस्माद्भिक्षुर्न सज्ज्वलेदिति सूत्रार्थः ॥ कृत्योपदेशमाह-

मू. (७४) *सोच्चा णं फरुसा भासा, दारुणे गामकंटए।*
तुसिणीओ उवेक्खिज्जा, न ताओ मनसी करे ॥

वृ. 'श्रुत्वा' आकर्ण्य, णमिति वाक्यालङ्कारे 'परुषाः' कर्कशाः 'भाषा' गिरो दारयन्ति नन्दसत्त्वानां संयमविषयां धृतमिति दारुणाः ताः, ग्रामः-इन्द्रियग्रामस्तस्य कण्टका इव ग्रामकण्टकाः-प्रतिकूलशब्दादयः, कण्टकत्वं चैषां दुःखोत्पादकत्वेन मुक्तिमार्गप्रवृत्तिविघ्नहेतुतया च, तदेकदेशत्वेन परुषभाषा अपि तथोक्ताः, भाषाविशेषणत्वेऽपि चात्राविष्टलिङ्गत्वात्पुँल्लिङ्गता, 'तूष्णीकः' तूष्णीशीलो न कोपात् प्रतिपरुषभाषी, एवंविधश्च 'जो सहइ हु गामकंटए अक्कोसपहारतज्जणाओ य' त्ति इत्यागमं परिभावयन् 'उपेक्षेत' अवधीरयेत्, प्रक्रमात्परुषभाषा एव, कथमित्याह-न ता मनसि कुर्यात्, तद्भाषिणि द्वेषाकरणेनेति भाव इति सूत्रार्थः ॥ इदानीं मुद्गरद्वारं व्याचिख्यासुः 'सुच्चा ण' न्ति सूत्रसूचितमुदाहरणमाह-

नि. [११०] रायगिहि मालगारो अज्जुणओ तस्स भज्ज खंदसिरी।
मुग्गरपाणी गोट्ठी सुदंसणो वंदओ नीइ ॥

वृ. राजगृहे मालाकारोऽर्जुनकस्तस्य भार्या स्कन्दश्रीः मुद्गरपाणिर्यक्षो गोष्ठी सुदर्शनो वन्दको 'निरेति' वन्दनार्थं निर्गच्छतीति गाथाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायादवगम्यः, स चायम्-रायगिहे नयरे अज्जुनगो नाम मालागारो परिवसति, तस्स भज्जा खंदसिरी नामा, तस्स रायगिहस्स नयरस्स बहिया मोग्गरपाणी नाम जक्खे अज्जुनगस्स कुलदेवयं, तस्स मालागारस्स आरामस्स पन्थे चेव जक्खो। अन्नया खंदसिरि भत्तं तस्स भत्तारस्स नेउं गया, अग्गाइं पुप्फाइं घेत्तुं घरं गच्छति, मोग्गरपाणिघरए य ट्ठियाए दुल्ललियाए गोट्ठीएहिं छहिं जणेहिं दिट्ठा, ते भणंति-एसा अज्जुनमालागारस्स भज्जाऽपडिरूवा, गिण्हामो णं, तेहिं सा गहिया, छवि जना तस्स जक्खस्स पुरतो भोगे भुंजंति, सोऽवि मालागारो निच्चकालमेव अग्गेहिं वरेहिं पुप्फेहिं जक्खं अच्चेइ, अच्चिउकामो ततो आगच्छइ, ताए ते भणिया-एसो मालागारो आगच्छति तो तुब्भे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मए किं विसज्जेहिह ?, तेहिं नायं-एयाए पियं, तेहिं भणियं-मालागारं बंधामो, तेहिं सो बद्धो अवहोडेण, जक्खस्स पुरतो बंधिऊण पुरतो चेव से भारियं भुंजंति,

सा य तस्स भत्तारस्स मोहुप्पाइयाइं इत्थिसद्दाइं करेइ, पच्छा सो मालागारो चिंतेति-एयं अहं जक्खं निच्चकालमेव अग्गेहिं वरेहिं पुप्फेहिं अच्चेमि, तहावि अहं एयस्स पुरतो चेव एवं कीरामि, जइ एत्थ कोइ जक्खो होंतो तो अहं न कीरतो, एवं सुव्वत्तं एयं कट्ठं नत्थि एत्थ कोइ मोग्गरपाणी जक्खो, ताहे सो जक्खो अनुकंपंतो मालागारस्स सरीरमनुपविट्ठो, तडतडस्स बंधे छेत्तूण लोहमयं पलसहस्सनिप्फन्नं मोग्गरं गहाय अण्णाइट्ठो समाणो ते छप्पि इत्थिसत्तमे पुरिसे घाएत्ति, एवं दिने छ इत्थिसत्तमे पुरिसे घाएमाणे विहरइ, जनवतोऽवि रायगिहातो नगरातो न ताव निग्गच्छइ जाव सत्त घातियाइं।

तेणं कालेणं तेणं समएणं भगवं महावीरे समोसरिए, जाव सुंदसनो सेट्ठी वंदतो नीइ, अज्जुनएण दिट्ठो, सागारपडिमं ठिओ, न तरह अक्कमिउं, परिपेरंतेहि भमित्ता परिसंतो, अज्जुनतो सुदंसणं अनामिसाए दिट्ठीए अवलोएइ, जक्खोऽवि मोग्गरं गहाय पडिगओ, पडितो अज्जुनतो, उट्ठिओ य तं पुच्छइ-कहिं गच्छसि ?, भणइ-सामिं वंदिउं, सोऽवि गतो, धम्मं सोच्चा पव्वतितो। रायगिहे भिक्खं हिंडंतो सयणमारगोत्ति लोएणं अक्कोसिज्जइ नानापगारेहिं अक्कोसेहिं, सो सम्मं सहइ, सहंतस्स केवलनाणं समुप्पन्नं ॥ एवमन्यैरपि साधुभिः आक्रोशपरीषहः सोढव्यः ॥ कश्चिदाक्रोशमात्रेणातुष्यन्नधमाधमो वधमपि विदध्यादिति वधपरीषहमाह-

मू. (७५) *हओ न संजले भिक्खू, मनंपि नो पउस्सए।*
तितिक्खं परमं नच्चा, भिक्खुधम्मंमि चिंतए॥

वृ. 'हतः' यष्ट्यादिभिः ताडितो 'न सञ्ज्वलेत्' कायतः कम्पनप्रत्याहननादिना वचनतश्च प्रत्याक्रोशदानादिना भृशं ज्वलन्तमिवात्मानं नोपदर्शयेत्, भिक्षुः 'मनः' चित्तं तदपि 'न प्रदूषयेत्' न कोपतो विकृतं कुर्वीतं, किन्तु 'तितिक्षा' क्षमां-

'धर्मस्य दया मूलं न चाक्षमावान् दयां समाधत्ते।
तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्मम्॥'

इत्यादिवचनतः 'परमां' धर्मसाधनं प्रति प्रकर्षवर्ती 'ज्ञात्वा' अवगम्य 'भिक्षुधर्मे' यतिधर्मे, यद्वा भिक्षुधर्मं क्षान्त्यादिकं वस्तुस्वरूपं वा चिन्तयेत्, यथा-क्षमामूल एव मुनिधर्मः, अयं चास्मन्निमित्तं कर्म्मोपचिनोति, अस्मद्दोष एवायम्, अतो नेमं प्रति कोप उचित इति सूत्रार्थः॥

मू. (७६) *समणं संजयं दंतं, हन्निज्जा कोऽवि कत्थवि।*
नत्थि जीवस्स नासुत्ति, न तं पेहे असाहुवं॥

वृ. 'समणं' श्रमणं सममनसं वा-तथाविधवधेऽपि धर्मं प्रति प्रहितचेतसं, श्रमणश्च शाक्यादिरपि स्यादित्याह-'संयतं' पृथ्व्यादिव्यापादननिवृत्तं, सोऽपि कदाचिल्लाभादिनिमित्तं बाह्यवृत्त्यैव सम्भवेदत आह-'दान्तम्' इन्द्रियनोइन्द्रियदमेन 'हन्यात्' ताडयेत्, 'कोऽपि' इति तथाविधोऽनार्यः 'कुत्रापि' ग्रामादौ, तत्र किं विधेयमित्याह-नास्ति 'जीवस्य' आत्मन उपयोगरूपस्य 'नाशः' अभावः, तत्पर्यायविनाशरूपत्वेन हिंसाया अपि तत्र तत्राभिधानाद्, 'इती'त्यस्माद्धेतोः न 'त'मिति घातकं प्रेक्षेत असाधुमर्हति यत्प्रेक्षणं भ्रुकुटिभङ्गादियुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदसाधुवत्, किन्तु रिपुजयं प्रति सहायोऽयमितिधिया साधुवदेव प्रेक्षेतेति भावः, अथवा अपेर्गम्यमानत्वान्न तं प्रेक्षेतापि असाधुना तुल्यं वर्तते इति असाधुवत्, किं पुनरपकारायोपतिष्ठेत् संक्लिश्नाति वा ?, असाधुर्हि सत्यां शक्तौ प्रत्यपकारायोपतिष्ठते असत्यां तु विकृतया दृशा पश्यति संक्लेशं वा कुरुत इत्येवमभिधानं, पठ्यते च-'न य पेहे असाधुयं' ति चकारस्यापिशब्दार्थस्य भिन्नक्रमत्वात् प्रेक्षेतापि न-चिन्तयेदपि न, काम् ?, -'असाधुतां' तदुपरि द्रोहस्वभावतां, पठन्ति च-'एवं पेहिज्ज संजतो' इति सूत्रार्थः ॥ अधुना वणेत्ति द्वारं, तत्र 'हतो न सज्ज्वलेदि' त्यादि सूत्रमर्थतः स्पृशन्नुदाहरणमाह-

नि.[१११] सावत्थी जियसत्तू धारणि देवी य खंदओ पुत्तो ।
धूआ पुरंदरजसा दत्ता सा दंडईरन्नो ।

नि.[११२] मुनिसुव्वयंतेवासी खंदगपमुहा य कुंभकारकडे ।
देवी पुरंदरजसा दंडजा पालग मरूए य ॥

नि.[११३] पंचसया जंतेणं वहिआ उ पुरोहिएण रुट्ठेणं ।
रागद्दोसतुलग्गं समकरणं चिंतयंतेहिं ॥

वृ. श्रावस्ती जितशत्रुर्धारिणी देवी च स्कन्दकः पुत्रो दुहिता पुरन्दरयशा दत्ता सा दण्डकिराजाय, मुनिसुव्रतान्तेवासिनः स्कन्दकप्रमुखाश्च कुम्भकारकटे देवी पुरन्दरयशा दण्डकिः पालकः मरुकश्च पञ्च शतानि यन्त्रेण घातितानि तुः पूरणे पुरोहितेन रुष्टेन पालकेन रागद्वेषयोस्तुलाग्रमीव-तदनभिभाव्यत्वेन रागद्वेषतुलाग्रं 'समकरणं' माध्यस्थ्यपरिनामं भावयद्भिः, स्वकार्यं साधितमिति शेषः, इति गाथात्रयाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

सावत्थीए नयरीए जियसत्तू राया, धारिणी देवी, तीसे पुत्तो खंदओ नाम कुमारो, तस्स भगिनी पुरंदरजसा, सा कुंभकारकडे नयरे दंडगी नाम राया तस्स दिन्ना, तस्स य दंडकिस्स रन्नो पालगो नाम मरुतो पुरोहितो । अन्नया सावत्थीए मुनिसुव्वयसामी तित्थयरो समोसरिओ, परिसा निग्गया, खंदतोऽवि निग्गतो, धम्मं सोच्चा सावगो जाओ ।

अन्नया सो पालकमरुतो दूयत्ताए आगतो सावत्थिं नयरिं, अत्थाणिमज्झे साहूणं अवण्णं वयमाणो खंदएणं निप्पिट्ठपसिणवागरणो कतो, पोतसमावण्णो, तप्पभिइं चेव खंदगस्स छिद्दाणि चारपुरिसेहिं मग्गावितो विहरइ, जाव खंदगो पंचजनसएहिं कुमारोलग्गएहिं सद्धिं मुनिसुव्वसामिसगासे पव्वतितो, बहुसुतो जातो, ताणी चेव से पंच सयाणि सीसत्ताए अणुन्नायाणि । अन्नया खंदओ सामिमापुच्छइ-वच्चामि भगिनीसगासं, सामिणा भणियं-उवसग्गो मारणंतितो, भणइ-आराहगा विराहगा वा ?, सामिणा भणियं-सव्वे आराहगा तुमं मोत्तुं, सो भणइ-लट्ठं, जदि एत्तिया आराहगा, गओ कुंभकारकडं, मरुएण जहिं उज्जाने ठिओ तहिं आउहाणि नूमियाणि, राया वुग्गाहिओ-जहा एस कुमारो परीसहपराइतो एएण उवाएण तुमं मारित्ता रज्जं गिण्हिहित्ति, जदि ते विपच्चतो उज्जानं पलोएहि, आउहाणि ओलइयाणि दिट्ठाणि, ते बंधिऊण तस्स चेव पुरोहियस्स समप्पिया, तेन सव्वे पुरिसजंतेन पीलिया, तेहिं सम्मं अहियासियं, तेसिं केवलनाणं उप्पन्नं सिद्धा य । खंदतोऽवि पासे धरिओ, लोहियचिक्किाहिं भरिज्जंतो सव्वतो पच्छा जंते पीलितो निदानं काऊण अग्गिकुमारेसु उववन्नो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तंपि से रयहरणं रुहिरलित्तं पुरिसहत्थेत्ति काउं गिद्धेहिं पुरंदरजसाते पुरतो पाडियं, सावि तद्दिवसं अधितिं करेइ जहा साधू न दीसंति, तं च नाए दिट्ठं, पच्चभिन्नाओ य कंवलो, निसिज्जातो छिन्नातो, ताए चेव दिन्नो, ताए नायं-जहा ते मारिया, ताए खिंसितो राया-पाव ! विनट्ठोऽसि, ताए चिंतिय-पव्वयामि, देवेहिं मुनिसुव्वयसगासं नीया, तेनवि देवेन नगरं दड्ढं सजनव्वयं, अज्जवि दंडगारण्णयंति भन्नइ ! अरन्नस्स य वणाख्या भवति, तेन द्वारगाथायां वनमित्युक्तम्। एत्थ तेहिं साहूहिं वहपरीसहो अहियासितो सम्मं, एवं अहियासेयव्वं, न जहा संधएण नाहिया-सियं। परैरमभिहतस्य च तथाविधौषादि ग्रासादि च सदोपयोगि यतेर्याचितमेव भवतीति याञ्च्यापरीषहमाह-

मू. (७७) *दुक्करं खलु भो! निच्चं, अनगारस्स भिक्खुणो।*
सव्वं से जाइयं होइ, नत्थि किंचि अजाइयं॥

वृ. दुःखेन क्रियत इति दुष्करं-दुरनुष्ठानं, खलुर्विशेषणे निरुपकारिण इति विशेषं द्योतयति, 'भो' इत्यामन्त्रणे 'नित्यं' सर्वकालं, यावज्जीवमित्यर्थः, अनगारस्स भिक्षोरिति च प्राग्वत्, किं तत् दुष्करमित्याह-यत् 'सर्वम्' आहारोपकरणादि 'से' तस्य याचितं भवति, नास्ति 'किञ्चिद्' दन्तशोधनाद्यपि अयाचित्तं, ततः सर्वस्यापि वस्तुनो याचनमिति गम्यमानेन विशेष्येण दुष्करमित्यस्य सम्बन्ध इति सूत्रार्थः ॥ ततश्च-

मू. (७८) *गोयरग्गपविट्ठस्स, हत्थे नो सुप्पसारए।*
सेओ अगारवासोत्ति, इइ भिक्खू न चिंतए॥

वृ. गोरिव चरणं गोचरो, यथाऽसौ परिचितापरिचितविशेषमपहायैव प्रवर्त्तते तथा साधुरपि भिक्षार्थं, तस्याग्र्यं-प्रधानं यतोऽसौ एषणायुक्तौ गुह्णाति न पुनर्गौरिव यथा कथञ्चित्, तस्मिन् प्रविष्टो गोचराग्रप्रविष्टः तस्य, 'पाणिः' हस्तो 'नो' नैव सुखेन प्रसार्यते पिण्डादिग्रहणार्थं प्रवर्त्त्यत इति सुप्रसारः स एव सुप्रासरकः, कथं हि निरुपकारिणा परः प्रतिदिनं प्रणयितुं शक्यः, उत्तरत्रेति-शब्दस्य भिन्नक्रमत्वाद्, 'इती'त्यस्माद्धेतोः, 'श्रेयान्' अतिशयप्रशस्यः 'अगारवासो' गार्हस्थ्यं, तत्र हि न कश्चिद्याच्यते, स्वभुजार्जितं च दीनादिभ्यः संविभज्य भुज्यते, 'ईती'त्येतद्भिक्षुः न चिन्तयेद्, यतो गृहवासो बहुसावद्यो निरवद्यवृत्त्यर्थं च तत्परित्यागः, ततः स्वयंपचनादिप्रवृत्तेभ्यो गृहिभ्यः पिण्डादिग्रहणं न्याय्यमिति भाव इति सूत्रार्थः ॥ साम्प्रतं रामद्वारं, तत्र 'दुक्करं खलु भो! निच्चं' इति सूत्रमर्थतः स्पृशन्नुदाहरणमाह-

नि. [११४-१] जायणपरीसहंमि बलदेवो इत्थ होइ आहरणं।

वृ. याञ्चापरीषहे बलदेवोऽत्र भवत्याहरणम्-उदाहरणम्। अत्र सम्प्रदायः-जया सो वासुदेवसबं वहंतो सिद्धत्थेणं पडिबोहिओ कण्हस्स सरीरगं सक्कारेउं कयसामातितो लिंगं पडिवज्जिउं तुंगीसिहरे तवं तप्पमाणो मानेन-कहिं भिच्चाण भिक्खट्ठं अल्लीसं ?, तेन कट्ठा-हाराईण भिक्खं गिण्हइ, न गामं नयरं वा अल्लियति।

तेन सो नाहियासितो जायणापरीसहो, एवं न कायव्वं। अन्ने भणंति-बलदेवस्स भिक्खं भमंतस्स बहुओ जनो तस्स रूपेणावक्खित्तो न किंति अन्नं जाणइ, तच्चित्तो चेव चिट्ठइ, तेन सो न हिंडइ गामागरादि, जहागयपहियाहिंतो चेव भिक्खं जायतित्ति, एस जायणापरीसहो

पसत्थो। एवं शेषसाधुभिरपि याञ्चापरीषहः सोढव्यः ॥ याञ्चाप्रवृत्तश्च कदाचिल्लाभान्तरायदोषतो न लभेतापीत्यलाभपरीषहमाह-

मू. (७९) परेसु गासमेसिज्जा, भोयणे परिनिट्ठिए।
लद्धे पिंडे आहरिज्जा, अलद्धे नाणुतप्पए ॥

वृ. 'परेषु' इति गृहस्थेषु 'ग्रासं' कवलम्, अनेन च मधुकरवृत्तिमाह, 'एषयेद्' गवेषयेत् भुज्यत इति भोजनम्-ओदनादि तस्मिन् 'परिनिष्ठिते' सिद्धे, मा भूत्प्रथमगमनात्तदर्थं पाकादिप्रवृत्तिः, ततश्च 'लब्धे' गृहिभ्यः प्राप्ते 'पिण्डे' आहारे 'अलब्धे वा' अप्राप्ते वा नानुतप्येत संयतः, तद्यथा-अहो ! ममाधन्यता यदहं न किञ्चिल्लभे, उपलक्षणत्वाल्लब्धे वा लब्धिमानहमिति न हृष्येत, यद्वा लब्धेऽप्यल्पेऽनिष्टे वा सम्भवत्येवानुताप इति सूत्रार्थः ॥

किमालम्बनमालम्ब्य नानुतप्येतेत्याह-

मू. (८०) अज्जेवाहं न लब्भामि, अवि लाभो सुए सिया।
जो एवं पडिसंविक्खे, अलाभो तं न तज्जए ॥

वृ. 'अद्यैव' अस्मिन्नेवाहन्यहं 'न लभे' न प्राप्नोमि, 'अपिः' सम्भावने, सम्भाव्यत एतत् 'लाभः' प्राप्तिः 'श्वः' आगामिनि दिने 'स्याद्' भवेत्, उपलक्षणं श्व इत्यन्येद्युरन्यतरेद्युर्वा मा वा भूदित्यनास्थामाह, य 'एवम्' उक्तप्रकारेण 'पडिसंविक्खे'त्ति प्रतिसमीक्षतेऽदीनमनाः अलाभमाश्रित्यालोचयति, 'अलाभः' अलाभपरीषहाः तं 'न तर्ज्जयति' नाभिभवति, अन्यथाभूतस्त्वभिभूयत इति भावः ॥ अत्र लौकिकमुदाहरणम् -

वासुदेवबलदेवसच्चगदारुगा अस्सवहिया अडवीए नग्गोहपायवस्स अहे रत्तिं वासोवगया, जामग्गहणं, दारुगस्स पढमो जामो, कोहो पिसायरूवं काऊण आगतो, दारुगं भणइ-आहारत्थीऽहं उवागओ, एए सुत्ते भक्खयामि युद्धं वा देहि, दारुगेण भणियं-बाढं, तेन सह संपलग्गो, दारुगो य तं पिसायं जहा जहा न सक्केइ निहणिउं तहा तहा रुस्सति, जहा जहा रुस्सइ तहा तहा सो कोहो वड्ढति, एवं सो दारुगो किच्छपाणो तं जामगं निव्वाहेइ, पच्छा सच्चगं उट्ठावेइ, सच्चगोऽवि तहेव पिसाएण किच्छपाणो कतो, ततिए जामे बलदेवं उट्ठवेइ, एवं बलदेवोऽवि चउत्थे जामे वासुदेवं उट्ठवेइ, वासुदेवो तेन पिसाएण तहेव भणितो,

वासुदेवो भणति-मं अनिज्जिउं कहं मम सहाए खाहिसि ?, जुद्धं लग्गं, जहा जहा जुज्झइ पिसाओ तहा तहा वासुदेवो अहो बलसंपुन्नो अयं मल्लो इति तूसए, जहा जहा तूसए तहा तहा पिसाओ परिहायति, सो तेन एवं खविओ जेन धेत्तुं उयट्टीए छूढो, पभाए पस्सए ते भिन्नजानुकोप्परे, केणंति पुट्ठा भणंति-पिसाएण, वासुदेवो भणति-स एस कोवो पिसायरूवधारी मया पसंतयाए जितो, उयट्टिणीए नीणेऊण दरिसिओ। इति सूत्रार्थः ॥

सम्प्रति 'पुरे'तिद्वारं, 'पुरा' इति पूर्वस्मिन् काले कृतं कर्मेति गम्यते, तत्र च 'नानुतप्पेज्ज संजएत्ति' सूत्रावयवमर्थतः स्पृशन्नुदाहरणमाह-

नि. [११४-२] किसिपारासरढंढो अलाभए होइ आहरणं ॥

वृ. कृषिप्रधानः पारासरः कृषिपारासरो जन्मान्तरनाम्ना 'ढण्ढ' इति ढण्ढणकुमारः 'अलाभके' अलाभपरीषहे भवत्याहरणमिति गाथापश्चार्द्धाक्षरार्थः। भावार्थस्तु वृद्धसम्प्रदायादवसेयः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगंमि गामे एगो पारासरो नाम, तम्मि य अन्ने पारासरा अत्थि, सो पुन किसीए कुसलो सरीरेण किसो तेनं किसिपारासरो, सो य तम्मि गामे आउत्तियं राउलियं चरिं वाहेइ, ते य गोणादी दिवसं छाएल्लया भत्तवेलं पडिच्छंति, पच्छा ते भत्तेवि आनीए मोएउकामे भणइ-एक्केक्कं हलबंभं देह, तो पच्छा भुंजह, तेहिं छहिंवि हलसएहि बहुयं वाहियं, तेन तहिं बहुयं अंतराइयं बद्धं, मरिऊण अन्नेण सुकयविसेसेण वासुदेवस्स पुत्तो जातो ढंढोत्ति, अरिट्ठनेमिसयासे पव्वइतो, अंतरायं कम्मं उदिन्नं, फीयाए बारवईए हिंडंतो न लभति, कहिंचिवि जया लभति तदा जं वा तं वा, तेन सामी पुच्छितो, तेहिं कहियं जहावत्तं, पच्छा तेन अभिग्गहो गहितो, जहा-परस्स लाभो न गिण्हियव्वो। अन्नया वासुदेवो पुच्छइ तित्थयरं-एएसिं अट्ठारसण्हं समणसाहस्सीणं को दुक्करकारतो ?, तेहिं भणियं, जहा-ढंढो अनगारो,

अलाभपरीसहो कहिओ, सो कहिं ?, सामी भणइ-नगरिं पविसंतो पेच्छिहिसि, दिट्ठो पविसंतेनं, हत्थिखंधाओ ओवरिऊण वंदिओ, सो य इक्केण इब्भेण दिट्ठो, जहा महप्पा एस जो वासुदेवेन वंदितो, सो य तं चेव घरं पविट्ठो, तेन परमाए सद्धाए मोयगेहिं पडिलाभितो, भमिऊण सामिस्स दावइ पुच्छइ य-जहा मम अलाभपरीसहो खीणो ?, पच्छा सामिणा भन्नति-न खीणो, एस वासुदेवस्स लाभो, तेन परलाभं न उवजीवामित्तिकाउ अमुच्छियस्स परिट्ठवितस्स केवलनाणं समुप्पन्नं। एवं अहियासियव्वो अलाभपरीसहो जहा ढंढेण अनगारेण॥

अलाभाच्चान्तप्रान्ताशिनां कदाचिद्रोगाः समुत्पद्येरन्निति रोगपरीषहमाह-

मू. (८१) *नच्चा उप्पइयं दुक्खं, वेदनाए दुहट्टिए।*
अदीणों ठावए पन्नं, पुट्ठो तत्थऽहियासए॥

वृ. 'ज्ञात्वा' अधिगम्य 'उत्पत्तिकम्' उद्‌भूतं, दुःखयति इति दुःख प्रस्तावात् ज्वरादिरोगस्तं 'वेदनया' स्फोटपृष्ठग्रहाद्यनुभवरूपया दुःखेनार्त्तः-पीडितः क्रियते स्म दुःखार्त्तितः, एवंविधोऽपि 'अदीनः' अविक्लवः 'स्थापयेत्' दुःखार्त्तितत्वेन चलन्तीं स्थिरीकुर्यात् 'प्रज्ञां' स्वकर्म्मफलमेवैतदिति तत्त्वधियं, 'स्पृष्ट' इत्यपेर्लुप्तनिर्दिष्टत्वात् व्याप्तोऽपि राजमन्दादिभिः, यद्वा पुष्ट इव पुष्टो व्याधिभिरविक्लवतया 'तत्रेति' प्रज्ञास्थापने सति रोगोत्पाते वा 'अध्यासीत' अधिसहेत, प्रक्रमाद्रोगजनितदुःखमिति सूत्रार्थः॥

स्यादेतत्-चिकित्सया किं न तदपनोदः क्रियते ? इत्याह-

मू. (८२) *तेगिच्छं नाभिनंदिज्जा, संचिक्खऽत्तगवेसए।*
एयं सु तस्स सामन्नं, जं न कुज्जा न कारवे॥

वृ. 'चिकित्सां' रोगप्रतिकाररूपां 'नाभिनन्देत्' अनुमतिनिषेधाच्च दूरापास्ते करणकारणे 'समीक्ष्य' स्वकर्मफलमेवैतत् भुज्यत इति पर्यालोच्य, यद्वा 'संचिक्ख'त्ति 'अचां सन्धि लोपौ बहुलभि' त्येकारलोपे 'संचिक्खे' समाधिना तिष्ठेत, न कूजनकर्करायतादि कुर्यात्, आत्मानं-चारित्रात्मानं गवेषयति-मार्गयति कथमयं मम स्यादित्यात्मगवेषकः, किमित्येवमत आह-'एतद्' अनन्तरमभिधास्यमानं 'खु'त्ति खलु, स च यस्मादर्थः, ततो यस्मादेतत् 'तस्य' श्रमणस्य 'श्रामण्यं' श्रमणभावो यन्न कुर्यान्न कारयेत्, उपलक्षणत्वान्नानुमन्येत, प्रक्रमात् चिकित्सां, जिनकल्पिकाद्यपेक्षं चैतत्, स्थविरकल्पापेक्षया तु 'जं न कुज्जा' इत्यादौ सावद्यमिति गम्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयमत्र भावः- यस्मात्करणादिभिः सावद्यपरिहार एव श्रामण्यं, सावद्य च प्रायश्चिकित्सा, ततस्तां नाभिनन्देद्, एतदप्यौत्सर्गिकम्, अपवादतस्तु सावद्याऽप्येषामियमनुमतैव, यदुक्तम्- "काहं अछित्तिं अदुवा अहीहं, तवोविहाणेण य उज्जमिस्सं। गणं व नीतीइ वि सारविस्सं, सालंबसेवी समुवेति मोक्खं ॥" इति सूत्रार्थः ॥ इदानीं भिक्षेति द्वारं, तत्र च 'तिगिच्छं नाहिनंदिज्जा' इति सूत्रावयवमथतः स्पृशन्नुदाहरणमाह-

नि.[११५] महुराइ कालवेसिय जंबुय अहिउत्थ मुग्गसेलपुरं।
राया पडिसेहेइ जंबुयरूवेण उवसग्गं ॥

वृ. मथुरायां कालवेसिको जम्बुकोऽभ्युषितो मुद्गसेलं पुरं राजा प्रतिषेधयति जम्बूकरूपेण उपसर्गमिति गाथाक्षरार्थः। भावार्थस्तु सम्प्रदायावगम्यः, स चायम्-

महुराए जियसत्तुणा रन्ना काला नाम वेसाऽपडिरूवंति काउं ओरोहे छूढा, तीसे पुत्तो कालाए कालवेसिओ कुमारो, सो तहारूवाणं थेराणं अंतिए धम्मं सोऊण पव्वतितो, एगल्लविहारपडिमं पडिवन्नो, गतो मुग्गसेलपुरं, तहिं तस्स भगिनी हयसुत्तस्स रन्नो महिला, तस्स साहुस्स अरसिया, ततो तीए भिक्खाए सह ओसहं दिन्नं, सो य अहिगरणंति भत्तं पच्चक्खति।

तेन य कुमारत्ते सियालाणं सद्दं सोऊण पुच्छिया ओलग्गिया-केसिं एस सद्दो सुच्चति ?, ते भणंति-एए सियाला अडविवासिणो, तेन भण्णति-एए बंधिऊण मम आणेह, तेहिं सियालो बंधिऊण आनितो, सो तं हणइ, सो हम्मंतो खिंखिएइ, ततो सो रतिं विंदइ, सो सियालो हम्मंतो मतो, अकामनिज्जराए वाणमंतरो जाओ, तेन वाणमंतरेण सो भत्तपच्चक्खायर्यतिकाउं रक्खावेति पुरिसेहिंति, मा कोइ से उवसग्गं करिस्सइत्ति, जाव ते पुरिसा तं थाणं ऐंति ताव तीए सीआलीए खइतो, जाहे ते पुरिसा ओस्सरिआ ताहे सद्दं करेंती खाति, जाहे आगया ताहे न दीसति, सोऽवि उवसग्गं सम्मं सहति खमति, एवं अहियासेयव्वं ॥ रोगपीडितस्य शयनादिषु दुःसहतर(:)- तृणस्पर्श इत्येतदनन्तरं तत्परीषहमाह-

मू.(८३) अचेलगस्स लूहस्स, संजयस्स तवस्सिणो।
तणेसु सुयमाणस्स, हुज्जा गायविराहणा ॥

वृ. अचेलकस्य रूक्षस्य संयतस्य तपस्विन इति प्राग्वत्, तरन्तीति तृणानि-दर्भादीनि तेषु शयानस्योपलक्षणत्वात् आसीनस्य वा भवेत् गात्रस्य-शरीरस्य विराधना-विदारणा गात्रविराधना, अचेलकत्वादीनि तु तपस्विविशेषणानि मा भूत्सचेलस्य तृणस्पर्शासम्भवेनारूक्षस्य तत्सम्भवेऽपि स्निग्धत्वेनासंयतस्य च शुषिरहरिततृणोपादानेन तथाविधगात्रविराधनाया असम्भव इति ॥ ततः किमित्याह-

मू.(८४) आयवस्स निवाएणं, तिदुला हवइ वेयणा।
एवं नच्चा न सेवंति, तंतुजं तणतज्जिया ॥

वृ. 'आतपस्य' धर्मस्य नितरां पातो निपातस्तेन 'तिउल'त्ति सूत्रत्वात्तौदिक्ख, यद्वा त्रीन्- प्रस्तावत् मनोवाक्कायान्, विभाषितण्यन्तत्वात् चुरादीनां दोलतीव स्वरूपचलनेन त्रिदुला, पाठान्तरन्तु-'अतुला विपुला वा' भवति वेदना, एवं च किमित्याह-'एतद्' अनन्तरोक्तं पाठा- न्तरतः 'एवं' ज्ञात्वा 'न सेवन्ते'न भजन्ते, आस्तर नायेति गम्यते, तन्तुभ्यो जातु तन्तुजं, पठ्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च-**तंतयं**'ति तत्र तन्त्रं-वेमविलेखन्याञ्छनिकादि तस्माज्जातं तन्त्रजम्, उभयत्र वस्त्रं कम्बलो वा, तृणैस्तर्जिताः-निर्भर्त्सिताः तृणतर्जिताः, किमुक्त भवति यद्यति तृणैरत्यन्तविलिखित-शरीरस्य रविकिरणसम्पर्कसमुत्पन्नस्वेदवशतः क्षतक्षारनिक्षेपरूपैव पीडोपजायते तथाऽपि-

'प्रदीप्ताङ्गारकल्पेषु, वज्रकुण्डेष्वसन्धिषु।
कूजन्तः करुणं केचित्, दह्यन्ते नरकाग्निना ॥१॥
अग्निभीताः प्रधावन्तो, गत्वा वैतरणीं नदीम्।
शीततोयामिमां ज्ञात्वा, क्षाराम्भसि पतन्ति ते ॥२॥
क्षारदग्धशरीराश्च, मृगवेगोत्थिताः, पुनः।
असिपत्रवनं यान्ति, च्छायायां कृतबुद्धयः ॥३॥
शक्त्यष्टिप्रासकुन्तैश्च, खड्गतोमरपट्टिशैः।
छिद्यन्ते कृपापास्तत्र पतद्भिर्वातकम्पितैः ॥४॥'

इत्यादिका रौद्रतरा नरकेषु परवशेन मयाऽनुभूता वेदनास्तत्कियतीयं ?, भूयांश्च लाभः स्ववशस्य सम्यक् सहन इति परिभावनातो न तत्परिजिहीर्षया वस्त्रं कम्बलादिकमुपाददते, जिनकल्पिकापेतं चैतत्, स्थविरकल्पिकाश्च सापेक्षसंयमत्वात्सेवन्तेऽपीति सूत्रार्थः ॥

अत्र संस्थारद्वारमनुसरन् 'तिउला हवइ वेण'त्ति सूत्रसूचितमुदाहरणमाह-

नि.[११६] सावत्थीइ कुमारो भद्दो सो चारिओत्ति वेरज्जे।
खारेण तच्छियंगो तणफाससपरीसहं विसहे ॥

वृ. श्रावस्त्यां कुमारो भद्रः स 'चारिकः' चर इति वैराज्ये क्षारेण तक्षिताङ्गः तृणस्पर्शपरीषहं 'विसहे'त्ति विषहते, स्मेति विशेष इति गाथार्थः ॥ भावार्थस्तु सम्प्रदायावसेय, स चायम्-

सावत्थीए नयरीए जियसत्तू रन्नो पुत्तो भद्दो नाम, सो निव्विण्णकामभोगो तहारूवाणं थेराणमंतिते पव्वतितो, कालेण य एगल्लविहारपडिमं पडिवन्नो, सो विहरंतो वेरज्जे चारिउ-त्तिकाऊण गहिओ, सो य पंतावेऊण खारेण तच्छिओ, सो दब्भेहिं वेढिऊण मुक्को, सो दब्भेहिं लोहियसंमीलिएहिं दुक्खाविज्जंतो सम्मं सहइ॥ एवं शेषसाधुभिरपि सम्यक् सोढव्यः तृणस्प-र्शपरीषहः॥ तृणानि च मलिनान्यपि कानिचित् स्युरिति तत्सम्पर्कात् स्वेदतो विशेषेण जल्लसम्भव इत्यनन्तरं तत्परीषहमाह-

मू.(८५) *किलिन्नगाए पंकेणं, मेहावी व रएण वा।*
घिंसु वा परितावेणं, सायं नो परिदेवए ॥

वृ. क्लिन्नमनेकार्थत्वाद्धातूनां निचितं पाठान्तरतः क्लिष्टं वा-बाधितं गात्रं-शरीरमस्येति क्लिन्नगात्रः क्लिष्टगात्रो वा, मेधावी-

"वाहितो वा अरोगी वा, सिणाणं जो उ पत्थइ।
वोक्कंतो होइ आयारो, जढो हवइ संजमो ॥"

इत्यागममनुस्मरन् न स्नानरूपमर्यादानतिवर्ती, केन पुनः क्लिन्नगात्रः क्लिष्टगात्रो वेत्याह-'पङ्केन' वा स्वदार्द्रमलरूपेण 'रजसा' वा तेनैव काठिन्यं गतेन पांशुना वा, भिन्नकालत्वा-च्चानयोर्वा ग्रहणं, 'घिंसु व' त्ति ग्रीष्मे, वाशब्दाच्छरदि वा, परिः-समन्तात्तापः परितापस्तेन,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतौ तृतीया किमुक्तं भवति ?, परितापात्प्रस्वेदः प्रस्वेदाच्चा पङ्करजसी ततः क्लिन्नगात्रता क्लिष्टगात्रता वा भवति, एवंविधश्च किमित्याह-'सातं' सुखम्, आश्रित्येति शेषः 'नो परिदेवेत्' न प्रलपेत्-कथं सदा वा ममैवं मलदिग्धदेहस्य सुखानुभवः स्यात् ?, इति सूत्रार्थः ।।

किं तर्हि कुर्यादित्याह-

मू. (८६) *वेएज्ज निज्जरापेही, आरियं धम्मनुत्तरं।*
जाव सरीरभेओत्ति, जल्लं काएण धारए ।।

वृ. 'वेदयेत्' सहेत, जल्लजनितं दुःखमिति प्रक्रमः, कीदृशः सन् इत्याह-निर्जरणं निर्जरा-कर्मनामात्यन्तिकः क्षयस्तामपेक्षते-कथं ममासौअ स्यादित्यभिलषतीति निर्जरापेक्षी, क एवं कुर्यादित्याह-आराद्धेयधर्मेभ्यो यात इत्यार्यस्तं 'धर्मं' श्रुतचारित्ररूपं नास्त्युत्तरं-प्रधानमन्य-दस्मादित्यनुत्तरस्तं, गम्यमानत्वात् प्रसन्नो-भावभिक्षुरित्यर्थः, सम्प्रति सामर्थ्योक्तमप्यर्थमा-दरख्यापनाय निगमनव्याजेन पुनराह-'जाव सरीरभेओ'त्ति सूत्रत्वात्, 'यावत्' इति मर्यादायां शरीरस्य भेदो-विनाशस्तं मर्यादीकृत्य, किमित्याह-'जल्लं' कठिनतापत्रं मलम्, उपलक्षणत्वात् पङ्करजसी च 'कायेन' शरीरेण धारयेत्, दृश्यन्ते हि केचिदिन्द्राग्निदग्धानीव गिरिशखराणि विच्छायकृष्णदेहाः शीतोष्णवातातपादिभिः परिशोषितपरिदग्धोपहतशरीराः रजोऽवगुण्डि-तमलदिग्धदेहाः, अकामनिर्जरातश्च न कश्चित्तेषां गुणो, मम तु सम्यक् सहमानस्य महान् गुण इति मत्वा न तदपनयनाय स्नानादि कुर्यात्, यतः-'न शक्यं निर्मलीकर्तुं, गात्रं स्नानशतेरपि।

अश्रान्तमेव श्रोतोभिरुद्गिरन्नवभिर्मलम् ।।'' पठ्यते च-'वेइंतो निज्जरापेहि'त्ति वेदय-मानः-सहमानः, शेषं प्राग्वद्, अत्र केचिच्चतुर्थपादमधीयते, 'जल्लं काए न उव्वटे'त्ति अत्रो-द्वर्त्तनग्रहणभुद्वर्त्तयेदपि न, किं पुनः स्नायात् ?, यद्वा-'वेइज्ज'त्ति विद्यात्-जानीयाद्धर्ममाचारम्, अर्थाद्यतीनां, ज्ञात्वा च 'ज्ञानस्य फलं विरतिरि'ति जल्लं कायेन धारयेत्, तथा 'वेयंतो'त्ति विदन्-जानानोऽन्यत्तथैवेति सूत्रार्थः ।। अत्र 'मलधारिणो'त्ति द्वारमनुसरन् 'सायं नो परिदेवए' इति सूत्रावयवमर्थतः स्पृशन्नुदाहरणमाह-

नि. [११७] चंपाए सुनंदो नाम सावओ जल्लधारणदुगंछी।
कोसंबीइ दुगंधी उप्पन्नो तस्स सादिव्वं ।।

वृ. चंपायां सुनन्दो नाम श्रावको जल्लधारणजुगुप्सी कौशाम्ब्यां दुर्गन्धिरुत्पन्नः, तस्य सादिव्यं-सदेवत्वमित्यक्षरार्थः ।। भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

चंपाए नयरीए सुनन्दो नाम वानियगो सावगो, अवण्णाए चेव जो जं मग्गेइ साहू तस्स तं चेव देइ ओसहभेसज्जाइयं सत्तुगाइयं च, सव्वभंडिओ सो, तस्स अन्नया गिम्हे सुसाहूणो जल्लपरिदिद्धंगा आवणं आगया, तेसिं गंधो जल्लस्स ताण ओसहाणं गंधवभिभविउं उक्कलति, तेन सुगंधदव्वभाविएण चिंतियं-सव्वं लट्ठं साहूण जदिनाम जल्लं उवट्टिंता तो सुंदरं होंतं, एवं सो तस्स ठाणस्स अनालोइयपडिक्कंतो कालगतो कोसंबीए नयरीए इब्भकुले पुत्तत्ताए आगतो, सो निविण्णकामभोगो धम्मं सोऊण पव्वतितो, तस्स तं कम्ममुदिन्नं, दुरभिगंधो जातो, तओ जतो जतो वच्चति तओ तओ उड्डाहा, पच्छा साहूहिं भणितो-तुमं मा निग्गच्छ उड्डाहो, पडिस्सए अच्छाहि, रत्तिं देवयाए सो काउस्सग्गं करेइ, पच्छा देवयाए सुगंधो कतो, सो जहा नाम कोट्ठपुडाण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा अन्नेसिं वा विसिट्ठदव्वाण जारिसो गंधो तारिसो गंधो जातो, पुणोऽवि अड्डाहो, पुणोऽवि देवयाराहणं, साभावियगंधो जातो।

तेन नाहियासिओ जल्लपरीसहो। एवं शेषसाधुभिर्न करणीयम्। जल्लोपलिप्तश्च शुचीन् सत्क्रियमाणान् पुरस्क्रियमाणांश्चापरानुपलभ्य सत्कारपुरस्काराभ्यां स्पृहयेदतस्तत्परीषहमाह-

मू. (८७) *अभिवादन अब्भुट्ठाणं, सामी कुज्जा निमंतणं।*
जे ताइं पडिसेवंति, न तेसिं पीहए मुनी॥

वृ. 'अभिवादनं' शिरोनमनचरणस्पर्शनादि पूर्वमभिवादये इत्यादिवचनं 'अभ्युत्थानं' ससम्भ्रममासनमोचनं 'स्वामी' राजादिः 'कुर्यात्' विदधीत 'निमन्त्रणम्' अद्य भवद्भिर्भिक्षा मदीयगृहे ग्रहीतव्येत्यादिरूपं, 'ये' इति स्वयूथ्याः परतीर्थिका वा 'तानि' अभिवादनादीनि 'प्रतिसेवन्ते' आगमनिषिद्धान्यपि भजन्ते, न तेभ्यः स्पृहयेत्-यथा सुलब्धजन्मानोऽमी य एवमेवंविधैरभिवादनादिभिः सत्क्रियन्त इति 'मुनिः' अनगार इति सूत्रार्थः॥ किंच-

मू. (८८) *अनुक्कसाई अप्पिच्छे, अन्नाएसि अलोलुए।*
रसेसु नानुगिज्झिज्जा, नानुतप्पिज्ज पन्नवं॥

वृ. उत्कण्ठितः, सत्कारादिषु शेत इत्येवं शील उत्कशायी न तथा अनुत्कशायी, यद्वा प्राकृतत्वादणुकषायी सर्वधनादित्वादिनि, कोऽर्थः?-न सत्कारादिकमकुर्व्वते कुप्यति, तत्सम्पत्तौ वा नाहङ्कारवान् भवति, यत उक्तम्-

"पलिमंथ महं वियाणिया, जावि य वंदन पूयणा इहं।
सुहुमे सल्ले दुरुद्धरे, इति संखाइ मुनी न मज्जइ॥"

न वा तदर्थं छद्म तत्र वा गृद्धिं विधत्ते, अत एवाल्पा-स्तोका धर्मोपकरणप्राप्तिमात्रविषयत्वेन न तु सत्कारादिकमितया महती अल्पशब्दस्याभाववादित्वेनाविद्यमाना वा इच्छा-वाञ्छा वा यस्येति अल्पेच्छः, इच्छायाश्च कषायान्तर्गतत्वेऽपि पुनरल्पत्वाभिधानं बहुतरदोषत्वोपदर्शनार्थम्, अत एव च अज्ञातो जातिश्रुतादिभिः एषति-उञ्छति अर्थात् पिण्डादीत्यज्ञातैषी, कुतः पुनरेवम्?, यतः 'अलोलुपः' सरसौदनादोषिु न लाम्पट्यवान्, एवंविधोऽपि सरसाहारभोजिनोऽपरान् वीक्ष्य कदाचिदन्यथा स्यात् अत आह-सरसेषु-रसवतस्वोदनादिषु, पाठान्तरतो-'रसेषु वा' मधुरादिषु 'नानुगृध्येत् नाभिकाङ्क्षां कुर्वीत, रसगृद्धिवर्जनोपदेशश्च तद्गृद्धित एव बालिशानामभिवादनादिस्पृहासम्भवात्, तथा न 'तेभ्यो' रसगृद्धेभ्यः स्पृहयेन्मुनिः, पाठान्तरतश्च नानुतप्येत् तीर्थान्तरीयान्नृपत्यादिभिः सत्क्रियमाणानवेक्ष्य, किमेतत्परित्यागेनाहमत्र प्रव्रजितः?, इति, प्रज्ञा-हेयोपादेयविवेचनात्मिका मतिस्तद्वान्, अनेन सत्कारकारिणि तोषं न्यत्कारकारिणि च द्वेषमकुर्व्वताऽयं परीषहोऽध्यासितव्य इत्युक्तं भवतीति सूत्रार्थः॥ अत्र 'अङ्गविद्ये'ति द्वारमनुसरन् सूत्रोक्तमर्थं व्यतिरेकोदाहरणेन स्पष्टयन्नाह-

नि. [११८] महुराइ इंददत्तो पुरोहिओ साहुसेवओ सिट्ठी।
पासायविज्जपाडण पायच्छिज्जेंदकीले य॥

वृ. मथुरायामिन्द्रदत्तः पुरोहितः साधुसेवकः श्रेष्ठी प्रासादविद्यापातनं पादच्छेदश्चेन्द्रकीले चस्य भिन्नक्रमत्वादिति गाथासंस्कारः॥ एतदर्थश्च सम्प्रदायादवसेयः, स चायम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरकालपइट्ठियाए महुराए इंददत्तेणं पुरोहिएणं पासायगएणं हेट्ठेणं साधुस्स वच्चंतस्स पाओ ओलंबितो सीसे कतोत्तिकाउं, सो य सावएण सिट्ठिणा दिट्ठो, तस्सामरिसो जाओ, दिट्ठं भो ! एएण पावेणं साहुस्स उवरिं पादो कतोत्ति, तेन पइन्ना कया-अवस्स मए एयस्स पादो छिंदेयव्वो, तस्स छिद्दाणि मग्गइ, अलभमानो अन्नया आयरिआण सगासे गंतूण वंदित्ता परिकहेइ, तेहिं भन्नइ-का पुच्छा ?, अहियासेयव्वो सक्कारपुरक्कारपरीसहो, तेन भणियं-मए पइन्ना कएल्लिया, आयरिएहिं भन्नइ-एयस्स पुरोहियस्स किं घरे वट्टइ ?, तेन भन्नइ-एयस्स पुरोहियस्स पासाओ कएल्लतो, तस्स पवेसणे रन्नो भत्तं करेहित्ति, तेहिं भन्नइ-जाहे राया पविसइ तं पासायं ताहे तुमं रायं हत्थेण गहेऊण अवसारिज्जासि जहा-पासाओ पडति, ताहेऽहं पासायं विज्जाए पाडिस्सं, तेन तहा कयं, सेट्ठिणा राया भणितो-एएण तुब्भे मारिया आसि, रुट्ठेण रन्ना पुरोहितो सावगस्स अप्पितो, तेन तस्स इंदकीले पादो कतो, पच्छा छिन्न(न्नो), एवं काउं इयरो विसज्जितो। तेन नाहियासितो सक्कारपुरक्कारपरीसहो इति। यथा तेन श्राद्धेनासौ न सोढो न तथा विधेयं, किन्तु साधुवत्सोढव्य:, इह पूर्वत्र च श्रावकपरीषहाभिधानमाद्यनयचतुष्टय मतेनेति भावनीयम्, उक्तं हि प्राक्-"तिण्हंपि नेगमनतो परीसहो जाव उज्जसुत्तातो"त्ति, अङ्गं चात्र पादो, विद्या च प्रासादपातनविद्या॥ साम्प्रतमनन्तरोक्तपरीषहान् जयतोऽपि कस्यचिज्ज्ञानावरणापगमात् प्रज्ञाया उत्कर्षे अपरस्य तु तदुदयादपकर्षे उत्सेकवैक्लव्यसम्भव इति प्रज्ञापरीषहमाह-

मू.(८९) से नूनं मए पुव्वं, कम्माऽनाणफला कडा।
जेनाहं नाभिजाणाभि, पुट्ठो केणइ कण्हुई।
मू.(९०) अह पच्छा उइज्जंति, कम्माऽनाणफलाकडा।
एवमासासि अप्पाणं, नच्चा कम्मविवागयं॥

वृ. सेशब्दो मागधप्रसिद्धयाऽथशब्दार्थ उपन्यास, 'नूनं' निश्चितं 'मये'ति आत्मनिर्देश: 'पूर्वं' प्राक् क्रियन्त इति कर्माणि तानि च मोहनीयादीन्यपि सम्भवन्त्यत आह- अज्ञानम्-अनवबोधस्तत्फलानि ज्ञानावरणरूपाणीत्यर्थ: 'कृतानि' ज्ञाननिन्दाभिरुपार्जितानि, यदुक्तम्-

ज्ञानस्य ज्ञानिनां चैव, निन्दाप्रद्वेषमत्सरै:।
उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते॥

'मये'त्यभिधानं च स्वयमकृतस्योपभोगासम्भवाद्, उक्तं च-

"शुभाशुभानि कर्माणि, स्वयं कुर्वन्ति देहिन:।
स्वयमेवोपभुज्यन्ते, दु:खानि च सुखानि च॥"

कुत एतदित्याह-येन हेतुना अहं 'नाभिजानामि' नाभिमुख्येनावबुद्धये पृष्ट: केनचित् स्वयमजानता जानता वा 'कण्हुई'त्ति सूत्रत्वात् कस्मिंश्चित् सूत्रादौ वस्तुनि वा, प्रगुणेऽपीत्यभिप्राय:। न हि स्वयं स्वच्छस्फटिकवदतिनिर्मलस्य प्रकाशरूपस्यात्मनोऽप्रकाशकत्वं किन्तु ज्ञानावृत्तिवशत एव, उक्तं हि-

"तत्र ज्ञानावरणीयं नाम कर्म भवति येनास्य।
तत्पञ्चविधं ज्ञानामावृतं रविरिव मेघैस्तथा॥"

अथवा 'से नूनं'ति सेशब्द: प्रतिवचनवाचिनोऽथशब्दस्यार्थे, स हि केनत्किञ्चित्पर्यनुयुक्त:

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाविधविमर्शाभावेन स्वयमजानन् कुत एतन्ममाज्ञानमिति चिन्तयन् गुरुवचनमनुसृत्यात्मानमात्मनैव प्रति वक्ति, 'से' इत्यथ 'नूनं' निश्चितमेतत्, शेषं प्राग्वत्। आह-यदि पूर्वं कृतानि कर्माणि किं न तदैव वेदितानि ?, उच्यते, अथेति वक्तव्यान्तरोपन्यासे 'पश्चाद्' अबाधोत्तरकालम् 'उदीर्यन्ते' विपच्यन्ते कर्माण्यज्ञानफलानि कृतानि, अलर्कमूषिकविषविकारवत् तथाविधद्रव्यसाचिव्यादेव तेषां विपाकदानात्, ततस्तद्विघातायैव यत्नो विधेयो न तु विषादः, 'एवम्' अमुना प्रकारेण 'आश्वासय' स्वस्थीकुरु, कम् ?, आत्मानं, मा वैक्लव्यं कृथा इत्यर्थः, उक्तमेव हेतुं निगमयन्नाह-ज्ञात्वा कर्मविपाकं, कर्मणां कुत्सितविपाकम्।

इत्थं प्रज्ञाऽपकर्षमाश्रित्य सूत्रद्वयं व्याख्यातम्, एतदेव तदुत्कर्षपक्ष एवं व्याख्यायते-प्रज्ञोत्कर्षवतैवं परिभावनीयं-'से' इत्युपन्यासे नूनं मया पूर्वं 'कर्माणि' अनुष्ठानानि ज्ञानप्रशंसादीनि, ज्ञानमिह विमर्शपूर्वको बोधः, तत्फलानि कृतानि येनाहं ना अपिशब्दस्य लुप्तनिर्द्दिष्टत्वान्नाऽपि-पुरुषोऽप्यभिजानामि 'पृष्टः' पर्यनुयुक्तः 'केनापि' अविवक्षितविशेषेण, सर्वेणापीत्यर्थः, 'कस्मिंश्चिद्' यत्र तत्रापि वस्तुनि, 'अथे'त्युत्कर्षानन्तरम्, 'अपत्थ'त्ति अपथ्यानि आयतिकटुकानि कर्माण्यज्ञानफलानि 'उदिज्जंति'त्ति सूत्रत्वात्तिङ्व्यत्ययेनोदेष्यन्ति, वर्त्तमानसामीप्ये वर्त्तमानवद्वा इत्यनेन वर्त्तमानसामीप्ये वा लटि उदीर्यन्ते, सन्निहितकाल एवोदेष्यन्तीत्यर्थः, अयं चाशयः-उत्सेको हि ज्ञानावरणकारणमवश्यवेद्यं च तत्, तदुदये च कुतो ज्ञानम् ?, अनियते वाऽस्मिन्क उत्सेकः ?, इत्येवमालोचयन्नाश्वासय-प्रज्ञावलेपावलुप्तचेतनमात्मानं स्वस्थीकुरु ज्ञात्वा कर्मविपाकम्, इह च तन्त्रन्यायेन युगपदर्थद्वयसम्भवः, तन्त्रं च दैर्ध्यप्रसारिताः तन्तवः, ततो यथा तदेकमनेकस्य तिरश्चीनस्य तन्तोः संग्रादि तथा यदेकेनानेकार्थस्याभिधानं स तन्त्रन्याय इति सूत्रद्वयार्थः ॥

अत्र सूत्रद्वारं, सूत्रं चागमः, अस्मिंश्च प्रस्तुतसूत्रसूचितमुदाहरणमाह-

नि.[१२०] उज्जेनी कालखमणा सागरखमणा सुवन्नभूमीए।
इंदो आउयसेसं पुच्छइ सादिव्वकरणं च ॥

वृ. उज्जयनी कालक्षपणाः सागरक्षपणाः सुवर्णभूमौ इन्द्रः आयुष्कशेषं पृच्छति सादिव्यकरणं चेति गाथाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायात् ज्ञातव्यः, स चायम्-

उज्जेनीए कालगायरिया बहुसुया, तेसिं सीसो न कोइ इच्छइ पढिउं, तस्स सीसस्स सीसो बहुसुओ सागरखमनो नाम सुवन्नभूमिए गच्छेणं विहरइ, पच्छा आयरिआ तत्थ पलाइउं गया सुवण्णभुमिं, सो य सागरखमनो अनुओगं कहइ, पन्नापरीसहं न सहइ, भणइ-खंता ! गयं एयं तुब्भ सुयखंधं ?, तेन भण्णइ-गयंति, तो सुण, सो सुणावेउं पयत्तो । ते य सेज्जायरनिबंधे कहिए तस्सिस्सा सुवन्नभूमि जतो चलिया, लोगो पुच्छति विंदं गच्छंतं-को एस आयरिओ गच्छइ ?, तेन भण्णइ-कालगा आयरिया, तं जनपरंपरएण फुसंतं कोड्डुं सागरसमनस्स संपत्तं, जहा-कालगा आयरिआ आगच्छंति, सागरखमनो भणइ-खंतग ! सच्चं मम पितामहो आगच्छति ?, तेन भण्णति-न जाणं, मयावि सुयं, आगया य साहुणो, सो अब्भुट्ठिओ, सो तेहिं साधूहिं भन्नति-खमासमणा केइ इहागया ?, पच्छा सो संकिओ भणइ-खंतो परं इक्को आगओ, न उन जाणामि खमासमणा, सो पच्छा खामेति, भणति-मिच्छामिदुक्कडं जं एत्थ मए आसादिया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्छा भणति-खमासमणा ! केरिसं अहं वक्खाणेमि ?, खमासमणेण भण्णति-लट्ठं, किन्तु मा गव्वं करेहि, को जाणति ?, कस्स को आगमोत्ति ?, पच्छा धूलिणाएण चिक्खिल्लपिंडएण य आहरणं करेंति । न तहा कायव्वं जहा सागरखमणेण कयं । ताण अज्जकालगाण समीवं सक्को य आगंतुं निओयजीवे पुच्छति, जहा अज्जरक्खियाणं तहेव जाव सादिव्वकरणं च । इदं च प्रज्ञासद्भावमङ्गीकृत्योदाहरणमुक्तं, तदभावे तु स्वयमभ्यूह्यमिति ॥ इदानीं प्रज्ञाया ज्ञानविशेषरूपत्वात्तद्विपक्षभूतत्वादज्ञानस्य तत्परीषहमाह, सोऽप्यज्ञानभावाभावाभ्यां द्विधैव, तत्र भावपक्षमङ्गीकृत्येदमुच्यते-

मू. (९१) निरट्ठगंमि विरओ, मेहुणाओ सुसंवुडो ।
जो सक्खं नाभिजाणामि, धम्मं कल्लाण पावगं ॥

मू. (९२) तवोवहाणमायाय, पडिमं पडिवज्जओ ।
एवंपि मे विहरओ, छउमं न नियट्टति ॥

वृ. 'निरट्ठगंमि'त्ति अर्थः-प्रयोजनं तदभावो निरर्थं तदेव निरर्थकं तस्मिन् सति, 'विरतः' निवृत्तः, कस्मात् ?, मिथुनस्य भावः कर्म वा मैथुनम्-अब्रह्म तस्मात्, आश्रवान्तरविरतावपि यदस्योपादनां तदस्यैवातिगृद्धिहेतुतया दुस्त्यजत्वात्, उक्तं हि-"दुपच्चया इमे कामा" इत्यादि, सुष्ठु संवृतः सुसंवृतः-इन्द्रियनोइन्द्रियसंवरणेन, यः 'साक्षात्' इति परिस्फुटं नाभिजानामि 'धर्मं' वस्तुस्वभावं 'कल्लाण'त्ति बिन्दुलोपात्कल्याणं शुभं 'पापकं' वा तद्विपरीतं, वत्यस्य गम्यमानत्वात्, यद्वा धर्मम्-आचारं कल्यः-अत्यन्तनीरुक्तया मोक्षस्तमानयति (अणति)-प्रज्ञापयतीति कल्याणो-मुक्तिहेतुस्तं, पापकं वा नरकादिहेतुम्, अयमाशयः-यदि विरतौ कश्चिदर्थः सिद्धेन्नैवं ममाज्ञानं भवेत्, कदाचित् सामान्यचर्ययैव न फलावाप्तिरत आह-

तपो-भद्रमहाभद्रादि उपधानम्-आगमोपचाररूपमाचाम्लादि 'आदाय' स्वीकृत्य चरित्वेतियावत् 'प्रतिमां' मासिक्यादिभिक्षुप्रतिमां 'पडिवज्जिय'त्ति प्रतिपद्याङ्गीकृत्य, पठ्यते च-'पडिमं पडिवज्जओ'त्ति प्रतिपद्यमानस्य-अभ्युपगच्छतः, 'एवमपि' विशेषचर्ययाऽपि, आस्तां सामान्यचर्ययेत्यपि शब्दार्थः 'विहरतो'त्ति निष्प्रतिबन्धत्वेनानियतं विचरतः छादयतीति छद्म-ज्ञानावरणादिकर्म 'न निवर्त्तते' नापैतीति भिक्षुः न चिन्तयेदित्युत्तरेण सम्बन्धः । अज्ञानाभावपक्षे तु समस्तशास्त्रार्थनिष्कनिकषोपलकल्पना(ता)यामपि न दर्प्पाध्मातमानसो भवेत्, किन्तु-

'पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ?, ॥'

इति परिभावयन् विगलितावलेपः सन्नेवं भावयेत्-'णिरट्ठयं' सूत्रद्वयम्, अक्षरगमनिका सैव, नवरं 'निरट्ठयंमिऽवि' निरर्थकेऽपि प्रक्रमात् प्रज्ञावलेपे रतो, मैथुनात् सुसंवृतः सन्निरुद्धात्मा सन् योऽहं 'साक्षात्' समक्षं नाभिजानामि धर्मं कल्याणं पापकं वा, अयमभिप्रायः-'जे एगं जाणति से सव्वं जाणति (जे सव्वं जाणति) से एगं जाणति' इत्यागमात् छद्मस्थोऽहमेकमपि धर्म्मं वस्तुस्वरूपं न तत्त्वतो वेद्मि, ततः साक्षाद्भावस्वभावावभासि चेन्न विज्ञानमस्ति किमितोऽपि मुकुलितवस्तुस्वरूपपरिज्ञानतोऽवलेपेनेति भावः, तथा तपउपधानादिभिर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्युपक्रमणहेतुभिः उपक्रमयितुशक्ये छद्मनि दारुणे वैरिणि प्रतपति कः किल ममाहङ्कारावसर इति। साम्प्रतमावृत्त्या पुनः सूत्रद्वारमङ्गीकृत्य प्रकृतसूत्रोपक्षिप्तमज्ञानसद्भाव उदाहरणमाह-

नि.[१२१] परितंतो वायणाए गंगाकूले पिया असगडाए।
संवच्छरेहऽहिज्जइ बारसहि असंखयज्झयणं ॥

वृ. 'परितान्तः' खिन्नो वाचनया गङ्गाकूले पिताऽशकटायाः संवत्सरैरधीते द्वादशभिरसंस्कृताध्ययनमिति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

गंगाकूले दोन्नि साहू पव्वइया भायरो, तत्थ एगो बहुसुतो एगो अप्पसुतो, तत्थ जो सो बहुसुतो सो सीसेहिं सुत्तत्थनिमित्तमुवसप्पंतेहिं दिवसतो विरेगो नत्थि, रत्तिंपि पडिपुच्छणसिक्खगाईहिं सुइयं न लहइ, जो सो अप्पसुतो सो रत्तिं सव्वं सुयइ। अन्नया कयाई सो आयरिओ निद्दापरिखेतितो चिंतेति-अहो मे भाया पुण्णवंतो जो सुयइ, अम्हं पुण मंदपुण्णाणं सुइउंपि न लब्भइ, तेन नाणावरणिज्जं कम्मं बद्धं, सो तस्स ठाणस्स अणालोइयपडिक्कंतो कालमासे कालं किच्चा देवलोएसु उववन्नो। तओ चुतो इहेव भारहे वासे आहीरघरे दारतो जातो, कमेण वड्ढितो जोवणत्थो वीवाहितो, दारिया जाया, अतीव रूववती, सा य भद्दकन्नया।

कयाइ ताणि पियापुत्ताणि अन्नेहिं आहीरेहिं समं सगडं धयस्स भरेऊण नगरिं विक्किननट्ठा पत्थिआणि, सा य कन्नया सारत्थं तस्स सगडस्स करेइ, ततो ते गोवदारया तीए रूवेणाक्खित्ता तीसे सगडस्स अब्भासयाइं सगडाइं खेडंति तं पलोइंता, ताइं सव्वाति सगडाति उप्पेणं भग्गइं, तओ तीए नामं कयं-असगडत्ति, असगडाए पिया असगडपिया। तस्स तं चेव वेरग्गं जायं, ते दारियं परिणावेउं सव्वं च धरसारं दाऊण पव्वतितो।

तेन तिन्नि उत्तरज्झयणाणि जाव अहीयाणि, ताव असंखे उदिट्ठे तं नाणावरणं कम्ममुदिन्नं, गया दो दिवसा अंबिलछट्ठेण, न एगो सिलोगो ठाति, आयरिएहिं भन्नति-उट्ठेहि जा एयमज्झयणमसंखयमणुन्नविज्जति, सो भणति-एयस्स केरिसो जोगो ?, आयरिया भणंति-जाव न उट्ठेति ताव आयंबिलं, सो भणति-अलाहि मे अणुन्नाए नं, एवं तेन अदीनेन आयंबिलाहारेणं बारसहिं संवच्छरेहिमहिज्झियमज्झयणमसंखयं, खवियं तं कम्मं, सेसं लहुं चेव अहिज्जियं ॥ एवमज्ञानपरीषहः सोढव्यः, प्रतिपक्षे च भौमद्वारं, तत्राप्येतत्सूत्रसूचितमिदमुदाहरणं-

नि.[१२२] इमं च एरिसं तं च तारिसं पिच्छ केरिसं जायं ?।
इय भणइ थूलभद्दो सन्नाइघरं गओ संतो ॥

वृ. 'इदं चे'ति द्रव्यम् 'ईदृशमि'ति स्तम्भमूलस्थितमतिप्रभूतं च, अतिशयज्ञानित्वेन तस्य हृदि विपरिवर्त्तमानतया द्रव्यस्येदया निर्देशः, 'तच्चे'ति तस्याज्ञानतः परिभ्राणं 'तादृशमि'ति विप्रकृष्टदुर्गदेशान्तरविषयं, पश्य की दृशं ? केन सदृशं ? जातं, न केनापि, कश्चिद्गहे सति द्रव्ये द्रव्यार्थी बहिर्भ्राम्यति ?, इति भावः, 'इती'त्येवं भणति स्थूलभद्रः 'स्वज्ञातिः' अत्यन्तसुहृत्तद्गृहं गतः सन्निति गाथार्थः ॥ सम्प्रदायश्चात्र-

थूलभद्दो आयरिओ बहुसुतो, तस्स एगो पुव्विं मित्तो होत्था, सन्नायगोऽवि य। सो सूरी विहंरतो तस्स घरं गतो महिलं पुच्छति-सो अमुको कहिं गतोत्ति ?, सा भणइ-वाणिज्जेणं, तं च घरं पुव्विं लट्ठं आसि, पच्छा सडियपडियं जायं, तस्स पुव्विल्लएहिं एगस्स खंभस्स हेट्ठा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूमीए दव्वं निहेल्लयं, त्रं सो आयरितो नानेन जाणति, पच्छा तेनं तओहुत्तं हत्थं काउं भण्णति-'इमं च एरिसं तं च चारिसमित्यादिगाथा' इमं च एरिसं दव्वजायं, सो अन्नाणेणं भमइ, एवं च भणमाणे जनो जाणति, जहा-घरमेव पुव्विं लट्टं इयाणिं तु सडियपडियं दट्टुं अनिच्चयाणि-रूवणत्थं भयवं दंसेइ। सो य आगतो, महिलाए सिट्ठं-जहा थूलभद्दो आगतो आसि, सो भणति-थूलभद्देण किंचि भणियं ? न किंचि, नवरं खंभहुत्तं हत्थं दायंतो भणियाइओ-'इमं च एरिसमित्यादि' तेन पंडरिए नायं-जहा एत्थ अवस्सं किंचि अत्थि, तेन खाणियं जाव नानापगाररयनान भरियं कलसं पेच्छइ। तेन नानापरीसहो नाहियासिओ। नैवं शेषसाधुभिः कर्त्तव्यम्। इह च प्रज्ञाज्ञानयोर्भावाभावाभ्यां सूत्रे परीषहत्वेनोपवर्णनं निर्युक्तौ चाज्ञानपरीषहे तथैवदोदहारणद्वयोपवर्णनमन्यत्रापि यथासम्भवमेवं भावनीयमिति ज्ञापनार्थं॥

साम्प्रतमज्ञानादर्शनेऽपि संशयीत कश्चिदिति तत्परीषहमाह-

मू. (९३) नत्थि नूनं परे लोए, इड्ढी वावि तवस्सिणो।
अदुवा वंचिओमित्ति, इइ भिक्खू न चिंतए॥

वृ. 'नास्ति' न विद्यते 'नूनं' निश्चितं 'परलोको' जन्मान्तरमित्यर्थः, भूतचतुष्टयात्मकत्वाच्छरीरस्य, तस्य चेहैव पापात्, चैतन्यस्य च भूतधर्मभूतत्वात्, तदितिरिक्तस्य चात्मनः प्रत्यक्षतोऽनुपलभ्यमानत्वाद्, 'ऋद्धिर्वा' तपोमाहात्म्यरूपा, अपिः पूरणे, कस्य ? -तपस्विनः, सा च आमर्शौषध्यादिः-

'पादरजसा प्रशमनं सर्वरुजां साधवः क्षणात्कुर्युः।
त्रिभुवनविस्मयजननान् दद्युः कामांस्तृणायग्राद्वा॥१॥
धर्माद्रत्नोन्मिश्रितकाञ्चनवर्षादिसर्गसामर्थ्यम्।
अद्भुतभीमोरुशिलासहस्रसम्पातशक्तिश्च॥२॥'

इत्यादिका च, तस्या अप्युनपलभ्यमानत्वादिति भावः, 'अदुव'त्ति अथवा, किंबहुना ?-वञ्चितोऽस्मि भोगानामिति गम्यते 'इती'त्यमुना शिरस्तुण्डनोपवासादिना यातनात्मकेन धर्मानुष्ठाने, उक्तं च-"तपांसि यातनाश्चित्राः, संयमो भोगवञ्चना" इत्यिादि, 'इती'त्यनन्तरमुपदर्शितं भिक्षुः 'न चिन्तयेत्' न ध्यायेत्, परिफल्गुरूपत्वादस्य, तथाहि-यत्तावदुक्तं-'भूतचतुष्टयात्मकत्वाच्छरीरस्य जन्मान्तराभाव' इति, तदसत्, न हि शरीरस्य जन्मान्तरानुयायित्वमस्माभिरुच्यते, किन्त्वात्मनः, न च भूतधर्म्म एव चैतन्ये आत्मव्यपदेशः, तस्य तद्धर्मत्वेनोत्तरत्र निषेत्स्यमानत्वात्, यदपि ऋद्धिर्वा तपस्विनो नास्ति, तदपि वचनामात्रमेव, अथात्मनऋद्धिनां चाभावे अनुपलभ्यो हेतुरक्तः, सोऽपि स्वसम्बन्धी सर्वसम्बन्धी वा ?, तत्र न तावदात्मनोऽभावो स्वसम्बन्ध्यनुपलम्भो हेतुः, स्वयं तस्य घटादिवदुपलभ्यमानत्वात्, यथैव हि घटादिगता रूपादया उपलभ्यन्ते, तथा आत्मगता अपि ज्ञानसुखादय इति नात्र महदन्तरमुत्पश्यामः, उक्तं चाश्वसेनवाचकेन-"आत्मप्रत्यक्ष आत्माऽय"मित्यादि, अथायं न दगोचर इति नास्तीत्युच्यते, नायमप्येकान्तो, यतस्तेनैवोक्तम्-"न च नास्तीह तत् सर्वु चक्षुषा यन्न गृह्यते" अन्यथा चैतन्यमपि न दगोचर इति तस्याप्यसत्त्वं स्यात्, अथ तत् स्वसंविदितमिति सदुच्यते, अयमपि तथाभूत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवेति सत्रस्तु, उक्तं हि-

"अस्त्येव चात्मा प्रत्यक्षो, जीवो ह्यात्मानमात्माना।
अहमस्मीति संवेत्ति, रूपादीनि यथेन्द्रियैः ॥"

इति, किं बहुना?, यथा चैतन्यमस्तीत्यभ्युपगम्यते तथाऽऽत्माप्यभ्युपगन्तव्यः, तथा चाह-

"ज्ञानं स्वस्थं परस्थं वा, यथा ज्ञानेन गृह्यते।
ज्ञाता स्वस्थः परस्थो वा, तथा ज्ञानेन गृह्यताम् ॥"इति,

अथ सर्वसम्बन्ध्यनुपलम्भ आत्माभावे हेतुः, अयमप्यसिद्धः, अहमस्मीति प्रत्ययेन प्रतिप्राणि स्वात्मनः केवलिनां च सर्वात्मनामुपलम्भस्य प्रतिषेद्धुमशक्यत्वात्, । एवमृद्धीनामप्यभावे सर्वसम्बन्ध्यनुपलम्भोऽसिद्धः स्वसम्बन्धी तु नियतदेशकालोपेक्षोऽन्यथा वा ?, प्रथमपक्षे को वा किमाह?, कश्चित्कदाचित्तासामनुपलम्भस्य (उपलम्भस्य) चास्माकमपि संमतत्वात्, द्वितीयपक्षे पुनरनैकान्तिकता, देशादिविप्रकृष्टानामनुपलम्भेऽपि सत्त्वात्, दश्यते च कचित्त कदाचित् चरणरेणुस्पर्शादितो रोगोपशमादि, ततश्चेहापि कालान्तरे महाविदेहादिषु सर्वकालमृद्धन्तरानामपि सम्भवस्यानुमीयमानत्वात्, यदपि-वञ्चितोऽस्मीति भोगसुखानामनेन शिरस्तुण्डमुण्डनोपवासादिना यातनात्मकेन धर्मानुष्ठानेनेति, तदप्यसमीक्षिताभिधानं, भोगसुखानां दुःखानुषक्तत्वेन तत्त्ववेदिनामनादेयत्वात्, तथा च वात्स्यायनोऽप्याह-"तद्यथा-विषयसम्पृक्तमन्नमनादेयमेवं दुःखमानुषक्तं सुखमनादेय" मिति, प्रयोगश्च-यद्विपक्षानुविद्धं त तत्तत्त्वतस्तदेव, यथा विषव्यामिश्रमन्नम्, अतृप्तिकाङ्क्षाशोकादिनिमित्तं च वैषयिकं सुखं, न चास्यासिद्धता, कालत्रये यथायोगमतृप्त्यादीनां प्रतिपाणि स्वसविदितत्वात्, नापि तपसो यातनात्मकत्वं, मनइन्द्रिययोगानामहान्यैव तत्प्रतिपादनात्, उक्तं हि-

"मनइन्द्रिययोगानामहानिश्चोदिता जिनैः।
यतोऽत्र तत्कथं तस्य, युक्ता स्यात् दुःखरूपता ? ॥"

शिरस्तुण्डमुण्डनादेश्च किञ्चित्पीडात्मकत्वेऽपि समीहितार्थसम्पादकत्वेन न दुःखदायकता,

"दृष्टा चेष्टार्थसंसिद्धौ, कायपीडाऽप्यदुःखदा।
रत्नादिवणिगादीनां, तद्वदत्रापि भाव्यताम् ॥"

प्रयोगश्च-यदिष्टार्थप्रसाधकं न तत्कायपीडात्मकत्वेऽपि दुःखदायि, यथा रत्नवणिजामध्वश्रमादि, इष्टार्थप्रसाधकं च तपः, न चास्याप्यसिद्धता, प्रशमहेतुत्वेन तपसस्तत्परिपक्तितारतम्यात्परमानन्दतारतम्यस्यानुभूयमानत्वेन तत्प्रकर्षे तस्यापि प्रकर्षानुमानात् प्रयोगश्च-यत्तारतम्येन यस्य तारतम्यं तस्य प्रकर्षे तत्प्रकर्षो, यथाऽग्नितापप्रकर्षे तपनीयविशुद्धिप्रकर्षः, अनुभूयते च प्रशमतारतम्येन परमानन्दतारतम्यं, लोकप्रतीतत्वाच्चेति सूत्रार्थः ॥ तथा-

मू. (९४) *अभू जिना अत्थि जिना, अदुवावि भविस्सइ।*
मुसं ते एवमाहंसु, इति भिक्खू न चिंतए ॥

वृ. 'अभूवन्' आसन् 'जिनाः' रागादिजेतारः, अस्तीति विभक्तिप्रतिरूपको निपातः, ततश्च विद्यन्ते जिनाः, अस्य कर्मप्रवादपूर्वसप्तदशप्राभृतोद्धृततया वस्तुतः सुधर्मस्वामिनैव जम्बुस्वामिनं प्रति प्रणीतत्वात्, तत्काले च जिनसम्भावदित्थमुक्तं, विदेहादिक्षेत्रान्तरापेक्षया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेति भावनीयं, 'अदुवे'ति अथवा, अपि: भिन्नक्रमो 'भविस्सइ'त्ति वचनव्यत्ययाद्भविष्यन्ति, जिना इत्यपि 'मृषा' अलीकं, 'ते' जिनास्तित्ववादिन:, 'एवम्' अनन्तरोक्तन्यायेन 'आहंसु'त्ति आहु: ब्रुवत इति भिक्षुर्न चिन्तयेत्, जिनस्य सर्वज्ञाधिक्षेपप्रतिक्षेपादिषु प्रमाणोपपन्नतया प्रतिपादनात्, तदुपदेशमूलत्वाच्च सकलैहिकामुष्मिकव्यवहाराणामिति सूत्रार्थ: ॥ इदानीं शिष्यागमनद्वारं, तत्र च 'नत्थि नूणं परे लोए' इति सूत्रावयवसूचितमुदाहरणमाह-

नि.[१२३] ओहाविउकामोऽवि य अज्जासाढो उ पणीयभूमीए।
काऊण रायरूवं पच्छा सीसेण अनुसिट्ठो ॥

वृ. 'अवधावितुकामोऽपि' उन्निष्क्रमितुकामोऽपि, च: पूरणे, आर्याषाढस्तु 'पणितभूमौ' व्यवहारभूमौ हट्टमध्य इत्यर्थ:, कृत्वा राजरूपु पश्चाच्छिष्येणानुशिष्ट इति गाथाक्षरार्थ: ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेय:, स चायम्-अत्थि वच्छाभूमीए अज्जासाढा नामायरिया बहुस्सुया बहुसीसपरिवारा य, तत्थ गच्छे जो कालं करेइ तं निज्जावेंति भत्तपच्चक्खाणाइणा, तो बहवो निज्जामिया। अन्नया एगो अप्पणतो सीसो आयरतरेण भणितो-देवगातो आगंतूण मम दरिसणं देज्जासु, न य सो आगतो वक्खित्तचित्ततणओ, पच्छा सो चिंतेइ-सुबहुं कालं किलिट्ठोऽहं, सलिंगेणं चेव ओहावइ, पच्छा तेन सीसेण देवलोगगएण आभोईतो, पेच्छइ-ओहावेंतं, पच्छा तेन तस्स पहे गामो विउव्वितो, नडपेच्छा य, सो तत्थ छम्मासे पेक्खंतो अच्छितो, न छुहं न तण्हं कालं वा दिव्वप्पभावेण वेएति, पच्छा तं संहरिउं गामस्स बहिं विजने उज्जाणे छद्दारए सव्वालंकारविभूसिए विउव्वति संजमपरिक्खत्थं, दिट्ठा तेन ते, गिण्हामि एसिमाहरणगाणि, वरं सुहं जीवंतोत्ति, सो एगं पुढविदारयं भणइ-आनेहि आभरणगाणि, सो भणइ-भगवं! एगं ताव मे अक्खाणयं सुणेहि, तओ पच्छा गिण्हिज्जासि, भणइ-सुणेमि, सो भणइ-एगो कुंभकारो, सो मट्टियं खणंतो तडीए अक्कंतो, सो भणइ-

नि.[१२४] जेन भिक्खं बलिं देमि, जेन पोसेमि नायए।
सा मे मही अक्कमइ, जायं सरणओ भयं ॥

वृ. 'जेन'त्ति प्राकृतशैल्या यया भिक्षां बलिं ददामि, यथाक्रमं भिक्षुदेवेभ्य इति गम्यते, 'जेन'त्ति यया पोषयामि 'नायए'त्ति ज्ञातीन्, सा 'मे'त्ति मां मही 'आक्रामति' अवष्टभ्नाति 'जातम्'उत्पन्नं, शरणतो भयम् इति श्लोकार्थ: ॥ अयमिहोपनय:-चौरभयादहं भवन्तं शरणमागत:, त्वं च एवं विलुम्पसि, ततो ममापि जातं शरणतो भयम्, एवमुत्तरत्राप्युपनया भावनीया:, तेन भण्णइ-अइपंडियवाइतोऽसित्ति घेत्तूण आभरणगाणि पडिग्गहे छूढाणि। गओ पुढविकाइतो, इदानिं आउक्काओ बीओ, सोऽपि अक्खाणयं कहेइ-जहा एगो तालायरो कहाकहओ पाडलओ नाम, सो अन्नया गंगु उत्तरंतो उवरि वुट्ठोदएण हीरति, तं पासिऊण जनो भणइ-

नि.[१२५] बहुस्सुयं चितकहं, गंगा वहइ पाडलं।
वुज्झमाणग! भद्दं ते, लव ता किंचि सुहासियं ॥

वृ. 'बहुश्रुतं' बहुविद्यं 'चित्रकथं' नानाकथाकथकं गङ्गा वहति 'पाडलं' पाटलनामकम्, उह्यमानक! भद्रं ते, 'लप' ब्रूहि 'ता' इति तावद्यावदद्यापि दूरं न नीयस इति भाव:, 'किञ्चित्' अत्यल्पं 'सुभाषितं' सूक्तमिति श्लोकार्थ: ॥ सोऽवादीत्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[१२६] जेन रोहंति बीयाणि, जेन जीयंति कासया।
तस्स मज्झे विवज्जामि, जा० ॥

वृ. 'येन' जलेन 'रोहन्ति' प्रादुर्भवन्ति बीजानि, येन 'जीवन्ति' प्राणधारणु कुर्वन्ति कर्षका:' कृषीबला: तस्य मध्य् 'विवज्जामि'त्ति विपद्ये म्रिये, जातं शरणतो भयमिति श्लोकार्थ: ॥ तस्सवि तहेव गिण्हति एस आउक्कातो गतो, इयाणिं तेउक्कातो तइतो, तहेव अक्खाणयं कहेइ- एगस्स तावसस्स अग्गिणा उडओ दड्ढो, पच्छा सो भणति-

नि.[१२७] जमहं दिया य राओ य, तप्पेमि महुसप्पिसा।
तेन मे उडओ दड्ढो, जा० ॥

वृ. यमहं दिवा च रात्रौ च 'तर्पयामि' प्रीणयामि मधुसर्पिता, तेनार्थादग्निना मे 'ओटज:' तापसाश्रमो दग्धो, जातं शरणतो भयमिति श्लोकार्थ: ॥ अथवा-

नि.[१२८] वग्घस्स मए भीएणं, पावगो सरणं कओ।
तेन दड्ढं ममं अंगं, जा० ॥

वृ. 'वग्घस्स'त्ति सुब्व्यत्ययात् 'व्याघ्रात्' पुण्डरीकात् मया भीतेन 'पावक:' अग्नि: शरणीकृत:, तेनाङ्गंशरीरं मम दग्धं, जातं शरणतो भयमिति श्लोकार्थ: ॥ तस्सवि तहेव गिण्हइ। एस तेउक्काओ, इदानिं वाउक्काओ चउत्थो, तहेव अक्खाणयं कहेति-जहा एगो जुवाणो घननिचियसरीरो, सो पच्छा वाएहिं गहितो, अन्नेन भण्णति-

नि.[१२९] लंघणपवणसमत्थो पुव्वं होऊणअ संपइं कीस ?।
दंडयगहियग्गहत्थो वयंस ! को नामओ वाही ?।

वृ. लङ्घनम् उत्प्लुत्य गमनं प्लवनं-धावनं तत्समर्थ: पूर्वं भूत्वा साम्प्रतं 'कीस'त्ति कस्मात् 'दण्डगयहियग्गहत्थो'त्ति प्राकृतत्वात् गृहीतदण्डाग्रहस्तो, गच्छसीति गम्यते, तदयं ते वयस्य ! किंनामको व्याधिरिति गाथार्थ: ॥ स प्राह-

नि.[१३०] जिट्ठासाढेसु मासेसु, जो सुहो वाइ मारुओ।
तेन मे भज्जए अंगं, जा० ॥

वृ. ज्येष्ठाषाढयोर्मासयोर्य: शुभशैत्यादिगुणान्वितत्वेन शोभनो वाति 'मारुतो' वायु:, तेन (मे मम) भज्यतेङ्गं, तस्य मेघोन्नतिसम्भवत्वेन वातप्रकोपादिति भाव:, एवं च जातं शरणतो भयं, धर्म्मार्दितानां हि शरणमयमिति श्लोकार्थ: ॥ अथवा-

नि.[१३१] जेन जीवंति सत्ताणि, निरोहंमि अनंतए।
तेन मे भज्जए अंगं, जायं० ॥

वृ. 'जेन' इत्यादि, येन वातेन जीवन्ति सत्त्वानि 'निरोधे' प्रक्रमाद्वातस्य 'अनन्तके' अपरिमिते, तेन मे भज्यतेऽङ्गं जातं शरणतो भयमिति श्लोकार्थ: ॥ तस्सवि तहेव गिण्हइ। एस वाउक्काओ गतो, इयाणिं वणस्सइकाइतो पंचमो, तहेव अक्खायं कहेति, जहा एगंमि रुक्खे केसिंपि सउणाण आवासो, तहियं पिल्लगाणि जायाणि, पच्छा रुक्खाब्भासाओ वल्ली उट्ठिया, रुक्खं वेढंती उवरिं विलग्गा, वेल्लीअनुसारेण सप्पेण विलग्गिऊण ते पिल्लगा खइया, पच्छा सेसगा भणन्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[१३२] जाव वुच्छं सुहं वुच्छं, पादवे निरुवद्दवे।
मूलाउ उट्ठिया वल्ली, जा० ॥

वृ. यावदुषितं सुखमुषितं पादपे निरुपद्रवे, इदानीं मूलादुत्थिता वल्ली ततो वृक्षादेव तत्त्वतो भयं, स चोक्तनीत्या शरणमिति जातं शरणतो भयमिति श्लोकार्थः ॥ तस्सवि तहेव गिण्णइ। एस वणस्सतिकातो गतो, इदानिं तसकाओ छट्ठो, तहेव अक्खाणयं कहेइ-जहा एकं नगरं परचक्केण रोहियं, तत्थ य वाहरियाए मायंगा, ते अब्भिंतरएहिं नीन्निज्जंति, वाहिं परचक्केण घेप्पंति, पच्छा केनवि अन्नेण भण्णति-

नि.[१३३] अब्भितरया खुभिया, पिल्लंति(य) बाहिरा जना।
दिसं भयह मायंगा!, जा० ॥

वृ. 'अभ्यन्तरकाः' नगरमध्यवर्त्तिनः 'क्षुभिताः' परचक्रात्रस्ताः 'प्रेरयन्ति' निष्काशयन्ति, मा भूदन्नादिक्षय एभ्यो वा भेदः, चशब्दो भिन्नक्रमः, ततो 'बाह्याश्च' परचक्रलोका उपद्रवन्ति, भवत इति गम्यते, नगरसत्का एत इति, अतो दिशं भजत मातङ्गाः!, यतो जातं शरणतो भयं, नगरं हि भवतां शरणं, तत एव भयमिति श्लोकार्थः ॥ अथवा एगत्थ-नयरे सममेव राया चोरो पुरोहिओ भंडिति (डओत्ति), ततो दोवि विहरंति, पच्छा लाओ अन्नमन्नं भणति-

नि.[१३४] जत्थ राया सयं चोरो, भंडिओ य पुरोहिओ।
दिसं भयह नायरिया!, जायं० ॥

वृ. यत्र राजा स्वयं चौरः-स्वपुरं मुष्णाति, भण्डकश्च पुरोहितः, अतो दिशं भजत नागरका! जातं शरणतो भयमिति श्लोकार्थः ॥

अहवीं एगस्स धिज्जातियस्स धूया, सा य जोव्वणत्था, पडिरूवदंसणिज्जा, सो धिज्जातितो तं पासिऊण अज्झोववण्णो, तीसे कएण अतीव दुब्बलीभूतो, बंभणीए पुच्छीतो-निब्बंधे कए कहियं, ताए भन्नति-मा अधिइं करेसं, तहा करेमि जहा केणइ पओएण संपत्ती हवति, पच्छा धूयं भणइ-अम्ह पुव्वि दारियं जक्खा भुंजंतिप पच्छा वरस्स दिज्जइ, तो तव काल-पक्खचउद्दसीए जक्खो एही, मा तं विमाणेसु, मा य तत्थ तुमं उज्जोयं काहिसि, तीएवि जक्ख-कोउहल्लेण दीवओ सरावेण ठवितो नीतो, सो य आगतो, सो तं परिभुंजिऊण रत्तिं किलंतो पासुत्तो, इमाए कोउएण सरावं फेडियं, नवरं पेच्छइ पियरं, ताए नायं-जं होइ तं होउ, इच्छाए भुंजामि भोए, पच्छा ताइं रइकिलंताइं उग्गए सूरे न पडिबुज्झंति, पच्छा बंभणी मागहियं भणइ-

नि.[१३५] अइरुग्गयए य सूरिए, चेइयथूभगए य वायसे।
भित्तीगयए य आयवे, सहि! सुहिओ हु जनो न बुज्झइ ॥

वृ. अचिरोद्गतके च सूर्ये, कोऽभिप्रायः ?-प्रथमोदिते रवौ, चैत्यस्तूपगते च वायसे, अनेनोच्चे विवखतीत्याह, भित्तिगते चातपे, अनेन चोच्चतर इति, सखि! सुखितो हुर्वाक्यालङ्कारे जनो 'न बुध्यते' न निद्रां जहाति, अनेनात्मनो दुःखितत्वं प्रकटयति, सा हि भर्तृविरहदुःखिता रात्रौ न निद्रा लब्धवतीति मागधिकार्थः ॥ पच्छा सा तीसे धूया पडिसुणित्ता पडिभणति मागहियं-

नि.[१३६] तुम एव य अम्म हे! लवे, मा हु विमाणय जक्खमागयं।
जक्खहडए हु तायए, अन्नि दानि विमग्ग तायय ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. त्वमेव चाम्ब! मातः हे इत्यामन्त्रणे 'अलापीः' उक्तवती शिक्षासमये यथा-'मा हु'त्ति मैव 'विमाणय'त्ति विमंस्था विमुखं कृथा यक्षमागतं, यक्षाहृतको 'हु'त्ति खलु तातकोऽन्यमिदानीं 'विमार्गय' अन्वेषय तातकमिति मागधिकार्थः ॥ पच्छा सा धिज्जाइणी भणइ-

नि. [१३७] नवमास कुच्छीइ धालिया, पासवणे पुलिसे य मद्दिए।
धूया मे गेहिए हडे, सलणए असलणए य मे जायए ॥

वृ. नव मासान् कुक्षौ धारिता या, प्रश्रवणं पुरीषं च मर्दितं यस्या इति गम्यते, 'धूय'त्ति दुहिता च, गम्यमानत्वात्तया, 'मे' मम 'गेहको' भर्त्ता 'हृतः' चौरितोऽतो हेतोः, शरणकमशरणकम्, अपकारित्वान्मे जातमिति मागभिकार्थः ॥ अहवा एगेण धिज्जाइएण तलायं खणावियं, तत्थेव पालीए दसे देउलमारामो चेवायाओ, सो य घित्तूण अप्पनिज्जेहिं पुत्तेहिं तस्स चेव तलाए जन्ने मारिउं निज्जति, सो य जाईस्सरो निज्जमाणो अप्पनिज्जियाएभासाए बुब्बुयइ अप्पणा चेव सोयमाणो, जहा मम चेव मए पवत्तियं, एवं सो वेवमाणो साहुणा अतिसयनाणिना एगेन दीसति, तेन भणियं-

नि. [१३८] सयमेव य लुक्ख लोविया, अप्पानिया य वियड्डि खाणिया।
ओवाइयलद्धओ य सि, किं छेला! बेबेति वाससी ? ॥

वृ. स्वयमेव च-आत्मनैव च 'रुक्ख'त्ति सुब्लोपाद्वृक्षा रोपिताः, भवतेति गम्यते, आत्मीया च 'वियड्डि'त्ति देशीवचनतः तडागिका खानिता, याचितस्य-प्रार्थितस्य प्राप्तेरुपरि देवेभ्यो देयमुपयाचितं तेनैव लब्धः-अवसरः दुरापत्वेनोपयाचितलब्धः स एवोपयाचितलब्धकोऽसि त्वमिति, किं छगलक! 'वेवेति वाससि ?-आरससीति मागधिकार्थः ॥

ततो सो छगलको तेन पढिएणं तुण्हिक्को ठिओ, तेन धिज्जाइएण चिंतियं-किंपि पव्वइयगेण पढियं, तेन एस तुण्हिक्को ठिओ, तओ सो तवस्सिं भणति-किं भगवं! एस छगलको तुब्भेहिं पढियमेत्ते चेव तुण्हिक्कोठिओ, तेन साहुणा तस्स कहियं-जहा एस तुब्भ पिया, किमभिन्नाणं?, तेन भणियं-अहंपि जाणामि, किं पुण एसो कहिहिइ, तेन छगलगेण पुव्वभवे पुत्तेण समं निहाणगं निहियं, तं गंतूणं पाएहिं खडखडेइ, एयमभिन्नाणं, पच्छा तेन मुक्को, साहुसमीवे धम्मं सोउण भत्तं पच्चक्खाएऊण देवलोयं गतो। एवं तेन सरणमिति काउं तडागारामे जण्णो य पवत्तिओ, तमेव असरणं जायं। एवंविधोऽत्र समवतारः-एवं तुम्हं अम्हे गया सरणं। इह च पूर्वकं मनुष्यजातेस्त्रसस्य स्मरणार्थमुदाहरणत्रयमिदं तु तिर्यग्जातेरिति भावनीयम्। सो तहेव तस्स आहरणगाणि घित्तूण सिग्घं गंतुं समाढत्तो पंथे, नवरिं संजइं पासति मंडियंटिविडिक्कियं, तेन सा भण्णइ-

नि. [१३९] कडए ते कुंडले य ते, अंजियक्खि! तिलयते य ते।
पवयणस्स उड्डाहकारिए! दुट्ठा सेहि! कताऽसि आगया ? ॥

वृ. कटके च 'ते' तव कुण्डले च ते अञ्जिताक्षि! तिलकश्च 'ते' त्वया कृतः, प्रवचनस्य उड्डाहकारिके! दुष्टशिक्षिते कुतोऽस्यागतेति मागधिकार्थः ॥ दर्शनपरीक्षार्थं च साध्वीविकरणं। सैवमुक्ता सतीदमाह-

नि. [१४०] राईसरिसवमित्ताणि, परछिद्दानि पाससि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पणो बिल्लमित्ताणि, पासंतोऽवि न पाससि ॥

वृ. राजिकासर्षपमात्राणि परच्छिद्राणि पश्यस्यात्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसीति श्लोकार्थः ॥ तथा-

नि.[१४१] समनोऽसि संजओ असि, बंभयारी समलेठ्ठुकंचने ।
वेहारियवाअओ य ते, जिट्ठज्ज ! किं ते पडिग्गहे ॥

वृ. श्रमनोऽसि बहिर्वृत्त्या ब्रह्मचारी समलोष्डकाञ्चनो विहारिकावातकश्च ते-यथाऽहं पुणोऽवि गच्छति, नवरं पेच्छति खंधावारमिंतं, तस्स किर नीवट्टमाणो दंडियस्सेव सवडहुत्तो गतो, तेन हत्थिखंधा ओरुहित्ता वंदितो भणिओ य-भयवं ! अहो परमं मंगलं निमित्तं च जं साहू अज्ज मए दिट्ठो, भयवं ! ममानुग्गहत्थं फासुयएसणिज्जं इमं मोयगादि संबलो घेप्पति, सो निच्छइ, भायणे आभरणगणि छूढाणि मा दीसिहिंति, तेन दंडिएण बला मोडिऊण पडिग्गहो गहिओ, जाव मोयगे छुहति तावे पेच्छइ आभरणयाणि, तेन सो खरंटिओ उबालद्धो य, पुणोऽवि संबोहिआ-जहा न जुज्जइ तुम्हं एवं विपरिनामो, मज्झं च अनागमनकारणं सुणेसु-

"संकंतदिव्वपेमा विसयसत्ताऽसमत्तकत्तव्वा ।
अणहीणमनुयकज्जा नरभवमसुहं न इंति सुरा ॥"

पच्छा दिव्वं देवरूपं काऊण पडिगतो । तेन पुव्विं दंसणपरीसहो नाहियासितो, पच्छा अहियासितो ॥ एवं शेषसाधुभिरपि सहनीयो दर्शनपरीषहः ॥ इहोदाहरणोपदर्शकत्वात् प्रकृतनिर्युक्तेः कथं सूत्रस्पर्शकत्वमिति यत्कैश्चिदुच्यते, यदुक्तं, सूत्रसूचितार्थभिधायित्वात् तस्याः तदभिधानस्य तत्त्वतः सूत्रव्याख्यानरूपत्वेन सूत्रस्पर्शकत्वादिति । किं च- 'कालीपव्वंगसकासे' इत्यादिना क्षुदादिभिरत्यन्तपीडितस्यापि यत्परीषहणमुक्तं, तत्र मन्द- सत्त्वस्य कस्यचिदश्रद्धानात् सम्यक्त्वविचलितमपि सम्भवेदिति तदृढीकार्थं दृष्टान्तभिधान- मर्थतः सूत्रस्पर्शकमिति व्यक्तमेवैतत्, न च केषाञ्चिदिहोदाहरणानां निर्युक्तिकालादर्वाक्काल- भावितेत्यन्योक्तत्वमाशङ्कनीयं, स हि भगवांश्चतुर्दशपूर्ववित् श्रुतकेवली कालत्रयविषयं वस्तु पश्येत्येवेति कथमन्यकृतत्वाशङ्केति । सम्प्रत्यध्ययनार्थोपसंहारमाह-

मू.(९५) *एए परीसहा सव्वे, कासवेण पवेइया ।*
जे भिक्खू न विहन्निज्जा, पुट्ठो केनइ कुण्हइ ॥

वृ. 'एते' अनन्तरमुपदर्शितस्वरूपाः, 'परीषहाः' क्षुदादयः 'सर्वे' द्वाविंशतिसंख्या अपि न तु कियन्त एव 'काश्यपेन' श्रीमन्महावीरेण 'प्रवेदिताः' प्ररूपिताः, 'जे'त्ति यानुक्तन्यायेन ज्ञात्वेति शेषः, 'भिक्षुः' यतिर्न चैव 'विहन्येत' पराजीयेत, कोऽर्थः ?,-संयमात्पात्येत, 'स्पृष्टो' बाधितः केनापि प्रक्रमाद्द्वाविंशतेरेकतरेण दुर्ज्जयेनापि परीषहेण 'कण्हुइ'त्ति कुत्रचित् देशे काले वा इति सूत्रार्थः ॥

इतिः परिसमाप्तौ, ब्रवीमीति सुधर्मस्वामी जम्बूस्वामिनमाह । नयाः पूर्ववत् ।

अध्ययनं-२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
द्वितीयं अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययनं-३ -चातुरंगियं

वृ. नमः श्रुतदेवतायै ॥ उक्तं परिषहाध्ययनं, सम्प्रति चतुरङ्गीयमारभ्यते, अस्य चायभिसम्बन्धः-इहानन्तराध्ययने परीषहसहनमुक्तं, तच्च किमालम्बनमुरीकृत्य कर्त्तव्यमिति प्रश्नसम्भवे मानुषत्वादिचतुरङ्गदुर्लभत्वं तदालम्बनमनेनोच्यते इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चत्वार्यनुयोगद्वाराणि व्यावर्णनीयानि तावद्यावन्नामनिष्पन्नो निक्षेपः, तत्र च चतुरङ्गीयमिति द्विपदं नाम, अतश्चत्वारो निक्षेसव्याः अङ्गं च, न चैकं विना चत्वार इत्येक एव तावन्निक्षेपमर्हतीति मन्वान आह निर्युक्तिकृत्-

नि.[१४२]　　नामंठवणादविए माउयपय संगहिक्कए चेव।
पज्जव भावे य तहा सत्तेए इक्कगा हुंति ॥

वृ. इहैककशब्दस्यैकत्र निर्दिष्टस्यापि प्रक्रान्तत्वेन सर्वत्र सम्बन्धात्, नामैककः स्थापनैककोद्रव्यैककः, 'उयपय'त्ति सुपो लोपान्मातृकापदैककः संग्रहैककः 'चः' समुच्चये, एवेति पूरणे, 'पज्जव'त्ति प्राग्वत् पर्यवैककः 'भावे' भावैककः, 'चः' पूर्ववत्, तथे'ति शेषानामपि निरुपचरितवृत्तितया तुल्यत्वाद, उपसंहर्तुमाह-'ससैते' अनन्तरोक्ता एकका भवन्ति, एतद्व्याख्या च दशवैकालिकनिर्युक्तावेव निर्युक्तिकृता कृतेत्यत्रोदासितं, स्थानाशून्यार्थं तु तदुक्तमेव किञ्चिदुच्यते-तत नामैकको यस्यैकक इति नाम, स्थापनैककः पुस्तकादिन्यस्त एककाङ्कः, द्रव्यैककः सचित्तादिस्त्रिधा-तत्र सचित्त एककः पुरुषादिरर्थः, अचित्तः फलकादिः, मिश्रो वस्त्रादिविभूषितः पुरुषादिरेव, मातृकापदैककः 'उप्पन्ने इ वा विगमे इ वा धुवे इ वा' इति, एषां मातृकावत्सकलवांमयमूलतयाऽवस्थितानामन्यतरद्विशक्षितम्, अकाराद्यक्षरात्मिकाया वा मातृकाया एकतरोऽकारादि, संग्रहैककः येनैकनापि ध्वनिना बहवः संगृह्यन्ते, यथा जातिप्राधान्ये व्रीहिरिति, पर्ययैकेकः शिवकादिरेककः पर्यायो, भावैककः औदयिकादिभावानामन्यतमो भाव इति गाथार्थः ॥ इत्थमविनाभाविताऽऽक्षिप्तमेककं निक्षिप्य प्रस्तुतमेव चतुष्कं निक्षेप्तुमाह-

नि.[१४३]　　नामं ठवणा दविए खित्ते काले य गणन भावे य।
निक्खेवो य चउण्हं गणनसंखाइ अहिगारो ॥

वृ. तत्र नामस्थापने क्षुण्णे 'द्रव्ये' विचार्ये सचित्ताचित्तमिश्राणि द्रव्याणि चतुःसङ्ख्यतया विवक्षितानि, 'क्षेत्रे' चतुःसङ्ख्यापरिच्छिन्ना आकाशप्रदेशमा यत्र वा चत्वारो विचार्यन्ते, 'काले च' चत्वारः समयावलिकादयः कालभेदाः यदा वा अमी व्याख्यायन्ते, गणनायां चत्वार एको द्वौ त्रयश्चत्वार इत्यादिगणनान्तःपातिनो, भावे च चत्वारो मानुषत्वादयोऽभिधास्यमाना भावाः, एषां मध्ये केनाधिकारः ?, उच्यते, गणनासङ्ख्ययाऽधिकारः, किमुक्तं भवति ?-गणनाचतुर्भिरधिकारः, तैरेव वक्ष्यमाणानामङ्गानां गण्यमानतया तेषामेवोपयोगित्वादिति गाथार्थः ॥

नि.[१४४]　　नामंगं ठवणंगं दव्वंगं चेव होइ भावंगं।
एसो खलु मगस्सा निक्खेवो चउव्विहो होइ ॥

वृ. नामाङ्गं स्थापनाङ्गं द्रव्याङ्गं चैव भवति भावाङ्गम्, एतत् खलु 'अङ्गस्सा' इति प्राकृतत्वात्

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अङ्गस्य निक्षेपश्चतुर्विधो भवतीति गाथासमासार्थः ॥ अत्र च नामस्थापने प्रसिद्धत्वादनादृत्य द्रव्याङ्गमभिधित्सुराह-

नि. [१४५] गंधंगमोसहंगं मज्जाउज्जंसरीरजुद्धंगं ।
एत्तो इक्किक्कंपि य नेगविहं होइ नायव्वं ॥

वृ. 'गन्धाङ्गम्' औषधाङ्गम्, 'मज्जाउज्जंसरीजुद्धंगं'ति बिन्दोरलाक्षणिकत्वादङ्गशब्दस्य च प्रत्येकभिसम्बन्धात् मद्याङ्गमातोद्याङ्गं शरीराङ्गं युद्धाङ्गमिति षड्विधं द्रव्याङ्गम्, 'एत्तो'त्ति सुब्व्यत्ययादेषु-गन्धाङ्गादिषु मध्ये एकैकमपि च अनेकविधं भवति ज्ञातव्यमिति गाथाक्षरार्थः ॥ भावार्थं तु विवक्षुराचार्यो 'यथोद्देशं निर्देश' इति न्यायमाश्रित्य गन्धाङ्गं प्रतिपादयन्नाह-

नि. [१४६] जमदग्गिजडा हरेणुअ सबरनियंसणियं सपिण्णियं ।
रुक्खस्स य बाहितया मल्लियवासिय कोडी अग्घइ ॥

वृ. तत्र 'जमदग्निजटा'वालकः 'हरेणुका' प्रियंगुः 'शबरनिवसनकं' तमालपत्रं, 'सपिन्नियं'-ति पिन्नि-पिन्निका ध्यामकाख्यं गन्धद्रव्यं तया सह सपिन्निकं, वृक्ष्यस्य च बाह्या त्वक् चातुर्जातकाङ्गं प्रतीतैव 'मल्लियवासियं'ति मल्लिका जातिस्तद्वासितमनन्तरोक्तद्रव्यजातं, चूर्णीकृतमिति गम्यते, कोटिम् अर्हति, कोटिमूल्यार्हं भवति, महार्घतोपलक्षणं चैतत् ॥

नि. [१४७] ओसीरहरिबेराणं पलं पलं भद्दारुणो करिसो ।
सयपुप्फाणं भागो भागो य तमालपत्तस्स ॥

वृ. तथा 'ओसीरं' प्रसिद्धं, 'ह्रीवेरो' वालकः, पलं पलमनयोः, तथा 'भद्रदारोः' देवदारोः कर्षः, 'सयपुप्फाणं'ति वचनव्यत्ययात् शतपुष्पाया भागो, भागश्च तमालपत्रस्य, भाग इह पलिकामात्रम् ॥

नि. [१४८] एयं न्हायं एयं विलेवनं एस चेव पडवासो ।
वासवदत्ताइ कओ उदयनमभिधारयंतीए ॥

वृ. अस्य माहात्म्यमाह-एतत् स्नानमेतद्विलेपनमेष चैव पटवासः 'वासवदत्तया' चण्डप्रद्योतदुहित्रा 'कृतो' विहितः 'उदयनं' वीणावत्सराजम् 'अभिधारयन्त्या' चेतसि वहन्त्या, अनेन परचित्ताक्षेपकत्वमस्य माहात्म्यमुक्तमिति सूत्रार्थः ॥ औषधाङ्गमाह-

नि. [१४९] दुन्नि य रयणी माहिंदफलं च तिन्नि य समूसणंगाइं ।
सरसं च कणयमूलं एसा उदगट्ठमा गुलिआ ॥

नि. [१५०] एसा उ हरइ कंडुं तिमिरं अवहेडयं सिरोरागं ।
तेइज्जगचाउत्थिग मूसगसप्पावरद्धं च ॥

वृ. 'द्वे रजन्यौ' पिण्डदारुहरिद्रे माहेन्द्रफलं च' इन्द्रयेवाः, त्रीणि च समूषणं-त्रिकटुकं तस्याङ्गानिसुण्ठीपिप्लीमरिचद्रव्याणि, 'सरसं च' आर्द्रं 'कनकमूलं' बिल्वमूलमेषा 'उदकाष्टमे'त्युदकमष्टमं यस्यां सा तथा, 'गुटिका' वटिका, अस्याः फलमाह-एषा तु हन्ति कण्डुं तिमिरम् 'अवहेडय'न्ति अर्द्धशिरोरोगं समस्तशिरोव्यथं, 'तेइज्जगचाउत्थिग'त्ति सुब्लोपे तात्तीयीकचातुर्थिकौ, रूढ्य ज्वरौ, 'मूषकसर्प्पापराद्धम्' उन्दरादिदष्टं, चः समुच्चय इति गाथाद्वयार्थः ॥ मद्याङ्गमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[१५१] सोलस दक्खा भागा चउरो भागा य धाउगीपुप्फे।
आढगमो उच्छुरसे मागहमानेन मज्जंगं ॥

वृ. षोडश द्राक्षा भागाश्चत्वारो भागाश्च 'धातकीपुष्पे' धातकी पुष्पविषयाः 'आढगमो'त्ति आर्षत्वादाऽऽढककः 'इक्षुरसे' इक्षुरसविषये, आढकः इह केन मानेनेत्याह-'मागधमानेन' दो असती एसती उ' इत्यादिरूपेण 'मद्याङ्गं' मदिराकारणं भवतीति गाथार्थः ॥ आतोद्याङ्गमाह-

नि.[१५२] एग मुगुंदा तूरं एगं अहिमारुदारुयं अग्गी।
एगं सामलीपुंडं बद्धं आमेलओ होइ ॥

वृ. 'एकमुकुन्दा तूर्गम्' इति एकैव मुकुन्दा वादित्रविशेषो गम्भीरस्वरत्वादिना तूर्गकार्यकारित्वात् तूर्यम्, अनेनास्याविशिष्टमातोद्याङ्गत्वमेवाह, किमेवैकेव मुकुन्दा तूर्यम्?, सोपस्करात्वाद्यथैकमभिमारस्य वृक्षविशेषस्य दारुकंकाष्ठमभिमारदारुकम् 'अग्निः' विशेषतोऽग्निजनकत्वाद्, यथा वा 'एकं शाल्मलीपोण्डं' शाल्मलीपुष्पं बद्धमामोडको भवति, आमोडकः पुष्पोन्मिश्रो वालबन्धविशेषः, स्फारत्वादस्य, इत्थं दृष्टान्ताभिधायितयेदं व्याख्यायते, प्रसङ्गतो वाऽग्न्यङ्गामोडकाङ्गयोरप्यभिधानमिति सूत्रार्थः ॥ शरीराङ्गमाह-

नि.[१५३] सीसं उरो य उदरं पिट्ठी बाहा य दुन्नि ऊरू य।
एए खलु अट्ठंगा अंगोवंगाइ सेसाइं ॥

वृ. 'शिरश्च उरः' चः प्राग्वद्, उदरं 'पिट्ठी'त्ति प्राकृतत्वात्पृष्टं बाहू द्वौ उरू च एतान्यष्टाङ्गानि, प्राग्वल्लिङ्गव्यत्ययः, 'खलुः' अवधारणे, एतान्येवाङ्गानि, अङ्गोपाङ्गानि 'शेषाणि' नखादीनि, उपलक्षणत्वादुपाङ्गानि च कर्णादीनि, यत उक्तम्-

"होंति उवंगा कण्णा नासच्छी जंघ हत्थ पाया य।
नह केस मंसु अंगुलि ओट्ठा खलु अंगुवंगाइं ॥"

इति गाथार्थः ॥ साम्प्रतं युद्धाङ्गमाह-

नि.[१५४] जाणावरणपहरणे जुद्धे कुसलत्तणं च नीई अ।
दक्खत्तं ववसाओ सरीरमारोग्गया चेव ॥

वृ. 'जाणावरणपहरणे'त्ति यानं च-हस्त्यादि, तत्र सत्यपि न शक्नोत्यभिभवितुं शत्रुम् अत आवरणं-कवचादि, सत्यप्यावरणे प्रहरणं विना किं करोतीति प्रहरणं च-खङ्गादि, यानावरणप्रहरणानि, यदि युद्धे कुशलत्वं नास्ति किं यानादिना? इति 'युद्धे' संग्रामे 'कुशलत्वं च' प्रावीण्यरूपं, सत्यप्यस्मिन्नीतिं विना न शत्रुजयनम् अतो 'नीतीश्च' अपक्रमादिलक्षणा, सत्यामपि चास्यां दक्षत्वाधीनो जयः ततो 'दक्षत्वम्' आशुकारित्वं, सत्यप्यस्मिन्निर्व्यवसायस्य कुतो जय इति 'व्यवसायो' व्यापारः, तत्रापि यदि न शरीरमहीनाङ्गं ततो न जय इति शरीरम्-अर्थात् परिपूर्णाङ्गं, तत्राप्यारोग्यमेव जयायेति 'आरोग्गय'त्ति अरोगता, चः समुच्चये, एवोऽवधारणे, ततः समुदितानामेवैषां युद्धाङ्गत्वमिति सूत्रार्थः ॥ भावाङ्गमाह-

नि.[१५५] भावंगंपि य दुविहं सुअमंगं चेव नोसुयंगं च।
सुयमंगं बारसहा चउव्विहं नोसुअंगं च ॥

वृ. भावाङ्गमपि च द्विविधं 'सुयमङ्ग'त्ति श्रुताङ्गं चैव नोश्रुताङ्गं च, श्रुताङ्गं द्वादशधा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचारादि, भावाङ्गता चास्य क्षायोपशमिकभावान्तर्गतत्वात्, उक्तं-हि-"भावे खओवसमिए दुवालसंगंपि होइ सुयणाण'ति, चतुर्विधम्' चतुष्प्रकारं नोश्रुताङ्गं तं, नोशब्दस्य सर्वनिषेधार्थत्वात् अश्रुताङ्गं पुनः, मकारश्च सर्वत्रालाक्षणिक इति गाथार्थः ॥ एतदेवाह-

नि.[१५६] मानुस्सं धम्मसुई सद्धा तवसंजमंमि विरिअं च।
एए भावंगा खलु दुल्लभगा हुंति संसारे ॥

वृ. 'मानुष्यम्' मनुजत्वम्, अस्य चादावुपन्यास एतद्भवा एव शेषाङ्गभावात्, 'धर्मश्रुतिः' अर्हत्प्रणीतधर्माधर्माकर्णनं, 'श्रद्धा' धर्मकरणाभिलाषः, तपः-अनशनादिः तत्प्रधानः संयमः-पञ्चाश्रवविरमणादिस्तपःसंयमः, मध्यपदलोपी समासः, तपश्च संयमश्चअ तपःसंयममिति समाहारो वा तस्मिन्, 'वीर्यं च' वीर्यान्तरायक्षयोपशमसमुत्था शक्तिः, अस्य च द्विष्ठस्याप्येकत्वेन विक्षितत्वान्नोक्तसङ्ख्याविरोधः, एतानि भावाङ्गानि, 'खलु' निश्चितम् दुर्लभकानि भवन्ति संसारे, लिङ्गव्यत्ययश्च प्राकृतत्वाद्, एतच्चानुक्तावपि सर्वत्र भावनीयमिति गाथार्थः ॥ इह द्रव्याङ्गेषु शरीराङ्गं भावाङ्गेषु च सयमः प्रधानमिति तदेकार्थिकान्याह-

नि.[१५७] अंग दसभाग भेए अवयवाऽसगल चुन्न खंडे अ।
देस पएसे पव्वे साह पडल पज्जवखिले अ।

नि.[१५८] दया य संजमे लज्जा, दुगुञ्छाऽछलणा इअ।
तितिक्खा य अहिंसा य, हिरि एगट्ठिया पया ॥

वृ. अङ्गं दशभागो भेदोऽवयवोऽसकलश्चूर्णः खण्डो देशः प्रदेशः पर्व शाखा पटलं पर्यवखिलं चेति शरीराङ्गपयाया इति वृद्धाः। व्याख्यानिकस्तु अविशेषतोऽमी अङ्गपर्यायाः, तथा दशभाग इति दशा भाग इति च भिन्नावेव पर्यायावित्याह। चः समुच्चये, सूत्रत्वाच्च सुपः क्वचिदश्रवणमिति ॥ संयमपर्यायनाह-दया च संयमो लज्जा जुगुप्साऽछलना, इतिशब्दः स्वरूपपरामर्शकः पर्यन्ते योक्ष्यते, तितिक्षा चाहिंसा च ह्रीश्चेत्येकार्थिकानि-अभिन्नाभिधेयानि पदानि सुबन्तशब्दरूपाणि, पर्यायाभिधानं च नानादेशजविनेयानुग्रहार्थमिति गाथाद्वयार्थः ॥ क्षेत्रादिदुर्लभत्वोपलक्षणं चेह मानुष्यत्वादिदुर्लभत्वाभिधानमित्यभिप्रायेणाह-

नि.[१५९] मानुस्स खित्त जाई कुल रूवारोग्ग आउयं बुद्धी।
सवणुग्गह सद्धा संजमो अ लोगंभि दुलहाइं ॥

वृ. 'मानुष्यम्' मनुष्यभावः, 'क्षेत्रम्' आर्यं 'जातिः' मातृसमुत्था 'कुलं' पितृसमुत्थम् 'रूपम्' अन्यूनाङ्गता 'आरोग्यं' रोगाभावः 'आयुष्यं' जीवितं 'बुद्धिः' परलोकप्रवणा 'श्रवणं' धर्म्मसम्बद्धम् 'अवग्रहः' तदवधारणम्, अथवा श्रवणाः-तपस्विनः तेषामवग्रहः-सुन्दरा एत इत्यवधारणं श्रवणावग्रहः, श्रद्धा संयमश्च प्राग्वत्, एतानि लोके दुर्लभानि, प्राक् चतुर्णां दुर्लभत्वमुक्तम्, इह तु मानुषत्वं क्षेत्रादीनामायुष्कपर्यन्तानामुपलक्षणं, श्रवणं च बुद्ध्यवग्रहयोः, पुनश्च मानुषत्वादीनामिहाभिधानं विशिष्टक्षेत्रादियुक्तानामेवैषां मुक्त्यङ्गत्वमिति ख्यापनार्थम्, केचित्

"इन्दियलद्धी निव्वत्तणा य पज्जत्ति निरुवहय खेमं।
धाणारोग्गं सद्धा गाहग उवओग अट्ठो य ॥"

'इन्द्रियलब्धिः' पञ्चेन्द्रियप्राप्तिः 'निर्वर्त्तना च' इन्द्रियानामेव निष्पादना 'पर्याप्तिः' समस्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याप्तिता 'निरुवहय'त्ति निरुपहतम्, उपहतेरभावात्, सा च गर्भस्थस्य कुब्जत्वादिभिर्जातस्य च भित्त्यादिभिः, 'क्षेमम्' देशसौस्थ्यम् 'ध्राणम्' सुभिक्षं विभवो वा 'आरोग्यम्' नीरोगता 'श्रद्धा' उक्तरूपा 'ग्राहकः' शिक्षयिता गुरुः 'उपयोगः' स्वाध्यायद्युपयुक्तता 'अर्थः' धर्म्म-विषयमर्थित्वम्, एतानि दुर्ल्लभानीति गम्यते, इह च पुनः श्रद्धाग्रहणं तन्मूलत्वादशेपकल्याणानां तस्या दुर्लभभरत्वख्यापनार्थमिति गाथार्थः ॥ यदुक्तं-मनुष्यादिभावाङ्गनि दुर्लभानि' इति, तत्र मानुष्याङ्गदुर्लभत्वसमर्थनाय दृष्टान्तमा(ताना)ह-

नि.[१६०] चुल्लग पासग धन्ने जूए रयणे अ सुमिण चक्के य।
चम्म जुगे परमाणू दस दिट्ठंता मनुअलंभे ॥

वृ. 'चोल्लगं' परिपाटीभोजनम्, पाशको धान्यं द्यूतं रत्नं च 'सुमिण'त्ति स्वप्नः चक्रं च चर्म युगं परमाणुर्दश दृष्टान्ता 'मनुयलम्भे'त्ति भावप्रधानत्वान्निर्देशस्य मनुजत्वप्राप्ताविति गाथा-समासार्थः ॥ व्यासार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

"बंभदत्तस्स एगो कप्पडितो ओल(य)ग्गतो बहुसु आवईसु अवत्थासु य सव्वत्थ सहातो आसि, सो य रज्जं पत्तो, बारससंवच्छरितो अहिसेतो, कप्पडिओ तत्थ अल्लियावंपि न लहइ, ततो अनेन उवातो चिंतितो-उवाहणाउ पबंधेऊण धयवाहेहिं समं पहावितो, रन्ना दिट्ठो, उइण्णेणं अवगूहितो, अन्ने भणंति-तेन दारपालं सेवमाणेण बारसमे संवच्छरे राया दिट्ठो, ताहे राया तं दट्ठूणं संभंतो, इमो सो वरातो मम सुहदुक्खसहायगो, एत्ताहे करेमि वित्तिं, ताहे भणइ-किं देमित्ति ?, सोऽवि भणति-देहि करचोल्लए घरे घरे सव्वंमि भरहे निट्ठियं, ताहे पुणोऽवि तुम्ह घरे आढवेऊण भुंजामि, राया भणइ-किं ते एएण ?, देसं ते देमि, तो सुहं छत्तच्छायाए हत्थिखंधवरगतो हिंडिहिसि, सो भणइ-किं मम एद्दहेण आउट्टेण ?, ताहे से दिन्नो चोल्लगो, तओ पढमदिसे रायाणो घरे जिमितो, तेन से जुवलयं दीणारो य दिण्णो, एवं सो परिवाडीए सुसज्जेसु राउलेसु बत्तीसाए रायवरसहस्सेसु, तेसिं खद्धा भोइया, तत्थ य नयरीए अनेगाओ कुलकोडीओ, नगरस्स चेव सो कया अंतं काही ?, ताहे गामेसु, ताहे पुणो भारहवासस्स। अवि सो वच्चेज्ज अंतं, न य माणुसत्तणाओ भट्ठो पुणो मानुसत्तणं लहइ १ ॥

'पासग'त्ति चाणक्कस्स सुवण्णं नतथि ताहे केणवि उवाएण विढविज्जा सुवण्णं, ताहे जंतपासया कया, केई भणंति-वरदिण्णया, ततो एगो दुक्खो पुरिसो सिक्खिवितो, दीनारथालं भरियं, सो भणइ-यदि ममं कोइ जिनइ तो थालं गिण्हउ, तो अह अहं जिनामि तो एगं दीनारं जिनामि, तस्स इच्छाए जंतं पडति अतो न तीरइ जिणिउं, जह सो न जिप्पइ एवं मानुसलंभोऽवि। अवि नाम सो जिप्पेज्ज न य मानुसाओ भट्ठो पुणो मानुसत्तणं २ ॥

'धन्ने'त्ति जत्तियाणि भरहे धन्नाणि ताणि सव्वाणि पिंडियाणि, एत्थ पत्थो सरिसवाण छूढो, ताणि सव्वाणि अदूयालियाणि, तत्थेगा जुण्णा थेरी सुप्पं गहाय ते विनेज्जा, पुणोऽपि पत्थं पूरेज्जा ?, अवि सा दिव्वपसाएण पूरेज्ज न वि मानुसत्तणं ३ ॥

'जूए' जहा एगो राया, तस्स सभा अट्ठोत्तरखंभसयसन्निविट्ठा, जत्थ अत्थाणियं देइ, एक्केक्को य खंभो अट्ठसयंसितो, तस्स रन्नो पुत्तो रज्जकंखी चिंतेइ-थेरो राया, मारेऊणं रज्जं गेण्हामि, तं चामच्चेणं नायं, तेन रन्नो सिट्ठं, तओ रायां तं पुत्तं भणति-अम्हं जो न सहइ अनुक्कमं सो जूयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेलइ, जो जिनइ रज्जं से दिज्जइ, कहं पुण जिणियव्वं ?, उब्भं एगो आतो, अवसेसा अम्हं आया, जइ तुमं एगेण आएण अट्ठसयस्स खंभाणं एक्केक्कं अंसियं अट्ठसयवारा जिनसि तो तुज्झ रज्जं, अवि देवया विभासा ४ ॥

'रयणे' जहा एगो वाणियओ वुड्ढो, रयणाणि से अत्थि, तत्थ य महे अन्ने वाणियया कोडिअ-पडागाओ उब्भवेंता, तेऽवि वाणियगा समंततो पडिगया पारसकूलाईणि, थेरो आगतो, सुयं जहा विक्कीयाणि, ते अंबाडेइ, लहुं रयणाणि आणेह, ताहे ते सव्वतो हिंडिउमाढत्ता, किं ते सव्वरयणाणि पिंडिज्जा ?, अवि य देवप्पभावेणऽवि य विभासा ५ ॥

'सुविनए'त्ति एगेण कप्पडिएण सुविनते चंदो गिलितो, कप्पडियाण य कहियं, ते भणंति-संपुण्णचंदमंडलसरिसं पोलियं लहेसि, लद्धा घरछाइणियाए, अन्नेणावि दिट्ठो, सो ण्हाऊण पुप्फफलाणि गहाय सुविनयपाढयस्स कहेइ, तेन भणियं-राया भविस्ससि। इओ य सत्तमे दिवसे तत्थ राया मतो अपुत्तो, सो य निव्विन्नो अच्छइ जाव आसो अहिवासितो आगतो, तेन तं दट्ठूणं हिसियं पयक्खिणीकतो य, तओ य विलइओ पट्ठे, एवं सो राया जातो। ताहे सो कप्पडिओ सुणेइ, जहा तेनवि दिट्ठो एरिसो सुविनतो, सो आएसफलेण किर राया जातो, सो चिंतेइ-वच्चामि जत्थ गोरसो, तं पिबेत्ता सुयामि, जाव पुणोऽवि तं सुमिणं पेच्छामि, अवि पुणो सो पेच्छेज्जा न मानुसातो ६ ॥

'चक्कं'ति दारं, इंदपुरं नामं नयरं, इंददत्तो नाम राया, तस्स इट्ठाणं वराणं देवीणं बावीसं पुत्ता, अन्ने भणंति-एक्काए चेव देवीए पुत्ता, राइणो पाणसमा, अन्ना एक्का अमच्चधूया, सा परं परिणेंतेन दिट्ठिल्लिया, अन्नया कयाति रिउण्हाया समाणी अच्छइ, रायणा दिट्ठा, कस्स एसत्ति, तेहिं भणियं-तुम्ह देवी एसा, ताहे सो ताए समं एक्करत्तिं वसितो, सा य रिउण्हाया, तीसे गब्भो लग्गो, सा य अमच्चेण भणिल्लिया-जया तुमे गब्भो आहूतो होइ तया ममं साहेज्जसु, ताहे तस्स कहियं, दिवसो मुहुत्तो जु च राएण उल्लविओ सायंकारो, तेन तं पत्तए लिहियं, सो सारवेइ, नवण्हं मासाणं दारतो जातो, तस्स दासचेडाणि तद्दिवसं जायाणि, तंजहा-अग्गियतो पव्वइतो बहुलिया सागरो य, तेन सहजायगाणि, तेन कलाइरियस्स उवणीतो, तेन लेहाइयातो गणिय-प्पहाणातो कलाओ गाहितो, जाहे ताओ गाहेंति आयरिया ताहे ताणि कड्ढिति विउल्लेंति य, पुव्वपरिच्चएणं ताणि रोलिंति, तेन ताणि चेव न गणियाणि, गहियातो कलातो।

ते अन्ने बावीसं कुमारा गाहिज्जंता आयरियं पिट्टंति, अवयणाणि य भणंति, जति सो आइरितो पिट्टेति ताहे गंतूण माऊणं साहिंति, ताहे ताओ आयरियं खिसंति-कीस आहणसि ?, किं सुलभाणि पुत्तजम्माणि ?, अतो ते न सिक्खिया। इओ य महुराए जियसत्तू राया, तस्स सुया निव्वुईनाम दारिया, सा रन्नो अलंकिया उवनीया, राया भणइ-जो ते रोयइ भत्तारो, तो ताए नायं-जो सूरो वीरो विक्कंतो सो मम भत्तारो होइ, सो पुण रज्जं दिज्जा, ताहे सा बलं वाहणं गहाय गया इंदपुरं नयरं, तस्स इंददत्तस्स रन्नो बहवे पुत्ता, इंददत्तो तुट्ठो चिंतेइ-नूनं अन्नेहिंतो राईहिं लट्ठयरो, आगया, ततो तेन ऊसियपडायं नयरं कारियं,

तत्थ एगंमि अक्खे अट्ठ चक्काणि, तेसिं पुरओ ठिया धीउल्लिया, सा अच्छिमि विंधियव्वा, तओ इंददत्तो राया संनद्धो निग्गओ सह पुत्तेहिं, साविं कण्णा सव्वालंकारविभूसिया एगंमि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पासे अच्छइ, सो रंगो रायाणो ते य दंडभडभोइया जारिसो दोवईए, तत्थ रन्नो जेट्ठपुत्तो सिरिमाली नाम कुमारो, सो भणिओ-पुत्त! एसा दारिया रज्जं च घेत्तव्वं, अतो विंधेहि पुत्तलियंति, ताहे सो अकयकरणो तस्स समूहस्स मज्झे धणुं च्चेव गिण्हिउं न तरइ, कहवि नेण गहियं, तेन जओ वच्चउ तओ वच्चउ त्ति मुक्को सरो, सो चक्के अभिभडिऊण भग्गो, एवं कस्सति एगं अरगं वोलीणो कस्सति दोण्णि, अन्नेसिं बाहिरेण चेव नीइ, ताहे राया अद्धितिं पकतो-अहा! अहं एएहिं धरिसित्तोत्ति, ततो अमच्चेण भणितो-कीस अधिइं करेसि?, राया भणइ-एएहिं अहं अप्पहाणो कतो, अमच्चो भणइ-अत्थि अन्नो तुम्ह पुत्तो मम धूयाए तणतो, सुरिंददत्तो नाम, सो समत्थो विंधिउं, अभिन्नाणि य से कहियाणि, कहिं?,

सो दरसितो, ततो राइणा अवगूहितो भण्णति-जुत्तं तव अट्ठ रहचक्के भेत्तूण पुत्तलियं अच्छिमि विंधेत्ता रज्जं सुकलत्तं निव्वुइं दारियं संपावित्तए, तओ कुमारो जहा आणवेहित्ति भणिऊण ठाणं ठाइऊणं धणुं गेण्हति, ताणिऽवि दासरूवाणि चाउद्दिसिं ठियाणि रोडंति, अन्ने य उभयपासिं गहियखग्गा दो जना, जइ कहवि लक्खस्स चुक्कइ ततो सीसं छिंदेयव्वंति, सोऽवि उज्झातो पासे ठितो भयं देइ-मारिज्जसि जइ चुक्कसि, ते बावीसंपि कुमारा मा एसो विंधिस्सइत्ति ते विसेसलुंठणाणि विग्घाणि करेंति, तओ ताणि चत्तारि ते य दो पुरिसे बावीसं च कुमारे अगणिंतो ताणं अट्ठण्हं रहचक्काणं अंतरं जाणिऊण तंमि लक्खे निरुद्धाए दिट्ठीए अन्नं मयं अकुणमाणेण सा धीउल्लिया वामे अच्छिमि विद्धा, तओ लोगेण ओक्किट्ठिकनूणायकलयलोम्मिस्सो साहुक्कारो कतो, जहा तं चक्कं दुक्खं भेत्तुं एवं मानुस्सत्तणंति ७॥

'चम्मे'त्ति एगो दहो जोयणसंयसहस्सविच्छिन्नो चम्मावणद्धो, एगं से मज्झे छिद्दं, जत्थ कच्छभस्स गीवा मायइ, तत्थ कच्छभो वाससए गए गीवं पसारेइ, तेन कहवि गीवा पसारिया, जाव तेन छिड्डेण गीवा निग्गया, तेन जोइसं दिट्ठं कोमुईए पुप्फफलाणि य, सो गतो, सयणिज्जगाणं दाएमि, आणित्ता सव्वओ घुलति, नवि पेच्छति, अवि सो मानुसातो ८॥'जुगे'त्ति

पुव्वंते होज्ज जुगं अवरंतु तस्स होज्ज समिला उ।
जुगछिड्डुंमि पवेसो इय संसइओ मनेयलंभो॥१॥
जहि समिला पब्भट्ठा सागरसलिले अनोरपारंमि।
पविसेज्जा जुगछिड्डुं कहवि भमंती भमंतम्मि॥२॥
सा चंडवायवीईपणोल्लिया अवि लभेज्ज जुगछिड्डुं।
न य मानुसाउ भट्ठो जीवो पडिमाणुसं लहइ॥३॥

इति गाथाभ्यो जुगोदाहरणमवसेयम्॥ इदानिं परमाणू, जहा एगो खंभो महप्पमाणो, सो देवेन चुण्णेऊणं अविभागिमाणि खंडामि काऊण नलियाए पक्खित्तो, पच्छा मंदरचूलियाए ठाऊण फूमितो, तानि नट्ठाणि, अत्थि कोऽवि?, तेहिं चेव पुग्गलेहिं तमेव खंभं निव्वत्तेज्ज?, नो इणमट्ठे सभट्ठे, एस अभावो, एवं भट्ठो मानुसातो न पुणो। अहवा सभा अनेगखंभसयसंनिविट्ठा, सा कालंतरेण झामिया पडिया, अत्थि पुण कोऽवि?, तेहिं चेव पोग्गलेहिं करेज्जा?, नोत्ति, एवं मानुस्सं दुल्लभं॥ लद्धेऽवि मानुष्यत्वे श्रुतिरपि दुर्ल्लभेति दर्शयन्नाह-

नि.[१६०] आलस्स मोहऽवन्ना थंभा कोहा पमाय किविनत्ता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भय सोगा अन्नागा वक्खेव कुऊहला रमणा ॥

नि.[१६१] एएहिं कारणेहिं लद्धूण सुदुल्लहंपि मानुस्सं ।
न लहइ सुइं हिअकरिं संसारुत्तारिणिं जीवो ॥

वृ. 'आलस्यात्' अनुद्यमस्वरूपात्, न धर्माचार्यसकाशं गच्छति न शृणोति च इति सर्वत्र शेष:, 'मोहात्' गृहकर्त्तव्यताजनितवैचित्यात्मकात् हेयोपादेयविवेकाभावत्मकाद्वा, 'अवज्ञातो' यथा किममी मुण्डश्रमणा जानन्ति ? इति, 'अवर्णाद्वा' साध्यश्लाघात्मकात् यथाऽमि मलदिग्धदेहा: सकलसंस्काररहिता: प्राकृतप्रायवयस इत्यादिरूपात्, 'सत्मभात्' जात्यादिसमुत्थादहङ्कारात् कथमहं प्रकृष्टतरातिरेनमुपसर्प्पामीत्यादिरूपात्, 'क्रोधाद्' अप्रीतिरूपात् आचार्यादिविषयात्, महामोहोपहतो हि कश्चिदाचार्यादिभ्योऽपि कुप्यति, 'प्रमादात्' निद्रादिरूपात्, कश्चिद्धि निद्रादिप्रमत्त एवाऽऽस्ते, 'कृपणत्वात्' द्रव्यव्ययासहिष्णुत्वलक्षणात्, यद्यहममीषामन्तिके गमिष्याम्यवश्यंभावी द्रव्यव्यय इति वरं दूरत एषां परिहार इति, 'भयात्' कदाचिन्नरकादिवेदनाश्रवणोत्पन्नसाध्वसात्, नि:सत्त्वो हि नरकादिभयमावेदयन्तीत्यमी इति भयान्न पुन: श्रोतुमिच्छति, 'शोकाद्' इष्टवियोगोत्थदु:खात् कश्चिद्धि प्रियप्रणयिनीमरणादौ शोचन्नेवास्ते, 'अज्ञानात्' मिथ्याज्ञानात्-'न मांसभक्षणे दोषो, न मद्ये न च मैथुने' इत्यादिरूपात् 'व्याक्षेपाद्' इदमीदानीं कृत्यमिदं च इदानीमिति बहुकृत्यव्याकुलतात्मकात्, 'कुतूहलाद्' इन्द्रजालाद्यवलोकनगोचरात्, 'रमणात्' कुर्कुटादिक्रीडात्मकात्, क्वचित्सुपोऽश्रवणं प्रागवत्, प्रक्रान्तार्थनिगमनायाह-'एभि:' अनन्तरोक्तस्वरूपै: 'कारणे:' आथ्स्यादिहेतुभि: 'लद्धूण सुदुल्लहंपि'त्ति अपेर्भिन्नक्रमत्वाल्लब्ध्याऽपि 'सुदुर्लभम्' अतिशयदुरापं 'मानुष्यं' मनुजत्वं 'न लभते' न प्राप्नोति 'श्रुतिं' धर्माकर्णनात्मिकां कीदृशीम् ?-'हितकरीम्' इह परत्र च तथ्यपथ्यविधायिनीम्, अत एव संसारादुत्तारयति-मुक्तिप्रापकत्वेन निस्तारयति इति संसारोत्तारणी तां 'जीव:' जन्तु: इति गाथार्थ: ॥ इत्थं धर्मश्रुतिदुर्लभत्वमभिधाय तल्लाभेऽपि श्रद्धादुर्लभत्वमाह-

नि.[१६२] मिच्छादिट्ठी जीवो उवइट्ठं पवयणं न सद्दहइ ।
सद्दहइ असब्भावं उवइट्ठं वा अनुवइट्ठं ॥

नि.[१६३] सम्मद्दिट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ ।
सद्दहइ असब्भावं अनभोगा गुरुनिओगा वा ॥

वृ. मिथ्या इति-विपरीता दृष्टि:-बुद्धिस्येति मिथ्यादृष्टि:, जीव: 'उपदिष्टं' गुरुभिराख्यातं 'प्रवचनम्' आगमं 'न श्रद्धत्ते' इदमित्थमिति न प्रतिपद्यते, कदाचित्तद्विपरीतमपि न श्रद्दधातीत्याह-'श्रद्धत्ते' तथेति प्रतिपद्यते, किं तदित्याह-अविद्यमाना: सन्त:-परमार्थसन्तो भावाजीवदयोऽभिधेयभूता यस्मिन् तदसद्भावम्, सर्वव्याप्यादिरूपात्मादिप्रतिपादकं कुप्रवचनमिति गम्यते, 'उपदिष्टं' परेण कथितं, वाशब्दस्य भिन्नक्रमत्वात् अनुपदिष्टं वा-स्वयभ्यूहितमिति

इत्थं श्रद्धादुर्ल्लभत्वमभिधाय साम्प्रतं लब्धाया अप्युपघातसम्भवमाह-'समं' गाहा, तथा सम्यक् इति-प्रशंसार्थोऽपि निपात:, यद्वा सम्मञ्चति-जीवादीनवैपरीत्येनाव गच्छति इति सम्यक् तथा दृष्टि: अस्येति सम्यगदृष्टि: जीव उपदिष्टं प्रवचनं, तुशब्दो मिथ्यादृष्टित: सम्यगदृष्टेर्विशेषमाह, 'श्रद्धत्ते' नि:शङ्कं प्रतिपद्यते, तत्किमसौ प्रवचनमेव श्रद्धत्ते इत्याह-श्रद्धत्ते 'असद्भावम्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तस्वरूपम् 'अनाभोगात्' अज्ञानात्, तथा 'गुरवः' धर्माचार्यास्तेषां नियोगः-व्यापारणं गुरुनियोगस्तस्माद्वा, कश्चिद्धि सम्यग्दृष्टिर्विशेषतो जीवादिस्वरूपानवगमाद् गुरुप्रत्ययाच्चातत्त्वमपि तत्त्वमिति प्रतिपद्यते। तदेवं प्रथमगाथया मिथ्यात्वहेतुकत्वमश्रद्धानस्योक्तम्, द्वितीयगाथया पुनस्तदभावेऽप्यनाभोगगुरुनियोगहेतुकत्वं, तथा च मिथ्यात्वादितद्धेतुनां व्यापित्वादश्रद्धानभूयस्त्वेन श्रद्धानुदुर्ल्लभतोक्ता भवतीति गाथाद्वयपरमार्थः ॥

ननु किमेवंविधा अपी केचिदत्यन्तमृजवः सम्भवेयुः ? ये स्वयमागमानुसारिमतयोऽपि गुरूपदेशतोऽन्यथापि प्रतिपद्यरेन्, एवमेतत्, तथाहि-जमालिप्रभृतीनां निह्नवानाकशिष्यास्तद्भक्तियुक्ततया स्वयमागमानुसारिमतयोऽपि गुरुप्रत्ययाद्विपरीतमर्थं प्रतिपन्नाः, उक्तं हि- "तए णं जमालिस्स अनगारस्स एवमाइक्खमानस्स एवं भासंतस्स एवं पन्नवेमानस्स एवं परूवेमानस्स अत्थि एगयया समणा निग्गंथा एयमट्ठं सद्दहंति पत्तियंति रोयंति" इत्यादि। के पुनरमि असद्भावं प्रतिपन्ना इत्याह-

नि.[१६४] बहुरयपएसअव्वत्तसमुच्छ दुगतिगअबद्धिगा चेव।
एएसिं निग्गमणं वुच्छामि अहानुपुव्वीए ॥

वृ. 'व्याख्यानतो विशेषप्रतिपत्तिः' इति न्यायात् बहुपु-क्रियानिष्पत्तिविषयसमयेषु रताः, कोऽर्थः ?-बहुषु एव समयेषु क्रियानिष्पत्तिरित्यसद्भावं प्रतिपन्नाः १, 'पएसि'त्ति सूचकत्वादस्य् अन्त्यप्रदेशजीववादिनः अन्त्यएव प्रदेशो जीव इत्यभ्युपगताः २, अव्यक्ताः-'सत्या सत्यभामे'तिवत् अव्यक्तवादिनः, न अत्र व्यक्त्या यतिरयमयतिर्वा इत्यादिरूपतया वस्तु विज्ञातुं शक्यं, ततः सर्वमव्यक्तमेवेति प्रतिज्ञावन्तः ३, 'समुच्छ'त्ति सूत्रत्वात् सामुच्छेदाः, तत्र समितिसामस्त्येन निरन्वयात् उदिति-ऊर्ध्वं क्षणादुपरि भवनात् छेदो-नाशः समुच्छेदस्तं विदन्ति तत्त्वधिया सामुच्छेदाः,

एषां द्वन्द्वे बहुरतप्रदेशाव्यक्तसामुच्छेदाः, द्विकं-क्रियाविषयमेकसमयमनुभूयमानमिह गृह्यते, तत्प्रतिज्ञातारोऽप्युपचारात् द्विकाः, एवं त्रिकं-जीवाजीवनोजीवराशित्रयं तदभ्युपगन्ताषयमेषामस्तीति अबद्धिकाः, एषां द्वन्द्वे द्विकत्रिकाबद्धिकाः, चः समुच्चये एवेति पूरणे। अत्र कः कस्य शिष्य इत्याशङ्काऽपोहार्थमेतन्निर्गमाभिधित्सया सम्बन्धमाह-'एएसिं' एतेषामनन्तरमुपदर्शितानां, निर्गमनं-यस्य यत उत्पत्तिः तदात्मकं 'वक्ष्यामि' परिभाषिष्ये, 'अथे'-त्यानन्तर्ये 'आनुपूर्व्या' क्रमेणेति गाथार्थः ॥ प्रतिज्ञातमेवाह-

नि.[१६५] बहुरय जमालिपभवा जीवपएसा य तीसगुत्ताओ।
अव्वत्ताऽऽसाढाओ सामुच्छेयाऽऽसमित्ताओ ॥

नि.[१६६] गंगाए दोकिरिया छलुगा तेरासिआण उप्पत्ति।
थेरा य गुट्ठमाहिल पुट्ठमबद्धं परूविंति ॥

वृ. 'बहुरताः' उक्तरूपाः, जमालेः प्रभवः-एतत्तीर्थापेक्षया प्रथमतः उपलब्धिरेषां, न पुनः सर्वथोत्पत्तिरेव, प्रागप्येवंविधाभिधायिसम्भवात्, ते अमी जमालिप्रभवाः, 'जीवपएसा य'त्ति प्रस्तावात्प्रदेश इत्यन्त्यप्रदेशो जीवो येषां ते प्रदेशजीवाः, प्राकृतत्वाच्च व्यत्ययः, ते च तिष्यगुप्तात्, 'अव्यक्ताः' अव्यक्तवादिनः आषाढात्, सामुच्छेदा अश्वमित्रात्, 'गङ्गात्' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गङ्गाचार्यात्, द्वे क्रिये वदन्ति द्वेक्रियाः, 'छलुग'त्ति पट्पदार्थप्रणयनादुल्कगोत्रत्वाच्च षडुलूकस्तस्मात्, त्रिभी राशिभिर्दीव्यन्ति-जिगीषन्तीति त्रैराशिकास्तेषामुत्पत्तिः, 'स्थविराश्च' स्थिरीकरणकारिण: 'गोट्ठामाहिल'त्ति गोष्ठमाहिला: 'स्पृष्टम्' कञ्चुकवत् छुप्तम् 'अबद्धम्' न क्षीरनीरवदन्योऽन्यानुगतं, कर्मेति गम्यते, 'परूपयन्ति' प्रज्ञापयन्ति, तत्कालापेक्षया लट्, बहुवचनं च पूज्यत्वात्, तच्च स्थविरत्वं च पूर्वपर्यायापेक्षया, अनेन च गोष्ठमाहिलादबद्धिकानामुत्पत्तिरित्युक्तं भवति इति गाथाद्वयार्थः ॥ यथा बहुरता जमालिप्रभवा: तथा चाह-

नि.[१६७] जिट्ठा सुदंसण जमालि अनुज्ज सावत्थि तिंदुगुज्जाणे ।
पंच सया य सहस्सं ढंकेण जमालि मुत्तूणं ॥

वृ. अक्षरार्थः सुगमः, नवरम्, 'अनुज्ज'त्ति अनवद्याङ्गी ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम् तेणं' कालेणं तेणं समएणं कुंडपुरं नयरं, तत्थ सामिस्स जेट्ठा भगिणी सुदंसणा नाम, तीए पुत्तो जमाली, सो सामस्सि मूले पव्वइओ पंचहिं सएहिं समं, तस्स य भज्जा सामिणो धूया अनुज्जंगीनामा वीयं नामं पियरदंसणा, सावि तमणु पव्वतिया सहस्सपरिवारा, तहा भाणियव्वं जहा पन्नत्तीए, एक्कारस अंगा अहीया, सामिणा अणुन्नातो सावित्थं गतो पंचसयपरिवारो, तत्थ य तिंदुगुज्जाणे कोट्ठगे चेतिते समोसढो, तत्थ से अंतपंतेहि रोगो उप्पण्णो, न तरइ बइट्ठतो अच्छिउं, ताहे सो समणे-मम सेज्जासंथारगं करेह, तेहिं काउमारद्धो, पुणो अधरो भणति-कतो ? कज्जति ?, ते भणंति-न कओ, अज्जवि कज्जति, ताहे तस्स चिंता जाता-जन्नं समणे भगवं० आइक्खति 'चलमाणे चलिए उदीरिज्जमाणे उदीरीए जाव निज्जरिज्जमाणे निज्जन्ने' तं च मिच्छा,

इमं पच्चक्खमेव दीसति-सेज्जासंथारए कज्जमाणे अकडे, संथरिज्जमाणे असंथरिए, जम्हा णं एवं तम्हा चलणमाणेऽवि अचलिए उदीरिज्जमाणेवि अनुदीरिए निज्जरिज्जमाणेवि अनिज्जिन्ने, एवं संपेहेइ, एवं संपेहित्ता निग्गंथे सद्दावेइ, सद्दावित्ता एवं वयासी-जंणं समणे भगवं महावीरे एवमाइक्खइ-चलमाणे चलिए उदीरिए, जाव निज्जरिज्जमाणे निज्जरिए, तं णं मिच्छा, इमं पच्चक्खमेव दीसइ-सिज्जासंथारए कज्जमाणे अकडे, जाव तम्हा णं अनीज्जिन्ने। तए णं जमालिस्स एवमाइक्खमाणस्स अत्थेगतिया निग्गंथा एयमट्ठं सद्दहंति, अत्थेगइया नो सद्दहंति, जे सद्दहंति ते णं जमालिं चेव अनगारं उवसंपज्जित्ता णं विहरंति, तत्र ये न श्रद्दधति ते एवमाहुः-भगवन्! भवतोऽयमाशयः-

यथा घटः पटो नैव, पटो वा न घटो यथा ।
क्रियमाणं कृतं नैव, कृतं न क्रियमाणकम् ॥

प्रयोगश्च-यौ निश्चितभेदौ न तयोरैक्यं, यथा घटपटयोः, निश्चितभेदे च कृतक्रियमाणके, अत्र चासिद्धो हेतुः, तथाहि-कृतक्रियमाणे किमेकान्तेन निश्चितभेदे ? अथ कथञ्चिद् ?, यद्येकान्तेन तत्किं तदैक्ये सतोऽपि करणप्रसङ्गात: १ उत क्रियानुपरमप्राप्ते २ राहोस्वित् प्रथमादिवसमेष्वपि कार्योपलम्भप्रसक्ते ३ रथ क्रियावैफल्याऽऽपत्तितो ४ दीर्घक्रियाकालदर्शनानुपपत्तेर्वा ५ ?, तत्र न तावत्सतोऽपि करणप्रसङ्गत इति युक्तम्, असत्करणे हि खपुष्पादेरेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणमापद्यत इति कथञ्चित्सत एव करणमस्याभिरम्युपगतं, न चाभ्युपगतार्थस्य प्रसञ्जनं युज्यते ?, नापि क्रियानुपरमप्राप्तेः, यत इह क्रिया किमेकविषया भिन्नविषया वा ?, यद्येकविषया न कश्चिद्दोषः, तत्र हि यदि कृतं क्रियमाणमुच्यते, तत्र क्रियाऽऽवेशसमय एव कृतत्वाभिधानात्, उक्तं हि-"क्रियाकालनिष्ठाकालयोरैक्य"मिति, अथैवमपि कृतक्रियामाणयोरैक्ये कृतस्य सत्त्वात् सतोऽपि करणे तदवस्थः प्रसङ्गः, तद्सत्, पूर्वं हि लब्धसत्ताकस्य क्रियायामयं प्रसङ्गः स्यात्, न तु क्रियासमकालसत्तावाप्तौ, अथ भिन्नविषया क्रिया तदा सिद्धसाधनं, प्रतिसमय-मन्यान्यकारणतया वस्तुनोऽभ्युपगमेन भिन्नविषयक्रियानुपरमस्यास्माकं सिद्धत्वात् २, अथ प्रथमादिसमयेष्वपि कार्योपलम्भप्रसक्तेरिति पक्षः, क्रियमाणस्य हि कृतत्वे प्रथमादिसमयेष्वपि सत्त्वादुपलम्भः प्रसज्यत इति, तदपि न, तदा हि शिवकादीनामेव क्रियमाणता, ते चोपलभ्यन्ते एव, उक्तं च-

"अन्नारम्भे अन्नं कइ दीसउ ? जह घडो पडारम्भे।
सिवकादतो न कुम्भो कह दीसइ सो तदद्धाए॥"

घटगताभिलापतया च मूढः शिवकादिकरणेऽपि घटमहं करोमीति मन्यते, तथा चाह-

"पइसमयकज्जकोडीनिरवेक्खो घडगयाभिलासोऽसि।
पइसमयकज्जकालं थूलमइ घडं मिलाएसि॥" ३,

नापि क्रियावैफल्याऽऽपत्तितो, यतः प्रागेव प्राप्तसत्ताकइय करणे क्रियवैफल्यं स्यात्, न तु क्रियमाणकृतत्वे, तत्र हि क्रियमाणं क्रियापेक्षमिति तस्याः साफल्यमेव, अनेकान्तवादिनां च केनचिद्रूपेण प्राक् सत्त्वेऽपि रूपान्तरेण करणं न दोषाय ४, दीर्घक्रियाकालदर्शनानुपपत्तेरि-त्यपि न युक्तं, यतः शिवकाद्युत्तरोत्तरपरिणामविशेषविषय एव दीर्घक्रियाकालोपलम्भो न तु घटक्रियाविषयः, उक्तं हि-

"पइसमउप्पन्नाणं परोप्परविलक्खनान सुबहूणं।
दीहो किरियाकालो जइ दीसइ किंथ कुंभस्स ?॥"

अथ कथञ्चिन्निश्चितभेदे कृतक्रियमाणे, तत्तीर्थकुदुक्तमेव, निश्चयव्यवहारानुगत्वात्, तद्वचसः, तत्र च निश्चयनयाऽऽश्रयेण कृतक्रियमाणयोरभेवदो, यदुक्तम्-

"क्रियमाणं कृतं दग्धं, दह्यमानं स्थितं गतम्।
तिष्ठच्च गम्यमानं ,च निष्ठितत्वात् प्रतिक्षणम्॥"

व्यवहारनयमतेन तु नानात्वमप्यनयोः, तथा च क्रियमाणं कृतमेव, कृतं तु स्यात्क्रियमाणं क्रियवेशसमये, क्रियोपरमे पुनरक्रियमाणमिति उक्तं, च-

तेणेह कज्जमाणं नियमेण कयं कयं तु भयनिज्जं।
किञ्चिदिह कज्जमाणं उवरयकिरियं व होज्जाहि॥

किञ्चि भवतो मतिः-क्रियान्त्यसमय एवाभिमतकार्यभवनं, तत्रापि प्रथमसमयादारभ्य कार्यस्य कियत्यपि निष्पत्तिरेष्टव्या, अन्यथा कथमकस्मादन्त्यसमये सा भवेद् ?, उक्तं च-

"आद्यतन्तुप्रवेशे च, नोतं किञ्चिद्यटा पटे।
अन्त्यतन्तुप्रवेशे च, नोतं स्यान्न पटोदयः॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मादाद्यद्वितीयाऽऽदितन्तुयोगात्प्रतिक्षणम्।
किञ्चित्किञ्चिदुतं तस्य, यदुतं तदुतं ननु ॥२॥"

इह प्रयोगः-यद्यस्याः क्रियायाः आद्यसमये न भवति तत्तस्या अन्त्यसमयेऽपि न भावि, यथा घटक्रियादिसमयेऽभवन्पटः, न भवति च कृतक्रियमाणयोर्भेदे क्रियादिसमये कार्यम्, अन्यथा घटान्त्यसमयेऽपि पटोत्पत्तिः स्यात्, एवं च-

'यथा वृक्षो धवश्चेति, न विरुद्धं मिथो द्वयम्।
क्रियमाणं कृतं चेति, न विरुद्धं तथोभयम्॥'

प्रयोगश्च-यद्येनाविनाभूतं न तत्त एकान्तेन भिद्यते, यथा वृक्षत्वाद्धवत्वं, कृतत्वाविनाभूतं च क्रियमाणत्वमिति। सकललोकप्रसिद्धत्वाच्च घटपटयोः तदाश्रयेणैवमुक्तं संस्तारकादावपि योज्यं, तत् प्रतिपद्यस्व भगवन् 'चलमाणे चलिए' इत्यादि तीर्थकृद्वचोऽत्यन्तमवितथमिति। स चैवमुच्यमानोऽपि न प्रतिपन्नवान्, ततश्च-

जाहे न ट्ठाति ताहे ते निग्गंथा जमालिस्स अंतिआतो जहा पन्नतीए जाव सामिं उवसंपज्जित्ता णं विहरंति। साऽवि य णं पियदंसणा ढंकस्स कुम्भकारस्स घरे ठिया, सा आगया चेइयवंदिया ताहे पवंदिया, तंपि पन्नवेइ, साऽवि विप्पडिवन्ना तस्स नेहानुरागेण, पच्छा आगया अज्जाणं परिकहेइ, तं च ढंकं भणति, सो जाणइ-जहा एसा विप्पडिवन्ना नाहच्चतेणं, ताधे सो भणति-अहं न याणामि एयं विसेसयरं, एवं तीसे अन्नया कयाइ सज्झायपोरिसिं करेंतीए तेणं भायणाणि उव्वत्तंतेणं ततो हुत्तो इंगालो छूढो, जहा तीसे संघाडी एगदेसंमि दड्ढा, सा भणइ-इमा अज्ज! संघाडी दड्ढा, ताहे सो भणति-तुब्भे चेव पन्नवेह-जह डज्झमाणमडज्झं, केण तुज्झं संघाडी दड्ढा?, जतो उज्जुसुयणयमयातो वीरजिणिंदवयणावलंबीणं जुज्जेज्ज डज्झमाणं डज्झं वोत्तुं न तुज्झंति, ततो तहत्ति पडिसुणेति, इच्छामो अज्जो! सम्मं पडिचोयणा, ताहे सा गंतूण जमालिं पन्नवेति, सो जाहे न गिण्हति, ताहे सहस्सपरिवारा सामिं उवसंपिज्जित्ता णं विहरइ।

इमोऽवि ततो लहुं चेव गतो चंपं नयरिं, सामिस्स अदूरसामंते ठिच्चा सामिं भणति-जहा णं देवाणुप्पियाणं बहवे अंतेवासी समणा निग्गंथा छउमत्था भवित्ता छउमत्थावक्कमणेणं अवक्कंता, नो खलु अहं तहा छउमतो भवित्ता छउमत्थावक्कमणेणं अवक्कंते, अहं णं उप्पन्न-नाणदंसणधरे अरहा जिने केवली भवित्ता केवलिअवक्कमणेणं अवक्कंते, तए णं भगवं गोयमो जमालिं एवं वयासी-नो खलु जमाली! केवलिस्स नाणे वा दंसणे वा सेलंसि वा थंभंसि वा जाव कहिंसि आवरिज्जइ वा निवारिज्जति वा, जदि णं तुमं जमालि! उप्पन्ननाणदंसणधरे तो णं इमाइं दो वागरणइं वागरेहि-सासए लोए? असासए?, सासए जीवे असासए?,

तए णं से जमाली भगवया गोयमेणं एवं वृत्ते समाणे संकिए कंखिए जाव नो संचाएति भगवतो गोयमस्स किंचिवि पमोक्खमक्खाइत्तएत्ति तुसिणीए संचिट्ठति, जमालित्ति समणे भगवं महावीरे जमालिं एवं वयासी-अत्थि णं जमाली! मम बहवे अंतेवासी छउमत्था जे णं पहू एयं वागरणं वागरित्तए, जहा णं अहं, नो चेव णं एयप्पयारं भासं भासित्तए, जहा णं तुमं, सासए लोए जमालि!, जन्न कयाइ नासी न कयाइ न भवइ न कयाइ न भविस्सइ भुवं च भवइ भविस्सइ य धुवे जाव निच्चे, अससाए लोए जमाली!, जं णं उस्सप्पिणी भवित्ता ओसप्पिणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवइ ओसप्पिणी भवित्ता उस्सप्पिणी भवइ, सासए जीवे जमाली !, जं न कयाइ नासी जाव निच्चे, असासए, जन्नं नेरतिते भवित्ता तिरिक्खाजोणिए भवति, तिरिक्खजोणिए भवित्ता मनुस्से भवति, मनुस्से भवित्ता जोणीए देवे भवति,

तते णं से जमाली सामिस्स एवं आइक्खमानस्स एयमट्ठं नो सद्दहति, असद्दहंते सामिस्स अंतियातो अवक्कमति, अवक्कमेत्ता बहूहिं असब्भावुब्भावणाहिं मिच्छत्ताभिणिवेसेहि य अप्पाणं च परं च तदुभयं च वुग्गाहेमाणे उप्पाएमाणे बहूइं वासाइं सामन्नपरियायं पाउणति, बहूहिं छट्ठट्ठमादीहिं भावेति, भावित्ता अद्धमासियाए संलेहणाए अप्पाणं झोसेइ, झोसित्ता तीसं भत्ताइं अनसणयाइ छेदेति, छेदित्ता तस्स ठाणस्स अनालोइयपडिक्कंतो कालमासे कालं किच्चा लंतए कप्पे तेरससागरोवमट्ठितिकेसु देवेसु देवकिव्विसेसु देवेसु देवत्ताए उववन्ने। एवं जहा पन्नतीए, जाव अंतं काहिति। एयाए दिट्ठीए बहुए जीवे रया तेण बहुरयत्ति भन्नत्ति, अहवा बहुसु समयेसु कज्जसिद्धिं पडुच्च रया-सत्ता बहुरया इति। यथा जीवप्रदेशास्तिष्यगुप्तात् तथाऽऽह-

नि.[१६८] रायगिहे गुणसिलए वसु चउदसपुव्वि तीसगुत्ताओ।
आमलकप्पा नयरि मित्तसिरि कूरपिंडादि॥

वृ. अक्षरार्थः क्षुन्नो॥ भावाऽर्थस्तु सम्प्रदायादवसेयः, स चायम्-बीतो सामिणो सोलसवासाति उप्पाडियनाणस्स तो उप्पन्नो। तेणं कालेन तेणं समएणं रायगिहे गुणसिले चेतिए वसू नाम भगवंतो आयरिया चोद्दस्सपुव्वी समोसढा, तस्स सीसो तीसगुत्तो नाम, सो आयप्पवायपुव्वे इमं आलावगुं अज्जाएइ- 'एगे भंते! जीवपएसे जीवेत्ति वत्तव्वं सिया ?,

नो इणमट्ठे समट्ठे, एवं दो जीवप्पएसा तिन्नि संखेज्जा असंखेज्जा वा जाव एगपएसूणेऽवि य णं जीवे नो जीवेत्ति वत्तव्वं सिया, जम्हा कसिणे पडिपुण्णलोगागासप्पएससमतुल्लप्पएसे जीवेत्ति वत्तव्व'मित्यादि, एत्थ सो विपडिवन्नो, जदि सव्वे जीवप्पएसा एगप्पएसहीणा जीवव्ववएसं न लहंति तो णं सो चेव एगे जीवप्पएसे जीवत्ति, तद्भावभावित्यात् जीवव्ववएसस्सत्ति, स चैवं विवदमानः स्थविरैरभाणि-भद्र! भवतोऽयमाशयः भवतोऽयमाशयः-

यथा संस्थान एवास्ति, घटस्तेन तदात्मकः।
तदन्त्यदेश एवास्ति, जीवस्तेन तदात्मकः॥

प्रयोगश्च-यस्मिन्नेव सति यद्भवति तत्तदात्मकं, यथा संस्थान एव सति भवन् घटस्तदात्मकः, अन्त्यदेश एव च सति भवत्यात्मा, अत्रासिद्धो हेतुः, तथाहि-कथमात्मनोऽन्त्यप्रदेशे एव सति भावः ?, अथ शेषप्रदेशेषु सत्सु अप्यसौ नास्तीति, तत्किमस्य शेषप्रदेशानां च कश्चिद्विशेषोऽस्ति न वा ?, नास्ति चेत्किं न शेषप्रदेशभावेश्प्यस्य सद्भावः, अथास्ति चेत्, स किं पूरणत्व १ मुपकारित्व २ मागमाभिहितत्वं ३ वा ?, यदि पूरणत्वं तत्किं वस्तुतो विवक्षातो वा ?, वस्तुतश्चेत्किमस्यैव पूरणत्वं ?, न शेषप्रदेशानाम्, अथास्यैव अन्त्यत्वाद्, अन्त्यत्वमप्यात्म--प्रदेशापेक्षं तदवष्टब्धाकाशप्रदेशापेक्षं वा ?, न तावदात्मप्रदेशापेक्षम्, आत्मप्रदेशानां कथञ्चित्पाथोवदावर्त्तमानत्वेनानवस्थितानामयमन्त्योऽनन्त्यश्चायमिति विभागाभावात्, ये पुनरष्टौ स्थिराः ते मध्यवर्त्तिन एव, नापि तदवष्टब्धाकाशप्रदेशापेक्षं, तेषामशेषदिक्षु पर्यन्तसम्भवेनैकस्यैवान्त्यत्वाभावात्, देशान्तरसंचारे चानवस्थितत्वात्, न च वस्तुतोऽत्यस्यैव पूरणत्वं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयादीनामपि पूरणत्वाद्, अन्यथा तथा तथा व्यपदेशानुपपत्तेः, विवक्षातोऽपि न, यतोऽसौ स्वस्याशेषपुरुषाणां वा ?, यद्यशेषपुरुषाणां नेयं नियता, न हि सर्व एव भयदभिमतमेकं पूरणमाचक्षते, नापि स्वस्य, यतोऽस्या अपि कुतो नियतत्वम् ?, अथान्त्यत्वाद् एतदपि कुतो नियमतः ?, 'एगे भंते ! जीवप्पएसे जीवत्ति वत्तव्वं सिया ! इत्यादिनिरूपणायां पर्यन्तभवनात्, तन्नियमोऽपि कुतो ?, विवक्षानियमात्, एवं सति चक्रकाख्यो दोषः, तथाहि-विवक्षानैयत्य मन्त्यत्वात्, तन्नैयत्यं चं निरूपणायां पर्यन्तभवनात्, तन्नियमोऽपि विवक्षानियमादिति, एवं सति चक्रवत् पुनः पुनरावर्त्तते इति, यदि च पूरणत्वमन्त्यस्य विशेषः तदा तच्छेषप्रदेशा-पेक्षमेवेत्यन्त्या-विनाभावित्वे तदविनाभावित्वमपि बलादापततीति सकलप्रदेशानिनाभावि-त्वात्तदात्मकत्वसिद्धिः, नाप्युपकारित्वं विशेषः, यतस्तदन्येषामपि कथं न ?, किमात्मप्रदेशा एव न ते ?, यद्वाऽऽत्मप्रदेशत्वेऽप्येकका इति ?, न तावदाद्यः पक्षः, अशेषाणामात्मप्रदेशत्वेन वादिप्रतिवादिनोरिष्टत्वात्, अथात्मप्रदेशत्वेऽप्येकका इति, एकत्वं त्वन्मतान्त्यप्रदेशसहाय-काभावात् परस्परसाहायकविरहतो वा ?, यदि त्वन्मतान्त्यप्रदेशसहायकाभावात् शेषप्रदेशानु-मनुपकारित्वं, त्वन्मतस्यान्त्यस्यापि तत्साहायकासत्त्वात् तदस्तु, युक्तं च बहूनामुपकारित्वम्, एकस्य तु तदभावो, यदुक्तम्-

"जुत्तो य तदुवयारो देसूणे न उ पएसमेत्तंमि ।
जह तंतूणंमि पडे पडोवयारो न तंतुंमि ॥"

नापि परस्परसहायकासत्त्वात्, यतस्तत्किं त्वत्कल्पितान्त्यप्रदेशतो न्यूनत्वे तदभावे वा ?, यदि न्यूनत्वे तत्किं शक्तितोऽवगाहनातो वा ?, न तावच्छक्तिः, एकपटतन्तूनामिवैकात्म-प्रदेशानां तन्न्यूनत्वायोगात्, नाप्यवगाहनातः, सर्वेषमाप्यमीषामेकैकाकाशप्रदेशावगाहित्वेन तुल्यत्वात्, तदभावपक्षे चान्त्यप्रदेशस्येव शेषप्रदेशानामप्यात्मोपकारित्वं सिद्धमेव, आगामा-भिहितत्वं च विशेषकमुच्यमानं तदन्यतामेव सूचयति, यतः स्फुटमेवागमवचनं "कसिणे पडिपुन्ने लोगागासपएसतुल्लपएसे जीवत्ति वत्तव्वं सिय" त्ति, ततश्च-

भवन्सर्वस्वदेशेषु, पटो यद्वत्तदात्मकः ।
भवन्सर्वस्वदेशेषु, तद्वदात्मा तदात्मकः ॥

प्रयोगश्च-यो यावत्स्वप्रदेशाविनाभावी स तदात्मको, यथा घटः, सकलस्वप्रदेशाविनाभावी च जीव इति, एवं च प्रज्ञाप्यमानोऽपि जाहे न ठाइ, ताहे से काउस्सग्गो कतो, एवं सो बहूहिं असब्भावभावनाहिं मिच्छत्ताभिनिवेसेहि य अप्पाणं परं उभयं च वुग्गाहेमाणो गतो आमलकप्पं नयरिं, तत्थ अंबसालवणे ठितो, तत्थ मित्तसिरीनाम समणोवासतो, तप्पमुहा य अन्नेऽवि निग्गया आगया साहुणोत्ति, सोऽवि जाणत्ति-जहा एए निन्हगत्ति, पच्छा सो पन्नवेति, सोऽवि जाणति, तथावि माईट्ठाणेणं गतो धम्मं सुणति, सो ते न विरोहेति पन्नवेहामि णं, एवं सो कम्मं पडिच्छंतो जाव तस्स संखडी विउला विच्छिन्ना जाया, ताहे ते निमंतिया, तुब्भे चेव मम घरे पादाद्याक्रमणं करेह, एवं ते आगया, ताहे तस्स निविट्ठस्स तं विउलं खज्जयं नीनियं, ताहे सो एक्केक्कातो खंडं खडं च देति, कूरस्स कुसणस्स वत्थस्स, ते जाणंति-एस पच्छा पुणो दाहिति, पच्छा पाएसु पडितो, सयणं च भणति-वंदेह, साहू पडिलाभिया, अहो अहं धन्नो ! जं तुब्भे ममं चेव घरमागया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताहे भणंति-किह धरिसिया ? अम्हे, ताहे सो भणति-ननु तुब्भं सिद्धंतो पज्जंतवयव-मेत्ततोऽवयवी, यदि सच्चमिणं तो का विहंसणा ? मित्छमिहरा उ, तुब्भे मए ससिद्धंतेण पडिलाभिया, जदि नवरि वद्धमानसामिस्स तनएण सिद्धंतेण तो पडिलाभेमि, एत्थ संबुद्धा, इच्छामो अज्जो ! संमं पडिगोयमा, ताहे पच्छा सावएण पडिलाभिया, मिच्छादुक्कडं च णं कयं, एवं ते सव्वे संबोहिया आलोइयपडिक्कंता विहरंति ॥ यथा अव्यक्ता आषाढात्तथाऽऽह-

नि.[१६९] सियवियपोलासाढे जोगे तद्दिवसहिययसूले य।
सोहम्मि नलिनगुम्मे रायगिहे पुरि य बलभद्दे ॥

वृ. अक्षरार्थः सुगमः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

तेणं कालेनं तेणं समएणं समणस्स भगवतो दो वाससयाणि चोद्दसुत्तराणि सिद्धिं गयस्स, ततो ततितो उपन्नो। सेयविया नयरी, पोलासं उज्जानं, तत्थ अज्जासाढा नाम आयरिया वाय-णायरिया य, तेसिं च बहवे सीसा आगाढजोगपडिवन्नया अज्झायंति, तेसिं रत्तिं विसूइया जाया, निरुद्धा वाएण, न दे(चे)व कोइ उवट्ठवितो जाव कालगया, सोहम्मे नलिनिगुम्मे विमाने उववन्ना, ओहिं पउंजंति, जाव पेच्छंति तं सरीरगं, ते य साहुणो आगाढजोगपडिवन्नगा, एएऽवि न जाणंति, ताहे तं चेव सरीरं अनुपविट्ठो, पच्छा उट्ठवेन्ति, वेरत्तियं पकरेइ, एवं तेन तेसिं दिव्वप्पभावेणं लहुं चेव समाणियं, पच्छा निप्फान्नेसु तेसु भणंति-खमह भंते! जमेत्थ मए असंजएण वंदाविया, अहं अमुगदिवसं कालगतिल्लतो, एवं सो खामेत्ता गतो, तेऽवि तं सरीरगं छडडेऊण इमे एयरूवे अब्भत्थिए सव्वेवि पडिवन्ना-एच्चिरं कालं असंजतो वंदिओत्ति, ताहे अव्वत्तभावं भावेति, जहा सव्वं अव्वत्तं भणेज्जाह, संजतोऽवि वा देवोऽवि वा, मा मुसावाओ भवेज्जा असंजयवंदणं च, जहा तेमं ममं न पत्तियसि, जह संजतो न वा ?, तुमंपि एवं भाणियव्वो, एवं संजती देवी वा, एवं विभासा। एवं ते असब्भावेण अप्पाणं परं उभयं च वुग्गाहेमाणा विहरंति। अनुशासितु-मारब्धाश्च स्थविरैः-यथा देवानांप्रिया ! इदं युष्माकमाकूतं-

यस्मान्न शक्यते कर्त्तुं, क्वचिज्ज्ञानेन निश्चयः ?।
तस्मादव्यक्तमेवास्तु, वस्तुतत्त्वाविनिश्चयात् ॥

प्रयोगश्च-यत् ज्ञानं न तन्निश्चयकारि, यथेदमाचार्यगोचरं ज्ञानं, ज्ञानं चेदं यत्यादिविषयं वेदनम्, अनिश्चयकारित्वे च ज्ञानस्य निश्चयाधीनत्वात्, वस्तुव्यक्तेरव्यक्तत्वसिद्धिः, ननु चेदमनुमानं ज्ञानमेव, ततश्चैतदपि निश्चयकारि न वा ?, यदि निश्चयकारि वृथाऽस्य प्रयोगः, स्वसाध्यनिश्चयाकरणात्, शेषज्ञानानां चानिषिद्धैव निश्चयकारिता, किञ्च-यज्ज्ञानं न तन्निश्चय-कारीति, प्रतिज्ञायां सर्वथा निश्चयकारित्वाभावः साध्यते कथञ्चिद्वा ?, यदि सर्वथा तदा श्रुतज्ञान-स्यापि ज्ञानत्वादनिश्चयकारित्वे स्वर्गापवर्गसाधकत्वेन तदुपदर्शितेषु तपःप्रभृतिष्वप्यनिश्चयात् कथं न शिरोलुञ्चनादेरानर्थक्यम् ?, अथ तस्य स्वयमनिश्चयकारित्वेऽपि तद्वक्तरि तीर्थकृति प्रत्ययात्तस्यापि निश्चयकारितेति न दोषः, तर्हि किं न तत एवालयविहारादिदर्शनेन यत्वादिष्वपि तद्भावनिश्चयाद्वन्दनाविधिः, उक्तं च-

"जइ जिनमयं पमाणं मुनित्ति ता बज्झकरणसंसुद्धं।
देवंपि वंदमाणो विसुद्धभावो विसुद्धो उ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वथा निश्चयकारित्वाभावे च ज्ञानस्य प्रतिदिनोपयोगिनि भक्तपानादावपि भक्ष्याभक्ष्यादि-विभागाभाव एव प्राप्तो, यत उक्तम्-

"को जाणइ किं भत्तं किमतो किं पाणयं जलं मज्जं ?।
किमलाबुं माणिक्कं किं सप्पो चीवरं हारो ? ॥१॥
को जाणति किं सुद्धं किमसुद्धं किं सजीवमज्जीवं ?।
किं भक्खं किमभक्खं ? पत्तमभक्खं ततो सव्वं ॥२॥"

अथ कथञ्चिदेव निश्चयकारित्वाभावः साध्यते, यतः प्रतिसमयमन्यान्यसूक्ष्मपरिणामरूपेण भक्तादि न निश्चेतुं शक्यं, स्थिरस्थूलरूपतया च निश्चीयत एवेति नोक्तदोषः, एवं सति यत्यादिष्वप्यान्तरपरिणामरूपेणानिश्चयो बहिर्वेषादिरूपेण तु निश्चय एवास्तु, अथ यत्यादिषु प्रकृताचार्यवत् अन्यथात्वमपि सम्भवति, एतदरिष्टाऽऽदिवशतो भक्तादिष्वपि समानम्, यदि च निश्चयनयेन निश्चयस्य कर्तुमशक्यत्यत्वाद्बहुशो दृष्टिसंवादं भक्तादिज्ञानं व्यवहारतो निश्चयकारि, तर्हि यत्यादिज्ञानमपि तत एव तथाऽस्तु, युक्तं चैतत्, छद्मस्थावस्थायां व्यवहारनयाश्रयत्वात् सर्वप्रेष्ठानाम्, अन्यथा हि तीर्थोच्छेदप्रसङ्गः, तदुक्तम्-

"छउमत्थसमयचज्जा ववहारनयानुसारिणी सव्वा।
तं तह समायरंतो सुज्झइ सव्वोवि सुद्धई(मनो) ॥१॥
जइ जिनमयं पवज्जह ता मा ववहारणिच्छए मुयह।
ववहारणउच्छेए तित्थुच्छेओ जतोऽवस्सं ॥२॥"

ततश्च- बहुशो दृष्टिसंवादं, सत्यं संव्यवहारतः।
भक्तादिष्विव विज्ञानं, वस्तु व्यक्तं तदिष्यतानम् ॥

प्रयोगश्च-यत् ज्ञानं बहुशो दृष्टिमंवादं तत्सत्यं, यथा भक्तादिज्ञानं, बहुशो दृष्टिसंवादं च यत्यादिज्ञानम्, इत्याद्यनुशिष्यमाणा अपि सदा तु न गुरुवचनमिष्टवन्तः ताहे अनिच्छन्ता य बारसविहेणं काउस्सग्गेणं उग्घाडिया, जाहे रायगिहं नयरिं गया, तत्थ मोरियवंसप्पसूतो बलभद्दो नाम राया समणोवासतो, तेन ते आगमिया-जहा इहं आगमियत्ति, ताहे तेनं गोहा आणत्ता-वच्चह गुण सिलए पव्वतिगया, ते इहं आणेह, ता तेहिं आणीया भणिया य-लहुं कडगमद्देण मद्दह, ताहे हत्थीहिं कडएहि य आणिएहिं भणंति-अम्हे जाणामो जहा तुमं सावतो, सो भणति-कहिंथ सावतो ?, तुब्भेऽत्थ केऽवि चोरा नु चारिगा नु अभिमरा नु ?, ते भणंति-अम्हे समणा निग्गंथा, सो भणति-किह तुब्भे समणा ?, तुब्भे अव्वत्ता, तुब्भे समणा वा चारिगा वा, अहंपि समणोवासतो वा न वा, तम्हा पडिवज्जह ववहारणयं, ततो ते संबुद्धा लज्जिया पडिवन्ना-निस्संकिया समणा निग्गंथा मोत्ति, ताहे अंबाडिया, खरेहि य मउएहि य मए तुम्ह संबोहणट्ठा कयं, मुक्का खामिया य ॥ यथा सामुच्छेदा अश्वमित्रात्तथाऽऽह-

नि.[१७०] मिहिलाए लच्छिघरे महगिरि कोडिन्न आसमित्तो अ।
नेउणमनुप्पवाए रायगिहे खंडरक्खा य ॥

वृ. सुगमा॥ एतद्भावार्थाभिव्यञ्जकस्तु सम्प्रदायोऽयम्-'सामिस्स दो वाससयाणि वीसुत्तराणि सिद्धिं गयस्स, तो चउत्थो उप्पन्नो, मिहिलानयरीए लच्छीगिहं चेइयं, महागिरी आयरिया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ तेसिं सीसो कोडीन्नो, तस्सवि आसमित्तो सीसो, सो पुण अनुप्पवाए पुव्वे नेउणियवत्थुं, तत्थ छिन्नछेयणयवत्तव्वायए आलावतो जहा-सव्वे पडुप्पन्नसमयणेरइया वोच्छिज्जिस्संति, एवं जाव वेमाणियत्ति,' एवं तस्स तंमि वितिगिच्छा जाया- जहा सव्वे संजया वोच्छिज्जिस्संति, एवं सव्वेसिं समुच्छेदो भविस्सइत्ति, ताहे तस्स तत्थ थिरं चित्तं जायं, भण्यते चाचार्यैर्यथा-भद्र! तवायमाशयः-

अस्ति कारणमुत्पादे, विनाशे नास्ति कारणम्।
उत्पत्तिमन्तः सर्वेऽपि, विनाशे नियतास्ततः ॥

प्रयोगश्च-ये यद्भावं प्रत्यनपेक्षास्ते, तद्भावनियताः, यथा अन्त्या कारणसामग्री स्वकार्य-जनने, अनेपाक्षाश्च विनाशं प्रति भावाः, अत्र व विनाशनैयत्यं भावानं किं वैश्रसिकं विनाशमाश्रित्य साध्यते प्रायोगिकं वा?, यदि वैश्रसिकं किं सर्वथा कथञ्चिद्वा?, कथञ्चित्पक्षे सिद्धसाधनं, सरस्तरङ्गवत्सततमुदयव्ययत्त्वेन केषाञ्चित्पर्यायाणां तद्रूपेण वस्तुषु वैश्रसिकविनाशनैयत्यस्य सिद्धत्वाद्, अथ सर्वथा विनाशः साध्यते तर्हि प्रत्यक्षनिराकृतः पक्षो, द्रव्यरूपेणावस्थितस्यैव वस्तुनो दर्शनात्, अन्यथा द्वितीयादिसमयेषु वस्तुनोऽभावप्रसङ्गः, वस्त्वन्तरोत्पत्तेरदोष इति चेत् किं न तद्भेदेन प्रतिभाति?, अथ मायागोलकवत्सादृश्यात्, तन्न, प्रत्यक्षेणैकत्वग्रहादेव भेदाप्रतिभासात्, अथ भ्रान्तमेवैकत्वग्राहि प्रत्यक्षम्, एवं च सति चक्रकाख्यो दोषः, एकत्व-ग्राहिणो हि प्रत्यक्षस्य भ्रान्तत्वं प्रकृतानुमानप्रामाण्ये, तच्च सादृश्याद्भेदाप्रतिभासे, स चैकत्व-ग्राहिणः प्रत्यक्षस्य भ्रान्तत्वे, तदपि प्रकृतानुमानप्रामाण्ये इति तदेवावर्त्तते, ऐहिकामुष्मिक-व्यवहारविलुप्तिश्च सर्वथा नाशे, तथा चाह-

"तित्ती समो किलामो सारिक्ख विपक्खपच्चयाईणि।
अज्झयणं झाणं भावना य का सव्वणासम्मि? ॥१॥
अन्नन्नो पइगासं भोत्ता अन्नोन्नसोऽवि का तित्ती?।
गन्तादओवि एवं इय संववहारवोच्छित्ती ॥२॥"

अथ सन्तानाश्रयो व्यवहारः, सन्तानोऽपि सन्तानिभ्यः किं भिन्नो न वा?, यदि भिन्नो वस्तुसन्न वा?, यदि न वस्तुसन्न, किं तेन शशविषाणेनेव कल्पितेन?, वस्तुसत्त्वेऽपि क्षणिकोऽक्षणिको वा?, यद्यक्षणिकस्तेनैव प्रकृतानुमानव्यभिचारः, क्षणिकत्वे च तदवस्थैव व्यवहार-विलुप्तिः, अथाभिन्नः, तथाहि-सदृशापरापरक्षणप्रबन्धः सन्तानः, स च सन्तानिन एव, तदसत्, यतः सर्वथोच्छेदे प्राग्भावित्वमेव कारणस्य कारणत्वं, तच्च विसदृशक्षणापेक्षयाऽपि समानमिति कथं सदृशक्षणस्यैवोत्पत्तिः? येन तत्प्रबन्धः सन्तान उच्यते, अथ सदृशक्षणस्यैवोत्पत्तिर्दृष्टा, तर्हि वस्तु कथंचित् स्थितिमपि दृष्टमिति तथैवास्तु, सजातीयेतरव्यावृत्तवस्तुवादिनां च न किञ्चित्तात्त्विकं सादृश्यम्, अतात्त्विकं च स्वपुष्पमिव न तत्त्वविचारोपयोगि, पूर्वापरविनि-र्लुठितैकक्षणाभ्युपगमे च सन्तानिनोऽप्यसन्त एवेत्ययुक्तस्ततो भेदाभेदविचारः, अथ प्रायोगिकं विनाशामाश्रित्य भावानां विनाशनैयत्वं साध्यते, तर्हि तस्य हेत्वन्वयव्यतिरेकानुविधायित्वेना-नपेक्षत्वमसिद्धम्, तथाहि- तत्किं विनाशहेतूनामसामर्थ्यादथ वैयर्थ्यात्कृतकत्वे विनाशस्यापि विनाशप्रसङ्गतो वा?, यद्यसामर्थ्यात्तत्किं विनाशस्य तुच्छरूपतया कर्तुमशक्यत्वेन वस्त्वन्तरो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पादव्यापृतत्वेन वा ?, तत्राद्यपक्षे विनाशस्य तुच्छरूपत्वमसिद्धं, यतो जैनानामुत्तरावस्थोत्पाद एव पूर्वावस्थाप्रच्युतिर्नान्या, यदुक्तम्-

"कपालानां तु उ(सभु)त्पादः, स एव च घटव्ययः ।
अन्यो न दृश्यते नाशो, मध्ये कुम्भकपालयोः ॥"

न चानयोरेकत्वे विरोधो, निमित्तभेदोदयत्वाद्, यदुक्तम्-

"एकत्वेऽपि विरुद्धत्वं, न चोत्पादविनाशयोः ।
निमित्तभेदभूतत्वान्नसृपुत्रपितृत्ववत् ॥"

सिद्धे चैकत्वे पूर्वविनाशाभूत एवोत्तरोत्पाद इत्यनयोस्तुल्य एव हेतुव्यापारः, ततो भावान्तरोत्पादव्यापृतत्वेनेत्यपि प्रत्युक्तम्, उक्तं च-

"अन्यदुत्तरसम्भूतिः, पूर्वनाशाविनाकृता ।
नाविनाश्य ततः पूर्वं, प्रकुर्याद्धेतुरुत्तरम् ॥"

अथ वैयर्थ्यात् स्वयं हि विनश्वरस्वभावो भाव इति किं तस्य विनाशहेतुना ?, नन्वेवं नाशस्वभावत्वाद्वस्तुन उत्पाद एव न स्यात्, नाशोत्पादयोर्विरुद्धत्वेन त्वयाऽभ्युपगतत्वाद्, अविरुद्धताभ्युपगमे वा जैनमतानुप्रवेशः, यदपि-'कृतकत्वे विनाशस्यापि विनाशप्रसङ्ग' इति, तदप्यत एव न दोषाय, तथाहि-कपालोत्पादस्यैव कपालत्वं, कपालोत्पादश्च कपोलेभ्यो नान्य इति तेषामेव विनाशः, स भोचयसम्मत एव, न च कृतकेनावश्यं विनष्टव्यं, सम्यग्दर्शनादिकृतत्वे सिद्धत्वादिपर्यायाणामविनाशित्वाद्, अविनाशित्वं च साद्यपर्यवसितत्वात्तेषाम्, उभये हि पर्यायाः-स्थिरा अस्थिराश्च, यदुक्तम्-

"स्थिरः कालान्तरस्थायी, पर्यायोऽक्षणभंगुरः ।
क्षणिकश्च क्षणादूर्द्ध्वमतिष्ठन्नस्थिरो मतः ॥" ततश्च-
यस्मान्नाशोऽपि जन्मेव, कादाचित्कः सहेतुकः ।
तस्मान्न सर्वथैवामी, भावाः क्षणविनश्वराः ॥

प्रयोगश्च-यत्कादाचित्कं तत्सहेतुकं, यथोत्पादः, कादाचित्कत्वं च विनाशस्य उत्पत्तिक्षणानन्तरमेव भावात्, समकालभावित्वे च विनाशाघ्रातत्वेनोत्पादाभावे सर्वशून्यतापत्तेः, इह विनाशस्य कादाचित्कत्वमापाद्य तद्बलेन सहेतुकत्वमापादितं, तच्च परप्रसिद्धानेव हेतूनपेक्ष्य, स्वप्रसिद्धा तु न किञ्चिदहेतुकं नाम, द्रव्यादिचतुष्टयापेक्षत्वेन सर्वस्य तद्धेतुकत्वात्, तत् प्रतिपद्यस्व पर्यायनयाङ्गीकारतः कथञ्चिदुच्छेदि वस्तु, द्रव्यार्थिकनयाश्रयणाच्च कथञ्चिन्नित्यमिति,

"जमणंतपज्जवमयं वत्थुं भवनं च चित्तपरिणामं ।
ठीतिभवभंगरूवं निच्चानिच्चाइं तोऽभिमतं ॥१॥
सुखदुक्खबंधमोक्खा उभयनयमयाणुवत्तिणो जुत्ता ।
एगयरपरिच्चाए इय(ह) संववहारवोच्छत्ती ॥२॥"

एवं प्रज्ञाप्यमानोऽपि यतो नेच्छति ततोऽसौ निह्नवोत्ति नाऊण उग्घाडितो, सो समुच्छेयणवायं वागरंतो हिंडेति जहा-सुन्नो लोगो भविस्सति, असब्भावभावनाहिं भावितो रायगिहं गतो, तत्थ खंडरक्खा आरक्खिया समणोवासया, ते य सुंकवाला, ते य आगमिल्लिया, तेहिं मारिउमारद्धा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताहे ते भीया भणंति-अम्हेहिं सुयं जहा तुम्मे सड्ढा तहावि एत्तिए असंजए संजए मारेह, ते भणंति-जे ते पव्वइगा ते वोच्छिन्ना अन्ने चोरा वा चारिया वा जाव सयमेव विनस्सिहिह, को तुब्भे विनासेति ?, तुब्भं भेव सिद्धंतो, जइ परं सामिस्स सिद्धंतेण ते चेव तुब्भे, तेहिं चेव अम्हेहिं विनासेज्जह, जतो तं चेव वत्थु कालादिसामग्गिं पप्प पढमसमयिकत्तेण वोच्छिज्जइ दुसमयकत्तेण उप्पज्जति, एवमाइ, तिसमयणेरइया वोच्छिज्जंति चउसमया उप्पज्जंति, एवं पंचसमयगयावि, एत्थं सो वितिगिच्छंतो खणिगवायं पन्नवेइ, एत्थ ते संबुद्धा भणंति-इच्छामो अज्जो ! सम्मं पडिचोयणा एवमेवं तहत्ति, एवं ते संबोहिया मुक्का खामिया पडिवन्ना य ॥ यथा गङ्गाद् द्विक्रियास्तथा त्राह-

नि.[१७१] नइखेडजनव उल्लग महगिरि धनगुत्त अज्जगंगे य।
किरिया दो रायगिहे महातवो तीरमणिनाए ॥

वृ. क्षुण्णा ॥ सम्प्रदायश्चायम्- सामिस्स अट्ठवीसाइं दोवाससयाइं सिद्धिं गयस्स तो पंचमतो उप्पन्नो, उल्लुगा नाम नई, तीसे तीरे उल्लुगतीरं नगरं बीए तीरे खेडत्थाम, तत्थ महागिरीणं आयरियाणं सीसो धनगुत्तो नाम, तस्स सीसो गंगदेवो नाम आयरितो, सो पुव्विमे तडे उल्लुगतीरे नयरे, आयरिया से अवरिमे तडे, ताहे सो सरदकाले आयरियं वंदतो उच्चलितो, सो य उवरितो खल्लीडो, तस्स उल्लुगं नइं उत्तरंतस्स सा खल्ली उण्हेण उज्झति, हेट्ठा य सीयलेण पाणिएण सीयं, ताहे सो चिंतेति-जहा सुत्ते भणियं-एगा किरिया वेइज्जति-सीया उसिणा वा, अहं दो किरियातो वेएमि, तो दो किरिआओ एगसमएण वेइज्जंति, ताहे आयरियाण साहइ, तेहिं भणियं-मा अज्जो ! पन्नवेहि, नत्थि एयं जं एगसमएण दो किरियाओ वेइज्जंति, तथाहि तवाशयः-

तथा प्रतीयमानत्वाच्छ्वेतं श्वेततया यथा।
यौगपद्येन किं नेष्टमुपयोगद्वयं तथा ? ॥

प्रयोगश्च-यद्यथा प्रतीयते तत्तथाऽस्ति, यथा श्वेतं श्वेततया, प्रतीयते च यौगपद्येनोपयोगद्वयं, नन्वत्र यौगपद्येनोपयोगद्वयप्रतीतिः, किं क्रमानुपलक्षणमात्रेण यद्वैकत्रोपयुक्तस्यान्यत्राप्यु-पयोगनिश्चयेन ?, यदि क्रमानुपलक्षणमात्रेण, तदाऽनैकान्तिको हेतुः, उत्पलत्रशतव्यतिभेदादिषु प्रतीयमानस्यापि यौगपद्यस्याभावात्, अथ तत्र सूच्याः सूक्ष्मत्वेनाशुसञ्चारित्वेन च समयादिगत एव क्रमः, स च समयादिसौक्ष्म्यान्न लक्ष्यत इति यौगपद्यभिमानः, एवं सत्यत्रापि मनसोऽती-न्द्रियत्वेन सूक्ष्मत्वादत्यन्तास्थिरतयाऽऽशुसञ्चारित्वाच्च शिरश्चरणगतत्वगिन्द्रियदेशयोः सञ्चरणक्रमः समयादिसौक्ष्म्यान्न लक्ष्यते, तत उपयोगयौगपद्यभिमान इत्यस्तु, उक्तं च- "सुहुमासुचलं चित्तं"त्ति, तथा-

"समयादिसुहुमयातो मन्नसि जुगवंपि भिन्नकालंपि।
उप्पलदलसयवेहं व जह व तमलायचक्कंति ॥"

किञ्च-यत्रेन्द्रियपञ्चकमपि सञ्चरन्मनोदुर्ल्लक्षं, अत एव दीर्घां शुष्कां तिलशष्कुलिका भक्षयतो बुद्धस्य पञ्च ज्ञानानि समुत्पन्नानीति कैश्चिदुच्यते, तत्रैकेन्द्रियस्य देशान्मनः सञ्चरंल्ल-क्षिष्यत इति दुराशयम्, इह च सञ्चरणमुपयोगगमनम्, अन्यथा शरीरव्यापिनः तस्य सञ्चारायोगात्, अथात्रानुमानसिद्धः क्रम इति यौगपद्याभावः, तथाहि-यत् क्रियावत् तत् क्रमेणैव देशान्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्कन्दि, यथाऽऽदित्यः, क्रियावच्च सूच्यादि, इदमपि समानमत्रापि, यौ दूरदेशौ न तयोर्युगपदेकस्य सञ्चारो यथा हिमवद्विन्ध्यशिखरयोर्देवदत्तस्य, दूरदेशौ च शिरश्चरणगतत्वगिन्द्रियदेशावित्यनुमानेन मनसः क्रमसञ्चारसिद्धेः, स्यादेतद्-आगमसिद्धमुपयोगयौगपद्यं, न च तद् युगपन्मनसः सञ्चारं विनेति न मनसः क्रमसञ्चारसाधकानुमानोत्थानम्, आगमसिद्धता चास्य वहुबहुविधादिग्राहित्वाभिधानेनावग्रहादीनामनेकग्रहणस्य तत्रोक्तत्वात्, तदभिधानाच्च युगपदनेकोपयोगताऽप्युक्तैवेति, नन्वत्रानेकग्रहणं किं सामान्यविशेषाणां ग्रहणमपेक्ष्य केवलविशेषाणां वा ?, न तावदाद्यः पक्षो यतोऽनुवृत्तिव्यावृत्तिरूपेण विलक्षणत्वं सामान्यविशेषाणां, तथा चाह-'य एकत्र ग्रहणपरिणामः स नान्यत्रे'ति कथं युगपत्सामान्यविशेषग्रहणम् ?, अथ द्वितीयः पक्षः, उक्तं हि-''विशेषाणां व्यावृत्तिरूपेणाविलक्षणत्वात् युगपद्बहूनापि ग्रहणम्,' तन्न, विरुद्धत्वादस्य, तथाहि-विशेषाश्चाविलक्षणाश्चेति परस्परविरुद्धं वचः, अथ भिन्नेष्वपि विशेषेष्वभिन्नं सामान्यमिति तद्रूपण तेषां ग्रहणम्, इदमस्मदिष्टमेव, उक्तं च-

''उसिणेयं सीयेणं न विभागेनोवओगदुगमिट्ठं ।
होज्जा समदुगगहणं सामन्नं वेयणामेत्तं ॥''

न चैवमनेकग्रहणं युगपदनेकोपयोगित्वाविनाभावि येन तदभिधानात्तदप्युक्तं भवेत्, तथा च पूज्याः-

''बहुबहुविहाइगहणे ननूवओगबहुआ सुएऽभिहिया ।
तमणेगग्गहणं चिय उवओगानेगया नत्थि ॥''

अथैकत्रोपयुक्तस्यान्यत्राप्युपयोगनिश्चयेनेति पक्षः, सोऽपि न, यस्माद्यद्यन्यत्रोपयुक्तमपि मनोऽन्यत्राप्युपयुज्यमानं निश्चीयेत तदा कश्चित् व्याक्षिप्तमनाः पुरः सन्निहितपदार्थान्तरेऽप्युपयोगं लक्षयेत्, न चैवं, तदुक्तम्-

''अन्नविणिउत्तमन्नं विनितोगं लहति जइ मनो तेनं ।
हत्थिं ठियंपि पुरतो किमन्नचित्तो न लक्खेइ ? ॥

(ततश्च स्थितमेतत्-) गवावहितचित्तस्य, नोपयोगो यथा गजे ।
शीतोपयुक्तचित्तस्य, नोपयोगस्तथाऽऽतपे ॥

प्रयोगश्च-य एकत्रावहितचित्तो न सोऽन्यस्य ग्राहको, यथा गवाहितचित्तो हस्तिनः, शीतावहितचित्तश्च शीतवेदनाकाले जीवः, इत्थं संज्ञ्युपयोगमाश्रित्योक्तं, सामान्येन तु-

कारणं परिणाम्येकोपयुक्तनिजशक्तिकम् ।
तदैवाशक्तमन्यस्मिन्नुपयुक्तं (योक्तुं) मृदादिवत् ॥

प्रयोगश्च-यत्परिणामि कारणमेकत्रोपयुक्तशक्तिकं न तदैव तदन्यत्रोपयुज्यते, यथा घटोपयुक्ता मृत् शरावादिषु, शीतवेदनोपयुक्तश्च तत्काले जीवः, उक्तं च-

''उवओगमतो जीवो उवउज्जइ जेण जंमि तं कालं ।
सो तम्मओवओगो होइ जहिंदोवओगम्मि ॥१॥
सो तदुव ओगमेत्तोवउत्तसत्तित्ति तस्समत्तो य ।
अत्थंतरोवओगं जाउ कहं केण वंसेण ? ॥२॥''

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं प्रज्ञाप्यमानोऽपि असद्दहंतो असब्भावभावणाए अप्पाणं परं उभयं च वुग्गाहेति, साहुणो पन्नवेति परंपरेण सुयं आयरिएहिं, वारिओ, जाहे न ट्ठाइ ताहे उग्घाडितो, सो हिंडंतो रायगिहं गतो, महातवोतीरप्पभे पासवणे, तत्थ मणिनागो नाम नागो, तस्स चेइए ठाइ सो, तत्थ य परिसामज्झे कहेति-जहा एवं खलु जीवा एगसमएण दो किरिया वेएंति, ताहे तेन नागेन तीसे चेव परिसाए मज्झे भणितो-मा एयं पन्नवणं पन्नवेहि, न एसा पन्नवणा सुट्ठु दुट्ठुसेहा!, अहं एच्चिरं कालं वद्धमानसामिस्स मूले सुणामि-जहा एगा किरिया वेदिज्जइ, तुमं विसिट्ठतरातो जातो?, ता छड्ड एयं वायं, मा ते दोसेण सेहामि, एयं ते न सुंदरं, भगवया एत्थ चेव समोसरिएण वागरियं, एवं सो पन्नवितो अब्भुगवतो, उवट्ठिओ भणति-मिच्छामि दुक्कडं॥ यथा षडुलूकात् त्रैराशिकानामुत्पत्तिस्तथाऽऽह-

नि.[१७२] पुरिमंतरंजि भुयगुह बलसिरि सिरिगुत्त रोहगुत्ते य।
परिवाय पुट्टसाले घोसण पडिसेहणा वाए॥

वृ. स्पष्टा॥ सम्प्रदायस्त्वयम्-पंचसया चोयाला सिद्धिं गतस्स वीरस्स तो तेरासियदिट्ठी उप्पन्ना, अंतरंजिया नाम नयरी, तत्थ भूयगुहं नामं चेइयं, तत्थ सिरिगुत्ता नाम आयरिया ठिया, तत्थ बलसिरीनाम राया, तेसिं पुण सिरिगुत्ताणं थेराणं सेहो य रोहगुत्तो नाम, सो पुन अन्नगामे ठियल्लतो, पच्छा तत्तो एति। तत्थ य एगो परिव्वायगो पोट्टं लोहपट्टेण बंधेऊण जंबुसाहं च गहाय हिंडति, पुच्छिओ भणति-नानेणं पोट्टं फुट्टति, तो लोहपट्टेण बद्धं, जंबूसाला य जहा एत्थं जंबूद्दीवे नत्थि मम पडिवादी, ताहे तेन पडहतो नीणावितो, जहा सुन्ना परप्पवाया, तस्स य लोगेणं पोट्टसालो नामं कयं, पच्छा तेन रोहगुत्तेण वारियं-मा वाएह पडहयं, अहं से वायं देमि, एवं सो पडिसोहित्ता गतो आयरियाणं आलोएति, एवं मे पडहगो खोभितो, आयरिया भणंति-दुट्ठु कयं, सो विज्जा-बलिओ वाएअ पराजिओऽवि विज्जाहिं उट्ठेति, आह च-

नि.[१७३] विच्छुय सप्पे मूसग मिगी वराही य कागि पोयाइं।
एयाहिं विज्जाहिं सो उ परिव्वायगो कुसलो॥

वृ. सुगमा॥ सो भणइ-किं सक्का एत्ताहे निलोक्किउं?, ताहे तस्स आयरिया इमातो विज्जातो सिद्धिल्लियातो दिंति तस्स पडिवक्खा-

नि.[१७४] मोरिय नउलि बिराली वग्घी सीही य उलुगि ओवाइ।
एयाओ विज्जाओ गिण्ह परिव्वायमहणीओ॥

वृ. सगुमा॥ रयहरणं च से अभिमंतिऊण दिन्नं, जइ अन्नंपि उट्ठेति ततो रयहरणं भमाडेज्जाहि, अजज्जो होहिसि, इंदेणऽवि न सक्का जेउं, तो एयातो विज्जातो गहाय गतो सभं, भाणियं चनेनं-एस किं जाणति?, एयस्सेव पुव्वपक्खो होउ, परिवायतो चिंतेति-एए निउणा, अतो एयाण चेव सिद्धंतं गेण्हामि, जहा मम दो रासी-जीवरासी अजीवरासी य, ताहे इयरणे तिन्नि रासी कया, सो जाणइ-जहा एएण मम सिद्धंतो गहितो, तेन तस्स बुद्धिं परिभूय तिन्नि रासी ठविया-जीवा अजीवा नोजीवा य, जीवा-संसारत्थाई अजीवा-घडाई नोजीवा-घरकोलियाच्छिन्नपुच्छाई, दिट्ठंतो दंडो, जहा दंडस्स आदि मज्झो अग्गं च, एवं सव्वभावावि तिविहा, एवं सो तेन निप्पिट्ठपसिणवागरणो कतो, ताहे सो परिवायगो रुट्ठो विच्छुए मुयति, ताहे पडिमल्ले

मोरे मुयइ, तेहिं विच्छुएहिं हएहिं पच्छा सप्पे मुयइ, ताहे तेसिं पडिघायए नउले मुयति, ताहे उंदरे तेसिं मज्जारे, ताहे मिगे तेसिं वग्घे, ताहे सूयरे तेसिं सेहिं, ताहे कागे तेसिं उलूगे, ताहे पोयागिं, पोयगी सउलिया,

तीसे संपाति-ओलावी, एवं जाहे न तरइ ताहे गद्दभी मुक्का, तेन य सा रयहरनेण आहया, ताहे तस्सेव परिव्वायगस्स उवरिं छेरित्ता गया, ताहे सो परिव्वायगो हीलिज्जंतो निच्छूढो, एवं सो तेनं परिव्वायगो पराजितो, ताहे आगतो आयरियस्स सगासे, आलोएइ, ताहे आयरिएहिं भणियं-कीस ते उट्ठिएण न भणियं ?-नत्थि तिन्नि रासी, एयस्स बुद्धि परिभूय मए पन्नविया, ता इदानिंपि गंतुं भणाहि, सो नेच्छति, मा उब्भावणा होहित्ति न पडिसुणेइ, पुनो पुनो भणिओ भणइ-को व एत्थ दोसो ?, किं च जायं ? जइ तिन्नि रासी भणिया, अत्थि चेव तिन्नि रासी, अज्जो! असब्भावो तित्थयराण य आसायणा, तहावि न पडिवज्जति, एवं सो आयरिएहिं समं संपलग्गो, ताहे आयरिया रायउलं गया, भणंति-तेन मम सीसेण अवसिद्धंतो भणितो, अम्हं दुवे चेव रासी, इयाणिं सो विपडिवन्नो, तो तुब्भे अम्हं वायं सुणेज्जाह, तं पडिसुणंति, तत्थ रायसभाए मज्झे रन्नो पुरतो आवडियं ॥ ततस्तं श्रीगुप्तगुरुरवोचतत्भद्राभिधत्स्व, प्रत्युवाच-

'यस्मादजीववज्जीवान्नोजीवोऽपि विभिद्यते ।
तथैवाध्यक्षगम्यत्वादस्तु राशित्रयं ततः ॥

प्रयोगश्च-यद्यतो विलक्षणं तत्ततो भिन्नं, यथा जीवादजीवो, विलक्षणश्च जीवान्नोजीवः, ततश्च जीवाजीवौ द्वौ नोजीवश्चेति राशित्रयसिद्धिः, गुरुराह-असिद्धोऽयं हेतुः, यस्माजीवान्नो-जीवस्य वैलक्षण्यं लक्षणभेदेन देशभेदेन वा ?, न तावल्लक्षणभेदेन जीवलक्षणानां स्फुरणादीनां त्वदभिमते नोजीवेऽपि जीवदेशे गृहलोकिलात्रुटितपुच्छादावभेदेन दर्शनात्, नापि देशभेदेन, स हि जीवात् पृथग्भावे भवेदन्यथा वा ?, यदि पृथग्भावे स किं विश्रसातः प्रयोगतो वा ?, विश्रसातश्चेत् पुद्गलानामिव नोजीवानां स्वतश्चटनविचटनधर्मत्वेनान्यसम्बन्धिनामन्यत्र सञ्चारतः सुखदुःखाद्यात्मधर्मसङ्कीर्णतापत्तिः, तदुक्तम् -

"अह खंधो इव संघायभेयधम्मा स तोऽवि सव्वेसिं ।
अवरोप्परसंचारे सुहाइगुणसंकरो पत्तो ॥"

तथात्वे च कृतनाशाकृताभ्यागमौ, अथ प्रयोगतस्तन्न, अमूर्त्तद्रव्यत्वादिभिर्नभस इव जीवस्य खण्डशो विनाशयितुमशक्यत्वात्, तथात्वे वा सर्वनाशादिदोषप्रसङ्गः, उक्तं च-

"दव्वामुत्तता कयभावादविकारदरिसणातो य ।
अविनासकारणेहिं नभसोव्व न खंडसो नासो ॥१॥
नासे य सव्वनासो जीवस्स न सो य जिनमयच्चातो ।
तत्तो य अनिम्मोक्खो दिक्खावेफल्लदोसो य ॥२॥"

किञ्च-अयं कुतो निश्चीयते ?, अथ गृहकोलिकाच्छिन्नपुच्छशरीरान्तराले जीवस्यासत्त्वात्, तदसत्त्वं च तदग्रहणात्, तर्हि तत्तदग्रहणमौदारिकशरीररूपेण सर्वथा वा ?, न तावादाद्यः पक्षो, यतो न जीवस्यौदारिकमेवैकं शरीरं येन तदग्रहणेन तदसत्त्वनिश्चयः स्यात् द्वितीयपक्षे पुनरनै-कान्तिकमग्रहणं, दीपरश्मीनामिव भित्त्यादिकमन्तरेण विनौदारिकशरीरमशरीरस्य सूक्ष्मशरीरस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा सतोऽपि जीवस्याग्रहणात्, तथा चोक्तम्-

"गज्झामोत्तिगयातो नागासे जह पदीवरस्सीतो।
तह जीवलक्खणाइं देहे न तयंतरालंमि ॥१॥
देहरहियं न गिण्हइ निरतिससो नातिसुहुमदेहं च।
न य से होइ विवाहा जीवस्स भवंतराले व्व ॥२॥"

अथान्यथेति पक्षः, तत्र चापृथग्भूतोऽपि भिन्नदेश इति पुच्छादि नोजीवो जीवाद्विलक्षणः, उच्यते, इहापि पुच्छादेर्नोजीवत्वं स्वल्पतरप्रदेशत्वेन समभिरूढनयाश्रयणेन वा ?, यद्यल्पतरप्रदेशत्वेन तदा पुच्छवत् शेषावयवानामेकैकशो नोजीवता अजीवावयवानां च नोअजीवतेति राशिबहुत्वम्, अथ यथा जीवाजीवानां बहुत्वेऽपि जात्याश्रयणात् न राशिबहुत्वं तथा तदेकदेशानामपि, तथापि राशिचतुष्टयापत्तिः, उक्तं च-

"एवं च रासतो ते न तिन्नि चत्तारि संपसज्जंति।
जीवा तहा अजीवा नोजीवा नोअजीवा य ॥"

अथाभिन्नलक्षणत्वादजीवान्नोअजीवो न भिद्यते इति न दोषः, तर्हि तद्वदेव जीवान्नोजीवोऽपि न भेत्स्यतीति राशिद्वयसिद्धिः, यत्तु समभिरूढनयाश्रयणेनेति त(त्त)न्मतानाभिज्ञेनोक्तं, स हि जीवादेशं नोजीवमिच्छन्नपि न राशिभेदमिच्छति, सर्वनयानामपि चैकमत्यमत्रार्थे, सर्वनयमतत्वे च जिनमतस्य किमेकतरनयमतेन ?, तदुक्तम्-

"न य रासिभेयामिच्छति तुमं व नोजीवमिच्छमाणोऽवि।
अन्नोवि नतो नेच्छइ जीवाजीवाहियं किंचि ॥"
इच्छउ व समभिरूढो देसं नोजीवमेगण इयं तु।
मिच्छत्तं संमत्तं सव्वनयमयावरोहेणं ॥"

ततश्च- सहाजीवेन तद्देशो, यथैको लक्षणैक्यतः।
सह जीवेन तद्देशः, तथैको लक्षणैक्यतः ॥

प्रयोगश्च-यद्यैनैकलक्षणं न तत्ततो भिन्नं, यथा अजीवान्नोअजीवः, एकलक्षणश्च नोजीवो जीवेनेति, एवं सम्यग् गुरुभिः, सहोक्तिप्रत्युक्तिकया, जहा एगदिवसं तहा छम्मासा गया, ताहे राया भणइ-मम रज्जं सीयति, ताहे आयरिएहिं भणियं-इच्छाए मए एच्चिरं कालं धरितो, इत्ताहे णं पासह कल्लं दिवसे आगते समाणे निग्गहामि, ताहे पभाए भणए-कुत्तियावणे परिक्खिज्जउ, तत्थ सव्वदव्वाणि अत्थि, आनेह-जीवे अजीवे नोजीवे, ताहे देवयाए जीवा अजीवा दिन्ना, नोजीवे नत्थित्ति भणति, अजीवे वा पुणो देति, एवमादिगाणं चोयालसएण पुच्छाण निग्गहितो, नयरे य घोसियं-जयइ महइ महा वद्धमाणसामित्ति, सो य निव्विसओ कओ, पच्छा निन्हतोत्ति काऊण उग्घाडितो, छद्रुतो एसो, तेन वसेसियसुत्ता कया, छउलूगो य गोत्तेणं, तेन छलूओत्ति जातो, चोयालसयं पुण इमं-तेन छ मूलपयत्था गहिया, तंजहा-दव्वगुणकम्मसामन्नविसेससमवाया, तत्थं दव्वं नवहा, तंजहा-पुढवी आऊ तेऊ वाऊ आगासं कालो दिसा जीवो मनं, गुणा सत्तरस, तंजहा-रूवं रसो गंधो फासो संखा परिमाणं पुहुत्तं संजोगो विभागो परत्तं अपरत्तं बुद्धी सुहं दुक्खं इच्छा दोसा पयत्तो, कम्मं पंचहा-उक्खेवणं वक्खेवणं आउंटणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पसारणं गमनं च, सामन्नं तिविहं-महासामन्नं सत्तासामन्नं, सामन्नविसेससामन्नं। तत्र महासामान्यं षट्स्वपि पदार्थेषु पदार्थत्वबुद्धिकारि, सत्ता सामान्यं त्रिपदार्थसद्बुद्धिविधायि, सामान्य-विशेषसामान्यं द्रव्यत्वादि, अन्ये तु व्याचक्षते-त्रिपदार्थसत्करी सत्ता, सामान्यं द्रव्यत्वादि, सामान्यविशेषः पृथिवीत्यादिः, विसेसो एगविहो, एवं समवाओऽवि, अन्ने भणंति-सामन्नं दुविहं-परमापरं च, विसेसो दुविहो-अंतविसेसो य अनंतविसेसो य, एते छत्तीसं, एक्केक्कंमि चत्तारि विगप्पा, पुढवी अपुढवी नोपुढवी नोअपुढवी, एवमबादिष्वपि, तत्थ पुढविं देहत्ति मट्टिया देति, अपुढविं देहत्ति तोआइ, नोपुढवि देहत्ति न किंचि देति, पुढविवइरित्तं वा पुणो देइ, नो अपुढविं देहित्ति न किंचि देति, एवं जहासंभवं त्रिभासा। स्थविराश्च गोष्ठमाहिलाः स्पुष्टमबद्धं प्ररूपयन्ति यथा तथाऽऽह-

नि.[१७५] दसपुरनगरुच्छुघरे अज्जरक्खिय पुसमित्ततियगं च।
गुट्ठामाहिल नव अट्ठ सेसपुच्छा य विंझस्स ॥

वृ. अस्याः संस्कारः सुकरः॥ अर्थस्तु सम्प्रदायादवसेयः, स चावश्यकचूर्णितोऽवगन्तव्यः, नवरमिहोपयोगि किञ्चिदुच्यते-

पंचसया चुलसीया तइया सिद्धिं गयस्स वीरस्स।
अबद्धियाण दिट्ठी, दसपुरनयरे समुप्पन्ना॥

ते देविंदवंदिया रक्खिज्जा दसपुरं गया, महुराए अकिरियवाई उट्ठितो, जहा नत्थि माया नत्थि पिया एवमादिणाहियवादी, तत्थ संघसमवातो कतो, तत्थ पुण वादी नत्थि, ताहे इमेसिं पयट्टियं, इमे य जुगप्पहाणा, ताहे आगया, तेसिं साहेति, ते य महल्ला, ताहे तेहिं गोट्ठामाहिलो पयट्टिओ, तस्स य वायलद्धी अत्थि, सो गतो, सो तेन वाए पराजितो, सोऽवि ताव तत्थ सड्ढेहिं आभट्ठो वरिसारत्ते ठितो अच्छति, ततो आयरिया समिक्खंति, को गणहरो हवेज्जा?, ताहे दुब्बलियापूस्समित्तो समिक्खितो, जो पुण तेसिं सयणवग्गो सो बहुओ, तेसिं गोट्ठामाहिलो वा फग्गुरक्खितो वा अनुमतो, गोट्ठामाहिलो आयरियाण माउलओ, तत्थ आयरिया सव्वे सद्दावित्ता दिट्ठं-तं करेंति-

निप्फावकुडो तेल्लकुडो घयकुडो य, ते पुण हेट्ठाहोत्ता कया निप्फाया सव्वे नेंति, तेल्लमवि नेति तत्थ पुण अवयवा लग्गंति, घयकुडे बहुं चेव लग्गति, एवमेवाहमज्जो! दुब्बलियापूसमित्तं पइ सुत्तत्थतदुभएसु निप्फावकुडसमाणो जातो, फग्गुरक्खियं पति तेल्लकुडसमाणो, गोट्ठामाहिलं पइ घयकुडसमाणो, एवमेस सुत्तेण अत्थेण य उववेतो तुब्भं आयरितो होउ, तेहिं सव्वं पडिच्छियं, इयरोऽवि भणितो-जहाऽहं वट्टितो फग्गुरक्खियस्स गोट्ठामाहिलस्स तहा तुब्भेहिवि वट्टियव्वं, तानिवि भणियाणि-जहा तुब्भे ममं वट्टियाइं तहा एयस्सवि वट्टेज्जाह, अविय-अहं कए वा अकए वा न रूसामि एस न खमीहित्ति, एवं दोवि वग्गे अप्पाहेत्ता भत्तं पच्चक्खाय कालगया देवलोगं गया, इयरेणऽवि सुयं-जहा आयरिया कालगया, ताहे आगतो पुच्छइ-को गणहरो ठवितो?, कुडगदिट्ठंतो य सुतो, ताहे वीसुं पडिस्सए ठाइऊण पच्छा आगतो, ताहे तेहिं सव्वेहिं अब्भुट्ठितो, इह चेव ठाह, ताहे नेच्छई, सोऽवि बाहिंठितो अन्नाणि वुग्गाहेति, ताणि न सक्केइ।

इतो य आयरिया अत्थपोरिसिं करेंति, सो न सुणइ-भणइ-तुब्भेत्थ निप्फावकुडा कहेह,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसु उट्ठितेसु विंझो अनुभासति, अट्ठमे कम्मप्पवाए पुव्वे कम्मं पन्नविज्जति, जीवस्स य कम्मस्स य कहं बंधो ?, तत्थ ते भणंति-बद्धं पुट्ठं निकाईयं, बद्धं जहा सुइकलावो, पुट्टं जहा घननिरंतरातो कयाओ, निकाईयं जहा तावेऊण पिट्टिया, एवं कम्मं रागदोसेहिं जीवो पडमं बंधइ, पच्छा तं परिणामं अमुंचंतो पुट्ठं करेति, तेणेव संकिलिट्ठपरिणामेण तं अमुंचंतो किंचि निकाएति, निकाईयं निरुवक्कमं, उदएण नवरि वेइज्जइ, अन्नहा तं न वेइज्जति, ताहे सो गोट्ठामाहिलो वारेति, एत्तियं न भवति, अन्नयावि अम्हेहिं सुयं-जइ एत्तियं कम्मं बद्धं पुट्ठं निकाचियं एवं भो मोक्खो न भविस्सति, तो खाइ किह बज्झइ ?, भणइ-सुणेह-

नि.[१७९] पुट्ठो जहा अबद्धो कंचुइणं कंचुओ समन्नेइ ।
एवं पुट्ठमबद्धं जीवं कम्मं समन्नेइ ॥

वृ. जहा सो कंचुकिणं पुरिसं फुसति, न उण सो कंचुओ सरीरेण समं बद्धो, एवं चेव कम्मंपि, पुट्ठं, न उण बद्धं जीवपएसेहिं समं, जस्स बद्धं तस्स कम्मसंसारवुच्छित्ती न भविस्सति, ताहे सो भणति-एत्तियं आयरिएहिं अम्हं भणियं, एसो न याणति, ताहे सो संकितो समाणो पुच्छतो गतो, मा मए अन्नहा गहियं हवेज्जा, ताहे पुच्छिया आयरिया, तैरुक्तम्-यथा तस्यायमाशयः-

यतो यद्भेत्स्यते तेन, स्पृष्टमात्रं तदिष्यताम् ।
कञ्चुकौ कञ्चकनैव कर्म भेत्स्यति चात्मनः ॥

प्रयोगः-यद्येन भविष्यत्पृथग्भावं तत्तेन स्पष्टमात्रं, यथा कञ्चुकः कञ्चुकिना, भविष्यत्पृथग्भावं च कर्म्म जीवेन, अत्र प्रष्टव्योऽयम्-कञ्चुकवत्स्पृष्टमात्रता कर्म्मणः किमेकैकजीवप्रदेशपरिवेष्टनेन सकलजीवप्रदेशप्रचयपरिवेष्टनेन वा ?, यद्येकैकजीवप्रदेशपरिवेष्टनेन तत्किमिदं परिवेष्टनं मुख्यमौपचारिकं वा ?, यदि मुख्यं सिद्धान्तविरोधः, मुख्यं हि परिक्षेपणमेव परिवेष्टनम्, एवं च भिन्नदेशस्य कर्मणो ग्रहणं, सिद्धान्ते तु यत्राकाशदेशे य आत्मप्रदेशोऽवगाढः तेन तत्रैवावगाढं कर्म्म गृह्यते इत्युक्तम्, अत एवाह शिवशर्माचार्यः-

"एगपएसोगाढं सव्वपएसेहि कम्मुनो जोगं ।
गेण्हइ जहुत्तहेऊ साईयमणाइयं वावि ॥"

अथौपचारिकं यथा हि कञ्चुकी कञ्चुकेनेवावष्टब्धश्चावृतश्च, एवं जीवप्रदेशा अपि कर्म्मप्रदेशैरिति मुख्यपरिवेष्टनाभावेऽपि तेषां तत्परिवेष्टनमुच्यते, तर्हि स्फुटैवास्मदिष्टबन्धसिद्धिः, अस्माकमप्यनन्तकर्म्माणुवर्गणाभिरात्मप्रदेशानामुक्तरूपपरिवेष्टनस्यैव बन्धत्वेनेष्टत्वात्, आगमश्चात्र-"एगमेगे आयपएसे अनंतानंताहिं कम्मवग्गूहिं आवेढियपरिवेढियत्ति" ततश्च विपर्ययसाधनाद्विरुद्धो हेतुः, सकलजीवप्रदेशप्रचयपरिवेष्टनेनेत्यस्मिन्नपि पक्षे भिन्नदेशकर्म्मग्रहणेन तथैव सिद्धान्तविरोधः, तथा तत्र वहिः प्रदेशबन्ध एव कर्म्मणः सम्भवति, ततश्च मलस्येव न तस्य भवान्तरानुवृत्तिः, एवं च पुनर्भवाभावः, सिद्धानां वा पुनर्भवाऽऽपत्तिः, न च मलस्य शरीरेण स्पृष्टतया दृष्टान्तवैषम्यं, शरीरात्मप्रदेशानामन्योऽन्यमविभागेनावस्थानाद्, अन्यथा हि मृणालस्पर्शाद्यनुभावप्रसङ्गः, किञ्च-इयं देहान्तः सातादिवेदना सनिबन्धना निर्निबन्धना वा ?, निर्निबन्धना चेत्किं न सिद्धानामपि ?, सनिबन्धनत्वे च किं पयःपानादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टहेतुकैव यद्वा कर्म्मनिबन्धनाऽपि ?, यदाऽऽद्यः पक्षस्तर्हि बहिर्वेदनापि दृष्टा बाह्यहेतुकैवेति किं कर्म्मकल्पनया ?, अथ कर्म्महेतुकाऽपि तर्हि तत्किं यत्रैव स्थितं तत्रैव वेदनानिबन्धनमुतान्यत्रापि ?, यदि तत्रैव तर्हि त्वन्मतेन बहिरेवैत-दवस्थितमित्यन्तः सातादिवेदनोच्छेदप्रसङ्गः, अथान्यत्रापि तद्वेदनानिबन्धनं तर्हि किं नैकात्म-स्थितं सर्वात्मस्वपि ?, उक्तं च-

"जइ वावि भिन्नदेसंपि वेयणं कुणइ कम्ममेवं ते ।
कह अन्नसरीरगयं न वेयणं कुणति अन्नस्स ?, ॥"

तथा च कृतनाशाकृताभ्यागमप्रसङ्गः, अथ येनैव कृतं तस्यैव तन्निबन्धनं, तथापि पादवेदनायां शिरोवेदनाऽऽपत्तिः, अथ सञ्चारित्वात्तस्यान्तरप्यवस्थानमिति नान्तः सातादिवेदनोच्छेदप्रसङ्गः, एवं तर्हि न कञ्चुकतुल्यता, तस्य बहिरेव नियतत्वात्, युगपदुभयत्र वेदनाऽभावप्रसङ्गश्च, यथा च बहिःस्थमन्तःसञ्चारितया वेदनाहेतुरेवमन्तःस्थितं बहिःसञ्चारितया तद्धेतुरिति विपर्ययकल्पनाऽपि किं न ?, नियामकाभावात्, सञ्चारित्वे च कर्म्मणो वायोरिव न भवान्तरानुवृत्तिः, तदुक्तम्-"नं भवंतरमन्नेई सरीरसंचारतो तदनिलो व्व"त्ति, किञ्च-काञ्चनोपलयोरपि पृथग्भावोऽस्ति वा न वा ?, न तावन्नास्ति प्रत्यक्षतस्तद्दर्शनात्, अस्तित्वे च यथा भविष्यत्पृथग्भावित्वेऽपि तयोरविभागावस्थानेन सृपष्टमात्रता तथा जीवकर्म्मणोरपि स्यात्, न च काञ्चनसत्तैव तत्र पूर्वं नास्ति, चाकचिक्यदर्शनात्प्रत्यक्षतः, तथा यत्र यन्नास्ति न तस्य तत उत्पादः, सिकताभ्य इव तैलस्येत्यनुमानतश्च तत्सिद्धेः, ततश्च-

'यत्र यद्वेदनाहेतुः, कर्म्म तत्रस्थमेव तत् ।
सर्वत्र वेदनाहेतुः, कर्म सर्वत्रगं ततः ॥'

प्रयोगश्च-यत्र यद्वेदनानिमित्तं कर्म तत्रस्थमेव तद् अन्यथा दर्शितन्यायेनातिप्रसङ्गाद्, वेदनाहेतुश्च सर्वत्रात्मप्रदेशेषु कर्म इत्याद्याचार्योक्तं तेन गंतूण सिद्धं, एत्तियं भणियं आयरिएहिं, एवं पुनरवि सो संलीणो अच्छइ, समप्पउ ततो खोभेहामि । अन्नया नवमे पुव्वे पच्चक्खाणे साहूणं जावज्जीवाए तिविहं तिविहेण पाणातिवायं पच्चक्खामि, एयं पच्चक्खाणं वण्णिज्जइ, ताहे सो भणति-अवसिद्धंतो, न होति एवं पुन, कहं कायव्वं ?, सुणेह-

नि. [१७७] पच्चक्खाणं सेयं अपरिमाणेण होइ कायव्वं ।
जेसिं तु परीमाणं तं दुट्ठं होइ आसंसा ॥

वृ. सव्वं पच्चक्खामि पाणाइवायं अपरिमाणाए तिविहं तिविहेणं, एवं सव्वं आवकहियं, किं निमित्तं परिमाणं न कीरति ?, जो सो आसंसादोसो सो नियत्तिता भवति, जावजीवाए पुन भणंतेण परिमाणेण अब्भुवगयं भवति, जहाऽहं हणिस्सामि पाणाई, एतन्निमित्तं अपरिमाणाए कायव्वं ॥ स चैवं वदन्विन्ध्येनाभिदधे-यथाऽयं भवदाशयः-

सावधि स्यादभिष्वङ्गि, गृहिणामित्वरं यथा ।
प्रत्याख्यानं तथा चेदं, यावज्जीवं यतेरपि ॥

प्रयोगः-यत्परिमाणवत् प्रत्याख्यानं तत्साभिष्वङ्गं, यथा गृहिणामित्वरप्रख्यानं, परिमाणवच्च यतेरपि यावज्जीवं सर्वसावद्यप्रत्याख्यानमित्ययमनैकान्तिको हेतुः, तथाहि-किमत्र परिमाण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्त्वमात्रेण साभिष्वङ्गता साध्यते उत आशंसयाऽपि ?, प्रथमपक्षे किं यतेरद्धाप्रत्याख्यानमस्ति न वा ?, यद्यस्ति किं पौरुष्यादिपदोपेतमितरथा वा ?, यदि पौरुष्यादिपदोपेतं किं न परिणामवत्त्वेन साभिष्वङ्गता ?, अथ न समतास्थितत्वात् तर्हि परिमाणवत्त्वमनैकान्तिकम्, अथानभिमतमेव तत्र पौरुष्यादिपदोपादानम्, एवं सति प्रव्रज्यादिन एवानशनापत्तिः, तथा च-''निप्फादिया य सीसा दीहो परिवालितो य परियातो' इत्याद्यागमविरोधः, न चाद्धाप्रत्याख्यानं नास्त्येव यतेरिति पक्षः, 'अनागतमइक्कंतं' इत्यागमेन तस्याभिधानात्,

द्वितीयपक्षे तु नैवमस्याशंसा-यथा भवान्तरे सावद्यमहं सेविष्ये, येन साभिष्वङ्गता स्यात्, यदपि यावज्जीवेति पदोच्चारणं तदपि व्रतभङ्गभयादेव, तदुक्तम् -''वयभंगभयाउ च्चिय जावजीवंति निदिट्ठं'' किञ्च-परिणामवत्त्वेन साभिष्वङ्गतां साधयतस्तवाकूतपरिमाणं प्रत्याख्यानमिति, तत्र च नञा परिमाणाभावमात्रमुच्यते वस्त्वन्तरविधिर्वा ?, यदि परिमाणाभावमात्रं तदा तस्याभिष्वङ्गहेतुत्वेनैव निषेधः, तद्धेतुत्वं च तस्यानैकान्तिकमनन्तरमेवोक्तमिति किं तन्निषेधेन ?, अथ वस्त्वन्तरविधिस्तत्र वस्त्वन्तरं शक्तिरनागरताद्धा वा ? यदि शक्तिस्तत्र किं यावच्छक्तिस्तावन्मम प्रत्याख्यानम् अथ यावति विषये शक्तिस्तावतीति ?, प्रथमपक्षे शकनक्रियापरिमाणपरिमितत्वात्, प्रत्याख्यानस्य परिमाणवत्त्वमेवोक्तं भवतीति स्ववचनविरोधः, प्रत्याख्यानानवस्था चैवं, शक्तेरनियतत्वात्, तथा चातीचारासत्त्वं, तदसत्त्वे च प्रायश्चित्ताभावः, द्वितीयपक्षे तु प्राणवधाद्यन्यन्तरविरतावपि संयतत्वापत्तिः, शक्त्यपेक्षत्वात्तद्धेतुप्रत्याख्यानस्य,

''एत्तियमेत्ती सत्तित्ति नातियारो न यावि पच्छित्तं।
न य सव्वव्वयनियमो एगेन य संजयत्तंति ॥''

अथानागताद्धा तत्रापि किं भावः प्रत्याख्यानं व्यञ्जनं वा ?, न तावद् व्यञ्जनं स्वप्नादावपि तदुच्चारणे प्रत्याख्यानप्रसङ्गात् प्रमादतः, शक्तिवैकल्पतो वा व्यञ्जनस्खलने तदभावापत्तेश्च, ततः प्रथमपक्ष एवावशिष्यते, तत्र च सदा सावद्यमहं न सेविष्ये इति तस्य भाव उत कदाचिदिति ?, यदि आद्यपक्षस्तदा मृतस्यापि तत्सेवायामपरिपूर्णप्रतिज्ञत्वेन व्रतभङ्गप्रसङ्गः, तथा सिद्धानामपि संयतत्वापत्तिः, सकलानागताद्धाप्रत्याख्यानधारित्वात्। एवं च 'सिद्धे नो चारित्ती नो अचारित्ती' इत्यागमविरोधः, अथ द्वितीयपक्षस्तत्र किं यथा भावस्तथा व्यञ्जनमथान्यथा ?, यदि यथा भावस्तथा व्यञ्जनम् एवं सति विज्ञातविषयादेरेव प्रत्याख्यानमन्यथा तद्भङ्गप्रसङ्गः, ततश्च जीवन्नहं सावद्यं न सेविष्ये मृतस्य तु कर्मोदयस्वाभाव्यादवश्यंभाविन्यविरतिरित्ययमेव तस्य भावः, तथा च यथाभावं व्यञ्जनोच्चारणे बलादापतितं यावज्जीवेति, तथा च जीवनावधित्वादपरिणामत्वहानिः, अन्यथा व्यञ्जनोच्चारणमिति पक्षे च परिस्फुटैव मृषाभाषिता, ज्ञात्वा अन्यथाभिधानात्, उक्तं च-

''जो पुन अव्वयभावं मुणमाणोऽवस्सभाविनं भणति।
वयमपरिमाणमेवं पच्चक्खं सो मुसावाइ ॥''

ततश्च- 'नाशंसातो यतस्तस्य, यावज्जीवेति पठ्यते।
किन्तु भङ्गभयादेव, तस्मादस्तु यथास्थितम् ॥'

प्रयोगश्च-यत्र नाशंसा न तत्सावधित्येऽपि साभिष्वङ्गं, यथा कायोत्सर्गो, न विद्यते च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतिप्रत्याख्याने यावज्जीवेति पदेऽप्याशंसेति, इत्यादि जहा आयरिएहिं भणियं तहा सव्वे भणंति, जहा एत्तियं भणियं आयरिएहिं, जेऽवि अन्ने थेरा बहुस्सुया अन्नगच्छेल्ला तेऽवि पुच्छिया, एत्तियं चेव भणंति, ताहे भणति-तुब्भे किं जाणइ ?, तित्थयरेहिं एत्तियं भणियं, तेहिं भणियं-तुमं न जाणसि, जाहे न ट्ठाइ ताहे संघसमवातो कतो, देवयाए काउस्सग्गो कतो, जा सड्डिया सा आगया, भणइ-संदिसहत्ति, ताहे भणिया-वच्च तित्थयरं पुच्छ, किं ?, जं गोट्ठामाहिलो भणइ तं सच्चं ?, दुब्बलियाप्पमुहो संघो जं भणइ तं सच्चं ?, ताहे सा भणति-मम अनुबलं देह, काउस्सग्गो दिन्नो, ताहे सा गया, तित्थयरो पुच्छितो, तेहिं वागरियं-जहा संघो सम्मावाई, इयरो मिच्छावादी, निण्हवो एस सत्तमो, ताहे आगया, भणिओ-ओस्सारेह, संघो सम्मावादी, एस मिच्छावादी निण्हवो, ताहे सो भणति-एसा अप्पिड्डिया वराई, का एयाए सत्ती गंतूण ?, तीसेऽवि न सद्दहति, ताहे पूसमित्ता भणंति-जहा अज्जो ! पडिवज्जउ, मा उग्घाडिज्जिहिसि, नेच्छति, ताहे सो संघेणं वज्झोकतो बारसविहेणं संभोएणं, तंजहा-

"उवहि १ सुय २ भत्तपाने ३ अंजलीपग्गहे ति य ४।
दायणा ५ निकाए य ६ अब्भुट्ठाणेत्ति आवरे ७ ॥
किइकम्मस्स य करणे ८ वेयावच्चकरणे इय ९।
समोसरणसन्निसेज्जा १० कहाए य ११ निमंतणा १२ ॥"

एस बारसविहो, सत्तरभेतो जहा पंचकप्पे ॥ इत्युक्ता अल्पतरविसंवादिनो निह्नवाः, प्रसङ्गत एव बहुतरविसंवादिनं बोटिकमाह-

नि.[१७८] रहवीरपुरं नयरं दीवगमुज्जाण अज्जकण्हे अ।
सिवभूइस्सुवहिंमि पुच्छा थेराण कहणा य ॥

वृ. अक्षरार्थः सुगमः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

छव्वाससएहिं नवोत्तरेहिं सिद्धिं गयस्स वीरस्स।
तो बोडियाण दिट्ठी रहवीरपुरे समुप्पन्ना ॥

तेणं कालेनं तेणं समयेणं रहवीरपुरं कब्बडं, तत्थ दीवगं नाम उज्जानं, तत्थ अज्जकण्हा आयरिया समोसढा। तत्थ एगो सिवभूई नाम साहस्सिमल्लो, सो रायाणं उवगतो, तुमं ओलग्गामित्ति, जा परिक्खामित्ति, रायाए अन्नया भणितो वच्च भाइघरे किण्हचउद्दसीए बलिं देहि, सुरा पसुतो दिन्नो, अन्ने य पुरिसा भणिया-एयं बीहाविज्जाह, सो गंतूण माइबलिं दाऊण छुहिओमित्ति तत्थेव सुसाणे तं पसुं पओलित्ता खाइ, ते य गोहा सिवारसिएहिं समंता भैरवं रवं करेंति, तस्स रोमुब्भेओऽवि न कज्जइ, तआ अब्भुट्ठिओ गतो, तेहिं सिट्ठं, वित्ती दिन्ना।

अन्नया सो राया दंडे आणवेति-जहा महुरं गेण्हह, ते सव्वबलेणं उद्धाईया, ततो अदूरसामंतेणं गंतूण भणंति-अम्हे न पुच्छियं-कयरं महुरं वच्चामो, राया य अविण्णवणिज्जो, ते गुंगुयंता अच्छंति, सिवभूई आगतो भणति-किं भो ! अच्छह ?, तेहिं सिट्ठं, तो भणति-दोऽवि गिण्हामो समं चेव, ते भणंति-न सक्का, दो भागिएहिं एक्केक्काए बहू कालो होतित्ति, सो भणति-जं दुज्जयं तं मम देह, भणितो जा निज्जाइ, भणइ-

सूरे त्यागिनि विदुषि च वसति जनः स च जनाद्गुणी भवति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणवति धनं धनाच्छ्रीः श्रीमत्याज्ञा ततो राज्यम् ॥

एवं भणित्ता पहावितो पंडुमहुरंतेणं, तत्थ पंच्चताणि ताविउमारद्धो, दुग्गे ठितो, एवं ताव जाव नगरसेसं जायं, पच्छा नगरमवि गहियं ओवरइत्ता, ततो निवेइयं तेन रन्नो, तुट्ठेव भणियं-किं देमि ?, सो चिंतियं भणति-जं मए गहियं तं सुगहियं, जहिच्छतो भविस्सामि, एवं होउ-त्ति। एवं सो य बाहिं चेव हिंडंतो अड्डरत्ते आगच्छति वा न वा, तस्स भज्जा ताव न जेमेइ सुयति वा जाव नागतो भवति, सावि निव्विन्ना।

अन्नया मायरं सा वड्डेति-तुम्ह पुत्तो दिवसे २ अड्डरत्ते एति, अहं जग्गामि, छुहातिया अच्छामि, ताहे ताए भणइ-मा दारं देज्जाहि, अहं अज्ज जग्गामि, सो दारं मग्गति, इयरीय अंबाडितो, भणितो य-जत्थ इमाए वेलाए उग्घाडियाणि तत्थ वच्च, तस्स भवियव्वयाए तेन मग्गंतेण उग्घाडितो साहुपडिस्सतो दिट्ठो, तत्थ गतो, वंदति, भणइ-पव्वावेह मए, नेच्छंति, सयं लोओ कतो, ताहे से लिंगं दिन्नं, ते विहरिया। पुणोऽवि आगयाणं रन्ना कंबलरयणं से दिन्नं, आयरिएण-किं एएण जईणं ?, किं गहियंति भणिऊण तस्स अनापुच्छाए फालियं, निसेज्जातो कयातो, ततो स कसाइतो। अन्नया जिनकप्पिया वन्निज्जंति जहा-

'जिनकप्पिया य दुविहा पाणीपाया पडिग्गहधरा य।
पाउरणमपाउरणा एक्केक्का ते भवे दुविहा ॥

इत्यादि, सो भणइ-किं एस एवं न कीरइ ?, तेहिं भणियं-एस वोच्छिन्नो, ममं न वोच्छिज्जइत्ति सो चेव परलोगत्थिणा कायव्वो ॥ तत्रापि सर्वथा निष्परिग्रहत्वमेव श्रेयः, सूरिभिरुक्तम्-

धर्मोपकरणमेवैतत्, न तु परिग्रहस्तथा ॥
जन्तवो बहवस्सन्ति, दुर्दर्शा मांसचक्षुषाम्।
तेभ्यः स्मृतं दयार्थं तु, रजोहरणधारमण् ॥१॥
आसने शयने स्थाने, निक्षेपे ग्रहणे तथा।
गात्रसंकुचने चेष्टं, तेन पूर्वं प्रमार्जनम् ॥२॥

तथा- सन्ति सम्पातिमाः सत्त्वाः, सूक्ष्माश्च व्यापिनोऽपरे।
तेषां रक्षानिमित्तं च, विज्ञेया मुखवस्त्रिका ॥३॥

किंच- भवन्ति जन्तवो यस्मादन्नपानेषु केषुचित्।
तस्मात्तेषां परीक्षार्थं, पात्रग्रहणमिष्यते ॥४॥

अपरं च- सम्यक्त्वज्ञानशीलानि, तपश्चेतीह सिद्धये।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥५॥
शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः।
मा सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥६॥
तस्य त्वग्रहणे यत् स्यात्, क्षुद्रप्राणिविनाशनम्।
ज्ञानध्यानोपघातो वा, महान् दोषस्तदैव तु ॥७॥

यः पुनरतिसहिष्णुतयैतदन्तरेणापि न धर्मबाधकस्तस्य नैतदस्ति, तथा चाह-

"य एतान् वर्जयेद्दोषान्, धर्मोपकरणादृते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य त्वग्रहणं युक्तं, यः स्याज्जिन इव प्रभुः ॥"

स च प्रथमसंहनन एव, न चेदानीं तदस्तीत्यादिकया प्रागुक्तया च युक्त्योच्यमानोऽसौ कम्मोदयेण चीवराइयं छड्डेत्ता गतो, तस्स उत्तरा भइणी, उज्जाने ठियस्स वंदिया गया, तं च दट्ठूण तीएवि चीवरातियं सव्वं छड्डियं, ताहे भिक्खाए पविट्ठा, गणियाए दिट्ठा, मा अम्ह लोगो विरज्जिहित्ति उरे से पोत्ती बद्धा, सा नेच्छति, तेन भणियं-अच्छउ एसा तव देवयादिन्ना। तेन य दो सीसा पव्वाविया-कोडिन्नो कोट्टवीरो य, तओ सीसाण परंपरफासो जातो ॥

एतदर्थोपसंहारिके भाष्यगाथे-

भा.[१] ऊहाए पन्नत्तं बोडियसिवभूइउत्तराहि इमं।
मिच्छादंसणमिणमो रहवीरपुरे समुप्पन्नं ॥

भा.[२] बोडियसिवभूइओ बोडियलिंगस्स होइ उप्पत्ती।
कोडिन्नकोट्टवीरा परंपराफासमुप्पन्ना ॥

वृ. 'ऊहया' स्वावितर्क्कात्मिकया 'पन्नत्तं' प्ररूपितं, बोटिकश्चासौ चारित्रविकलतया मुण्डमात्रत्वेन शिवभूतिश्च बोटिकशिवभूतिः स चोत्तरा च तद्भगिनी बोटिकशिवभूत्युत्तरे ताभ्याम् 'इदम्' अनन्तरोक्तं, यत्रास्योत्पत्तिस्तदाह-मिथ्यादर्शनम् 'इणमो'त्ति आर्षत्वादिदं रथवीरपुरे समुत्पन्नम् ॥ बोटिकशिवभूतेर्बोटिकलिङ्गस्य भवत्युत्पत्तिः, पठ्यते च-'बोडियलिङ्गस्स आसि उप्पत्ती,' तत्र च कौण्डिन्यकोट्टवीरौ परम्परा-अव्यवच्छिन्नशिष्यप्रशिष्यसंतानलक्षणा तस्याः स्पर्शो यत्र तत्परम्परास्पर्शं यथा भवत्येवमुत्पन्नौ, अनेन कौण्डिन्यकोट्टवीराभ्यां बोटिकसन्तानस्योत्पत्तिरुक्ता भवतीति गाथाद्वयार्थः ॥ इयता ग्रन्थेन श्रद्धादुर्ल्लभत्वमुक्तम्, अस्याश्च सम्यक्त्वरूपत्वात् सम्यक्त्वपूर्वकत्वाच्च संयमस्य तस्याप्यनेनैव दुर्ल्लभत्वमुक्तमेवेति भावनीयं। तथा चत्वारीत्यङ्गमित्यस्य च व्याख्याने चतुरङ्गेभ्यो हितं तत्स्वरूपव्यावर्ण्णनेन चतुरङ्गीयमिति व्युत्पत्तिः सुज्ञानैवेति निर्युक्तिकृता नोपदर्शिता। गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्च-

मू.(९६) चत्तारि परमंगाणि, दुल्लहाणिह जंतूणो।
मानुसत्तं सुई सद्धा, संजमंमि य वीरियं ॥

वृ. 'चत्वारि' चतुःसङ्ख्यानि परमाणि च तानि प्रत्यासन्नोपकारित्वेन अङ्गानि च मुक्तिकारणत्वेन परमाङ्गनि 'दुर्ल्लभानि' दुःखेन लभ्यन्त इतिकृत्वा दुष्प्रापाणि 'इह' अस्मिन्संसारे, कस्य?-जायत इति जन्तुस्तस्य देहिन इत्यर्थः, पठ्यते च-'देहिन' इति, कानि पुनस्तानि?-मनसि शेते मानुषः, अथवा मनोरपत्यमिति वाक्ये "मनोर्जातावञ्यतौ षुक् च" इत्यञि प्रत्यये पुगागमे च मानुषस्तद्भावः मानुषत्वं-मनुजभावः, 'श्रवणं' श्रुतिः, सा च 'अर्थप्रकरणादिभ्यः सामान्यशब्दा अपि विशेषेऽवतिष्ठन्ते' इति न्यायाद्धर्मविषया, श्रद्धाऽपि तत एव धर्मविषया, 'संयमे' आश्रवविरमणाद्यात्मनि, चः समुच्चये भिन्नक्रमः, ततो विशेषेणेरयति-प्रवर्त्तयति आत्मानं तासु तासु क्रियास्विति वीर्य्यं च-सामर्थ्यविशेष इति सूत्रार्थः ॥

तत्र यथा मानुषत्वं दुर्ल्लभं तथा दर्शयितुमाह-

मू.(९७) समावन्नाण संसारे, नानागोत्तासु जाइसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कम्मा नानाविहा कट्टु, पुढो विस्संभिया पया ॥

वृ. 'सम्' इति समन्तात् आपन्नाः-प्राप्ताः समापन्ना णं इति वाक्यालङ्कारे, क्वेत्याह-संसारे, तत्रापि क्व?-नाना इत्यनेकार्थः, गोत्रशब्दश्च नामपर्यायः, ततो नानागोत्रासु-अनेकाभिधानासु जायन्ते जन्तव आस्विति जातयः-क्षत्रियाद्याः तासु, अथवा जननानि जातयः ततो जातिषु-क्षत्रियादिजन्मसु नाना-हीनमध्यमोत्तमभेदेनानेकं गोत्रं यासु तास्तथा तासु, अत्र हेतुमाह-क्रियन्त इति कर्माणि-ज्ञानावरणीयादीनि 'नानाविधानि' अनेकप्रकाराणि 'कृत्वा' निर्वर्त्य 'पुढो'त्ति पृथग् भेदेन, किमुक्तं भवति?-एकैकशः, 'विस्संभिय'त्ति विन्दोरलाक्षणिकत्वाद् विश्वं-जगद् बिभ्रति-पूरयन्ति क्वचित्कदादिदुत्पत्त्या सर्वजगद्व्यापनेन विश्वभृतः, उक्तं च-

"नत्थि किर सो पएसो लोए वालग्गकोडिमित्तोऽपि ।
जम्मणमरणाबाहा जत्थ जिएहि न संपत्ता ॥"

इदमुक्तं भवति-अवाप्यापि मानुषत्वं स्वकृतविचित्रकर्मानुभावतः पृथग्जातिभागिन्य एव भवन्ति, काः-'प्रजाः' जनसमूहरूपाः, तदनेन प्राप्तमानुषत्वानामपि कर्मवशाद्विविधगति-गमनं मनुषत्वदुर्ल्लभत्वे हेतुरुक्तः, यद्वा संसारे कर्माणि नानाविधानि कृत्वा पृथगिति भिन्नासु नानागोत्रासु-अनेककुलदोयुट्पलक्षितासु जातिषु-देवाद्युत्पत्तिरूपासु समापन्नाः-सम्प्राप्ता वर्त्तन्त इति गम्यते, नेति प्राग्वत्, 'विश्रम्भिताः' सञ्जानविश्रम्भाः सत्यः प्रक्रमात्कर्म्मस्वेव तद्विपाकदारुणत्वापरिज्ञानात् काः?, प्रजायन्ते इति प्रजाः-प्राणिन इति सम्बन्धः, तदनेन प्राणिनां विविधदेवादिभवभवनं मूलत एव मनुजत्वदुर्ल्लभत्वे कारणमुक्तामिति सूत्रार्थः ॥

मू. (९८) *एगया देवलोएसु, नरएसुऽवि एगया ।*
एगया आसुरे काये, आहाकम्मेहिं गच्छइ ॥

वृ. 'एकदा' इत्येकस्मिन् शुभकर्मानुभवकाले दीव्यन्तीति देवाः तेषां लोकाः-उत्पत्ति-स्थानानि देवगत्यादिपुण्यप्रकृत्युदयविषयतथा लोक्यन्त इतिकृत्वा तेषु देवलोकेषु, नरान् कायन्ति-योग्यतयाऽऽह्वयन्तीति नरकाः तेषु रत्नप्रभादिषु नारकोत्पत्तिस्थानेषु, अपिशब्दस्य चार्थत्वात्तेषु च, 'एकदा' अशुभानुभवकाले, तथा 'एकदा' तथाविधभावनाभावितान्तः-करणावसरे, असुराणामयमासुरस्तम्-असुरसम्बन्धिनं, चीयत इति कायस्तं, निकायमित्यर्थः, बालतपः प्रभृतिभिरपि तत्प्राप्तिरिति दर्शनार्थं देवलोकोपादानेऽपि पुनरासुरकायग्रहणम्, अथवा देवलोकशब्दस्य सौधर्मादिषु रूढत्वात्तदुपादानमुपरितनदेवोपलक्षणम्, इदं चाधस्तनदेवोप-लक्षणमिति न पौनरुक्त्यम्, 'आहाकम्मेहि'ति आधानम्-आधाकरणमित्यर्थः, तदुपलक्षितानि कर्माण्याधाकर्माणि तैः, किमुक्तं?-स्वयंविहितैरेव सरागसंयममहारम्भासुरभावना-दिभिर्देवनारकासुरगतिहेतुभिः क्रियाविशेषैः यथाकर्मभिर्वा-तत्तद्गुत्यनुरूपचेष्टितैः 'गच्छति' याति, इति सूत्रार्थः ॥ तथा-

मू. (९९) *एगया खत्तिओ होइ, तओ चंडालबुक्कसो ।*
तओ कीडपयंगो य, तओ कुंथू पिवीलिया ॥

वृ. 'एकदे'ति मनुष्यजन्मानुरूपकर्म्मप्रकृत्युदयकाले 'खत्तिय'त्ति 'क्षण हिंसायां' क्षणनानि क्षतानि तेभ्यस्त्रायत इति क्षत्रियो-राजा भवति, 'तत' इति तदनन्तरं तको वा प्राणी 'चण्डालः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीतः, यदि वा शुद्रेण ब्राह्मण्यां जातश्चण्डालः, 'बोक्कसो' वर्णान्तरभेदः, तथा च वृद्धाः- "बंभनेन सुद्दीओ जातो निसाउत्ति वुच्चति, बंभनेन वेसीए जातो अंबट्ठोत्ति वुच्चति, तत्थ निसाएणं जो अंबट्ठीतो जातो सो बुक्कसो भन्नति" इह च क्षत्रियग्रहणादुत्तमजातयः चण्डाल-ग्रहणान्नीचजातयो बुक्कसग्रहणाच्च सङ्कीर्णजातय उपलक्षिताः, 'ततो' मानुषत्वादुद्धृत्येति शेषः, 'कीटः' प्रतीतः 'पतङ्गः' शलभः, चः समुच्चये, ततस्तको वा 'कुन्थू पिपीलिक'त्ति, चशब्दस्य लुप्तनिर्द्दिष्टत्वात् कन्थुः पिपीलिका च, भवतीति सर्वत्र सम्बध्यते, शेषतिर्यग्भेदोपलक्षणं चैतदिति सूत्रार्थः ॥ किमित्थं पर्यटन्तस्ते निर्विद्यन्ते न वेत्याह-

मू. (१००) *एवमावट्टजोणीसु, पानिनो कम्मकिव्विसा।*
न निव्विज्जंति संसारे, सव्वट्ठेसु व खत्तिया ॥

मू. (१०१) *कम्मसंगेहि संमूढा, दुक्खिया बहुवेयणा।*
अमानुसासु जोणीसु, विनिहम्मंति पाणिणो ॥

वृ. 'एवम्' अमुनोक्तन्यायेन आवर्त्तनम् आवर्त्तः-परिवर्त्त इति योऽर्थो, युवन्ति-मिश्रीभवन्ति कार्मणशरीरिण औदारिकादिशरीरैरासु जन्तवो जुषन्ते सेवन्ते ता इति वा योनयः, आवर्त्तोपलक्षिता योनयः आवर्त्तयोनयः तासु, 'प्राणिनः' जन्तवः, **कर्म्मणा-उक्तरूपेण किल्बिषाः-** अधमाः कर्म्मकिल्बिषाः, प्राकृतत्वाद्वा पूर्वापरनिपातः **किल्बिषाणि-क्लिष्टतया** निकृष्टान्य-शुभानुबन्धीनि कर्म्माणि येषां ते किल्बिषकर्म्माणः, **'न निर्विद्यन्ते' कदैतद्विमुक्तिरिति** नोद्विजन्ते, क्व या आवर्त्तयोनयः ? इत्याह-'संसारे' **भवे, केष्विव के न** निर्विद्यन्ते ? इत्याह-सर्वे च ते अर्थ्यन्त इत्यार्थाश्च-मनोज्ञशब्दादयो धनकनकादयो वा सर्वार्थास्तेष्विव 'क्षत्रियाः' राजानः, किमुक्तं भवति ?-यथा मनोज्ञान् शब्दादीन् भुञ्जानानां तेषां तर्षोऽभिवर्धते, एवं तासु तासु योनिषु पुनः पुनरुत्पत्त्यां सत्यां कलंकलीभावमनुभवतामपि भवाभिनन्दिना प्राणिनामिति, कथमन्यथा न तत्प्रतिघातार्थमुद्यच्छयुरिति भावः ।

पाठान्तरं वा-'सव्वट्ठ इव खत्तिय'त्ति इवो भिन्नक्रमः, ततः सर्वैः शयनादिभिरर्थः-प्रयोजनमस्येति सर्वार्थः क्षत्रियः, स चार्थाद्भष्टराज्यः तद्वत्, ततो यथाऽसौ न निर्विद्यते, अर्थात्सर्वार्थान् प्रार्थयमानः, तथैतेऽपि प्राणिनः सुखान्यभिलषन्तोऽनिर्विद्यमानश्च, कर्म्मभिः-ज्ञानावरणीयादिभिः, सङ्गाः-सम्बन्धाः कर्मसङ्गास्तैः, यद्वा कर्माणि-उक्तरूपाणि तत्तत्क्रियाविशेषात्मकानि वा, तथा सज्यन्तेऽमीषु जन्तव इति सङ्गाः-शब्दादयोऽभिष्वङ्गविषयाः, ततश्च कर्माणि च सङ्गाश्च कर्म्मसङ्गाः तैः सम् इति भृशं मूढाः-वैचित्त्यमुपागताः सम्मूढाः, 'दुःखम्' असातात्मकं जातमेषामिति दुखिताः, कदाचित्तन्मानसमेव स्यादत आह-'बहुवेदनाः' वह्वयो वेदनाः-शरीरव्यथा येषां ते तथा, मनुष्याणामिमामानुष्या न तथाऽमानुष्याः, तासु-नरकतिर्यगाभियोग्यादिदेवदुर्गतिसम्बन्धिनीषु 'योनिषु' अभिहितरूपासु 'विनिहन्यन्ते' विशेषेण निपात्यन्ते, अर्थात्कर्म्मभिः, कोऽर्थः ?-न तत उत्तारं लभन्ते 'प्राणिनः' जन्तवः, तदनेन सत्यप्यावर्त्ते निर्वेदाभावात् कर्म्मसंङ्गसंमूढाः दुःखहेतुनरकादिगत्यनुत्तरणेन प्राणिनो मनुजत्वं न लभन्त इत्युक्तमिति सूत्रद्वयार्थः ॥ कथं तर्हि तदवाप्तिः ? इत्याह-

मू. (१०२) *कम्माणं तु पहाणाए, आनुपुव्वी कयाइ उ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवा सोहिमनुप्पत्ता, आययंति मनुस्सयं ॥

वृ. 'कर्मणां' मनुजगतिविबन्धकानाम् 'तुः' पूर्वस्माद्विशेषद्योतकः 'पहाणाए'त्ति प्रकृष्टं हानम्-अपगमः प्रहाणं तस्यापो-लाभः प्रहाणायः तस्मिन्, यद्वा सूत्रत्वात् प्रहाणौ प्रहान्या वा तद्विबन्धकानन्तानुबन्ध्यादिकर्मसु प्रहीणेषु, कृतश्चिदीश्वरानुग्रहादेस्तदप्राप्तेः, अन्यथा हि तद्वैफल्यापत्तिः, एतेन-'अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयो। ईश्वरप्रेरितो गच्छेत्, श्वभ्रं वा स्वर्गमेव वा ॥' इत्यपास्तं भवति, अथ कथं पुनस्तेषां प्रहाणिरित्याह-'आनुपूर्व्या' क्रमेण न तु झगित्येव, तयापि 'कयाइ उ'त्ति तुशब्दस्यैवकारार्थत्वात्कदाचिदेव न सर्वदा, 'जीवाः' प्राणिनः 'शुद्धीम्' क्लिष्टकर्म्मविगमात्मिकाम् अनु-तद्विघातिकर्मापगमस्य पश्चात्प्राप्ताः 'आद-दते' स्वीकुर्वन्ति मनुष्यतां, पाठान्तरतश्च 'जायन्ते मणुस्सयं (सत्तयं)'ति सुबव्यत्ययान्मनुष्य-तायां, तदैव तन्निर्वर्त्तकमनुजगत्यादिकर्मोदयादिति भावः, अनेन मनुजत्वविबन्धककर्मापगमस्य तथाविधकालादिसव्यपेक्षत्वेन दुरापतया मनुष्त्वदुर्ल्लभत्वमुक्तमिति सूत्रार्थः ॥

कदाचिदेत-दवाप्तौ श्रुतिः सुलभैव स्यादत आह-

मू. (१०३) मानुस्सं विग्गहं लद्धुं, सुती दुल्लहा।
जं सोच्चा पडिवज्जंति, तवं खंतिमहिंसयं ॥

वृ. 'मानुस्सं'ति सूत्रत्वान्मानुष्यकं मनुष्यसम्बन्धिनं विशेषेण गृह्यते आत्मना कर्म्मपरत-न्त्रेणेति विग्रहस्तं मनुजगत्याद्युपलक्षितमौदारिकशरीरं 'लद्धुं'ति अपेर्गम्यमानत्वात् लब्ध्वापि, 'श्रुतिः' आकर्ण्णनं, कस्य ?-धारयति दुर्गतौ निपततो जीवानिति धर्म्मः, तथा च वाचकः-

"प्राग्लोकबिन्दुसारे सर्वाक्षरसन्निपातपरिपठितः ।
धृञ् धरणाऽर्थो धातुस्तदर्थयोगाद्भवति धर्म्मः ॥"
दुर्गतिभयप्रपाते पतन्तमभयकरदुर्ल्लभत्राणे ।
सम्यक् चरितो यस्माद्धारयति ततः स्मृतो धर्मः ॥२॥

तस्य-एवमन्वर्थनाम्नो धर्मस्य 'दुर्ल्लभा' दुरापा प्रागुत्कालस्यादिहेतुतः, स च-

मृद्वी शय्या प्रातरुत्थया पेया, भक्तं मध्ये पानकं चापराह्णे।
द्राक्षाखण्डं शर्क्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥"

इत्यादिसुगतादिकल्पितोऽपि स्याद् अतस्तपोहायाह-यं धर्म्मं श्रुत्वा 'प्रतिपद्यन्ते' अङ्गी-कुर्वन्ति 'तपः' अनशनादि द्वादशविधम् 'क्षान्ति' क्रोधजयलक्षणां मानादिजयोपलक्षणं चैषा, 'अहिंसयन्ति' अहिंस्रताम्-अहिंसनशीलताम्, अनेन च प्रथमव्रतमुक्तम्, एतच्च शेषव्रतोप-लक्षणम्, एतत्प्रधानात्वात्तेषाम्, एतद्वृत्तितुल्यानि हि शेषव्रतानि, एवं च तपसः क्षान्त्यादि-चतुष्कस्य महाव्रतपञ्चकस्य चाभिधानाद्दशविधस्यापि यतिधर्म्मस्याभिधानम्, इह च यद्यपि श्रुतेः शाब्दं प्राधान्यं तथापि तत्त्वतो धर्म एव प्रधानं, तस्या अपि तदर्थत्वादिति, स एव यच्छब्देन परामृश्यते, अथवा काक्वा नीयते-'यद्' यस्मात् श्रुत्वा प्रतिपद्यन्ते तपःप्रभृति नाश्रुत्वा 'सुच्चा' जाणति कल्लाणं, सोच्चा जाणति पावगं' इत्याद्यागमात्, तत एवमतिमहार्थतया दुरायेयमिति सूत्रार्थः ॥ श्रुत्यवाप्तावपि श्रद्धादुर्ल्लभतामाह-

मू. (१०४) आहच्च सवणं लद्धुं, सद्धा परमदुल्लहा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोच्चा नेयाउयं मग्गं, बहवे परिभस्सइ ॥

वृ. 'आहच्च' इति कदाचित्त 'श्रवणम्' प्रक्रमाद्धर्माकर्ण्णनम्, उपलक्षणत्वान्मनुष्यत्वं च लब्ध्वेति, अपि शब्दस्य गम्यमानत्वात् लब्ध्वापि-अवाप्यापि 'श्रद्धा' रुचिरूपा प्रक्रमाद्धर्म्मविषयैव 'परमदुर्ल्लभा' अतिशयदुरापा, कुतः पुनः परमदुर्ल्लभत्वमस्या इत्याह- 'श्रुत्वा' आकर्ण्य न्यायेन चरति-प्रवर्त्तते नैयायिकः, न्यायोपन्न इत्यर्थः, तं 'मार्गम्' सम्यग्दर्शनाद्यात्मकं मुक्तिपथं बहवः नैक एव, परि इति सर्वप्रकारं 'भस्सइ' त्ति भ्रश्यन्ति-च्यवन्ते प्रक्रमान्नैयायिकमार्गादेव, यथा जमालिप्रभृतयो, यच्च प्राप्तमप्ययैति तच्चिन्तामणिवत् परमदुर्ल्लभमेवेति भावः। इहैव केचिन्निह्नववक्तव्यतां व्याख्यातवन्तः, उचितं चैतदप्यास्त(प्यस्ति) इति सूत्रार्थः ॥

एतत्त्रयावाप्तावपि संयमवीर्यदुर्ल्लभत्वमाह-

मू. (१०५) *सुइं च लद्धुं च, वीरियं पुन दुल्लहं।*
बहवे रोयमाणाऽवि, नो य णं पडिवज्जइ ॥

वृ. श्रुतिं चशब्दान्मनुष्यत्वं च 'लद्धुं' ति प्राग्वल्लब्ध्वापि, श्रद्धां च वीर्यं प्रक्रवात् संयमविषयं, पुनःशब्दस्य विशेषकत्वाद्विशेषेण दुर्ल्लभं, यतः बहवः नैक एव रोचमाना अपि-न केवलं प्राप्तमनुष्यत्वाः शृण्वन्तो वेत्यपिशब्दार्थः, श्रद्दधाना अपि, नो चेति चशब्दस्यैवकारार्थत्वान्नैव 'ण'मिति वाक्यालङ्कारे अथवा 'णो य ण' न्ति सूत्रत्वान्नो एतं 'पडिवज्जति' त्ति तत एव प्रतिपद्यन्ते चारित्रमोहनीयकर्म्मोदयतः, सत्यकिश्रेणिकादिवन्न कर्तुमभ्युपगच्छन्तीति सूत्रार्थः ॥

मू. (१०६) *मानुसत्तंमि आयाओ, जो धम्मं सोच्च सद्दहे।*
तवस्सी वीरियं लद्धुं, सुंवडो निद्धुणे रयं ॥

वृ. 'मानुषत्वे' मनुजत्वे 'आयातः' आगतः, विमुक्तं भवति ?-मानुषत्वं प्राप्तो, य इत्यनिर्दिष्टस्वरूपो य एव कश्चिद्धर्म्मं श्रुत्वा 'सद्दहे' त्ति श्रद्धत्ते-रोचयते 'तपस्वी' निदानादिविरहितया प्रशस्यतपोऽन्वितः, कथं ?- 'वीर्यं' संयमोद्योगं लब्ध्या 'संवृत्तः' स्थगितसमस्ताश्रवः, स किमित्याह- 'निद्धुणे' त्ति निर्धुनोति-नितरामपनयति रज्यते अनेन स्वच्छस्फटिकवच्छुद्धस्वभावोऽप्यात्माऽन्यथात्वमापाद्यत इति रजः-कर्म्म बध्यमानकं बद्धं च, तदपनयनाच्च मुक्तिं प्राप्नोतीति भावः, उभयत्र लिप्स्यमानसिद्धौ चे ति लट्, इह च श्रद्धानेन सम्यक्त्वमुक्तं, तेन च ज्ञानमाक्षिप्तं, प्रदीपप्रकाशयोरिव युगपदुत्पादात्तत्तयोः, तथा च 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति न विरुध्यत इति सूत्रार्थः ॥

इत्थमामुष्मिकं मुक्तिफलमुक्तम्, इदानीमिहैव फलमाह-

मू. (१०७) *सोही उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठति।*
निव्वाणं परमं जाइ, घयसित्तेव पावए ॥

वृ. 'शुद्धिः' कषायकालुष्यापगमो, भवतीति गम्यते, 'ऋजुभूतस्य' चतुरङ्गप्राप्त्या मुक्तिं प्रति प्रगुणीभूतस्य, तथा च 'धर्म्मः' क्षान्त्यादिः 'शुद्धस्य' शुद्धिप्राप्तस्य 'तिष्ठति' अविचलिततयाऽऽस्ते इति, अशुद्धस्य तु कदाचित्कषायोदयात्तद्विचलनमपि स्यादित्याशयः, तदवस्थितौ च 'निर्वाणं' निर्वृतिर्निर्वाणं स्वास्थ्यमित्यर्थः 'परमं' प्रकृष्टम् 'एगमासपरियाए समणे वंतरियाणं तेयल्लेसं वीईवयति' इत्याद्यागमेनोक्तं 'नैवास्ति राजराजस्य तत्सुख' मित्यादिना च वाचक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वचनेनानूदितं 'याति' प्राप्नोति, क इव ?–'घयसित्तेव'त्ति इवस्य भिन्नक्रमत्वात् घृतेन सिक्तो घृतसिक्तः पुनातीति पावकः–अग्निः, लोंकप्रसिद्धया, समयप्रसिद्धया तु पापहेतुत्वात्पापकः तद्वत्, स च न तथा तृणादिभिर्दीप्यते यथा घृतेनेत्यस्य घृतसिक्तस्य निर्वृतिरनुगीयते, ततो विशेषेणास्य दृष्टान्तत्वेनाभिधानमिति भावनीयं, यद्वानिर्वाणमिति जीवन्मुक्तिं याति–

"निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम्।
विनिवृत्तपराशानामीहैव मोक्षः सुविहितानाम्॥"

इति वचनात्, कथंभूतः सन् ?–घृतसिक्तपावक इव–तपस्तेजसा ज्वलितत्वेन घृततर्प्पिताग्निसमान इति सूत्रार्थः॥ पठन्ति च नागार्ज्जुनीयाः–

"चउद्धा संपयं लद्धुं, इहेव ताव भायते।
तेयते तेजसंपन्ने, घयसित्तेव पावए॥ त्ति"

तत्र चतुर्धा–चतुष्प्रकारां, संपदां–सम्पत्तिं प्रक्रमान्मनुष्यत्वादिविषयां लब्ध्वा इहैव लोके तावद्, आस्तां परत्र, 'भ्राजते' ज्ञानश्रिया शोभते, 'तेजते' दीप्यते तेजसा–अर्थात्तपोजनितेन सम्पन्नो–युक्तस्तेजःसम्पन्नः, शेषं प्राग्वदिति। इत्थमामुष्मिकमैहिकं च फलमुपदर्श्याह–

मू. (१०८) *विगिंच कम्मुणो हेउं, जसं संचिणु खंतिए।*
पाढवं सरीरं हिच्चा, उड्ढं पक्कमती दिसं॥

वृ. 'विगिञ्च'त्ति वेविग्धि पृथक् कुरु 'कर्म्मणः' प्रस्तावान्मानुषत्वादिविबन्धकस्य 'हेतुम्' उपादानकारणं–मिथ्यात्वाविरत्यादिकं, तथा यशोहेतुत्वाद्यशः–संयमो विनयो वा, यदुक्तम्–

"एवं धम्मस्स विनओ, मूलं परमो से मोक्खो।
जेन किर्त्तिं सुयं सिग्घं, नीस्सेसं चाभिगच्छइ॥"

इति, तत् 'सञ्चिणु' भृशमुपचितं कुरु, कया ?–क्षान्त्या, उपलक्षणत्वान्मार्दवादिभिश्च, ततः किं स्यादित्याह–'पाढवं'ति पार्थिमिव पार्थिवं शीतोष्णादिपरिषहसहिष्णुतया समदुःखसुखतया च पृथिव्यामिव भवं, पृथिवी हि सर्वंसहा, कारणानुरूपं च कार्यमिति भावो, यदि वा पृथिव्या विकारः पार्थिवः, स चैह शैलः, ततश्च शैलेशीप्राप्त्यपेक्षयाऽतिनिश्चलतया शैलोपमत्वान्परप्रसिद्धया वा पार्थिवं 'शरीरं' तनुं 'हित्वा' त्यक्त्वा ऊर्ध्वं दिशमिति सम्बन्धः, 'प्रक्रामति' प्रकर्षेण गच्छति येन भवानिति उपस्कारो, यद्वा सोपस्कारत्वात् सूत्राणामेवं नीयते–यत एवं कुर्व्वन् भव्यजन्तूरूर्ध्वं दिशं प्रक्रामति ततस्त्वमतिदृढचेता इत्थमित्थं च कुर्वित्युपदिश्यते, प्रक्रामतीति वर्त्तमानसामीप्ये वर्त्तमाननिर्देश आसन्नफलावाप्तिसूचक इति सूत्रार्थः॥ इत्थं येषां तद्भव एव मुक्त्यवाप्तिस्तान् प्रत्युक्तं, येषां तु न तथा तान्प्रत्याह–

मू. (१०९) *विसालिसेहिं सीलेहिं, जक्खा उत्तर उत्तरा।*
महासुक्का व दिप्पंता, मन्नंता अपुणोच्चयं॥

मू. (११०) *अप्पिया देवकामाणं, कामरूवविउव्विणो।*
उड्ढं कप्पेसु चिट्ठंति, पुव्वा वाससया बहू॥

वृ. 'विसालिसेहिं'ति मागधदेशीयभाषया विसदृशैः–स्वस्वचारित्रमोहनीयकर्म्मक्षयोपशमापेक्षया विभिन्नैः 'शीलैः' व्रतपालनात्मकैरनुष्ठानविशेषैः, किम् ?–इज्यन्ते पूज्यन्त इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यक्षाः, यान्ति वा तथाविधर्द्धिसमुदयेऽपि क्षयमिति यक्षाः, ऊर्ध्वं कल्पेषु तिष्ठन्तीति उत्तरेण सम्बन्धः, 'उत्तरोत्तराः' उत्तरोत्तरविमानवासिनः उत्तरो वा उपरितनस्थानवर्त्त्युत्तरः-प्रधानो येषु तेऽमी उत्तरोत्तरः 'महाशुक्ला' अतिशयोज्ज्वलतया चन्द्रादित्यादयः, त इव 'दीप्यमानाः' प्रकाशमानाः, अनेन शरीरसम्पदुक्ता, सुखसम्पदमाह-'मन्यमाना' मनसि अवधारयन्तः शब्दादिविषयावाप्तिसमुत्पन्नरतिसागरावगाढतयाऽतिदीर्घस्थितितया वा, किम्?-न पुनश्चवनम् अपुनश्चयवस्तम्-अधस्तिर्यगादिषूत्पत्त्यभावं, यदुक्तं 'मन्यमाना अपुनश्चयव'मिति, तत्रोक्तमेव हेतुं सूत्रकृदाह-'अप्पिया' इत्यादिना, 'अर्प्पिताः' प्राक्कृतसुकृतेन ढौकिता इव, केषाम्?-काम्यन्ते-अभिलष्यन्ते इति कामा देवानां कामा देवकामाः-दिव्याङ्गनाङ्गस्पर्शादयः, 'कामरूवविउव्विणो'त्ति सूत्रत्वात्कामरूपविकरणा-यथेष्टरूपाभिनिर्वर्त्तनशक्तिसमन्विताः, कुर्व्वन्ति हि ते उत्तरवैक्रियाणि समवसरणागमनादिषु तथा तथेति, येऽपि प्रयोजनाभावान्न कुर्व्वन्ति तेषामपि शक्तिरस्त्येवेत्येवमुच्यते, 'ऊर्ध्वं' कल्पोपरिवर्त्तिषु ग्रैवेयकेष्वनुत्तरविमानकेषु च कल्पेषु सौधर्म्मादिषु यदि वा-ऊर्ध्वम्-उपरि कल्प्यन्ते विशिष्टपुण्यभाजामवस्थितिविषयतयेति सौधर्म्मादया ग्रैवेयकादयश्च सर्वेऽपि कल्पा एव तेषु 'तिष्ठन्ति' आयुःस्थितिमनुपालयन्ति पूर्वाणि-वर्षसप्ततिकोटिलक्षषट्पञ्चाशत्कोटिसहस्रपरिमितानि बहूनि, जघन्यतोऽपि पल्योपमस्थितित्वात्, तत्रापि च तेषामसङ्ख्येयानामेव सम्भवात्, एवं वर्षशतात्यपि बहूनि, पूर्ववर्षशतायुषामेव चरणयोग्यत्वेन विशेषतो देशनौचित्यमिति ख्यापनार्थमित्थमुपन्यास इति सूत्रार्थः ।। तत्किमेषामेतावदेव फलमित्याशङ्क्याह-

मू. (१११) *तत्थ ठिच्चा जहाठाणं, जक्खा आउक्खए चुया ।*
उवेंति मानुसं जोणिं, से दसंगेऽभिजायाह ।।

वृ. 'तत्र' तेषूक्तरूपोत्पत्तिस्थानेषु 'स्थित्वा' इत्यासित्वा 'यथास्थानम्' इति यद्यस्य स्वानुष्ठानानुरूपं यदिन्द्रादिपदं तस्मिन् यक्षाः 'आयुःक्षये' स्वजीवितावसाने 'च्युताः' भ्रष्टाः 'उवेन्ति'त्ति उपयन्ति मनुषाणामियं मानुषी तां 'योनिम्' उत्पत्तिस्थानं, तत्र च 'से' इति स सावशेषकुशलकर्मा कश्चिज्जन्तुः दशाङ्गानि भोगोपकरणानि वक्ष्यमाणान्यस्येति दशाङ्गः अभिजायते, एकवचननिर्देशस्तु विसदृशशीलतया कश्चिद्दशाङ्गः कश्चिन्नवाङ्गादि रपि जायत इति वैचित्र्यसूचनार्थः, यद्वा 'से' इति सूत्रत्वात् तेषां दशानामङ्गानां समाहारो दशाङ्गी, प्राकृतत्वाच्च पुंसा निर्द्देशः, 'अभिजायते' उपभोग्यतयाऽऽभिमुख्येनोत्पद्यत इति सूत्रार्थः ।।

मू. (११२) *खित्तं वत्थु हिरन्नं च, पसवो दासपोरुसं ।*
चत्तारि कामखंधाणि, तत्थ से उववज्जइ ।।

मू. (११३) *मित्तवं नाइवं होइ, उच्चागोत्ते य वन्नवं ।*
अप्पायंके महापन्ने, अभिजाय जसो बले ।।

वृ. 'क्षि निवासगत्योः' क्षियन्ति निवसन्त्यस्मिन्निति क्षेत्रं-ग्रामारामादि सेतुकेतूभयात्मकं वा, तथा वसन्त्यस्मिन्निति वास्तु-खातोच्छ्रितोभयात्मकं 'हिरण्यं' सुवर्ण्णम्, उपलक्षणत्वात् रूप्यादि च, 'पशवः' अश्वादयः, दास्यते-दीयते एभ्य इति दासाः-पोष्यवर्गरूपास्ते च पोरुसंति-सूत्रत्वात्पौरुषेयं च-पदातिसमूहः दासपौरुषेयं, 'चत्वारः' चतुःसङ्ख्याः, अत्र हि क्षेत्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वास्त्विति चैको हिरण्यमिति द्वितीयः पशव इति तृतीयो दासपौरुषेयमिति चतुर्थः, एते किमित्याह-काम्यत्वात् कामाः-मनोज्ञशब्दादयः, तद्धेतवः स्कन्धाःपुद्गलसमूहाः ततः कामस्कन्धाः, यत्र भवन्तीति गम्यते, प्राकृतत्वाच्च नपुंसकनिर्देशः, 'तत्र' तेषु कुलेषु 'से' इति स 'उपपद्यते' जायते। अनेन चैकमङ्गमुक्तं, शेषाणि तु नवाङ्गन्याह-मित्राणि-सहपांशुक्रीडितादीनि सन्त्यस्येति मित्रवान्, ज्ञातयः-स्वजनाः सन्त्यस्येति ज्ञातिमान् भवति, उच्चैः-लक्ष्म्यादिक्षयेऽपि पूज्यतया गोत्रं-कुलमस्येत्युच्चैर्गोत्रः, चः समुच्चये, वर्ण्णः-श्यामादि, स्निग्धत्वादिगुणैः प्रशस्योऽस्येति वर्ण्णवान्, 'अल्पातंकः' आतङ्कविरहितो नीरोग इत्यर्थः, महती प्रज्ञाऽस्येति महाप्रज्ञः-पण्डितः, 'अभिजातः' विनीतः, स हि सर्वजनाभिगमनीयो भवति, दुर्विनीतस्तु शेषगुणा-न्वितोऽपि न तथेति, अत एव च 'जसो'त्ति यशस्वी, तथा च सति 'बले'त्ति बली कार्यकारणं प्रति सामर्थ्यवान्, उभयत्र सूत्रत्वान्मत्वर्थीयलोपः, एकैकोऽपि हि मित्रत्वादि-गुणस्तत्त-त्कार्याभिनिर्वर्त्तनक्षमः, किं पुनरमी समुदिताः ?, शरीरसामर्थ्याच्चेह बलीति ॥ तत्किमेवंविध-गुणसम्पत्समन्वितं मानुषत्वमेव तत्फलमित्याह-

मू. (११४) *भोच्चा मानुस्सए भोए, अप्पडिरूवे अहाउयं।*
पुव्विं विसुद्धसद्धम्मे, केवलं बोहि बुज्झिया ॥

वृ. 'भुक्त्या' आसेव्य 'मानुष्यकान्' मनुष्यसम्बन्धिनः भुज्यन्त इति भोगाः-मनोज्ञशब्दा-दयस्तान्, अविद्यमानं प्रतिरूपमतिप्रकर्षवत्त्वेनानन्यतुल्यमेषामित्यप्रतिरूपाः तान्, 'यथायुः' आयुषोऽनतिक्रमेण पूर्वं-पूर्वजन्मविशुद्धो निदानादिरहितत्वेन 'सद्धर्म्मः(र्मा)' शोभनो धर्मोऽ-स्येति विशुद्धसद्धर्मा, केवलत्वाच्च 'धर्मादनिच् केवला'दिति इत्यनिच् भवति, 'केवलाम्' अलकङ्कां 'बोधिं' जिनप्रणीतधर्म्मप्राप्तिलक्षणां 'बुध्ध्वा' अनुभूय प्राप्येतियावत् ॥ ततोऽपि किमित्याह-

मू. (११५) *चउरंगं दुल्लभं मच्चा, संजमं पडिवज्जिया।*
तवसा धुतकम्मंसे, सिद्धे भवति सासए ॥

वृ. चतुर्णामङ्गानां समाहारश्चतुरङ्गी तामभिहितस्वरूपां 'दुर्ल्लभा' दुष्प्रापां 'मत्वा' ज्ञात्वा 'संयमं' सर्वसावद्ययोगविरतिरूपं 'प्रतिपद्य' आसेव्य, 'तपसा' बाह्येनान्तरेण च धुतम्-अपनीतं, कम्मंसित्ति-कार्म्मग्रन्थिकपरिभाषा सत्कर्म्मानिनेति धुतकर्मांशः, तदपनयनाच्च बन्धादी-नामप्यर्थतोऽपनयनमुक्तमेव, यद्वा धुताः कर्म्मणोऽंशा-भागा येन स तथाविधः, किमित्याह-सिद्धो भवति, स च किमाजीविकमतपरिकल्पितसिद्धवत् पुनरिहैति उत नेत्यत आह-'शाश्वतः' शश्वद्भवनात्, शश्वद्भवनं च पुनर्भवनिबन्धनकर्म्मबीजात्यन्तिकोच्छेदात्, तथा चाह-

"दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नांकुरः।
कर्म्मबीजे तथा दग्धे, न रोहति भवांकुरः ॥"

इति, इह पुनस्तस्येहागमनकल्पनमतिमोहविलसितं, तथा च स्तुतिकृत्-"दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठः। मुक्तः स्वयंकृतभवश्च परार्थशूरस्त्वच्छा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सनप्रतिहतेष्विह मोहराज्यम् ॥" इति सूत्रार्थः ॥ इतिः परिसमाप्तौ, ब्रवीमि प्राग्वदिति ॥

उक्तोऽ-नुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव।

अध्ययनं-३ समाप्तम्

मुनि दीपरत्नसागरेण संशोधीता सम्पादिता उत्तराध्ययनसूत्रे तृतीयअध्ययनस्य भद्रबाहुस्वामिरचिता निर्युक्तिः एवं शान्त्याचार्य रचिता टीका परिसमाप्ता।

अध्ययनं - ४ असंस्कृतं

वृ. ॥ॐ नमः ॥ उक्तं तृतीयमध्ययनम्, अधुना चतुर्थावसरः, तस्य चायमभिसम्बन्धः, इहानन्तराध्ययने चत्वारि मनुष्यत्वादीन्यङ्गानि दुर्लभान्युक्तानि, इह तु तत्प्राप्तावपि महते दोषाय प्रमादो महते च गुणायाप्रमाद इति मन्यमानः प्रमादाप्रमादौ हेयोपादेयतयाऽऽह। इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि प्राग्वद् व्यावर्णनीयानि तावद् यावन्नाम-निष्पन्ने निक्षेपे प्रमादाप्रमादमिति नाम, ततश्च प्रमाद इत्यप्रमाद इति च निक्षेप्तव्यमित्युभय-निक्षेपप्रतिपादविषयाऽऽह निर्युक्तिकृत्-

नि.[१७९] नामंठवणपमाओ दव्वे भावे य होइ नायव्वो।
एवेम अप्पमाओ चउव्विहो होइ नायव्वो ॥

वृ. 'नामंठवणपमाए'त्ति, प्रमादशब्द उभयत्र सम्बध्यते, ततश्च नामप्रमादः स्थापनाप्रमादः, 'दव्वे'इति द्रव्यप्रमादः 'भावे य त्ति' भावप्रमादश्च भवति ज्ञातव्यः, 'एवमेवे'त्ति नामस्थापना-द्रव्यभावभेदत एव अप्रमादश्चतुर्विधो भवति ज्ञातव्य इति गाथार्थः ॥

इह च नामस्थापने प्रतीते इत्यनादृत्य द्रव्यभावप्रमादावभिधित्सुराह-

नि.[१८०] मज्जं विसय कसाया निद्दा विगहा य पंचमी भणिया।
इअ पंचविहो एसो होइ पमाओ य अपमाओ ॥

वृ. माद्यन्ति येन तत् मद्यं, यद्वशाद्गम्यागम्यवाच्यावाच्यादिविभागं जनो न जानाति, अत एवाह-"कार्याकार्ये न जानीते, वाच्यावाच्ये तथैव च। गम्यागम्ये च यन्मूढो, न पेयं मद्यमित्य-तः ॥" विषीदन्ति-धर्मं प्रतिनोत्सहन्त एतेष्विति विषयाः, यद्वाऽऽसेवनकाले मधुरत्वेन परिणामे चातिकटुकत्वेन विषस्योपमां यान्तीति विषयाः, अत एवाविवेकिलोकाऽऽसेविता विवेकि-लोकपरित्यक्ताश्च, तदुक्तम्-

"आपातमात्रमधुरा विपाककटवो विषोदमा विषयाः।
अविवेकिजनाऽऽचरिता विवेकिजनवर्जिताः पापाः ॥"

कष्यतेऽस्मिन् प्राणी पुनः पुनरावृत्तिभावमनुभवति कषयोपलकष्यमाणकनकवदिति कषः-संसारस्तस्मिन् आ-समन्तादयन्ते-गच्छन्त्येभिरसुमन्त इति कषायाः, यद्वा कषाया इव कषायाः, यथा हि तुवरिकादिकषायकलुषिते वाससि मञ्जिष्ठादिरागः, शिलष्यति चिरं चावतिष्ठते तथैतत्कलुषित आत्मनि कर्म सम्बध्यते चिरतरस्थिति कं च जायते, तदायत्तत्वात् तत्स्थितः, उक्तं हि शिवकर्मणा "जोगा पयडिपएसं ठितिअनुभागं कसायओ कुणइ" इत्यादि, एतदुष्टता च निरुक्त्यैव भाविता, 'निद्द'त्ति नितरां द्रान्ति-गच्छन्ति कुत्सितामवस्थामिहामुत्र चानयेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निद्रा, तद्वशाद्धि प्रदीपनकादिषु विनाशमिहैवानुभवन्ति, धर्मकार्येष्वपि शून्यमानसत्वान्न प्रवर्तन्ते, तथा चाह-

"जागरिया धम्मीणं अहमीणं च सुत्तया सेया।
वच्छाहिवभगिणीए अकहिंसु जिनो जयंतीए॥"

विरूपा स्त्रीभक्तचौरजनपदविषयतयाऽसम्बद्धभाषितया च कथा विकथा, तत्प्रसक्तो हि परगुणदोषोदीरणादिभिः, पापमेवोपार्जयति, अत एवाह वाचकः-

"यावत् परगुणदोषपरिकीर्त्तने व्यापृतं मनो भवति।
तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्त्तुम्॥"

इह च चूर्णिकृतेन्द्रियाण्येव पञ्चमप्रमादतया व्याख्यातानि, तत्र च विषयग्रहणेऽपि पुनरिन्द्रि-यग्रहणं विषयेष्वपीन्द्रियवशत एव प्रवर्त्तन्त इति तेषामेवातिदुष्टता-ख्यापकं, महासामर्थ्या अपि ह्येतद्वशादुपघातमाप्नुवन्ति, आह च वाचकः-"इह चेन्द्रियप्रसक्ता निधनमुपजग्मुः, तद्यथा-गाग्गर्यः सत्यकिर्नैकर्द्धिगुणं प्राप्तोऽनेकशास्त्रकुशलोऽनेकविद्याबलसम्पन्नोऽपी"-त्यादि। एते च तत्तत्पुद्गलोपचितद्रव्यरूपतया विवक्ष्यमाणा द्रव्यप्रमाद आत्मानि च रागद्वेष-परिणतिरूपतया विवक्षिता भावप्रमाद इति हृदयम्, अत एव न भावप्रमादः पृथगुक्तः। उपसंहारमाह-'इती'त्यनन्तरमुपदर्शितः पञ्चविधः-पञ्चप्रकारः 'एष' इति इहैवोच्यमानतया प्रत्यक्षत उपलभ्यमानो 'भवति' विद्यते प्रकर्षेण माद्यन्त्यनेनेति प्रमादः अप्रादश्च तदभावरूपः पञ्चविधो, भावस्य चैकत्वेऽपि प्रतिषेध्यापेक्षया पञ्चविधत्वमिति गाथार्थः॥ प्रस्तुतयोजनामाह-

नि.[१८१] पंचविहो अ पमाओ इहमज्झयणंमि अप्पमाओ य।
वन्निज्जए उ जम्हा तेन पमायप्पमायंति॥

वृ. पञ्चविधः चशब्दस्तद्गतभेदसूचकः प्रमादः 'इह' अस्मिन्नध्ययने अप्रमादश्च पञ्चविधो वर्ण्यते, तुशब्दोऽन्याध्ययनेभ्यो विशेषं द्योतयति, यस्माद्धेतोस्तेन प्रमादाप्रमादमित्येतदुच्यत इति गाथार्थः॥ इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवति, तच्चेदम्-

मू.(११६) *असंखयं जीविय मा पमायए, जरोवणीयस्स हु नत्थि ताणं।*
एवं वियाणाहि जने पमत्ते, कन्नू विहिंसा अजया गहिंति॥

वृ. संस्क्रियत इति संस्कृतं न तथा शक्रशतैरपि सतो वर्द्धयितुं त्रुटितस्य वा कर्ण्णपाशवदस्य सन्धातुमशक्यत्वात्, किं तत्?,-'जीवितं' प्राणधारणरूपं, ततः किमित्याह-मा प्रमादिः, किमुक्तं भवति?-यदीदं कथञ्चित् संस्कृतुं शक्यं स्यात् चतुरङ्गयवाप्तावपि न प्रमादो दोषायैव स्यात्, यदा त्विदमसंस्कृतं तदैतत्परिक्षये प्रमादिनस्तदतिदुर्ल्लभमिति मा प्रमादं कृथाः, कृतः पुनरसंस्कृतम्?-जराय-वयोहानिरूपया उपनीतस्य-प्रक्रमान्मृत्युसमीपं प्रापितस्य, प्रायो हि जरानन्तरमेव मृत्युरित्येवमुपदिश्यते, हुर्हेतौ, यस्मान्न अस्ति-विद्यते त्राणं-शरणं येन मृत्युतो रक्षा स्यात्, उक्तं च वाचकैः-

"मङ्गलैः कौतुकैर्योगैर्विद्यामन्त्रैस्तथौषधैः।
न शक्ता मरणात् त्रातुं, सेन्द्रा देवगणा अपि॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा स्यादेतत्-वार्द्धके धर्म्मं विधास्यामीत्याशङ्कयाह-जरामुपनीतः-प्रापितो गम्यमानत्वात् स्वकर्म्मभिर्जरोपनीतस्तस्य नास्ति त्राणं, पुत्रादयोऽपि हि न तदा पालयन्ति, तथा चात्यन्तमवधीरणास्पदस्य न धर्म्मं प्रति शक्तिः श्रद्धा वा भाविनी, यद्वा त्राणं येनासावपनीयते पुनर्यौवनमानीयते न तादृक्करणमस्ति, ततो यावदसौ(त्वां) नासादयति तावद्धर्म्मे मा प्रमादीः, उक्तं हि-

"तद्यावदिन्द्रियबलं जरया रोगैर्न बाध्यते प्रसभम्।
तावच्छरीरमूर्च्छां त्यक्त्वा धर्मे कुरुष्व मतिम्॥"

जरोपनीतस्य च त्राणं नास्तीत्यत्राट्टणो दृष्टान्तः, तत्र च सम्प्रदायः-

उज्जेनी नयरी जियसत्तू राया, तस्स अट्टणो मल्लो, सव्वज्जेसु अजेतो। इतो य समुद्दतडे सोपारयं नयरं, तत्थ सिंहगिरि राया, सो य मल्लाणं जो जिनति तस्स बहुं दव्वं देति, सो य अट्टणो तत्थ गंतूण वरिसे वरिसे पडागं हरति, राया चिंतेइ-एस अन्नाओ रज्जाओ आगतूण पडागं हरति, एसा ममं ओहावणत्ति पडिमल्लं मग्गति, तेण मच्छितो एगो दिट्ठो वसं पियंतो, बलं च से विन्नासियं, नाऊण पोसितो, पुणरवि अट्टणो आगतो, सो य किर मल्लजुद्धं होहितित्ति अनागते चेव सगातो नयरातो अप्पणो पत्थयणस्स वयल्लं भरेऊणं अव्वाबाहेणं एति, संपत्तो सोपारयं, जुद्धे पराजिओ मच्छियमल्लेणं, गतो सयं आवासं चिंतेइ-एयस्स वुड्ढी तरुणस्स मम हानी, अन्नं मग्गइ मल्लं, सुणेति सुरट्ठाए अत्थित्ति, एतेणं भरुकच्छहरणीगामे दूरेल्लकूवियाए करिसतो दिट्ठो, एक्केणं हलं वाहेइ, एक्केणं फलहीतो उप्पाडेति, तं दट्ठूण ठितो, पेच्छामि ताव से आहारेति, आवल्ला मुक्का, भज्जा य से भत्तं गहाय आगया, पत्थिया, कूरस्स उब्भज्जिय घडतो पेच्छति, जिमितो सण्णाभूमिं गतो, तत्थ परिक्खइ, सव्वं संवट्टि, स वेवालियंमि वसहिं तस्स घरे मग्गति, दिन्ना।

इतो य संकहा य, पुच्छइ-का जीविका ?, तेन कहिए भणति-अहं अट्टणो तुमं इस्सरं करेमित्ति, तीसे महिलाए कप्पासमोल्लं दिन्नं, सा य उवलेद्दा, उज्जेनिए गया, तेणवि वमनविरेयणाणि कयाणि, पोसितो निसुद्धं सिक्खावितो, पुणरवि महिमाकाले तेणेव विहिणा आगतो, पढमदिवसे फलहियमल्लो, मच्छियमल्लोवि, जुद्धे एक्को अज्जितो एक्को अपराजितो, रायावि बीयदिवसे होहिइत्ति अतिगतो इमेवि सए २ आलए गया, अट्टणेण फलहियमल्लो भणितो-कहेहि पुत्ता! जं ते दुक्खावियं, तेण कहियं, मक्खित्ता मलितो सेएणं पुणन्नवीकतो, मच्छियस्सवि रन्ना संमद्दगा विसज्जिया, भणइ-अहं तस्स पिउणोऽपि न बीहेमि, सो को वराओ ?, बीयदिवसे समजुद्धा, तईयदिवसे अंबप्पहारो नीसहो वइसाहं ठितो मच्छितो, अट्टणेण भणितो-फलहित्ति, तेन फलिहग्गहेण कड्ढितो सीसे कुंडिकागाहेण, सक्कारितो गतो उज्जेनिं। तत्थ य विमुक्कजुज्झवावारो अच्छति, सो य महल्लोत्तिकाउं परिभूयए सयणवग्गेणं, जहाअयं संपयं न कस्सइ कज्जस्स खमोत्ति, पच्छा सो माणेणं तेसिं अनाउच्छाए कोसंबिए नयरिए गतो, तत्थ वरसमेत्तं उवरेगमतिगतो रसायणं उवजीवेति, सो बलिट्ठो जातो, जुद्धमहे पवत्तेति, रायमल्लो निरंगणो नाम, तं निहणति, पच्छा राया मण्णुइतो-मम मल्लो आगंतूणा विहणितोत्ति न पसंसई, रायाणे य अपसंसंते सव्वो रंगो तुण्हिक्को अच्छति, इतो य अट्टणेण राइणो जाणणनिमित्तं भण्णत्ति-

"साहह वण! सउनाणं साहह भो सउनिगा सउनिगाणं।

निहतो निरंगणो अट्ठेणेण निक्खित्तसत्थेणं ॥"

एवं भणियमेत्ते राइणा एस अट्टणोत्तिकाउं तुट्ठेण पूजितो, दव्वं च से पज्जत्तियं आमरणंतियं दिन्नं, सयणवग्गो य से तं सोउं तस्स सगासमुवगतो, पायवडणमाईहिं पत्तियावेउं दव्वलोभेणं अल्लियावितो, पच्छा सो चिंतेइ-ममं एते दव्वलोभेण अल्लियावेंति, पुणोऽवि मम परिभविस्संतित्ति, जरापरिगतो अहं न पुणो सुमहल्लेणावि पयत्तेण सक्किस्सं जुवत्तं काउं, तं जावऽज्जवि सचेट्ठो ताव पव्वयामित्ति संपहारेउं पव्वतितो ॥ एवं जरोपनीतस्याट्टनस्येवान्यस्यापि न त्राणं-बन्धुभिः पालनं जरातो वा रक्षणम्, 'एव' मित्येवं प्रकारं पाठान्तरतः-एनं वा-अनन्तरोक्तमर्थं 'विजानीहि' विशेषेण विविधं वा अवबुध्यस्व, तथैतच्च वक्ष्यमाणं जानीहि, यथा 'जनाः' लोकाः 'प्रमत्ताः' प्रमादपराः, उभयत्र सूत्रत्वादेकवचनं, 'कम्' अर्थं प्रकमात् त्राणं, नु इति वितर्के, विवधम्-अनेकधा हिंस्त्रा-हिंसनशीलाः, आर्षत्वद्वा वीति-विश्रब्धान् स्वेषु स्वेपूत्पत्तिस्थानेष्वनाकुलमवस्थितान् जन्तून् हिंसन्तीति विहिंसाः, तथा अयताः-तत्तत्पापस्थानेभ्योऽनुपरताः 'गहन्ति'त्ति सूत्रत्वाद गमिष्यन्ति, ग्रहीष्यन्ति वा-स्वीकरिष्यन्ति, किमुक्तं भवति ?-

एवमेतेप्रमत्तादीविशेषणान्विता जनाः स्वकृतैरीदग्भिः कर्म्मभिर्नरकादिकमेव यातनास्थानं गमिष्यन्ति ग्रहीष्यन्ति वा, यद्वैवं नीयते-असंस्कृतं जीवितमिति मा प्रमादीरित्यादि (दौ) गुरुणोक्ते कदाचिच्छिष्यो वदेत्-बहुरयं जनः प्रमत्तः, तद्वदहमपि भविष्यामीत्याशङ्क्य गुरुराह-भद्र ! एवं जानीहि जनः प्रमत्तो विहिंस्त्रोऽयतः 'कन्नु'त्ति कामप्यवक्तव्यां नरकादिगतिमसौ गमिष्यति ग्रहीष्यति वा, अतः किं तव विवेकिन एवंविधजनव्यवहाराश्रयणेन ?, सूत्रत्वाच्चैकत्वेऽपि बहुवचनमिति सूत्रार्थः ॥ असंस्कृतं जीवितमीत्युक्तम्, अतस्तद व्याचिख्यासुराह

नि.[१८२]	उत्तरकरणेण कयं जं किंची संखयं तु नायव्वं ।
सेसं असंखयं खलु असंखयस्सेस निज्जुत्ती ॥

वृ. मूलतः स्वहेतुभ्य उत्पन्नस्य पुनरुत्तरकालं विशेषाधानात्मकं करणमुत्तरकरणं तेन कृतं-निर्वर्त्तितं, 'यत्किञ्चिदि' त्यविवक्षितघटादि, यत्तदोर्नित्यमभिसम्बन्धात् तत् संस्कृतं, तुः आवधारणे, स चैवं याज्यते-यदुत्तरकरणकृतं तदेव संस्कृतं ज्ञातव्यं, 'शेषम्' अतोऽन्यत्संस्कारानुचितं विदीर्णमुक्ताफलोपममसंस्कृतमेव, खलुशब्दस्यैवकारार्थत्वात्, असंस्कृतमितस्य सूत्रावयवस्य 'एषा' वक्ष्यमाणलक्षणा निर्युक्तिः, बहुवक्तव्यतया च प्रतिज्ञानम्, अथवा यथाऽऽचारपञ्चमाध्ययनस्य 'आवन्ती'त्यादानपदेन नाम तथा अस्याप्यसंस्कृतमिति नाम, ततश्चासंस्कृतनाम्नोऽस्यैवाध्ययनस्यैषा नामनिष्पन्ननिक्षेपनिर्युक्तिस्तत्प्रस्ताव एव व्याख्यातव्येति गाथार्थः ॥ सम्प्रति संस्कृतप्रतिषेधादसंस्कृतं विज्ञायत इति संस्कृतशब्दस्य निक्षेपो वाच्यः, तत्र च यद्यपि समित्युपसर्गोऽप्यस्ति तथाऽपि धात्वर्थद्योतकत्वात्तस्य करणस्यैव चात्र धात्वर्थात्तदेव निक्षेसुमाह निर्युक्तिकृत-

नि.[१८३]	नामंठवणाकरणं खित्ते काले तहेव भावे य ।
एसो खलु करणंमी निक्खेवो छव्विहो होइ ॥

वृ. नाम स्थापना द्रव्यं क्षेत्रं कालः 'तथैवे'ति तेनैव वस्तुरूपतालक्षणेन प्रकारेण 'भावे य'त्ति भावश्च, एष एव-अनन्तरोक्तः, खलुशब्दस्यैवकारार्थत्वात्, 'करणे' करणविषये '**निक्षेपो**'

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

न्यासः षड्विधो भवति, किमुक्तं भवति ?–नामकरणादिभेदेन निक्षिप्यमाणं षड्विधमेव करणं भवतीति गाथार्थः ॥ तत्र च नामकरणं करणमिति नामैव नाम्नो वा करणं नामकरणं–प्रियङ्करशुभङ्कराद्यभिधानाधानं, यदिवा नामतः करणं नामकरणं यत्पूज्यनामापेक्षया पूजादि–विधानं, स्थापनाकरणम्अक्षनिक्षेपादि, यो वा यस्य करणस्याकारः, तथा च भाष्यकृत–

"नामं नामस्स व नामतो य करणंति नामकरणंति।
ठवणाकरणं नासो करणागारो य जो जस्स ॥"

द्रव्यकरणं तु द्रव्यमेव क्रियत इति करणं, कृत्यल्युटोऽप्यन्यत्रापीति। कर्म्मण्यपिल्युटो दर्शनात्, भावसाधनपक्षे तु द्रव्येण द्रव्यस्य द्रव्ये वा यथासम्भवं क्रियात्मकं करणं, तथा चाह–

"तं तेणं तस्स तंमि व संभवतो उ किरिया मया करणं।
दव्वस्स व दव्वेण व दव्वंमि व दव्वकरणंति ॥"

तच्चागमनोआगमभेदतो द्विधा, तत्रागमतो ज्ञाता तत्र चानुपयुक्तो, नोआगमतस्तु ज्ञशरीर–भव्यशरीरतद्व्यतिरिक्तभेदात्त्रिधा, तत्र ज्ञशरीरभव्यशरीरद्रव्यकरणे प्रतीते एवेत्यनादृत्य तद्व्य–तिरिक्तमाह–

नि.[१८४] दव्वकरणं तु दुविहं सन्नाकरणं च नो य सन्नाए।
कडकरणमट्ठकरणं वेलूकरणं च सन्नाए ॥

वृ. द्रव्यकरणं, तुशब्दो नोआगमत इदमिति विशेषद्योतकः, 'द्विविधं' द्विप्रकारं संज्ञाकरणं च 'नो य सन्नाए'त्ति करणमिति प्रक्रमात्, चशब्दो भिन्नक्रमः, ततश्च नोसंज्ञाकरणं च। तत्र संज्ञाकरणमाह– 'कटकरणं' कटनिर्वर्त्तकं चित्राकारमयोमयं पाइल्लयादि, 'अर्थकरणम्' अर्थाभिनिर्वर्त्तकमधिकरण्यादि येन द्रम्मादि निष्पाद्यते, अर्थार्थं वा करणमर्थकरणं यत्र राज्ञोऽ–र्थाश्चिन्त्यन्ते, अर्थ एव वा तैस्तैरुपायैः क्रियत इत्यर्थकरणं, वेलुकरणं च रूतपूणिकानिर्वर्त्तकं चित्राकारमयं वेणुशलाकादि, 'संज्ञायां' संज्ञाकरणे, आह–नामकरणसंज्ञाकरणयोः कः प्रति–विशेषो ?, न हि नामसंज्ञाशब्दयोरर्थान्तरविषयत्वमुत्पश्यामः, उच्यते, इह नामकरणं करण–मित्यभिधानमात्रं, संज्ञाकरणं तु यत्रान्वर्थोऽस्ति, संज्ञाकरणेषु हि कटकरणादिषु क्रियतेऽनेनेति करणमि त्यनुगतोऽर्थः प्रतीयते, द्रव्यरूपाणि चैतानि, करणमितिरूढ्य तु संज्ञाकरणान्युच्यन्ते,

"सन्ना नामंति मई तण्णो नामं जमहिहाणं।
जं वा तवत्थबिवले कीरति दव्वं तं दवणपरिणामं ॥
पेलुकरणादि न हि तं तयत्थसुन्नं न वा सद्दो ॥१॥
जई न तदत्थविहीणं तो किं दव्वकरणं ?, जतो तेणं।
दव्वं कीरति सन्नाकरणंतिअ य करणरूढीओ ॥२॥"

नोसंज्ञाकरणं तु यत्करणमपि सन्न तत् संज्ञया रूढं, उक्तं हि–नोसन्नाकरणं पुण दव्वस्सा–रूढकरणसन्नंपि"ति गाथार्थः ॥ एतदेव भेदतोऽभिधातुमाह–

नि.[१८५] नोसन्नाकरणं पुन पओगसा वींससा य बोद्धवं।
साईअमणाईअं दुविहं पुन विस्ससाकरणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. नोसंज्ञाकरणं पुनः 'पओगसा वीससा य'त्ति सूत्रत्वात् प्रयोगतो विश्रसातश्च बोद्धव्यं, तत्र प्रयोगः-जीवव्यापारः तद्धेतुकं करणं प्रयोगकरणं, उक्तं च-

"होइ पजोयो जीवव्वावारो तेन जं विणिम्मानं।
सज्जीवमजीवं वा पओगकरणं तयं बहुहा ॥"

एतद्विपरीतं तु विश्रसाकरणं, तत्र पश्चादुक्तमप्यल्पवक्तव्यमिति विश्रसाकरणमाह-सहादिना वर्त्तते सादिकं ततोऽन्यत्त्वनादिकमिति भेदतो द्विविधं, पुनरिति मूलभेदापेक्षया, विश्रसाकरणम्-उक्तरूपमिति गाथार्थः ॥ तत्रानादिकं वक्तुमाह-

नि.[१८६] धम्माधम्मागासा एयं तिविहं भवे अनाइयं।
चक्खसुअचक्खुप्फासे एयं दुविहं तु साईयं ॥

वृ. धर्माधर्माकाशानामन्योऽन्यसंबलनेन सदाऽवस्थानमनादिकरणं, न हि तत्कदाचिन्नासीन्नास्ति न भविष्यति वा, उक्तं हि-"धम्माधम्मणहाणं अनाइसंहायणाकरणं" न च करणमनादि च विरुद्धमिति वाच्यं, यतोऽत्रान्योऽन्यसमाधानं करणमभिप्रेतं, न त्वन्योऽन्यनिर्वर्त्तनम्, आह च-"अन्नोऽन्नसमाहाणं जहिहं करणं न निव्वत्ति" इह च धर्माधर्माकाशानां करणमिति वक्तव्ये कथञ्चित्क्रियाक्रियावतोरभेददर्शनार्थमनुकूलिताक्रियत्वख्यापनार्थं वा धर्माधर्माकाशाः करणमित्युक्तम्, 'एतद्' अनन्तरोक्तं 'त्रिविधं' त्रिप्रकारं 'भवेत्' स्यात् अनादिकं, करणमिति प्रक्रमः। इत्थमनादिकं पश्चान्निर्दिष्टमपि पश्चानुपूर्व्यपि व्याख्याङ्गमिति ख्यापनाय उक्तं, सम्प्रति तु सादिकमाह-'चक्खुमचक्खुप्फासे'त्ति स्पर्शशब्दः प्रत्येकमभिसम्बध्यते, ततश्चक्षुषा स्पृश्यते-गृह्यमाणतया युज्यत इति चक्षुःस्पर्शं-स्थूलपरिणतिमत्पुद्गलद्रव्यम् अतोऽन्यदचक्षुः-स्पर्शम्, 'एवं दुविहं तु'त्ति एतद्विविधमेव, तुशब्दस्यैवकारार्थत्वात् सादिकमिति गाथार्थः ॥

नि.[१८७] खंधेसु अ दुपएसाइएसु अब्भेसु अब्भरुक्खेसुं।
निप्फन्नगाणि दव्वाणि जाणि तं वीससाकरणं ॥

वृ. 'स्कन्धेषु च' परमानुसञ्चयात्मकेषु द्विप्रदेशादिकेषु आदिशब्दात्त्रिप्रदेशादिपरिग्रहः, परमाणवश्चानेनैवोपलक्षिताः, 'अभ्रेषु' प्रतीतेषु 'अभ्रवृक्षेषु' तद्विशेषेष्वेव वृक्षाकारेषु, उपलक्षणं चैतदिन्द्रघनुरादीनां, तथा च सम्प्रदायः-चक्खुप्फासियं जं चक्खुसा दीसइ, तं पुण अब्भा अब्भरुक्खा एवमाइ'। दृश्यते च 'अब्भेसु विज्जमादीसु'त्ति तत्र च यदि विद्युत्प्रतीतैव गृह्यते तदा तस्याः सजीवत्वात्तच्छरीरस्य चौदारिकशरीरकरणाख्यप्रयोगकरणत्वप्रसक्तिः, अथ विद्योतन्त इति विद्युन्ति तानि आदिर्येषां तानि विद्युदादीन्यभ्राणि तेष्वित्यभ्रविशेषणतया व्याख्यायते, आदिशब्दाच्च धूम्रादिपरिग्रह इति, तदा नोक्तदोषः, परमप्रातीतिकं सामायिकानिर्युक्तौ चाभ्रादीन्येव विश्रसाकरणमुक्तं, तद्यथा-

"चक्खुसमचक्खुसंपि य सादियं रूविवीससाकरणं।
अब्भाणुप्पभितीणं बहुहा संघायभेयकयं ॥" ति,

नेह तत्त्वनिश्चयः, तेषु द्विप्रदेशादिष्वभ्रादिषु वा किमित्याह-निष्पन्नान्येव निष्पन्नकानि, जीवव्यापारं विनैव भेदसङ्घाताभ्यां लब्धसत्ताकानि द्रव्याणि तद्विश्रसाकरणं सादि, चाक्षुषमचाक्षुषं वेति प्रक्रमः, द्विप्रदेशादिकरणानि हि सङ्घाताद् भेदात् सङ्घातभेदाभ्यां च विनाऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवप्रयोगं निष्पद्यन्ते, निष्पन्नान्यपि च न चक्षुषा वीक्ष्यन्ते इत्यचाक्षुषं विश्रसाकरणम्, अभ्रादिकरणानि तु स्वयं निष्पद्यन्ते चक्षुषा च वीक्ष्यन्त इति चक्षुषं विश्रसाकरणम्, अत्र च पश्चादुद्दिष्टस्यापि यदचाक्षुषस्य प्रथममभिधानं तत्प्राग्वत्पश्चानुपूर्व्येति गाथार्थः ॥ सम्प्रति प्रयोगकरणमाह-

नि.[१८८] दुविहं पओगकरणं जीवेतर मूल उत्तरं जीवे ।
मूले पंचसरीरा तिसु अंगोवंगनामं च ॥

वृ. 'द्विविधं' द्विभेदं-प्रयोगकरणं 'जीवत्ति' जीवप्रयोगकरणम् 'इयरे'त्ति अजीवप्रयोगकरणं, तत्र जीवेनउपयोगलक्षणेन यदौदारिकाशरीरमभिनिर्वर्त्यते तज्जीवप्रयोगकरणं, तच्च द्विधा-मूलकरणमुत्तरकरणं च, तत्र 'मूल' इति मूलकरणे विचार्यमाणे 'पञ्च' इति पञ्चसङ्ख्यावच्छिन्नानि विशीर्यन्ते-उत्पत्तिसमयतः प्रभृति पुद्गलविचटनाद्विनश्यन्तीति शरीराणि-औदारिकवैक्रियाहारकतैजसकार्म्मणानि, इह च विषयविषयिणोरभेदोपचारेण करणविषयत्वाच्छरीराण्यपि करणमुक्तं, मूलत्वं चोत्तरोत्तरावयवव्यक्त्यपेक्षया, ततश्च यदवयवविभागविरहितमौदारिकशरीराणां प्रथममभिनिर्वर्त्तनं तत् मूलकरणं, 'तिसु अंगोवंगणामं चे'ति, चशब्दः प्रकृतमनुकर्षति, तच्चेह प्रक्रमादुत्तरकरणमेवानुकृष्यते, ततश्च त्रिषु-औदारिकवैक्रियाहारेषु तैजसकार्म्मणयोस्तदसम्भवादङ्गोपाङ्गनामैवोत्तरकरणमिति सम्बन्धः, अत्र चाङ्गोपाङ्गनामशब्देनाङ्गोपाङ्गनामकर्म्मनिर्वर्त्तितान्यङ्गोपाङ्गानि गृह्यन्ते, कार्ये कारणोपचारात्, आह च-

"सज्जीवं मूलुत्तरकरणं मूलकरणं जमादीए ।
पंचण्हं देहाणं उत्तरमादीतियस्सेव ॥"

इति गाथार्थः ॥ कानि पुनस्तान्यङ्गानीत्याह-

नि.[१८९] सीसमुरोयरपिट्ठी दो बाहू अ हुंति ऊरू अ ।
एए अट्ठंगा खलु अंगोवंगाइँ सेसाइँ ॥

नि.[१९०] हुंति उवंगा कन्ना नासऽच्छी जंघ हत्थ पाया य ।
अंगोवंगा अंगुलिनहकेसामंसु एमाइ ॥

वृ. तत्राद्या प्राग्वत्, नवरम् अङ्गोपाङ्गानि उपलक्षणत्वादुपाङ्गानि च शेषाणि, तानि वक्ष्यन्त इति शेषः, तत्रोपाङ्गानि कर्णौ नासे अक्षिणी जङ्घे हस्तौ पादौ च, अङ्गोपाङ्गानि अंगुलयो नखाः केशाः स्मश्रु 'एवमादीनि' एवंप्रकाराण्युत्तरकरणं, वृद्धास्त्वङ्गान्यपि मूलकरणमिति मन्यन्ते, आपेक्षिकत्वाच्च मूलोत्तरत्वयोरुभयथाऽप्यविरोध इति गाथाद्वयार्थः ॥ इदमेवान्यथाऽऽह-

नि.[१९१] तेसिं उत्तरकरणं बोद्धव्वं कण्णखंधमाईयं ।
इंदियकरणा तानि य उवघायविसोहिओ हुंति ॥

वृ. 'तेषाम्' आद्यानां त्रयाणां शरीराणामुत्तरकरणं 'बोद्धव्यम्' अवगन्तव्यं, 'कण्णखंधमादीयं'ति तत्रौदारिकस्य कर्णयोर्वृद्धापादनं स्कन्धस्य च मर्दनादिना दृढीकरणम्, आदिशब्दाद्दन्तरागादिकरणपरिग्रहः, एवं वैक्रियस्यापि, आहारकस्य तु नास्त्येव, गमनादिना वा तस्याप्युत्तरकरणमिति ग्राह्यं । तथा इन्द्रियाणां-चक्षुरादीनां करणानि-अवस्थान्तरापादनानि इन्द्रियकरणानि, तानि च 'उपघातविशुद्धितः' उपघातात् विशुद्धेश्च भवन्ति, तत्रोपघाताद्विषाद्यभ्यवहारतोऽन्धबधिरताद्यापादनानि विशुद्धितश्च ब्राह्मीसमीराञ्जनादिना स्पष्टताद्यापादनान्युत्तकरणं भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पठ्यते च-'इंदियकरणं च तह'त्ति अत्र चैकवचनान्ततया सर्वं व्याख्येयमिति गाथार्थः ॥ अथवाऽन्यथा करणमुच्यते-

नि. [१९२] संघायणपरिसाडणउभयं तिसु दोसु नत्थि संघाओ।
कालंतराइ तिण्हं जहेव सुत्तंमि निद्दिट्ठं ॥

वृ. 'संघायणे'ति संहन्यमानानां-संयुज्यमानानामौदारिकादिपुद्गलानां तैजसकार्मणपुद्गलैः सह यदात्मनस्तत्तत्पुद्गलग्रहणात्मिकासु तदनुकूलक्रियासु वर्त्तनात्मकं प्रयोजकत्वं सा सङ्घातना, तथा परिः-समन्ताच्छटतां पृथग्भवतामौदारिकादिपुद्गलानां यदात्मनस्तान्प्रति तत्तच्छरीरविमोक्षात्मकं प्रयोजकभवनं सा परिशाटना, उभावभिहितावक्यवावस्येति उभयं-सङ्घातनापरिशाटनाकरणं। किमिदं त्रयमपि पञ्चस्वप्यौदारिकादिषु अथान्यथेत्याह-त्रिष्वाद्येषु, किमुक्तं भवति?-औदारिकवैक्रियाहारकेषु, 'द्वयोः' तैजसकार्म्मणयोः, किमित्याह-'नास्ति' न विद्यते, कोऽसौ?-सङ्घातः, तदभावाच्च सङ्घातनापि नास्तीति भावः, सा हि प्रथमत उत्पद्यमानस्य जीवस्य तैलभृततप्ततापिकाप्रक्षिप्तापूपवत् तैलसदृशानौदारिकादिपुद्गलानाददानस्यैवौदारिकादिष्वपि वर्ण्यते न च तैजसकार्मणयोः प्रथमत उपादानसम्भवः, अनादिसंहतिमत्वात्तयोः, परिशाटना तु शैलेशीचरमसमये, प्रतिसमयं सङ्घातनापरिशाटनोभयं च सम्भवत्येव, कालान्तरादि त्रयाणामित्यस्यायमर्थः-त्रयाणां सङ्घातनापरिशाटनोभयेषां कालः-कियत्कालं सङ्घातना परिशाटनोभयं चेत्येवमात्मकः अन्तरं च सङ्घातनायाः सकृदवाप्तौ पुनः कियता कालेनावाप्तिरेवंरूपम्, एवं परिशाटनाया उभयस्य च, आदिशब्दात् सादित्वानादित्वे च, किमित्याह-'यथैवे'ति येनैव प्रकारेण 'सूत्रे' सामायिकाध्ययने 'निर्दिष्टा' इति आषत्वात् 'निर्द्दिष्टं' प्रतिपादितमिति गाथार्थः ॥ एतच्चातिदिष्टमपि निर्युक्तिकृता विनेयानुग्रहार्थं सम्प्रदायत उच्यते,

एयाणि तिन्निवि करणाणि कालतो मग्गिज्जंति-तत्थोरालियसंघायकरणं एगसमइयं, जं पढमसमओववन्नगस्स, जहा तेल्ले ओगाहिमतो छूढो तप्पढमयाए आइयति, एवं जीवोऽवि उववज्जंतो पढमे समये गेण्हति ओरालियसरीरपाओग्गाइं दव्वाइं, न पुन मुंचति किंचिवि, परिसाडणावि समओ, मरणकालसमए एगंततो मुंचति न गिण्हति मज्झिमकाले किंचि गेण्हइ किंचि मुंचति, जहण्णेणं खुड्डागं भवग्गहणं तिसमऊणं तिन्नि पलिओवमाइं समऊणानि-

दो विग्गहंमि समया समओ संघायणाय तेहूणं।
खुड्डागभवग्गहणं सव्वजहन्नो ठितीकालो ॥१॥
उक्कोसो समऊणो जो सो संघयणासमयहीणो।
किह न दुसमयविहीणो साडणसमए विहीणंमि ॥२॥
भन्नति भवचरिमंमिवि समए संघायसाडणा चेव।
परभवपढमे साडणमतो तदूणो न कालोत्ति ॥३॥
जइ परपढमे साडो निव्विग्गहतो य तंमि संघातो।
ननु सव्वसाडसंघायणातो समए विरुद्धातो ॥४॥
आचार्य आह-जम्हा विगच्छमाणं विगयं उप्पज्जमाणमुपन्नं।
तो परभवादिसमए मोक्खादानान न विरोहो ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चुतिसमए नेहभवो इह देहविमोक्खतो जहातीतो।
जइ परभवोवि न तहिं तो सो को होउ संसारी ? ॥६॥
ननु जह विग्गहकाले देहाभावेऽवि परभवग्गहणं।
तह देहाभावंमिवि होज्जेभवोऽवि को दोसो ? ॥७॥
जं चिय विग्गहकालो देहाभावेऽवि तो परभवो सो।
चुतिसमए उ न देहो न विग्गहो जइ स को होउ ? ॥८॥
इदानीं अंतरंसंघायंतरकालो जहन्नयं खुड्डुयं तिसमऊणं।
दो विग्गहंमि समया तइयो संघायणासमओ ॥९॥
तेहूणं खुड्डुभवं धरिउ परभवमविग्गहेणं वा।
गंतूण पढमसमए संघाययतो स विन्नेओ ॥१०॥
इदानीं संघायपरिसाडंतरं-उभयंतरं जहन्नं समओ निव्विग्गहेण संघाए।
परमं सतिसमयातिं तेत्तीसं उदहिणामाइं ॥११॥
अनुभविउं देवादिसु तेत्तीसमिहागयस्स ततियंमि।
समए संघाययतो दुविहं साडंतरं वोच्छं ॥१२॥
खुड्डु(ड्डा) गभवग्गहणं जहन्नमुक्कोसयं च तेत्तीसं।
तं सागरोवमाइं संपुन्ना पुव्वकोडी य ॥१३॥

आह-इह क्षुल्लभवग्रहणं पूर्णमौदारिकसर्वशाटयोर्जघन्यमन्तरमुक्तं, तच्च 'परभवपढमे साडो' इति वचनात्समयोनमेव प्राप्नोतीति कथं न विरोधः ?, उच्यते, निश्चयनयमतमिदं 'परभवपढमे साडो'त्ति, स ह्युत्तरपर्यायोत्पादमेव पूर्वस्य विनाशमेवाह विगच्छदेव च विगतमुत्पद्यमानमेव चोत्पन्नं, यत उक्तम्-"जम्हा विगच्छमानं विगय"मित्यादि, तथा चास्य य एवोत्तरभवोत्पादः स एव पूर्वभवपरित्यागः, एवं च यदैवोत्तरभवौदारिकपुद्गलानां सङ्घातस्तदैव पूर्वभवौदारिकपुद्गलानां शाटइति परभवप्रथमसमय एवैतदभिप्रायेण शाटः, व्यवहारनयमतेन त्वन्य एवोत्तरस्योत्पादः अन्य एव च पूर्वस्य विनाशो, विनष्टस्यैव च विनष्टता उत्पन्नस्यैव चोत्पन्नता, ततो न य एवोत्तरभवोत्पादः स एव पूर्वभवपरित्यागः, एवं चान्यदैवोत्तरभवौदारिकपुद्गलानां सङ्घातोऽन्यदैव च पूर्वभवौदारिकपुद्गलानां शाटः, ततो नास्य परभवप्रथमसमय एव सङ्घातशाटौ, किन्तु पूर्वभवान्त्यसमय एव शाटः उत्तरभवाद्यसमय एव सङ्घातः, तथा निश्चयव्यवहारनयात्मकत्वाज्जिनमतस्य यदाऽसौ क्षुल्लकभव उत्पद्यते तदा व्यवहारनयस्याश्रयणात्पूर्वभवान्त्यसयम एव शाटो विवक्ष्यते, यदा तु तत उद्वर्त्तते तदा निश्चयनयाङ्गीकरणात्परभवप्रथमसमय एवोत्पाद इति परिपूर्णमेव क्षुल्लकभवग्रहणमौदारिकसर्वशाटयोर्जघन्यमन्तरमिति न कश्चिद्विरोधः। इदानिं विउव्वियस्स-

वेउव्वियसंघातो समतो सो पुन विउव्वणादीतो।
ओरालियाण अहवा देवादीणाइगहणंमि ॥१॥
उक्कोसो समयदुगं जो समय विउव्विउं मतो बितिए।
समए सुरेसु वच्चइ निव्विग्गहओ य जंतस्स ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उभयग्गहणं समतो सो पुन दुसमयविउव्वियमयस्स।
परमतराइं संघायसमयहीणाइं तेत्तीसं॥३॥

वेउव्वियसरीरपरिसाडणकालोऽवि समयतो चेव॥ इदानिं अंतरं-वेउव्वियसरीरसंघायंतरं जहन्नेणं एगं समयं, सोऽवि य पढमसमए विउव्विय मयस्स विग्गहेणं तइए समए वेउव्विएसु देवेसु संघायंतस्स भवति, अहवा ततियसमए विउव्विय मयस्स अविग्गहेणं देवेसु संघायंतस्स संघायपरिसाडंतरं जहन्नेणं समय एव, सो पुणोऽचिर विउव्विय मयस्स अविग्गहेणं संघायंतस्स भवति। साडस्स अंतरं-जहन्नेणं अंतोमुहुत्तं। तिण्हवि एतेसिं उक्कोसेणं अनंतं कालं-वणस्सइकालो। इदानिं आहारयस्स-

आहारे संघाओ परिसाडो य समयं समो होइ।
उभयं जहन्नमुक्कोसयं च अंतोमुहुत्तं तु॥१॥
बंधनसाडुभयाणं जहन्नमंतोमुहुत्तमंतरणं।
उक्कोसेणमवड्ढं पोग्गलपरियट्ट देसूणं॥२॥
तेयाकम्माणं पुन संतानाणादितो न संघातो।
भव्वाण होज्ज साडो सेलेसीचरिमसमयंमि॥३॥

गतं जीवमूलप्रयोगकरणम्, उत्तरप्रयोगकरणमाह-

नि.[१९३] इत्तो उत्तरकरणं सरीरकरणं पओगनिप्फन्नं।
तं भेयाऽनेगविहं चउविहमिणं समासेणं॥

नि.[१९४] संघायणा य परिसाडणा य मीसे तहेव पडिसेहो।
पडसंखसगडथूणा उड्ढतिरिच्छाण करणं च॥

वृ. 'इत' इति मूलप्रयोगकरणादनन्तरम् 'उत्तरकरण'मिति उत्तरप्रयोगकरणम्, उच्यते इति गम्यते, तत्कतरदित्याह-शरीरं च तत्करणं च तां तां क्रियां प्रति साधकतमत्वेन शरीरकरणं तस्य प्रयोगः-वीर्यान्तरायक्षयोपशमजजीववीर्यजनितो व्यापारः तेन निष्पन्नं शरीरकरण-प्रयोगनिष्पन्नम्, अत एव शरीरनिष्पत्त्यपेक्षयाऽस्योत्तरत्वमिति भावनीयं, 'तत्' इत्युत्तरकरणं 'भेदात्' इति भेदमाश्रित्य 'अनेकविधम्' अनेकप्रकारम्, इदमत्र तात्पर्यम्-संसारिणां कार्याणि विसदृशरूपाणि बहूनि दृष्टानि, अतस्तत्साधनैरपि करणैर्बहुभिरेव भवितव्यं, न च तानि विस्तरतो वक्तुं शक्यानि अत आह-

'चतुर्विधं' चतुरूपम्, 'इदम्' इत्युत्तरकरणं, समासेन, उच्यत इति शेषः, तदेवाह-'सङ्घातना च' संघातनाकरणं 'परिशाटना च' परिशाटनाकरणं 'मिस्से'त्ति मिश्रं सङ्घातनापरिशाटनाकरणं तथैव 'प्रतिषेधः' इति सङ्घातनापरिशाटनाशून्यम्, अमीषां चोदाहरणानि दर्शयन्नाह-पटे सङ्घातनैव तन्तुसङ्घातनिष्पन्नत्वात्तस्य, शङ्खे परिशाटनैव परिशाट्यमानत्वादेवास्य, शकटे उभयं यतस्तत्र किञ्चित्सङ्घात्यते कीलकादि किञ्चिच्च परिशाट्यतेऽधिकत्वगादि, स्थूणानामुभया-भावः, तथा च 'उड्ढतिरिच्छाणं'ति भावप्रधानत्वा दस्योर्ध्वतिर्यक्त्वयोः करणं, चशब्दान्नम-नोन्नमनादि च तत्रोत्तरकरणं च, न तं सङ्घातनापरिशाटना च, आह-इदमप्यजीवानां क्रियत इत्यजीवकरणमेव, तत्कथमस्य जीवकरणत्वेनोपन्यासः?, उच्यते, जीवेन क्रियत इति विवक्षया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवकरणत्वेनेदमुक्तमित्यदोष इति गाथार्थः ।। अजीवप्रयोगकरणमाह-

नि.[१९५] अजियप्पओगकरणं दव्वे वन्नाइयाण पंचण्हं ।
चित्तकर(णं)कुसुंभाईसु विभासा उ सेसाणं ।।

वृ. अस्याक्षरार्थः सुगमः ।। भावार्थस्त्वयं-

जं जं निज्जीवाणं कीरइ जीवप्पओगओ तं तं ।
वण्णादि रूवकम्मादि वावि तदजीवकरणन्ति ।।

उक्तं द्रव्यकरणं, क्षेत्रकरणमाह-

नि [१९६] न विना आगासेणं कीरइ जं किंचि खित्तमागासं ।
वंजणपरिआवन्नं उच्छुकरणमाइअं बहुहा ।।

वृ. आह-नित्यत्वात्क्षेत्रस्य करणं न संगच्छते तत्कथं क्षेत्रकरणसम्भवः ?, उच्यते, न विनाऽऽकाशेन 'क्रियते' निर्वर्त्यते 'यदि'ति यस्मात् 'किञ्चिदपि' अल्पमपि द्व्यणुकस्कन्धादि, अतस्तत्प्राधान्याद् द्रव्यकरणमपि क्षेत्रकरणमुच्यते इत्युपस्कारः, ननु यद्याकाशेन विना न किञ्चित् क्रियते तदाऽऽकाशकरणतैवास्तु कथं क्षेत्रकरणता ?, उच्यते, 'क्षेत्रम्' इति क्षेत्रशब्दवाच्यमाकाशं, तथा च पर्यायशब्दत्वादनयोरित्थमभिधानमदुष्टमेवेति भावः, तच्च व्यञ्जनंशब्दस्तस्य पर्यायः-अन्यथा च भवनं व्यञ्जनपर्यायः तमापन्नं-प्राप्तं व्यञ्जनपर्यायापन्नम्, 'उच्छुकरणमाइयं'ति प्रक्रमान्मकारस्य चागमिकत्वादिक्षुक्षेत्रकरणादिकं 'बहुधा' बहुप्रकरणम्, एकत्वेऽपि क्षेत्रस्येक्षुक्षेत्रकरणादिरूपेणाभिलापस्य बहुप्रकारत्वात्, तथा च सम्प्रदायः-वंजणपरियावन्नं नाम जं खेत्तंति अभिलप्पति तंजहा-उच्छुखेत्तकरणं सालिखेत्तकरणं तिलखित्तकरणं एवमादि' अथवा यस्मिन् क्षेत्रे करणं क्रियते वर्ण्यते वा तत् क्षेत्रकरणमिति गाथार्थः ।।

नि.[१९७] कालो जो जावइओ जं कीरइ जंमि जंमि कालंमि ।
ओहणे नामओ पुन हवंति इक्कारसक्करणा ।।

वृ. कालो 'यः' समयादिर्यावत्परिमाणः यत्करणनिष्पत्तावपेक्षाकारणत्वेन व्याप्रियते, किमुक्तं भवति ?-यस्य भोजनादेर्यावता घटिकाद्वयादिना कालेन निष्पत्तिस्तस्य स एव कालः करणं, तस्यैव तत्र साधकतमत्वेन विवक्षितत्वात्, यदि वा यत्करणं 'क्रियते' निष्पाद्यते यस्मिन् काले तस्य स एव कालः करणं कालकरणम् अत्राधिकरणसाधनत्वेन विवक्षितत्वात्करणशब्दस्य, 'ओघेने'ति नामादिविशेषानपेक्षमेतत्कालकरणं, तथा च वृद्धाः-'कालकरणं जं जावतिएण कालेन कीरति, जंमि वा कालंमि'त्ति, इहापि कालस्याकृत्रिमत्वेन करणासम्भवादित्थमुपन्यासः, नामतः पुनर्भवन्त्येकादश 'करणानि'कालविशेषरूपाणि चतुर्यामप्रमाणानि, करणत्वं चैषां तत्तत्क्रियासधकतमत्वादिति गाथार्थः ।। कानि पुनस्तानीत्याह-

नि.[१९८] बवं च बालवं चेव, कोलवं थीविलोअणं ।
गराइ वणियं चेव, विट्ठी हवइ सत्तमी ।।

नि.[१९९] सउणि चउप्पयं नागं, किंसुग्घं करणं तहा ।
एए चत्तारि धुवा, सेसा करणा चला सत्त ।।

वृ. बवं च बालवं चैव कौलवं स्त्रीविलोचनं गरादि वणिजं चैव विष्टिर्भवति सप्तमी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शकुनि चतुष्पदं नागं किंस्तुघ्नं करणं तथा, 'एतानी'ति शकुन्यादीनि चत्वारि 'ध्रुवाणी'-त्यवस्थितानि, शेषाणि करणानि 'चलानि' अनवस्थितानि सप्तेति श्लोकद्वयार्थः ॥

कस्य पुनः क्व ध्रुवत्वमित्याह-

नि.[२००] किण्हचउद्दसिरत्तिं सउणिं पडिवज्जए सया करणं।
इत्तो अहक्कमं खलु चउप्पयं नाग किंछुग्घं ॥

वृ. कृष्णचतर्दश्या रात्रौ शकुनिः प्रतिपद्यते, स्वरूपमिति शेषः, किं कदाचिदेवेत्याह- 'सदा' सर्व्वकालम्, अनेनास्यावस्थितत्वमाह, करणं प्राग्वद्, अत ऊर्ध्वं 'यथाक्रमं' यथा-परिपाटि 'खलुः' अवधारणे ततो यथाक्रममेव, चतुष्पदं नागं किंस्तुघ्नमिति, तत्रामावास्यायां दिने चतुष्पदं रात्रौ नागं प्रतिपादि च दिने किंस्तुघ्नमिति गाथार्थः ॥

सप्तविधकरणानयनोपायप्रतिपादिकेयं पूर्वाचार्यगाथा-

"पक्खतिहितो दुगुणिया दुरूवणीहा य सुक्कपक्खंमि।
सत्तहिए देवसियं तं चिय रूवाहियं रत्तिं ॥

एसाऽत्थ भावना-अभिमयदिणंमि करणजाणणत्थं पक्खतिहितो दुगुणियत्ति-अहिगयतिहिं पडुच्च अतीयातो दुगुणिज्जंति, जहा सुद्धचउत्थीए दुगुणा अट्ठ हवंति, 'दुरुवहीणं'ति, सत्तहिए देवसियं करणं हवइ, एत्थ य भागा छच्चेव, तओ बवाइयक्कमेण चउप्पहरियकरणभावेण चउत्थिए दिवसे तो वणियं हवइ, त चिय रूवाहियं 'रत्तिं'ति रत्तीए विट्ठी, कण्हपक्खे दोरूवा न पाडिज्जंति, एवं सव्वत्थ भावणा कायव्वा भणियं च-

"किण्हनिसितईयदसमी सत्तमि चाउद्दसीसु अह विट्ठी।
सुक्कचउत्थिक्कारसिणिसि अट्ठमी पुन्निमा य दिवा ॥१॥

लौकिका अप्याहुः-

"कृतृरा सदिवा दर भूतदिवा, शुचराष्टदिवैकरपूर्णदिवा।
यदी चन्द्रगतिश्च तिथिश्च समा, इति विष्टिगुणं प्रवदन्ति बुधाः ॥२॥"

"सुद्धस्स पडिवइ निसि पंचमिदिणि अट्ठमीए राइं तु।
दिवसस्स वारसी पुण्णिमाय रत्तिं बवं होति ॥१॥
बहुलस्स चउत्थीए दिवा य तह सत्तमीएँ रत्तिंपि।
एक्कारसीए दिवसे बवकरणं होइ नायव्वं ॥२॥"

इति सम्प्रदायार्थः ॥ प्रागुद्दिष्टं भावकरणमाह-

नि.[२०१] भावकरणं तु दुविहं जीवाजीवेसु होइ नायव्वं।
तत्थ उ अजीवकरणं तं पंचविहं तु नायव्व ॥

वृ. भावः-पर्यायः तस्य करणं भावकरणं, तत्पुनः तुशब्दस्य पुनरर्थत्वात् 'द्विविधं' द्विभेदं, कथमित्याह-जीवाजीवेषु भवति 'ज्ञातव्यम्' अवबोद्धव्यं, किमुक्तं भवति ?-जीवविषय-मजीवविषयं च, तत्राल्पवक्तव्यत्वादजीवभावकरणमेवादावुपदर्शयति-'तत्थ जमजीव-करणं'ति तत्र-तयोर्द्वयोर्मध्ये यदजीवकरणं तत् 'पञ्चविधं तु' पञ्चप्रकारमेव 'ज्ञातव्यम्' अवसेयमिति गाथार्थः ॥ एतदेव स्पष्टयितुमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[२०२] वण्णरसगंधफासे संठाणे चेव होइ नायव्वं।
पंचविहं पंचविहं दुविहऽट्ठविहं च पंचविहं ॥

वृ. वर्णरसगन्धस्पर्शे संस्थाने चैव, उभयत्र विषयसप्तमी, ततो वर्णादिविषयं भवति ज्ञातव्यम्, अजीवकरणमिति प्रक्रमः, तत्र वर्णः पञ्चविधः-कृष्णादि, रसः पञ्चविधस्तिक्तादिः, गन्धो द्विभेदः-सुरभितिरश्च, स्पर्शोऽष्टविधः-कर्कशादिः, संस्थानं पञ्चविधं-परिमण्डलादि, एतद्भेदात्करणमप्येतद्विषयमेतावद्भेदमेव, अत एवाह-'पञ्चविध'मित्यादि, ननु द्रव्यकरणात्कोऽस्य विशेषः ?, उच्यते, इह पर्यायापेक्षया तथाभवनमभिप्रेतं, द्रव्यकरणे तु द्रव्यस्यैव तथा तथोत्पादो द्रव्यास्तिकमतापेक्षयेति विशेषः, उक्तं च-

"अपरप्पओगजं(ओ) जं अजीवरूवादि पज्जयावत्थं।
तमजीवभावकरणं तप्पज्जाअप्पणावेक्खं ॥१॥
को दव्वविस्ससाकरणाउ विसेसो इमस्स ? ननु भणियं।
इह पज्जयऽवेक्खाए दव्वट्ठियनमयं तं च ॥२॥"

इति गाथार्थः ॥ उक्तजीवभावकरणं, साम्प्रतं जीवभावकरणमाह-

नि.[२०३] जीवकरणं तु दुविहं सुयकरणं चेव नो य सुयकरणं।
बद्धमबद्धं च सुअं निसीहमनिसीहबद्धं तु ॥

वृ. जीवभावकरणं पुनः, तुशब्दस्य पुनरर्थत्वात्, 'द्विविधं' द्विप्रकारं, श्रुतस्य करणं श्रुतकरणं, भावकरणत्वं चास्य श्रुतस्य क्षायोपशमिकभावान्तर्गत्वात्, चैवेति पूरणे, 'नो य सुयकरणं'ति चशब्दस्य व्यवहितसम्बन्धत्वात् नोश्रुतकरणं च। तत्राद्यमभिधित्सुराह-'बद्धं' ग्रथितम् 'अबद्धं च' एतद्विपरीतं 'श्रुते' श्रुतविषयं, करणंमिति प्रक्रमः, तत्र च 'निसीहमनिसीहबद्धं तु'त्ति बद्धं द्विविधं-निशीथमनिशीथं च, तुशब्दश्चानयोरबद्धस्य च लौकिकलोकोत्तरभेदसूचकः, ततश्च निसीथं रहसि यत्पठ्यते व्याख्यायते वा, तच्च लोकोत्तरं निशीथादि लौकिकं बृहदारण्यकादि, अनिशीथमेतद्विपरीतं, तच्च लोकोत्तरमाचारादि लौकिकं पुराणादि, अबद्धमपि लौकिकलोकोत्तरभेदेन द्विभेदमेव, तत्र लोकोत्तरं यथैका मरुदेव्यत्यन्तस्थावरा सिद्धा स्वयम्भूरमणे मत्स्यपद्मयोर्वलयवर्ज्जानि सर्वसंस्थानानि सन्ति, विष्णुकुमारमहर्षेर्योजनलक्षणप्रमाणशरीरविकरणं कुरुडविकुरुडौ कुणालायां स्थितावतिवृष्ट्या च तन्नाशः तयोश्चाशुभानुभावात्सप्तमनरकपृथिवीगमनं कृणालानाशाच्च भगवतो वीरस्य त्रयोदशां समायां केवलज्ञानोत्पत्तिरित्यादि अनेकप्रकारमाचार्यपरम्परायातं, लौकिकं त्वबद्धं द्वात्रिंशदड्डिकाः षोडश करणानि पञ्च स्थानानि, तद्यथा-

आलीढं प्रत्यालीढं वैशाखं मण्डलं समपदं च, तत्रालीढं दक्षिणं पादमग्रतः कृत्वा वामपादं पृष्ठतः सारयति, अन्तरं द्वयोरपि पादयोः पञ्च पदानि, एतद्विपरीतं तु प्रत्यालीढं, वैशाखं पुनः पार्ष्णी अभ्यन्तरतः कृत्वा समश्रेण्या व्यवस्थापयति, अग्रिमतलौ बहिर्भूतौ कार्यौ, मण्डलं द्वावपि पादौ दक्षिणवामतोऽवसार्य उरू आकुञ्चति, यथा मण्डलं भवति, अन्तरं चत्वारी पादानि, समपदं पुनः स्थानं द्वावपि पादौ समौ नैरन्यर्येण स्थापयति, एतानि पञ्च स्थानान्यबद्धानि, शयनकरणं च षष्ठमिति गाथाक्षरार्थः ॥ उक्तं श्रुतकरणमधुना नोश्रुतकरणमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[२०४] नोसुयकरणं दुविहं करणं तह य जुंजणाकरणं।
गुण तवसंजमजोगा जुंजण मनवायकाए य ॥

वृ. इच ह नोशब्दस्य सर्वनिषेधाभिधायित्वात् श्रुतकरणं यन्न भवति तन्नोश्रुतकरणं, तच्च द्वेधा-गुणकरणं 'तथा च' तेनैव नोश्रुतत्वलक्षणेन प्रकारेण याजनाकरणं च, एतत्स्वरूपमाह- 'गुण'त्ति प्रक्रमाद् गुणकरणं, किमित्याह-तपश्च संयमश्च तपःसंयमौ तयोरात्पगुणयोर्योगाः- तत्करणरूपा व्यापारास्तपःसंयमयोगाः, किमुक्तं भवति?-तपःकरणम्-अनशनादि संयमकरणं च-पञ्चाश्रवविरमणादि गुणकरणमुच्यते, गुणत्वं च तपःसंयमयोः कर्म्मनिर्जराहेतुत्वेना-त्मोपकारित्वात्, 'जुंजण'त्ति योजनाकरणं 'मणवयणकाए य'त्ति चशब्दोऽवधारणे, विषयसप्तमी चेकं, ततो मनोवाक्कायविषयमेव, तत्र मनोविषयं सत्यमनोयोजनाकरणादि चतुर्धा, वाग्विषयमपि सत्यवाग्योजनाकरणादि चतुर्धैव, कायविषयं त्वौदारिककाययोजनाकरणादि सप्तधा, ततश्च द्वाभ्यां चतुष्काभ्यां सप्तकेन च मीलितेन पञ्चदशविधं योजनाकरणं, योजयति ह्येतत्पञ्चदश-विधमपि कर्म्मणा सहात्मानमिति, आह च-"मनवयणकायकिरिया पन्नरसविहा उ जुंजणा-करण"मिति गाथार्थः ॥ येन करणेनात्र प्रकृतं तदाह-

नि.[२०५] कम्मगसरीरकरणं आउअकरणं असंखयं तं तु।
तेनऽहिगारो तम्हा उ अप्पमाओ चरित्तंमि ॥

वृ. 'कर्म्मकशरीरकरणं' कार्मणदेहनिर्वर्त्तनं, तदपि ज्ञानावरणादिभेदतोऽनेकविधमित्याह- 'आयुःकरणम्' इति आयुषः-पञ्चमकर्म्मप्रकृत्यात्मकस्य करणं-निर्वर्त्तनमायुःकरणं, तत्कि-मित्याह-'असंखयं तं तु'त्ति तत्पुनरायुः करणमसंस्कृतं-नोत्तरकरणेन त्रुटितमपि पटादिव-त्सन्धातुं शक्यं, यतः-

"फुट्टा तुट्टा व इहं पडमादी संधयंति नयनिउणा।
सा कावि नत्थि नीई संधिज्जइ जीवियं जीए ॥"

एवं च 'स्वरूपतो हेतुतो विषयतश्च व्याख्ये'ति स्वरूपतो हेतुतश्च 'उत्तरकरणेण कय' मित्यादिना ग्रन्थेन व्याख्यातम्, अनेन त्वायुष्ककरणस्यासंस्कृतत्वोपदर्शनेन विषयतः, इदानीं तूपसंहारमाह-'तेनऽहिगारो'त्ति 'तेने'त्यागुःकर्मणाऽसंस्कृतेनाधिकारः, 'तम्हा उ'त्ति तस्मात् तुशब्दोऽवधारणार्थः, तस्य च व्यवहितः सम्बन्धः, ततोऽयमर्थः-यस्मादसंस्कृतमायुःकर्म्म तस्मात् 'अप्रमाद एव' प्रमादाभाव एव, 'चरित्र' इति चरित्रविषयः कर्त्तव्य इति गाथार्थः ॥ एवं च व्याख्यातं संस्कृतम्, एतद्विपरीतं चासंस्कृतमिति।

सम्प्रति सूत्रमनुश्रियते-तत्र चासंस्कृतं जीवितमिति जरोपनीतस्य न त्राणमिति च मा प्रमादीरित्युक्तेऽर्थस्यापि पुरुषार्थतया सकलैहिकामुष्विकफलनिबन्धनतया च तदुपार्ज्जनं प्रत्यप्रमादो विधेय इति केषाञ्चित्कदाशयः, यत आह-

"धनेर्दुष्कुलीनाः कुलीनाः क्रियन्ते, धनैरेव पापात्पुनर्निस्तरन्ति।
धनिभ्यो विशिष्टो न लोकेऽस्ति कश्चिद्धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥"

इति, तन्मतमपाकर्तुमाह-

मू. (११७) जे पावकम्मेहि धनं मनुस्सा, समाययंती अमतिं गहाय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पहाय ते पास पयट्टिए नरे, वेरानुबद्धा नरयं उवेंति ॥

वृ. 'य' इति ये केचनाविवक्षितस्वरूपाः 'पापकर्मभिः' इति पापोपादानहेतुभिरनुष्ठानैः 'धनं' द्रव्यं 'मनुष्याः' मनुजाः तेषामेव प्रायस्तदर्थोपायप्रवर्त्तनादित्थमुक्तं, 'समाददते' स्वीकुर्वन्ति, 'अमतिम्' इति प्राग्वन्नञः कुत्सायामपि दर्शनात् कुमतिम्-उक्तरूपां 'गहाय'त्ति गृहीत्वा सम्प्रधार्य, पठ्यते च-'अमयं गहाये'ति अशोभनं मतममतं-नास्तिकादिदर्शनम्, अथवा अमृतमिवामृतम्-आत्मनि परमानन्दोत्पादकतया तच्च प्रक्रमाद्धनं 'पहाय'त्ति प्रकर्षेण तन्मध्यादल्पस्याप्यग्रहणात्मकेन हित्वा-त्यक्त्या 'तानि'ति धनैकरसिकान् 'पश्य' अवलोकय, विनेयमेवाह, 'पयट्टिए'त्ति आर्षत्वात् स्वन एवाशुभानुभावातः प्रवृत्तान् प्रवर्त्तितान्वा, प्रक्रमात्मपापकर्मोपार्जितधनेनैव, मृत्युमुखमिति गम्यते, 'नरान्' पुरुषान्, पुनरुपादानमादरख्यापकमेकान्तक्षणिकपक्षनिरासार्थं वा, एकान्तक्षणिकपक्षे हि न यैरेव धनमुपार्जितं तेषामेव प्रवर्त्तनं, तथा च बन्धमोक्षाभावश्चेति भावः, एतच्च पश्य वैरं-कर्म्म 'वेरे' वज्जे य कम्मे य' इति वचनात् तेन अनुबद्धाः-सततमनुगताः 'नरकं' रत्नप्रभादिकं नारकनिवासम् 'उपयान्ति' तद्भवभावितया सामीप्येन गच्छन्ति, त एव मृत्युमुखप्रवृत्ता इति प्रक्रमः, यदि वा पाशा इव पाशाः-स्त्र्यादयस्तेषु प्रवृत्तास्तैर्वा प्रवर्त्तिताः पाशपवृत्ताः पाशप्रवर्त्तिता वा नरकमुपयान्तीति सम्बन्धः, ते हि द्रव्यमुपार्ज्य स्त्र्यादिष्वभिरयन्ते, तदभिरत्वा च नरकगतिभाज एव भवन्तीति भावः, शेषं प्राग्वत् ।

तदनेन सूत्रेण धनमिहैव मृत्युहेतुतया परत्र च नरकप्रापकत्वेन तत्त्वतः पुरुषार्थ एव न भवतीति तत्त्यागतो धर्म्मं प्रति मा प्रमादीरित्युक्तं भवति, नरकप्राप्तिलक्षणश्चा पायो न प्रत्यक्षेणावगम्येते (म्यत इती) हैव मृत्युलक्षणापायदर्शनमुदाहरणं, तत्र च वृद्धसम्प्रदायः-एगंमि नयरे एगो चोरो, सो रत्तिं विभवसंपण्णेसु घरेसु खत्तं खणिउं सुबहुं दविनजायं घेत्तुं अप्पणो घरेगदेसे कूवं सयमेव खणित्ता तत्थ दविनजायं पक्खिवइ, जहिच्छियं च सुक्कं दाऊण कण्णगं विवाहेउं पसूयं संतिं रत्तिं उद्दवेत्ता तत्थेवागडे पक्खिवइ, मा मे भज्जा चेडरूवाणि य परूढपणयाणि होऊण रयणाणि परस्स पयासेस्संति, एवं कालो वच्चति । अन्नया तेणेगा कन्नया विवाहिया अतीव रूवस्सिणी, सा पसूया संता तेण न मारिया, दारगो य, सो अट्ठवरिसो जाओ, तेन चिंतियं-अइचिरं कालं विधारिया, एयं पुव्वं उद्दवेउं पच्छा दारयं उद्दविस्संति, तेण सा उद्दवेउं अगडे पक्खित्ता, तेण य दारगेण गिहाओ निग्गच्छिऊण धाधाकया, लोगो मिलिओ, तेण भण्णइ-एएण मम माया मारयत्ति, रायपुरिसेहिं सुयं, तेहिं गहितो, दिट्ठो कूवो दव्वभरितो, अट्ठाणि य सूबहूणि, सो बंधिऊण रायसभं समुवणीतो जायणापगारेहिं, सव्वं दव्वं दवावेऊण कुमारेण मारितो । एवमन्येऽपि धनं प्रधानमिति तदर्थं प्रवर्त्तमानास्तदपहायैहैवानर्थावापत्तितो नरकमुपयन्तीति सूत्रार्थः ॥ इदानीं कर्मणामवन्ध्यतामभिदधत् प्रकृतमेवार्थं द्रढयितुमाह-

मू. (११८) *तेने जहा संधिमुहं गहीए, सकम्मुणा किच्चइ पावकारी ।*
एवं पया पिच्छ इहं च लोए, कडाण कम्माण न मोक्खो अत्थि ॥

वृ. 'स्तेनः' चौरः यथेति दृष्टान्तोपदर्शने सन्धिः-क्षत्रं तस्य मुखमिव मुखं-द्वारं तस्मिन् 'गृहीतः' आत्तः 'स्वकर्मणा' आत्मीयानुष्ठानेन, किम् ?-कृत्यते' छिद्यते, 'पापकारी'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पातकनिमित्तानुष्ठानसेवी, कथं पुनरसौ कृत्यत इति चेद-अत्रोच्यते सम्प्रदायः-एगंमि नयरे एगो चोरो, तेन अभिज्जतो घरगस्स फलगचियस्स पागारकविसीसगसंनिहं खत्तं खणियं, खत्ताणि अनेगागाराणि-कलसागिई नंदावत्तसंठियं पउमागिइं पुरिसागिइं च, सो य तं कविसीसगसंठियं खत्तं खणंतो घरसामिए निवेईओ, ततो तेन अद्धपविट्ठो पाएसु गहितो, मा पविट्ठो संतो पहरनेन पहरिस्सतित्ति, पच्छा चोरेणवि बाहिरत्थेण हत्थे गहिओ, सो तेहिं दोहिवि बलवंतेहि उभयहा कड्ढिज्जमाणो सयंकियपागारकविसीसगेहिं फालिज्जमाणो अत्ताणो विलवित्ति।

एवममुनैवोदाहरणदर्शितन्यायेन 'प्रजाः' हे प्राणिनः ! 'पेच्छ'त्ति पेक्षध्वं, प्राकृतत्वाद्वचनव्यत्ययः, एतच्च यत्रापि नोच्यते तत्रापि भावनीयम्, 'इह' अस्मिन् 'लोके' जन्मनि, आस्तां परलोक इत्यपिशब्दार्थः, 'कृतानां' स्वयंविरचितानां 'कर्म्मणां' ज्ञानावरणादीनां 'न मोक्षः' न मुक्तिः, ईश्वरादेरपि तद्विमोचनं प्रत्यसामर्थ्याद्, अन्यथा सकलसुखित्वाद्यापत्तेः, इदमुक्तं भवति-यथाऽसावर्थग्रहणवाञ्छया प्रवृत्तः स्वकृतनैव क्षत्रस्वननात्मकोपायेन कृत्यते, न तस्य स्वकृतकर्मणो विमुक्तिः, एवमन्यस्यापि तत्तदनुष्ठानतोऽशुभकारिणो न ततो विमुक्तिः, किन्तु तदिहापि विपच्यत एवेति, पठ्यते च-'एवं पया पेच्च इहं च'त्ति, इहापि कृत्यत इति सम्बध्यते, कृत्यत इव कृत्यते तथाविधबाधानुभवनेन, काऽसौ?-प्रजा, क्व?-'प्रेत्य' परभवे, 'इहं चे'ति इहलोके, किमिति प्रेत्येत्युच्यते-यावता इह कृतमिहैवापगतमत आह-यत् 'कृतानां' कर्म्मणां मोक्षो नास्ति ॥ इह परत्र वा वेद्यमेवावश्यं कर्मेति, अहवा 'एवं पया पेच्च इहंपि लोए, न कम्मुनो पीहति तो कयाती' एवं प्रजा ! आमन्त्रणपदमेतत्, प्रेत्येह लोके च यतः प्राणिनः कृत्यन्ते 'ता' इति ततो हेतोः 'कदाचित्' कस्मिंश्चित्काले 'ने'ति निषेधे 'कम्मुणो'त्ति कर्म्मणे प्रस्तावात् कुत्सितानुष्ठानाय स्पृहयेत्-नाभिलाषमपि कुर्याद् आस्तां तत्करणमित्याकूतं, तदभिलषणस्यापि बहुदोषत्वात्, तथा च वृद्धाः-

एगंमि नयरे एगेन चोरेण रत्तिं दुरवगाढे पासाए आरोढुं विमग्गेण खत्तं कयं, सुबहुं च दव्वाजायं नीनियं, नियघरं चऽनेन संपावियं। पहायाए रयणीए न्हाय समालद्ध सुद्धं वासो तत्थ गतो, को किं भासतित्ति जाणणत्थं, जइ तावज्ज लोगो मं न यानिस्सइ ता पुनोवि पुव्वड्डिइए चोरिस्सामीत्ति संपहारिऊण तंमि य खत्तट्ठाणे गओ, तत्थ य लोगो बहू मिलितो संलवति-कहं दुरारोहे पासए आरोढुं विमग्गेण खत्तं कयं? कहं च खुड्डुलएणं खत्तदुवारेणं पविट्ठो ?, पुणो य सह दव्वेण निग्गओत्ति। सो सुणेउं हरिसितो चिंतेइ-सच्चमेयं, किहऽहं एएण निग्गतो-त्ति ?, अप्पाणो उदरं च कडिं च पलोएउं खत्तमुहं पलोएति।

सो य रायनिउत्तेहिं पुरिसेहिं कुसलेहिं जाणितो, रायणो उवनीतो सासितो य ॥ एवं पापकर्म्मणामभिलषणमपि सदोषमिति न विदधीतेति सूत्रार्थः ॥ इह कृतानां कर्म्मणामवन्ध्यत्वमुक्तं, तत्र च कदाचित् स्वजनत एव तन्मुक्तिर्भविष्यति, अमुक्तौ वा विभज्यैवामी धनादिवद् भोक्षयन्त इति कश्चिन्मन्येत अत आह-

मू. (११९) संसारमावन्न परस्स अट्ठा, साहारणं जं च करेति कम्मं।
कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उवेति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. पाठान्तरेऽपि पापकर्मस्पृहणं सदोषमिति निषिद्धं, ततस्तत्रापि स्यादेतत-यथेह सर्वं साधारणं तथाऽमुष्मिन्नपि भविष्यत्यत आह- 'संसार'सूत्रं, संसरणं-संसारः-तेषु तेषूच्चावचेषु पर्यटनं तम् आपन्नः-प्राप्तः, 'परस्य' आत्मव्यतिरिक्तस्य पुत्रकलत्रादेः, 'अर्थात्' इति अर्थं-प्रयोजनमाश्रित्य 'साधारणं जं च'त्ति चस्य वाशब्दार्थत्वाद् भिन्नक्रमत्वाच्च साधारणं वा यदात्मनोऽन्येषां चैतद् भविष्यतीत्यभिसन्धिपूर्वकं 'करोति' निर्वर्त्तयति भवान्, कर्म्महेतुत्वात् कर्म्म क्रियत इति वा कर्म-कृष्यादिकर्म्म तस्यैव कृष्यादेः 'ते' तव हे कृष्यादिकर्म्मकर्त्तः! 'तस्य' परार्थस्य साधारणस्य वा, तुशब्दोऽपिशब्दार्थः, आस्तामात्मानिमित्तं कृतस्येत्यभिप्रायः, 'वेदनं' वेदो विपाकः तत्तत्कर्मफलानुभवनं तत्काले 'न' इति निषेधे, अवधारणफलत्वाद्वाक्यस्य नैव 'बान्धवाः' स्वजनाः, यदर्थं तत्कर्म्म कृतवान् करोषि वा ते 'बान्धवतां' बन्धुभावं तद्विभजनापनयानदिना 'उवेंति'त्ति उपयन्तीति, यतश्चैवमतस्तदुपरि प्रेमादिप्रमादपरिहारतो धर्म एवावहितेन भाव्यं, तथाविधाभीरीव्यंसकवणिग्वत्। तथा च वृद्धाः-

एगंमि नयरे एगो वाणियगो अंतरावणेसुं ववहरइ, एगा आभीरी उज्जुगा दोरूवए घेत्तूण कप्पासनिमित्तमुवट्ठिया, कप्पासो य तया समग्घो वट्टति, तेन वाणियएण एगस्स रूवस्स दो वारा तोलेउं कप्पासो दिन्नो, सा जाणइ-दोह्नवि रूवगाण दिन्नोत्ति, सा पोट्टलयं बंधिऊण गया, पच्छा वाणियतो चिंतेति-एस रूवगो मुहा लद्धो, ततो अहं एयं उवभुंजामि, तेन तस्स रूवगस्स समियं घयं गुलो विक्किणिउं घरे विसिज्जउं भज्जा संलत्ता-घयपुण्णे करेज्जासित्ति, ताए कया घयपुण्णा, जामाउगो से सवयंसो आगतो, सो ताए परिवेसिता घयपुण्णेहिं, सो भुंजिउं गतो, वाणियतो ण्हानपयतो भोयणत्थमुवगतो, सो ताए परिवेसितो साभाविएण भत्तेण, भणति-किं न कया घयउरा?, ताए भन्नति-कया, परं जामाउएण सवयंसेण खतिया?, सो चिंतेति-पेच्छ जारिसं कयं मया, सा वराई आभीरी वंचेउं परनिमित्तं अप्पा अवुन्नेण संजोईओ, सो य सचिंतो सरीरचिंताए निग्गतो, गिम्हो य वट्टति, सो मज्झण्हवेलाए कयसरीरचिंतो एगस्स रुक्खस्स हेट्ठा वीसमति, साहू य तेणोगासेण भिक्खणिमित्तं जाति, तेन सो भण्णति-भगवं! एत्थं रुक्खच्छायाए विस्सम मया समाणंति, साहुणा भणियं-तुरियं मए नियकज्जेण गंतव्वं, वणिएण भणियं-किं भवयं! कोऽवि परकज्जेणावि गच्छइ?, साहुणा भणियं-जहा तुमं चिय भज्जाइनिमित्तं किलिस्ससि, स मर्मणीव स्पृष्टः, तेनेव एक्कवयणेण संबुद्धो भणति-भयवं! तुम्हे कत्थ अच्छह?, तेन भन्नइ-उज्जाणे, ततो तं साहुं कयपज्जत्तियं जाणिऊण तस्स सगासं गतो, धम्मं सोउं भणति-पव्वयामि जाव सयणं आपुच्छिऊणं, गतो नियय घरं, बंधवे भज्जं च भणइ-जहा आवणे ववहरंतस्स तुच्छो लाभगो, ता दिसावाणिज्जं करेस्सामि, दो य सत्थवाहा, तत्थेगो मुल्लभंडं दाऊण सुहेण इट्ठपुरं पावेइ, तत्थ विढत्ते न किंचि गिण्हति, बीओ न किंचि मुल्लभंडं देति, पुव्वविढत्तं च विलुंपेति, तं कयरेण सह वच्चामि?, सयणेण भणियं-पढमेण सह वच्चसु, तेहिं सो समणुन्नातो बंधुसहितो गओ उज्जाणं, तेहिं भन्नति-कयरो सत्थवाहो?, तेन भन्नति-ननु परलोगसत्थवाहो एस साहू असोगच्छायाए उवविट्ठो नियएणं भंडेणं ववहारावेइ, एएण सह निव्वाणपट्टणं जामित्ति पव्वइतो। यथा चायं वणिक् स्वजनस्वत्तत्वमालोचयन् प्रव्रज्यां प्रत्याहृतः, तथाऽन्यैरपि विवेकिभिर्यतितव्यं, तथा च वाचकः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"रोगाघ्रातो दुःखार्दितस्तथा स्वजनपरिवृतोऽतीव।
क्वणति करुणं सबाष्पं रुजं निहन्तुं न शक्तौऽसौ ॥१॥
माता भ्राता भगिनी भार्या पुत्रस्तथा च मित्राणि।
न घ्नन्ति ते यदि रुजं स्वजनबलं किं वृथा वहसि ? ॥२॥
रोगहरणेऽप्यशक्ताः प्रत्युत धर्म्मस्य ते तु विघ्नकराः।
मरणाच्च न रक्षन्ति स्वजनपराभ्यां किमभ्यधिकम् ? ॥३॥
तस्मात् स्वजनस्यार्थे यदिहाकार्यं करोषि निर्लज्ज।
भोक्तव्यं तस्य फलं परलोकगतेन ते मूढ ! ॥४॥
तस्मात् स्वजनस्योपरि सङ्गं परिहाय निर्वृत्तो भूत्वा।
धर्म्मं कुरुष्व यत्नाद्यत्परलोकस्य पथ्यदनम् ॥५॥

इति सूत्रार्थः ॥ इत्थं तावत् स्वकृतकर्म्मभ्यः स्वजनान्न मुक्तिरित्युक्तम्, अधुना तु द्रव्यमेव तन्मुक्तये भविष्यतीति कस्यचिदाशयः स्यादत आह-

मू. (१२०) वित्तेण ताणं न लभे पमत्ते, इमंमि लोए अदुवा परत्थ।
दीवप्पणट्ठे व अनंतमोहे, नेयाउयं दट्ठुमदट्ठुमेव ॥

वृ. 'वित्तेन' द्रविनेन 'त्राणं' स्वकृतकर्मणो रक्षणं 'न लभते' न प्राप्नोति इति, कीदृक ?- 'प्रमत्तः' मद्यादिप्रमादवशगः, क्व ?- 'इमंमि'त्ति अस्मिन्ननुभूयमानतया प्रत्यक्ष एव 'लोके' जन्मनि, 'अदुवे'ति अथवा 'परत्रे'ति परभवे, कथं पुनरिहापि जन्मनि न त्राणाय ?, अत्रोच्यते वृद्धसम्प्रदायः-

एगो किल राया इंदमहाईए कम्हि ऊसवे अत्तपुरे निग्गच्छंते घोसणं घोसावेइ-जहा सव्वे पुरिसा नयरातो निग्गच्छंतु, तत्थ पुरोहियपुत्तो रायवल्लभो वेसाघरमणुपविट्ठो घोसिएऽवि न निग्गतो, सो रायपुरिसेहिं गहितो, तेन वल्लभेण न तेसिं किंचि दाऊण अप्पा विमोइतो, दप्पायमाणो विवदंतो रायसगासमुवणीतो, राइणावि वज्झो आणत्तो, पच्छा पुरोहिओ उवट्ठितो भणति- सव्वस्संपि य देमि मा मारिज्जउ, तोऽवि न मुक्को, सूलाए भिन्नो। एवमन्येऽपि न वित्तेन शरणमिहैव तावदाप्नुवन्ति, आस्तामन्यजन्मनि, तन्मूर्छावतः पुनस्तस्याधिकतरं दोषमाह- 'दीवे'त्यादि वृत्तार्द्धं, तत्र च दीवमित्येतत्पदं संस्कारमनपेक्ष्यैव निक्षेप्तुमाह निर्युक्तिकृत्-

नि. [२०६] दुविहो य होइ दीवो दव्वदीवो अ भावदीवो य।
इक्किकोऽवि अ दुविहो आसासपगासदीवो अ।

वृ. 'द्विविधश्च' द्विभेद एव भवति, दीवेति प्राकृतपदोपात्तोऽर्थो, द्रव्यभावभेदात्, तथा चाह-दव्वदीवो य भावदीवो यत्ति, पुनरयमेकैकोऽपि द्विविधः, द्वैविध्यमेवाह- 'आसास'त्ति आश्वासयति अत्यन्तमाकुलितानपि जनान् स्वस्थीकरोतीत्याश्वासः, स एव दीवत्तिपदसम्बन्धात् प्राकृतस्य शतमुखत्वादाश्वासद्वप इति भवति, तथा प्रकाशयति-घनतिमिरपटलावगुण्ठितमपि घटादि प्रकटयतीति प्रकाशः, सर्वधातूनां पचादिषु दर्शनात्, स चासौ दीप्यत इति दीपश्च प्रकाशदीपः, स च भवति दीवत्तिपदवाच्य इति गाथार्थः ॥ पुनरनयोरपि भेदमाह-

नि. [२०७] संदीनमसंदीनो संधिअमस्संधिए अ बोद्धव्वे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसासपगासे अ भावे दुविहो पुणिक्किक्को ॥

वृ. संदीयते-जलप्लावनात् क्षयमाप्नोतीति सन्दीनः, तदितरस्त्वसन्दीनः, तथा 'संजोगिमे य'त्ति संयोगिमः, यस्तैलवर्त्यग्निसंयोगेन निर्वृत्तः, असंयोगिमश्च तद्विपरीत आदित्यबिम्बादिः स ह्येक एव प्रकाशक इति 'ज्ञातव्यः' अवबोद्धव्यः, पठ्यते च-'सन्धियमस्सन्धिघ य बोद्धव्वे' इहापि 'सन्धितः' संयोजितः, तद्विपरीतस्तु 'असन्धितः' असंयोजितः, 'आसासपगासे य'त्ति आश्वासद्वीपः प्रकाशदीपश्च, यथाक्रमं चेह सम्बन्धः, तत्राश्वासद्वीपः, सन्दीनासन्दीनः, प्रकाशदीपश्च संयोगिमासंयोगिम इति, अयं च द्रव्यत एवेति व्यामोहापनयनायाह-'भावेऽपि' भावविषयोऽगि, 'दुविह'त्ति द्विधा, 'पुन'रिति प्रथमभेदापेक्षम्, 'एकैकः' इत्याश्वासद्वीपः प्रकाशदीपश्च, इदमुक्तं भवति-

यथा द्रव्यतोऽपारनीरधिविमग्नानां कदा कदैतदन्तः स्यात् इत्याकुलितचेतसामाश्वासनहेतुराश्वासद्वीपः, एवं संसारसागरमपारमुत्तरीतुमनसामात्यन्तमुद्वेजितानां भव्यानामाश्वासनहेतुः सम्यग्दर्शनं भावाश्वासद्वीपः, तत्र हि द्रव्यद्वीप इव वीचिभिः कुवादिभिरमी नोह्यन्ते नापि मकरादिभिरवानन्तानुबन्धिभिः क्रोधादिभिरतिरौद्रैरप्युपद्रूयन्ते, यथा च द्रव्याश्वासद्वीपः प्लाव्यमानतयैकः सन्दीनः तथाऽयमपि भावाश्वासद्वीपः सम्यग्दर्शनात्मकः कश्चित् क्षायोपशमिक औपशमिको वा पुनरनन्तानुबन्ध्युदये मिथ्यात्वोदयेन जलोत्पीलेनेव प्लाव्यते, ततस्तन्निबन्धनैर्जलचरैरिवानेकद्वन्द्वैरुपताप्यत इति सन्दीन उच्यते, यस्तु क्षायिकसम्यक्त्वलक्षणो न जलोत्पीलेनेव मिथ्यात्वोदयेनाक्रम्यते अत एव च न तत्स्थस्तन्निबन्धनापायैः कथञ्चिद्युज्यते असावसन्दीनो भावद्वीपः, तथा यथैव तमसाऽन्धीकृतानामपि प्रकाशदीपः तत्प्रकाश्यं वस्तु प्रकाशयति एवमज्ञानमोहितानां ज्ञानमपीति भावप्रकाशदीप उच्यते, अयमप्येकः संयोगिमोऽन्यश्चान्यथा, तत्र यः श्रुतज्ञानात्मको भावदीपः अक्षरपदपादश्लोकादिसंहतिनिर्वर्त्तितः स संयोगिमः, यस्त्वन्यनिरपेक्षा निरपेक्षतया च न संयोगिमः स केवलज्ञानात्मकोऽसंयोगिमो भावदीप इति गाथार्थः ॥ व्याख्यातं सूत्रस्पर्शिकनिर्युक्त्वा 'दीव'त्ति सूत्रपदम्, अत्र च प्रकाशदीपेनाधिकृतं, ततश्च 'दीवप्पणट्ठे वत्ति' प्रकर्षेण नष्टो-दृष्टयगोचरतां गतः प्रणष्टो दीपोऽस्येति प्राकृतत्वात्प्रणष्टदीपः, आहिताग्न्यादेराकृतिगणत्वाद्वा दीपप्रणष्टः तद्वदिति दृष्टान्तः, अत्र सम्प्रदायः-

जहां केइ धातुवाइया सदीवगा अग्गिं इंधनं च गहाय बिलमणुपविट्ठा, सो तेसिं पमाएण दीवो अग्गीवि विज्झातो, ततो ते विज्झायदीवग्गीया गुहातममोहिया इतो ततो सव्वतो परिभमंति, परिभमंता अपडियारमहाविसेहिं सप्पेहिं डक्का दुरुत्तरे अहे निवडिया, तत्थेव निहणमुवगता। एवं अनन्तः-अपर्यवसितः, तद्भवापेक्षया प्रायस्तस्यानपगमात्, मुह्यते येनासौ मोहो-ज्ञानावरणदर्शनावरणमोहनीयात्मकः, ततश्चानन्तो मोहोऽस्येति अनन्तमोहः, किमित्याह-'नेयाउयं'ति निश्चित आयो-लाभो न्यायो-मुक्तिरित्यर्थः, स प्रयोजनमस्येति नैयायिकस्तं, सम्यग्दर्शनादिकं मुक्तिमार्गमिति गम्यते, 'दट्ठुं'ति अन्तर्भूतापिशब्दार्थत्वाद्दृष्ट्वाऽपि-उपलभ्याप्यदृष्टेव भवति, तद्दर्शनफलाभावात्, अथवा 'अदट्ठुमेव'त्ति प्राकृतत्वाददृष्टैव भवति, इदमात्राकूतम्-यथैष गुहान्तर्गतः प्रमादात् प्रणष्टदीपः प्रथममुपलब्धवस्तुतत्त्वोऽपि दीपाभावे तददृष्टैव जायते, तथाऽयमपि जन्तुः कथञ्चित् कर्म्मक्षयोपशमादेः सम्यग्दर्शननादिकं मुक्तिमार्गं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावप्रकाशदीपतः श्रुतज्ञानात्मकात् दृष्टाऽपि वित्तादिव्यासक्तितस्तदावरणोदयादद्रष्टैव भवति, तथा च न केवलं स्वतस्त्राणाय वित्तं न भवति, किन्तु कथञ्चित् त्राणहेतुं सम्यग्दर्शनादिकमप्यवाप्तमुपहन्तीति सूत्रार्थं : ॥ एवं धनादिकमेव सकलकल्याणकारि भविष्यतीत्याशङ्कायां तस्य कुगतिहेतुत्वं कर्म्मणश्चाबध्यत्वमुपदर्श्य यत् कृत्यं तदाह-

मू.(१२१) सुत्तेसु आवी पडिबुद्धजीवी, नो विस्ससे पंडिय आसुपन्ने।
घोरा मुहुत्ता अबलं सरीरं, भारंडपक्खी व चरऽप्पमत्तो॥

वृ. 'सुप्तेषु' द्रव्यतः शयानेषु भावतस्तु धर्म्मं प्रत्यजाग्रत्सु, चः पादपूरणे, 'चशब्दः' समाहारेतरेतरयोगसमुच्चयावधारणपादपूरणाधिकवचनादिष्वि'ति वचनात्, अपिः सम्भावने, ततोऽयमर्थः-सुप्तेष्वप्यास्तां जाग्रत्सु च, किमित्याह-प्रतिबद्धं-प्रतिबोधः द्रव्यतो जाग्रता भावतस्तु यथावस्थितवस्तुत्त्वावगमस्तेन जीवितुं-प्राणान् धर्तुं शीलमस्येति प्रतिबद्धजीवी, यदि वा प्रतिबुद्धो-द्विधाऽपि प्रतिबोधवान् जीवतीत्येवंशीलः-प्रतिबुद्धजीवी, कोऽभिप्रायः ?- द्विधा प्रसुप्तेष्वपि अविवेकिषु न गतानुगतिकतयाऽयं स्वपिति, किन्तु प्रतिबुद्ध एव यावज्जीवमास्ते, तत्र च द्रव्यनिद्राप्रतिषेधे अगडदत्तोदाहरणं, तत्र च वृद्धवादः-

उज्जेनीए जियसत्तुस्स रन्नो अमोहरहो नाम रहितो, तस्स जसमती नाम भज्जा, तीसे अगडदत्तो नाम पुत्तो, तस्स य बालभावे चेव पिवा उवरतो। सो य अन्नया अभिक्खणं रोयमाणिं मायरं पुच्छइ, तीए निब्बंधेण कहियं-जहा एस अमोहपहारी रहिओ तुह पिउसन्तियं रिद्धिं पत्तो, तं च पच्चक्खकडुयं, तुमं च अकयविज्जं दट्टुं अंतो अईव डज्झामि, तेण भणियं-अत्थि कोई जो मं सिक्खावेति, तीए भणियं-अत्थि कोसंबीए दढप्पहारी नाम पिउमित्तो, गतो कोसंबिं, दिट्ठो दढप्पहारी ईसत्थसत्थरहचरियाकुसलो आयरितो, तेण पुत्तो विव निप्फाइओ ईसत्थे कुंतादिपाडियक्के जंतमुक्के य अन्नासुवि कलासु। अन्नया गुरुजणाणुन्नातो सिद्धविज्जो सिक्खादंसणं काउं रायकुलं गतो, तत्थ य असक्खिेडगहणाइयं जहासिक्खियं सव्वं दाइयं, जहा सव्वो जणो हयहियओ जातो, राया भणइ-नत्थि किंचि अच्छेरयं, नेव य विम्हितो, भणति-किं किं ते देमि ?, तेण विन्नवितो-सामि ? तुब्भे ममं साधुकारं न देह किं मे अन्नेण दानेनंति।

अस्सिं चेव देसकाले पुरजणवएण राया विन्नविओ-देवाणुप्पियाणं पुरे असुयपुव्वं संधिछेज्जं संपयं च दव्वहरणं परिमोसो य केणवि कयं, तं अरहंतु णं देवाणुप्पिया! नगरस्स सारक्खणं काउं, ततो आणत्तो राइणा नगरारक्खो-सत्तरत्तस्स अब्भिंतरे जहा घेप्पति तहा कुणसुत्ति, तं च सोऊण एस थक्को मम गमणस्सत्ति परिगणंतेण विन्नवितो राया, जहा-अहं सत्तरत्तस्स अब्भंतरे चोरे सामि! तुब्भपायमूलं उवणेस्सामि, तं च वयणं रायणा पडिसुयं, अनुमन्नियं च एवं कुणसुत्ति। तओ ओ हट्ठतुट्ठमाणसो निग्गतो रायकुलातो, चिंतियं च नेनं-जहा दुट्ठपुरिसतक्करा पाणागाराइट्ठाणेसु नानाविहलिंगवेसपडिच्छन्ना भमंति, अतो अहमेयाणि ठाणाणि अप्पणा चारपुरिसेहि य मग्गावेमि, मग्गावेऊण निग्गतो नयरातो, निद्धाइऊण इक्कतो एक्कस्स सीयलच्छायस्स सहयारस्स पायवस्स हेट्ठा निविट्ठो दुब्बलमयलवत्थो, चोरगहणोवायं चिंतयंतो अच्छति, नवरि जंकंपि मुणमुणायंतो तं चेव सहयारपायवच्छायमुवगतो परिव्वायतो, अंबपल्लवसाहं भंजिऊण निविट्ठो, दिट्ठो य तेण ओबद्धपिंडितो दीहजंघो, दट्ठूण य आसंकितो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हियएण-पावकम्मसूयगाइं लिंगाइं, नूनं एस चोरोत्ति, भणितो य सो परिव्वायगेण-वच्छ! कुतो तुमं किंनिमित्तं वा हिंडसि ?, ततो तेण भणियं-भयवं! उज्जेणीतो अहं पक्खीणविभवो हिंडामि, तेण भणियं-पुत्त! अहं ते विउलं अत्थसारं दलयामि, अगलदत्तो भणति-अनुग्गहिओऽम्हि तुब्भेहिं।

एव च अदंसणो गतो दिनयरो, अइक्कंता संझा, कड्डियं तेन तिदंडातो सत्थयं, बद्धो परियरो, उट्ठितो भणति-नगरं अइगच्छामोत्ति, ततो अगलदत्तो ससंकितो तं अनुगच्छइ, चिंतेति य-एस सो तक्करोत्ति, पविट्ठो नयरं, तत्थ य उत्ताणनयणपेच्छनिज्जं कस्सवि पुन्नविसेस सिरिसूयगं भवणं, तत्थ सा सिरिवच्छसंठाणं संधिं छेत्तूण अतिगतो परिवायतो, नीनीयातो अनेगभंडभरियातो पेडातो, तत्थ य तं ठवेऊण गतो, अगडदत्तेण चिंतिय-अंतगमणं करेमि, ताव य आगतो परिव्वायतो जक्खदेउलातो सइएल्लए दालिद्दपुरिसे घेत्तूण, तेन ते य ताओ पेडातो गिण्हाविया, निद्धाइया य सव्वे नयरातो भणति य परिव्वायतो-पुत्त! इत्थ जिन्नुज्जाणे मुहुत्तागं निद्दाविनोयं करेमो जाव रत्ती गलति, तत्तो गमिस्सामोत्ति, ततो तेन लवियं-ताय! एवं करेमत्ति, ततो तेहिं पुरिसेहिं ठवियाओ पेडातो, निद्दावसं च उवगया, तो सो य परिवायतो अगलदत्तो य संज्जं अत्थरिऊण अलियसुईयं काऊण अच्छंति।

तओ य अगलदत्तो सणियं उट्ठेऊण अवक्कंतो रुक्खसंछन्नो अच्छति, ते य पुरिसा निद्दावसं गया जाणिऊण वीसंभघाइणा परिव्वायएण मारिया, अगलदत्तं च तत्थ सत्थरे अपेच्छमाणो मग्गिउं पयत्तो, मग्गंतो य साहापच्छाइयसरीरेण अभिमुहमागच्छंतो अंसदेसे असिणा आहतो, गाढपहारीकतो पडितो, पच्चागयसन्नेण य भणितो अगलदत्तो-वच्छ! गिण्ह इमं असिं, वच्च मसाणस्स पच्छिमभागं, गंतूण संतिज्जाघरस्स भित्तिपासे सद्दं करेज्जासि, तत्थ भूमिघरे मम भगिनी वसति, ताए असिं दाएज्जसु, सा ते भज्जा भविस्सति, सव्वदव्वस्स य सामी भविस्ससि, अहं पुण गाढपहारो अइक्कंतजीवोत्ति। गओ य अगलदत्तो असिलट्ठिं गहाय, दिट्ठा य सा ततो भवणवासिनीविव पेच्छणिज्जा, भणइ-य-कतो तुमंति ?, दाइतो अगलदत्तेण असिलट्ठी, विसन्नवयणहिययाए सोयं निगूहंतीए ससंभमं अतीनीतो संतिज्जाघरं, दिन्नं आसनं, उवविट्ठो अगलदत्तो ससंकितो, से चरियं उवलक्खेइ य, सा अतिआयरेण सयणिज्जं रएइ, भणइ य-इत्थ वीसामं करेह, तओ न सो निद्दावसमुवगतो वक्खित्तचित्ताए, अन्नं ठाणं गंतूण ठिओ पच्छन्नं, तहिं च सयणिज्जे पुव्वसज्जिया सिला, सा ताए पाडिया चुन्निया य संज्जा, सा य हट्ठतुट्ठमाणसा भणति-हा हओ भाउघायगोत्ति, अगडदत्तोऽवि ततो निद्धाइऊण वालेसु घेत्तूण भणति-हा दासीए धीए को मं घायइत्ति ?, तओ सा पाएसु निवडिया सरणाऽऽगयामिति भणंति, तेनासासिया, मा बीहेहित्ति। सो तं घेत्तूण गतो राउलं, पूजितो रन्ना पुरजनवएण य, भोगान य भागीजातोत्ति।

एवं अन्नेऽपि अपमत्ता इहेव कल्लाणभाइणो भवंति। उक्तो द्रव्यसत्तेषु प्रतिबुद्धजीविनो दृष्टान्तः, भावसुत्तेषु तु तपस्विनः, ते हि मिथ्यात्वादिमोहितेष्वपि जनेषु यथावदवगमपूर्वकमेव संयमजीवितं धारयन्तीति, एवंविधश्च किं कुर्यादित्याह-न विश्वस्यात्, प्रमादेष्विति गम्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमुक्तं भवति ?-बहुजनप्रवृत्तिदर्शनान्नैतेऽनर्थकारिण इति न विश्रम्भवान् भवेत् 'पण्डितः' प्राग्वत्, आशु-शीघ्रमुचितकर्त्तव्येषु यतितव्यमिति प्रज्ञा-बुद्धिरस्येति-आशुप्रज्ञः, किमिति आशुप्रज्ञः ?, यतो घूर्ण्णयन्तीति घोराः-निरनुकम्पाः, सततमपि प्राणिनां प्राणापहारित्वात्, क एते ?, 'मुहूर्त्ताः' कालविशेषाः, कदाचिच्छारीरवलाद् घोरा अप्यमीन प्रभविष्यन्तीत्यत आह-'अबलं' बलविरहितं न मृत्युदायिनो मुहूर्त्तान् प्रति सामर्थ्यवत्, किं तत् ? - शरीरम्, एवं तर्हि किं कृत्यमित्याह-'भारण्डपक्खीव चरऽप्पमत्तो'इति पतत्यनेनेति पक्षः सोऽस्यास्तीति पक्षी भारण्डश्चासौ पक्षी च भारण्डपक्षी स यद्वप्रमत्तश्चरति तथा त्वमपि प्रमादरहितश्चर-विहिता-नुष्ठानमासेवस्व, अन्यथा हि यथाऽस्य भारण्डपक्षिणः पक्ष्यन्तरेण सहान्तर्वर्त्तिसाधारणचरण-सम्भवात् स्वल्पमपि प्रमाद्यतोऽवश्यमेव मृत्युः तथा तवापि संयमजीविताद् भ्रंश एव प्रमाद्यत इति सूत्रार्थः ॥ अमुमेवार्थं स्पष्टन्नाह-

मू. (१२२)   चरे पयाइं परिसंकमाणो, जं किंचि पासं इह मन्नमाणो ।
लाभंतरे जीविय वूहइत्ता, पच्छा परिन्नायमलावधंसी ॥

वृ. 'चरेत्' गच्छेत 'पदानि' पादविक्षेपरूपाणि 'परिशङ्कमानः' अपायं विगणयन्, किमित्ये-वमत आह-'यत्किञ्चिद्' गृहस्थसंस्तवाद्यल्पमपि पाशमिव पाशं संयमप्रवृत्तिं प्रति स्वातन्त्र्योपरोधितया 'मन्यमानो' जानानः, यद्वा 'चरेदि'ति संयमाध्वनि यायात्, किं कुर्वन् ?-'पदानि' स्थानानि, धर्म्मस्येति गम्यते, तानि च मूलगुणादीनि 'परिशङ्ककानो' मा ममेह प्रवर्त्तमा-नस्य मूलगुणेषु मालिन्यं स्खलना वा भविष्यतीति परिभावयन् प्रवर्त्तेत, 'जं किंचि' त्ति यत्किञ्चिदल्पमपि दुश्चिन्तितादि प्रमादपदं मूलगुणादिमालिन्यजनकतया बन्धहेतुत्वेन पाशमिव पाशं मन्यमानः, तदयमुभयत्राभिप्रायः-यथा भारण्डपक्षी अपरसाधारणार्न्वर्त्तिचरणतया पदानि परिशङ्कमान एव चरति यत्किञ्चिद्दवरकादिकमपि पाशं मन्यमानः, तथाऽप्रमत्तश्चरेत्, ननु यदि परिशङ्कमानश्चरेत्तर्हि सर्वथा जीवितनिरपेक्षेणैव प्रवर्त्तितव्यं, तत्सापेक्षतायां हि कदाचि-त्कथञ्चिदुक्तदोषसम्भव इत्याशङ्क्याह-'लाभंतरे'त्यादि वृत्तार्द्ध, लम्भनं लाभः-अपूर्वार्थप्राप्तिः अन्तरं-विशेषः, लाभश्चासावन्तरं च लाभान्तरं तस्मिन् सतीत्यर्थः, किमुक्तं भवति ?

यावद्विशिष्टविशिष्टतरसम्यग्ज्ञानदर्शनचारित्रवाप्तिरितः सम्भवति तावदिदं 'जीवितं' प्राणधारणात्मकं 'बृंहयित्वा' अन्नपानोपयोगादिना वृद्धिं नीत्वा, तदभावे प्रायस्तदुपक्रमणसम्भ-वादित्थमुक्तं, 'खुहा पिवासा य वाही य'त्ति वचनात् क्षुदादीनामप्युपक्रमणकारणत्वेनाभिधानाद्, इह च बृंहयित्वेव बृंहयित्वेति व्याख्येयम्, अन्यथा ह्यसंस्कृतं जीवितमिति विरुध्यत इति भावनीयं, ततः किमित्याह-'पश्चात्' लाभविशेषप्राप्त्युत्तरकालं 'परिन्नाय'त्ति सर्वप्रकारैरवबुध्य यथेदं नेदानीं प्राग्वत्सम्यग्दर्शनादिविशेषहेतुः, तथा च नातो निर्जरा, न हि जरया व्याधिना वा अभिभूतं तत् तथाविधधर्माधानं प्रति समर्थम्, उक्तं हि-

"जरा जाव न पीलेति, वाही जाव न वड्ढति ।
जाविंदिया न हायंति, ताव धम्मं समायरे ॥"

एवं ज्ञपरिज्ञया परिज्ञया ततः प्रत्याख्यानपरिज्ञया च भक्तं प्रत्याख्याय, सर्वथा जीवित-निरपेक्षो भूत्वेति भावः, मलवदत्यन्तमात्मनि लीनतया मलः-अष्टप्रकारं कर्म्म तदपध्वंसत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवंशील: मलापध्वंसी-मलविनाशकृत, स्यादिति शेष:, ततो यावल्लाभं देहधारणमपि गुणायैवेति भाव:, यद्वा जीवितं बृंहयित्वा लाभान्तरे-लाभविच्छेदेऽन्तर्बहिश्च मलाश्रयत्वान्मल:-औदारिकशरीरं तदपध्वंसी स्यात्, कोऽर्थ: ?-जीवितं त्यजेद्, इदमुक्तं भवति-अयमस्यैको हि गुणो मानुष्यमवाप्य लभ्यते धर्म्म इति भावयन् यावदितस्तल्लाभ: तावदिदं बृंहयेत्, लाभविच्छेदं सम्भाव्य संलेखनादिविधानतस्त्यजेत् ॥ इह च यावल्लाभधारणे मण्डिकचौरोदाहरणं, तत्र च सम्प्रदाय:-

बिन्नागयडे नयरे मंडितो नाम तुन्नातो परदव्वहरणपसत्तो आसी, सो य दुट्ठगंडो मित्ति जने पगासेंतो जाणुदेसेण निच्चमेव अद्दयालेवलित्तेण रायमग्गे तुन्नागस्स सिप्पमुवजीवति, चकंमतोऽवि य दंडधरिएणं पाएण किलिस्संतो कहिंवि चकमति, रत्तिं च खत्तं खणिऊण दव्वजायं घेत्तूण नगरसंनिहिए उज्जानेगदेसे भूमिघरं, तत्थ निक्खिवति, तत्थ य से भगिनी कन्नगा, चिट्ठति, तस्स भूमिधरस्स मज्झे कूवो, जं च सो चोरो दव्वेण पलोभेउं सहायं दव्ववोढारं आणेति तं सा से भगिनी अगडसमीवे पुव्वणत्थासणे निवेसेउं पायसोयलक्खेण पाए गिण्हिऊण तम्मि कूवे पक्खिवइ, ततो सो तत्थेव विवज्जइ, एवं कालो वच्चति नयरं मुसंतस्स, चोरगाहा तं न सक्किति गिण्हिउं, तओ नयरे उवरतो जातो।

तत्थ मूलदेवो राया, सो कहं राया संवुत्तो ?-उज्जेनीए नयरीए सव्वगणियापहाणा देवदत्ता नाम गणिया, तीए सद्धिं अयलो नाम वाणियदारतो विभवसंपन्नो मूलदेवो य संवसइ, तीए मूलदेवो इट्ठो, गणियामाऊए अयलो, सा भणति-पुत्ति ! किमेएणं जूइकारेणंति ?, देवदत्ताए भन्नति-अम्मो ! एस पण्डितो, तीए भन्नइ-किं एस अम्ह अब्भहियं विन्नाणं जाणति, अयलो बाहत्तरिकलापंडिओ एव, तीए भन्नत्ति-वच्छ ! अयलं भण-देवदत्ताए उच्छुं खाइउं सद्धा, तीए गंतूण भणितो, तेन चिंतियं-कओ खु ताइं अहं देवदत्ताए पणतितो, तेन सगडं भरेऊण उच्छुयलट्ठीण उवणीयं, ताए भण्णति-किमहं हत्थिणी ?, तीए भणियं-वच्च मूलदेवं भण-देवदत्ता उच्छुं खाइउं अहिलसति, तीए गंतूण से कहियं, तेन य कइ उच्छुलट्ठीतो छल्लेउं गंडलीतो काउंचाउज्जायगादिसुवासियातो काउं पेसियाओ, तीए भण्णति-पिच्छ विण्णाणंति, सा तुण्हिक्का ठिया, मूलदेवस्स पओसमावन्ना अयलं भणति-अहं तहा करेमि जहा मूलदेवं गिण्हिस्सित्ति, तेन अट्ठसयं दीनाराण तीए भाडिनिमित्तं दिन्नं, तीए गंतुं देवदत्ता भन्नति-अज्ज अयलो तुमे समं वसिही, इमे दीनारा दत्ता, अवरण्हवेलाए गंतुं भणति-अयलस्स कज्जं तुरियं जायं तेन गामं गतोत्ति, देवदत्ताए मूलदेवस्स पेसियं, आगतो मूलदेवो,

तीए समाणं अच्छइ, गणिया माऊण अयलो य अप्पाहितो, अन्नाओ पविट्ठो बहुपुरिससमग्गो वेढिउं गब्भगिहं, मूलदेवो अइसंभमेण सयणीयस्स हिट्ठा निलुक्को, तेन लक्खितो, देवदत्ताए दासचेडीतो संवुत्तातो अचलस्स सरीरऽब्भंगादि घेत्तु उवट्ठिया, सो य तंमि चेव सयणीए ठियनिसन्नो भणइ-इत्थ चेव सयणीए ठियं अब्भंगेहि, तातो भणंति-विनासिज्जइ सयणीयं, सो भणइ-अहं एत्तो उक्किट्ठतरं दाहामो, मया एवं सुविनो दिट्ठो, सयणीयऽब्भंगणउव्वलणण्हानादि कायव्वं, ताहिं तधा कयं, ताहे ण्हाणगोल्लो मूलदेवो अयलेण वालेसु गहाय कड्ढितो, संलत्तो यऽनेन-वच्च मुक्कोऽसि, इयरहा ते अज्ज अहं जीवियस्स विवसामि, जदि मया जारिसो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होज्जादि ता एवं मुच्चेज्जाहि(त्ति) अयलाभिहितो तओ मूलदेवो अवमानितो लज्जाए निग्गओ उज्जेनीए, पत्थयणविरहितो बेन्नायडं जतो पत्थितो,

एगो से पुरिसो मिलितो, मूलदेवेन पुच्छितो-कहिं जासि ?, तेन भन्नति-बिन्नायतडंमि, मूलदेवेन भण्णति-दोऽवि समं वच्चामोत्ति, तेन संलत्तं-एवं भवउत्ति, दोऽवि पट्ठिया, अंतरा य अडवी, तस्स पुरिसस्स संबलं अत्थि, मूलदेवो विचिंतेइ-एसो मम संबलेण संविभागं करेहिंत्ति, इण्हि सुते परे ताए आसाए वच्चति, न से किंचि देइ, तइयदिवसे छिन्ना अडवी, मूलदेवेन पुच्छितो-अत्थि एत्थ अब्भासे गामो ?, तेन भन्नति-एस नाइदूरे पंथस्स गामो, मूलदेवेन भणितो-तुमं कत्थ वससि ?, तेन भण्णति-अमुगत्थ गामे, मूलदेवेन भणितो-तो खाइ अहं एयं गामं वच्चामि, तेन से पंथो उवदिट्ठो, गओ तं गामं मूलदेवो, तत्थऽनेन भिक्खं हिंडंतेन कुम्मासा लद्धा, पवन्नो य कालो वट्टति, सो य गामातो निगच्छइ, साहू य मासखमण-पारणएण भिक्खानिमित्तं पविसति, तेन य संवेगमावन्नेणं पराए भत्तीए तेहिं कुम्मासेहिं सो साधू पडिलाभितो, भणियं चऽनेनं-'धन्नाणं खु नराणं कोम्मासा हुंति साहुपारणए' देवयाए अहासन्निहियाए भन्नति-पुत्त ! एतीए गाहाए पच्छद्धे जं मग्गसि तं देमि,

गणियं च देवदत्तं दंतिसहस्सं च रज्जं च ॥

देवयाए भण्णति-अचिरेण भविस्सतित्ति, ततो गतो मूलदेवो बेन्नायडं, तत्थ खत्तं खणंतो गहितो, वज्झाए नीणिज्जइ, तत्थ पुण अपुत्तो राया मओ, आसो अहियासिओ, मूलदेव-सगासमागतो, पट्ठिदायणं रज्जे अहिसित्तो राया जाओ, सो पुरिसो सद्दाविओ, सो अनेण भणितो-तुब्झं तणियाए आसाते आगतो अहं, इहरहा अहं अंतराले चेव विवज्जंतो, तेन तुज्झं एस मया गामो दत्तो, मा य मम सगासं एज्जसुत्ति, पच्छा उज्जेणीएण रन्ना सद्धिं पीतिं संजोएति, दाणमाण-संपूतियं च काउं देवदत्तं अनेण मग्गितो, तेन पच्चुवगारसंधिएण दिन्ना, मूलदेवेन अंतेउरे छूढा, ताए समं भोगे भुंजति ।

अन्नया अयलो पोयवहणेण तत्थागतो, सुक्के विज्जंते भंडे जातिं पाए दव्वनूमणाणि ठाणाणि तानि जानमाणेण मूलदेवेन सो गिण्हावितो, तुमे दव्वं नूमियंति पुरिसेहिं बद्धिऊण रायसयासमुवणीतो, मूलदेवेन भण्णति-तुमं मम जानसि ?, सो भणति-तुमं राया को तुमं न जाणइ ?, तेन भण्णइ-अहं मूलदेवो, सक्कारिउं विसज्जितो, एवं मूलदेवो राया जातो। ताहे सो अन्नं नगरारक्खियं ठवेति, सोऽवि न सक्को चोरं गिण्हिउं, ताहे मूलदेवो सयं नीलपडं पाउणिऊण रत्तिं निग्गतो, मूलदेवो अनज्जंतो एगाए सभाए निविन्नो अच्छति, जाव सो मंडियचोरो आगंतूण भणति-को इत्थ अच्छति ?, मूलदेवेन भणियं-अहं कप्पडितो, तेन भण्णइ-एहि मनूसं करेमि, मूलदेवो उट्ठितो, एगंमि ईसरघरे खत्तं खयं, सुबहु दव्वजायं नीनेऊण मूलदेवस्स उवरिं चडाविउं पट्ठिया नयरबाहिरियं, जातो मूलदेवो पुरतो, चोरो असिणा कड्ढिएण पिट्ठओ एइ, संपत्ता भूमिघरं, चोरो ते दव्वं निहिणिउमारद्धो भणिया अनेन भगिणी-एयस्स पाहुणयस्स पायसोयं देहि, ताए कूवतडसन्निविट्ठे आसणे संणिवेसितो, ताए पायसोयलक्खेण पाओ गहिओ कूवे छुहामित्ति, जाव अतीव सुकुमारा पाया, ताए नायं-जहेस कोइ भूयपुव्वरज्जो विहलियगो, तीए अनुकंपा जाया, तओ ताए पायतले सन्नितो नस्सत्ति, मा मारिज्जिहिसित्ति, ततो पच्छा सो पलातो, ताए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोलो कतो नट्ठो नट्ठोत्ति, सो असिं कड्डिऊण मग्गतो लग्गो, मूलदेवो रायप्पहे अइसन्निकिट्ठं नाऊण चच्चरसिवंतरितो ठितो, चोरो तं सिवलिंगं एस पुरिसोत्ति काउं कंकग्गेण असिणा दुहा काऊण पडिनियत्तो, गतो भूमिघरं, तत्थ वसिऊण पहायाए रयणीए तओ निग्गंतूण गतो वीहिं, अंतरावणे तुन्नागत्तं करेति, रायणा पुरिसेहि सद्दावितो,

तेन चिंतियं-जहा सो पुरिसो नूनं न मारितो, अवस्सं च सो एस राया भविस्सइत्ति, तेहिं पुरिसेहिं आनितो, रायणा अब्भुट्ठाणेण पूइतो, आसणे निवेसावितो, स बहुं च पियं आभासिउं संलत्तो-मम भगिनीं देहित्ति, तेन दिन्ना, विवाहिया, रायणा भोगा य से संपदत्ता, कइसुवि दिणेसु गएसु रायणा मंडितो भणिओ-दव्वेण कज्जंति, तेन सुबहुं दव्वजायं दिन्नं, रायणा संपूइतो, अन्ना पुनो मग्गितो पुनोऽवि दिन्नं, तस्स य चोरस्स अतीव सक्कारसम्माणं पउंजति, एएण पगारेण सव्वं दव्वं दवावितो, भगिणी से पुच्छति, ताए भण्णति-इत्तियं वित्तं, तआ पुव्वावेइयलक्खाणुसारेण सव्वं दवावेऊणं मंडितो सूलाए आरोवितो ॥ दृष्टान्तानुवाद-पूर्वकोऽयमिहोपनयः-यथाऽयमकार्यकार्यपि मण्डिको यावल्लाभं मूलदेवनृपतिना धारितः तथा धर्मार्थिनाऽपि संयमोपहतिहेतुकमपि जीवितं निर्जरालाभमभिलषता तल्लाभं यावद्धार्यमिति, न च तद्धारणे संयमोपरोध एव, यथाऽऽगमं हि प्रवृत्तस्य तत्तदुपष्टम्भकमेवेति भावनीयम्, इत्यलं प्रसङ्गेनेति सूत्रार्थः ॥ सम्प्रति यदुक्तं 'जीवितं बृंहयित्वा मलापध्वंसी स्यादि'ति तत्किं स्वान्त्र्यत एव उता यथेत्याह-

मू. (१२३) छंदंनिरोहेण उवेति मुक्खं, आसे जहा सिक्खियवम्मधारी ।
पुव्वाइ वासाइ चरऽप्पमत्तो, तम्हा मुनी खिप्पमुवेति मुक्खं ॥

वृ. छन्दो-वशस्तस्य निरोधः छन्दोनिरोधः-स्वच्छन्दतानिषेधः तेन 'उपैति' उपयाति 'मोक्षं' मुक्तिं, कि मुक्तं भवति ?-गुरुपरतन्त्रतया स्वाग्रहाग्रहयोगितां विना तत्र प्रवर्त्तमानोऽपि संक्लेशविकल इति न कर्म्मबन्धभाक्, किन्त्वविकलचरणतया तन्निर्जरणमेवाप्नोति, अप्रवर्त्त-मानोऽपि चाहारादिष्वाग्रहग्रहाकुलिचचेताः 'छट्ठट्ठमदसमे'त्यादिवचनादनन्तसंसारिताद्यनर्थ-भागेव भवति, तत्सर्वथा तत्परतन्त्रेणैव मुमुक्षुणा भाव्यं, तस्यैव सम्यग्ज्ञानादिसकलकल्याण-हेतुत्वाद्

"नाणस्स होइ भागी थिरयरतो दंसणे चरित्ते य ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥"

यद्वा छन्दसा-गुर्वभिप्रायेण निरोधः-आहारादिपरिहाररूपः छन्दोनिरोधः तेनैवोक्तन्यायतो मुक्त्यवाप्तिः, तत्तद्वस्तुविषयाभिलाषात्मिका इच्छा वा छन्दः तन्निरोधेन मुक्तिः, तस्या एव तद्विबन्धकत्वात, तथा च लौकिका अप्याहुः-

"श्लोकार्धेन हि तद्वक्ष्ये, यदुक्तं ग्रन्थकोटिभिः ।
तृष्णा च सं(चेत्सं) परित्यक्ता, प्राप्तं च परमं पदम् ॥"

अथवा छन्दो वेद आगम इत्यनर्थान्तरं, ततः छन्दसा 'आणाए च्चिय चरण'मित्यादिना निरोधः-इन्द्रियादिनिग्रहात्मकः छन्दोनिरोधः तेनोपैति मोक्षं, न तु सर्वथा जीवितं प्रत्यनपेक्षतया, तथा च समयविदः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सव्वत्थ संजमं संजमातो अप्पाणमेव रक्खिज्जा।
मुच्चइ अइवायातो पुणोऽवि सोही न याविरती ॥"

अत्रोदाहरणमाह-अश्वो यथा 'शिक्षितो' वल्गनप्लवनधावनादिशिक्षां ग्राहितो वृणोति-आच्छादयति शरीरकमिति वर्म्म-अश्वतनुत्राणं तद्धरणशीलो वर्म्मधारी, शिक्षितश्चासौ वर्म्मधारी च शिक्षितवर्म्मधारी, अनेन शिक्षकतन्त्रतयाऽस्य स्वान्त्र्यापोहमाह, ततोऽयमर्थः-यथाऽश्वः स्वान्त्र्यविरहात्प्रवर्त्तमानः समरशिरसि न वैरिभिरुपहन्यत इति तन्मुक्तिमाप्राप्नोति, स्वतन्त्रस्तु प्रथममशिक्षितो रणमवाप्तस्तैरुपहन्यते, अत्र च सम्प्रदायाः-

एगेन रायणा दोण्हवि कुलपुत्ताणं दो आसा दिन्ना सिक्खावणपोसणत्थं, तत्थेगो कालोचिएण जवसोगासणेणं संरक्खमाणो धावियलालियवग्गियाईयातो कलातो सिक्खावेइ, बीओ को एयस्स इट्टजवसजोगासणं दाहिइत्ति घरेट्ट वाहेइ न तु सिक्खावेइ, सेसं अप्पणा भुंजति। संगाम-काले उवट्ठिए ते रन्ना वुत्ता-तेसु चेवास्सेसु आरोढुं झत्ति आगच्छह, संपत्ता, भणिया य राइणा-पविसह संगामं, तत्थ पढमोऽसि सिक्खागुणत्तणतो सारहियमणुयत्तमाणो संगामपारतो जातो, दुइओ विसिट्ठसिक्खाभावतोऽसब्भावभावणाभावियत्तणओ गोधूमजंतगजुत्त इव तत्थेव भमिउमाढत्तो, तं च परा उवलक्खेउं हयसारहिं काऊण गृहीतवन्तः।

दृष्टान्तानुवादपूर्वकोऽयमुपनयः-यथाऽसावश्वः, तथा धर्मार्थ्यपि स्वातन्त्र्यविरहितो मुक्ति-मवाप्नोति, अत एव च 'पूर्वाणि' उक्तपरिमाणानि 'वर्षाणि' वत्सराणि, कालात्यन्तसंयोगे द्वितीया, किमित्याह-'चर' इति सततमागमक्रियामासेवस्य, कथम् ?-'अप्रमत्तः' गुरुपारन्त्र्यापहारिप्रमादपरिहर्ता, 'तम्हे'त्ति तस्मात् अप्रमादचरणादेव, मन्यते जानाति जीवा-दिनीति मुनिः-तपस्वी 'क्षिप्रं' शीघ्रम् उपैति मोक्षं, ननु छन्दोनिरोधोऽपि तत्त्वतोऽप्रमादात्मक एवेति कथं न पुनरुक्तदोषः ?, उच्यते, अप्रमाद एवादरः कार्य इति ख्यापनार्थत्वादध्ययना-र्थोज्जीवनार्थत्वाच्चास्य न पौनरुक्त्यमिति भावनीयं, पूर्वाणि वर्षाणीति च एतावदायुषामेव चारित्रपरिणतिरिति दर्शनार्थमुक्तमिति सूत्रार्थः॥ ननु यदि छन्दोनिरोधेन मुक्तिः, अयमन्त्यकाल एव तर्हि विधीयतामित्याहशङ्क्याह, यद्वा यदि पश्चान्मलापध्वंसी स्यात् तदैव छन्दोनिरोधा-दिकमपि तद्धेतुभूतमस्त्वत आह-

मू. (१२४) स पुव्वमेवं न लभेज्ज पच्छा, एसोवमा सासयवाइयाणं।
विसीदति सिढिले आउयंमि, कालोवणीए सरीरस्स भेए॥

वृ. 'स' इति यत्तदोर्नित्याभिसम्बन्धात् यः प्रथममेवाप्रमत्ततया भावितमतिर्न भवति स तदात्मकं छन्दोनिरोधं 'पुव्वमेवं'ति एवंशब्दस्यात्रोपमार्थत्वात्पूर्वमिवान्त्यकालात् मलापध्वं-ससमयाद्वा अभावितमतित्वात्, 'न लभेत्' न प्राप्नुयात्, सम्भावने लिट्, ततश्च लाभसम्भाव-नाऽपि न समस्ति, किं पुनस्तल्लाभ इति, 'पश्चात्' अन्त्यकाले मलापध्वंससमये वा, 'एसोवम'त्ति एषा-अनन्तरमभिहितस्वरूपा उप-सामीप्येन मीयते-परिच्छिद्यते स्वयंप्रसिद्धया अपरमप्रसिद्धं वस्त्वनयेत्युपमा, केषां ?-शाश्वता इव वदितुं शीलमेषामिति शाश्वतवादिनः उष्ट्रक्रोशिवत् कर्त्तर्युपमाने इति निनिः, तेषां शाश्वतवादिनाम्-आत्मनि मृत्युनियतकालभाविनपश्यताम्, इदमिहाकूतं, यो हि छन्दोनिरोधमुत्तरकालमेव करिष्यामीति वक्ति सोऽवश्यं शाश्वतवादी, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैवं प्रज्ञाप्यते-यथा भद्र! इदानीं भवतस्तत्कालात्पूर्वमसावुक्तहेतुतो न समस्ति, तथोत्तरकालमप्यसौ प्रमादिनस्तव न भवितेति, यदि वा एषा उपमेति-उपेत्युवयोगपूर्वकं मेति ज्ञानमुपमा-सम्प्रधारणा यदुत पश्चाद्धर्मं करिष्यामः इति शाश्वतवादिनां-निरुपक्रमायुषां, ये निरुपक्रमायुष्कतया शाश्वतमिवात्मानं मन्यन्ते तेषां युज्येतापि, न तु जलबुद्बुदसमानायुषां, तथा चासावुत्तरकालमपि छन्दोनिरोधमनाप्नुवन 'विषीदति' कथमहमकृतसुकृतः सम्प्रत्यनर्वाक्पारं भवाम्भोधिं भ्राम्यान् भविष्यामीत्येवमात्मकं वैक्लव्यमनुभवति, कदा?-शिथिलयति-आत्मप्रदेशान् मुञ्चति 'आयुषि' मनुष्यभवोपग्राहिण्यायुः कर्म्मणि, 'कालोवणीय'त्ति कालेन-मृत्युना स्वस्थितिक्षयलक्षणेन वा समयेनोपनीतः-उपढौकितः तस्मिन्, क्व? इत्याह-'शरीरस्य' औदारिककायात्मकस्य 'भेदे' सर्वपरिशाटतः पृथग्भावे, तदिदमैदम्पर्यम्-आदित एव न प्रमादवद्भिर्भाव्यं, तथा चाह-

"गमनं किमद्य किं श्वः कदाऽपि वा सर्वथा ध्रुवं क्वापि?।
इति जानन्नपि मूढस्तथापि मोहात्सुखं शेते ॥"

इति सूत्रार्थः ॥ किं पुनः पूर्वमिव पश्चादपि छन्दोनिरोधं न लभत इत्याह-

मू.(१२५) *खिप्पं न सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे।*
समेच्च लाभं समता महेसी, आयाणरक्खी चरमप्पमत्तो ॥

वृ. 'क्षिप्रं' तत्क्षण एव 'न शक्नोति' न समर्थो भवति, किं कर्त्तुम्?-'एतुं' गन्तुं प्रासुमितियावत्, कम्?-'विवेकं' द्रव्यतो बहिःसङ्गपरित्यागरूपं भावतस्तु कषायपरिहारात्मकं, न ह्यकृतपरिकर्म्मा झगिति तत्परित्यागं कर्त्तुमलम्, अत्रोदाहरणं ब्राह्मणी-

एगो मरुतो परदेसं गंतूण साहापारतो होऊण सविसयमागतो, तस्सऽन्नेण मरुतेन स्वद्धपलालितोकाउं दारिकादत्ता, सो य लोए दक्खिणातो लहति, परे विभवे वड्ढति तेन सीसे भारियाए सुबहुं अलंकारं कारियं, सा निच्चमंडिया अच्छइ, तेन भण्णइ-एस पच्चंतगामो, ता तुमं एयाणि आभरणगाणि तिहिपव्वणीसु आविंधाहि, कहिंचोरा उवगच्छेज्जा तो सुहं गोविज्जंति, सा भणइ-अहं ताए वेलाए सिग्घभावे अवनेस्संति। अन्नया तत्थ चोरा पडिया, तमेव निच्चमंडियागिहं अनुपविट्ठा, सा तेहिं सालंकिया गहिया, सा य पणीयभोयणत्ता मंसोवचित्तपाणीपाया न सक्केइ कडगाईणि अवणेउं, ततो चोरेहिं तीसे हत्थे छेत्तूण अवनीया, गेण्हिउं च निग्गया।

एवमन्योऽपि प्रागकृतपरिकर्म्मा न तत्काल एव विवेकमेतुं शक्नोति, मलापध्वंसस्तं तथा सति दूरापास्त एवेति, न च मरुदेव्युदाहरणं तत्राप्यभिधेयम्, आश्चर्यरूपत्वादस्य, न ह्येवं तीव्रभावा बहवः सम्भवन्ति, यत एवं तस्मात् 'सम्' इति सम्यक्प्रवृत्त्या 'उत्थाये'ति च पश्चाच्छन्दो निरोत्स्याम इत्यालस्यत्यागेनोद्यमं विधाय, तथा 'पहाय कामे'त्ति प्रकर्षेण-मनसाऽपि तदचिन्तनात्मके 'हित्वा'त्यक्त्वा कामान् इच्छामदनात्मकान् 'समेत्य' सम्यग्ज्ञात्वा 'लोकं' समस्तप्राणिसमूहं, कया?-'समतया' समशत्रुमित्रतया क्वचिदक्तद्विष्टतयेतियावत्, तथा च महर्षिः, सन् महः-एकान्तोत्सवरूपत्वान्मोक्षस्तमिच्छतीत्येवंशीलो महैषी वा, किमुक्तं भवति?-विषयाभिलाषविगमान्निर्निदानः सन् आत्मानं रक्षत्यपायेभ्यः कुगतिगमनादिभ्य इत्येवंशील आत्मरक्षी, यद्वाऽऽदीयते-स्वीक्रियते आत्महितमनेनेत्यादानंः-संयमः तद्रक्षी 'चरमप्पमत्तो'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकारोऽलाक्षणिकः, ततश्चराप्रमत्तः-प्रमादरहितः, इह च प्रमादपरिहारापरिहारयोरैहिकमुदाहरणं वणिग्महिला, तत्र च सम्प्रदायः-

एगा वणिगमहिला पउत्थपतिया सरीरसुस्सूसापरा दासभयगकम्मकरे निजनिजभियोगेसु न नियोजयति, न य तेसिं कालोववन्नं जहिच्छं आहारं भतिं वा देति, ते सव्वे नट्ठा, कम्मंतपरिहानीए विभवपरिहानी, आगतो वाणियओ एवंमिहं पस्सिऊण पच्छा तेन निच्छूढा। अन्नं तु पुक्खलेणं सुंकेणं वरेति, लद्धा य नेन, तेन तीसे नियगा भण्णंति-जइ अप्पाणं रक्खइ ता परिनेमित्ति, ताए यऽमुणियपरमत्थाए दुग्गयकन्नगाए सोउं नियगा भण्णंति रक्खामि(क्खिहिइ)-अप्पगं, सा तेन विवायिा, गतो वाणिज्जेणं, सावि दासभयगकम्मकरातीणं संदेसं दाउं तेसिं पुव्वाण्हिकाइकाले भोयणं देइ, महुराहिं च वायाहिं उच्छाहेइ, भइं च तेसिं अकालपरिहीनं देइ, न य नियगसरीरसुस्सूसापरा, एवमप्पाणं रक्खंतीए भत्ता उवागओ, सो एवंविहं पस्सिऊण तुट्ठो, तेन सव्वसामिणी कया। इत्थं तावदिहैव गुणायाप्रमादो दोषाय च प्रमादः आस्तामन्यजन्मनीत्यभिप्रायेणात्रैवैहिकोदाहरणाभिधानमिति परिभावनीयमिति सूत्रार्थः ॥

प्रमादमूलं च रागद्वेषाविति सोपायं तत्परिहारमाह-

मू. (१२६) मुहुं मुहुं मोहगुणे जयंतं, अनेगरुवा समणं चरंतं।
फासा फुसंती असमंजसं च, न तेसु भिक्खू मनसा पउस्से ॥

वृ. 'मुहूर्मुहुः' वारं वारं, सततप्रवृत्त्युपलक्षणमेतत्, मोहयति-जानानमपि जन्तुमाकुलयति प्रवर्त्तयति चान्यथेहेति मोहः तस्य गुणाः मोहगुणाः-तदुपकारिणः शब्दादयः, तान् 'जयंतं' अभिभवन्तं, किमुक्तं भवति?-अविच्छेदतस्तज्जयप्रवृत्तं यद्वा कथञ्चिन्मोहनीयात्यन्तोदयत एकदा तैः पराजितमपि पुनः पुनस्तज्जयं प्रति प्रवर्त्तमानं न तु तत एव विमुक्तसंयमोद्योगम्, 'अनेकरूपाः' अनेकमिति-अनेकविधं परुषविषमसंस्थानादिभेदं रूपं-स्वरूपमेषामिति अनेकरूपाः, श्रमणं चरन्तं प्राग्वत्, 'फास'त्ति स्पृशन्ति स्वानि स्वानीन्द्रियाणि गृह्यमाणतया इति स्पर्शाः-शब्दादयस्ते 'स्पृशन्ति' गृह्यमाणतयैव सम्बन्धन्ति, 'असमंजसम्' अननुकूलमिति क्रियाविशेषणमेतत्, चशब्दोऽवधारणे, असमञ्जसमेव, अथवा स्पर्शनविषयाः-स्पर्शाः स्पृशन्ति, स्पर्शोपादानं चास्यैव दुर्ज्यत्वाद्यापित्वाच्च, न 'तेषु' स्पर्शेषु 'भिक्षुः' मुनिः, मनसा उपलक्षणत्वाच्च वाचा कायेन च, यद्वाऽपिशब्दस्य लुप्तनिर्दिष्टत्वान्मनसाऽपि आस्तां वाचा कायेन वा, 'पदूसे'त्ति प्रदूष्येत् प्रदिष्याद्वा, किमुक्तं भवति?-कर्कशसंस्तारकादिस्पर्शादौ हन्तोपतापिता वयमेतेयेति न चिन्तयेत् नैव वा वदेत्परिहरेद्वा तमिति ॥

मू. (१२७) मंदा य फासा बहुलोभणिज्जा, तहप्पगारसुमणं न कुंज्जा।
रक्खेज्ज कोहं विनएज्ज मानं, मायं न सेवेज्ज पहिज्ज लोहं ॥

वृ. 'मंदा ये'ति सूत्रं, तथा मन्दायन्तीति मन्दाः-हिताहितविवेकिनमपि जनमन्यतां नयन्तीतिकृत्वा, चशब्दः पूर्वापेक्षया समुच्चये, स्पर्शाः प्राग्वच्छब्दादयः, बहून् लोभयन्ति-विमोहयन्तीति बहुलाभनीयाः 'अन्यत्रापी ति वचनात् कर्त्तर्यनीयः, अनेनात्याक्षेपकत्वमुक्तं, 'तहप्पगारेसु'त्ति अपेर्गम्यमानत्वात्तथाप्रकारेष्वतिबहुलोभनीयेष्वपि मृदुस्पर्शमधुरसादिषु 'मनः' चित्तं न कुर्यात्, अथवा धातूनामनेकार्थत्वान्न निवेशयेत्, यद्वा सङ्कल्पात्मकेव मनः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो मन इति सङ्कल्पमपि 'न कुर्यात्' न विदध्याद् आस्तां तत्प्रवत्तिमिति, अथवा मन्दबुद्धित्वान्मन्दगमनत्वाद्वा मन्दाः-स्त्रियः ता एव स्पर्शप्रधानत्वात् स्पर्शाः, ततश्च मन्दाश्च स्पर्शाः, बहूनां कामिनां लोभनीयाः-गृद्धिजनका बहुलोभनीयाः यास्तासु 'तहप्पगारेसु' त्ति लिङ्गव्यत्ययात्तथाप्रकारासु बहुलोभनीयासु मनोऽपि न कुर्याद्, इह च स्त्रीणामेव बहुतरापायहेतुत्वादित्थमुच्यते, तथा चाह-

"स्पर्शेन्द्रियप्रसक्ताश्च, बलवन्तो मदोत्कटाः ।
हस्तिबन्धकिसंरक्ता, बध्यन्ते मत्तवारणाः ॥"इति

एवं च पूर्व्वसूत्रेण द्वेषस्य परिहार उक्तः, अनेन च रागस्य, स तु कथं भवतीत्यात आह-'रक्षयेत्' निवारयेत्, कम्?-क्रोधम्' अप्रीतिलक्षणं, 'विनयेत्' अपनयेत् 'मानम्' अहङ्कारात्मकं, 'मायां' परवञ्चनबुद्धिरूपां न कुर्यात्, 'प्रजह्यात्' परित्यजेत् 'लोभम्' अभिष्वयङ्गस्वभावं, तथा च क्रोधमानयोर्द्वेषात्मकत्वान्मायालोभयोश्च रागरूपत्वात्तन्निग्रह एव तत्परिहृतिरिति भावनीयम् । अथवा स्पर्शपरिहारमभिदधता चतुर्थव्रतमुक्तं, तच्च 'अबंभचेरं घोर पमायं दुरहिट्ठमं' त्ति वचनान्महाप्रमादरूपस्याब्रह्मणे निरोधकृदिति, तदभिधानाद्धिंसादिनिरोधोऽप्युक्त एवेति, अनेनार्थतो मूलगुणाभिधानं, रक्षेत् क्रोधमित्यादिना च पिण्डादिकमयच्छते यच्छते वा न कषायवशगो भवेदित्युत्तरगुणोक्तिरिति सूत्रद्वयार्थः ॥ सम्प्रति यदुक्तं-'तम्हा समुट्ठाय पहाय कामे' इत्यादि, तत्कदाचिच्चरकादिष्वपि भवेत् अत आह-यद्वैतावता चारित्रशुद्धिरुक्ता, सा च न सम्यक्त्वविशुद्धिमपहायातस्तदर्शमिदमाह-

मू. (१२८) जे संखया तुच्छपरप्पवादी, ते पेज्जदोसानुगया परज्झा ।
एए अहम्मुत्ति दुगुंछमाणो, कंखे गुणे जाव सरीरभेए ॥ त्तिबेमि

वृ. 'ये' इति अनिर्दिष्टस्वरूपाः, संस्कृता इति न तात्त्विकशुद्धिमन्तः किन्तूपचरितवृत्तयः, यद्वा संस्कृतागमप्ररूपकत्वेन संस्कृताः, यथा सौगताः, ते हि स्वागमे निरन्वयोच्छेदमभिधाय पुनस्तेनैव निर्वाहमपश्यन्तः परमार्थतोऽन्वयि द्रव्यरूपमेव सन्तानमुपकल्पयांबभूवुः, साङ्ख्याश्चैकान्तनित्यतामुक्त्वा तत्त्वतः परिणामरूपां चैव पुनराविर्भावतिरोभावावुक्तवन्तो, यथा वा-

"उक्तानि प्रतिषिद्धानि, पुनः सम्भावितानी च ।
सापेक्षनिरपेक्षाणि, ऋषिवाक्यान्यनेकशः ॥"

इतिवचनाद्वचननिषेधनसम्भवादिभिरुपस्कृतस्मृत्यादिशास्त्रा मन्वादयः, अत एव 'तुच्छ' त्ति तुच्छा यदृच्छाभिधायितया निःसाराः 'परप्पवाइ' त्ति परे च ते स्वतीर्थकव्यतिरिक्ततया प्रवादिनश्चपरप्रवादिनः, ते किमित्याह-'पेज्जदोसाणुगया' प्रेमद्वेषाभ्यामनुगताः प्रेमद्वेषानुगताः, तथाहि-सर्वथा संवादिनि भगवद्वचसि निरन्वयोच्छेदैकान्तनित्यत्वादिकल्पनं वचननिषेधनसम्भावनादि वा न रागद्वेषाभ्यां विनेति भावनीयम्, अत एव च 'परज्झ' त्ति देशीपरत्वात्परवशा रागद्वेषग्रहग्रस्तमानसतया न ते स्वतन्त्राः, यदि त एवंविधास्ततः किमित्याह-'एते' इति अर्हन्मतबाह्याः, अधर्म्महेतुत्वादधर्म्माः, 'इती' त्यमुनोल्लेखेन 'दुगुंछमाणो' त्ति जुगुप्समानः उन्मार्गानुयायिनोऽमि इति तत्स्वरूपमवधारयन्, न तु निन्दन्, निन्दायाः सर्वत्र निषेधात्, तदेवंविधश्च किं कुर्यादित्याह-'काङ्क्षेत्' अभिलपेत् 'गुणान्' सम्यग्दर्शनचारित्रात्मकान् भगवदागमाभिहितान्, किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियतकालमेवोतान्यथेत्याह-यावच्छरीरात् औदारिकात्पञ्चप्रकाराद्वा भेदः-पृथग्भावः शरीरभेदो, मरणं विमुक्तिर्वेतियावद्, अनेनेहैव समुत्थानं कामप्रहाणादि च तत्त्वतः, अन्यत्र तु संवृत्तिमदित्युक्तम्, एवं च काङ्क्षात्मकसम्यक्त्वातिचारपरिहाराभिधानतः समक्त्वशुद्धिर्वेति सूत्रार्थः ॥ इति परिसमाप्तौ, ब्रवीमीति पूर्व्ववत्, उक्तोऽनुगमः, सम्प्रति नयाः, ते च पूर्ववत् ॥

अध्ययनं - ४ समाप्तम् ।

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे तृतीयं अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-५ अकाममरणं

वृ. ॥ उक्त चतुर्थमध्ययनं, साम्प्रतं पञ्चममारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने-'काङ्क्षेत् गुणान् यावच्छरीरस्य भेद'इत्यभिदधता मरणं यावदप्रमादोऽनुवर्ण्णितः, ततो मरणकालेऽप्यप्रमादो विधेयः, स च मरणविभागपरिज्ञानत एव भवति, ततो हि बालमरणादि हेयं हीयते पण्डितमरणादि चोपादेयमुपादीयते, तथा च तत्त्वतोऽप्रमत्तता जायते, इत्यनेन, सम्बन्धेनाऽऽयातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयमुपवर्ण्यं तावद्यावन्नामनिष्पन्ननिक्षेपे 'अकाममरणीयम्' इति नाम, तत्र च काममरणप्रतिपक्षोऽकाममरणम्, अतः कामानां मरणस्य च निक्षेपः कार्यः तत्र काममरणयोर्निक्षेपं प्रतिपादयितुमाह निर्युक्तिकृत्-

नि.[२०८] कामाण उ निक्खेवो चउव्विहो छव्विहो य मरणस्स ।
कामा पुव्वुद्दिट्ठा पगयमभिप्पेयकामेहिं ॥

वृ. काम्यन्त इति कामास्तेषां, तुः पूरणे निक्षेपश्चतुर्विधः, षड्विधश्च मरणस्य, भवतीत्युभयत्र गम्यते, तत्र कामाः पूर्वोद्दिष्टाः पूर्वं-श्रामण्यपूर्वकनाम्नि दशवैकालिकद्वितीयाध्ययने उद्दिष्टाः-कथिताः, तत्र तेषामनेकधा वर्ण्णनात्, यैरत्र प्रकृतं तान् दर्शयितुमाह-'प्रकृतम्' अधिकृतम्, 'अभिप्रेतकामैः' इच्छाकामैरिति गाथार्थः ॥ षड्विधं मरणमिति यदुक्तं, तत्र नामस्थापने प्रतीते एवेत्यनादृत्य शेषचतुष्टयमाह । अन्ये त्वत्र नामादिषड्विधनिक्षेपोद्देशाभिधायिनीमपि गाथामधीयते, तत्र नामस्थापने प्राग्वत्, द्रव्यादिचतुष्टयाभिव्यञ्जनामर्थमाह-

नि.[२०९] दव्वमरणं कुसुंभाइएसु भावि आउक्खओ मुणेयव्वो ।
ओहे भवतब्भविए मनुस्सभविएण अहिगारो ॥

वृ. द्रव्यस्य मरणं द्रव्यमरणं, कुसुम्भादिकेषु, आदिशब्दाद्विन्नादिपरिग्रहः, यद्यस्य स्वकार्यसाधनंप्रति समर्थं रूपं तत्तस्य जीवितमिति रूढं, तदभावस्तु मरणं, ततश्च कुसुम्भादे रञ्जानादि स्वकार्यसामर्थ्यं जीवितं, तदभावस्तु मरणं, तथा च लोके मृतं कुसुम्भकमरञ्जकं, मृतमन्त्रव्यञ्जनमित्याद्युपदिश्यते, क्षेत्रमरणं तु यस्मिन् क्षेत्रे मरणम्-इङ्गिनीमरणादि वर्ण्यते क्रियते वा, यदा वा तस्य शस्याद्युत्पत्तिक्षमत्वमुपहन्यते तदा तत् क्षेत्रमरणं, कालमरणं यस्मिन् काले मरणमुपवर्ण्यते क्रियते वा, कालस्य वा ग्रहोपरागादिना वृष्टयादिस्वकार्याकरणम्, एते च सुगमत्वात्तत्त्वतो द्रव्यमरणाभिन्नत्वाच्च निर्युक्तिकृता पृथग् नोक्ते, यत्तु निक्षेपगाथायां षड्विध इतिवचनात् अनयोर्भेदनाभिधानं तद्विवक्षितवस्तुवैशिष्टयदर्शकं, न हि ताभ्यां विना नियत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशत्वादिकं वस्तुनो वैशिष्ट्यमाख्यातुं शक्यमिति, 'भावे' भावविषये निक्षेपे आयुषो-जीवितस्य क्षयो-ध्वंसः आयुःक्षयो 'मुणितव्वो' ज्ञातव्यो, मरणमित्युपस्कारः, तदपि च त्रिविधम्- 'ओहे'त्ति ओघमरणं-सामान्यतः सर्वप्राणिनां प्राणपरित्यागात्मकं भवति, भवमरणं-यन्नारका-देर्नरकादिभवविषयतया विवक्षितं, 'तब्भविय'त्ति तद्भविकमरणं यस्मिन्नेव मनुष्यभवादौ मृतः पुनस्तस्मिन्नैवोत्पद्य यन्म्रियते इति व्याख्यानिकाभिप्रायो, वृद्धास्तु व्याचक्षेते-'तं भावमरणं दुविहं-ओघमरणं तब्भवमरणं च, तथा तद्भवमरणस्वरूपं च 'जो जम्मि भवग्गहणे मरइ'। तत्र च 'ओहे तब्भमरणे' इति पाठो लक्ष्यते। इह चैषां येनाधिकारस्तमाह-'मनुस्सभविएणं'ति मनुष्यभवभाविना भवमरणान्तर्वर्त्तिना मनुष्यभविकमरणेनाधिकारः-प्रकृतम्, इति गाथार्थः सम्प्रति विस्तरतो मरणवक्तव्यताविषयं द्वारगाथाद्वयमाह-

नि.[२१०] मरणविभत्तिरूवण अनुभावो चेव तह पएसग्गं।
कइ मरइ एगसमयं ? कइखुत्तो वावि इक्किक्के ? ॥

नि.[२११] मरणंमि इक्कमिक्के कइभागो मरइ सव्वजीवाणं ?।
अनुसमय संतरं वा इक्किक्कं किच्चिरं कालं ? ॥

वृ. तत्र मरणस्य विभक्तिः-विभागस्तस्य प्ररूपणा-प्रदर्शना मरणविभक्तिप्ररूपणा, कार्येति शेषः, अनुभागश्च-रसः, स च तद्विषयस्यायुःकर्म्मणः, तत्रैव तत्संभवात्, मरणे हि तदभावात्मनि कथं तत्सम्भव इति भावनीयम्, एवेति पूरणे, तथा प्रदेशानां-तद्विषयायुःकर्म्मपुद्गलात्मकानाम् अग्रं-परिमाणं प्रदेशाग्रं, वाच्यमिति गम्यते, 'कति' कियन्ति मरणानी, अङ्गीकृत्य इति शेषः, म्रियते-प्राणांस्त्यजति, जन्तुरिति गम्यते, 'एगसमयं'ति सुब्व्यत्ययात् एकस्मिन् समये 'कइ-खुत्तो'त्ति कतिकृत्वः कियतो वारान्, 'वा' समुच्चये, अपिः पूरणे, 'एक्केक्कंति' एकैकस्मिन् वक्ष्यमाणभेदे मरणे म्रियते इति योज्यम्, 'मरणे' वक्ष्यमाणभेद एवैकैकस्मिन् 'कतिभागो'त्ति कतिसङ्ख्यो भागो म्रियते, 'सर्वजीवानाम्' अशेषजीवानाम् 'अनुसमयं'ति प्रतिसमयं निरन्तर-मितियावत्, अन्तरं-व्यवधानं सहान्तरेण वर्त्तत इति सान्तरं, वा विकल्पे, किमुक्तं भवति ?- एषु कतरन्निरन्तरं सान्तरं वा ?, तथैकैकं 'कियच्चिरं' कियत्परिमाणं कालं सम्भवतीति गाथाद्वयाक्षरार्थः ॥ भावार्थं तु स्वत एव वक्ष्यति निर्युक्तिकारः-तत्र च 'यथोद्देशं निर्देश' इति न्यायतः प्रथमं द्वारमाश्रित्याह-

नि.[२१२] आवीचि ओहि अंतिय वलायमरणं वसट्टमरणं च।
अंतोसल्लं तब्भव बालं तह पंडियं मीसं ॥

नि.[२१३] छउमत्थमरण केवलि वेहाणस गिद्धपिट्ठमरणं च।
मरणं भत्तपरिन्ना इंगिनी पाओवगमणं च ॥

वृ. इह च मरणशब्दस्य प्रत्येकमभिसम्बन्धात् आवीचिमरणम् १ अवधिकरणम् २ 'अन्तिय'त्ति आर्षत्त्वादत्यन्तमरणं ३ 'वलायमरणं'ति तत एव वलन्मरणं ४ वशार्त्तमरणं च ५ अन्तःशल्यमरणं ६ तद्भवमरणं ७ बालमरणं ८ तथा षण्डितमरणं ९ मिश्रमरणं १० छद्मस्थमरणं ११ केवलिमरणं १२ 'वेहानसं'ति तत एव वैहायसमरणं १३ गृध्रपृष्ठमरणं १४ 'मरणं भत्तपरि-ण्ण'त्ति भक्तपरिज्ञामरणम् १५ इङ्गिनीमरणं १६ षादपोपगमनमरणं १७ चेतिगाथाद्वयार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रत्यतिबहुभेददर्शनान्मा भूत् कस्यचिदश्रद्धानमिति सम्प्रदायगर्भं निगमनमाह-

नि.[२१४] सत्तरसविहाणाइं मरणे गुरुणो भणंति गुणकालिआ।
तेसिं नामविभत्तिं वुच्छामि अहानुपुव्वीए ॥

वृ. सप्तदश-सप्तदशसङ्ख्यानि विधीयन्ते-विशेषाभिव्यक्तये क्रियन्त इति विधानानि-भेदाः 'मरणे' मरणविषयाणि 'गुरवः' पूज्यास्तीर्थकृद्गणभृदादयो 'भणन्ति' प्रतिपादयन्ति, गुणैः-सम्यग्दर्शनज्ञानादिभिः कलितायुक्ता गुणकलिताः, न तु वयमेव इत्याकूतं, वक्ष्यमाण-ग्रन्थसम्बन्धनार्थमाह- 'तेषां' मरणानां नाम्नाम्-अभिधानानामनन्तरमुपदर्शितानां विभक्तिः-अर्थतो विभागो नामविभक्तिस्तां 'वक्ष्ये' अभिधास्ये, 'अथे'त्यनन्तरमेव आनुपूर्व्या-क्रमेणेति-

नि.[२१५] अनुसमयनिरंतरमवीइसन्नियं तं भणंति पंचविहं।
दव्वे खित्ते काले भवे य भावे य संसारे ॥

वृ. 'अनुसमयं' समयमाश्रित्य, इदं च व्यवहितसमयाश्रयणतोऽपीति मा भूद्भ्रान्तिरत आह-निरन्तरं, न सान्तरम्, अन्तरालासम्भवात्, किं तदेवंविधम्? - 'अवीइसंनियं'ति प्राकृत-त्वादा-समन्ताद्वीषय इव वीचयः प्रतिसमयमनुमानायुषोऽपरायुर्दलिकोदयात् पूर्व्वपूर्व्वाद-लिकविच्युतिलक्षणाऽवस्था यस्मिस्तदाऽवीचि, ततश्चा वीचीति संज्ञा संजाता अस्मिंस्तार-कादित्वात् 'तदस्य सञ्जातं तारकादिभ्य इतजि' त्यनेनेत्यावीचिसंज्ञितम्, अथवा वीचिः-विच्छेदस्तदभावादवीचि तत्संज्ञितम्, उभयत्र प्रक्रमान्मरणं, यद्वा संज्ञितशब्दः प्रत्येकम-भिसम्बध्यते, ततश्च अनुसमयसंज्ञितं-निरन्तरसंज्ञितम् अवीचिसंज्ञितमिति एकार्थिकान्येतानि, 'तदि' त्यावीचिमरणं 'भणन्ति' प्रतिपादयन्ति 'पञ्चविधं' पञ्चप्रकारं, गणधरादय इति गम्यते, अनेन च पारतन्त्र्यं द्योतयति, तदेवाह-

'दव्वे'त्ति द्रव्यावीचिमरणं 'खेत्ते'त्ति क्षेत्रावीचिमरणं 'काले'त्ति कालावीचिमरणं 'भवे य'त्ति भवावीचिमरणं च 'भावे य'त्ति भावावीचिमरणं च, संसार इत्याधारनिर्देशः, तत्रैव मरणस्य सम्भवात्, तत्र द्रव्यावीचिमरणं नाम यन्नारकतिर्यग्नामराणामुत्पत्तिसमयात् प्रभृति निजनिजायुः कर्म्मदलिकानामनुसमयमनुभवनाद्विचटनं, तच्च नारकादिभेदाच्चतुर्विधम्, एवं नरकादि-गतिचातुर्विध्यापेक्षया तद्विषयं क्षेत्रमपि चतुर्द्धैव, ततस्तत्प्राधान्यापेक्षया क्षेत्रावीचिमरणमपि चतुर्द्धैव, 'काल' इति यथाऽऽयुष्ककालो गृह्यते, न त्वद्धाकालः, तस्य देवादिष्वसम्भवात्, स च देवायुष्ककालादिभेदाचतुर्विधः, ततस्तत्प्राधान्यापेक्षया कालावीचिमरणमपि चतुर्विधम्, एवं नरकादिचतुर्विधभवापेक्षया भवावीचिमरणमपि चतुर्धैव, तेषामेव च नारकादीनां चतुर्विध-मायुःक्षयलक्षणं भावं प्राधान्येनापेक्ष्य भावावीचिमरणमपि चतुर्धैव वाच्यमिति गाथार्थः ॥

अधुनाऽवधिमरणमाह-

नि.[२१६-१] एमेव ओहिमरणं जानि मओ तानि चेव मरइ पुनो।

वृ. 'एवमेव' यथाऽऽवीचिमरणं द्रव्यक्षेत्रकालभवभावभेदतः पञ्चविधं, तथाऽवधिमरण-मपीत्यर्थः। तत्स्वरूपमाह-यानि मृतः, सम्प्रतीति शेषः, तानि चैव 'मरइ पुणो'त्ति आषत्वात्ति-ङ्व्यत्ययेन मरिष्यति पुनः, किमुक्तं भवति-अवधिः-मर्यादा, ततश्च यानि नारकादिभवनि-बन्धनतयाऽऽयुःकर्मदलिकान्यनुभय म्रियते, यदि पुनस्तान्येवानुभूय मरिष्यति तदा तद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यावधिमरणं, सम्भवति हि गृहीतोज्झितानामपि कर्म्मदलिकानां पुनर्ग्रहणम्, परिणाम-वैचित्र्याद्, एवं क्षेत्रादिष्वपि भावनीयं। पश्चार्द्धेनाऽऽत्यन्तिकमरणमाह-

नि.[२१६-२] एमेव आइयंतियमरणं नवि मरइ ताइ पुनो ॥

वृ. 'एवमेव' अवधिमरणवदात्यन्तिकमरणमपि द्रव्यादिभेदतः पञ्चविधं, विशेषस्त्वयम्-'नमि मरइ ताइ पुनो'त्ति अपिशब्दस्यैवकारार्थत्वान्नैय तानि द्रव्यादीनि पुनर्म्रियते, इदमुक्तं भवति-यानि नरकाद्यायुष्कतया कर्मदलिकान्यनुभव म्रियते मृतो वा न पुनस्तान्यनुभूय मरिष्यति, एवं क्षेत्रादिष्वपि वाच्यं, त्रीण्यपि चामून्यवीच्यवध्यात्यन्तिकमरणानि प्रत्येकं पञ्चानां द्रव्यादीनां नारकादिगतिभेदेन चतुर्विधत्वाद्विंशतिभेदानीति गाथार्थः ॥ साम्प्रतं वलन्मरणमाह-

नि.[२१७] संजमजोगविसन्ना मरंति जे तं वलायमरणं तु।
इंदियविसयवसगया मरंति जे तं वसट्टं तु ॥

वृ. संयमयोगाः-संयमव्यापारास्तैस्तेषु वा विषण्णाः संयमयोगविषण्णा अतिदुश्चरं तपश्च-रणमाचरितुमक्षमाः व्रतं च मोक्तुमशक्नुवन्तः कथञ्चिदस्माकमितो मुक्तिरस्त्विति विचिन्तयन्तो म्रियन्ते यत्तद्वलतां-संयमान्निवर्त्तमानानां मरणं वलन्मरणं, तुर्विशेषणे, भग्नव्रतपरिणतीनां व्रतिनामेवैतदिति विशेषयति, अन्येषां हि संयमयोगानामेवासम्भवात् कथं तद्विषादः ? तदभावे च तदिति। पश्चार्द्धेन वशार्तमाह-इन्द्रियाणां-चक्षुरादीनां विषयाः-मनोज्ञरूपादय इन्द्रिय-विषयास्तद्वशं गताः-प्राप्ता इन्द्रियविषयवशगताः स्निग्धदीपकलिकाऽवलोकनाकुलितपतङ्गवत् म्रियन्ते यत्तद्वशार्त्तमरणं, कथञ्चिद्द्रव्यपर्यायभेदादेवमुच्यते, एवं पूर्वत्रापि भावनीयं, तुशब्द एषामप्यध्यवसानभेदतो वैचित्र्यख्यापनार्थ इति गाथार्थः ॥ अन्तःशल्यमरणमाह-

नि.[२१८] लज्जाइ गारवेण य बहुस्सुयमएण वाऽवि दुच्चरिअं।
जे नं कहंति गुरूणं न हु ते आराहगा हुंति ॥

नि.[२१९] गारवपंकानिबुड्डा अइयारं जे परस्स न कहंति।
दंसणनाणचरित्ते ससल्लमरणं हवइ तेसिं ॥

वृ. तत्र 'लज्जया' अनुचितानुष्ठानसंवरणाऽऽत्मिकया 'गौरवेण च' सातर्द्धिरसगौरवात्मकेन, मा भून्ममालोचनार्हमाचारार्यमुपसर्पतस्तद्वन्द्वनादिना तदुक्ततपोऽनुष्ठानासेवनेन च ऋद्धिरससाताभावसम्भवः इति, 'बहुश्रुतमदेन वा' बहुश्रुतोऽहं तत्कथमल्पश्रुतोऽयं मम शल्प-मुद्धरिष्यति ?, कथं चाहमस्मै वन्दनादिकं दास्यामि ? अपभ्राजना हि इयं मम इत्यभिमानेन, अपिः पूरणे, ये गुरुकर्म्माणा 'न कथयन्ति' नालोचयन्ति, केषाम् ?, 'गुरुणाम्' आलोचना-र्हाणामाचार्यादीनां, किं तद् ?-'दुश्चरितं' दुरनुष्ठितम् इति सम्बन्धः, 'न हु' नैव 'ते' अनन्तरमुक्त-रूपा आराधयन्ति-अविकलतया निष्पादयन्ति सम्यग्दर्शनादीनि इत्याराधका भवन्ति, ततः किमित्याह-गौरवं पङ्क इव कालुष्यहेतुतया तस्मिन् निबुड्डा-इति प्राकृतत्वान्निमग्ना इव निमग्नाः तत्रोडीकृततया, लज्जामदयोरपि प्रागुपादाने यदिह गौरवस्यैवोपादानं तदस्यैवातिदुष्टता-ख्यापनार्थम्, 'अतिचारम्' अपराधं ये 'परस्य' आचार्यादेः न कथयन्ति, किंविषयम् ? इत्याह-'दर्शनज्ञानचारित्र' दर्शनज्ञानचारित्रविषयं, तत्र दर्शनविषयं शङ्कादि ज्ञानविषयं कालातिक्रमादि चारित्रविषयं समित्यननुपालनादि, शल्यमिव शल्यं कालान्तरेऽप्यनिष्टफलविधानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यवन्ध्यतया, सह तेन सशल्यं तच्च तन्मरणं च सशल्यमरणम्-अन्तःशल्यमरणं भवति, 'तेषां' गौरवपङ्कमग्नानामिति गाथाद्वयार्थः ॥ अस्यैवात्यन्तपरीहार्यतां ख्यापयन् फलमाह-

नि.[२२०] एयं ससल्लमरणं मरिऊण दुरंतंमि।
सुइरं भमंति जीवा दीहे संसारकंतारे ॥

वृ. 'एतद्' उक्तस्वरूपं सशल्यमरणं यथा भवति तथेत्युपस्कारः, सुब्व्यत्ययाद्वा एतेन-सशल्यमरणेन 'मृत्वा' त्यक्त्वा प्राणान्, के?-जीवा इति सम्बन्धः, किम्?-'सुचिरं भ्रमन्ति' बहुकालं पर्यटन्ति, क्व?-संसारः कान्तारमिवातिगहनतया संसारकान्तारः तस्मिन्निति सण्टङ्कः, कीदृशि? महद्भयं यस्मिन् तन्महामयं तस्मिन्, तथा दुःखेनान्तः-पर्यन्तो यस्य तद्दुरन्तं तस्मिन्, तथा 'दीर्घे' अनादौ केषाञ्चिदपर्यवसिते चेति तत् सर्वथा परिहर्तव्यमेवेति भाव इति गाथार्थः ॥

नि.[२२१] मोत्तुं अकम्मभूमगनरतिरिए सुरगणे अ नेरइए।
सेसाणं जीवाणं तब्भवमरणं तु केसिंचि ॥

वृ. 'मुक्त्वा' अपहाय, कान्?-'अकम्मभूमगरनतिरिए'त्ति सूत्रत्वात् अकर्म्मभूमिजाश्च ते देवगुरूत्तरकुर्वादिषूत्पन्नतया नरतिर्यञ्चश्च अकर्म्मभूमिजनरतिर्यञ्चस्तान्, तेषां हि तद्भावनन्तरं देवेष्वेवोत्पादः, तथा 'सुरगणांश्च' सुरनिकायान्, किमुक्तं भवति?-चतुर्निकायवर्तिनोऽपि देवान्, निरयो-नरकः तस्मिन् भवा नैरयिकाः, इहापि चशब्दानवृत्तेस्तांश्च मुक्त्वेति सम्बन्धः, तेषां देवानां च तद्भावनन्तरं तिर्यग्मनुष्येष्वेवोत्पत्तेः, 'शेषाणाम्' एतदुद्धरितानां कर्म्मभूमिजनरतिरश्चां 'जीवानां' प्राणिनां तद्भवमरणं, तेषामेव पुनस्तत्रोत्पत्तेः, तद्धि यस्मिन् भवे वर्त्तते जन्तुस्तद्भवयोग्यमेवायुर्बद्ध्वा पुनस्तत्क्षयेण म्रियमाणस्य भवति, तुशब्दस्तेषामपि सङ्ख्येयवर्षायुषामेवेति विशेषख्यापकः, असङ्ख्येयवर्षायुषां हि युगलधार्मिकत्वादकर्म्मभूमिजानामिव देवेष्वेवोत्पादः, तेषामपि न सर्वेषां, किन्तु 'केषाञ्चित्' तद्भावोत्पादानुरूपमेवायुः कर्म्मोपचिन्वतामिति गाथार्थः ॥ अत्रान्तरे प्रत्यन्तरेषु 'मोत्तूण ओहिमरणं' इत्यादिगाथा दृश्यते, न चास्या भावार्थः सम्यगवबुध्यते, नापि चूर्णिकृताऽसौ व्याख्यातेति उपेक्ष्यते ॥

सम्प्रतिबालपण्डितमिश्रमरणस्वरूपमाह-

नि.[२२२] अविरयमरणं बालं मरणं विरयाण पंडियं बिंति।
जाणाहि बालपंडियमरणं पुन देसविरयाणं ॥

वृ. विरमणं विरतं-हिंसाऽनृतादेरुपरमणं न विद्यते तद् येषां तेऽमी अविरताः तेषां-मृतिसमयेऽपि देशविरतिमप्रतिपद्यमानानां मिथ्यादृशां सम्यग्दशां वा मरणमविरतमरणं-बालमरणमिति ब्रुवत इति सम्बन्धः, तथा 'विरतानां' सर्वसावद्यनिवृत्तिमभ्युपगतानां मरणं 'पण्डित'मिति प्रक्रमात्पण्डितमरणम्, 'बिंति'त्ति ब्रुवते तीर्थकरगणधरादयः, जानीहि 'बालपण्डितमरण'मिति मिश्रमरणं, पुनःशब्दः पूर्वापेक्षया विशेषं द्योतयति, देशात् सर्वविषयापेक्षया स्थूलप्राणिव्यपरोपणादेर्विरता देशविरतास्तेषामिति गाथार्थः ॥ एवं चरणद्वारेण बालादिमरणत्रयमभिधाय ज्ञानद्वारेण छद्मस्थमरणकेवलिमरणे प्रतिपादयितुमाह-

नि.[२२३] मनपज्जवोहिनाणी सुअमइनाणी मरंति जे समणा।
छउमत्थमरणमेयं केवलिमरणं तु केवलिणो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. मनःपर्यवज्ञानिनोऽवधिज्ञानिनश्च, ज्ञानिशब्दस्य प्रत्येकमभिसम्बन्धात्, श्रुतज्ञानिनो मतिज्ञानिनश्च 'म्रियन्ते' प्राणांस्त्यजन्ति ये 'श्रमणाः' तपस्विनः छादयन्ति छद्मानि-ज्ञानावरणादीनि तेषु तिष्ठन्तीति छद्मस्थाः तेषां मरणं छद्मस्थमरणमेतत्, इह च प्रथमतो मनःपर्यायनिर्देशो विशुद्धिकृतप्राधान्यमङ्गीकृत्य चारित्रिण एव तदुपजायत इति स्वामिकृतप्राधान्यापेक्षो वा, एवमवध्यादिष्वपि यथायोगं स्वधियैव हेतुरभिधेयः, केवलिमरणं तु ये केवलिनः-उत्पन्नकेवलाः सकलकर्म्मपुद्गलपरिशाटतो म्रियन्ते तज्ज्ञेयमिति शेषः, उभयत्राभेदनिर्देशः प्राग्वदिति गाथार्थः ॥ साम्प्रतं वेहायसगृध्रपृष्ठमरणे अभिधातुमाह-

नि.[२२४] गिद्धाइभक्खणं गिद्धपिट्ठ उब्बंधणाइ वेहासं।
एए दुन्निवि मरणा कारणजाए अणुन्नाया ॥

वृ. 'गृद्धाः' प्रतीतास्ते आदिर्येषां शकुनिकाशिवादीनां तैर्भक्षणं गम्यमानत्त्वादात्मनः तदनिवारणादिना तद्भक्ष्यकरिकरभादिशरीरानुप्रवेशेन च गृध्रादिभक्षणं, तत् किमुच्यत इत्याह- 'गिद्धपिट्ठ'त्ति गृध्रैः स्पृष्टं-स्पर्शनं यस्मिंस्तगृधध्रस्पृष्टम्, यदिवा गृध्राणा भक्ष्यं पृष्ठमुपलक्षणत्वादुदरादि च मर्तुर्यस्मिंस्तद्गृध्रपृष्ठम्, स ह्यलक्तकपूणिकापुटप्रदानेनाप्यामानं गृध्रादिभिः, पृष्ठादौ भक्षयतीति, पश्चान्निर्दिष्टस्यापि चास्य प्रथमतः प्रतिपादनमत्यान्तमाहसत्त्वविषयतथा कर्म्मनिर्जरां प्रति प्राधान्यख्यापनार्थम्, 'उब्बंधणाइ वेहासंति' उत्-ऊर्ध्वं वृक्षशाखादौ बन्धनमुद्बन्धनं तदादिर्यस्य तरुगिरिभृगुप्रपातादेरात्मजनितस्य मरणस्य तदुद्बन्धनादि 'वेहास'न्ति प्राकृततत्त्वाद्यलोपे वैहायसम्, उद्बद्धस्य हि विहायस्येव भवनमीति तत्प्राधान्यविवक्षयेत्थमुक्तम्। आह-एवं गृध्रपृष्ठस्याप्यात्मघातरूपत्वाद्वैहायसिकेऽन्तर्भावः, सत्यमेतत्, केवलमल्पसत्त्वैरध्यवसातुमशक्यताख्यापनार्थमस्य भेदेनोपन्यासः, ननु-

"भावियजिनवयणाणं ममत्तरहियाण नत्थि हु विसेसो।
अत्ताणंमि परंमि य तो वज्जे पीडमभएवि ॥"

इत्यागमः, एते चानन्तरोक्ते मरणे आत्मविघातकारिणी, तथा चात्मपीडाहेतुरिति कथं नागमविरोधः ?, अत एव च भक्तपरिज्ञानादिषु पीडापरिहाय 'चत्तारि विचित्ताइं विगईणिज्जूहियाइं' इत्यादिसंलेखनाविधिः पानकादिविधिश्च तत्र तत्राभिहितः, दर्शनमालिन्यं चोभयत्रेत्यशङ्क्याह-'एते' अनन्तरोक्ते 'द्वे अपि' गृध्रपृष्ठवैहायसाख्ये मरणे' 'कारणजाते' कारणप्रकारे दर्शनमालिन्यपरिहारादिके उदायिनृपानुमृततथाविधाचार्यवत्, अनुज्ञाते, तीर्थकृद्गणधरादिभिरिति, अनेन च सम्प्रदायानुसारितां दर्शनयन्नन्यथाकथने श्रुताशातनाया अतिदुरन्तत्वमाह इति गाथार्थः ॥ साम्प्रतमन्त्यमरणत्रयमाह-

नि.[२२५] भत्तपरिन्ना इंगिनी पाओवगमं च तिन्नि मरणाइं।
कन्नसमज्झिमजेट्ठा धिइसंघयणेन उ विसिट्ठा ॥

वृ. भक्तं-भोजनं तस्य् परिज्ञा-ज्ञपरिज्ञयाऽनेकधेदमस्माभिर्भुक्तपूर्वमेतद्धेतुकं चावद्यमिति परिज्ञानं, प्रत्याख्यानपरिज्ञया च-

"सव्वं च असनपानं चउव्विहं जा य बाहिरा उवही।
अब्भितरं च उवहिं जावज्जीवं च वोसिरे ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यागमवचनाच्चतुर्विधाहारस्य वा यावज्जीवमपि परित्यागात्मकं प्रत्याख्यानं भक्तपरिज्ञोच्यते, इङ्ग्यते-प्रतिनियतप्रदेश एव चेष्टयते अस्यामनशनक्रियायामितीङ्गिनी, पादैः-अधः-प्रसर्प्पिमूलात्मकैः पिबति पादपो-वृक्षः, उपशब्दश्चोपमेतिवत्सादृश्येऽपि दृश्यते, ततश्च पादपमुपगच्छति-सादृश्येन प्राप्नोतीति पादपोपगमं, किमुक्तं भवति ?-यथैव पादपः क्वचित् कथञ्चिन्निपतितः सममसममिति चाविभावयन्निश्चलमेवास्ते, तथाऽयमपि भगवान् यद् यथा समविषमदेशेष्वङ्गमुपाङ्गं वा प्रथमतः पतितं न तत्ततश्चलयति, तथा च प्रकीर्णकृत-

निच्चल निप्पडिकम्मो निक्खिवए जं जहिं जहा अंगं।
एयं पादोवगमं नीहारिं वा अनीहारिं ॥१॥
पातोवगमं भणियं सम विसमो पायवोव्व जह पडितो।
नवरं परप्पतोगा कंपेज्ज जहा फलतरूव्व ॥२॥"

चः समुच्चये, इह चैवंविधानशनोपलक्षितानि मरणान्यप्येवमुक्तानि, अत एवाह-त्रीणि मरणानी, एतस्वरूपं च यथेदं विधेयं यच्चात्र सपरिकर्म्म अपरिकर्म्म च इत्यादिकं सूत्रकार एवोत्तरत्र तपोमार्गनाम्नि त्रिंशत्तमाध्ययनेऽभिधास्यत इति निर्युक्तिकृता नोक्तम्। द्वारनिर्देशाच्चावश्यं किञ्चिद्वाच्यमितिमत्वेदमाह-'कण्णस' त्ति सूत्रत्त्वात्, कनिष्ठं-लघु जघन्यमितियावत्, मध्यमं-लघुज्येष्ठयोर्मध्ये भावि, ज्येष्ठम्-अतिशयवृद्धमुत्कृष्टमित्यर्थः, एषां द्वन्दः तत एतानि, धृतिः-सयमं प्रति चित्तस्वाथ्यं संहननंशरीरसामर्थ्यहेतुः वज्रऋषभनाराचादि ताभ्यां, प्राकृतत्त्वाच्चैकवचननिर्देशः, समाहाराश्रयणाद्वा, तुशब्दात्सपरिकर्म्मापरिकर्म्मतादिभिश्च विशेषैर्विशिष्टानि-विशेषवन्ति, इदमुक्तं भवति-यद्यपि त्रितयमप्येतत्-

"धीरेणऽवि मरियव्वं कापुरिसेणवि अवस्स मरियव्वं।
तम्हा अवस्समरणे वरं खु धीरत्तणे मरिउं॥
संसाररंगमज्झे धीबलसंनद्धबद्धकच्छातो।
हंतूण मोहमल्लं हरामि आराधनपडागं ॥२॥
जह पच्छिमम्मि काले पच्छिमतित्थयरदेसियमुयारं।
पच्छा निच्छयपत्थं उवेमि अब्भुज्जयं मरणं ॥३॥"

इति शुभाशयवानेव प्रतिपद्यते, फलमपि च विमानिकतामुक्तिलक्षणं त्रयस्यापि समानं,

"एयं पच्चक्खाणं अनुपालेऊण सुविहिओ सम्मं।
वेमाणितो व देवो हवेज्ज अहवाऽवि सिज्झिज्जा॥"

तथापि विशिष्टविशिष्टतरविशिष्टतमधृतिमतामेव तत्प्राप्तिरिति कनिष्ठात्त्वादिस्तद्विशेष उच्यते, तथाहि-भक्तपरिज्ञामरणमार्यिकादीनामप्यस्ति, यत उक्तम्-

"सव्वावि य अज्जाओ सव्वेऽवि य पढमसंघयणवज्जा।
सव्वेऽवि देसविरया पच्चक्खाणेण उ मरंति॥"

अत्र हि प्रत्याख्यानशब्देन भक्तपरिज्ञैवोक्ता, तत्र प्राक् पादपोपगमनादेरन्यथाऽभिधानात्, इङ्गिनीमरणं तु विशिष्टतरधृतिसंहननवतामेव सम्भवतीत्यार्यिकादिनिषेधत एवावसीयते, पादपोपगमनं तु नाम्नैव विशिष्टतमधृतिमतामेवेत्युक्तप्रायं, ततश्च वज्रऋषभनाराचसंहनिनामे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैतत्, उक्तं हि-

"पढमंमि य संघयणे वट्टंते सेलकुड्डुसामाणे।
तेसिंपि य वोच्छेओ चोद्दसपुव्वीण वोच्छेए॥"

कथं चान्यथैवंविधविशिष्टधृतिसंहननाभावे-

"पुव्वभवियवेरेणं देवो साहरइ कोऽवि पायाले।
मा सो चरिमसरीरो न वेयणं किंपि पावेज्जा॥१॥
तथा 'देवो नेहेन नयइ देवारन्नं व इंदभवनं वा।
जहियं इट्ठा कंता सव्वसुहा हुंति सुहभावा॥२॥
उप्पन्ने उवसग्गे दिव्वे मानुस्सए तिरिक्खे य।
सव्वे पराजिनित्ता पाओवगया परिहरंति॥३॥
पुव्वावरउत्तरेहिं दाहिणवाएहिं आवडंतेहिं।
जह नवि कंपइ मेरू तह झाणातो नवि चलंति॥४॥"

इति मरणविभक्तिकृदुक्तं महासामर्थ्यं सम्भवि, किञ्च-तीर्थकरसेवितत्वाच्च पादपोपगमनस्य ज्येष्ठत्वं, इतरयोश्चाविशिष्टसाधुसेवितत्वादन्यथात्वं, तथा चावादि-

"सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु।
सव्वगुरू सव्वहिया सव्वे मेरूसु अहिसित्ता॥१॥
सव्वाहिं लद्धीहिं सव्वेऽवि परीसहे पराजित्ता।
सव्वेऽवि य तित्थयरा पातोवगया उ सिद्धिगया॥२॥
अवसेसा अनगारा तीयपडुप्पन्नऽनागया सव्वे।
केती पातोवगया पच्चक्खाणिंगिणिं केती॥३॥"

इति कृतं प्रसङ्गेनेति गाथार्थः॥ इत्थं प्रतिद्वारगाथाद्वयवर्णनात् मूलद्वारगाथायां मरणविभक्तिप्ररूपणाद्वारमनुवर्ण्णितम्, अधुनाऽनुभावप्रदेशाग्रद्वारद्वयमाह-

नि.[२२६] सोवकम्मे अ निरुवक्कमो अ दुविहोऽनुभावमरणंमि।
आउगकम्मपएसग्गनंतनंता पएसेहिं॥

वृ. सहोपक्रमेण-अपवर्तनाकरणाख्येन वर्तत इति सोपक्रमश्च, निर्गत उपक्रयान्निरुपक्रमश्च द्विविधो, द्वैविध्यं चोक्तभेदेनैव, कोऽसौ ?-अनुभाव-अनुभागः, क्व ?-'मरणे' इत्यर्थात् मरणविषयायुषि, तत्र हि सप्तभिरष्टमिर्वाऽऽकर्षैर्गवामिव मरुषु जलगण्डूषग्रहरूपैर्यत्पुद्गलोपादानं तदनुभागोऽतिदृढ इत्यपवर्तयितुमशक्यतया निरुपक्रमुच्यते, यत्तु षड्भिः पञ्चभिश्चतुर्भिर्वा आगृहीतं-दलिकं तदपवर्तनाकरणेनोपक्रम्यते इति सोपक्रमं, न चैतदुभयमप्यायुःक्षयात्मनि मरणे सम्भवति, तथा एति याति च इत्यायुस्तन्निबन्धनं कर्म्म आयुःकर्म्म तस्य विभुक्तमशक्यतया प्रकृष्टा देशाः प्रदेशास्तेषामग्रं-परिमाणमायुःकर्म्मप्रदेशाग्रम्, अनन्तानन्ताः-अनन्तानन्तसङ्ख्यापरिमिता मरणप्रक्रमेऽप्यर्थादायुःपुद्गलास्तद्विषयत्वाच्च मरणस्यैवमुपन्यासः, किमेतान्तः कृत्स्नेऽप्यात्मनि ?, अत आह-'पएसेहिं'ति प्रक्रमात् सुब्व्यत्ययाच्चात्मप्रदेशेषु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मप्रदेशो ह्येकैकस्तत्प्रदेशैरनन्तानन्तैरावेष्टितः, संवेष्टितः, तथा च वृद्धव्याख्या-इदाणीं पदेसग्गं-अनंताणंता आउगकम्मपोग्गला जेहिं एगभेगो जीवपएसो आवेढिय परिवेढितो, इति गाथार्थः ॥ सम्प्रति कति म्रियन्ते एकसमयेनेतिद्वारमाह-

नि.[२२७] दुन्नि व तिन्नि व चत्तारि पंच मरणाइ अवीइमरणंमि।
कइ मरइ एगसमयंसि विभासावित्थरं जाणे॥

नि.[२२८] सव्वे भवत्थजीवा मरंति आवीइअं सया मरणं।
ओहिं च आइअंतिय दुन्निवि एयाइ भयणाए॥

नि.[२२९] ओहिं च आइअंतिअ बालं तह पंडिअं च मीसं च।
छउमं केवलिमरणं अन्नुन्नेणं विरुज्झंति॥

वृ. द्वे वा त्रीणि वा, वाशब्दस्योत्तरत्रानुवृत्तेः चत्वारि वा पञ्च वा मरणानि वक्ष्यमाणविवक्षातः प्रक्रमादेकस्मिन् समये सम्भवन्ति, आवीचिमरणे सतीति शष्ः, अनेन चास्य सततावस्थित-त्वमेतदविवक्षया च तद्वयादिभेदपरिकल्पनेत्याह, कति म्रियन्त एक समये ?, इति चतुर्थद्वारस्य विशेषेण भाषणं विभाषणं विभाषा-व्याख्या विविधैर्वा प्रकारैर्भाषणं विभाषा-भेदाभिधानं तया विस्तरः-प्रपञ्चस्तं विस्तरं जानीहि जानीयाद्वा, निगमनमेतत्, प्रस्तुतमेवार्थं प्रकटयितुमाह-'सर्वे' निरवशेषाः, तत् किं मुक्तिभाजोऽपीत्याह-'भवस्थजीवाः' भवन्त्यस्मिन् कर्म्मवशवर्तिनो जन्तव इति भवः तत्र तिष्ठन्ति भवस्थाः ते च ते जीवाश्चेति विशेषणसमासः, म्रियन्ते, आवीचिक-मवीचिकं वा मरणमाश्रित्येति शेषः, यद्वा विभक्तिव्यत्ययादावीचिकेन मरणेन म्रियन्ते 'सदा' सर्वकालं, 'ओहिं च'त्ति अवधिमरणं, चशब्दो भिन्नक्रमः, ततश्च 'आइयंतिय'न्ति आत्यन्तिक-मरणं च, द्वे अप्येते 'भजनया' विकल्पनया, किमुक्तं भवति ?-यद्यप्यावीचिमरणवत् अवध्या-त्यन्तिकमरणे अपि चतसृष्वपि गतिषु सम्भवतः तथाऽप्यायुःक्षयसमय एव तयोः सम्भवान्न सदाभावः, अत आवीचिकमरणमेव सदेत्युक्तम्, अनेनावीचिमरणस्य सदाभावेन लोके मरण-त्वेनाप्रसिद्धः अविवक्षायां हेतरुक्त इति भावनीयं।

सम्प्रति 'दोन्निवि' इत्यादि व्यक्तीकरोति-'ओहिं च आइयंतिय'त्ति, चशब्दो भिन्नक्रमः, ततोऽवधिमरणमात्यन्तिकमरणं च, 'बालं' बालमरणं च, तथेत्युत्तरभेदापेक्षया समुच्चये, 'पण्डितं च' पण्डितमरणं, 'मिश्रं च' बालपण्डितमरणं च, चशब्दाद्वैहायसगृध्रपृष्ठमरणे, भक्त-परिज्ञेङ्गिनीपादपोपगमनानि च, 'अन्योऽन्येन' परस्परेण विरुध्यन्ते, युगपदसम्भवात्, तत्र चाविरतस्यावध्यात्यन्तिकमरणयोः अन्यतरद्बालमरणं चेति द्वे, तद्भवमरणेन सह त्रीणि, वशार्तेन चत्वारि, कथञ्चिदात्मघाते च वैहायसगृध्रपृष्ठयोरन्यतरेण पञ्च, आह-बलन्मरणान्तःशल्यमरेण अपि बालमरणभेदावेव, यत आगमः-"बालमरणे दुवालसविहे पन्नत्ते, तंजहा-बलायमरणे वसट्टमरणे असंतोसल्लमरणे तब्भवमरणे गिरिपडणे तरुपडणे जलप्पवेसे जलणप्पवेसे विसभ-क्खणे सत्थोवहणणे वेहाणसे गिद्धपट्टे'त्ति, एतेषु च यद्यपि गिरिपतादिपट्कस्य वैहायस एवान्त-र्भावः तथापि वलन्मरणान्तःशल्यमरणयोः प्रक्षेपे कथं नोक्तसङ्ख्याविरोधः ?, उच्यते, इहावि-रतस्यैव बालमरणं विवक्षितम्।

उक्तं हि-'अविरयमरणं बालमरणं' अनयोस्त्वेकत्र संयमस्थानेभ्यो निवर्तनम्, अन्यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मालिन्यमात्रं विवक्षितं, न तु सर्व्वथा विरतेरभाव एवेति कथं बालमरणे सम्भवः ?, तथा छद्मस्थमरणमपि विरतानामेव रूढमिति नोक्तसङ्ख्याविरोधः, एवं देशविरतस्यापि द्व्यादि भङ्गभावना कार्या, नवरं बालमरणस्थाने बालपण्डितमरणं वाच्यं, विरतस्य त्ववध्यात्यन्तिकमरणयोरन्यतरत् पण्डितमरणं चेति द्वे, छद्मस्थकेवलिमरणयोश्चान्यतरदिति त्रीणि, भक्तपरिज्ञेङ्गिनीपादपोपगमनानामन्यतरेण सह चत्वारि, कारणिकस्य तु वैहायसगृध्रपृष्ठयोरन्यतरेण सह पञ्च, दृढसंयमं प्रत्येवमुक्तं, शिथिलसंयमस्य त्ववध्यात्यन्तिकमरणयोरन्यतरत्, कुतश्चित्कारणाद्वैहायसगृध्रपृष्ठयोश्चान्यतरदिति द्वे, कथञ्चिच्छल्यसम्भवे चान्तःशल्यमरणेन सह त्रीणि, वलन्मरणेन सह चत्वारि, छद्मस्थमरणेन तु पञ्च, पण्डितमरणस्य यथोक्तभक्तपरिज्ञानादीनां वा विशुद्धसंयमत्वादस्याभाव एवेति, आह-विरतस्यावस्थाद्वयेऽपि तद्भवमरणप्रक्षेपे कथं न षष्ठमरणसम्भवः ?, उच्यते, विरतस्य देवेष्वेवोत्पाद इति तत्रैवोत्पत्त्यभावन्न तद्भवमरणसम्भव इति गाथात्रयार्थः ॥ गतं कति म्रियन्त एकसमय इति द्वारम्, इदानीं कतिकृत्वो म्रियते एकैकस्मिन् ? इति द्वारमाह-

नि.[२३०] संखमसंखमनंता कमो उ इक्किक्कगंमि अपसत्थे ।
सत्तट्ठग अनुबंधो पसत्थए केवलिंमि सइं ॥

वृ. 'संखमसंखं'त्ति आर्षत्वात् सङ्ख्याः-असङ्ख्याताः असङ्ख्या-अविद्यमानसङ्ख्याः अनन्ता-अपर्यवसिता, वारा इति प्रक्रमः, 'कमो उ'त्ति क्रमःपरिपाटी, तुशब्दश्च कायस्थितेरल्पबहुत्वापेक्षयाऽयं ज्ञेय इति विशेषद्योतकः, 'एक्केक्कगंमि'त्ति एकैकस्मिन् 'अप्रशस्ते' बालमरणादौ निरूप्यमाणे, तत्र सामान्येन पञ्चेन्द्रियाविरतदेशविरतौ च सङ्ख्याताः, शेषाः पृथिव्युदकाग्नियुद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः असङ्ख्याताः, वनस्पतयोऽनन्ता, एते हि कायस्थित्यपेक्षया यथाक्रमं बहुबहुतरबहुतमस्थितिभाज इतिकृत्वा ।

प्रशस्ते कति वारा म्रियत इत्याह-'सत्तट्ठग'त्ति सप्त वाऽष्ट वा सप्ताष्टास्ते परिमाणमस्येति सप्ताष्टकः, कोऽसौ ?-'अनुबन्धः' सातत्येन भवनं तन्मरणानामिति, ततोऽयमर्थः-सप्त वा अष्ट वा वारा म्रियते, क्व ?-'प्रशस्तके' सर्वविरतिसम्बन्धिनि पण्डितमरणे, इह च चारित्रस्य निरन्तरमवप्त्यसम्भवात् तद्वत एव च प्रशस्तमरणभावादर्थाद् व्यवधानामपि देवभवैराश्रीयते, 'केवलिनि' यथाख्यातचारित्रवति समुत्पन्नकेवले 'सइं'ति सकृदेकमेव मरणमिति । उक्तं कतिकृत्वो म्रियत एकैकस्मिन्निति द्वारं, सम्प्रति कतिभाग एकैकस्मिन्मरणे म्रियत इति द्वारमाह-

नि.[२३१] मरणे अनंतभागो इक्किक्के मरइ आइमं मोत्तुं ।
अनुसमयाई नेयं पढमचरिमंतरं नत्थि ॥

वृ. 'मरणे' प्रागुक्तरूपे अनन्तभाग एकैकस्मिन् म्रियते, किं सर्वस्मिन्नपि ? नेत्याह-'आदिमम्' आवीचिमरणं, तस्यैवाद्यत्वात्, 'मुक्त्वा' अपहाय, इयमत्र भावना-शेषमरणस्वामिनो हि सर्वजीवापेक्षया अनन्तभाग एवेति तेष्वनन्तो भागो म्रियत इत्युच्यते, आवीचिमरणस्वामिनस्तु सिद्धविरहिताः सर्व एव जीवाः, ते चानन्ता इतिकृत्वाऽनन्तभागहीनाः सर्वे जीवा म्रियन्ते इत्युच्यते। उक्तं कतिभागो म्रियते एकैकस्मिन्निति द्वारम्, अधुनाऽनुसमयद्वारमाह-

'अनुसमय'त्ति समयं समयमनु अनुसमयं, वीप्सायामव्ययीभावः, ततश्चानुसमयं-सततम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आदि' प्रथममावीचिमरणं 'ज्ञेयम्' अवबोद्धव्यं, यावदायुस्तस्य प्रतिपादनात्, शेषाणां त्वायुषोऽन्त्यसमय एवैकत्र भावादनुसमयतानभिधानं, बहुसमयविषयत्वादनुसमयतायाः, तथा च वृद्धव्याख्या-''पढमे जाव आउं धरइ सेसाणं एगसमयं जहिं मरइ'' न च 'मासं पायोवगया' इत्यागमेन विरोधः, तत्र पादपोपगमनशब्देन निश्चेष्टताया एवाभिधानात्, मरणस्य तु तत्राप्यायुस्त्रुटिसमय एव सद्भावात्, तुः पूरणे। गतमनुसमयद्वारम्, इदानीं सान्तरद्वारमाह-तत्र प्रथमचरमयोरन्तरं-व्यवधानं 'नास्ति' न विद्यते, प्रथमस्यावीचिमरणस्य सदा सम्भवात्, चरमस्य भवापेक्षया केवलिमरणस्य पुनर्मरणाभावादिति भाव इति गाथार्थः ॥ शेषाणामपि किमेवमित्याह-

नि.[२३२] सेसाणं मरणाणं नेओ संतरनिरंतरो उ गमो।
साई सपज्जवसिया सेसा पढमिल्लुगमनाइ ॥

वृ. शेषाणां मरणानाम्-अवधिमरणादीनां पञ्चदशानां ज्ञेयः, सहान्तरेण-व्यवधानेन वर्तत इति सान्तरः, निष्क्रान्तोऽन्तरान्निरन्तरश्च, तुःशब्दस्य समुच्चयार्थत्वात्, उक्तं हि-''तुशब्दो विशेषणपादपूरणावधारणसमुच्चयेषु'' कोऽसौ ?-गम्यते अनेन वस्तुस्वरूपमिति गमः-प्ररूपणा, इदमुक्तं भवति-यदाऽन्यतरद्बालमरणादिकं प्राप्य म्रियते मृत्वा च भवान्तरे मरणान्तरमनुभूय पुनस्तदेवाप्नोति तदा सान्तरमिति प्ररूपणा, यदा तु बालमरणादिकमवाप्य पुनस्तदेवाव्यवहितमाप्नोति तदा निरन्तरं भवति, तत्प्ररूपकत्वाच्चेह गमोऽपि सान्तरो निरन्तरश्चेत्युक्तः। सम्प्रति गाथापश्चार्धेन कालद्वारमाह-सादीनि च सपर्यवसितानि च सादिसपर्यवसितानि 'शेषाणि' षोडश वक्ष्यमाणापेक्षया अवधिमरणादीनि, एकसामयिकतायास्तेषाभिहितत्वात्, प्रवाहापेक्षया तु शेषभङ्गोपलक्षणमेतत्, प्रवाहतोऽपि भङ्गत्रयपतितानि शेषमरणानि सम्भवन्ति, तथा च वृद्धाः-''बालमरणाणि अनाइयाणि वा अपज्जसियाणि वा, अनादियाणि वा सपज्जवसियाणि, पंडियमरणाणि पुण साइयाणि सपज्जवसियाणि'' मुक्त्यवाप्तौ तदुच्छित्तिसम्भवादिति भावः, 'पढमिल्लुगं'ति प्रथमकम्-आवीचिमरणम् 'अनादि' आदिरहितं प्रवाहापेक्षयेतिभावः, प्रतिनियतायुः पुद्गलापेक्षया तु साद्यपि सम्भवति, उपलक्षणत्वाच्चास्यापर्यवसितं च अभव्यानां, भव्यानां पुनः सपर्यवसितमपीति गाथार्थः ॥ सम्प्रत्यतिगम्भीरतामागमस्य दर्शयन्नात्मौद्धत्यपरिहारायाह भगवान् निर्युक्तिकारः-

नि.[२३३] सव्वे एए दारा मरणविभत्तीइ वन्निआ कमसो।
सगलनिउणे पयत्थे जिनचउदसपुव्वि भासंति ॥

वृ. 'सर्वाणि' अशेषाणि 'एतानि' अनन्तरमुपदर्शितानि 'द्वाराणि' अर्थप्रतिपादनमुखानि 'मरणविभक्तेः' मरणविभक्त्यपरनाम्नोऽस्यैवाध्ययनस्य 'वर्णितानि' प्ररूपितानि, मयेति शेषः, 'कमसो'त्ति प्राग्वत् क्रमतः, आह-एवं सकलापि मरणवक्तव्यतोक्ता उत नेत्याह-सकलाश्च-समस्ता निपुणाश्च-प्रभवादयो जिनचतुर्दशपूर्विणो 'भाषन्ते' व्यक्तमधिदधति, अहं तु मन्दमतीत्वान्न तथा वर्णयितुं क्षम इत्यभिप्रायः, स्वयं चतुर्दशपूर्विणो 'भाषन्ते' व्यक्तभिदधति, अहं तु मन्दमातित्वान्न तथा वर्णयितुं क्षम इत्यभिप्रायः, स्वयं चतुर्दशपूर्वित्वेऽपि यच्चतुर्दशपूर्व्युपादानं, तत्तेषामपि षट्स्थानपतितत्वेन शेषमाहात्म्यख्यापनपरदुष्टमेव, भाष्यगाथा वा द्वारगाथाद्यादारभ्य लक्ष्यन्त इति प्रेर्यानवकाश एवेति गाथार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहैव प्रशस्ताप्रशस्तमरणविभागमाह-

नि.[२३४] एगंतपसत्था तिन्नि इत्थ मरणा जिनेहि पन्नत्ता।
भत्तपरिन्ना इंगिनी पाउवगमनं च कमजिट्ठं ॥

वृ. एकान्तेन नियमेन प्रशस्तानि-श्लाघानि 'त्रीणि' त्रिसङ्ख्यानि 'अत्र' एतेष्वनन्तराभिहितेषु मरणेषु मरणानि 'जिनैः' केवलिभिः 'प्रज्ञप्तानि' प्ररूपितान, तान्येवाह-भक्तपरिज्ञा इङ्गिनी 'पाउवगमनं' चेति पादपोपगमनं च, इदमपि त्रयं किमेकरूपमित्याह-क्रमेण-परिपाट्य ज्येष्ठम्-अतिशयप्रशस्यं क्रमज्येष्ठं यथोत्तरं प्रधानमतिभावः। शेषमरणान्यपि यानि प्रशस्तानि नेषामत्रैवान्तर्भावः, इतराणि कानिचित् कथञ्चित् प्रशस्तानि, अपराणि तु सर्वथैवाप्रशस्तानीति गाथार्थः ॥ इह च येनाधिकारस्तदाह-

नि.[२३५] इत्थं पुन अहिगारो नायव्वो होइ मणुअमरणेणं।
मुत्तुं अकाममरणं सकाममरणेण मरियव्वं ॥

वृ. 'अत्र' एतेषु मरणेषु, पुनःशब्दो वाक्योपन्यासार्थः, अधिकारो ज्ञातव्यो भवति मनुजमरणेन, किमुक्तं भवति ?-मनुष्यभवसम्भविना पण्डितमरणादिना, तान्येव प्रत्युपदेशप्रवृत्तेः। सम्प्रत्युक्तार्थसंक्षेपद्वारेणोपदेशसर्वस्वमाह-मुक्त्वाऽकाममरणं-बालमरणाद्यमप्रशस्तं 'सकाममरणेन' भक्तपरिज्ञादिना प्रशस्तेन मर्तव्यमिति गाथार्थः ॥

गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रच्चारीणयं, तच्चेदम्-

मू.(१२१) अन्नवंसि महोहंसि, एगे तरइ दुरुत्तरं।
तत्थ एगे महापन्ने, इमं पण्हमुदाहरे ॥

वृ. अण्र्णो-जलं विद्यते यत्रासावर्णवः, अर्नसो लोपश्चेति वप्रत्ययः सकारलोपश्च, स च द्रव्यतो जलधिर्भावतश्च संसारः तस्मिन्, कीदृशि ?-'महोघंसि'त्ति महानोघः-प्रवाहो द्रव्यतो जलसम्बन्धी भावतस्तु भवपरम्परात्मकः प्राणिनामत्यन्तमाकुलीकरणहेतुः चरकादिमतसमूहो वा यस्मिन् स महौघः तस्मिन्, महत्त्वं चोभयत्रागाधतयाऽदृष्टपरपारतया च मन्तव्यं, तत्र 'एक' इत्यसहायो रागद्वेषादिसहभावविरहितो गौतमादिरित्यर्थः, 'तरति' परं पारमाप्नोति, तत्कालपेक्षया वर्त्तमाननिर्देशः, 'दुरुत्तरं'ति विभक्तिव्यत्ययादुरुत्तरे-दुःखेनोत्तरितुं शक्ये, दुरुत्तरमिति क्रियाविशेषणं वा, न हि यथाऽसौ तरति तथाऽपरैर्गुरुकर्म्मभिः सुखेनैव तीर्यते, अत एव एक इति, सङ्ख्यावचनो वा, एक एव-जिनमतप्रतिपन्नाः, न तु चरकादिमताकुलितचेतसोऽन्ये तथा तरितुमीशत इति, 'तत्रे'ति गौतमादौ तरणप्रवृत्ते 'एक' इति तथाविधतीर्थकरनामकर्मोदयादनुत्तरावाप्तविभूतिरद्वितीयः, किमुक्तं भवति ?-तीर्थकरः, स ह्येक एव भरते सम्भवतीति, 'महापन्ने'त्ति महती-निरावरणतयाऽपरिमाणा प्रज्ञा-केवलज्ञानात्मिका संवित्त अस्येति महाप्रज्ञः, स किं इत्याह-'इमम्' अनन्तरवक्ष्यमाणं हृदि विपरिवर्तमानतया प्रत्यक्षं प्रक्रमात्तरणोपायं, 'पट्ठं'ति स्पष्टम्-असन्दिग्धं, पठ्यते च 'पण्हं'ति पृच्छयत इति प्रश्नं-प्रष्टव्यार्थरूपम् 'उदाहरे'त्ति भूते लिट्, तत उदाहरेद्-उदाहृतवान्, पठ्यते च-'अन्नवंसि महोघंसि एगे तिन्ने दुरुत्तरं'ति, अत्र सुब्व्यत्यये विशेषः, ततश्च-अर्नवान्महौघादुरुत्तरात् तीर्ण इव तीर्णः-तीरप्राप्त इतियोगः, एको धातिकर्म्मसाहित्यरहितः, 'तत्रे'ति सदेवमनुजायां परिषदि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोऽद्वितीयः, स च तीर्थकृदेव, शेषं प्राग्वदिति सूत्रार्थः ॥ यदुदाहृतवांस्तदेवाह-

मू. (१३०) संतिमे य दुवे ट्ठाणा, अक्खाया मारणंतिया।
अकाममरणं चेव, सकाममरणं तहा ॥

वृ. सन्तीति प्राकृतत्वात् वचनव्यत्ययेन स्तो-विद्येते 'इमे' प्रत्यक्षे, चः पूरणे, पठ्यते च 'संतिमेए'त्ति स्त एते, मकारोऽलाक्षणिकः, एवमन्यत्रापि यत्र नोच्यते तत्र भावनीयं, 'द्वे' द्विसङ्ख्ये तिष्ठन्त्यनयोर्जन्तव इति स्थाने 'आख्याते' पुरातनतीर्थकृद्भिरपि कथिते, अनेन तीर्थकृतां परस्परं वचनाव्याहतिरुपदर्शिता, ते च कीदृशे ?-'मारणंतिए'त्ति मरणमेवान्तो-निजनिजायुषः पर्यन्तो मरणान्तः तस्मिन् भवे मारणान्तिके, ते एव नामत उपदर्शयति-'अकाम-मरणम्' उक्तरूपमनन्तरवक्ष्यमाणरूपं च, वक्ष्यमाणापेक्षया चः समुच्चये, एवेति पूरणे, 'सकाममरणम्' उक्तरूपं वक्ष्यमाणस्वरूपं च तथेति सूत्रार्थः ॥ केषां पुनरिदं कियत्कालं च ?

मू. (१३१) बालाणं अकामं तु, मरणं असतिं भवे।
पंडियाणं सकामं तु, उक्कोसेण सतिं भवे ॥

वृ. बाला इव बालाः सदसद्विवेकविकलतया तेषाम् 'अकामं तु'त्ति तुशब्दस्यैवकारार्थत्वात् अकाममेव मरणमसकृद्-वारंवारं भवेत्, ते हि विषयाभिष्वङ्गतो मरणमनिच्छन्त एव म्रियन्ते, तत एव च भवाटवीमटन्ति, 'पण्डितानां' चारित्रवतां सह कामेन-अभिलाषेण वर्तते इति सकामं मरणं प्रत्यसंत्रस्ततया, तथात्वं चोत्सवूतत्वात् तादृशां मरणस्य, तथा च वाचकः-

"सञ्चिततपोधनानां नित्यं व्रतनियमसंयमरतानाम्।
उत्सवभूतं मन्ये मरणमनापराधवृत्तीनाम् ॥"

न तु परमार्थतः, तेषां सकामं-सकामत्वं, मरणाभिलाषस्यापि निषिद्धत्वाद्, उक्तं हि-

"मा मा हु विंचितेज्जा जीवामि चिरं मरामि य लहुंति।
जइ इच्छसि तरिउं जे संसारमहोदहिमपारं ॥"ति,

तुः पूर्वापेक्षया विशेषद्योतकः, तच्च 'उत्कर्षेण' उत्कर्षोपलक्षितं, केवलिसम्बन्धीत्यर्थः, अकेवलिनो हि संयमजीवितं दीर्घमिच्छेयुरपि, मुक्त्यवाप्तिः, इतः स्यादिति, केवलिनस्तु तदपि नेच्छन्ति, आस्तां भवजीवितमिति, तन्मरणस्योत्कर्षेण सकामता 'सकृद्' एकवारमेव भवेत्, जघन्येन तु शेषचारित्रिणः सप्ताष्ट वा वारान् भवेदित्याकूतमिति सूत्रार्थः ॥ यदुक्तं-'स्त इमे द्वे स्थाने' तत्राद्यं तावदाह-

मू. (१३२) तत्थिमं पढमं ठाणं, महावीरेण देसियं।
कामगिद्धे जहा बाले, भिसं कूराणि कुव्वति ॥

वृ. 'तत्रे'ति तयोरकाममरणसकाममरणाख्ययोः स्थानयोर्मध्ये 'इदम्' अनन्तरमभिधास्य-मानरूपं 'प्रथमम्' आद्यं स्थानं, 'महावीरेणे'ति चरमतीर्थकृता, 'तत्रैको महाप्रज्ञः' इति मुकुलि-तोक्तेरभिव्यक्त्यर्थमेतत्, 'देशितं' प्ररूपितं, किं तत् इत्याह-'कामेषु' इच्छामदनात्मकेषु 'गृद्धः' अधिकाङ्क्षावान् कामगृद्धो 'यथा' इत्युप्रदर्शनार्थः, 'बाल' इत्युक्तरूपो 'भृशम्' अत्यर्थं 'क्रूराणि' रौद्राणि, कर्म्माणीति गम्यते, तानि च प्राणव्यपरोपणादीनि 'कुव्वति'त्ति करोति-क्रिययाऽभिनिर्वर्तयति, शक्तावशक्तावपि क्रूरतया तन्दुलमत्स्यवन्मनसा कृत्वा च प्रक्रमाद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काम एव म्रियते इति सूत्रार्थः ॥ इदमेव ग्रहणकवाक्यं प्रयञ्चयितुमाह-

मू. (१३३) *जे गिद्धे कामभोगेसु, एगे कूडाय गच्छइ।*
न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रती ॥

वृ. 'य'इत्यनिर्दिष्टस्वरूपो गृद्धः, काम्यन्त इति कामाः भुज्यन्त इति भोगाः भुज्यन्त इति भोगाः ततश्च कामाश्च ते भोगाश्च कामभोगाः तेषु-अभिलषणीयशब्दादिषु, यद्वा कामौ च शब्दरूपाख्यौ भोगाश्च स्पर्शरसगन्धारूपाः कामभोगाः तेषु, उक्तं हि-"कामा दुविहा पन्नत्ता-सद्दा रूवा य, भोगा तिविहा पन्नत्ता, तंजहा-गंधार रसा फासा य"त्ति, 'एकः' कश्चित् क्रूरकर्म्मा तन्मध्यात् कूटमिव-प्रभूतप्राणिनां यातनाहेतुत्वान्नरक इत्यर्थः, यथैव हि कूटनिपतितो मृगो व्याधैरनेका हन्यते, एवं नरकपतितोऽपि जन्तुः परमाधार्मिकैरिति, तस्मै कूटाय, गत्यर्थकर्मणि द्वितीयाचतुर्थ्यां वित्यादिना चतुर्थी, 'गच्छति' याति, यद्वा यो गृद्धः 'कामभोगेष्वि'ति कामेषुस्त्री-सङ्गेषु भोगेषु-धूपनविलेपनादिषु स 'एकः' सुहृददिसाहाय्यरहितः कूटाय गच्छति, अथवा कूटं द्रव्यतो भावतश्च, तत्र द्रव्यतो मृगादिबन्धनं, भावतस्तु मिथ्याभाषणादि, तस्मै गच्छतीत्यनेकार्थत्वात्, प्रवर्त्तते, स हि मांसादिलोलुपतया मृगादिबन्धनान्यारभते, मिथ्याभाषणादीनि चासेवत इति, प्रेरितश्च केश्चिद्वदति-'न मे'इति न मया 'दृष्टः' अवलोकितः, कोऽसौ ?-'परलोको' भूतभाविजन्मात्मकः, कदाचिद्विषयाभिरतिरप्येवंविधैव स्यादत आह-चक्षुषा लोचनेन दृष्टा-प्रतीता चक्षुर्दृष्टा 'इय'मिति तामेव प्रत्यक्षां निर्दिशति, रम्यतेऽस्यामिति रतिः-स्पर्शनादिसम्भोगजनिता चित्तप्रह्लत्तिः, तस्यायमाशयः-कथं दृष्टपरित्यागतोऽदृष्टपरिकल्पनयाऽऽत्मानं विप्रलभेयमिति सूत्रार्थः ॥ पुनस्तदाशयमेवाभिव्यञ्जयितुमाह-

मू. (१३४) *हत्थागया इमे कामा, कालिया जे अनागया।*
को जाणइ परे लोए?, अत्थि वा नत्थि वा पुनो ॥

वृ. हसन्ति तेनावृत्य मुखं घ्नन्ति वा धात्यमनेनेति हस्तस्तम् आगताः-प्राप्ताः हस्तागताः, उपमार्थोऽत्र गम्यते, ततो हस्तागता इव स्वाधीनतया, क एते ?, 'इमे' प्रत्यक्षोपलभ्यमानाः काम्यन्त इति कामाः-शब्दादयः, कदाचिदागामिनोऽप्येबंविधा एव स्युरित्याह-काले सम्भवन्तीति कालिकाः-अनिश्चितकालान्तरप्राप्तयो ये 'अनागता' भाविजन्मसम्बन्धिनः, कथं पुनरमी अनिश्चितप्राप्तय इत्याह-'को जाणइ'त्ति उत्तरस्य पुनःशब्दस्येह सम्बन्धानत् कः पुनर्जानाति?, नैव कश्चित्, यथा-परलोकोऽस्ति नास्ति वेति, अयं चास्याशयः-परलोकस्य सुकृतादिकर्म्मणां वाऽस्तित्वनिश्चयेऽपि 'को हि हस्तगतं द्रव्यं पादगामि करिष्यति'ति न्यायतः क इव हस्तागतान् कामानपहाय कालिककामार्थं यतेत, तत्त्वतस्तु परलोकनिश्चय एव न समस्ति, तत्र प्रत्यक्षस्याप्रवृत्तेः, अनुमानस्य तु प्रवृत्तावपि गोपालघटिकादिधूमाग्नयनुमानवदन्यथाऽप्युलम्भनान्निश्चायकत्वासम्भवान्न ततस्तदस्तित्वनिश्चयो नास्तित्वनिश्चयो वा, किन्तु सन्देह एव, न त्वयमेवं विवेचयति-यथाऽवाप्ता अपि कामा दुरन्ततया त्युक्तुचिताः, दुरन्तत्वं च तेषां शल्यविषादिभिरुदाहरणैः प्रतीतमेव, तथा च वक्ष्यति-

"सल्लं कामा विसं कामा, कामा आसीविसोवमा।
वामे पत्थेमाणा, अकामा जंति दुग्गतिं ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न हि विषादीनि मुखमधुराण्यप्यायतिविरसतया विवेकभिर्नहीयन्ते, यदपि परलोकसन्देहाभिधानं तदपि न पापपरिहारोपदेशं प्रति बाधकं, पापानुष्ठानस्येहैव चौरपारदारिकादिषु महानर्थहेतुतया दर्शनात्, परलोकनास्तित्वानिश्चये च तत्रापि तथानर्थहेतुतया सम्भाव्यमानत्वाद्वल्मीककरप्रवेशनादिवत् प्रेक्षावद्भि: परिहर्तुमुचितत्वात्, न च परलोकास्तित्वं प्रति सन्देह:, तन्निश्चायकानुमानस्य तदहर्जातबालकस्तनाभिलाषादिलिङ्गवलोत्पन्नस्य तथाविधाध्यक्षवदव्यभिचारित्वेन तत्र तत्र समर्थितत्वादित्यलं प्रसङ्गेनेति सूत्रार्थ: ॥ अन्यस्तु कथञ्चिदुत्पादितप्रत्ययोऽपि कामान् परिहर्तुमशक्नुवन्निदमाह-

मू. (१३५) *जनेन सद्धिं होक्खामि, इति बाले पगब्भइ।*
काम भोगानुरागेणं, केसं संपडिवज्जइ ॥

वृ. जायत इति जनो-लोकस्तेन 'सार्द्धं' सह भविष्यामि, किमुक्तं भवति ?-बहुर्जनो भोगासङ्गी तदहमपि तद्गतिं गमिष्यामि, यद्वा 'होक्खामि'त्ति भोक्ष्यामि-पालयिष्यामि, यथा ह्ययं जन: कलत्रादिकं पालयति तथाऽहमपि, न हीयान् जनोऽज्ञ इति 'बाल:' अज्ञ: 'प्रगल्भते' धाष्टर्यमवलम्बते, अलीकवाचालतया च स्वयंनष्ट: परानपि नाशयति, न विवेचयति यथा-किन्मुन्मार्गप्रस्थितेनाविवेकिजनेन बहुनाऽपि ? मम विवेकिन: प्रमाणीकृतेन ?, स्वकृतकर्मफलभुजो हि जन्तव:, स चैवं कामभोगेषु-उक्तरूपेषु अनुराग:-अभिष्वङ्ग कामभोगानुराग:-तेन 'क्लेशम्' इह परत्र च विविधबाधात्मकं 'सम्प्रतिपद्यते' प्राप्नोतीति सूत्रार्थ: ॥ यथा च कामभोगानुरागेण क्लेशं संप्रतिपद्यते तथा वक्तुमाह-

मू. (१३६) *तओ दंडं समारभति तसेसुं थावरेसु य।*
अट्ठाए य अनट्ठाए, भूयगामं विहिंसइ ॥

वृ. 'तत' इति कामभोगानुरागात् 'से'इति स धाष्टर्यवान् दण्डयते संयमसर्वस्वापहरणेनात्मा अनेनति दण्डो-मनोदण्डादस्तिं 'समारभते' प्रवर्तत इति, केषु ?-त्रस्यन्ति-तापाद्युपतसौ छायादिकं प्रत्यभिसर्पन्तीति त्रसा:-द्वीन्द्रियादयस्तेषु, तथा शीतातपाद्युपहता अपि स्थानान्तरं प्रत्यनभिसर्पितया स्थानशीला: स्थावरास्तेषु च, अर्थ:-प्रयोजनं वित्तावाप्त्यादि: तदर्थमर्थाय, चत्य स्वयहितसम्बन्धत्वात् अनर्थाय च-यदात्मन: सुहृदादेर्वा नोपयुज्यते, ननु किमनर्थमपि कश्चिद्दण्डं समारमते, एवमेतत् तथाविधपशुपालवत्।

तत्र सम्प्रदाय:-यथैक: पशुपाल: प्रतिदिनं मध्याह्नगते रवौ अजासु महान्यग्रोधतरुं समाश्रितासु तत्थात्ताणतो निविण्णो वेणुविदलेण अजोद्गीर्णकोलास्थिभि: तस्य वटस्य पत्राणि छिद्रीकुर्वन तिष्ठति, एवं तेन स वटपादप: प्रायसश्छिद्रपत्रीकृत:, अन्नया तत्थेगो रायपुत्तो दातियधाडितो तच्छायसमस्सितो य तस्स बडस्स सव्वीणि पत्राणि छिद्रतानि, तो तेन सो पसुपालतो पुच्छितो-केणेयाणि पत्राणि छिद्दीकयाणि ?, तेन भण्णइ-मया, एयाणि क्रीडापूर्वं छिद्रितानि, तेन सो बहुणा दव्वजाणए बिलोभेउं भण्णति-सक्केसि जस्साहं भणामि तस्स अच्छीणि छिद्देउं ?, तेन भण्णति-छुड्डु अब्भासत्थो होउ तो सक्केमि, तेन नयरं नीतो, रायमग्गसन्निविट्ठे घरे ठवितो, तस्स रायपुत्तस्स भाया राया, सो तेन मग्गेण अस्सवाहणियाए निज्जइ, एएण भण्णति-एयस्स अच्छीणि पाडेहित्ति, तेन य गोलियधणुयएण भण्णति-ब्रूहि वरं, किं ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयच्छामि ?, तेन भण्णति-मज्झ तमेव गामं देहि जत्थ अच्छामि, तेन सो दिन्नो, पच्छा तेन तम्मि पच्चंतगामे अच्छू रोविओ तुंबीतो य, निप्फन्नेसु तुंबाणि गुले सिद्धिउं तं गुडतुंबयं भुक्त्वा २ गायति स-

अट्टमट्टं च सिखिज्जा, सिक्खियं न निरत्थयं।
अट्टमट्टपसाएण, भुंजए गुडतुंबयं ॥

तेन तानि वडपत्ताणि अनट्ठाए छिद्दियाणि, अच्छीणि पुन अट्ठाए पाडियानि। दण्डमारभत इत्युक्तं, तत्किमसावारम्भमात्र एवावतिष्ठते इत्याह-'भूयगामं'ति भूताः-प्राणिनस्तेषां ग्रामः-समूहस्तं विविधैः प्रकारैर्हिनस्ति-व्यापादयति, अनेन च दण्डत्रयव्यापार उक्त इति सूत्रार्थः ॥ किमसौ कामभोगानुरागेणैतावदेव कुरुते ? उतान्यदपीत्याह-

मू. (१३७) *हिंसे बाले भुसावाई, माईल्ले पिसुने सढे।*
भुंजमाणे सुरं मंसं, सेयमेयंति मन्नइ ॥

वृ. हिंसनशीलो हिंस्त्रः अनन्तरोक्तनीत्या, तथैवंविधश्च सन्नसौ 'बालः' उक्तरूपो 'मृषा-वादी'ति अलीकभाषणशीलः, 'माईल्ले'त्ति माया-परवञ्चनोपायचिन्ता तद्वान्, 'पिशुनः' परदोषोद्घाटकः 'शठः' तत्तन्नेपथ्यादिकरणतोऽन्यथाभूतमात्मानमन्यथा दर्शयति, मण्डिक-चौरवत्, अत एव च भुञ्जानः 'सुरां' मद्यं 'मांसं' पिशितं 'श्रेयः' प्रशस्यतरमेतदिति मन्यते, उपलक्षणत्वात् भाषते च-'न मांसभक्षणे दोषो, न मद्ये न च मैथुन'इत्यादि, तदनेन मनसा वचसा कायेन चासत्यत्वमस्योक्तामिति सूत्रार्थः ॥ पुनस्तद्वक्तव्यतामेवाह-

मू. (१३८) *कायसा वयसा मत्ते, वित्ते गिद्धे य इत्थिसु।*
दुहओ मलं संचिणइ, सिसुनागुव्व मट्टियं ॥

वृ. 'कायस'त्ति सूत्रत्वात् कायेन-शरीरणे वचसा-वाचा उपलक्षणत्वात् मनसा च 'मत्तो' दृप्तः, तत्र कायमत्तो मदान्धगजवत् यतस्ततः प्रवृत्तिमान्, यद्वाऽहोऽहं बलवान् रूपवान् वेति चिन्तयन् वचसा स्वगुणान् ख्यापयन् अहोऽहं सुस्वर इत्यादि वा चिन्तयन्, मनसा च मदाध्मातमानसः अहोऽहमवधारणाशक्तिमानिति वा मन्वानो 'वित्ते' द्रविने 'गृद्धो' गृद्धिमान्, चशब्दो भिन्नक्रमः, ततः स्त्रीषु च गृद्धः, तत्र वित्ते गृद्ध इति अदत्तादानपरिग्रहोपलक्षणं, तद्भाव-भावित्यात्तयोः, स्त्रीषु गृद्ध इत्यनेन मैथुनासेवित्वमुक्तं, स हि स्त्रियः संसारसर्वस्वभूता इति मन्यते, तथा च तद्वचः-

"सत्यं वच्मि हितं वच्मि, सारं वच्मि पुनः पुनः।
अस्मिन्नसारे संसारे, सारं सारङ्गलोचनाः ॥"

तदभिरतिमांश्च मैथुनासेव्येय भवति, स एवंविधः किमित्याह-'दुहतो'त्ति द्विधा-द्वाभ्यां रागद्वेषात्मकाभ्यां बहिरन्तः प्रवृत्त्यात्मकाभ्यां वा प्रकाराभ्यां, सूत्रत्वाद्विविधं वा इहलोक-परलोकवेदनीयतया पुण्यपापात्मकतया वा, 'मूलम्' अष्टप्रकारं कर्म्म 'संचिनोत्ति' बन्धाति, क इव किमित्याह-'शिशुनागो'गण्डूपदोऽलस उच्यते, स इव मृत्तिकां, स हि स्निग्धतनुतया बही रेणुभिरवगुण्डयते, तामेव चाश्नीते इति बहिरन्तश्च द्विधापि मलमुपचिनोति, तथाऽयमपि, एतद्दृष्टान्ताभिधाने त्वयभिप्रायो-यथाऽसौ बहिरन्तश्चोपचितमलः खरतरदिवाकरकरनिकर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्पर्शतः शुष्यन्निहैव क्लिश्यति विनाशं चाप्नोति, तथाऽयमप्युपचितमलः आशुकारि-कर्म्मवशत इहैव जन्मनि क्लिश्यति विनश्यति चेति सूत्रार्थः ॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (१३९) तओ पुट्ठो आयंकेण, गिलाणो परितप्पति।
पभीओ परलोगस्स कम्मानुप्पेही अप्पणो ॥

वृ. 'ततो'त्ति तकः ततो वा दण्डारम्भणाद्युपार्जितमलतः स्पृष्टः, केन ?-'आतङ्केन' आशुघातिना शूलविसूचिकादिरोगेण तत्तद्दुःखोदयात्मकेन वा 'ग्लान'इति मन्दोऽपगतहर्षो वा परीति-सर्वप्रकारं तप्यते, किमुक्तं भवति ?-बहिरन्तश्च खिद्यते, 'प्रभीत'इति प्रकर्षेण त्रस्तः, कुतः ?, 'परलोगस्स'त्ति परलोकात्, सुब्व्यत्ययेन पञ्चम्यर्थे षष्ठी, किमिति ?-क्रियत इति कर्म-क्रिया तदनुप्रेक्षत इत्येवंशीलः, कर्मानुप्रेक्षी, यत इति गम्यते, कस्य ?-आत्मनः, स हि हिंसालीकभाषणादिकामात्मचेष्टां चिन्तयन्न किञ्चिन्मया शुभमाचरितं, किन्तु सदैवाज-रामरवच्चेष्टितमिति चिन्तयंश्चेतस्यातङ्कतश्च तनावपि खिद्यते, भवती हि विषयाकुलितचेतसोऽपि प्रायः प्राणोपरमसमयेऽनुतापः, तथा चाहुः-

"भवित्रीं भूतानां परिणतिमनालोच्य नियतां, पुरा यद्यत्किञ्चिद्विहितमशुभं यौवनमदात्।
पुनः प्रत्यासन्ने महति परलोकैकगमने, तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम् ॥"

इति सूत्रार्थः ॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (१४०) सुया मे नरए ठाणा, असीलाणं च जा गती।
बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ॥

वृ. 'सुय'त्ति श्रुतानि-आकर्णितानि 'मे' इति मया 'नरके' सीमन्तकादिनाम्नि, कानि ?-'ठाणा' इति लिङ्गव्यत्ययेनोत्पत्तिस्थानानि घटिकालयादीनि येष्वतिसंपीडिताङ्गा दुःखमा-कृष्यमाणाः बहिर्निष्क्रामन्ति जन्तवः, यद्वा नरके-रत्नप्रभादिनरकपृथिव्यात्मके स्थानानि-सीमन्तकाप्रतिष्ठानादीनि कुम्भीवैतरण्यादीनि वा, अथवा स्थानानिसागरोपमादिस्थित्यात्मकानि, तत्किमियताऽपि परितप्यत इत्यत आह-'अशीलानाम्' अविद्यमानसदाचाराणा या गतिर्नरका-त्मिका सा च श्रुतेति सम्बन्धः कीदृशानाम् ?-'बालानाम्' अज्ञानां 'क्रूरकम्मणां' हिंस्रमृषाभाष-कादीनां, कीदृशी गतिरित्याह-प्रगाढा नामात्युत्कटतया निरन्तरतया च प्रकर्षवत्यो 'यत्र' यस्यां गतौ वेद्यन्त इति वेदनाः-शीतोष्णशाल्यल्याश्लेषणादयः, तदयमस्याशयः-ममैवंविधानुष्ठान-स्येदृश्येव गतिरिति सूत्रार्थः ॥ तथा-

मू. (१४१) तत्थोववाइयं ठाणं, जहा मे तमनुस्सुयं।
आहाकम्मेहिं गच्छन्तो, सो पच्छा परितप्पति ॥

वृ. 'तत्रे'ति नरकेषु उपपाते भवमौपपातिकं 'स्थानं' स्थितिः 'यथा' येन प्रकारेण, भवतीति शेषः, 'मे' मया तदित्यनन्तरोक्तपरामर्शे 'अनुश्रुतम्' अवधारितं, गुरुभिरुच्यमानमिति शेषः, औपपातिकमिति च ब्रुवतोऽस्यायमाशयः-यदि गर्भजत्वं भवेत् भवेदपि तदवस्थायां छेद-भेदादिनारकदुःखान्तरम्, औपपातिकत्वे त्वन्तर्मुहूर्तानन्तरमेव तथाविधवेदनोदय इति कुतस्त-दन्तरसम्भवः ?, तथा च-'आहाकम्मेहिं'ति आधानमाधाकरणम्, आत्मनेति गम्यते, तदुपल-क्षितानि कर्माण्याधाकर्म्माणि, तैः आधाकर्मभिः-स्वकृतकर्मभिः, यद्वाऽऽर्षत्वात्, 'आहेति'-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आधाय कृत्वा, कर्माणीति गम्यते, ततस्तैरेव कर्म्मभिः 'गच्छन्' यान्, प्रक्रमान्नरकं, यद्वा-'यथाकर्मभिः' गमिष्यमाणगत्यनुरूपैः तीव्रतीव्रतराद्यनुभावान्वितैर्गच्छंस्तदनुरूपमेव स्थानं, 'स' इति बालः, 'पश्चादि'त्यायुषि हीयमाने 'परिपत्यते' यथा धिङ् मामसदनुष्ठायिनं, किमिदानीं मन्दभाग्यः करोमि ?, इत्यादि शोचत इति सूत्रार्थः ॥ अमुमेवार्थं दृष्टान्तद्वारेण दृढयन्नाह-

मू. (१४२) *जहा सागडिओ जाणं, समं हिच्चा महापहं।*
विसमं मग्गमोतिन्नो, अक्खभग्गंमि सोयइ ॥

वृ. 'यथे'त्युदाहरणोपन्यासार्थः, शक्नोति शक्यते वा धान्यादिकमनेन वोढुमिति शकटं तेन चरति शाकटिकः-गन्त्रीवाहकः 'जाणं'ति जानन्नवबुध्यमानः 'समम्' उपलादिरहितं 'हित्वा'त्यक्त्वा, कम् ?-महांश्चासौ विस्तीर्णतया प्राधान्येन च पन्थाश्च महापथः, 'ऋक्पूरब्धूःपथामानक्षे इत्यकारः समासान्तस्तं, 'विषमम्' उपलादिसंकुलं 'मार्गं' पन्थानं 'ओतिन्नो'त्ति अवतीर्णः-गन्तुमुपक्रान्तः, पठ्यते च-'ओगाढो'त्ति तत्र चावगाढ आरूढः प्रपन्न इति चैकोऽर्थः, अश्नीते नवनीतादिकमित्यक्षो-धूः तस्य भङ्गो-विनाशः अक्षभङ्गः तस्मिन् पाठान्तरतश्चाक्षे भग्ने, शोचते यथा धिग् मम परिज्ञानं यज्जानन्नपीत्थमपायमवाप्तवानिति सूत्रार्थः ॥

मू. (१४३) *एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया।*
बाले मच्चुंमुहं पत्ते, अक्खे भग्गे व सोयइ ॥

वृ. 'एव'मिति शाकटिकवद् 'धर्मं' क्षान्त्यादिकं यतिधर्म्मं सदाचारात्मकं वा 'विउक्कम'त्ति व्यत्क्रम्य विशेषेणोल्लङ्घ्य न धर्मोऽधर्म्मः, नञ विपक्षेऽपि वर्तते इति धर्मप्रतिपक्षः, तं-हिंसादिकं 'प्रतिपद्य' अभ्युपगम्य 'बालः' अभिहितरूपो मरणं-मृत्युस्तस्य मुखमिव मुखं मृत्युमुखं-मरणगोचरं 'प्राप्तो' गतः, किमित्याह-अक्षे भग्न इव शोचति, किमुक्तं भवति ?-यथा-अक्षभङ्गे शाकटिकः शोचति तथाऽयमपि स्वकृतकर्मणामिहैव मारणान्तिकवेदनात्मकं फलमनुभवन्नात्मानमनुशोचति, यथा हा किमेतज्जानताऽपि मयैवमनुष्ठितमिति सूत्रार्थः ॥ शोभनानन्तरं च किमसौ करोतीत्याह-

मू. (१४४) *तओ से मरणंतंमि, बाले संतस्सइ भया।*
अकाममरणं मरई, धुत्ते वा कलिणा जिए ॥

वृ. 'तत' इत्यातङ्कोत्पत्तौ यच्छोचनमुक्तं तदनन्तरं 'से' इति स मरणमेवान्तो मरणान्तस्तस्मिन्, उपस्थित इति शेषः, 'बालो' रागाद्याकुलितचित्तः 'संत्रस्यति' समुद्विजते बिभेतीतियावत्, कुतः ?-'भयात्' नरकगतिगमनसाध्वसाद्, अनेनाकामत्वमुक्तं, स च किमेवं बिभ्यत् मरणाद्विमुच्यते ? उत नेत्याह-अकामस्य-अनिच्छतो मरणमकाममरणं तेन, सूत्रे चार्षत्वाद्वितीया, 'म्रियते' प्राणांस्त्यजति, क इव कीदृशः सन् ?-'धूर्त इव' द्यूतकार इव, वाशब्दस्योपमार्थत्वात्, 'कलिना' एकेन, प्रक्रमात् दायेन, जितः सन्नात्मानं शोचति, यथा ह्ययमेकेन दायेन जितः सन्नात्मानं शोचति तथाऽसावपीत्वरैर्विपाककटुभिः संक्लेशबहुलैर्मनुजभोगैर्दिव्यसुखं हारितः शोचन्नेव म्रियत इति सूत्रार्थः ॥ प्रस्तुतमेवार्थं निगमयितुमाह-

मू. (१४५) *एयं अकाममरणं, बालाणं तु पवेइयं।*
इत्तो सकाममरणं, पंडियाण सुणेह मे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'एतद्' अनन्तरमेव दुष्कृतकर्म्मणां परलोकाद्बिभ्यता यन्मरणमुक्तं तदकाममरणं, बालानामेव, तुशब्दस्यैवार्थत्वात्, 'प्रवेदितं' प्रकर्षेण प्रतिपादितं, तीर्थकृद्गणधरादिभिरिति गम्यते। पण्डितमरणप्रस्तावनार्थमाह- 'एत्तो' त्ति इतोऽकाममरणादनन्तरं 'सकाममरणं पण्डितानां सम्बन्धि 'शृणुत' आकर्णयत 'मे' मम, कथयत इत्युपस्कारः इति सूत्रार्थः॥ यथाप्रतिज्ञातमाह-

मू. (१४६) *मरणंपि सपुन्नाणं, जहा मे तमनुस्सुयं।*
विप्पसन्नमनाघायं, संजयाणं वुसीमओ॥

वृ. मरणपि आस्तां जीवितमित्यपिशब्दार्थः, 'पुण कर्म्मणि शुभे' इत्यस्माद्धातोः 'उणादयो बहुल' मिति बहुलवचनाद्भावे क्यपि पुण्यम्, उक्तं हि-

"पुन कर्म्मणि निर्दिष्टः शुभविशेषप्रकाशको धातुरयम्।
भावप्रत्यययोगाद्विभक्तिनिर्देशसिद्धमेतद्रूपम्॥"

सह तेन वर्तन्त इति सपुण्यास्तेषां न त्वन्येषामपुण्यवतां, किं सर्वमपि?, नेत्याह- 'यथा' येन प्रकारेण 'मे' मम, कथयत इति गम्यते, तदित्युपक्षेयः, तत्रोपात्तम् 'अनुश्रुतम्' अवधारितं, भवद्भिरिति शेषः, सुष्ठु प्रसन्न मरणसमयेऽप्यकलुषं कषायकालुष्यापगमान् मनः-चेतो येषां ते सुप्रसन्नमनसः महामुनयस्तेषां ख्यातं-स्वसंवेदनतः प्रसिद्धं सुप्रसन्नमनःख्यातं, यद्वा- 'सुप्पसन्नेहि अक्खायं' अत्र च सुष्ठु प्रसन्नैः-पापपङ्कापगमनेनात्यन्तनिर्मलीभूतैः, शेषतीर्थकृद्भिरिति गम्यते, आख्यातं।

पठ्यते च 'विप्पसण्णमनाघायं' ति, तत्र च विशेषेण विविधैर्वा भावनादिभिः प्रकारैः प्रसन्ना-मरणेऽप्यपहतमोहरेणुतयाऽनाकुलचेतसो विप्रसन्नाः, तत्सम्बन्धि मरणमप्युपचारा-द्विप्रसन्नं, न विद्यते आघातः तथाविधयतनयाऽन्यप्राणिनामात्मनश्च विधिवत् संलिखितशरीरतया यस्मिस्तदनाघातं, केषां पुनरिदम्?, उच्यते- 'संयतानां' समिति-सम्यग् यतानां-पापोपरतानां, चारित्रिणामित्यर्थः, 'वुसीमतो' त्ति, आर्षत्त्वाद्वश्यवतां वश्य इत्यायत्तः, स चेहात्मा इन्द्रियाणि वा, वश्यानि विद्यन्ते येषां ते अमी वश्यन्तः तेषाम् अयमपरः सम्प्रदायार्थः-वसंति वा साहुगुणेहिं वुसीमंतः, अहवा वुसीमा-संविग्गा तेसिं' ति एतच्चार्थात् पण्डितमरणमेव, ततोऽयमर्थः-यथैतत् संयतानां वश्यवतां विप्रसन्नमनाघातं च सम्भवति, न तथाऽपुण्यप्राणिनाम्। 'अन्ते समाहिमरणं अभव्वजीवा न पावेंति' त्ति वचनात्, विशिष्टयोग्यताभाजामेव तत्प्राप्तिसम्भवादिति

मू. (१४७) *न इमं सव्वेसु भिक्खूसुं, न इमं सव्वेसु गारिसु।*
नानासीला य गारत्था, विसमसीला य भिक्खूणो॥

वृ. 'ने' त्यवधारणफलत्वाद्वाक्यस्य नैव 'इद' मिति पण्डितमरणं 'सव्वेसु भिक्खूसु' त्ति सूत्रत्वात् सर्वेषां भिक्षूणां परदत्तोपजीविनां व्रतिनामितियावत्, किन्तु केषाञ्चिदेव परोपचित-पुण्यानुभाववतां भावभिक्षूणां, तथा च गृहस्थानां दूरापास्तमेव, अत एवाह- नेदं पण्डितमरणं 'सव्वेसु गारिसु' त्ति सर्वेषामगारिणा गृहिणां, चारित्रिणामेव तत्सम्भवात्, तथात्वे च तेषामपि तत्त्वतो यतित्वाद्, उभयत्र विषयसप्तम्यन्ततया वा नेयं, यथा चैतदेवं तथोपपत्तित आह-नाना-अनेकविधं शीलं-व्रतं स्वभावो वा येषां ते नानाशीलाः 'अगारस्था' गृहस्थाः तेषां हि नैकरूपमेव शीलं किन्त्वनेकभङ्गसम्भवादनेकविधं, देशविरतिरूपस्य तस्यानेकधाऽभिधानात्, सर्वविरति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपस्य च तेष्वसम्भवात्, 'विषमम्' अतिदुर्लक्षतयाऽतिगहनं विसदृशं वा शीलमेषां विषम-शीलाः, के ते ?-भिक्षवः, न हि सर्वेऽप्यनिदानिनोऽविकलचारित्रिणो वा तत्कालं म्रियन्ते जिनमतप्रतिपन्ना अपि, तीर्थान्तरीयास्तु दूरोत्सारिता एव, तेषु हि गृहिणस्तावदत्यन्तं नानाशीला एव, यतः-केचिद्गृहाश्रमप्रतिपालनमेव महाव्रतमिति प्रतिपन्नाः, अन्ये तु सप्त शिक्षापदशतानि गृहिणां व्रतमित्याद्यनेकधैव ब्रुवते, भिक्षवोऽप्यत्यन्तं विषमशीला एव, यतस्तेषु केषाञ्चित्पञ्च-यमनियमात्मकं व्रतमिति दर्शनम्, अपरेषां तु कन्दमूलफलाशितैव इति, अन्येषामात्मतत्त्व-परिज्ञानमेवेति विसदृशशीलता, न च तेषु क्वचिदविकलचारित्रसम्भव इति सर्वत्र पण्डित-मरणाभाव इति सूत्रार्थः ॥ विषमशीलतामेव भिक्षूणां समर्थयितुमाह-

मू. (१४८) *संति एगेहि भिक्खूहिं, गारत्था संजमुत्तरा।*
गारत्थेहि य सव्वेहिं, साहवो संजमुत्तरा ॥

वृ. 'सन्ति' विद्यन्ते, एकेभ्यः' कुप्रवचनेभ्यो भिक्षुभ्यः 'गारत्थ'त्ति सूत्रत्वादगारस्थाः संयमेन-देशविरत्यात्मकेनोत्तराः-प्रधानाः संयमोत्तराः, कुप्रवचनभिक्षवो हि जीवाद्यास्ति-क्यादपि बहिष्कृताः सर्वथाऽचारित्रिणश्चेति कथं न सम्यग्दृशो देशचारित्रिणो गृहिणस्तेभ्यः संयमोत्तराः सन्तु ?, एवं सत्यगारस्थेष्वेव तदस्त्वित्यत आह-'अगारस्थेभ्यश्च सर्वेभ्य' इति अनुमतिवर्जसर्वोत्तमदेशविरतिप्राप्तेभ्योऽपि साधवः संयमोत्तराः, परिपूर्णसंयमत्वातेषां, तथा च वृद्धसम्प्रदायः-एगो सावगो साहुं पुच्छति-सावगाणं साहूणं किमंतरं ?, साहुणा भण्णति-सरिसवमंदरंतरं, ततो सो आउलीहूणो पुणो पुच्छति-कुलिंगीणं सावगाण य किमंतरं ?, तेन भण्णति-तदेव सरिसवमंदरंतरंति, ततो समासासितो, जतो भणियं-

"देसेक्कदेसविरया समणाणं सावगा सुविहियाणं।
जेसिं परमासंडा सतिमंपि कलं न अग्घंति ॥"

तदनेन तेषां चारित्राभावदर्शनेन पण्डितमरणाभाव एव समर्थित इति सूत्रार्थः ॥ ननु कुप्रव-चनभिक्षवोऽपि विचित्रलिङ्गधारिण एवेति कथं तेभ्योऽगारस्थाः संयमोत्तराः, अत आह-

मू. (१४९) *चीराजिनं निगिणिणं, जडी संघाडि मुंडिणं।*
एयाइंपि न तायंति, दुस्सीलं परियागतं ॥

वृ. चीराणि च -चीवराणि अजिनं च-मृगादिचर्म चीराजिनं 'निगिनिनं'ति सूत्रत्वान्नाग्न्यं 'जडि'त्ति भावप्रधानत्वान्निर्देशस्य जटित्वं, सङ्घाटी-वस्त्रसंहतिजनिता 'मुंडिणं'ति यत्र शिखाऽपि स्वसमयतश्छिद्यते, ततः प्राग्वत् मुण्डित्वं, 'एतान्यती'ति निजनिजप्रक्रिया-विरचितव्रतिवेषरूपाणि लिङ्गान्यपि, किं पुनर्गार्हस्थ्यमित्यपिशब्दार्थः, किमित्याह-नैव त्रायन्ते भवाद्दुष्कृतकर्मणो वेति गम्यते, कीदृशम् ?-'दुःशीलं' दुराचारं 'परियागयं'ति पर्यायागतं-प्रव्रज्यापर्यायप्राप्तम्, आर्षत्वाच्च याकारस्यैकस्य लोपः, यद्वा-'दुस्सीलंपरियागयं'ति मका-रोऽलाक्षणिकः, ततो दुःशीलमेव दुष्टशीलात्मकः पर्यायस्तमागतं दुःशीलपर्यायागतं, न हि कषायकलुषचेतसो बहिर्बकवृत्तिरतिकष्टहेतुरपि नरकादिकुगतिनिवारणायालं, ततो न लिङ्ग-धारणादि विशिष्टहेतुरिति सूत्रार्थः ॥ आह- कथं गृहाद्यभावेऽप्यमीषां दुर्गतिरिति ?, उच्यते-

मू. (१५०) *पिंडोलए व दुस्सीलो, नरगाओ न मुच्चइ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्खाए वा गिहत्थे वा, सुव्वए कमति दिवं ॥

वृ. 'पिंडोलए व'त्ति वाशब्दोऽपिशब्दार्थः, ततश्च 'पिडि सङ्घाते' पिण्डयते तत्तद्गृहेभ्य आदाय सङ्घात्यत इति पिण्डः तमवलगति-सेवते पिण्डावलगो-यः स्वयमाहाराभावतः परदत्तोपजीवी सोऽपि, आस्तां गृहादिमानित्यर्थः, दुःशीलः प्राग्वत्, 'नरकात्' स्वकर्म्मोपस्थापितात् सीमन्तकादेर्न मुच्यते, अत्र चोदाहरणं तथाविधद्रमकः, तत्र च-सम्प्रदायः-रायगिहे नयरे एगो पिंडोलओ उज्जाणियाए विनिग्गए जने भिक्खं हिंडइ, न य तस्स केणइ किंचि दिन्नं, सो तेसिं वैभारपव्वयकडगसन्निविट्ठाण पव्वतोवहरि चडिऊण महतिमहालयं सिलं चालेइ, एएसिं उवरिं पाडेमित्ति रोद्दज्झाई विच्छुट्टिऊण ततो सिलातो निवडितो सितातले संचुण्णियसव्वकातो य मरिऊण अप्पइट्ठाणे नरए समुप्पन्नो। तर्हि किमत्र तत्त्वतः सुगतिहेतुरित्याह-'भिक्खाए व'त्ति भिक्षामत्ति अकति वा भिक्षादो भिक्षाको, वा विकल्पे, अनेन यतिरुक्तः, गृहे तिष्ठति गृहस्थः स वा, शोभनं निरतिचारतया सम्यग्भावानुगततया च व्रतंशीलं परिपालनात्मकमस्येति सुव्रतः, 'क्रामति' गच्छति 'दिवं देवलोकं, मुख्यतो मुक्तिहेतुत्वेऽपि व्रतपरिपालनस्य दिवं क्रामतीत्यभिधानं जघन्यतोऽपि देवलोकप्राप्तिरिति ख्यापनार्थम्,

"अविराहियसामन्नस्स साहुणो सावगस्स य जहन्नो।
उववातो सोहम्मे भणितो तेलोक्कदंसीहिं ॥"

अनेन व्रतपरिपालनमेव तत्त्वतः सुगतिहेतुरित्युक्तमिति सूत्रार्थः ॥

यद्व्रतयोगाद्गृहस्थोऽपि दिवं क्रामति तद्वक्तुमाह-

मू. (१५१) अगारिसामाइयंगाइं, सङ्घी काएण फासए।
पोसहं दुहओ पक्खं, एगराइं न हावए ॥

वृ. अगारिणो-गृहिणः सामायिकं-सम्यक्त्वश्रुतदेशविरतिरूपं तस्याङ्गानि-निःशङ्कताकालाध्ययनाणुव्रतादिरूपाणि अगारिसामायिकाङ्गानि, 'सड्ढि'त्ति सूत्रत्वात् श्रद्धा-रुचिरस्यास्तीति श्रद्धावान्, कायेनेत्युपलक्षणत्वान्मनसा वाचा च 'फासइ'त्ति स्पृशति सेवते, पोषणं पोषः, स चेह धर्म्मस्य तं धत्त इति पोषधः-आहारपोषधादिः, तं 'दुहतो पक्ख'न्ति तत एव द्वयोरपि सितेतररूपयोः पक्षयोश्चतुर्दशीपूर्णिमास्युदिषु तिथिषु 'एगराइं'ति अपेर्गम्यमानत्वादेकरात्रमपि, उपलक्षणत्वाच्चैकदिनमपि, 'न हावए'त्ति न हापयति-न हानिं प्रापयति, रात्रिग्रहणं च दिवा व्याकुलतया कर्तुमशक्नुवन् रात्रावपि पोषधं कुर्यात्, इह च सामायिकाङ्गत्वेनैव सिद्धेर्यदस्य भेदेनोपादानं तदादरख्यापनार्थमदुष्टमेव, यद्वा-यत एवं गृहस्थोऽपि सुव्रतो दिवं क्रामति अतोऽगारी सामायिकाङ्गानि स्पृशेत् पोषधं च न हापयेदित्युपदेशपरतया व्याख्येयमिति सूत्रार्थः ॥

मू. (१५२) एवं सिक्खासमावन्नो, गिहवासेऽवि सुव्वओ।
मुच्चति छविपव्वाओ, गच्छे जक्खसलोगयं ॥

वृ. 'एवम्' अमुनोक्तन्यायेन शिक्षया-व्रतासेवनात्मिकया समापन्नो-युक्तः शिक्षासमापनो गृहवासेऽपि, आस्तां प्रव्रज्यापर्याय इत्यपिशब्दार्थः, 'सुव्रतः' शोभनव्रतो मुच्यते, कुतः?-छविः-त्वक् पर्वाणि च-जानुकूर्प्परादीनि छविपर्व तद्योगादौदारिकशरीरमपि छविपर्व ततः, तदनन्तरं च 'गच्छेद्' यायात् यक्षा-देवाः समानो लोकोऽस्येति सलोकस्तद्भावः सलोकता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यक्षैः सलोकता यक्षसलोकता ताम्, इयं च देवगतावेव भवतीत्यर्थादेव गतिमिति, अनेन च पण्डितमरणावसरेऽपि प्रसङ्गतो बालपण्डितमरणमुक्तमिति सूत्रार्थः ।।

मू. (१५३) *अह जे संवुडे भिक्खू, दुण्हमेगयरे सिया ।*
सव्वदुक्खपहीणे वा, देवं वावि महिड्ढिए ।।

वृ. 'अथे' त्युपप्रदर्शने 'य' इत्यनुद्दिष्टनिर्देशे 'संवृत्' इति पिहितसमस्ताश्रवद्वारः 'भिक्षु'रिति भावभिक्षुः, स च द्वयोरन्यतरः-एकतरः 'स्यात्' भवेद्, ययोर्द्वयोरन्यतरः स्यात् तावाह-सर्वाणि-अशेषाणि यानि दुःखानि क्षुत्पिपासेष्टवियोगानिष्टसंयोगादीनि तैः प्रकर्षेण-पुनरनुत्पत्त्यात्मकेन हीनो-रहितः सर्वदुःखप्रहीणः, स्यादिति सम्बन्धः, यद्वा-सर्वदुःखानि प्रहीणान्यस्येति सर्वदुःखप्रहीणः आहिताग्न्योदेराकृतिगणत्वात् निष्ठान्तस्य परनिपातः, स च सिद्ध एव, ततः स वा देवो वा, अपिः सम्भावने, सम्भवति हि संहननादिवैकल्यतो मुक्त्यनवाप्तौ देवोऽपि स्यादिति, कीदृग् ?-महती ऋद्धिः-सुखादिसम्पदस्येति महर्द्धिक इति सूत्रार्थः ।। आह-गृह्णीमो देवो वा स्यादिति, यत्र चासौ देवो भवति तत्र कीदृशा आवासाः ? कीदृशाश्च देवा ? इत्याह-

मू. (१५४) *उत्तराइं विमोहाइं, जुइमंताणुपुव्वसो ।*
समाइन्नाइ जक्खेहिं, आवासाइ जसंसिणो ।।

मू. (१५५) दीहाउया दित्तिमंता, समिद्धा कामरूविणो ।
अहुणोववन्नसंकासा, भुज्जो अच्चिमालिप्पभा ।

वृ. 'उत्तरा' उपरिवर्तिनोऽनुत्तरविमानख्याः, सर्वोपरिवर्तित्वात्तेषा, विमोहा इवाल्पवेदादि-मोहनीयोदयतया विमोहाः, अथवा मोहो द्विधा-द्रव्यतो भावतश्च, द्रव्यतोऽन्धकारो भावतश्च मिथ्यादर्शनादिः, स द्विविधोऽपि सततरत्नोद्योतितत्वेन सम्यग्दर्शनस्यैव च तत्र सम्भवेन विगतो येषु ते विमोहाः, द्युतिः-दीप्तिरन्यातिशायिनी विद्यते येषु ते द्युतिमन्तः, 'अनुपुव्वसो'त्ति प्राग्वद-नुपूर्वतः क्रमेण विमोहादिविशेषणविशिष्टाः, सौधर्म्मादिषु ह्यनुत्तरविमानावसानेषु पूर्वपूर्वापेक्षया प्रकर्षवन्त्येव विमोहत्वादीनि, 'समाकीर्ण्णा' व्याप्ता 'यक्षैः' देवैः, आ-समन्ताद्वसन्ति तेष्वि-त्यावासाः, प्राकृतत्वाच्च सर्वत्र नपुंसकतया निर्देशः, देवास्तु तत्र 'यशस्विनः' श्लाघान्विताः, दीर्घसागरोपमपरिमिततया आयुरेषामिति दीर्घायुषः, 'ऋद्धिमन्तो' रत्नादिसम्पदुपेताः 'समिद्धा' अतिदीप्ताः,'कामरूपिणः' कामः-अभिलाषस्तेन रूपाणि कामरूपाणि तद्वन्तः, विविध-वैक्रियक्त्यन्विता इत्यर्थः, न चैतदनुत्तरेष्वनुपपन्नं विशेषणमिति वाच्यं, विकरणशक्तेस्तत्रापि सत्त्वात्, 'अधुनापपन्नसङ्काशाः' प्रथमोत्पन्नदेवतुल्याः, अनुत्तरेषु हि वर्ण्णद्युत्यादि यावदायू-स्तुल्यमेव भवति, 'भूयोऽर्चिमालिप्रभा' इति, भूयःशब्दः प्राचुर्ये, ततः प्रभूतादित्यदीप्तयो न ह्येकस्यैवादित्यस्य तादृशी द्युतिरस्तीति भूयोग्रहणमिति सूत्रार्थः ।। उपसंहर्तुमाह-

मू. (१५६) *तानि ठाणाइ गच्छंति, सिक्खित्ता संजमं तवं ।*
भिक्खाए वा गिहत्थे वा, जे संतिपरिनिव्वुडा ।।

वृ. 'तानि' अभिहितरूपाणि तिष्ठन्त्येषु सुकृतिनो जन्तव इति स्थानानि-आवासात्मकानि 'गच्छन्ति' यान्ति, उपलक्षणत्वाद्गता गमिष्यन्ति च, उपलक्षणं चैतत् सौधर्म्मादिगमनस्य, तत्रापि तेषां केषाञ्चिद्गमनसम्भवात्, 'शिक्षित्वा' अभ्यस्य 'संयमं' सप्तदशभेदं 'तपो' द्वादश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदं, क इत्याह-'भिक्खाए वा गिहत्थे व'त्ति प्राकृतत्वाद्वचनव्यत्ययेन भिक्षाको वा गृहस्थो वा भावतो यतय एवेतियावत्, अत एवाह-'जे' इति ते शान्त्या-उपशमेन परिनिर्वृताः-शीतीभूता विध्यातकषायानलाः शान्तिपरिनिर्वृताः, यद्वा-ये केचन 'सन्ति' विद्यन्ते परिनिर्वृताः, अत्र च देवो वा स्यादित्येकवचनप्रक्रमेऽपि यद्बहुवचनाभिधानं तद्याप्त्यार्थं, ततो न य एक एवेश्वराद्यनुगृहीतः स एव सम्यग्दर्शनादिमानपि दिवं क्रामति किन्तु सर्वोऽपि इत्युक्तं भवतीति सूत्रार्थः ॥ एतच्चाकर्ण्य मरणेऽपि यथाभूता महात्मानो भवन्ति तथाऽऽह-

मू. (१५७) तेसिं सुच्चा सपुज्जाणं, संजयाणं वुसीमओ।
न संतसंति मरणंते, सीलवंता बहुस्सुआ ॥

वृ. 'तेषाम्' अनन्तराभिहितस्वरूपाणां भावभिक्षूणां 'श्रुत्वा' आकर्ण्योक्तरूपस्थानावाप्तिमिति शेषः, कीदृशाम् ?-'सत्पूज्यानां' सतां पूजार्हाणां, सती वा पूजा येषां ते सत्पूजास्तेषां 'संयतानां' संयमवतां 'वुसीमओ'त्ति प्राग्वत्, 'न संत्रस्यन्ति' नोद्विजन्ते, कदा ?-मरणे मरणेन वाऽन्तो मरणान्तरस्तस्मिन् आवीचिमरणोपेक्षया वाऽन्त्यमरणे, प्राकृतत्वाच्च परनिपातः, समुपस्थित इति शेषः, 'शीलवन्तः' चारित्रिणो 'बहुश्रुता' विविधागमश्रवणावदातीकृतमतयः, इदमुक्तं भवति-य एवाविदितधार्मिकगतयोऽनुपार्जितधर्माणश्च त एव मरणादुद्विजन्ते, यथा-क्वास्माभिर्मृत्वा गन्तव्यमिति, उपार्जितधर्माणस्तु धर्मफलमवगच्छन्तो न कुतोऽप्युद्विजन्ते, यथा-क्वास्माभिर्मृत्वा गन्तव्यं यदुक्तम्-

"चरितो निरुपक्लिष्टो धर्म्मो हि मयेति निर्वृतः स्वस्थः ।
मरणादपि नोद्विजते कृतकृत्योऽस्मीति धर्म्मात्मा ॥"

इति सूत्रार्थः ॥ इत्थं सकामाकाममरणस्वरूपमभिधाय शिष्योपदेशमाह-

मू. (१५८) तुलिया विसेसमायाय, दयाधम्मस्स खंतिए।
विप्पसीइज्ज मेधावी, तहाभूएण अप्पणा ॥

वृ. 'तोलयित्वा' परीक्ष्यात्मानं धृतिदाढर्यादिगुणान्वितमिति गम्यते, 'विशेषं' प्रक्रमाद्भक्तपरिज्ञादिकं मरणभेदम् 'आदाय' बुद्धा गृहीत्वाऽभ्युपगम्येतियावत्, दयाप्रधानो धर्म्मो दयाधर्म्मो-दशविधयतिधर्मरूपः तस्य सम्बन्धिनी या क्षान्तिस्तया, उपलक्षत्वात् मार्दवादिभिश्च, 'विप्रसीदेत्' विशेषेण प्रसन्नो भवेत्, न तु मरणादुद्विजेतेति भावः, 'मेधावी' मर्यादावर्त्ती 'तथाभूतेन' उपशान्तमोहोदयेन, यदिवा-यथैव मरणकालात्प्रागनाकुलचेता अभूत् मरणकालेऽपि तथैवावस्थितेन तथाभूतेनात्मना स्वयमयमपरकल्पोऽपि विप्रसीदेत्-कषायपङ्कापगमतः स्वच्छतां भजेत् न तु कृतद्वादशवर्षसंलेखनतथाविधतपस्विवन्निजांलीभङ्गादिना कषायितामवलम्बेत मेधावी, किं कृत्वा ?-तोलयित्वा बालमरणपण्डितमरणे, ततश्च 'विशेषं' बालमरणात् पण्डितमरणस्य विशिष्टत्वलक्षणमादायगृहीत्वा तथा दयाधर्मस्येति, चशब्दस्य गम्यमानत्वात्, दयाधर्म्मस्य च-यतिधर्म्मस्य विशेषं-शेषधर्म्मातिशायित्वल क्षणमादायेति सम्बन्धः, कया विप्रसीदेत् ? क्षात्या, तथाभूतेनेति निष्कषायेणात्मनोपलक्षित इति सूत्रार्थः ॥

मू. (१५९) तओ काले अभिप्पेए, सड्डी तालीसमंतिए।
विनएज्ज लोमहरिसं, भेयं देहस्स कंखए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'तत' इति कषायोपशमानन्तरं 'काले' मरणकाले 'अभिप्रेते' अभिरुचिते, कदा च मरणमभिप्रेतम्?, यदा योगा नोत्पसर्प्पयन्ति, 'सड्ढि'त्ति प्राग्वत् श्रद्धावान्, तादृशमिति भयोत्थं 'अन्तिके' समीपे गुरूणां मरणस्य वा 'विनयेद्' विनाशयेत्, कम्?-लुनाति लीयन्ते वा तेषु यूका इति लोमानि तेषां हर्षो लोमहर्षस्तं-रोमाञ्चु, हा! मम मरणं भविष्यतीति भयाभिप्राय-सम्प्राप्यं, किं च-'भेदं' विनाशं 'देहस्य' शरीरस्य काङ्क्षेदिव काङ्क्षेत्, त्यक्ततत्परिकर्म्मत्वात्, अथवा 'तालिस'न्ति सुब्व्यत्ययात् तादृशो यादृशः प्रव्रज्याप्रतिपत्तिकाले संलेखनाकाले वा अन्तकालेऽपि तादृशः श्रद्धावान् सन्, उक्तं हि-'जाए सद्धाए निक्खंतो, परियायट्ठाणमुत्तमं। तमेव अनुपालेज्ज'त्ति, ईदृशश्च परीषहोपसर्गजं लोमहर्षं विनयेदिति सम्बन्धः इति सूत्रार्थः ॥

मू.(१६०) अह कालंभि संपत्ते, आघायाय समुच्छयं।
सकाममरणं मरति, तिण्हमन्नयरं मुनी॥

वृ. 'अथे'ति मरणाभिप्रायानन्तरं 'काल'इति मरणकाले सम्प्राप्ते 'निप्फाइया य सीसा' इत्यादिना क्रमेण समायाते 'आघायाय'त्ति आर्षत्वात् आघातयन् संलेखनादिभिरुपक्रणकारणैः समन्ताद् घातयन्-विनाशयन, कं?-समुच्छ्रयम्-अन्तः कार्मणशरीरं बहिरौदारिकं, यद्वा-'समुस्सतं'ति सुब्व्यत्ययात्समुच्छ्रयस्याघाताय-विनाशाय काले सम्प्राप्त-भक्तपरिज्ञेङ्गिनी-पादपोपगमानानामन्यतरेण, सूत्रत्वात् सर्वत्र विभक्तिव्यत्ययः, 'मुनिः' तपस्वीति सूत्रार्थः ॥ इतिः परिसमाप्तौ, ब्रवीमिति प्राग्वत्॥ साम्प्रतं नयास्तेऽपि पूर्ववत्।

अध्ययनं ५ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितासम्पादिता उत्तराध्ययनसूत्रे पञ्चमअध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता ॥

अध्ययनं-६ क्षुल्लक निर्ग्रन्थीयम्

वृ.॥ उक्तं पञ्चममध्ययनं, साम्प्रतं षष्ठमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने मरणविभक्तिरुक्ता, तत्रापि चानन्तरं पण्डितमरणं, तच्च 'विरयाण पंडियं बेंति'त्ति वचना-द्विरतानामेव, न चैते विद्याचरणविकला इति तत्-स्वरूपमनेनोच्यते, इत्यनेन सम्बन्धेनाया-तस्याध्ययनस्य महापुरस्येव चत्वार्यनुयोगद्वाराणि भवन्तीत्यादिचर्चस्तावद्यावन्नामनिष्पन्ननिक्षेपे क्षुल्लकनिर्ग्रन्थीयमिति नाम, ततः क्षुल्लकस्य निर्ग्रन्थस्य च निक्षेपः कार्यः, तत्र क्षुल्लकस्य विपक्षो महान्, तदपेक्षत्वात् क्षुल्लकस्य, इति तन्निक्षेपे निक्षिप्तमेव तद्भवतीत्यभिप्रायेणाह-

नि.[२३६] नामं ठवणा दविए खित्ते पहाण पइ भावो।
एएसि महंताणं पडिवक्खो खुल्लया हुंति॥

वृ. अत्र नामस्थापने क्षुण्णे, महच्छब्दश्च प्रक्रमात् सर्वत्र गम्यते, तत्रागमतो ज्ञाताऽनुपयुक्तो द्रव्यमहत्, नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तं द्रव्यमहद् अचित्तमहास्कन्धो दण्डादि-करणेन यश्चतुर्भिः समयैः सकललोकमापूरयति, क्षेत्रमहत् लोकालोकव्याप्याकाशं, कालमहद् अनागताद्धा, प्रधानमहत्त्रिधा-सचित्तमचित्तं मिश्रं च, तत्र सचित्तं द्विपदं चतुष्पदमपदं च,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र द्विपदं तीर्थकृत चतुष्पदं सरभः अपदं पद्मादिहूदोत्पन्नं पद्मम्, अचित्तं चिन्तामणिः, मिश्रं तीर्थकृदेव राज्याभिषेकादिष्वलंकृतः, प्रतिमहत् यदन्यापेक्षया महदुच्यते, यथा सर्षपाच्चनकश्चनकाद्बदरमित्यादि, भावमहत् प्राधान्यः क्षायिको भावः कालतः पारिणामिकोऽनाद्यनन्तजीवाजीवत्वादिरूपत्वात्तस्य आश्रयतः औदयिको बहुतरजीवाश्रयत्वात् तस्य, तथा च वृद्धाः-"आसयओ ओदयितो भावो, तंमि भावे बहुतरा जीवा वट्टंति" पारिणामिकाविवक्षया चैतत् सम्भाव्यते, अतः पारिणामिक एवाश्रयतो महान्, अशेषजीवाजीवद्रव्याश्रयत्वात्, प्रस्तुतमर्थमाह-'एतेषाम्' अनन्तरमुक्तानां नामादिमहतां 'प्रतिपक्षो' विपक्षः क्षुल्लकानि भवन्ति, तत्रापि नामस्थापने प्रतीते, द्रव्यतः परमानुः, क्षेत्रतः आकाशप्रदेशः, कालतः समयः, प्राधान्यतः सचित्ताचित्तमिश्रभेदतस्त्रिधा, तत्र सचित्तं द्विपदमाहारकं शरीरं चतुष्पदं सिंहः अपदं लवङ्गपुष्पम्, अचित्तं हीरकः, मिश्रं जन्मसमयानन्तरमलंकृतस्तीर्थकृत्, प्रतिक्षुल्लकमामलकाद्बदरं बदराच्चनक इत्यादि, भावक्षुल्लकं क्षायिको भावः, उक्तं हि वृद्धैः-'सव्वत्थोवा जीवा खाइए भावे वट्टंति" सांसारिकसत्त्वापेक्षं चैतद्, अन्यथौपशमिक एव सर्वस्तोकतया भावक्षुल्लकं सम्भवतीति गाथार्थः ॥ इत्थं क्षुल्लकनिपेक्षमभिधाय निर्ग्रन्थनिक्षेपमाह-

नि. [२३७] निक्खेवो नियंठंमि चउव्विहो दुव्विहो य दव्वंमि ।
आगमनोआगमओ नोआगमतो य सो तिविहो ॥

वृ. 'निक्षेपो' न्यासः 'नियंठंमि'त्ति निर्ग्रन्थे निर्ग्रन्थविषयः 'चतुर्विधो' नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे, द्विविधो भवति द्रव्ये आगमनोआगमतश्च, तत्रागमतः प्राग्वत्, नोआगमतश्च 'स' इति निर्ग्रन्थः 'त्रिविधः' त्रिभेद इति गाथार्थः ॥ त्रैविध्यमेवाह-

नि. [२३८] जाणगसरीरभविए तव्वतिरित्ते य निण्हगाईसुं ।
भावंमि नियंठो खलु पंचविहो होइ नायव्वो ॥

वृ. 'जाणगसरीरभविए'त्ति ज्ञशरीरनिर्ग्रन्थो भव्यशरीरनिर्ग्रन्थश्च पश्चात्कृतपुरस्कृतनिर्ग्रन्थपर्यायतयाऽयं घृतकुम्भ इत्यादिन्यायतः प्राग्वद्भावनीयः, तद्व्यतिरिक्तश्च निह्नवादिषु, आदिशब्दात् पार्श्वस्थादिपरिग्रहः, भावनिर्ग्रन्थोऽप्यागमतो नोआगमतश्च, तत्रागमतस्तथैव, नोआगमतस्तु स्वत एवाह निर्युक्तिकृत- भावे निर्ग्रन्थः, खलुर्वाक्यालङ्कारे, 'पञ्चविधः' पञ्चभेदो भवति ज्ञातव्य इति गाथार्थः ॥ पञ्चविधनिर्ग्रन्थस्वरूपं च वृद्धसम्प्रदायादवसेयं, स चायम्-

नोआगमतो नियंठत्ते वट्टमाणा पञ्च, तंजहा-पुलाए बकुसे कुसीले नियंठे सिणाए। पुलातो पंचविहो, जो आसेवणं प्रति, नानपुलातो दरिसणपुलाओ चरित्तपुलाओ लिंगपुलातो अहासुहुमुलागोत्ति। पुलागो नाम असारो, जहा धन्नेसु पलंजी, एवं नानदंसणचरित्तणिस्सारत्तं जो उवेति सो पुलागो, लिंगपुलागो लिंगाउ पुलागी होंतो, अहासुहुमो य एएसु चेव पंचसुवि जो थोव थोवं विराहेति, लद्धिपुलाओ पुन जस्स देविंदरिद्धिसरिसा रिद्धी, सो सिंगणादियकज्जे समुप्पणे चक्कवट्टिंपि सबलवाहणं चुण्णेउं समत्थो।

बउसा सरीरोपकरणविभूषाऽनुवर्तिनः ऋद्धिशस्कामाः सातगौरवाश्रिताः अविविक्तपरिवाराः छेदशबलचारित्तजुत्ता निग्गंथा बउसा भण्णंति, ते पंचविहा, तंजहा-आभोगबकुसा अनाभोगबकुसा संवुडबकुसा असंवुडबकुसा अहासुहुमबकुसा। आभोगबकुसा आभोगेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो जाणंतो करेइ, अनाभोगेन अयाणंतो, संबुडो मूलगुणाइसु, असंवुडो तेसु चेव, अहासुहुम-बकुसो अच्छासु पूसिया अवणेति सरीरे वा धूलिमाइ अवण्णेति।

कुत्सितं शीलं यस्य पञ्चसु प्रत्येकं ज्ञानादिषु, सो कुसीलो दुविहो-पडिसेवणाकुसीलो कसायकुसीलो, सम्माराहणविवरीया पडिगया वा सेवणा पडिसेवणा पंचसु नानाइसु, कसायकुसीलो जस्स पंचसु नानाइसु कसाएहिं विराहणा कज्जति सो कसायकुसीलोत्ति।

नियंठो अब्भितरबाहिरगंथनिग्गतो, सो उवसंतकसातो खीणकसातो वा अंतोमुहुत्तकालितो, सो पंचविहो-पढमसमयनियंठो अपढमसमयनियंठो, अहवा चरमसमयनियंठो अचरमसमय-नियंठो अहासुहुमनियंठोत्ति, अंतोमुहुत्तनियंठकालसमयरासीए पढमसमए पडिवज्जमाणो पढमसमयनियंठो, सेसेसु समयएसु वट्टमाणो अपढमसमयनियंठो, अंतिमे समए वट्टमाणो चरमसमयनियंठो, अचरमा-आदिमज्झा, अहासुहुमो एएसु सव्वेसुऽवि।

सिणातो-स्नातको मोहणिज्जाइघातियचउकम्मावगतो सिणातो भण्णति, सो पंचविहो-अच्छवी असबलो अकम्मसो संसुद्धनाणदंसधरो अरहा जिनो केवली, अच्छवी-अव्यथकः, सबलो सुद्धसुद्धो एगंतसुद्धो असबलो, अंशा-अवयवाः कर्मणस्ते अवगया जस्स सो अकम्मंसो, संसुद्धाणि नानदंसणाणि धारेति जो सो संसुद्धणाणदंसणधरो, पूजामर्हतीति अरहा, अथवा नास्य रहस्यं विद्यत इति अरहा, जितकषायत्वाज्जिनः एसो पंचविहो सिणायगो।

भा.[३] तत्थ नियंठपुलातो बकुसकुसीलो नियंठ न्हातो य।
तत्थ पुलाओ दुविहो आसेवण लद्धितो चेव ॥

भा.[४] पुलागबकुसकुसीला नियंठसिणायगा य नायव्वा।
एएसिं पंचण्हवि होइ विभासा इमा कमसो ॥

भा.[५] तत्थ पुलातो दुविहो लद्धिपुलातो तहेव इयरो वा।
लद्धिपुलातो संघाइकज्ज इयरो य पंचविहो ॥

भा.[६] नाणे दंसणचरणे लिंगे अहसुहुमए य नायव्वो।
नाणे दंसणचरणे तेसिं तु विराधन असारो ॥

भा.[७] लिंगपुलातो अन्नं निक्कारणतो करेति सो लिंगं।
मनसा अकप्पियाईनिसेवओ होयहासुहुमो ॥

भा.[८] सरीरे उवकरणे वा बाउसियत्तं दुहा समक्खायं।
सुक्किलवत्थाणि धरे देसे सव्वे सरीरंमि ॥

भा.[९] आभोगमनाभोगं संबुडमसंबुडे अहासुहुमे।
सो दुविहोऽवि बउसो पंचविहो होइ नायव्वो ॥

भा.[१०] आभोगे जाणंतो करेति दोसं तहा अनाभोगे।
मुलुत्तरेहि संबुडो विवरीय असंबुडो होति ॥

भा.[११] अच्छिमुहमज्जमाणो होइ अहासुहुमतो तहा बउसो।
पडिसेवणाकसाए होइ कुसीलो दुहा एसो ॥

भा.[१२] नाणे दंसणचरणे तवे य अहसुहुमए य बोद्धव्वे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिसेवणाकुसीलो पंचविहो ऊ मुणेयव्वो ॥

भा.[१३] नाणादी उवजीवति अहसुहुमो अहा इमो मुणेयव्वो ।
सातिज्जंतो रागं वच्चति एसो तवच्चरणी ॥

भा.[१४] एमेव कसायंमिवि पंचविहो होइ ऊ कुसीलो उ ।
कोहेणं विज्जाति पउंजए एव मानादि ॥

भा.[१५] एमेव दंसणंमिवि सावं पुण देति ऊ चरित्तंमि ।
मनसा कोहाईणि उ करेइ अह सो अहासुहुमो ॥

भा.[१६] पढमापढमा चरिमे अचरिम सुहुमे य होंति निग्गंथे ।
अच्छवि अस्सबले या अकम्मसंसुद्ध अरहजिनो ॥

वृ. ते च संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपातस्थानविकल्पतः साध्याः, एते पुलाकादयः, पञ्च निर्ग्रन्थविशेषाः एभिः संयमादिभिरनुगमविकल्पैः साध्य् भवन्ति, तत्र संयमे तावत् पुलाकबकुशकुशीलाः एए तिन्निवि दोसु संजमेसु-सामाइते छेओवट्ठावणीए य, कसाय-कुसीला दोसु-परिहारविसुद्धीए सुहुमसंपराए य इति सम्प्रदायः । प्रज्ञप्तिस्त्वाह-कसायकुसीले णं पुच्छा ?, सामाइयसंजमे वा हुज्जा, जाव सुहुमसंपरायसंजमे वा हुज्जा, नो अहक्खायसंजमे हुज्जा, नियंठा सिणागया य एए दोऽवि अहक्खायसंमजे" पुलागबकुसपडिसेवणाकुसीला य उक्कोसेणं अभिन्नदसपुव्वधरा कसायकुसीलनिर्ग्रन्थौ चतुर्दशपूर्वधरौ ।

जघन्येन पुलाकस्य श्रुतमाचारवस्तु नवमपूर्वे, बकुशकशीलानिर्ग्रन्थानां श्रुतमष्टौ प्रवचन-मातरः, श्रुतापगतः केवली स्नातक इति सम्प्रदायाभिप्रायः । पज्ञप्त्यभिप्रायस्तु-"पुलाए णं भंते ! केवतियं सुयं अहिज्जेज्जा ?, गोयमा ! जहन्नेणं नवमस्स पुव्वस्स तइयं आयारवत्थुं, उक्कोसेणं नव पुव्वाइं अहिज्जेज्जा" ।

इदानीं प्रतिसेवना-पञ्चानां मूलगुणानां रात्रिभोजनस्य च पराभियोगाद्बलात्कारेण अन्यतमत् प्रतिसेवमानः पुलाको भवति, मैथुनमेवेत्येके, प्रज्ञप्तिस्तु-"पुलाए णं पुच्छा, जाव मूलगुणे पडिसेवेमाणे पंचण्हं आसवाणं अन्नयरं पडिसेवेज्जा, उत्तरगुणे पडिसेवेमाणे दसविहस्स पच्चक्खाणस्स अन्नयरं पडिसेवेज्जा" बकुशो द्विविधः-उपकरणबकुशः शरीरबकुशश्च, तत्रो-पकरणाभिष्वक्तचित्तो विविधविचित्रमहाधनोपकरणपरिग्रहयुक्तः विशेषयुक्तोपकरण-काङ्क्षायुक्तो नित्यं तत्प्रतिकारसेवी भिक्षुरुतकरणबकुशो भवति, शरीराभिष्वक्तचित्तो विभूषार्थं तत्प्रतिकारसेवी शरीरबकुशः ।

प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु काञ्चिद्विराधनां प्रतिसेवते, प्रज्ञप्तिस्तु-"बकुसे णं पुच्छा, जाव नो मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए हुज्जा, पडिसेवणा-कुसीले जहा पुलाए" कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति ।

तीर्थमीदानीं, सर्वेषां तीर्थङ्कराणां तीर्थेषु भवन्ति, एके त्वाचार्या मन्यन्ते-पुलाकबकुश-प्रतिसेवनाकुशीलास्तीर्थे नित्यं, शेषास्तु तीर्थेऽतीर्थे वा । 'लिङ्गमिति लिङ्गं द्विविधं-द्रव्यलिङ्गं भावलिङ्गं च, भावलिङ्गं प्रतीत्य सर्वे निर्ग्रन्थलिङ्गे भवन्ति, द्रव्यलिङ्गं प्रतीत्य भाज्याः । लेश्याः पुलाकस्योत्तरास्तिस्त्रो लेश्या भवन्ति, बकुशप्रतिसेवनाकुशीलयोः सर्वा अपि, कषायकुशीलस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिहारविशुद्धेस्तिस्र उत्तराः, सूक्ष्मसम्परायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला भवति, अयोगः शैलेशीप्रतिपन्नोऽलेश्यो भवति, प्रज्ञप्तिस्तु-"पुलाए णं पुच्छा, जाव तिसु लेसासु होज्जा, तंजहा-तेउलेसाए पम्हलेसाए सुक्कलेसाए, एवं बउसस्सवि, एवं पडिसेवणाकुसीलस्सवि। कसायकुसीले पुच्छा, जाव छसु लेसासु होज्ज"त्ति।

उपपातः पुलाकस्योत्कृष्टस्थितिषु देवेषु सहस्रारे, बकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिष्वच्युते कल्पे, कषायकुशीलनिर्ग्रन्थयोस्त्रयस्त्रिंशत्सागरोपमस्थितिषु सर्वार्थसिद्धे, सर्वेषामपि जघन्यं पल्योपमपृथक्त्वस्थितिषु सौधर्म्मे, प्रज्ञप्तिस्तु "कसायकुसीले जहा पुलाए, नवरं उक्कोसेण अनुत्तरविमाणेसु, नियंठे णं एवं चेव, जाव वेमाणिएसु उववज्जमाणे अजहन्नमनुक्को सेणं अनुत्तरविमाणेसु उववज्जति," स्नातकस्य निर्वाणमिति।

स्थानम्-असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति, तत्र सर्वजघन्यानि संयमलब्धिस्थानानि पुलाककषायकुशीलयोः, तौ युगमदसंख्येयानि स्थानानि गच्छतः, ततः पुलाको व्युच्छिद्यते, कषायकुशीलस्ततोऽसंख्येयानि स्थानान्येकाकी गच्छति, ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसङ्ख्येयानि स्थानानि गच्छन्ति, ततो बकुशो व्युच्छिद्यते, ततोऽसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते, ततोऽसङ्ख्येयानि स्थानानि गत्वा कषायकुशीला व्युच्छिद्यते, अत ऊध्र्ध्वमकषायस्थानानि गत्वा निर्ग्रन्थः प्रतिपद्यते, सोऽप्यसङ्ख्येयानि स्थानानि गत्वा व्युच्छिद्यते, प्रज्ञप्तिस्तु-"नियंठस्स णं भंते! केवइया णं संजमठाणा पन्नत्ता ?, गोयमा ? एगे अजहन्नमुक्कोसए संजमठाणे पन्नत्ते" अत एव उध्र्ध्वमेकमेव स्थानं गत्वा स्नातको निर्वाणं प्राप्नोति, एषां संयमलब्धिरुत्तरोत्तरस्यानन्तगुणा भवतीति।

भा. [१७] संयम सुय पडिसेवण तित्थे लिंगे य लेस उववाए।
ठाणं च पति विसेसो पुलागमाईण जोएज्जा॥

भा. [१८] पुलाग बकुसकुसीला सामाइयछेयसंजमे होंति।
होति कसायकुसीलो परिहारे सुहुमरागे य॥

भा. [१९] निग्गंथो य सिणातो अहखाए संजमे मुणेयव्वो।
दसपुव्वधरुक्कोसा पडिसे पुलाय बउसा य॥

भा. [२०] चोद्दसपुव्वधरातो कसायनियंठा य होंति नायव्वा।
ववगयसुतो य केवलि मूलासेवीपुलाओ य॥

भा. [२१] चित्तलवत्थासेवि बलाभिओगेण सो भवति बउसो।
मूलगुण उत्तरगुणे सरीरबउसो मुणेयव्वो॥

भा. [२२] न्हाय कसायकुसीले निग्गंथाणं च नत्थि पडिसेवा।
सव्वेसुं तित्थेसुं होंति पुलागादि य नियंठा॥

भा. [२३] लिंगे उ भावलिंगे सव्वेसिं दव्वलिंग भयणिज्जा।
लेसाउ पुलागस्स य उवरिल्लातो भवे तिन्नि॥

भा. [२४] बकुसपडिसेवगाणं सव्वा लेसाउ होंति नायव्वा।
परिहारविसुद्धीणं तिण्हुवरिल्ला कसाए उ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[२५] निग्गंथसुहुमरागे सुक्का लेसा तहा सिणाएसुं।
सेलेसिं पडिवण्णो लेसातीए मुणेयव्वो ॥

भा.[२६] पुलागस्स सहस्सारे सेवगवउसाण अच्चुए कप्पे।
सकसायणियंठाणं सव्वट्ठे न्हायगो सिद्धो ॥

भा.[२७] पुलागकुसीलाणं सव्वजहन्नाणं होंति ठाणाइं।
वोलीणेहिं असंखेहिं होइ पुलागस्स वोच्छित्ती ॥

भा.[२८] कसायकुसीलो उवरिं असंखिज्जाइं तु तत्थ ठाणाइं।
पडिसेवनबउसे वा कसायकुसीलो तओऽसंरता ॥

भा.[२९] वोच्छिन्ने उ बउसो उवरिं पडिसेवना कसाओ य।
गंतुमसंखिज्जाइं छिज्जइ पडिसेवनकुसीलो ॥

भा.[३०] उवरिं गंतुं छिज्जति कसायसेवी ततो हु सो नियमा।
उद्धं एगट्ठाणं निग्गंथसिणायगाण तु ॥

वृ. अत्र च यत्पुलाकादीनां मूलोत्तरगुणविराधकत्वेऽपि निर्ग्रन्थत्वमुक्तं तज्जघन्यघन्यतरोत्कृष्टोत्कृष्टतरादिभेदतः संयमस्थानानामसङ्ख्यगतया तदात्मकतया च चारित्रपरिणतेरिति भावनीयं। यदप्येषां संयमित्वेऽपि षड्लेश्याभिधानं तदप्याद्यानां भावपरावृत्तिपेक्ष्य 'आगारभावमायाए वा से सिया पलिभागमायाए वा से सिया' इत्याद्यागमप्रामाण्यादविरुद्धमेव, इत्यलं प्रसङ्गेनेति॥ सम्प्रति निर्युक्तिरनुस्रियते, तत्र च 'भावे निर्ग्रन्थः खलुः पञ्चविधो भवति ज्ञातव्यः' इत्यनेन बाह्याभ्यन्तरहेतुका निर्ग्रन्थभेदा उक्ताः, साम्प्रतं त्वान्तरसंयमस्थाननिबन्धनांस्तद्भेदानाह-

नि.[२३९] उक्कोसो उ नियंठो जहन्नओ चेव होइ नायव्वो।
अजहन्नमनुक्कोसा हुंति नियंठा असंखिज्जा ॥

वृ. 'अजहन्नमनुक्कोस'त्ति अजघन्या अनुत्कृष्टा भवन्ति निर्ग्रन्थाः असङ्ख्येयाः, संयमस्थानापेक्षया च निर्ग्रन्थानां जघन्यत्वमुत्कृष्टत्वमजघन्यानुत्कृष्टत्वं वा ज्ञेयं, तथा च वृद्धाः-जो उक्कोसएसु संजमट्ठाणेसु वट्टति सो उक्कोसगणियंठो भण्णति, एवं जहन्नओ जहन्नएसु, सेसो अजहन्नमणुक्कोस'त्ति गाथार्थः॥ इह च निर्गतो ग्रन्थान्निर्ग्रन्थ इति ग्रन्थमेव भेदाभिधानद्वारेणाह-

नि.[२४०] दुविहो य होइ गंथो बज्झो अब्भितरो य नायव्वो।
अंतो य चउदसविहो दसहा पुन बाहिरो गंथो ॥

वृ. 'द्विविधश्च' द्विभेदो भवति ग्रथ्यते-बध्यते कषायवशगेनात्मनेति ग्रन्थः, अथवा ग्रथ्नातिबन्धात्यात्मानं कर्मणेति ग्रन्थः, तद्वैविध्यमेवाह-बहिर्भवो बाह्योऽभ्यन्तरश्च, 'ज्ञातव्यः' अवबोद्धव्यः, तत्र च 'अंतो अ'त्ति अन्तःशब्दोऽधिकरणप्रधानमव्ययं, चः पूरणे, ततश्चान्तरिति मध्ये यो ग्रन्थोऽभ्यन्तर इत्यर्थः, स किमित्याह- 'चतुर्दशविधः' चतुर्दशभेदो 'दशधा' दशप्रकारः, पुनः शब्दो विशेषद्योतकः, 'बाहिरो'त्ति बाह्यो ग्रन्थ इति गाथार्थः॥ तत्रान्तरस्य चतुर्दश भेदानाह-

नि.[२४१] कोहो मानो माया लोभे पिज्जे तहेव दोसे य।
मिच्छत्त वेअ अरइ रइ हास सोगे य दुग्गंछा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'क्रोधः' अप्रीतिलक्षणः, 'मानः' अहमितिप्रत्ययहेतुः, 'माया' स्वपरव्यामोहोत्पादकं शाठ्यं, 'लोभो' द्रव्याद्यभिकाङ्क्षा, 'प्रेम' प्रियेषु प्रीतहेतुः, 'तथैवे'त्यान्तरग्रन्थरूप एव, कोऽसौ ?, 'दोषश्च' उपशमत्यागात्मको विकारो, द्वेष इत्यर्थः । इह च यद्यपि प्रेम मायालोभरूपं द्वेषश्च क्रोधमानात्मकः तथापि तयोः पृथगुपादानु कथञ्चित् सामान्यस्य विशेषेभ्योऽन्यत्वख्यापनार्थं, 'मिथ्यात्वं' तत्त्वार्थाश्रद्धानं, तच्च षड्भिः स्थानैर्भवति, तानि च नास्ति न नित्य इत्यादीनि, तदुक्तम्-

"नत्थि न निच्चो न कुणति कयं न वेएति नत्थि नेव्वाणं ।
नत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥"

'वेदः' स्त्रीवेदादिस्त्रिधा, 'अरतिः' संयमेऽप्रीतिः, 'रतिः' असंयमे प्रीतिः, आह च-

"इत्थीवेयाईओ तिविहो वेओ य होइ बोद्धव्वो ।
अरती य संजमंमी होइ रती संजमे यावि ॥"

'हासो' विस्मयादिषु वक्त्रविकाशात्मकः, 'शोक' इष्टवियोगात् मानसं दुःखं, 'भयम्' इहलोकभयादि सप्तधा, तथा चाह-

"इहपरलोयादाने आजीवसिलोय तह अकम्हा य ।
मरणभयं सत्तमयं विभासमेएसि वोच्छामि ॥१॥
इहलोगभयं च इमं जं मनुयाइओ सरिसजाईओ ।
बीहेइ जं तु परजाइयाणं परलोयभयमेवं ॥२॥
आयाणत्थो भण्णति मा हीरिज्जत्ति तस्स जं बीहे ।
आयाणभयं तं तू आजीवोमे न जीवेऽहं ॥३॥
असिलोगभयं अयसो होति अकम्हाभयं तु अनिमित्तं ।
मरियव्वस्स उ भीए मरणभयं होइ एयं तु ॥४॥"

'जुगुप्सा' अस्नानादिमलिनतसाधुहीलना, तथा चाह-अण्हाणमाइएहिं साधुं तु दुगुंछति दुगुंछे'ति गाथार्थः ॥ साम्प्रतं बाह्यग्रन्थभेदानाह-

नि. [२४२] खेत्तं वत्थू धणधन्नसंचओ मित्तनाइसंजोगो ।
जाणसयनासनानि अ दासीदासं च कुवियं च ॥

वृ. 'क्षेत्रं'सेत्वादि, 'वास्तु खातादि, धनं-हरिण्यादि, धान्यं च -शाल्यादि तयोः सञ्चयो-राशिर्धनधान्यसञ्चयः, मित्राणि च-सहवर्द्धितानि ज्ञातयश्च-स्वजनाः तैः संयोगः-सम्बन्धो मित्रज्ञातिसंयोगः, यानानि च-शिबिकादीनी शयनानि च-पल्यङ्कादीनि आसनानि च-सिंहासनादीनि यानशयनासनानि, चः समुच्चये, दास्यः-अङ्कपतिताः दासा अपि तथाविधा एव अनयोः समाहारः, चः प्राग्वत्, 'कुवियं च'त्ति कुप्यं च-विविधं गृहोपस्करात्मक् । अत्र च धनधान्यसञ्चयो मित्रज्ञातिसंयोगश्चेति द्वौ शेषाश्चाष्टेति दशविधो बाह्यग्रन्थ इति गाथार्थः ॥

नि. [२४३] सावज्जगंथमुक्का अब्भितरबाहिरेण गंथेण ।
एसा खलु निज्जुत्ती खुड्डागनियंठसुत्तस्स ॥

वृ. सहावद्येन-दोषेण वर्त्तत इति सावद्यः स चासौ ग्रन्थश्च सावद्यग्रन्थस्तेन मुक्ताः सावद्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थमुक्ताः, अनेन च रजोहरणमुखवस्त्रिकावर्षाकल्पादेर्दशविधबाह्यग्रन्थान्तर्गतत्वेऽपि धर्मोपकरणत्वेनानवद्यतयाऽमुक्तावपि निर्ग्रन्थत्वमुक्तम्, एवं च मा भूत्कस्यचिद्यामोहो-बाह्येनैव सावद्यग्रन्थेन मुक्ता इत्याह-आभ्यन्तरबाह्येन ग्रन्थेन, न तु बाह्येनैव, मुक्ता इति शेषः, 'एषा' अनन्तरोक्ता 'खलु' निश्चितं निरिति-निश्चिताऽधिका वा युक्तिरस्यामिति निर्युक्ताः-नामनिष्पन्ननिक्षेपनिर्युक्तिरित्यर्थः, कस्येत्याह-'खुड्डागणियंठसुत्तस्स'त्ति क्षुल्लकनिर्ग्रन्थनामकं सूत्रं तस्येति गाथार्थः ॥ इत्युक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तस्य चायमभिसम्बन्धः-इहानन्तराध्ययनसूत्रे 'मुनिः' सकाममरणं म्रियते' इत्युक्तं, स च मनना-न्मुनिरिति ज्ञान्येव, ये त्वज्ञानिनस्ते किमित्याह-

मू. (१६१) जावंतऽविज्जा पुरिसा, सव्वे ते दुक्खसंभवा।
लुप्पंति बहुसो मूढा, संसारंमि अनंतए ॥

वृ. 'यावन्तो' यत्परिमाणा वेदनं विद्या-तत्त्वज्ञानात्मिका न विद्या अविद्या-मिथ्यात्वो-पहतकुत्सितज्ञानात्मिका तत्प्रधानाः पुरुषाः अविद्यापुरुषाः, अविद्यमाना वा विद्या येषां ते अविद्यापुरुषाः, इह च विद्याशब्देन प्रभूतश्रुतमुच्यते, न हि सर्वथा श्रुताभावः जीवस्य, अन्यथा अजीवत्वप्राप्तेः, उक्तं हि-"सव्वजीवाणंपि य णं अक्खरस्सऽनंतभागो निच्चुघाडितो, यदि सोऽवि आवरिज्जेज्ज तो णं जीवो अजीवत्तणं पावेज्जा"। 'सर्वे' अखिलाः 'ते' इत्याविद्या-पुरुषा, 'दुक्खसंभव'त्ति दुःखस्य सम्भवो येषु ते दुःखसम्भवाः, यद्वा दुःखं करोति दुःखयति ततो दुःखयतीति दुःखं-पापं कर्म्म ततः सम्भवः-उत्पत्तिर्येषां ते दुःखसम्भवाः, एवंविधाः, सन्तः किमित्याह-'लुप्यन्ते' दारिद्र्यादिभिर्बाध्यन्ते 'बहुशः' अनेकशो 'मूढा' हिताहितविवेचनं प्रत्यसमर्थाः, क्व ?-संसरणं-तिर्यग्नरकादिषु भवेषु भ्रमणं संसारः तस्मिन्, कीदृशि ?-'अनन्तके' अविद्यमानान्ते, अनेन चानन्तसंसारिकतादर्शनेन तादृशां पण्डितमरणाभाव उक्तः, अध्ययनार्थापेक्षया तु निर्ग्रन्थस्वरूपज्ञापनार्थं तद्विपक्ष उक्त इति भावनीयम्।

इह चायमुदाहरण-एगो गोधो दोगच्चेण वाइतो गेहाओ निग्गतो, सव्वं पुहविं हिंडिऊण जाहे न किंचि लहति ताहे पुण रवि धरं जतो नियत्तो, जाव एगंमि पाणवाडगसमीवे गामदेव-कुलियाए एगरत्तिं वासोवगतो जाव पेच्छइ ताव देवउलियाओ एगो पाणो निग्गतो चित्तघड-हत्थगतो, सो एगपासे ठातिऊणं तं वियडघडं भणित-लहु घरं सज्जेहि, एवं जं जं सो भणति तं चिय घडो करेइ, जाव सयणिज्जं, इत्थीहिं सद्धिं भोगे भुंजति, जाव पहाए पडिसा-हरति।

तेन गोहेण सो दिट्ठो, पच्छा चिंतेइ-किं मज्झ बहुएण भमिएण ?, एतं चेव ओलग्गामि, सो तेन ओलग्गिओ, आराहितो भणति-किं करेमि ? त्ति, तेन भण्णति-तुम्ह पसाएण अहंपि ए तं चेव भोगे भुंजामि, तेन भण्णति-किं विज्जं गेण्हसि ? उताह विज्जाएऽभिमंतियं धडं गेण्हसि ?, तेन विज्जासाहणपुरच्चरणभीरुणा भोगतिसिएण य भण्णति-विज्जाभिमंतियं घडयं देहि, तेन से विज्जाए अभिमंतिऊण घडो दिण्णो, सो तं गहाय गतो सगामं, तत्थ बंधूहिं सहवासेहिंवि समं जहारुइयं भवणं विगुरुव्वियं, भोगे तेहिं सह भुंजंतो अच्छति, कम्मंता य से सीदिउमारद्धा, गवादओ य असंगोविज्जमाणा प्रलयीभूताः, सो य कालंतरेण अतितोसएण तं घडं खंधे काऊण एयस्स पभावेण अहं बंधुमज्झे पमोयाममि आसवपीतो पणच्चितो, तस्स पमाएण सो घडो

भग्गो, सो य विज्जाकओ उवभोगो नट्ठो, पच्छा ते गामेयगा प्रलयीभूतविभवाः परपेसाईहिं दुक्खाणि अनुभवंति, जति पुण सा विज्जा गहिया होंता ततो भग्गेवि घडे पुणोवि करेंतो।

एवं अविज्जानरा दुक्खाणि संभूताः क्लिश्यन्ते, नागार्जुनीयास्तु पठन्ति-"ते सव्वे दुक्खमज्जिया" इह च मकारोऽलाक्षणिकः, अर्जितम्-उपार्जितं दुःखं यैस्तेऽर्जितदुःखाः, प्राकृतत्वान्निष्ठान्तस्य परनिपातः, शेषं प्राग्वत्, यद्वा यावन्तो 'विद्यापुरुषा' विद्याप्रधानाः, पुरुषास्ते सर्वे 'अदुःखसम्भवाः' अविद्यमानदुःखोत्पत्तयः, अमुमेवार्थं व्यतिरेकेणा-'मूढा' अज्ञानाऽऽकुलितमतय एव लुप्यन्ते बहुशः संसारेऽनन्तक इति, काक्वा वा व्याख्येयं, दृश्यन्ते हि यानपात्रिण इहैव मोहाद्वयालुप्यमानाः, तथा च वृद्धाः-जहा समुद्दे वाणिया दुव्वायाहयजाणवत्ता दिसामूढा खणेण अंतोजलगयपव्वयमासाएऊण भिन्नपोया महावीतिकल्लोलेहिं वुज्झमाणा कुम्मगमगराईहिं विलुप्पंति, एवं तेऽवि अविज्जा बहुसो मूढा सारीरमाणसेहिं महादुक्खेहिं विलुप्पन्तीति सूत्रार्थः ॥ यतश्चैवं ततो यत्कृत्यं तदाह-

मू. (१६२) *समक्खि पंडिए तम्हा, पास जाइपहे बहू।*
अप्पणा सच्चमेसेज्जा, मित्तिं भूएहिं कप्पए॥

वृ. 'समीक्ष्य' आलोच्य 'पण्डितो' हिताहितविवेकभाक् 'त(ज)म्ह' त्ति यस्मादेवमविद्यावन्तो लुप्यन्ते तस्मात्, पाठान्तरतश्च तस्मात्, समीक्ष्य मेधावी-मर्यादावर्ती, किं तत् समीक्ष्येत्याह-पाशा-अत्यन्तपारवश्यहेतवः कलत्रादिसम्बन्धास्त एव तीव्रमोहोदयादिहेतुतया जातीनाम्-एकेन्द्रियादिजातीनां पन्थानः-तत्प्रापकत्वान्मार्गाः पाशजातिपथाः तान् 'बहून्' प्रभूतान् अविद्यावतां विलुप्तिहेतून्, किमित्याह-'आत्मना' स्वयं न तु परोपरोधादिना, सद्भयोजीवादिभ्यो हितः-सम्यग् रक्षणप्ररूपणादिभिः, सत्यः-संयमः सदामो वा तमेषयेत-गवेषयेत, एषयंश्च सत्यं किं कुर्याद् इत्याह-'मैत्रीं' मित्रभावं 'भूतेषु' पृथिव्यादिषु जन्तुषु 'कल्पयेत्' कुर्यात्, पठ्यते वा-'अत्तट्ठा सच्चमेसेज्जा' इह च यस्मादविद्यावन्तः संसारे लुप्यन्ते तस्मात्-

"मय्येव निपतत्वेतज्जगद्दुश्चरितं हि यत्।
मत्सुचरितयोगेन, स वै कल्याणभाजनम्॥" इति,

शाक्यादिपरिकल्पिताविद्यापरिहारेणात्मार्थमेव, न तु परार्थं, सत्यमेषयेद्, अपरकृतस्यापरत्रासङ्क्रमणेन परार्थानुष्ठानस्यानर्थकत्वाद्, अन्यत् प्राग्वदिति सूत्रार्थः ॥ अपरं च-

मू. (१६३) *माया पिया न्हुसा भाया, भज्जा पुत्ता य ओरसा।*
नालं त मम ताणाय, लुप्पंतस्स सकम्मुणा॥

मू. (१६४) *एयमट्ठं सपेहाए, पासे समियदंसणे।*
छिंदं गेहिं सिनेहं च, न कंखे पुव्वसंथवं॥

वृ. तत्राद्यसूत्रपूर्वार्धं स्पष्टं, नवरं स्नुषा-वध्वः, पुत्राश्च उरसि भवा औरसाः स्वयमुत्पादिताः, आस्तां जातपुत्रादयः, किमित्याह-'नालं' न समर्थाः 'ते' मात्रादयो मा 'त्राणाय' रक्षणाय, कथंभूतस्य?-'लुप्यमानस्य' छिद्यमानस्य, केन?-'स्वकर्म्मणा' स्वकृतेन ज्ञानावरणादिना, किमुक्तं भवति?-स्वकर्म्मविहितां बाधामनुभवतः एते मात्रादयो न त्राणायेति, एवमात्मकमनन्तरोक्तमर्थं-वस्तु 'सपेहाए' त्ति प्राकृतत्वात् संप्रेक्षया-सम्यग्बुद्धया स्वप्रेक्षया वा, 'पासे' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्येदवधारयेत्, शमितं दर्शनं प्रस्तावात् मिथ्यात्वात्मकं येन से तथोक्त:, यदिवा सम्यक् इतं-गतं जीवादिपदार्थेषु दर्शनं-दृष्टिरस्येति समितदर्शन:, कोऽर्थ:?-सम्यग्दृष्टि: सन्, ततश्च 'छिंद'त्ति छिन्द्यात्, सूत्रत्वात्तिव्यत्यय:, एवं सर्वत्रानुच्यमानोऽप्ययं भावनीय:, 'गृद्धिं' विषयाभिकाङ्क्षां 'स्नेहं च' स्वजनादिषु प्रेम 'न' नैव 'काङ्क्षेद्' अभिलषेद्, अपेर्गम्यमानत्वात् काङ्क्षेदपि न, किं पुन: कुर्यादिति भाव:। 'पूर्वसंस्तवं' पूर्वपरिचयमेकग्रामोषितोऽयमित्यादिकं, यतो न कश्चिदिह परत्र वा त्राणाय स्वकर्मणा विलुप्यमानस्य धर्मं विनेति भाव इति सूत्रद्वयार्थ: ॥

मू. (१६५) *गवासं मणिकुंडलं, पसवो दासपोरुसं।*
सव्वमेयं चइत्ता णं, कामरूवी भविस्ससि॥

वृ. गावश्चाश्वाश्च गवाश्वं, 'गवाश्वप्रभृतीनि चे'त्ति समाहार:, तत्र गावो-वाहदोहोपलक्षिता: अश्वा:-तुरगा:, पशुत्वेऽप्यनयो: पृथगुपादानं अत्यन्तोपयोगित्वेन प्राधान्यात्, तथा मणयश्च-मरकतादय: कुण्डलानि च-कर्णाभरणानि मणिकुण्डलम्, उपलक्षणं चैतच्छेषालङ्काराणां स्वर्णादीनां च, पश्यन्ति प्रसूयन्ते वा पशव:-अजैडकादय:, दासाश्च-गृहजातादय: 'पोरुसं'ति सूत्रत्वात् पुरुषाणां समूह इत्यर्थ:, 'पुरुषाद्वधविकारसमूहे' त्यादिना ढकि पौरुषेयं च-पदात्यादिपुरुषसमूहो दासपौरुषेयं, यद्वा 'दासपोरुसं'ति दासपुरुषाणां समूहो दासपौरुषं, पुरुषाद् ढक् न भवति, ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात्, 'सर्वं' निरवशेषं 'एतद्' अनन्तरोक्तं 'त्यक्त्वा' हित्वा, संयममनुपाल्येत्यभिप्राय:, किमित्याह-'कामरूपी' अभिलषितरूपविकरणशक्तिमान भविष्यसि, इहैव वैक्रियकरणाद्यनेकलब्धियोगात् परत्र च देवभावावाप्तेरिति सूत्रार्थ: ॥ पुन: सत्यस्वरूपमेव विशेषत आह-

मू. (१६६) *थावरं जंगमं चेव, धनं धन्नं उवक्खरं।*
पच्चमाणस्स कम्मेहिं, नालं दुक्खाउ मोयणे॥

मू. (१६७) *अब्भत्थं सव्वओ सव्वं, दिस्स पाणे पियायए।*
न हणे पाणिणो पाणे, भयवेराओ उवरए॥

वृ. 'अब्भत्थं'ति अध्यात्ममात्मनि यद्वर्तते, यदिवा अध्यात्मं-मन: तस्मिंस्तिष्ठत्यध्यात्मस्थं, सूत्रत्वाद्वर्णलोप:, तच्चेह प्रस्तावात् सुखादि 'सर्वत:' इष्टसंयोगानिष्टसंप्रयोगादिहेतुभ्यो, जातमिति गम्यते, 'सर्वं' निरवशेषं 'दृष्ट्वा' प्रियत्वादिस्वरूपेणावधार्य, तथा 'पाणे'त्ति चस्य गम्यमानत्वात् प्राणांश्च-प्राणिनश्च 'पियादए'त्ति आत्मवत् सुखप्रियत्वेन प्रिया दया-रक्षणं येषां तान् प्रियदयान्, प्रिय आत्मा येषां तान् प्रियात्मकान् वा, दृष्ट्वा इत्यत्रपि सम्बन्धनीयं, तत: किमित्याह-'न हन्यात्' नातिपातयेत्, उपलक्षणत्वात्रापि घातयेत् न वा घ्नन्तं समनुजानीयात्, प्राणीन इति जातावेकवचनं, पाठान्तरतश्च-प्राणिनां प्राणान्-इन्द्रियादीन्, कीदृश: सन्? इत्याह-भयं च उक्तस्वरूपं, वैरं च-प्रद्वेष: भयवैरमिति समाहारस्तस्मादुपरतो निवृत्त: सन् यदिवा-अध्यात्मस्थशब्दस्याभिप्रेतपर्यायात्वेन रूढत्वादध्यात्मस्थं-यद्यस्याभिमतं, तच्च सुखमेव, 'सर्वत'इति सर्वाभ्यो दिग्भ्य: सर्वेभ्यो वा मनोऽभिमतशब्दादिभ्यो जातं सर्वं शारीरं मानसं च यथा तवेष्टं तथाऽन्येषामपि प्राणिनामित्युपस्कार:, 'दृष्ट्वा' अवधार्य, इहापि चस्य गम्यमानत्वात् प्राणान् प्राणप्राण्यभेदोपचारात् प्रियदयांश्च, दृष्ट्वेत्यत्रापि योज्यते, अन्यत् प्राग्वदिति सूत्रार्थ: ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं प्राणातिपातलक्षणाश्रवनिरोधमभिधाय शेषाश्रवनिरोधमाह-

मू.(१६८) *आयाणं नरयं दिस्स, नायइज्ज तणामवि।*
दोगुंछी अप्पणो पाते, दिन्नं भुजेज्ज भोयणं॥

वृ. आदीयत इत्यादानं-धनधान्यादि "कृत्यल्युटोऽन्यत्रापी"ति कर्मणि ल्युट्, आर्षत्वादादानीयं वा, नरककारणत्वान्नरकं दृष्ट्वा, किमित्याह-'नाददीत' न गृह्णीत न स्वीकुर्यादितियावत्, 'तेनामवि'त्ति तृणमपि, आस्तां रजतरूप्यादि, कथं तर्हि प्राणधारणमित्याह-'दोगुंछी'-त्याद्यर्धं, जुगुप्सते आत्मानमाहारं विना धर्मधुराधरणाक्षममित्येवंशीलो जुगुप्सी, आत्मनः इति आत्मसम्बन्धिनि पात्रे-भाजने प्राप्ते वा भोजनसमय इति शेषः, 'दत्तं' निसृष्टं, गृहस्थैरिति गम्यते, 'भूंजेज्ज'त्ति भुञ्जित भोजनम्-आहारं, अनेनाहारस्यापि भावतोऽस्वीकरण-माह, जुगुप्सिशब्देन तदप्रतिबन्धदर्शनात्, ततश्च परिग्रहाश्रवनिरोध उक्तः, तदेवं 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यत' इति न्यायात् मृषावादादत्तादानमैथुनात्मकाश्रवत्रयनिरोध उक्तः, यद्वा 'सत्यमिच्छेदि'ति सत्यशब्देन साक्षात्संयममपि वदता मृषावादनिवृत्तिराक्षिप्ता, तद्द्वारेणापि तस्य सत्यत्वात्, आदानमित्यादिना तु साक्षाददत्तादानविरतिरुक्ता, आदानं हि ग्रहणमेव रूढं, तच्चादत्तस्येति गम्यते, तं 'नरकं' नरकहेतुं दृष्ट्वा नाददीत तृणमप्यदत्तमितीहापि गम्यते, 'गवास'मित्यादिना तु परिग्रहाश्रवनिरोधः, तन्निरोधाभिधानाश्च नापरिगृहीता स्त्री भुज्यत इतिकृत्वा मैथुनाश्रवनिरोधोऽप्युक्त एव।

नन्वेवं स्वयं त्यक्तगवादिपरिग्रहस्य परकीयं चानाददानस्य कथं प्राणवृत्तिः ?, इत्याह-जुगुप्स्यात्मनः पात्रे दत्तं भुञ्जीत भोजनमिति, पात्रग्रहणं तु व्याख्याद्वयेऽपि मा भूत् निष्परिग्रहतया पात्रस्याप्यग्रहणमिति कस्यचिद् व्यामोह इति ख्यापनार्थं, तदपरिग्रहे हि तथाविधलब्ध्याद्यभावेन पाणिभोक्तृत्वाभावाद्गृहिभाजन एव भोजनं भवेत्, तत्र च बहुदोषसम्भवः, तथा च -

"पच्छा कम्मं पुरेकम्मं, सिया तत्थ न कप्पइ।
एयमट्ठं न भुजंति, निग्गंथा गिहिभायणे॥"

इति। एवं पञ्चाश्रवविरमणात्मके संयम उक्ते यथा परे विप्रतिपद्यन्ते तथा दर्शयितुमाह-

मू.(१६९) *इहमेगे उ मन्नंति, अप्पच्चक्खाय पावगं।*
आयरियं विदित्ता णं, सव्वदुक्खा विमुच्चइ॥

वृ. 'इहे'त्यस्मिन् जगति मुक्तिमार्गविचारे वा 'एके' केचन कपिलादिमतानुसारिणः 'तुः' पुनरर्थे 'मन्यन्ते' अभ्युपगच्छन्ति, उपलक्षणत्वात्प्ररूपयन्ति च, यथा 'अप्रत्याख्याय' अनिराकृत्य 'पापकं' प्राणातिपातादिविरति मकृत्वैव 'आयरियं'ति सूत्रत्वात् आराद्यातं सर्वकुयुक्तिभ्य इत्यार्यं-तत्त्वं तद् 'विदित्वा' ज्ञात्वा 'सर्वदुःखेभ्य' आध्यात्मिकाधिभौतिकाधिदैविकलक्षणेभ्यः स्वपरिभाषया शारीरमानसेभ्यो वा 'मुच्यते' पृथग् भवति, तथा चाह-

"पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः।
शिखी मुण्डी जटी वापि, मुच्यते नात्र संशयः॥"

यद्वाऽऽचरणमाचरितं तत्तत्क्रियाकलापः, पाठान्तरश्च-'आचारिकं' निजनिजाचारभवमनुष्ठानमेव, तद्विदित्वा-स्वसंवेदनतोऽनुभूय सर्वदुःखाद्विमुच्यते, एवं सर्वत्र ज्ञानमेव मुक्त्यङ्गं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चैतच्चारु, न हि रोगिण इवौपधादिपरिज्ञानतो भावरोगेभ्यो ज्ञानावरणादिकर्मभ्यो महाव्रतात्मकपञ्चाङ्गोपलक्षितां क्रियामननुष्ठाय मुक्तिः ॥ ते चैवमनालोचयन्तो भवदुःखाकुलिता वाचालतयैवमात्मानं स्वस्थयन्ति, तथा चाह-

मू. (१७०)　　　भणंता अकरिंता य, बंधमोक्खपइन्निणो।
वायाविरियमेत्तेणं, समासासेंति अप्पगं॥

वृ. 'भणन्तः' प्रतिपादयन्तः, प्रक्रमात् ज्ञानमेव मुक्त्यङ्गमिति, 'अकुर्वन्तश्च' मुक्त्युपायमनुष्ठानं, बन्धमोक्षौ उक्तरूपौ तयोः प्रतिज्ञा-अभ्युपगमः तद्वन्तः, सूत्रत्वाच्चेना निर्देश, अस्ति बन्धोऽस्ति च मोक्ष इत्येवंवादिन एव केवलं, न तु तथाऽनुष्ठायिनः, वाचि वीर्यम्-आत्मशक्तिर्वाग्वीर्यं वाचालतेति यावत्, तदेवानुष्ठानशून्यं वाग्वीर्यमात्रं तेन 'समाश्वासयन्ति' विज्ञानादेव वयं मुक्तिगामनि इति स्वास्थ्यं प्रापयन्ति, कम् ?-आत्मानमिति सूत्रार्थः ॥ यथा चैतन्न चारु तथा स्वत एवाह-

मू. (१७१)　　　न चित्ता तायए भासा, कओ विज्जाणुसासणं ?
विसन्ना पावकम्मेहिं, बाला पंडियमानिनो॥

वृ. 'न' नैव 'चित्रा' प्राकृतसंस्कृतादिरूपा आर्यविषयं ज्ञानमेव मुक्त्यङ्गमित्यादिका वा 'त्रायते' रक्षति, पापेभ्य इति गम्यते, केत्याह-भाष्यत इति भाषा-वचनात्मिका, स्यादेतत्-अचिन्त्यो हि मणिमन्त्रमहौषधीनां प्रभाव इत्यघोरादिमन्त्रात्मिका वाक् त्राणाय भविष्यतीत्याह, कुतो ? विदन्त्यनया तत्त्वमिति विद्या-विचित्रमन्त्रात्मिका तस्या अनुशासनं-शिक्षणं विद्यानुशासनं त्रायते पापाद्भावद्वा ?, न कुतोऽपि, तन्मात्रादेव मुक्तौ शेषानुष्ठानवैयर्थ्यप्रसङ्गादिति भावः। अत एव ये तदपि त्राणायेति वदन्ति ते यादृशास्तदेवाह-विविधम्-अनेकप्रकारं सन्नामग्ना विषण्णाः, केषु ?-'पावकम्मेहिं'ति पापाकर्म्मसु पापहेतुषु हिंसाद्यनुष्ठानेषु, सततं तत्कारितयेति भावः, यद्वा विषण्णा-विषादं गताः पापकर्म्मभिः-पापानुष्ठानैः यथा कथमेवमनुष्ठायिनो वयं भविष्याम इति, पठन्ति च-'विसन्ना पावकिच्चेहिं'ति तथैव, कुतस्त एवंविधा इत्याह-'बाला' रागद्वेषाकुलिताः पण्डितमात्मानं मन्यन्ते इत्येवंशीलाः पण्डितमानिनः, ये हि बालाः पण्डितमानिनश्च न स्युस्ते स्वयं सम्यगजानानाः परं पृच्छेयुः तदुपदेशतश्च तानि परिहरेयुः न तु विषण्णा एवासीरन्, ये तु बालाः पण्डितमानिनश्च ते स्वयमजानाना अपि जानानमन्यमात्मन्यभिमानतोऽनुपासमाना एवंविधा एव भवन्तीति सूत्रार्थः ॥ साम्प्रतं सामान्येनैव मुक्तिपथपरिपन्थिनां दोषदर्शनायाह-

मू. (१७२)　　　जे केइ सरीरे सत्ता, वन्ने रूवे य सव्वसो।
मणसा कायवक्केणं, सव्वे ते दुक्खसंभवा॥

वृ. ये केचित् 'शरीरे' शरीरविषये 'सक्ता' बद्धाग्रहाः, क्व ? इत्याह-'वर्ण्णे' सुस्निग्धगौरत्वादिके 'रूपे च' सुसंस्थानतायां, चशब्दात् स्पर्शादिषु, वस्त्राद्यभिष्वङ्गोपलक्षणं चैतत्, 'सव्वसो'त्ति सूत्रत्वात् सर्वथा-सर्वैः स्वयंकरणकारणादिभिः प्रकारैः, मनसा कथं वर्ण्णादिमन्तो वयं भविष्याम ? इत्यभिसन्धिना, वचसा रसायनादिप्रश्नात्मकेन, चशब्दात् कायेन च रसायनाद्युपयोगेन, एवेति पूरणे, पठ्यते च-'कायवक्केणं'ति कायश्च-शरीरं वाक्यं च-वचनं

Jain Education International　　　For Private & Personal Use Only　　　www.jainelibrary.org

कायवाक्यं तेन, 'सर्वे' निरवशेषा गुरुपादुकातो मुक्तिः नास्ति वा मुक्तिरित्यादिवादिनोऽपि न केवलमार्यादिविदित्वा दुःखाद्विमुक्तिरितिवादिन एवेति भावः, 'ते' इति ये अप्रत्याख्याय पापमित्यादिवादिनो 'दुःखसम्भवाः' इहान्यजन्मनि च दुःखभाजनं इति सूत्रार्थः ॥ यथा चैते दुःखभाजनं तथा दर्शयन्नुपदेशसर्वस्वमाह-

मू. (१७३) *आवन्ना दीहमद्धाणं, संसारंमि अनंतए।*
तम्हा सव्वदिसं पस्सं, अप्पमत्तो परिव्वए॥

वृ. 'आपन्नाः' प्राप्ताः 'दीर्घम्' अनाद्यनन्तमध्वानमिवाध्वानम्-उत्पत्तिप्रलयरूपं, अन्यान्य-भवभ्रमणेनैकत्रावस्थितेरभावात्, क्व ?-'संसारे' नरकादिगतिचतुष्टयात्मके 'अनन्तके' अविद्यमानान्ते, अपर्यवसितानन्तकायिकाद्युपलक्षितत्वेनेति गर्भः, 'तम्ह'त्ति यस्मादेवमेते मुक्तिपरिपन्थिनो दुःखसम्भवाः तस्मात् 'सव्वदिसं'ति सर्वदिशः-प्रस्तावादशेषभावदिशः, ताश्च पृथिव्याद्यष्टादशभेदाः, उक्तं च-

"पुढवि जलजलणवाया मूला खंधग्गपोरबीया य।
बितिचउपणिंदितिरिया य नारया देवसंघाया॥१॥
संम्मुच्छिमकम्माकम्मभूमिगणरा तहंतरद्दीवा।
भावदिसा दिस्सइ जं संसारी नियममेयाहिं॥२॥"

'पश्यन्' अवलोकयन् 'अप्रमत्तः' प्रमादविरहितः, यथैषामेकेन्द्रियादीनां विराधना न भवति तथा 'परिव्रजेः' संयमाध्वनि यायाः, यद्वा-संसारापन्नानां सर्वदिशः पश्य, दृष्ट्वा चाप्र-मत्तो-निद्रादिप्रमादपरिहारतो यथैतासु न पर्यटसि तथा परिव्रजेः सुशिष्येति सूत्रार्थः ॥ यथा चाप्रमत्तेन परिव्रजितव्यं तथा दर्शयितुमाह-

मू. (१७४) *बहिया उड्ढमायाय, नावकंखे, कयाइवि।*
पुव्वकम्मक्खयट्ठाए, इमं देहमुदाहरे।

वृ. 'बहिय'त्ति बहिः, कोऽर्थः ?-बहिर्भूतं भवादिति गम्यते, ऊर्ध्वं सर्वोपरिस्थितम् अर्था-न्मोक्षमादायगृहीत्वा मयैतदर्थं यतितव्यमिति निश्चित्य बुद्धया सम्प्रधार्येतियावत्, अथवा बहिः-आत्मनो बहिर्भूतं धनधान्यादि ऊर्ध्वम् -अपवर्गमादाय-गृहीत्वा, हेयत्वेनोपादेयतया च ज्ञात्वेतियावत्, 'नावकाङ्क्षेत्' विषयादिकं नाभिलषेत्, न क्वचिदभिष्वङ्गं कुर्वीतेति तात्पर्यं, 'कदाचिदपि' उपसर्गपरीषहाकुलिततायामपि, आस्तामन्यदा, एवं सति शरीरधारणमप्ययुक्त-मेव, एतद्धारणे सत्याकाङ्क्षासम्भवात्, तस्यापि चात्मनो बहिर्भूतत्वात्, अत आह-पुव्वेत्याद्यर्द्धं, पूर्वं-पूर्वकालभावि तच्च तत्कर्म च पूर्व्वकर्म तस्य क्षयः तदर्थमिमं-प्रत्यक्षं 'देहं' शरीरं 'समुद्धरेद्' उचिताहारादिभोगतः परिपालयेत्, तद्धारणस्य विशुद्धिहेतुत्वात्, तत्पाते हि भवान्त-रोत्पत्तावविरतिरपि स्यात्, उक्तं च-

"सव्वत्थ संजमं संजमातो अप्पाणमेव रक्खेज्जा।
मुच्चति अतिवायातो पुनो विसोही न याविरती॥"

ततः शरीरोद्धरणमपि निरभिष्वङ्गतयैव विधेयमिति सूत्रार्थः ॥ यथा च देहपालनेऽपि नाभिष्वङ्गसम्भवः तथा दर्शयितुमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१७५) *विविच्च कम्मणो हेउं, कालकंखी परिव्वए।*
मायं पिंडस्स पाणस्स, कडं लध्दूण भक्खए॥

वृ. 'विविच्य' पृथक्कृत्य 'कर्म्मणो' ज्ञानावरणादेः 'हेतुम्' उपादानकारणं मिथ्यात्वाविरत्यादि, कालम् अनुष्ठानप्रस्तावं काङ्क्षत इत्येवंशीलः कालकाङ्क्षी, 'परिव्रजे'रिति पूर्ववत्, पठन्ति च 'विगिंच कम्मुनो हेउ'न्ति अत्र च वेविग्धि' परित्यजेत्युपदेशान्तरतया व्याख्येयं, मात्रां यावत्या संयमनिर्वाहस्तावतीं, ज्ञात्वेती गम्यते, कस्य ?-'पिण्डस्य' ओदनादेरन्नस्य 'पानस्य च' आयामादेः, स्वाद्यस्वाद्यानुपादानु च यतेः प्रायस्तत्परिभोगासम्भवात्, कृतम्-आत्मार्थमेव निर्वर्तितं, गृहिभिरिति गम्यते, प्रक्रमात्पिण्डादिकमेव 'लब्ध्या' प्राप्य 'भक्षयेद्' अभ्यवहरेदिति सूत्रार्थः ॥ कदाचिद्भुक्तशेषं धारयतोऽभिष्वङ्गसम्भवः स्यादित्याह-

मू. (१७६) *सन्निहिं च न कुव्विज्जा, लेवमायाय संजए।*
पक्खी पत्तं समायाय, निरवेक्खो परिव्वए॥

वृ. सम्यग्-एकीभावेन निधीयते-निक्षिप्यतेऽनेनाऽऽत्मा नरकादिष्विति सन्निधिः-प्रातरिदं भविष्यतीत्याद्यभिसन्धितोऽतिरिक्ताशनादिस्थापनं तं च न कुर्वीत, चशब्दः पूर्वापेक्षया समुच्चये, 'लेवमायाय'त्ति लेपः-शकटाक्षादिनिष्पादितः पात्रगतः परिगृह्यते, तस्य मात्रा-मर्यादा, मात्राशब्दस्य मर्यादावाचित्वेनापि रूढत्वात्, यथोक्तम्-

"ईषदर्थक्रियायोगे, मर्यादायां परिच्छदे।
परिमाणे धने चेति, मात्राशब्दः प्रकीर्तितः ॥"

लेपमात्रतया, किमुक्तं भवति ?-लेपमेकं मर्यादीकृत्य न स्वल्पमप्यन्यत् सन्निदधीत, यद्वा परिमाणार्थोऽयं मात्राशब्दः, लक्षणे तृतीया, ततोऽयमर्थः-लेपमात्रयेति यावता पात्रमुपलिप्यते तावत्परिमाणमपि सन्निधिं न कुर्वीत, आस्तां बहुमित्यभिप्रायः, 'संयतो' यतिः, किमित्येवं पात्राद्युपकरणसन्निधिरपि न कर्तव्य इत्याह-'पक्खि'त्ति पक्षीव पक्षी, यथा पक्षी पतन्तं त्रायत इति पत्रं-पक्षसञ्चयं 'समादाय' गृहीत्वा व्रजति, एवं भिक्षुरपि 'पत्ते'त्ति पात्रमुपलक्षणत्वाच्छेषोपकरणं चादाय परिव्रजेदिति सम्बन्धः, कीदृग् ?-'निरपेक्षो' निरभिलाषः, तस्य वा विनाशादौ शोकाकरणतो निरपेक्षो-निरभिष्वङ्गः, तथा च प्रतिदिनमसंयमपलिमन्थभीरुतया पात्राद्युपकरणसन्निधिकरणेऽपि न दोष इत्यर्थः, अथवा यदि लेपमात्रयाऽपि सन्निधिं न कुर्वीत कथमागामिनि दिने भोक्तव्यमित्याह-पक्षीव निरपेक्षः, पात्रं पतद्गहादिभाजनमर्थात्तन्निर्योगं च समादाय व्रजेद्-भिक्षार्थं पर्यटेद्, इदमुक्तं भवति-मधुकरवृत्त्या हि तस्य निर्वहणं, तत्किं तस्य सन्निधिना ? इति सूत्रार्थः ॥ सम्प्रति यदुक्तं 'कृतं लब्धवा भक्षयेदि'ति, तत्र कथं तल्लाभ इति तदुपायमाह- यद्वा-यदुक्तं 'निरपेक्षः परिव्रजेदि'ति तदभिव्यक्तिकर्तुमाह-

मू. (१७७) *एसणासमिओ लज्जू, गामे अनियओ चरे।*
अप्पमत्तो पमत्तेहिं, पिंडवातं गवेसए॥

वृ. एषणायाम्-उत्पादनग्रहणग्रासविषयायां सम्यगितः-स्थितः समितः एषणासमितः, प्राधान्याच्च इहैषणाया एवोपादानं, प्रायस्तद्भावे ईर्याभाषादिसमितिसम्भव इति ज्ञापनार्थं वा, अनेन निरपेक्षत्वमुक्तं, 'लज्जू'त्ति लज्जा-संयमस्तदुपयोगानन्यतया यतिरपि तथोक्तः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आर्षत्वाच्चैवं निर्देशः, ग्रामे उपलक्षत्वान्नगरादौ च 'अनियतः' अनियतवृतिः 'चरेद्' विहरेत्, अनेनापि निरपेक्षतैवोक्ता। चरंश्च किं कुर्यादित्याह-'अप्रमत्तः' प्रमादरहितः सन् 'पमत्तेहिं'ति प्रमत्तेभ्यो गृहस्थेभ्यः, ते हि विषयादिप्रमादसेवनात् प्रमत्ता उच्यन्ते, 'पिण्डपातं' भिक्षां 'गवेषयेद्' अन्वेषयदेर्ति सूत्रार्थः ॥ इत्थं प्रसक्तानुप्रसक्त्या संयमस्वरूपमुक्तं, तदुक्तौ च निर्ग्रन्थस्वरूपं, सम्प्रत्यत्रैवादरोत्पादनार्थमाह-

मू. (१७८) एवं से उयाहु अनुत्तरनाणी अनुत्तरदंसी अनुत्तरनाणदंसणघरे।
अरहा नायपुत्ते भयवं वेसालीए वियाहिए ॥

वृ. 'एवम्' अमुना प्रकारेण 'से' इति भगवान् 'उदाहु'त्ति उदाहृतवान्, 'अनुत्तरज्ञानी' सर्वोत्कृष्टज्ञानवान्। ननु चानुत्तरज्ञानीति मत्वर्थीयेन न भवितव्यं, बहुव्रीहिणैव तदर्थस्योक्तत्वात्, सत्यम्, अनुत्तरज्ञानशब्दोऽयं गौरखरशब्दवत् संज्ञाप्रकार एव, केवलज्ञानवाचकत्वात् अस्य, ततो गौरखरवदरण्यमित्यादिवन्न दोषः, नास्योत्तरमस्तीत्यनुत्तरं तथा पश्यतीत्यनुत्तरदर्शी, सामान्यविशेषग्राहितया च ज्ञानदर्शननयोर्भेदः, यत उक्तम्-''जं सामण्णग्गहणं दंसणमेयं विसेसियं नाणं''ति, अनुत्तरे ज्ञानदर्शने युगपदुपयोगाभावेऽपि लब्धिरूपतया धारयतीत्यनुत्तरज्ञानदर्शनधरः।

ननु प्रागुक्ताभ्यां विशेषणाभ्यामस्यार्थस्योक्तत्वात्, कथं न पौनरुक्त्यम् ?, उच्यते, अस्यान्याभिप्रायत्वात्, अत्र हि अनुत्तरज्ञान्यनुत्तरदर्शिति भेदाभिधानेन ज्ञानदर्शनयोर्भिन्नकालमाह, ततश्च मा भूदुपयोगवल्लब्धिद्वयमपि भिन्नकालभावीति व्यामोह इत्युपदिश्यते ज्ञानदर्शनधरः, अर्हति देवादिभ्यः पूजामित्यर्हन्, स चार्थात्तीर्थकृत्, ज्ञातः-उदारक्षत्रियः स चेह प्रस्तावात् सिद्धार्थः तस्य पुत्रो ज्ञातपुत्रः-वर्तमानतीर्थाधिपतिर्महावीरइतियावत् 'भगवान्' समग्रैश्वर्यादिमान् 'वेसालीय'त्ति विशालाः-शिष्याः तीर्थं यशःप्रभृतयो वा गुणा विद्यन्ते यस्येति विशालिकः ''इनि ठना'' विति ठन्, यद्वा विशालेभ्यः-उक्तस्वरूपेभ्यो हित इति हितार्थे ठन्-प्रत्ययः, ततश्च विशालीयः 'वियाहिए'त्ति व्याख्याता सदेवमनुजासुरायां पर्षदि विशेषेणानन्यसाधारणात्मकेनाख्याता-कथयिता, केचित्त्वधीयते-'एवं' से उदाहु अरिहा पासे पुरिसादानीए भगवं वेसालीए बुद्धे परिनिव्वुए'त्ति स्पष्टमेव, नवरमर्हन्निति सामान्योक्तावपि प्रक्रमात् महावीरः, पश्यति समस्त भावान् केवलालोकेनावलोकत इति पश्यः, तथा पुरुषश्चासौ पुरुषाकारवर्तितया आदानीयश्च आदेयवाक्यतया पुरुषादानीयः, पुरुषविशेषणं तु पुरुष एव प्रायस्तीर्थकर इति ख्यापनार्थं, पुरुषैर्वाऽऽदानीयो ज्ञानादिगुणतया पुरुषादानीय इति सूत्रार्थः ॥ इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, ते च पूर्ववद्वाच्याः ॥

अध्ययनं-६ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं षष्ठमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्।

अध्ययनं ७- औरभ्रीयं

वृ. ॥ व्याख्यातं क्षुल्लकनिर्ग्रन्थीयं षष्ठमध्ययनं, साम्प्रतं सप्तममारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने निर्ग्रन्थत्वमुक्तं, तच्च रसगृद्धिपरिहारादेव जायते, स च विपक्षेऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पायदर्शनात्, तच्च दृष्टान्तोपन्यासद्वारेणैव परिस्फुटं भवतीति रसगृद्धिदोषदर्शकोरभ्रादिदृष्टान्तप्रतिपादकमिदमध्ययनमारभ्यते, इत्यनेनाभिसम्बन्धेनायातस्याध्यायनस्योपक्रमादिद्वारचतुष्टयमुपवर्ण्यं तावद्यावन्नामनिष्पन्ननिक्षेते उरभ्रीयमिति नाम, अत उरभ्रनिक्षेपमाह-

नि.[२४४] निक्खेवो उ उरब्भे चउव्विओ दुव्विहो य होइ दव्वंमि।
आगमनोआगमओ नोआगमओ अ सो तिविहो ॥

वृ. 'निक्षेपः' न्यासः, तुः पूरणे, 'उरभ्रे' उरभ्रविषयः 'चतुर्विधः' चतुष्प्रकारः, नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे एव इति द्रव्योरभ्रमाह-द्विविधो भवति 'द्रव्य' इति द्रव्यविषयः, आगमनोआगमतः तत्रागमत उरभ्रशब्दार्थज्ञः तत्र चानुपयुक्तः, नोआगमतः पुनः चस्य पुनरर्थत्वात्, 'स' इति द्रव्योरभ्रः 'त्रिविधः' त्रिभेद इति गाथार्थः ॥ त्रैविध्यमेवाह-

नि.[२४५] जाणगसरीरभविए तव्वइरित्ते अ सो पुनो तिविहो।
एगभविअ बद्धाऊ अभिमुहओ नामगोए अ ॥

वृ. ज्ञशरीरोभ्र उरभ्रशब्दार्थज्ञस्य सिद्धशिलातलगतं शरीरमुच्यते, भव्यशरीरोभ्रस्तु यस्तावदुरभ्रशब्दार्थं न जानाति कालान्तरे च ज्ञास्यति तस्य यच्छरीरं, 'तद्व्यतिरिक्तश्च' ताभ्यां-ज्ञशरीरभव्यशरीरोरभ्राभ्यां व्यतिरिक्तोभिन्नः तद्व्यतिरिक्तः, च समुच्चये, 'स' तद्व्यतिरिक्तः पुनः 'त्रिविधः' त्रिभेदः, त्रैविध्यमेवाह-'एकस्मिन् भवे तस्मिन्नेवातिक्रान्ते भावी एकभविकोयोऽन्तर एव भवे उरभ्रतयोत्पत्स्यते, तथा स एवोरभ्रायर्बन्धानन्तरं बद्धमायुरनेनेति बद्धायुष्क उच्यते, तृतीयमाह-'अभिमुहतो नामगोए य'त्ति आर्षत्वादभिमुखनामगोत्रश्च, तत्राभिमुखे-सम्मुखे अन्तर्मुहूर्तानन्तरभावितया नामगोत्रे उरभ्रसम्बन्धिनी यस्य स तथोक्तः, अन्तर्मुहूर्तानन्तरमेवोरभ्रभवभावीति गाथार्थः ॥ भावोरभ्रमध्ययननामनिबन्धनं चाह-

नि.[२४६] उरभाउनामगोयं वेयंतो भावओ उ ओरब्भो।
तत्तो समुट्ठियमिणं उरब्भिज्जन्ति अज्झयणं ॥

वृ. उरभ्र-ऊरणकः तस्यायुश्च नाम च गोत्रं चोरभ्रायुर्नामगोत्रं, यदुदयादुरभ्रो भवति, 'वेदयन्' अनुभवन् 'भावतो' भावमाश्रित्योरभ्रः, तुशब्दः पर्यायस्तिकमतमेतदिति विशेषणार्थः, 'ततो' भावोरभ्राद् दृष्टान्ततयेहाभिधेयात्समुत्थितम्-उत्पन्नमिदमिति प्रस्तुतं, यस्मादिति गम्यते, 'उरब्भिज्जं'ति उरभ्रीयं ग्रहादित्वाच्छैषिकठप्रत्ययः 'इती'ति तस्माद् अध्ययनं प्रागुक्तनिरुक्तमुच्यत इति शेष इति गाथार्थः ॥ उरभ्रस्यैव चेह प्रथममुच्यमानत्वाद्बहुवक्तव्यत्वाच्चेत्थमुक्तम्, अन्यथा हि काकिण्यादयोऽपि दृष्टान्ता इहाभिधीयन्ते एव, तथा चाह निर्युक्तिकृत्-

नि.[२४७] ओरब्भे अ कागिणी अंबए अ ववहार सागरे चेव।
पंचेए दिट्ठंता उरब्भिज्जंमि अज्झयणे ॥

वृ. 'उरभ्र' उक्तरूपः 'काकिणिः' विंशतिकपर्दकाः 'उरब्भे य'त्ति चशब्दस्य भिन्नक्रमत्वात् काकिणिश्च 'अंबए य'त्ति आम्रकं च-आम्रफलं, व्यवहारश्च-क्रयविक्रयरूपो वणिग्धर्मः, चस्य गम्यमानत्वात्, सागरश्च-समुद्रः, च सर्वत्र समुच्चये, एवोऽवधारणे, भिन्नक्रमश्चैवं योज्यते-पञ्चैवैते न तु न्यूनाधिकाः 'दृष्टान्ता' उदाहरणानि 'उरभ्रीये' उरभ्रीयनाम्न्यध्ययन इति गाथार्थः ॥ सम्प्रति यदर्थसाधर्म्यादुरभ्रस्य दृष्टान्तता तदुपदर्शनायाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. [२४८] आरंभे रसगिद्धी दुग्गतिगमणं च पच्चवाओ य।
उवमा कया उरब्भे उरब्भिज्जस्स निज्जुत्ती ॥

वृ. आरम्भणं आरम्भः-पृथिव्याद्युपमर्दः, रसेषु-मधुरादिषु गृद्धिः-अभिकाङ्क्षा रसगृद्धिः, दुर्गतिगमनं च-नरकतिर्यगादिषु च पर्यटनं, प्रत्यपायश्चेहैव शिरश्छेदादिः, वक्ष्यति हि "सिरं छेत्तूण भुज्जति' त्ति शिरश्छेदादार्तरौद्रोपगतस्य दुर्गतिपाते दुःखानुभवनादिरुपमा-साद्दश्योप-दर्शनरूपा, प्रक्रमादेभिरेवारम्भादिभिरथैः 'कृता' विहिता 'उरभ्रे' उरभ्रविषया, इदमुक्तं भवति-साम्प्रतेक्षिणो हि विषयामिषगृध्नवस्तांस्तानारम्भानारभन्ते, आरभ्य चोपचितकर्म्मभिः कालशौकरिकादिवदिहैव दुःखमुपलभ्य नरकादिकां कुगतिमाप्नुवन्तीत्युरभ्रोदाहरणता इहोपदर्श्यते, काकिण्यादिसाधर्म्मदृष्टान्तोपलक्षणं चैतद्, 'उरभ्रीयस्य निर्युक्ति'रिति निगमनमेत-दिति गाथार्थः ॥ इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिपेक्षावसरः, स च सूत्रे सति भवतीत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (१७९) *जहाऽऽएसं समुद्दिस्स, कोइ पोसेज्ज एलयं।*
ओयणं जवसं देज्जा, पोसेज्जावि संयगणे ॥

वृ. 'यथे'त्युदाहरणोपन्यासे, आदिश्यते-आज्ञाप्यते विविधव्यापारेषु परिजनोऽस्मिन्नायात इत्यादेशः-अभ्यर्हितः प्राहुणकस्तं 'समुद्दिश्य' आश्रित्य यथाऽसौ समेष्यति समागतश्चैनं भोक्ष्यत इति 'कश्चित्' परलोकापायनिरपेक्षः 'पोषयेत्' पुष्टं कुर्यात् 'एलकम्' ऊरणकं, कथमित्याह-'ओदनं' भक्तं, तद्योग्यशेषान्नोपलक्षणमेतत्, 'यवसं' मुद्गमाषादि 'दद्यात्' तदग्रतो ढौकयेत्, तत एव पोषयेत्, पुनर्वचनमादरख्यापनाय, अपिः सम्भावने, सम्भाव्यत एवैवंविधः कोऽपि गुरुकर्मेति, 'स्वकाङ्गणे' स्वकीयगृहाङ्गणे, अन्यत्र नियुक्तकाः कदाचिन्नौदनादि दास्यन्तीति स्वकाङ्गण इत्युक्तं, यदि वा 'पोसेज्जा विसयंगणे'त्ति विशन्त्यस्मिन् विषयो-गृहं तस्याङ्गणं विषयाङ्गणं तस्मिन्, अथवा विषयं-रसलक्षणं वचनव्यत्ययाद् विषयान्वा गणयन्-संप्रधारयन् धर्मनिरपेक्ष इति भावः, इहोदाहरणं सम्प्रदायादवसेयं, जहेगो ऊरणगो पाहुणयणिमित्तं पोसि-ज्जति, सो पीणियसरीरो सुण्हातो हलिद्दादिकयंगरागो कयकण्णचूलतो कुमारगा य तं नाणाविहेहिं कीलाविसेसेहिं कीलावेंति, तं च वच्छगो एवं लालिज्जमाणं दट्ठूण माऊए नेहेण य गोवियं दोहएण य तयणुकंपाए मुक्कमवि खीरं न पिबति रोसेणं, ताए पुच्छिओ भणति-अम्मो! एस नंदियगो सव्वेहिं एएहिं अम्हसामिसालेहिं अड्ढेहिं जवसजोगासणेहिं तदुवओगेहिं च अलंकारविसेसेहिं अलंकारितो पुत्त इव परिपालिज्जति, अहं तु मंदभग्गो सुक्काणि तणाणि काहेवि लभामि, ताणिवि न पज्जत्तगाणि, एवं पाणियंपि, न य मं कोऽवि लालेति। ताए भण्णत्ति-पुत्त!

नि. [२४९] आउरचिन्नाइं एयाइं, जाइं चरइ नंदिओ।
सुक्कत्तणेहिं लाढाहि, एयं दीहाउलक्खणं ॥

वृ. जहा आउरो मरिउकामो जं मग्गति पत्थं वा अपत्थं वा तं दिज्जति से, एवं सो नंदितो मारिज्जिहिति जदा तदा पेच्छिहिसि, इति सूत्रार्थः ॥ ततोऽसौ कीद्दशो जातः ? किं च कुरुते ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१८०) *तओ स पुट्ठे परिव्वूढे, जायमेदे महोयरे।*
पीणीए विपुले देहे, आदेसं परिकंखए॥

वृ. 'तत' इत्योदनादिदानाद्धेतौ पञ्चमी, 'स' इत्युरभ्रः 'पुष्ट' उपचितमांसतया पुष्टिभाक् 'परिवृढः' प्रभुः समर्थ इतियावत् 'जातभेदा' उपचितचतुर्थधातुः अत एव 'महोदरः' बृहज्जठरः 'प्रीणितः' तर्प्पितः, यथासमयमुपढौकिताहारत्वात्, एभिरेव च हेतुभिः 'विपुले' विशाले 'देहे' शरीरे सति "यस्य च भावेन भावलक्षण"मिति सप्तमी, किमित्याह-आदेशं 'प्रतिकाङ्क्षति' प्रतिपालयति, पाठान्तरतः 'परिकाङ्क्षति' इच्छति, न चास्य तत्त्वतः प्रतिपालनमिच्छा वा सम्भवति, अतः प्रतिकाङ्क्षतीव प्रतिकाङ्क्षतीत्युपमार्थोऽवगन्तव्यः, एवं परिकाङ्क्षतीत्यत्रापि, इति सूत्रार्थः ॥ स किमेवं चिरस्थायी स्यादित्याह-

मू. (१८१) *जाव न एज्जति आएसो, ताव जीवति सेऽदुही।*
अह पत्तंमि आएसे, सीसं छेत्तूण भुज्जति॥

वृ. 'यावदि'ति कालावधारणे 'नेति' नायाति, कोऽसौ ?-आदेशः, तावत् नोत्तरकालं 'जीवति' प्राणान् धारयति, 'सेऽदुहि'त्ति अकारप्रश्लेषात् स इत्युरभ्रोऽदुःखी सुखी सन्, अथवा वध्यमण्डनमिवास्यौदनदानादिनीति तत्त्वतो दुःखितैवास्येति दुःखी, 'अह पत्तंमि आएसे' अथानन्तरं 'प्राप्ते' आगते आदेशे श्रिता अस्मिन् प्राणा इति शिरः तच्छित्त्वा-द्विधा विधाय भुज्यते, तेनैव स्वामिना प्राहुणकसहितेनेति शेषः।

सम्प्रति सम्प्रदायशेषमनुस्रियते-ततो सो वच्छगो तं नंदियगं पाहुणगेसु आगएसु वधिज्जमाणं दट्ठुं तिसितोऽवि भएणं माऊण थणं नाभिलसति, ताए भण्णति-किं पुत्त ! भयभीतोऽसि ?, नेहेन पण्हुयंपि मं न पियसि, तेन भण्णइ-अम्म ! कतो मे थणाभिलासो ?, ननु सो वरातो नंदितो अज्ज केहिवि पाहुणएहिं आगएहिं ममं अग्गतो विनिग्गयजीवो विलोलनयणो विस्सरं रसंतो अत्ताणो असरणो मारितो, तब्भयातो कतो मे पाउमिच्छा ?, ततो ताए भण्णत्ति-पुत्त ! ननु तदा चेव ते कहियं, जहा-आउरचिन्नाइं एयाइं०, एस तेसिं विवागो अनुपत्तो । एस दिट्ठंतो इति सूत्रार्थः ॥ इत्थं दृष्टान्तमभिधाय तमेवानुवदन् दार्ष्टान्तिकमाह-

मू. (१८२) *जहा खलु से ओरब्भे, आएसाए समीहिए।*
एवं बाले अहम्मिट्ठे, ईहति निरयाउयं॥

वृ. 'यथा' येन प्रकारेण 'खलु' निश्चयेन 'स' इति प्रागुक्तस्वरूप उरभ्रः 'आदेशाय' आदेशार्थं 'समीहितः' कल्पितः सन् यथाऽयमस्मै भवितेत्यादेशं पारिकाङ्क्षति इत्यनुवर्तते, 'एवम्' अमुनैव न्यायेन 'बालः' अज्ञोऽधर्मो-धर्मविपक्षः पापमितियावत् स इष्टः-अभिलषितोऽस्येत्यधर्मिष्ठः, आहिताग्न्यादेराकृतिगणत्वादिष्टशब्दस्य परनिपातः, यद्वाऽधर्म्मगुणयोगादधर्मोऽतिशयेनाधर्मोऽधर्मिष्ठः ईहत इवेहते वाञ्छतीव तदनुकूलचारितया, किं तत् ?-'नरकायुष्कं' नरकजीवितमिति सूत्रार्थः ॥ उक्तमेवार्थं प्रपञ्चयितुमाह-

मू. (१८३) *हिंसे बाले मुसावाई, अद्धाणंमि विलोवए।*
अन्नदत्तहरे तेने, माई कन्हुहरे सढे॥

वृ. हिनस्तीत्येवंशीलो हिंस्रः-स्वभावत एव प्राणव्यपरोपणकृत् 'बालः' अज्ञः, पाठान्तरश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रुध्यति-हेतुमन्तरेणापि कुप्यतीत्येवंधर्मा क्रोधी, मृषा-अलीकं वदति-प्रतिपादयतीत्येवंशीलो मृषावादी, 'अध्वनि' मार्गे 'विलुम्पति' मुष्णातीति विलोपकः, यः पथि गच्छतो जनान् सर्वस्वहरणतो लुण्टति, 'अन्नदत्तहरि'त्ति अन्येभ्यो दत्तं-राजादिना वितीर्णं हरति अपान्तराल एवाच्छिनत्त्यदत्तहरः, अन्यैर्वाऽदत्तम्-अनिसृष्टं हरति-आदत्ते अन्यादत्तहरः-ग्रामनगरादिषु चौर्यकृत्, अत एव 'बालः' अज्ञः, विस्मरणशीलस्मरणार्थमेतदिति न पौनरुक्त्यं, सर्वावस्थासु वा बालत्वख्यापनार्थं, पाठान्तरश्च 'स्तेनः' स्तैन्येनैवोपकल्पितात्मवृत्तिः, यद्वा-अन्यादत्तहरः अन्यादत्तं ग्रन्थिच्छेदादिनोपायेनापहरति स्तेनः क्षत्रादिखननेनेति विशेषो, 'मायी' वञ्चनैकचित्तः, 'कण्हुहरः' कण्हु कस्यार्थं हरिष्यामि त्येवमध्यवसायी 'शठः' वक्राचारः।

मू. (१८४) *इत्थीविसयगिद्धे य, महारंभपरिग्गहे।*
भुंजमाणे सुरं मंसं, परिवूढे परंदमे॥

वृ. तथा स्त्रियश्च विषयाश्च स्त्रीविषयाः तेषु गृद्धः-अभिकाङ्क्षावान् स्त्रीविषयगृद्धः, चः प्राग्वत्, महान्-अपरिमितः आरम्भः-अनेकजन्तूपघातकृद्व्यापारः परिग्रहश्च-धान्यादिसञ्चयो यस्य स तथोक्तः, 'भुञ्जानः' अभ्यवहरन्, 'सुरां' मदिरां, 'मांसं' पिशितं, 'परिवूढे'त्ति परिवृढः प्रभुरुपचितमांसशोणिततया तत्क्रियासमर्थ इतियावत्, अत एव परान्-अन्यान् दमयति-यत्कृत्याभिमतकृत्येषु प्रवर्तयतीति परन्दमः,

मू. (१८५) *अयकक्कर भोई य, तुंदिले चिय लोहिए।*
आउयं नरए कंखे, जहाऽऽएसं व एलए॥

वृ. किंच-अजः- छागस्तस्य कर्करं-यच्चनकवदक्ष्यमाणं कर्करायते तच्चेह प्रस्तावान्मेदोदन्तुरमतिपक्वं वा मांसं तद्भोजी वा, अत एव 'तुन्दिलः' जातबृहज्जठरः, चितम्-उपचयप्राप्तं लोहितं-शोणितमस्येति चितलोहितः, शेषधातूपलक्षणमेतत्, 'आयुः' जीवितं, 'नरके' सीमन्तकादौ काङ्क्षति तद्योग्यकर्म्मारम्भितया, कमिव क इव ? इत्याह-'जहाएसं व एडए'त्ति आदेशमिव यथैडकः-उक्तरूपः। इह च 'हिंसे' इत्यादिना सार्धश्लोकेनारम्भ उक्तः, 'भुंजमाणे सुर'मित्यादिना चार्धद्वयेन रसगृद्धिः, 'आयुष्क'मित्यादिना चार्धेन दुर्गतिगमनं, तत्प्रतिपादनाच्चार्थतः प्रत्यपायाभिधानमिति सूत्रत्रयार्थः। इदानीं यदुक्तम् 'आयुर्नरके काङ्क्षती'ति, तदनन्तरमसौ किं कुरुत इत्याह-यद्वा साक्षादैहिकापायदर्शनायाह-

मू. (१८६) *आसनं सयनं जाणं, वित्ते कामाणि भुंजिया।*
दुस्साहडं धनं हिच्चा, बहुं संचिणिया रयं॥

वृ. आसनं शयनं यानमिति प्राग्वत्, नवरं भुक्त्वेति सम्बन्धनीयं, 'वित्ते'त्ति वित्तं द्रव्यं, 'कामान्' मनोज्ञशब्दादीन् 'भुक्त्वा' उपभुज्य, दुःखेनात्मनः परेषां च दुःखकरणेन सुष्ठु-आदरातिशयेनाहृतम्-उपार्जितं दुःखाहृतं, यद्वा प्राकृतत्वात् दुःखेन संह्रियते-मील्यते स्मेति दुःसंहृतं 'धनं' द्रव्यं 'हित्वा' आसनाद्युपभोगेन द्यूताद्यसद्व्ययेन च त्यक्त्वा, तथा च मिथ्यात्वादिकर्मबन्धुहेतुसम्भवाद् 'बहु' प्रभूतं 'सञ्चित्य' उपार्ज्य 'रजः' अष्टप्रकारं कर्म।

मू. (१८७) *ततो कम्मगुरू जंतू, पच्चुप्पन्नपरायणे।*
अएव्व आगया कंखे, मरणंतंमि सोयति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'ततो'त्ति ततो रजःसञ्चयात् तको वा सञ्चितरजाः, कर्म्मणा गुरुरिव गुरुः अधोनरकगामितया कर्म्मगुरुः, 'जन्तुः' प्राणी 'प्रत्युत्पन्नं' वर्त्तमानंतस्मिन्परायणः-तन्निष्ठः प्रत्युत्पन्नपरायणः, 'एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः 'इति नास्तिकमतानुसारितया परलोकनिरपेक्ष इतियावत्, 'अएव्व'त्ति अजः-पशुः, स चेह प्रक्रामादुरभ्रस्तद्वत् 'आगयाएसे'त्ति प्राकृतत्वादागते-प्राप्ते आदेशे-प्राहुणके, एतेन प्रपञ्चितज्ञविनेयानुग्रहयोक्तमेवोरभ्रदृष्टान्तं स्मारयति, किमित्याह-'मरणान्ते' प्राणपरित्यागात्मनि, अवसाने शोचति, किमुक्तं भवति ?-यथाऽऽदेशे आगते उरभ्र उक्तनीत्या शोचति, तथाऽयमपि धिङ्मां विषयव्यामोहत उपार्जितगुरुकर्माणं, हा! क्वेदानीं मया गन्तव्यभित्यादिप्रलापतः खिद्यते, अत्यन्तनास्तिकस्यापि प्रायस्तदा शोकसम्भवादिति सूत्रद्वयार्थः ॥ अनेनैहिकापाय उक्तः, सम्प्रति पारभविकमाह-

मू. (१८८) *तओ आउ परिक्खीणे, चुतदेहा विहिंसगा।*
आसुरियं दिसं बाला, गच्छंति अवसा तमं॥

वृ. 'ततः' शोभनानन्तरं 'तको वा' उपार्जितगुरुकर्म्मा 'आउ'त्ति आयुषि तद्भवसम्बन्धिनि जीविते 'परिक्षीणे' सर्वथा क्षयं गते, कदाचिदायुःक्षयस्याऽऽवीचिमरणेन प्रागपि सम्भवादेवमुच्यते, 'च्युतः' भ्रष्टो 'देहात्' शरीरात्, पाठान्तरतस्तु 'च्युतदेहो' अपगतेहत्यशरीरः 'विहिंसकः' विविधप्रकारैः प्राणिघातकः, 'आसुरियं'ति अविद्यमानसूर्याम्, उपलक्षणत्वाद्ग्रहनक्षत्रवरिहितां च, दिश्यते नारकादित्वेनास्यां संसारीति दिक् ताम्, अर्थात् भावदिशम्, अथवा रौद्रकर्मकारी सर्वोऽप्यसुर उच्यते, ततश्चासुराणामियमासुरी या तामासुरीयां दिशं, नरकगतिमित्यर्थः, 'बालः' अज्ञो गच्छति-याति 'अवशः' कर्म्मपरवशो, वचनव्यत्ययाच्च सर्वत्र बहुवचननिर्देशो व्याप्तिख्यापनार्थो वा, यथा नैक एवंविधः किन्तु बहव इति, 'तमं'ति तमोयुक्तत्वात् तमः, देवगतेरप्यसूर्यत्वसम्भवात् तद्व्यवच्छेदाय दिशो विशेषणं, ततोऽर्थान्नरकगतिम्, उक्तं हि-"निच्चंधयारतमसा ववगयगहचंदसूरणक्खत्ता" इत्यादिस्वरूपख्यापकं वा द्वितीयं व्याख्यानमिति।

मू. (१८९) *जहा कागिणीए हेउं, सहस्सं हारए नरो।*
अपत्थं अंबगं भोच्चा, राया रज्जं तु हारए॥

वृ. 'यथा' इत्युदाहरणोपन्यासार्थः, 'काकिण्याः' उक्तरूपायाः 'हेउ'ति हेतोः कारणात् 'सहस्रं' दशशतात्मकं, कार्षापणानामिति गम्यते, 'हारयेत्' नाशयेत् 'नरः' पुरुषः। अत्रोदाहरण-

एगो दमगो, तेन वित्तिं करेंतेन सहस्सं काहावणाण अज्जियं, सो य तं गहाय सत्थेण समं सगिहं पत्थितो, तेन भत्तणिमित्तं रूवगो भिंदियव्वो होहित्ति नउलगं एगत्थ गोवेउं कागिणीनिमित्तं नियत्तो, सावि कागिणी अन्नेण हडा, सोऽपि नउलतो अन्नेण दिट्ठो ठविज्जंतो, सोविं तं घेत्तूण नट्ठो, पच्छा सो घरं गतो सोयति। एस दिट्ठंतो,

तथा 'अपथ्यं' अहितम् 'आम्रकम्' आम्रफलं 'भुक्त्या' अभ्यवहृत्य 'राजा' इति नृपतिः 'राज्यं' पृथिवीपतित्वं, 'तुः' अवधारणे भिन्नक्रमश्च, तेन हारयेदेव, सम्भवत्येव अस्यापथ्यभोजिनो राज्यहरणमित्यक्षरार्थः। भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

जहा कस्सइ रन्नो अंबाजिण्णेण विसूइया जाया, सा तस्स वेज्जेहिं महता जत्तेण तिगिच्छिया, भणितो य-जदि पुणो अंबाणि खासि तो विनस्सति, तस्स य अतीव पीयाणि अंबाणि, तेन

सदेसे सव्वे अंबा उच्छादिया। अन्नया अस्सवाहणियाए निग्गतो सह अमच्चेण, अस्सेण अवहरिओ, अस्सो दूरं गंतूण परिस्संतो ठितो, एगंमि वणसंडे चूयच्छायाते अमच्चेण वारिज्ज-मानोऽवि निविट्ठो, तस्स य हेट्ठे अंबाणि पडियाणि, सो ताणि परामुसति, पच्छा अग्घाति, पच्छा चक्खिउं निद्धहति, अमच्चो वारेइ, पच्छा भक्खेउं मतो। इति सूत्रार्थः ॥

मू. (१९०) एवं मानुस्सगा कामा, देवकामाण अंतिए।
सहस्सगुणिया भुज्जो, आउं कामा य दिविव्या ॥

वृ. 'एवं' काकिण्याम्रकसदृशा मनुष्याणाममी मानुष्यकाः, गोत्रप्रत्ययान्तत्वात् "गोत्र-चरणाद्वुञि"ति वुञ 'कामाः' विषयाः, 'देवकामाना' देवसम्बन्धिनां विषयाणाम् 'अन्तिके' समीपे, अन्तिकोपादानं च दूरेऽनवधारणमपि स्यादिति, किमित्येवम्?, अत आह-'सहस्र-गुणिताः' सहस्रैस्ताडिता 'भूयः' अतिशयेन बहु, बहून् वारानित्यर्थः, मनुष्यायुःकामापेक्षयेति प्रक्रमः, अनेनैषामतिभूयस्त्वं सूचयन् कार्षापणसहस्रराज्यतुल्यतामाह, 'आयुः' जीवितं, कामाश्च-शब्दादयः, 'दिव्विय'त्ति दिवि भवा दिव्याः "द्युप्रागपागुदक्प्रतीचो यदि"ति यत्, त एव दिव्यकाः, इह चादौ 'देवकामाण अंतिए'त्ति काममात्रोपादानेऽपि 'आउं कामा य दिव्विय'त्ति आयुषोऽप्युपादानं तत्रत्यप्रभावादीनामपि तदपेक्षयैवंविधत्वख्यापनार्थं, यद्वा 'सूचनात् सूत्र'मिति पूर्वत्राप्यायुषः सूचितत्वाददोष इति सूत्रार्थः ॥

मू. (१९१) अनेगवासानउया, जा सा पन्नवओ ठिई।
जाइं जीयंति दुम्मेहा, जाण वाससयाउए ॥

वृ. अनेकानि-बहूनि तानि चेहासङ्ख्येयानि वर्षाणी-वत्सराणि तेषां नयुतानि-सङ्ख्याविशे-षाणि वर्षनयुतान्यनेकानि च तानि वर्षनयुतानि च अनेकवर्षनयुतानि "स्वरोऽन्योऽन्यस्य" इति प्राकृतलक्षणात् सकाराकादीर्घत्वम्, एवमन्यत्रापि स्वरान्यत्वं भावनीयं, यदिवाऽनेकानि वर्षनयुतानि येषु तान्यनेकवर्षनयुतानि, उभयत्रार्थात् पल्योपमसागरोपमाणीतियावत्, नयुतान-यनोपायस्त्वयम्-चतुरशीतिवर्षलक्षाः पूर्वाङ्गं, तच्च पूर्वाङ्गेन गुणितं पूर्वं, पूर्वं चतुरशीतिलक्षा-हतं नयुताङ्गं, नयुताङ्गमपि चतुरशीतिलक्षाभिताडितं नयुतं, कैवमुच्यत इत्याह-

'या से'ति प्रज्ञापकः शिष्यान् प्रत्येवमाह-या सा भवतामस्माकं च प्रतीता, प्रकर्षेण ज्ञायते वस्तु सतत्त्वमनयेति प्रज्ञा-हेयोपादेयविवेचिका बुद्धिः सा विद्यतेऽस्यासौ प्रज्ञावान्, 'अतिशायने मतुप्' अतिशयश्चास्या हेयोपादेययोः हानोपादाननिबन्धनत्वमिहाभिमतं ततश्च क्रियाया अप्याक्षिप्तत्वात्, यदिवा निश्चयनयमतेन क्रियारहिता प्रज्ञाऽप्यप्रज्ञैवेति प्रज्ञयैव क्रियाऽऽक्षिप्यते ततः प्रज्ञावान् ज्ञानक्रियावानित्युक्तं भवति, तस्य प्रज्ञावतः स्थीयंतेऽनयाऽर्थात् देवभव इति स्थितिः-देवायुः, अधिकृतत्वात् दिव्यकामाश्च, तानि च कीदृशीत्याह-यान्यनेकवर्षनयुतानि दिव्यस्थितेर्दिव्यकामानां च विषयभूतानि 'जीयन्ते' हार्यन्ते, तद्धेतुभूतानुष्ठानानासेवनेनेति भावः, पाठान्तरतो 'हारयन्ति वा,' के ते?-दुष्टा विपर्ययादिदोषदुष्टत्वेन मेधा-वस्तुस्वरूपावधारण-शक्तिरेषां ते दुर्मेधसः, विषयैर्जिता जन्तव इति गम्यते, कदा पुनस्तानि दुर्मेधसो विषयैर्जीयन्त इत्याह-ऊने वर्षशतायुषि, अनेनायुषोऽल्पत्वात् मनुष्यकामानामप्यल्पतामाह, यदिवा प्रभूते ह्यायुषि प्रमादेनैकदा हारितान्यपि पुनर्जीयेरन्, अस्मिंस्तु संक्षिप्तायुष्येकदा हारितानि हारितान्येव,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवतश्च वीरस्य तीर्थे प्रायो न्यूनवर्षशतायुष एव जन्तव इतीत्थमुपन्यासः,

अयं चात्र भावार्थः-अल्पं मनुष्याणामायुर्विषयाश्चेति काकण्याम्रफलोपमाः, देवायुर्देवकामाश्चातिप्रभूततया कार्षापणसहस्रराज्यतुल्याः, ततो यथा द्रमको राजा च काकण्याम्रफलकृते कार्षापणसहस्रं राज्यं च हारितवान्, एवमेतेऽपि दुर्मेधसोऽल्पतरमनुष्यायुः कामार्थे प्रभुतान् देवायुःकामान् हारयन्तीति सूत्रार्थः ॥ सम्प्रति व्यवहारोदाहरणमाह-

मू. (१९२) *जहा य तिन्नि वणिया, मूलं धेत्तूण निग्गया।*
एगोऽत्थ लभते लाभं, एगो मूलेन आगओ ॥

वृ. 'यथा' इति प्राग्वत्, 'चः' प्रतिपादितदृष्टान्तापेक्षया समुच्चये, त्रयो 'वणिजः' प्रतीताः 'मूलं' राशिं नीविमितियावत् गृहीत्वा 'निर्गताः' स्वस्थानात्स्थानान्तरं प्रति प्रस्थिताः, प्राप्ताश्च समीहितं स्थानं, तत्र च गतानाम्, 'एको' वणिक्कलाकुशलः 'अत्र' एतेषु मध्ये 'लभते' प्राप्नोति 'लाभं' विशिष्टद्रव्योपचयलक्षणम्, 'एकः' तेष्वेवान्यतरो यस्तथा नातिनिपुणो नाप्यत्यन्तानिपुणः स 'मूलेणे'ति मूलधनेन यावत् गृहान्नीतं तावतैवोपलक्षितः 'आगतः' स्वस्थानं प्राप्त इति सूत्रार्थः ॥ तथा-

मू. (१९३) *एगो मूलंपि हारित्ता, आगओ तत्थ वाणिओ।*
ववहारे उवमा एसा, एवं धम्मे विजाणह ॥

वृ. 'एकः' अन्यतरः प्रमादपरो द्यूतमद्यादिष्वत्यन्तमासक्तचेताः 'मूलमपि' उक्तरूपं 'हारयित्वा' नाशयित्वा 'आगतः' प्राप्तः स्वस्थानमित्युपस्कारः, एवं सर्वत्रोदाहरणसूचायां सोपस्कारता द्रष्टव्या, 'तत्र' तेषु मध्ये वणिक् एव वाणिजः। अत्र च सम्प्रदायः-

जहा एगस्स वाणियगस्स तिन्नि पुत्ता, तेन तेसिं सहस्सं सहस्सं दिन्नं काहावनाणं, भणिया य-एएण ववहरिऊण एत्तिएण कालेन एज्जाह, ते तं मूलं घेत्तूण निग्गया सणगरातो, पिथप्पिथेसु पट्टणेसु ठिया, तत्थेगो भोयणच्छायणवज्जं जूयमज्जमंसवेसावसणविरहितो विहीए ववहरमाणो विपुललाभसमन्नितो जातो, वितितो पुण मूलमवि दव्वंतो लाभगं भोयणच्छायणमल्लालंकारादिसु उवभुंजति, न य अच्चादरेण ववहरति, ततितो न किंचि संववहरति, केवलं जूयमज्जमंसवेसगंधमल्लतंबोलसरीरकियासु अप्पेणेव कालेन तं दव्वं निट्ठवियंति, जहावहिकालस्स सपुरमागया। तत्थ जो छिन्नमूलो सो सव्वस्स असामी जातो, पेसए उवचरिज्जति, बितितो घरवावारे निउत्तो भत्तपानसंतुट्ठो न दायव्वभोत्तव्वेसु ववसायति, ततितो घरवित्थरस्स सामी जातो। केति पुन कहंति-तिन्नि वाणियगा पत्तेयं २ ववहरंति, तत्थेगो छिन्नमूलो पेसत्तमुवगतो, केण वा संववहारं करेउ ?, अच्छिन्नमूलो पुणरवि वाणिज्जाए भवति, इयरो बंधुसहितो मोदए, एस दिट्ठंतो।

सम्प्रति सूत्रमनुस्त्रियते-'व्यवहारे' व्यवहारविषया 'उपमा' सादृश्यं 'एषा' अनन्तरोक्ता 'एवं' वक्ष्यमाणन्यायेन 'धर्मे' धर्मविषयामेवोपमां 'विजानीत' अवबुध्यध्वमिति सूत्रार्थः ॥

मू. (१९४) *मानुसुत्तं भवे मूलं, लाभो देवगई भवे।*
मूलच्छेएण जीवाणं, नरगतिरिक्खत्तणं धुवं ॥

वृ. 'मानुषत्वं' मनुजत्वं 'भवेत्' स्यात् मूलमिव मूलं, स्वर्गापवर्गात्मकतदुत्तरोत्तरला-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भहेतुतया, तथा लाभ इव लाभः मनुजगत्यपेक्षया विषयसुखादिभिर्विशिष्टत्वात्, 'देवगतिः' देवत्वावाप्तिर्भवेत्, एवं च स्थिते किमित्याह-'मूलच्छेदेन' मानुषत्वगतिहान्यात्मकेन 'जीवानां' प्राणीनां 'नरकतिर्यक्त्वं' नरक्त्वं तिर्यक्त्वं च तद्गत्यात्मकं 'ध्रुवं' निश्चितम्, इहापि सम्प्रदायः- तिन्नि संसारिणो सत्ता मानुस्सेसु आयाता, तत्थेगो मद्दवज्जवादिगुणसंपन्नो मज्झिमारंभपरिग्गहजुत्तो कालं काऊण काहावणसहस्समूलत्थाणीयं तमेव मानुस्सत्तं पडिलहति, बितितो पुन सम्मद्दंसणचरित्तगुणसुपरिट्ठितो सरागसंजमेण लद्धलाभवणिय इव देवेसु उववन्नो, ततितो पुन हिंसे बाले मुसावाती इच्चेतेहिं पुव्वभणितेहिं सावज्जजोगेहिं वट्टिउं छिन्नमूलवणिय इव नारगेसु तिरिएसु वा उववज्जतित्ति सूत्रार्थः ॥ यथा मूलच्छेदेन नरकतिर्यक्त्वप्राप्तिः तथा आह-

मू. (१९५) *दुहओ गति बालस्स, आवती वहमूलिया ।*
देवत्तं मानुसत्तं च, जं जिए लोलुआसढे ॥

वृ. 'दुहतो'त्ति द्विधा द्विप्रकारा, गम्यत इति गतिः, सा चेह प्रक्रमान्नरकगतिस्तिर्यग्गतिश्च, कस्येत्याह-'बालस्य' द्वाभ्यां रागद्वेषाभ्यामाकुलितस्य, 'आवइ'त्ति आगच्छत्यापतति वधः- प्राणिघातः, उपलक्षणत्वान्महारम्भमहापरिग्रहानृतभाषणमायादयश्च मूलं-कारणं यस्याः सा वधमूलिका, यदिवा-द्विधा गतिर्बालस्य, भवतीति गम्यते, तत्र च गतस्य 'आवइ'त्ति आपत्, सा च कीदृशीत्याह-वधो-विनाशस्ताडनं वा मूलम्-आदिर्यस्याः सा वधमूलिका, वधग्रहणाच्छेदभेदातिभारारोपणादिपरिग्रहः, लभन्ते हि प्राणिनो नरकतिर्यक्षु विविधा वधाद्यापदः, किमित्येवम् ?, अत आह-

'देवत्वं' देवभयं 'मानुष्त्वं' मनुजभवं 'यद्' यस्मात् 'जितो' हारितो 'लोलयासढे'त्ति लोलतापिशितादिलाम्पट्यं तद्योगाज्जन्तुरपि तन्मयत्वख्यापनार्थं लोलतेत्युक्तः, शाठ्ययोगाच्छठः-विश्वस्तजनवञ्चकः, ततो लोलता चासौ शठश्च लोलताशठः, इह च लोलता पञ्चेन्द्रियवधाद्युपलक्षणं, तथा च नरकहेतुत्वाभिधानमेतत्, यदुक्तम्-"महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचेंदियवहेणं जीवा नेरयाउयं नियच्छंति" शठ इत्यनेन तु शाठ्यमुक्तं, तच्च तिर्यग्गतिहेतुः, उक्तं च-"माया तैर्यग्योनस्ये" ति, अतश्चायमाशयः-यतोऽयं बालो लोलताशठः ततो नरकगतितिर्यग्गतिनिबन्धनाभ्यां लोलताशठत्वाभ्यां देवत्वमनुजत्वे हारितस्यास्योक्तरूपा द्विविधैव गतिः सम्भवति, एवं च मूलच्छेदेन जीवानां नरकतिर्यक्त्वमुच्यते, मूलं हि मनुष्यत्वं लाभश्च देवत्वम्, उभयोरपि तयोर्हारणादिति सूत्रार्थः ॥ पुनर्मूलच्छेदमेव समर्थयितुमाह-

मू. (१९६) *ततो जिए सई होइ, दुविहं दुग्गतिं गते ।*
दुल्लहा तस्स उम्मज्जा, अद्धाए सुचिरादवि ॥

वृ. 'ततः' देवत्वमानुषत्वजयनात् तको वा बालः 'जिय'त्ति व्यच्छेदफलत्वाद्वाक्यस्य जित एव 'सति'त्ति सदा भवति 'द्विविधां' नारकतिर्यग्भेदां, दुर्निन्दायां, दुष्टा-निन्दिता गतिर्दुर्गतिस्तां 'गतः' प्राप्तः, सदाजितत्वमेवाभिव्यनक्ति-'दुर्ल्लभाः' दुष्प्रापाः 'तस्ये'ति देवमनुजत्वे हारितवतो बालस्य 'उम्मज्ज'त्ति सूत्रत्वादुन्मज्जनुमुन्मज्जा-नरकतिर्यग्गतिनिर्गमनात्मिका, स्यादेतत्-चिरतरकालेनोन्मज्जाऽस्य भविष्यति, अत आह-'अद्धाया' काले अर्थादागामिन्यां, किं स्वल्पायामेव ?, इत्याह-सुचिरादपीत्यद्धाशब्देनैव कालाभिधानात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुचिराच्छब्दः प्रभूतत्वमेवाह, ततोऽयमर्थः-अनागताद्धायां प्रभुतायामपि, बाहुल्याच्चेत्थ-मुक्तम्, अन्यथा हि केचिदेकभवेनैव तत उद्धृत्य मुक्तिमप्याप्नुवन्त्येवेति सूत्रार्थः ॥ इत्थं पश्चानुपूर्व्यपि व्याख्याङ्गमिति पश्चादुक्तेऽपि मूलहारिण्युपनयमुपदर्श्य मूलप्रवेशिन्यभिधातु-माह-'यद्वा विपक्षापायपरिज्ञानतयैवोपादये प्रवृत्तिरिति पश्चादुक्तमपि मूलहारिणमादावुप-दर्श्यैतदाह-

मू. (११७) *एवं जियं सपेहाए, तुलिया बालं च पंडियं।*
मूलियं ते पविस्संति, मानुसं जोणिमिंति ॥

वृ. 'एवम्' उक्तनीत्या 'जिए'त्ति सुब्व्यत्ययाज्जितं लोलतया शाठ्येन च देवमनुजत्वे हारितं बालमिति प्रक्रमः, 'सपेहाए'त्ति सम्प्रेक्ष्य सम्यगालोच्य, तथा तोलयित्वेव तोलयित्वा-गुणदोषत्तया परिभाव्य, यदिवैवं जितं सम्यग्-अविपरीता प्रेक्षा-बुद्धिः सम्प्रेक्षा तया तोलयित्वा, कम्?-'बालं' चस्य भिन्नक्रमत्वात् 'पण्डितं च' तद्विपरीतम्, अथवा मनुष्यदेवगतिगामिनम्, इह च द्वितीयव्याख्यायामेवं जितमिति बालस्य विशेषणं, न पण्डितस्य, असम्भवात्, तथा च सति मूले भवं मौलिकं-मौलधनं ते प्रवेशयन्तीव प्रवेशयन्ति, मूलप्रवेशवणिक्सद्दशास्त इत्यभिप्रायः, ये किमित्याह-'मानुस्सं'ति मनुष्याणामियं मानुषी तां 'योनिम्' उत्पत्तिस्थानम् 'आयान्ति' आगच्छन्ति, बालत्वपरिहारेण पण्डितत्वमासेवमाना ये त इति सूत्रार्थः ॥

मू. (११८) *वेमायाहिं सिक्खाहिं, जे नरा गिहि सुव्वया।*
उविंचि मानुसं जोणीं, कम्मसच्चा हु पाणिणो ॥

वृ. विविधा मात्रा-परिमाणमासां विमात्राः-विचित्रपरिमाणाः ताभिः परिमाणविशेषमाश्रित्य विसद्दशीभिः, 'शिक्षाभिः' प्रकृतिभद्रकत्वाद्यसरूपाभिः, उक्तं हि-"चउहिं ठाणेहिं जीवा मनुयाउं बंधंति, तंजहा-पगतिभद्दवाए पगतिविनीययाए सानुक्कोसयाए अमच्छरिया"त्ति 'ये' इत्यविवक्षितविशेषाः 'नराः' पुरुषाः 'गृहिणश्च' ते गृहस्थाः 'सुव्रताश्च' धृतसत्पुरुषव्रताः, ते हि प्रकृतिभद्रकत्वाद्यभ्यासानुभावत एव न विपद्यपि विपीदन्ति सदाचारं धा नावधीरयन्तीत्या-दिगुणान्विताः, इदमेय च सतां व्रतं, लौकिका अप्याहुः-

"विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां, प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः, सतां केनोद्दिष्टं विषमसिधाराव्रतमिदम्? ॥"

आगमविहितव्रतधारणं त्वमीषामसम्भवि, देवगतिहेतुतयैव तदभिधानात्, त ईद्दशाः किमित्याह-उपयन्ति 'मानुसं'ति मानुषीं-मानुषसम्बन्धिनीं 'योनिम्' उक्तरूपां कर्म्मणा-मनोवाक्कायक्रियालक्षणेन सत्या-अविसंवादिनाः कर्म्मसत्याः, 'हुः' अवधारणे, ततः कर्म्म-सत्याः एव सन्तः, तदसत्यतायास्तिर्यग्योनिहेतुत्वेनोक्तत्वात्, तथा च वाचकः-

"धूर्ता नैकृतिकाः स्तब्धा, लुब्धाः कार्पटिकाः शठाः।
विविधां ते प्रपद्यन्ते, तिर्यग्गोनिं दुरुत्तराम् ॥"

इत्यादि, पाठान्तरतश्च 'कर्मसु' अर्थान्मनुष्यगतियोग्यक्रियारूपेषु सक्ता-अभिष्वङ्गवन्तः कर्मसक्ताः प्राणिनः-जीवाः, इह च नरग्रहणेऽपि प्राणिग्रहणं देवादिपरिग्रहार्थमिति न पुनरुक्तम्। यदिवा-विमात्रादिभिः शिक्षाभिर्ये नरा गृहिसुव्रताः यत्तदोर्नित्याभिसम्बन्धात् ते मानुषीं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योनिमुपयान्ति, किमित्येवम् ?, अत आह-'कम्मसच्चा हुपाणिणो'त्ति हुशब्दो यस्मादर्थे, यस्मात् सत्यानि-अवन्ध्यफलानि कर्म्माणि-ज्ञानावरणादीनि येषां ते सत्यकर्म्माणः प्राणिनः, निरुपक्रमकर्म्मापेक्षं चैतदिति सूत्रार्थः ॥ सम्प्रति लब्धलाभोपनयमाह-

मू. (१९९) *जेसिं तु विउला सिक्खा, मूलियंते अतिच्छिया।*
सीलवंता सविसेसा, अद्दीना जंति देवयं ॥

वृ. 'येषां तु' येषां पुनः 'विपुला' निःशङ्कितत्वादिसम्यक्त्वाचाराणुव्रतमहाव्रतादिविषयत्वेन विस्तीर्णा 'शिक्षा' ग्रहणासेवनात्मिका, अस्तीति गम्यते, मूले भवं मौलिकं-मूलधनमिव मानुषत्वं, त एवंविधाः, विउट्टियत्ति अतिट्टयत्ति अतिच्छियत्ति पाठत्रयेऽपि अतिक्रान्ताः-उल्लङ्घितवन्त इत्यर्थः, यद्वाऽतिक्रम्य-उल्लङ्घ्य, कीदृशाः सन्तः ? शीलं-सदाचारः अविरत-सम्यग्दृशां विरतिमतां तु देशसर्वविरमणात्मकं चारित्रं तद्विद्यते येषां ते शीलवन्तः, तथा सह विशेषेण-उत्तरोत्तरगुणप्रतिपत्तिलक्षणेन वर्त्तन्त इति सविशेषाः, अत एव 'अदीनाः' कथं वयम-मुत्र भविष्याम इति वैक्लव्यरहिताः परिषहोपसर्गादिसम्भवे वा न दैन्यभाज इत्यदीनाः 'यान्ति' प्राप्नुवन्ति, देवभावो देवता सैव दैवतं । ननु तत्त्वतो मुक्तिश्चेदानीं विशिष्टसंहननाभावतोऽ-भावाद्देवगतेश्च "छेवट्टेण उ गम्मइ चत्तारि उ जाव आदिमा कप्पा" इति वचनाच्छेदपरिवर्तिसंह-ननिनामिदानींतनानामपि सम्भवादेवमुक्तमिति सूत्रार्थः ॥ प्रस्तुतमेवार्थं निगमयन्नुपदेशमाह-

मू. (२००) *एवं अदीनवं भिक्खुं, अगारिं च विजाणिया।*
कहन्नु जिच्चमेलिक्खं, जिच्चमाणो न संविदे ॥

वृ. 'एवम्' अमुना न्यायेन लाभान्वितं 'अदीणव'न्ति दीक्तवतौ दीनवन्तं न तथाऽदीन-वन्तम्-अदीनं, दैन्यरहितमित्यर्थः 'भिक्षुं' यतिम् 'अगारिणं' च गृहस्थं 'विज्ञाय' विशेषेण तथाविधशिक्षावशादेवमनुजगामित्वलक्षणेन 'ज्ञात्वा' अवगम्य, यतमान इति शेषः, 'कथम्' ? केन प्रकारेण ?, न कथञ्चिदित्यर्थः, 'नुः' वितर्के, 'जिच्चं'ति सूत्रत्वात् जीयेत-हार्येत विवेकी, तत्प्रतिकूलैः, कषायोदयादिभिरिति गम्यते, 'ईदृक्षम्' अन्तरोक्तं देवगत्यात्मकं लाभं 'जिच्च-माणो'त्ति वाशब्दस्य गम्यमानत्वाज्जीयमानो वा-हार्यमाणः, तैरेव कषायादिभिः 'न संविदे'त्ति सूत्रत्वान्न संवित्ते-न जानीते यथाऽहमेभिर्जीये इति, कथं न्विततीहापि योज्यते, ततोऽयमर्थः-कथं नु न संवित्ते ?, संवित्त एव, जानीत एव ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च तन्निरोधं प्रति प्रवर्तत एव, इत्येवं च वदन् काक्वोपदिशति-यत एवं ततो यूयमप्येवं जानाना यथा न देवगति-लक्षणं लाभं जीयेध्वं कषायादिभिस्तथा यतध्वं, कथञ्चिज्जीयमानाश्च सम्यग् विज्ञाय तत्प्रती-कारायैव प्रवर्तध्वमिति, यद्वा-एवमदीनवन्तं भिक्षुमगारिणं च विज्ञाय यतमानो 'जिच्चं'ति जीयतेहार्यते अतिरौद्रैरिन्द्रियादिभिः आत्मा तदिति ज्ञेयं, तच्चेह प्रक्रमान्मनुष्यदेवगतिलक्षणम्, 'एलिक्खं' ति सुब्व्यत्यया दीदृक्षोऽभिहितार्थाभिज्ञः कथं न जीयमानो न संवित्ते ?, अपि तु संवित्त एव, संविदानश्च यथा न जीयेत तथा यतेतेत्यभिप्रायः । अथवा-एवमदीनवन्तं भिक्षुमगा-रिणं च लब्धलाभं विज्ञाय यतमानः कथं नु 'जिच्चं'ति आर्षत्वाज्जीयते-हार्यते, विषयादिभिरिति गम्यते, ईदृशं देवगतिलक्षणं लाभमिति शेषः, अयमाशयो-यदि लभमाना न विज्ञातास्युर्लाभो वा न तथाविधस्तदा जयनमपि स्यात्, यदा तु लभमानौ भिक्ष्वगारिणौ दृश्येते लाभश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवत्वलक्षणः तदा कथमयं जानानाऽपि जन्तुर्जीयते ?, अत आह-जीयमानो न संवित्ते, किमुक्तं भवति ?-यद्यसौ जीयमानो जानीयात्तदा तदुपायपरतया न जीयेत, यदा त्वसौ विषयव्यामोहतो न जानीते तदा जीयत एवेति किमत्र चित्रम् ? इति सूत्रार्थः ॥ समुद्रदृष्टान्तमाह-

मू. (२०१) *जहा कुसग्गे उदयं, समुद्देण समं मिणे ।*
एवं मानुस्सगा कामा, देवकामान अंतिए ॥

वृ. 'यथा' इति दृष्टान्तोपन्यासे, कुशो-दर्भविशेषस्तस्याग्रं-कोटिः कुशाग्रं तस्मिन् 'उदकं' जलं, तत्किमित्याह-'समुद्रेण' इति 'तात्स्थ्यात्तद्व्यपदेश' इतिन्यायात् समुद्रजलेन 'समं' तुल्यं 'मिनुयात्' परिच्छिन्द्यात्, तथा किमित्याह-'एवम्' उक्तनीत्या 'मानुष्यकाः कामाः' मनुष्य-सम्बन्धिनः कामा-विषयाः, मानुष्यविशेषणं तु तेषामेवोपदेशार्हत्वाद्विशिष्टभोगसम्भवाच्च, 'देवकामानां' दिव्यभोगानाम् 'अन्तिके' समीपे, कृता इति शेषः, दूरस्थितानां हि न सम्यग-वधारणमित्येवमाह, किमुक्तं भवति ?-यथाऽज्ञः कश्चित् कुशाग्रस्थितं जलबिन्दुमालोक्य समुद्रवन्मन्यते, एवं मूढाश्चकवर्त्यादिमनुष्यकामान् दिव्यभोगोपमान् अध्यवस्यन्ति, तत्त्वतस्तु कुशाग्रजलविन्दोरिव समुद्रान्मनुष्यकामानां दिव्यभोगेभ्यो महदेवान्तरमिति सूत्रार्थः ॥

मू. (२०२) *कुसग्गमित्ता इमे कामा, सन्निरुद्धंमि आउए ।*
कस्स हेउं पुरा काउं, जोगक्खेमं न संविदे ? ॥

वृ. कुशाग्रशब्देन कुशाग्रस्थितो जलबिन्दुरुपलक्ष्यते, तन्मात्राः-तत्परिमाणाः 'इमे'इति प्रत्यक्षाः 'कामाः' प्रकृतत्वान्मुष्यविषयाः, कदा य इत्याह-'सन्निरुद्धे' अत्यन्तसंक्षिप्ते, यद्वा सम्-एकीभावेन निरुद्धे-अध्यवसानादिभिरुपक्रमणकारणैवष्टब्धे 'आयुषि'जीविते, अनेन मनुष्यायुषोऽल्पतया सोपक्रमतया वा कामानामल्पत्वमुक्तं, समृद्ध्याद्यल्पतोपलक्षणं चैतद्, अस्मिंस्त्वर्थ उक्ते दिव्यकामास्तु जलधिलतुल्या इत्यर्थाद्गम्यते, 'कस्स हेउं'ति सूत्रत्वात् कं हेतुं-कारणं 'पुरा काउं'ति तत एव पुरस्कृत-आश्रित्य, अलब्धस्य लाभो-योगो लब्धस्य च परिपालनं-क्षेमोऽनयोः समाहारो योगक्षेमं, कोऽर्थः ?-अप्राप्तविशिष्टधर्मप्राप्तिं प्राप्तस्य च परिपालनं 'न संवित्ते' न जानीते, जन इति शेषः, तदसंवित्तौ हि मनुष्यविषयाभिष्वङ्ग एव हेतुः, ते च धर्मप्राप्यदिव्यभोगापेक्षयैवंप्रायाः, ततस्तत्त्यागतो विषयाभिलाषिणापि धर्म्म एव यतितव्यमित्यभिप्रायः, यद्वा-यतः कुशाग्रमात्रा-दर्भप्रान्तवदत्यल्पा इमे कामाः, तेऽपि न पल्योपमादिपरिमितौ द्राघीयस्यायुषि, किन्तु 'सन्निरुद्धे' संक्षिप्ते आयुषि, ततः 'कस्स हेउं'ति कस्माद्धेतोः पुरस्कृत्येव पुरस्कृत्य मुख्यतयाऽङ्गीकृत्य, असंयममिति शेषः, 'योगक्षेमम्' उक्तरूपं न संवित्ते, भावार्थस्त्वभिहित एवेति सूत्रार्थः ।

इत्थं दृष्टान्तपञ्चकमुक्तं, तत्र च प्रथममुरभ्रदृष्टान्तेन भोगानामायतावपायबहुलत्वमभिहितम्, आयतौ चापायबहुलमपि यत्र तुच्छं न तत्परिहर्तुं शक्यत इति काकिण्याम्रफलदृष्टान्ततस्तुच्छत्वं, तुच्छमपि च लाभच्छेदात्मकव्यवहारविज्ञतयाऽऽयव्ययतोलनाकुशल एव हातुं शक्त इति वणिग्व्यवहारोदाहरणम्, आयव्ययतोलनाऽपि च कथं कर्तव्येति समुद्रदृष्टान्तः, तत्र हि दिव्यकामानां समुद्रजलोपमत्वमुक्तं, तथा च तदुपार्जनं महानायोऽनुपार्जन तु महान् व्यय इति तत्त्वतो दर्शितमेव भवति ॥ इह च योगक्षेमासंवेदने कामानिवृत्त एव भवतीति तस्य दोषमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.(२०३) इह कामानियट्टस्स, अत्तट्ठे अवरज्झति।
सुच्चा नेयाउअं मग्गं, जं भुज्जो परिभस्सति॥

वृ. 'इह'इति मनुष्यत्वे जिनशासने वा, प्राप्त इति शेषः, कामेभ्योऽनिवृत्तः-अनुपरतः कामानिवृत्तः तस्यात्मनोऽर्थ आत्मार्थः-अर्थ्यमानतया स्वर्गादिः 'अपराध्यति' अनेकार्थत्वाद्धातूनां नश्यति, यद्वा-आत्ममैवार्थ आत्मार्थः स एवापराध्यति, नान्यः कश्चिदात्मव्यतिरिक्तोऽर्थः सापराधो भवति, उभयत्र दुर्गतिगमनेनेति भावः। आह-विषयवाञ्छाविरोधिनि जिनागमे सति कथं कामानिवृत्तिसम्भवः ?, उच्यते, 'श्रुत्वा' आकर्ण्य 'नैयायिकं' न्यायोपपन्नं 'मार्गं' सम्यग्दर्शनादिकं मुक्तिपथं यद् 'भूयः' पुनरपि परिभ्रश्यति, कामानिवृत्तित इति शेषः, कोऽभिप्रायः ?-जिनागमश्रवणात् कामनिवृत्तिं प्रतिपन्नोऽपि गुरुकर्मत्वात् प्रतिपतति, ये तु श्रुत्वापि तदप्रतिपन्नाः श्रवणं च येषां नास्ति ते कामानिवृत्ति एवेतिभावः।

यद्वा-यदसौ कामानिवृत्तः सन् श्रुत्वा नैयायिकं मार्गं भूयः परिभ्रश्यति-मिथ्यात्वं गच्छति तदस्यात्मार्थ एव गुरुकर्मापराध्यति, अनेन मा भूत्कस्यचिन्मूढस्य सिद्धान्तमधीत्याप्युत्पथप्रस्थितान् विलोक्य सिद्धान्त एव दोष् इति तदनपराधित्वमुक्तं, पठ्यते च-'पत्तो नेयाउयं'ति स्पष्टमिति सूत्रार्थः॥ यस्तु कामेभ्यो निवृत्तस्तस्य गुणमाह-

मू.(२०४) इह कामा नियट्टस्स, अत्तट्ठे नावरज्झति।
पूतिदेहनिरोहेणं, भवे देवेत्ति मे सुयं॥

वृ. इह कामेभ्यो निवृत्तः कामनिवृत्तिः तस्यात्मार्थः-स्वर्गादिः 'नापराध्यति' न भ्रश्यति, आत्मलक्षणो वाऽर्थो न सापराधो भवति, किं पुनरेवं ?, यतः-पूतिः कुथितो देहः-अर्थादौदारिकं शरीरं तस्य निरोधः-अभावः पूतिदेहनिरोधः तेन 'भवेत्' स्यात्, प्रकृतत्वात् कामनिवृत्तो 'देवः' सौधर्म्मादिनिवासी सुरः, उपलक्षणत्वात् सिद्धो वा, 'इती'त्येतत् मया 'श्रुतम्' आकर्णितं, परमगुरुभ्य इति गम्यते, अनेन स्वर्गाद्यवाप्तिः आत्मार्थानपराधे निमित्तमुक्तमिति सूत्रार्थः॥

मू.(२०५) इड्ढी जुती जसो वन्नो, आउं सुहमनुत्तरे।
भुज्जो जत्थ मनुस्सेसुं, तत्थ से उववज्जति॥

वृ. 'ऋद्धिः' कनकादिसमुदायः 'द्युतिः' शरीरकान्तिः 'यशः' पराक्रमकृता प्रसिद्धिः 'वर्ण्णः' गाम्भीर्यादिगुणैः श्लाघा गौरादिर्वा 'आयुः' जीवितं 'सुखं' यथेप्सितं विषया वासावाल्हादः, न विद्यते उत्तरं-प्रधानमस्यादित्यनुत्तरम्, इदं च सर्वत्र योज्यते, 'भूयः' पुनः, देवभवापेक्षमेतत्, तत्रापि ह्यनुत्तराण्येवैतान्यस्य सम्भवन्ति 'यत्र' येषु 'मनुष्येषु' मनुजेषु 'तत्र' तेषु 'से' त्ति सोऽथशब्दार्थो वा, ततोऽनन्तरम् 'उत्पद्यते' जायत इति सूत्रार्थः एवं कामानिवृत्त्या यस्यात्मार्थोऽपराध्यति स बालः इतरस्तु पण्डित इत्यर्थादुक्तम्॥

मू.(२०६) बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिआ।
चिच्चा धम्मं अहम्मिट्ठे, नरएसूववज्जइ॥

वृ. 'बालस्य' अज्ञस्य 'पश्य' अवधारय 'बालत्वम्' अज्ञत्वं, किं तदित्याह-'अधर्मं' धर्मविपक्षं विषयासक्तिरूपं 'प्रतिपद्य' अभ्युपगम्य, पठ्यते च-'पडिवज्जिणो'त्ति प्रतिपादिनोऽवश्यंप्रतिपद्यमानस्य 'त्यक्त्वा' अपहाय 'धर्मं' विषयनिवृत्तिरूपं सदाचारं 'अहमिट्ठे'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राग्वत् 'नरके' सीमन्तकादावुपलक्षणत्वात् अन्यत्र वा दुर्गतावुत्पद्यते ॥

मू. (२०७) धीरस्स पस्स धीरत्तं, सव्वधम्मानुवत्तिणो।
चिच्चा अधम्मं धम्मिट्ठे, देवेसु उववज्जाइ ॥

वृ. तथा धीः बुद्धिस्तया राजत इति धीरः-धीमान् परीषहाद्यक्षोभ्यो वा धीरः तस्य 'पश्य' प्रेक्षस्य 'धीरत्वं' धीरभावं, सर्वं धर्मं क्षान्त्यादिरूपमनुवर्तते तदनुकूलाचारतया स्वीकुरुत इत्येवंशीलो यस्तस्य सर्वधर्मानुवर्तिनः, धीरत्वमेवाह-'त्यक्त्वा' हित्वा अधर्मं-विषयाभिरतिरूपमसदाचारु 'धम्मिट्ठे' त्ति इष्ट धर्म्मा, यदिवा-अतिशयेन धर्मवानिति, इष्ठनि "विन्मतोर्लुगि" ति मतुब्लोपे धर्मिष्ठ इति, देवेषूपपद्यत इत्याह ॥ यतश्चैवमतो यद्विधेयं तदाह-

मू. (२०८) तुलिआण बालभावं, अबालं चेव पंडिए।
चइऊण बालभावं, अबालं सेवए मुनी ॥

वृ. 'तोलयित्वा' इह प्राग्वत् 'बालभावं' बालत्वम् 'अबालं' ति भावप्रधानत्वान्निर्देश-स्याबालत्वं धीरत्वं, 'चः' समुच्चये, एवेति प्राकृतत्वादनुस्वारलोपः 'एवम्' अनन्तरोक्त-प्रकारेण 'पण्डितः' बुद्धिमान त्यक्त्वा 'बालभावं' बालत्वम् 'अबालं' ति अबालत्वं 'सेवते अनुतिष्ठति 'मुनिः' यतिरिति सूत्रत्रयार्थः ॥ 'इतिः' परिसमाप्तौ, ब्रुवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेवेति सूत्रार्थः ॥

अध्ययनं ७-समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे सप्तमाम्ध्ययनस्य भद्रबाहुस्वामिरचिता निर्युक्तिः एवं शान्त्याचार्यरचिता टीका परिसमाप्ता।

अध्ययनं - ८ कापिलीयं

वृ. व्याख्यातं उरभ्रीयाख्यं सप्तममध्ययनं, सम्प्रत्यष्टममारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने रसगृद्धेरपायबहुलत्वमभिधाय तत्त्वाग उक्तः, स च निर्लोभस्यैव भवतीति इह निर्लोभत्वमुच्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचर्चा प्राग्वद् यावन्नामनिष्पन्ननिक्षेपे कापिलीयमिति नाम, अतः कपिलनिक्षेपमाह-

नि. [२५०] निक्खेवो कविलंमी चउव्विहो दुव्विहो य दव्वंमि।
आगमनोआगमओ नोआगमओ य सो तिविहो ॥

वृ. 'निक्षेपः' न्यासः 'कपिले' कपिलविषयः 'चतुर्विधः' चतुष्प्रकारो नामस्थापनाद्रव्य-भावभेदात्, तत्राद्ये प्रतीते, 'द्विविधः' द्विभेदो भवति 'द्रव्य' इति द्रव्यविषयः द्वैविध्यमेवाह-आगतमो नोआगमतः, तत्रागमतो ज्ञाताऽनुपयुक्तो नोआगमतश्च स 'त्रिविधः' त्रिभेद इति

नि. [२५१] जाणगसरीरभविए तव्वतिरित्ते य सो पुनो तिविहो।
एगभविअबद्धाउअ अभिमुहुओ नामगोए अ ॥

वृ. कपिलशब्दार्थज्ञशरीरं पश्चात्कृतपर्यायं ज्ञशरीरमित्युच्यते, तदेव द्रव्यकपिलो, 'भविय' त्ति भव्यशरीरं पुरस्कृतकपिलशब्दार्थज्ञतात्मकपर्यायं द्रव्यकपिलः, तद्व्यतिरिक्तश्च, स तद्व्यति-रिक्तद्रव्यकपिलः पुनः 'त्रिविधः' त्रिभेदः, त्रैविध्यमेवाह-एकभविको बद्धायुष्कोऽभिमुख-

नामगोत्रश्चेति गाथार्थः ॥ भावकपिलमाह-

नि.[२५२] कविलाउनामगोयं वेयंतो भावओ भवे कविलो ।
तत्तो समुट्ठियमिणं अज्झयणं काविलिज्जंति ॥

वृ. कपिलायुर्नामगोत्रं 'वेदयन्' अनुभवन् 'भावतः' भावमाश्रित्य भवेत् कपिलः, 'ततः' तस्मात् समुत्थिमत् 'इदं' प्रस्तुतम् अध्ययनं 'काविलिज्ज'त्ति कापिलीयमिति, उच्यत इति शेष इति गाथार्थः ॥ कथं पुनरिदं कपिलात्समुत्थितमित्याह-

नि.[२५३] कोसंबी कासवजसा कविलो सावत्थि इंददत्तो य ।
इब्भे य सालिभद्दे धणसिट्ठे पसेणइ राया ॥

नि.[२५४] कविलो निच्चियपरिवेसिआइ आहारमित्तसंतुट्ठे ।
वावारिओ (य) दुहि मासेहिं सो निग्गओ रत्तिं ॥

नि.[२५५] दक्खिन्ने पत्थंतो बद्धो अ तओ अ अप्पिओ रन्नो ।
राया से देइ वरं किं देमी केन ते अत्थो ? ॥

नि.[२५६] जहा लाहो तहा लोहो, लाहा लोहो पवड्ढति ।
दोमासकयं कज्जं, कोडिएवि न निट्ठियं ॥

नि.[२५७] कोडिंपि देमि अज्जेत्ति भणइ राया पहिट्ठमुहवन्नो ।
सोऽवि चउऊण कोडिं समणो जाओ समिअपावो ॥

नि.[२५८] छम्मासे छउमत्थो अट्ठारस जोयणाइ रायगिहे ।
बलभद्दप्पमुहाणं इक्कडदासाण पंचयमे ॥

नि.[२५९] अइसेसे उप्पन्ने होही अट्ठो इमोत्ति नाऊणं ।
अद्धाणगमनचित्तं करेइ धम्मट्ठया गीयं ॥

वृ. आसामक्षरार्थः सुगम एव, नवरं 'निच्चियपरिवेसियाए'त्ति नैत्यिकपरिवेषिकया-प्रतिदिननियुक्तभक्तदान्त्र्या वावारितो'त्ति व्यापारितो-नियुक्तः 'दुहिं मासेहिं'ति द्वाभ्यां भाषकाभ्यां, "तादर्थ्ये चतुर्थी" 'दक्खिणणंत'ति प्राकृतत्वाद्दक्षिणां 'पहट्ठमुहवन्न'त्ति प्रहृष्टः-प्रहर्षवान्, मुखवर्णो-मुखच्छाया यस्य स तथा, मुखस्य प्रहृष्टत्वादुपचारात्तद्वर्ण्णोऽपि प्रहृष्ट उक्तः, यद्वा प्रहृष्टमुखस्येय मुखवर्ण्णो यस्य स तथा, मयूरव्यंसकादित्वात्, समासः, मानसत्वाच्च हर्षादीनां मुखस्यापि प्रहृष्टत्वं रूढित इति भावनीयम् ।

'इक्कडदासाणं'ति इक्कडदासजातीनाम् 'अतिशेषे' अतिशाये 'होही अट्ठो इमो'त्ति भविष्यति अर्थः-प्रयोजनम् 'अयं' पूर्वसङ्गतिकचौरशतपञ्चकप्रतिबोधलक्षण इति ज्ञात्वा च 'अद्धाणगमनचित्तं'ति अध्वा-मार्गस्तद्गमने चित्तम्-अभिप्रायोऽध्वगमनचित्तं तत्करोतीव करोति, तत्त्वतो हि केवलित्वेनामनस्कत्वान्न तस्याभिप्रायकरणसम्भवः, 'धम्मट्ठय'त्ति आर्षत्वाद्धर्मार्थं-तत्त्वावबोधतस्तेषां धर्मः स्यादित्येवमर्थं 'गीयं'ति चस्य गम्यमानत्वाद्गीतं च-स्वरग्रामानुगत-गीतिकानिबद्धमिदमेवाध्ययनं करोतीति योगः, वर्तमाननिर्देशस्तु सूत्रस्य त्रिकालगोचरतामाह, यदिवा-'गीत'मिति स्वराद्यनुगमनेन शब्दितमिदमिति गम्यते । भावार्थः कथानकादवसेयः,

'तेणं' कालेणं तेणं समएणं कोसंबीए नयरीए जितसत्तू राया, कासवो बंभणो चोद्दसविज्जा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठाणपारगो, रायणो बहुमतो, वित्ती से उवकप्पिया, तस्स जसा नाम भारिया, तेसिं पुत्तो कविलो नाम, कासवो तंमि कविले खुड्डुलए चेव कालगतो, ताधे तंमि मए तं पयं रायणा अण्णस्स मरुयगस्स दिन्नं, सो य आसेण छत्तेण य धरिज्जमानेण वच्चइ, तं दट्ठूण जसा परुण्णा, कविलेण पुच्छिया, ताए सिट्ठं-जहा पिया ते एवंविहाए इड्ढीए निगच्छियाइओ, तेन भण्णति-कथं ?, सा भणति-जेन सो विज्जासंपन्नो, सो भणइ-अहंपि अहिज्जामि, सा भणइ-इहं तुमं मच्छरेण न कोइ सिक्खवेति, वच्च सावत्थीए नयरीए पिइमित्तो इंददत्तो नाम माहणो सो ते सिक्खावेहि-त्ति। सो तो तस्स सगासं, तेन पुच्छितो-कओऽसि तुमं ?, तेन जहावत्तं कहियं, सो तस्स सगासे अहिज्जिउं पयत्तो। तत्थ सालिभद्दो नाम इब्भो, सो से तेन उवज्झाएण नेच्चतियं दवावितो, सो तत्थ जिमितो २ अजिज्जइ, दासचेडी य तं परिवेसेइ। सो य हसणसीलो तीए सद्धिं संपलग्गो, तीए भण्णइ-तुमे मे पीतो, न य ते किंचिवि, नवरि मा रुसिज्जासि, पोत्तमुल्लणिमित्तं अहमन्नेहिं २ समं अच्छामि, इयरहाहं तुज्झ आणाभोज्जा। अण्णया दासीण महो ढुक्कइ, सा तेन समं निविण्णया, निद्दं सा न लहइ, तेन पुच्छिया-कतो ते अरती ?, तीए भण्णति-दासीमहो उवट्ठितो, ममं पत्त-पुप्फाइमोल्लं नत्थि, सहीजणमज्झे विगुप्पिस्सं, ताहे सो अधितिं पगतो, ताए भण्णति-मा अद्धितिं करेहिं, एत्थ धनोनाम सिट्ठी, अप्पभाए चेव जे नं पढमं वद्धावेइ से दो सुवण्णए भासए देइ, तत्थिमं गंतूण तं वद्धावेहि, आमंति तेन भणियं। तीए लोभेण मा अन्नो गच्छिहित्ति अतिपभाए पेसितो, वच्चंतो य आरक्खियपुरिसेहिं गहितो बद्धो य।

ततो पभाए पसेणइस्स रन्नो उवनीतो, राइणा पुच्छितो, तेन सब्भावो कहितो, रायणा भणितो-जं मग्गसि तं देमि, सो भणति-विचिंतिउं मग्गामि, रायणा तहत्ति भणिए असगवणियाए चिंतेउमारद्धो-किं दोहिं मासेहिं साडिगाभरणे पडिवासिगा जाणवाहणाउज्जाणोवभोगा मम वयस्साणं पव्वागयाण धरं भज्जाचउट्ठयं जंचण्णं उवऊज्जं ?, एवं जाव कोडीएवि न ठाएति। चिंतंतो सुहज्झवसाणो संवेगमावण्णो जाइं सरिऊण सयंबुद्धो सयमेव लोयं काऊण देवयादिन्नगहियायारभंडगो आगतो रायसगासं, रायणा भन्नति-किं चिंतियं ?, सो भणति-'जहा लाभो तहा लोभो' कण्ठयः, राया भणति-

"कोडिंपि देमि अज्जोत्ति भणति राया पहट्ठमुहवण्णो।
सोऽवि चइऊण कोडिं जातो समणो समियपावो॥"

छम्मासा छउमत्थो आसि। इत्तो य रायगिहस्स नयरस्स अंतरा अट्ठारसजोयणाए अडवीए बलभद्दपामोक्खा इक्कडदासा नाम पंच चोरसया अच्छंति, नानेण जाणियं-जहा ते संबुज्झिस्संति, ततो पट्ठितो संपत्तो य तं पएसं, सोहिएण य दिट्ठो कोवि एतित्ति आसण्णीभूतो, नाओ जहा समणगोत्ति, अम्हं परिभविउं आगच्छति, रोसेण व गहितो सेणावइसमीवं नीतो, तेन भण्णति-मुयह एयंति, ते भणंति-खेल्लामो एतेणंति, तेहिं भण्णति-नच्चसु समणगोत्ति, सो भणइ-वायंतगो नत्थि, ताहे ताणवि पंचवि चोरसयाणि ताले कुट्टेंति, सोऽवि गायति धुवगं,

"अधुवे असासयंमी, संसारंमि दुक्खपउराए।
किं नाम तं होज्ज कम्मयं ? जेणाहं दुग्गहं न गच्छेज्जा॥"

एवं सव्वत्थ सिलोगन्तरे धुवगं गायति 'अधुवे'त्यादि, तत्थ केइ पढमसिलोगे संबुद्धा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केइ बीए, एवं जाव पंचवि सया संबुद्धा पव्वतियत्ति । इत्यभिहितः सम्प्रदायोऽवसितश्च नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रच्चारणीयं,

मू. (२०९) *अधुवे असासयंमि संसारंमि दुक्खपउराए।*
किं नाम होज्ज तं कम्मयं ?, जेनाहं दुग्गइं न गच्छेज्जा ॥

वृ. स हि भगवान् कपिलनामा स्वयंबुद्धश्चौरसङ्घातसम्बोधनायेमं ध्रुवकं सङ्गीतवान्, ध्रुवक-लक्षणं चेदम्

'जं गिज्जइ पुव्वं चिय पुन पुनो सव्वकव्वबंधेसु।
धुवयंति तमिह तिविहं छप्पायं चउपयं दुपयं ॥"

तत्र ध्रुवो-य एकास्पदप्रतिबद्धो न तथाऽध्रुवः तस्मिन्, संसार इति सम्बन्धः, भ्रमन्ति ह्यस्मिन् अनेकेषु उच्चावचस्थानेषु जन्तवः, तेषां क्वचिदनुत्पन्नपूर्वत्माभावाद्, उक्तं च -

"रङ्गभूमिर्न सा काचिच्छुद्धा जगति वर्तते।
विचित्रैः कर्मनेपथ्यैर्यत्र सत्त्वैर्न नाटियम् ॥"

इति, शाश्वतं-नित्यम् अविद्यमानं शाश्वतमस्मिन्निति अशाश्वस्तस्मिन्, संसार एव, अशाश्वतं हि सकलमिह राज्यादि, तथा च हारिलवाचकः-

"चलं राज्यैश्वर्यं धनकनकसारः परिजनो, नृपाद्वाल्लभ्यं च चलममरसौख्यं च विपुलम्।
चलं रूपाऽऽरोग्यं चलमिह चरं जीवितमिदं, जनो दृष्टो यो वै जनयति सुखं सोऽपि हि चलः ॥"

यद्वा- ध्रुवो-नित्यो न तथाऽध्रुवस्तस्मिन्, एवं च कियत्कालावस्थायित्वमप्याशङ्क्येत अत आह-शश्वद्भवनाच्छाश्वतः न तथाऽशाश्वतस्तस्मिन्, शश्वद्भवने हि द्व्यादिक्षणावस्थितिरपि सम्भवेत्, तन्निषेधे तु तस्या अपि निषेधात्पर्यायार्थतया तडित्सम्पातवत् क्षणमात्रावस्थायिनी-त्युक्तं भवति, एकार्थं वा पदद्वयम्, उपदेशत्वादतिशयख्यापकत्वाच्च न पौनरुक्त्यं, क्व पुनः ईदृशि ? संसरन्त्यस्मिन् कर्मवशवर्तिनो जन्तव इति संसारस्तस्मिन्, 'दुक्खपउराए'त्ति प्रचुराण्येव प्रचुरकाणि-प्रभूतानि दुःखानि शारीरमानसानि यस्मिन् स तथा तस्मिन्, प्राकृतत्वाच्च सूत्रे एवं निर्देशः यद्वा दुःखानां प्रचुरः आयो-लाभो यस्मिन् स तथा तस्मिन्, 'किं' मिति प्रश्ने ? 'नामे'ति संभावनायां वाक्यालङ्कारे वा 'भवेत्' स्यात् तत् क्रियत इति कर्म तदेव कर्मकम्-अनुष्ठानं, यत् कीदृगित्याह-येन कर्म्मणा 'हेतौ तृतीया' अहमित्यात्मानं निर्दिशति, 'दुर्गतिं' नरकादिकां 'न गच्छेज्ज'ति न गच्छेयं-न यायां, पठन्ति च-

'जेणाधं दुग्गईतो मुच्चेज्ज'त्ति सुगमम्, अत्र भगवतश्छिन्नसंशयत्वेऽपि मुक्तिगामितया दुर्गत्यसत्त्वेऽपि च प्रतिबोध्यपूर्वसङ्गतिकापेक्षमित्थमभिधानं, नागार्जुनीयास्तु प्रथमपदमेवं पठन्ति 'अधुवंमि मोहगहणए' तत्र मुह्यतेऽनेन जानन्नपि जन्तुरिपि मोहो-दर्शनमोहनीयादिः तेन गहनो-गुपिलो मोहगहनः स एव मोहगहनकस्तस्मिन्निति सूत्रार्थः ॥ एवं च भगवतोद्गीते तेऽप्येनमेव ध्रुवकं प्रत्युद्गायन्ति तालं च कुट्टयन्ति, तैश्च प्रत्युद्गीते भगवानाह-

मू. (२१०) *विजहित्तु पुव्वसंजोगं न सिनेहं कहिंचि कुव्विज्जा।*
असिनेह सिनेहकरेहिं दोसपउसेहि मुच्चई भिक्खू ॥

वृ. 'विहाय' विशेषेण-तदननुस्मरणाद्यात्मकेन हित्वा-त्यक्त्वा, कमित्याह-पुरा परिचित्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मातृपित्रादयः पूर्वशब्देनोच्यन्ते ततस्तैः, उपलक्षणत्वादन्यैश्च स्वजनधनादिभिः संयोगः-सम्बन्धः पूर्वसंयोगस्तं, ततः किमित्याह-न 'स्नेहम्' अभिष्वङ्गं क्वचिद्बाह्येऽभ्यन्तरे वा वस्तुनि 'कुव्विज्ज'त्ति कुर्वीत, तथा च को गुण इत्याह-'असिणेह'त्ति प्राकृतत्वाद्विसर्जनीयलोपेऽ-स्नेहः-अविद्यमानप्रतिबन्धः, 'सिनेहकरेहिं'ति सुब्व्यत्ययादपेर्गम्यमानत्वाच्च स्नेहकरेष्वपि-स्नेहकरणशीलेष्वपि पुत्रकलत्रादिषु, आस्तामन्येष्वित्यपिशब्दार्थः, 'दोषपदैः' अपराधस्थानैः 'मुच्यते' त्यज्यते, किमुक्तं भवति?-निरतिचारचारित्रो भवति, अमुक्तस्नेहो हि कलत्राद्यभिष्व-ङ्गात् दोषपदमतिचाररूपमाप्नुयाद्, 'भिक्षु'रिति साधुः, पाठान्तरतश्च 'दोषप्रदोषैः' तत्र दोषैः-इहैव मनस्तापादिभिः प्रदोषैश्च-परत्र नरकगत्यादिभिरिति सूत्रार्थः ॥ पुनर्यदसौ कृतवांस्तदाह-

मू. (२११) नो नाणंदंसणसमग्गो हियनिस्सेसाए य सव्वजीवाणं।
तेसिं विमोक्खणट्ठाए भासए मुनिवरो विगयमोहो ॥

वृ. 'तो'त्ति ततोऽनन्तरं, भाषते मुनिवर इति सम्बन्धः, स च कीदृग्?-ज्ञायतेऽनेन विशेषा-त्मना वस्त्विति ज्ञानं, दृश्यतेऽनेन सामान्यरूपेण वस्त्विति दर्शनं, ताभ्यां प्रस्तावात् केवलाभ्या समग्रः-समन्वितः, यदिवा प्राकृतत्वात्समग्रे-परिपूर्णे ज्ञानदर्शने यस्यासौ समग्रज्ञानदर्शनः, किमर्थमसौ भाषत इत्याह-'हियणिस्सेसाए' इति सूत्रत्वात् हितः-पथ्यो भावाऽऽरोग्यहेतुत्वात् निःश्रेयसो-मोक्षः, हितश्चासौ निःश्रेयसश्च हितनिःश्रेयसस्तस्मै, यद्वा प्राकृतत्वादेव निश्शेषं-समस्तं हितं-सम्यग्ज्ञानादि, तस्यैव तत्त्वतो हितत्वात्, ततो निश्शेषं च तद्धितं च निश्शेषहितं तस्मै, कथं नाम निश्शेषहितावाप्तिः स्यादिति, चशब्दो भिन्नक्रमः, तेषामित्यत्र योज्यते, केषाम्?-'सर्वजीवानाम्' अशेषप्राणिनां 'तेषां' च पञ्चशतसङ्ख्यचौराणां विमोक्षणम्-अष्टविधकर्मणः पृथक्करणं तदेवार्थः-प्रयोजनं विमोक्षणार्थस्तस्मै-तन्निमित्तं, भाषते इति वर्तमाननिर्देशः प्राग्वत्, यद्वा-'भवति स नामातीतः प्राप्तो यो नाम वर्तमानत्व' मितिवचनात् तस्यापि तदा वर्तमानतैवेति तत्कालत्वस्य विवक्षितत्वान्न दोषः, 'मुनिवरः' मुनिप्रधानः, विगतो-विनष्टो मोहो यस्य यस्माद्वा स तादृक्।

इह च विगतमोहवचनेन चारित्रमोहनीयाभावतो यथाख्यातचारित्रमुक्तं। ननु 'हियनिस्सेसाए य सव्वजीवाणं' तीत्युक्तौ 'तेसिं विमोक्खणट्ठाए' इत्यतीरिच्यते, न, तानेवोद्दिश्यास्य भगवतः प्रवृत्तिरिति प्रधानत्वात् पुनस्तद्विमोक्षणार्थताऽभिधानं, दृश्यते हि-'ब्राह्मणा आयता वशिष्ठोऽ-प्यायात' इति सामान्योक्तावपि पुनः प्रधानस्याभिधानमिति सूत्रार्थः ॥ यदसौ भाषते तदाह-

मू. (२१२) सव्वं गंथं कलहं च विप्पजहे तहाविहं भिक्खू।
सव्वेसु कामजाएसु पासमाणो न लिप्पई ताई ॥

वृ. 'सर्वम्' अशेषं 'ग्रन्थं' बाह्यमाभ्यन्तरं च, तत्र बाह्यं धनादि, आभ्यन्तरं मिथ्यात्वादि कलहहेतुत्वात्कलहः-क्रोधस्तं, चशब्दान्मानादींश्च, अभ्यन्तरग्रन्थरूपत्वेऽपि चैषां पृथगुपादानं बहुदोषख्यापनार्थं, 'विप्पजहे'त्ति विप्रजह्यात्-परित्यजेत् 'तथाविध'मिति कर्म्मबन्धहेतुं, न तु धर्मोपकरणमपीत्यभिप्रायः, पाठान्तरतश्च-तथाविधो, 'भिक्षुः' यतिस्तस्यैवेवंविधधर्म्मार्ह-त्वादेवमभिधानम्, अन्योक्त्या वा त एवैवमुच्यन्ते, ततश्च किं स्यादित्याह-'सर्वेषु' अशेषेषु 'कामजातेषु' मनोज्ञशब्दादीनां प्रकारेषु समूहेषु वा 'पासमाणो'त्ति पश्यन् प्रेक्षमाणो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपाककटुकात्मकं तद्विषयं दोषमिति गम्यते, न 'लिप्यते' कर्म्मणा नोपदिह्यते, कामदोषज्ञस्य तेषु प्रायः प्रवृत्तेरभावादिति भावः, तायते त्रायते वा रक्षति दुर्गतेरात्मानम् एकेन्द्रियादिप्राणिनो वाऽवश्यमिति तायी त्रायी वेति सूत्रार्थः ॥ इत्थं ग्रन्थत्यागिनो गुणमभिधाय व्यतिरेके दोषमाह-

मू.(२१३) भोगामिसदोसविसन्ने हियनिस्सेयसबुद्धिवोच्चत्थे।
बाले य मंदिए मूढे बज्झइ मच्छिया व खेलंमि॥

वृ. भुज्यन्त इति भोगाः-मनोज्ञाः शब्दादयः ते च ते आमिषं चात्यन्तगृद्धिहेतुतया भोगामिषं तदेव दूषयत्यात्मानं दुःखलक्षणविकारकरणेन भोगामिषदोषस्तस्मिन् विशेषेण सन्नो-निमग्नो भोगामिषदोषविषण्णः, यद्वा-भोगामिषस्य दोषा भोगामिषदोषाः ते च तदासक्तस्य विचित्र-श्लेशा अपत्योत्पत्तौ च तत्पालनोपायपरतया व्याकुलत्वादयस्तैर्विषण्णो-विषादं गतो भोगामिषदोषविषण्णः, आह च-

"जया य कुकुडुंबस्सा, कुतत्तीहिं विहम्मइ।
हत्थीव बंधणे बद्धो, स पच्छा परितप्पइ ॥१॥
पुत्तदारपरिक्किन्नो, मोहसंताणसंततो।
पंकोसन्नो जहा नागो, स पच्छा परितप्पति ॥२॥" त्ति।

'हियनिस्सेसबुद्धिवोच्चत्थे'त्ति हितः-एकान्तपथ्यो निःश्रेयसो-मोक्षः अनयोः कर्मधारये हितनिःश्रेयसः,-यद्वा हितो-यथाभिलाषितविषयावाप्त्याऽभ्युदयः निःश्रेयसः स एव तयोर्द्वन्द्वः, ततश्च तत्र तयोर्वा 'बुद्धिः' तत्प्राप्त्युपायविषया मतिः तस्यां विपर्ययवान् सा वा विपर्यस्ता यस्य स हितनिःश्रेयबुद्धिविपर्यस्तः विपर्यस्तहितनिःश्रेयसबुद्धिर्वा, विपर्यस्तशब्दस्य तु परनिपातः प्राग्वत्, यद्वा विपर्यस्ता हिते निःशेषा बुद्धिर्यस्य स तथा, बालश्च-अज्ञः 'मंदिए'त्ति सूत्रत्वान्मन्दो-धर्मकार्यकरणं प्रत्यनुद्यतः 'मूढो' मोहाकुलितमानसः, स एवंविधः किमित्याह-'बध्यते' श्लिष्यतेऽर्थाज्ज्ञानावरणादिकर्म्मणा मक्षिकेव 'खेले' श्लेष्मणि, रजसेति गम्यते, इदमुक्तं भवति-यथाऽसौ तत्स्निग्धतागन्धादिभिराकृष्यमाणा तत्र मज्जति, मग्ना च रेण्वादिना बध्यते, एवं जन्तुरपि भोगामिषे मग्नः कर्म्मणेति सूत्रार्थः ॥ ननु यद्येवममी भोगाः कर्म्मबन्ध-कारणं किं नैतान् सर्वेऽपि जन्तस्त्यजन्तीत्याह-

मू.(२१४) दुप्परिच्चया इमे कामा नो सुजहा अधीरपुरिसेहिं।
अह संति सुव्वया साहू जे तरंति अतरं वणिया व॥

वृ. दुःखेन-कृच्छ्रेण परित्यज्यन्ते-परिहियन्त इति दुष्परित्यजाः 'इमे' प्रत्यक्षत उपलभ्य-मानाः 'कामाः' भोगाः 'नो' नैव 'सुजह'त्ति सूत्रत्वात् सुखेन-अनायासेन हीयन्त इति सुहानाः-सुत्यजाः, विषसम्पृक्तस्निग्धमधुरान्नवद्, कैः?-'अधीरपुरुषैः' अबुद्धिमद्भिरसत्त्वैर्या नरैः, पुरुषग्रहणं तु ये तावदल्पवेदोदयतया सुखेनैव त्वक्तारः सम्भवन्ति तैरप्यमी न सुखेन त्यज्यन्ते, आस्तामतिदारुणस्त्रीपण्डकवेदोदयाऽऽकुलितैः, स्त्रीनपुंसकैरिति। यच्चेह दुष्परित्यजा इत्यु-क्त्वा पुनर्न सुहानाः इत्युक्तं तदत्यन्तदुस्त्यजताख्यापकं प्रपञ्चितज्ञविनेयानुग्राहकं वेति अपुनरुक्तमेव, अधीरग्रहणेन तु धीरैः सुत्यजा एवेत्युच्यते, अत एवाह-'अथ' इत्युपन्यासे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सन्ति' विद्यन्ते शोभनानि सम्यग्ज्ञानाधिष्ठितत्वेन व्रतानि-हिंसाविरमणादीनि येषां ते सुव्रता:, शान्त्या वोपलक्षिता: सुव्रता: शान्तिसुव्रता:, इह च सन्तीति शेष:, साधयन्ति पौरुषेयीभि: क्रियाभिर्मुक्तिमिति साधव:, ये किमित्याह-ये 'तरन्ति' परपारावाप्त्याऽतिक्रमान्ति, कम् ?- 'अतरं' तरीतुमशक्यं विषयगणं भवं वा, क इव ?-वणिज इव, वाशब्दस्येहेवार्थत्वात्, यथा हि वणिजोऽतरं नीरधिं यानप्रात्रादिनोपायेन तरन्ति एवमेतेऽपि धीरा व्रतादिनोक्तरूपमतरम्, अधीरैरेवोक्तनीतितोऽस्य दुस्तरत्वात्, पठन्ति च-'जे तरंति वणिया व समुद्द'मिति, स्पष्टम्,

"विषयगण: कापुरुषं करोति वशवर्त्तिनं न सत्यपुरुष्।
बन्धाति मशकमेव हि लूतातन्तुर्न मातङ्गम् ॥"

इति सूत्रार्थ: ॥ किं सर्वेऽपि साधवोऽतरं तरन्ति उत नेत्याह-

मू. (२१५) *समणा मु एगे वदमाणा पाणवहं मिया अजाणंता।*
मंदा निरयं गच्छंति बाला पावियाहिं दिट्ठीहिं ॥

वृ. श्राम्यन्ति-मुक्त्यर्थं खिद्यन्त इति श्रमणा:-साधव: 'मु' इत्यात्मनिर्देशार्थत्वाद्वयमिति 'एके' केचन तीर्थान्तरीया: 'वदमाना:' स्वाभिप्रायमुद्दीपयन्तो 'भासनोपसम्भाषाज्ञानयत्नवि-मत्युपनिमन्त्रणेषु वद:' इत्यनेन भासने आत्मनेपदं, प्राणा-उक्तरूपास्तेषां वधो-धातस्त-मजानन्त इति सम्बन्ध:, मृगा इव मृगा: प्राग्वत् अजानन्त इति ज्ञपरिज्ञया के प्राणिन: ? के च तेषां प्राणा: ? कथं वा वध: ? इत्यनवबुध्यमाना: प्रत्याख्यानपरिज्ञया च तद्वधमप्रत्याचक्षाणा:, अनेन च प्रथमव्रतमपि न विदन्ति आस्तां शेषाणीत्युक्तं भवति, अत एव मन्दा इव मन्दा मिथ्यात्वमहारोगग्रस्ततया 'निरयं' पाठान्तरतो 'नरकं वा' प्रतीतं गच्छन्ति-यान्ति, बाला इव बाला-हेयोपादेयविवेकविकलत्वात् 'पावियाहिं'ति प्रापयन्ति नरकमिति प्रापिकास्ताभि:, यद्वा-पापा एव पापिकास्ताभि:, परस्परविरोधादिदोषात् स्वरूपेणैव कुत्सिताभि:, 'न हिंस्यात् सर्वभूतानी' त्याद्यभिधाय 'श्वेतं छागमालभेत वायव्यां दिशि भूतिकाम' इत्यादिपर-स्परविरुद्धार्थाभिधायिनीभि:, पापहेतुभिर्वा पापिकाभिर्दृष्टिभि:-दर्शनाभिप्रायरूपाभि: 'ब्रह्मणे ब्राह्मणमालभेत, इन्द्राय क्षत्रियं, मरुद्भयो वैश्यं, तपसे शूद्रं, तथा च-

'यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत्।
आकाशमिव पङ्केन, न स पापेन लिप्यते ॥'

इत्यादिकाभिर्दयादमबहिष्कृताभि:, तद्बहिष्कृतानां हि विविधवल्कलवेषादिधारिणामपि न केनचित्पापात् परित्राणं, तथा च वाचक:-

"चर्म्मवल्कलचीराणि, कूर्चमुण्डजटाशिखा:।
न व्यपोहन्ति पापानि, शोधकौ तु दयादमौ ॥'

इति सूत्रार्थ: ॥ अत एवाह सूत्रकृत्-

मू. (२१६) *न हु पाणवहं अनुजाणे मुच्चेज्ज कयाइ सव्वदुक्खाणं।*
एवमारिएहिमक्खायं जेहिं इमो साहुधम्मो पन्नत्तो ॥

वृ. 'न हु' नैव 'प्राणवधं' प्राणघातं, मृषाद्युपलक्षणं चैतत्, 'अनुजाणे'त्ति अपिशब्दस्य लुप्तनिर्दिष्टत्वात् अनुजानन्नपि, आस्तां कुर्वन् कारयन् वा, 'मुच्येत'त्यज्येत, सम्भावने लिट्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(ङ), ततो मुक्तिसम्भावनाऽपि नास्तीत्युक्तं भवति, 'कदाचित्' कस्मिंश्चिदपि काले, कैर्मुच्येत ? इत्याह-'सव्वदुक्खाणं'ति दुःखयन्तीति दुःखानि-कर्म्माणि सर्वाणि च तानि दुःखानि च सर्वदुःखानि तैः, सुब्व्यत्ययाच्च तृतीयार्थे षष्ठी, यद्वा सर्वदुःखैः-नरकादिगतिभाविभिः शारीरमानसैः क्लेशैः, ततः प्राणातिपातनिवृत्ता एव श्रमणास्त एव चातरं तरन्ति न त्वितर इत्युक्तं भवति, किमेतत् त्वयैवोच्यते ? इत्याह-'एवारिएहिं'ति 'एवम्' उक्तप्रकारेणाऽऽर्यैः-सकलहेयधर्मेभ्यो दूरं यातैस्तीर्थंकरादिभिराचार्यैर्वा आख्यातं-कथितं, ये कीदृश इत्याह-'यैः' आर्यैराचार्यैर्वाऽयं 'साधुधर्म्मो' हिंसानिवृत्त्यादिः 'प्रज्ञप्तः' प्ररूपित्तः, अयमित्यनेन चात्मनि वर्तमानं तेषां प्रज्ञाप्यचौराणां प्रत्यक्षं साधुधर्मं निर्दिशतीति सूत्रार्थः ॥ यद्येवं ततः किं कृत्यम् ? इत्याह-

मू. (२१७) पाणे य नाइवाइज्जा से समियत्ति वुच्चइ ताई।
तओ से पावयं कम्मं निज्जाइ उदगं व थलाओ ॥

वृ. 'पाणे य नातिवाएज्ज'त्ति चशब्दो व्यवहितसम्बन्धः, ततश्च प्राणान्-इन्द्रियपञ्चकादीन् नातिपातयेत्, यस्त्विवति गम्यते, चशब्दात् कारणानुमत्योरपि निषेधः, मृषावादादिनिवृत्त्युपलक्षणं चैतत्, किमिति प्राणान्नातिपातयेदित्याह-'से'त्ति यः प्राणान्नातिपातयिता स 'समितः' समितिमान् इति 'उच्यते' अभिधीयते, कीदृशः सन् ? इत्याह-'त्रायी' इत्यवश्यं प्राणित्राता, समितत्वेऽपि को गुणाः ?, उच्यते-'ततः' इति तस्मात् समितात् 'से' इत्यथ 'पापकम्' अशुभं 'कर्म्म' ज्ञानावरणादि 'निर्याति' निर्गच्छन्ति, पठन्ति च -'निन्नाइं'त्ति अत्र देशीपदत्दधोगच्छति, किमिव ?-उदकमिव, कुतः ?-'स्थूलाद्' अत्युन्नप्रदेशात्, अनेन च पूर्वबद्धस्य कर्म्मणोऽभाव उक्तः, न लिप्यते त्रायीति च बद्धमानस्येति न पौनरुक्त्यं, पापग्रहणं चास्यावश्यंतयाऽभावख्यापकं, पुण्यस्य हि संहननादिदोषान्मुक्त्यनवाप्तेर्देवाद्युत्पत्तौ सम्भवोऽपि स्यात्, अन्यथा हि पुण्यस्यापि स्वर्णनिगडप्रायतया विनिर्गम एव विनिर्मुक्तिरिति सूत्रार्थः ॥ यदुक्तं- 'प्राणान्नातिपातयेदि'ति तदेव स्पष्टयितुमाह-

मू. (२१८) जगनिस्सएहिं भूएहिं तसनामेहिं थावरेहिं च।
नो तेसिमारभे दंडं मणसावयसाकायसा चेव ॥

वृ. त्रसनामकर्म्मोदयवत्सु द्वीन्द्रियादिषु 'स्थावरेषु' तन्नामकर्म्मोदयवर्त्तिषु पृथिव्यादिषु, चः समुच्चये, 'नो' नैव 'तेसिं' ति तेषु रक्षणीयत्वेन प्रतीतेषु 'आरभेत' कुर्यात् दण्डनं दण्डः स चेहातिपातात्मकस्तं, 'मनसावयसाकायसा चेव'त्ति आर्षत्वात् मनसा वचसा कायेन, चशब्दः शेषभङ्गोपलक्षकः, ततश्च-यथा मनसा वचसा कायेन च दण्डं नारभते तथा नाऽऽरम्भयेत् न चारभमाणानप्यन्याननुमन्येत, 'एवः' अवधारणे भिन्नक्रमश्च, अत एव नो इत्यस्यानन्तरं योजितः, पठ्यते च-'जगनिस्सियाण भूयाणं, तसाणं थावराण य। नो तेसिमारभे दंडं'ति गतार्थमेव, अपरे तु 'जगनिस्सिएही'त्यादि तृतीयान्ततयैवाधीयते, तत्र च जगन्निश्रितैभूतैस्त्रसैः स्थावरैश्च हन्यमानोऽपीति शेषः, नैव तेष्वारभेत दण्डम्, उज्जयनीश्रावकपुत्रवत्, अत्र च सम्प्रदायः- उज्जेनीए सावगसुतो चोरेहिं हरिउं मालवके सूयगारस्स हत्थे विक्कीतो, लावगे मारयसु, न मारयामीति हत्थीपादत्तासणसीसारक्खणं करणं चेति। स एवं प्राणत्यागेऽपि सत्त्वानपरोधी, एवमन्यैरपि यतितव्यमिति सूत्रार्थः ॥ उक्ता मूलगुणाः, सम्प्रत्युत्तरगुणा वाच्याः, तेष्वप्येषणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समितिः प्रधानेति तामाह-

मू. (२१९) सुद्धेसणा उ नच्चा नं तत्थ ठवेज्ज भिक्खू अप्पाणं।
जाताए घासमेसिज्जा रसगिद्धे न सिया भिक्खाए॥

वृ. शुद्धाः-शुद्धिमत्यो दोषरहिता इत्यर्थः। ताश्च ता एषणाश्च-उद्गमैषणाद्याः शुद्धैषणाः, एषणाः सप्त संस्पृष्टाद्याः, तद्यथा-

"संसट्ठामसंसट्ठा उद्धड तह अप्पलेवडा चेव।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया॥'त्ति

एतासु च शुद्धैषणाः पञ्च, जिनकल्पिकापेक्षमेतत्, उक्तं हि तदधिकारे-पंचसु गहो दोसु अभिग्गहो'त्ति एताश्च 'ज्ञात्वा' अवबुध्य, किमित्याह-'ज्ञानस्य फलं विरति'रिति 'तत्रे'त्येषणासु 'स्थापयेत्' निवेशयेत्, भिक्षत इत्येवंधर्म्मा तत्साधुकरी चेति भिक्षुः सन् 'आत्मानं' स्वं, किमुक्तं भवति?-अनेषणापरिहारेणैषणाशुद्धमेव गृह्णीयात्, तदपि किमर्थमित्याह-'जायाए'त्ति यात्रायै संयमनिर्वहणनिमित्तं 'धासं'ति ग्रासमेषयेद्-गवेषयेत्, उक्तं हि-

"जह सगडक्खोवंगो कीरति भरवहणकारणा नवरं।
तह गुणभरवहणत्थं आहारो बंभयारीणं॥"ति,

एषणाशुद्धमप्यादाय कथं भोक्तव्यमिति ग्रासैषणामाह-रसेषु-स्निग्धमधुरादिषु गृद्धो-गृद्धिमान् रसगृद्धो 'न स्यात्' न भवेत्, 'भिक्खाए'त्ति भिक्षादो भिक्षाको वा, अनेन रागपरिहरा उक्तः, द्वेषपरिहारोपलक्षणं चैतत्, ततश्च रागद्वेषरहितो भुञ्जीतेत्युक्तं भवति, यदुक्तम्-"रागद्दोसविमुत्तो भुंजेज्जा निज्जरापेही"ति, सूत्रगर्भार्थः॥ अगृद्धश्च रसेषु यत्कुर्यात्तदाह-

मू. (२२०) पंताणि चेव सेविज्जा सीयपिंडं पुराणकुम्मासं।
अदु बुक्कसं पुलागं वा जवणट्ठा निसेवए मंथुं॥

वृ. 'प्रान्तानि' नीरसानि, अन्नपानानीति गम्यते, चशब्दादन्तानि च, एवोऽवधारणे, स च भिन्नक्रमः सेविज्जा इत्यस्यानन्तरं द्रष्टव्यः, ततश्च प्रान्तान्यन्तानि च सेवेतैव न त्वसाराणीति परिष्ठापयेद्, गच्छनिर्गतापेक्षया वा प्रान्तानि चैव सेवेत, तस्य तथाविधानामेव ग्रहणानुज्ञानात्, कानि पुनस्तानीत्याह-'सीयपिंडं'ति शीतलः पिण्डः-आहारः, शीतश्चासौ पिण्डश्च शीतपिण्डस्तं, शीतोऽपि शाल्यादिपिण्डः सरस एव स्यात् अत आह- 'पुराणाः' प्रभूतवर्षधृताः 'कुल्माषाः' राजमाषाः, एते हि पुराणा अत्यन्तपूतयो नीरसाश्च भवन्तीत्येतग्द्रहणम् उपलक्षणं चैतत् पुराणमुद्गादीनां, 'अदु'इति अथवा 'बुक्कसं' मुद्गमाषादिनास्विकानिष्पन्नमन्नमतिनिपीडितरसं वा 'पुलाकम्' असारं वल्लाचनकादि, वा समुच्चये, 'जवणट्ठ'त्ति यापनार्थं-शरीरनिर्वाहणार्थं, वा समुच्चये, उत्तरत्र योक्ष्यते, 'सेवए'त्ति सेवेतोपभुञ्जीत, यापनार्थमित्यनेनैतत् सूचितं-यदि शरीरयापना भवति तदैव निषेवेत, यदि त्वतिवातो द्रेकादिना तद्यापनैव न स्यात्ततो न निषेवेतापि, गच्छगतापेक्षमेतत्, तन्निर्गतश्चैतान्येव यापनार्थमपि निषेवेत, मन्थु वा-बदरादिचूर्णम्, अतिरूक्षता चास्य प्रान्तत्वं, सेवेतेति सम्बन्धः, पठ्यते च-'जवणट्ठाए निसेवए मंथु'ति, तथैव नवरं मन्थुमित्यत्र चशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः, असारवस्तूपलक्षणं चोभयत्र मनथुग्रहणं, पुनः क्रियाऽभिधानं च न सकृदेवावाप्तान्यमूनि सेवेत किन्त्वनेकधाऽपीतिख्यापनार्थमिति सूत्रार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदुक्तं-'शुद्धैषणास्वात्मानं स्थापयेदि'ति, तद्विपर्यये बाधकमाह-

मू. (२२१) *जे लक्खणं च सुविनं च अंगविज्जं च जे पउंजंति।*
न हु ते समणा वुच्चंति एवं आयरिएहिं अक्खायं॥

वृ. 'ये' इति प्राग्वत्, 'लक्षणं च' शुभाशुभसूचकं पुरुषलक्षणादि, रूढितः तत्प्रतिपादकं शास्त्रमपि लक्षणं, तद्यथा-

"अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु।
गतौ यानं स्वरे चाज्ञा, सर्वं सत्त्वे प्रतिष्ठितम्॥"

'स्वप्नं चे'त्यत्रापि रूढितः स्वप्नस्य शुभाशुभफलसूचकं शास्त्रमेव, तद्यथा-

"अलंकृतानां द्रव्याणां, वाजिवारणयोस्तथा।
वृषभस्य च शुक्लस्य, दर्शने प्राप्नुयाद्यशः॥१॥
मूत्रं वा कुरुते स्वप्ने, पुरीषं चापि लोहितम्।
प्रबुध्येत तदा कश्चिल्लभते सोऽर्थनाशनम्॥२॥"

'अंगविज्जं च'त्ति अङ्गविद्यां च शिरःप्रभृत्यङ्गस्फुरणतः शुभाशुभसूचिकां 'सिरफुरणे किर रज्जं' इत्यादिकां विद्यां, प्रणवमायाबीजादिवर्ण्णविन्यासात्मिकां वा, यद्वा-अङ्गानि-अङ्गविद्याव्यावर्ण्णितानि भौमान्तरिक्षादीनि विद्या 'हलि! २ मातङ्गिनी स्वाहा' इत्यादयो विद्यानुवादप्रसिद्धाः, ततश्चाङ्गानि च विद्याश्चाङ्गविद्याः, प्राग्वद् वचनव्यत्ययः, 'चः' सर्वत्र वाशब्दार्थः, ये प्रयुञ्जते, न तु समस्तान्येव, ते किमित्याह-'न हु' नैव 'ते' एवंविधाः 'श्रमणाः' साधवः 'उच्यन्ते' प्रतिपाद्यन्ते, इह च पुष्टालम्बनं विनैतद्व्यापारणत एवमुच्यते, अन्यथा करवीरलताभ्रामकतपस्विनोऽप्येवंविधत्वापत्तेः, एवमार्यैः आचार्यैर्वा 'आख्यातं' कथितम्, अनेन यथावस्थितवस्तुवादितयाऽऽत्मनि परापवाददोषं व्यपोहत इति। ते चैवंविधा यदवाप्नुवन्ति तदाह-

मू. (२२२) *इह जीवियं अनियमित्ता पब्भट्ठा समाहिजोगेहिं।*
ते कामभोगरसगिद्धा उववज्जंति आसुरे काए॥

वृ. 'इह' अस्मिन् जन्मनि 'जीवितं' असंयमजीवितम् 'अनियम्य' द्वादशविधतपोविधानादिनाऽनियन्त्र्य 'प्रभ्रष्टाः' च्युताः, केभ्यः ?-'समाहियोगेहिं'ति समाधिः-चित्तस्वास्थ्यं तत्प्रधाना योगाः-शुभमनोवाक्कायव्यापाराः समाधियोगा, यद्वा समाधिश्च-शुभचित्तैकाग्रता योगाश्च-पृथगेव प्रत्युपेक्षणादयो व्यापाराः समाधियोगाः तेभ्यः, अनियन्त्रितात्मनां हि पदे पदे तद्भ्रंशसम्भव इति, 'ते' अनन्तरमुक्ताः कामभोगेषु अभिहितस्वरूपेषु रसः-अत्यन्तासक्तिरूपस्तेन गृद्धाः-तेष्वभिकाङ्क्षावन्तः कामभोगारसगृद्धाः, यद्वा रसाः-पृथगेव शृङ्गारादयो वा, भोगान्तर्गतत्वेऽपि चेषां पृथगुपादानमतिगृद्धिविषयताख्यापनार्थम् 'उपपद्यन्ते' जायन्ते 'आसुरे' असुरसम्बन्धिनि काये, असुरनिकाये इत्यर्थः, इदमुक्तं भवति-एवंविधाः किञ्चित् कादाचित्कमनुष्ठानमनुतिष्ठन्तोऽप्यसुरेष्वेवोत्पद्यन्ते इति सूत्रार्थः॥ ततोऽपि च्युतास्ते किमाप्नुन्तीत्याह-

मू. (२२३) *तत्तोऽविय उवट्टित्ता संसारं बहुं परियडंति ।*
बहुकम्मलेवलित्ताणं बोही होइ सुदुल्लहा तेसिं॥

वृ. 'ततोऽपि च' असुरनिकायाद् 'उद्वृत्य' तत्परित्यागेनान्यत्र गत्वा 'संसारं' चतुर्गतिरूपं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुशब्दस्य 'बहुपूपे धृतं श्रेय' इत्यादिषु विपुलवाचिनोऽपि दर्शनाद्बहुं-विपुलं विस्तीर्ण-मितियावत्, बहुप्रकारं वा चतुरशीतियोनिलक्षतया 'अनुपरियंति'त्ति अनुपरियन्ति, सातत्येन पर्यटन्तीत्यर्थः, पठन्ति च-'अनुचरंति'त्ति स्पष्टं, किंच-बहूनि च तान्यनन्तया कर्म्माणि च-क्रियामाणतया ज्ञानावरणादीनि बहुकर्म्माणि तानि लेप इव लेपो बहुकर्म्मणां वा लेप-उपचयो बहुकर्म्मलेपस्तेन लिप्ता-उपचिता बहुकर्म्मलेपलिप्तास्तेषा 'बोधिः' प्रेत्य जिनधर्म्मावाप्तिः 'भवति' जायते 'सुदुर्लभा' अतिशयदुरापा, 'तेषाम्' इति ये लक्षणादि प्रयुञ्जते, पठन्ति च-'बोही जत्थ सुदुल्लहा तेसिं'ति बोधिर्यत्र-संसारे सुदुर्लभा तेषाम्-अनुपरियतामिति योजनीयं, यतश्चैवमुत्तरगुणविराधनायां दोषस्ततस्तदाराधनायामेव यतितव्यमितिभावः इति सूत्रार्थः ॥ आह-किममी द्रव्यश्रमणा जानन्तोऽप्येवं लक्षणादि प्रयुञ्जते ?, उच्यते, लोभतः, अत एव तदाकुलितस्यात्मनो दूष्पूरतामाह-

मू. (२२४) कसिणंपि जो इमं लोयं पडिपुन्नं दलेज्ज एगस्स ।
तेनावि से न संतुस्से इह दुप्पूरए इमे आया ॥

वृ. 'कृत्स्नमपि' परिपूर्णमपि 'यः' सुरेन्द्रादिः 'इमं' प्रत्यक्षं 'लोकं' जगत् 'परिपूर्णं' धनधान्यहिरण्यादिभृतं 'दलेज्ज'त्ति दद्यात्, किं बहुभ्यः ? इत्याह-'एकस्स'त्ति एकस्मै कस्मैचित् कथञ्चिदाराधितवते, 'तेनापि' धनधान्यादिभृतसमस्तलोकदायकेन, हेतौ तृतीया, 'से' इति स 'न सन्तुष्येत्' न हृष्येत्, किमुक्तं भवति ?-ममैतावद्ददताऽनेन परिपूर्णता कृतेति न तृष्टिमाप्नुयात्, उक्तं हि-

"न वह्निस्तृणकाष्ठेषु, नदिभिर्वा महोदधिः ।
न चैवात्माऽर्थसारेण, शक्यस्तर्प्पयितुं क्वचित् ॥१॥
यदि स्याद्रत्नपूर्णोऽपि, जम्बूद्वीपः कथञ्चन ।
अपर्याप्तः प्रहर्षाय, लोभार्त्तस्य जिनैः स्मृतः ॥२॥"

'इतिः' एवमर्थे, एवम्-अमुनोक्तन्यायेन दुःखेन-कृच्छ्रेण-पूरयितुं शक्यः दुष्पूरः दुष्पूर एव दुष्पूरकः 'इमे'त्ति अयं प्रत्यक्षः 'आत्मा' जीवः, एतदिच्छायाः परिपूरयितुमशक्यत्वादिति सूत्रार्थः ॥ किमिति न सन्तुष्यतीति स्वसंविदितं हेतुमाह-

मू. (२२५) जहा लाभो तहा लोभो लाभा लोभो पवड्ढति ।
दोमासकयं कज्जं कोडीएवि न निट्ठियं ॥

वृ. 'यथा' येन प्रकारेण 'लाभः' अर्थावाप्तिः 'तथा' तेन प्रकारेण 'लोभः' गार्द्धयमभि-काङ्क्षेतियावत्, भवतीति शेपः, किमेवमित्याह-लाभाल्लोभः 'प्रवर्धते' प्रकर्षेण वृद्धिं भजते, इह च लाभाल्लोभः प्रवर्द्धत इति वचनाद्यथा तथेत्यत्र वीप्सा गम्यते, ततश्च-यथा यथा लाभस्तथा तथा लोभो भवतीत्युक्तं भवति, लाभाल्लोभः प्रवर्द्धत इत्यपि कुत इत्याह-द्वाभ्यां-द्विसङ्ख्याभ्यां माषाभ्यां-पञ्चरक्तिकामानाभ्यां क्रियते-निष्पाद्यत इति द्विमाषकृतम्, आर्षत्वाद्वर्त्तमानकाले क्तः, 'कार्यं' प्रयोजनं, तच्चेह दास्याः पुष्पताम्बूलमूलायरूपं 'कोट्याऽपि' सुवर्णशतलक्षा-त्मिकया 'न निष्ठित'मिति, तत्र तदनिष्ठितिः स्त्रीमूलेति तत्परिहार्यतोपदर्शनायाह-

मू. (२२६) नो रक्खसीसु गिज्झेज्जा गंडवच्छासु नेगचित्तासु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाओ पुरिसं पलोभित्ता खेल्लंति जहा व दासेहिं ॥

वृ. 'नो' नैव राक्षस्य इव राक्षस्यः-इव राक्षस्यः-स्त्रियः तासु, यथा हि राक्षस्यो रक्तसर्वस्वमपकर्षन्ति जीवितं च प्राणिनामपहरन्ति एवमेता अपि, तत्त्वतो हि ज्ञानादीन्येव जीवितं च अर्थश्च (सर्वस्वं) तानि च ताभिरपह्रियन्त एव, तथा च हारिलः-

"घातोद्धूतो दहति हुतभुग्देहमेकं नराणा, मत्तो नागः कुपितभुजगश्चैकदेहं तथैव।
ज्ञानं शीलं विनयविभवौदार्यविज्ञानदेहान्, सर्वानर्थान् दहति वनिताऽऽमुष्मिकानैहिकांश्च ॥"

'गिज्झेज्ज'त्ति गृह्ययेद्-अभिकाङ्क्षावान् भवेत्, कीदृशीषु ?-'गंडवच्छासु'त्ति गण्ड-गडु, इह चोपचितपिशितपिण्डरूपतया गलत्पूतिरुधिरार्द्रतासम्भवाच्च तदुपमत्वाद्गण्डे कुचावुक्तौ वे वक्षसि यासां तात्सथाभूतास्तासु, वैराग्योत्पादनार्थं चेत्थमुक्तं, तथाऽनेकानि-अनेकसङ्ख्यानि चञ्चलतया चित्तानि-मनांसि यासां ता अनेकचित्तास्तासु, आह च-

"अन्यस्याङ्के ललति विशदं चान्यमालिङ्गय शेते,
अन्यं वाचा चपयति हसत्यन्यमन्यं च रौति।
अन्यं द्वेष्टि स्पृशति कशति प्रार्णुते वाऽन्यमिष्टं,
नार्यो नृत्यत्तडित इव धिक्र चञ्चलाश्चालिकाश्च ॥"

तथा 'जाओ'त्ति याः 'पुरुषं' मनुष्यं, कुलीनमपीति गम्यते, 'प्रलोभ्य' त्वमेव मे शरणं त्वमेव च प्रीतिकृदित्यादिकाभिर्वाग्भिर्विप्रतार्य क्रीडन्ति, 'जहा व'त्ति वाशब्दस्यैवकारार्थत्वाद् यथैव दासैः, एह्यागच्छ मा यासीरित्यादिवितथोक्तिप्रभृतिभिः क्रिडाभिर्विलसन्तीति सूत्रार्थः ॥ पुनस्तासामेवातिहेयतां दर्शयन्नाह-

*मू. (२२७) नारीसु नो पगिज्झिज्जा इत्थीविप्पजहे अनगारे।
धम्मं च पेसलं नच्चा तत्थ ठवेज्ज भिक्खु अप्पाणं ॥*

वृ. 'नारीषु' स्त्रीषु 'नो' नैव 'प्रगृध्येत्' प्रशब्द आदिकर्म्मणि ततो गृद्धिमारभेतापि न, किं पुनः कुर्यादिति भावः, 'इत्थी विप्पजहे'त्ति स्त्रियो विविधैः प्रकर्षेण च जहाति-त्यजतीति स्त्रीविप्रजहः, उणादयो बहुलमिति बहुलवचनाच्छः, यद्वा-'इत्थि'त्ति स्त्रियो 'विप्पजहे'त्ति विप्रजह्यात्, पूर्वत्र च नारीग्रहणान्मनुष्यस्त्रिय एवोक्ता, इह च देवतिर्यक्सम्बन्धिन्योऽपि त्याज्यतयोच्यन्ते इति न पौनरुक्त्यमुपदेशत्वाद्वा, 'अनगारः' प्राग्वत्, किं पुनः कुर्यादित्याह-'धर्म्ममेव' ब्रह्मचर्यादिरूपं, चस्यावधारणार्थत्वात्, 'पेशलम्' इह परत्र चैकान्तहितत्वेनातिमनोज्ञं 'ज्ञात्वा' अवबुध्य, 'तत्र' इति धर्म्मे 'स्थापयेत्' निवेशयेद् 'भिक्षुः' यतिः आत्मानं विषयाभिलाषनिषेधत इति सूत्रार्थः ॥ अध्ययनार्थोपसंहारमाह-

*मू. (२२८) इइ एस धम्मे अक्खाए कविलेणं च विसुद्धपन्नेणं।
तरिहिंति जे उ काहिंति तेहिं आराहिया दुवे लोगु ॥ त्तिबेमि*

वृ. 'इति' अनेन प्रकारेण 'एषः' अनन्तरमुक्तरूपः 'धर्मः' यतिधर्म्मः आङिति सकलतत्स्वरूपाभिव्याप्त्या ख्यातः-कथितः आख्यातः, केनेत्याह-'कपिलेन' इत्यात्मानमेव निर्दिशति, पूर्वसङ्गतिकत्वादमी मद्वचनतः प्रतिपद्यन्तामिति, 'चः' पूरणे, 'विशुद्धप्रज्ञेन' निर्मलावबोधेन, अतोऽर्थसिद्धिमाह-'तरिहिंति'त्ति तरिष्यन्ति, भवार्णवमिति शेषः, 'ये' इत्यविशेषा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिधानं, 'तुः' पूरणे, ततो विशेषत एव तरिष्यन्ति, ये 'करिष्यन्ति' अनुष्ठास्यन्ति, प्रक्रमादमुं धर्म्मम्, अन्यच्च 'तैः' आराधितौ' सफलीकृतौ 'द्वौ' द्विसङ्ख्यौ लोकौ, इहलोकपरलोकावित्यर्थः, इह महाजनपूज्यतया परत्र च निःश्रेयसाभ्युदयप्राप्त्येति सूत्रार्थः ॥

'इतिः' परिसमाप्तौ ब्रवीमि इति नयाश्च प्राग्वदिति ॥

अध्ययन-८ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तरध्ययन सूत्रे
अष्टमम् अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-९ नमिप्रवज्या

वृ. उक्तमष्टममध्ययनं, साम्प्रतं नवममारभ्यते-अस्य चायमभिसम्बन्धः-अनन्तराध्ययने निर्लोभत्वमुक्तम्, इह तु तदनुष्ठितेः इहैव देवेन्द्रादिपूजोपजायत इति दर्श्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयवर्णनं पूर्ववद्यावन्नामनिष्पन्ननिक्षेपेऽन्वर्थानुगतं नमिप्रव्रज्येतिनाम, अतो नमेः प्रव्रज्यायाश्च निक्षेपो वाच्य इत्युभयनिक्षेपाभिधानायाह

नि. [२६०] निक्खेवो उ नमिंमि चउव्विहो दु० ॥

नि. [२६१] जाणग शरीरे मविए० ॥

नि. [२६२] नमिआउनामगोय वेयंतो भावतो नमी होइ।
तस्स य खलु पव्वज्जा नमिपव्वज्जंति अज्झयणं ॥

नि. [२६३] पव्वज्जानिक्खेवो चउव्विहो अन्नतित्थिगा दव्वे।
भावंमि उ पव्वज्जा आरंभपरिग्गहच्चाओ ॥

वृ. 'निक्षेपः' न्यासः, 'तुः' पूरणे, 'नमौ' नमिविषयः 'चतुर्विधः' चतुर्भेदो नामादिः, तत्र च नामस्थापने सुगमै, 'द्विविधः' द्विभेदो भवति 'द्रव्ये' द्रव्यविषयः, तमेवाह-आगमनो-आगमतः, तत्रागमतो ज्ञाताऽनुपयुक्तः, नोआगमतश्च स 'त्रिविधः' त्रिभेदः, 'जाणगसरीरभविए तव्वइरित्ते य'त्ति नमिशब्दस्य प्रत्येकमभिसम्बन्धात् ज्ञशरीरनमिर्भव्यशरीरनमिस्तद्व्यतिरिक्तनमिश्च, 'स' तद्व्यतिरिक्तनमिर्भवेत् त्रिविधः-एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, एतत्स्वरूपं च प्राग्वत्, तथा नम्यायुर्नामगोत्रं वेदयन् भावतो नमिर्भवति, 'तस्य' मेः 'खलु' इति वाक्यालङ्कारे, 'प्रव्रज्या' वक्ष्यमाणस्वरूपा, इहाभिधीयत इत्युपस्कारः, अतश्च 'नमिप्रव्रज्ये'ति नमप्रव्रज्याख्यमिदमध्ययनमेव प्रस्तुतमुच्यत इति शेषः,

प्रव्रज्यानिक्षेपश्चतुर्विधो नामादिः, नामस्थापने प्राग्वत्, अन्यानि च तान्यनर्हत्प्रणीततीर्थादन्यत्वेन तीर्थानि च-निजनिजाभिप्रायेणभवजलधेः तरणं प्रति करणतया विकल्पितत्वेनान्यतीर्थानि तेषु भवा अन्यतीर्थिकाः, अध्यात्मादेराकृतिगणत्वाट्ठक्, ते च शाक्यसरजस्कादयः, 'द्रव्ये' विचार्ये, प्रव्रज्येति सम्बन्धः, प्रव्रज्यायोगाच्च त एव प्रव्रज्येत्युच्यते, यथा दण्डयोगात् पुरुषोऽपि दण्ड इति, इह चान्यतीर्थिकशब्देन विवक्षितभावविकलतैव सूचिता, ततोऽन्यतीर्थ्याः स्वतीर्थ्या वा प्रव्रज्यापर्यायशून्या द्रव्यप्रव्रज्येति भण्यन्ते,

अत एवाह-भावे तु विचार्यमाने प्रव्रज्या आरम्भश्च-पृथिव्याद्युपमर्दः परिग्रहश्च-मूर्च्छा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरम्भपरिग्रहौ तयोस्त्यागः-परिहारः आरम्भपरिग्रहत्यागः, न तु बहिर्वेषधारणाद्येवेति गाथाचतुष्टयार्थः ॥ इह च यद्यपि नमिप्रव्रज्यैव प्रक्रान्ता, तथापि यथाऽयं प्रत्येकबुद्धस्तथाऽन्येऽपि करकण्ड्वदयस्त्रयस्तत्समकालसुरलोकच्यवनप्रव्रज्याग्रहणकेवलज्ञानोत्पत्तिसिद्धगतिभाजः इति प्रसङ्गतो विनेयवैराग्योत्पादनार्थं तद्वक्तव्यतामपि विवक्षुरिदमाह निर्युक्तिकृत्-

नि.[२६४] करकंडू कलिंगेसु, पंचालेसु य दुम्मुहो ।
नमीराया विदेहेसु, गंधारेसु य नग्गई ॥

नि.[२६५] वसभे अ इंदकेऊ वलए अंबे अ पुप्फिए बोही ।
करकंडु दुम्मुहस्सा नमिस्स गंधाररन्नो अ ।

नि.[२६६] मिहिलावइस्स नमिनो छम्मासायंक विज्जपडिसेहो ।
कत्तिअ सुमिणगदंसणअहिमंदरनंदिघोसे अ ॥

नि.[२६७] दुन्निवि नमी विदेहा रज्जाइं पयहिऊण पव्वइआ ।
एगो नमितित्थयरो एगो पत्तेयबुद्धो अ ॥

नि.[२६८] जो सो नमितित्थयरो सो साहस्सिय परिव्वुडो भयवं ।
गंथमवहाय पव्वइ पुत्तं रज्जे ठवेऊणं ॥

नि.[२६९] बीओवि नमीराया रज्जं चइऊण गुणसयसमग्गं ।
गंथमवहाय पव्वइ अहिगारो एत्थ बिइएणं ॥

नि.[२७०] पुप्फुत्तराउ चवणं पव्वज्जा होइ एगसमएणं ।
पत्तेयबुद्धकेवलि सिद्धि गया एगसमएणं ॥

नि.[२७१] सेअं सुजायं सुविभत्तसिंगं, जो पासिआ वसहं गुट्ठमज्झे ।
रिद्धिं अरिद्धिं समुपेहिआ णं, कलिंगरायावि समिक्ख धम्मं ॥

नि.[२७२] जो इंदकेउं समलंकियं तु, दट्ठुं पडंतं पविलुप्पमाणं ।
रिद्धिं अरिद्धिं समुपेहिआ णं, पंचालरायावि समिक्खधम्मं ॥

नि.[२७३] वुड्ढिं च हानिं च ससीव दट्ठुं, पूरावरेगं च महानईणं ।
अहो अनिच्चं अधुवं च नच्चा, पंचालरायावि समिक्ख धम्मं ॥

नि.[२७४] बहुआणं सद्दयं सुच्चा, एगस्स य असद्दयं ।
वलयाण नमीराया, निक्खंतो मिहिलाहिवो ॥

नि.[२७५] जो चूअरुक्खं तु मणाभिरामं, समंजरीपल्लवपुप्फचित्तं ।
रिद्धिं अरिद्धिं समुपेहिआ णं, गंधाररायावि समिक्ख धम्मं ॥

नि.[२७६] जया रज्जं च रट्ठं च, पुरं अंतेउरं तहा ।
सव्वमेअं परिच्चज्ज, संचयं किं करेसिमं ? ॥

नि.[२७७] जया ते पेइए रज्जे, कया किच्चकरा बहू ।
तेसिं किच्चं परिच्चज्ज, अज्ज किच्चकरो भवं ॥।

नि.[२७८] जया सव्वं परिच्चज्ज, मुक्खाय घडसी भवं ।
परं गरहसी कीस ?, अत्तनीसेसकारए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[२७९] मुक्खमग्गं पवन्नेसु, साहूसु बंभयारिसु।
अहिअत्थं निवारिंतो, न दोसं वत्तुमरिहसि॥

वृ. एतदर्थस्तु प्रायः सम्प्रदायादवसेय इति तावत् स एवोच्यते-चंपानयरीए दहिवाहणो राया, चेडगधूया पउमावती देवी, तीसे दोहलो-किहाहं रायन्नेवत्थेण नेवत्थिया उज्जाण-काणनाणि विहरेज्जा ?, सा उल्लगसरीरा जाया, राया पुच्छति, ताधे राया य सा य जयहत्थिंमि आरूढा, राया छत्तं धरेइ, गया उज्जाणं, पढमपाउसं च, सीयलएणं मट्टियागंधेणं हत्थी अब्भाहतो वनं संभरति, नियट्टो वनाभिमुहो पयातो, जनो न तरति ओलगिउं, दोवि अडविं पवेसियाइं, राया वडरुक्खं पेच्छइ, देविं भणइ-एयस्स वडस्स हेट्ठेण जाहित्तिति ता तुमं साखं गेण्हेज्जासि, ताए पडिसुयं, न तरति, राया दक्खो तेन साहा गहिया, सो उत्तिन्नो, निराणंदो गतो चंपं।

सावि य इत्थिया नीया निम्मानुसं अडविं, जाव तिसायितो पेच्छति दहं महतिमहालयं, तत्थ ओइन्नो अभिरमति हत्थी, इमावि सणियं २ उइन्ना तलागातो, न दिसातो जाणइ एक्काए दिसाए सागरं भत्तं पच्चक्खाइत्ता पहाविया, जाव दूरं गया ताव तावसो दिट्ठो, तस्स मूलं गया, अभिवातितो, पुच्छति-कतोऽसि अम्मो इहं आगया ?, ताहे कहेइ-अहं चेडगस्स धूया, जाव इहं हत्थिणा आणीया, सो य तावसो चेडगनियल्लतो, तेन आसासिया-मा बीहेहित्ति, ताहे से वनफलानि दाऊणं एक्काए दिसाए अडवीओ नीणिया, एत्तोहिंतो हलच्छित्ता भूमी तं न अक्कमामो, एसो दंतपुरस्स विसतो दंतचक्को राया, तातो अडवीतो निग्गया, दन्तपुरे अज्जाणं मूले पव्वइया, पुच्छच्छियाए गब्भो न अक्खातो, पच्छा मसाणपानो, तेन गहितो, भज्जाए अप्पितो, अवकिन्नतोत्ति नामं कयं, सा अज्जा तीए पाणीए समं मेत्तिं करेइ, सा अज्जा ताहि संजईहिं पुच्छिया कहिं गब्भो ?, भणइ-मयगो जातो, ता मे उज्झितो, सो तत्थ संवड्ढति। ताहे दारगरूवेहिं समं रमइ, सो ताणि डिक्करूवाणि भणइ-अहं तुब्भं राया ममं करं देह, सो लुक्खकच्छूए गहितो, तानि भनइ-ममं कंडूयह, ताहे से करकंडुत्ति नामं कयं, सो ताए संजईए अनुरत्तो, सा य से मोयए देइ, जं च भिक्खं लद्धं लहेइ।

संवड्डिओ सो सुसाणं रक्खति, तत्थो दो संजया तं मसाणं केणति कारणेन अतिगता, जाव एगत्थ वंसकुडंगे दंडगं पेच्छंति, तत्थ एगो दंडलक्खणं जाणति, सो भणति-जो एयं दंडगं गिण्हति सो राया होतित्ति, किंतु पडिच्छियव्वोत्ति जाव अन्नाणि चत्तारि अंगुलाणि वड्ढति ताहे जोग्गोत्ति। तं तेणं मायंगचेडएणं सुयं, एक्केण धिज्जाइएण य, ताधे सो धिज्जाइयिगो अप्प-सागारियं तस्स चउरंगुलं खणिऊण छिंदेइ, तेन य चेडएण दिट्ठो, सो उद्दालिओ, सो तेन धिज्जा-इएण करणं नीतो भणइ-देहि दंडगं, सो भणइ-मम मसाणे, न देमि, धिज्जाइओ भणओ-अन्नं गिण्ह, सो निच्छइ, भणति य-एएण मम कज्जंति, सो दारगो न देइ, ताहे सो दारगो पुच्छिओ-किं न देहि ?, भणई य-अहं एयस्स दंडगस्स पहावेण राया होहामित्ति, ताहे कारणिया हसिउणं भणंति-जया तुमं राया होज्जासि तया एयस्स तुमं गामं देज्जासि, पडिवण्णो सो, तेन धिज्जाइएण अन्ने धिज्जाइया गहिया-जहा एयं मारित्ता हरामो, तं तस्स पियाए सुयं, तानि तिन्निवि नट्ठाणि जाव कंचनपुरं गयाणि। तत्थ राया मरइ अपुत्तो, आसो अहियासितो, तस्स बाहिं सुयंतस्स मूलं आगओ, पयाहिणीकाऊण ठितो, जाव नायरा पिच्छंति लक्खणजुत्तं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयजयसद्दो कतो, नंदीतूरं आहयं, इमोवि जंभंतो उट्ठिआ, वीसत्थो आसं विलग्गो, पवेसिज्जइष मायंगो त्ति धिज्जाइगा न देंति पवेसं, ताहे तेन दंडरयणं गहियं, तं जलिउमारद्धं, ते भीया ठिया, ताहे तेन वाडहाणगा हरिएसा धिज्जाइया कया, उक्तं च-

"दधिवाहनपुत्रेण, राज्ञा तु करकण्डुना।
वाटहानकवास्तव्याश्चण्डाला ब्राह्मणीकृताः ॥"

तस्स य घरनामं अवकिन्नगोत्ति, पच्छा से तं चेव चेडगकयणामं पतिट्ठियिं करकंडुत्ति। तहिं सो धिज्जातितो आगतो, देहि मम गामं, भणति-जो ते रुच्चति, सो भणइ-मम चंपाए घरं, तो तहिं देहि, ताहे दधिवाहणस्स लेहेइ-देहि मम एगं गामं, अहं तुज्झं जं रुच्चइ गामं वा नगरं वा तं देमि, सो रुट्ठो दुट्ठमायंगो अप्पाणं न जाणयत्ति, जो ममं लेहं देइत्ति॥ दूएण पडिआगवएण कहियं, करकंडू कुवितो, चंपा रोहिया, जुद्धं वट्टति, ताए संजईए सुयं, मा जनक्खओ होहितित्ति करकंडूं ओसारित्ता रहस्सं भिंदियत्ति, एस तव पियत्ति, तेन तानि अम्मापियरो पुच्छियाणि, तेहिं सब्भावो कहितो, मानेणं न न ओसरइ, ताहे सा चंपंअपइगया, रन्नो घरं अतीति, नाया पायपडियाओ दासीओ परुन्नातो, रायनावि सुयं, सोऽवि आगतो, वंदित्ता आसनं दाऊण तं गब्भं पुच्छति, सा भणइ-एसो जो एसणयरं रोहित्ता अच्छइ, तुट्ठो निग्गतो, मिलितो, दोवि रज्जाणि तस्स दाऊण दहिवाहणो पव्वतितो।

करकंडू य महासासनो जातो, सो य किर गोउलप्पितो, अनेगा तस्स गोउलगाणि जायाणि जाव सरयकालेन एगं गोवच्छयं घोरगत्तं सेयं तं पेच्छइ, भणति य-एयस्स मायरं मा दुहेज्जाहि, जया वड्ढितो हुज्जा तया अन्नाणं गावीणं दुद्धं पाएज्जाह, ते गोवा पडिसुनंति, सो उच्चत्तविसाणो खद्धवसभो जातो, राया पेच्छति, सो जुद्धिक्कओ जातो, पुनो कालेन राया आगतो पेच्छति-महाकायं जुन्नं वसभं, पड्डुएहिं परिघट्टयंतं, गोवे पुच्छइ-कहिं सो वसहोत्ति?, तेहिं सो दाइतो, पेच्छंतओ विसायं गतो, अनिच्चयं चिंतितो संबुद्धो 'सेयं सुजायं०' सुत्तं, 'गोट्ठंगणस्स०' 'पोराण०' इत्तो पंचालेसु जनवएसु कंपिल्लपुरं नयरं, तत्थ दुम्मुहो राया, सो यइंदकेउं पासति लोगेण महिज्जंतं अनेगकुडभीसहस्सपडिमंडियाभिरामं, पुनो अ विलुत्तं पडियं च मुत्तपुरीसाण मज्झो, सोऽवि संबुद्धो पव्वतितो 'जो इंदकेउं सुयलंकियं तु' सोऽवि विहरति २॥

इआ य विदेहे जनवए महिलाए य नयरीए नमी राया, तस्स दोहो जातो, देवी चंदनं घसति, बलियाणि खलखलिंति, सो भणति-कन्नाघातो होइ, देवीए एक्केक्कं अवनेंतीए सव्वाणि अवनीयाणि, एक्किक्कं ठियं, तं राया पुच्छइ-ताणि वलयाणि न खलखलिंति?, सा भणति-अवनीयाणि, सो तेन दुक्खेण अब्भाहतो परलोगाभिमुहो चिंतेति-बहुयाणं दोसो न एगस्स, जइ य एयातो रोगाओ मुच्चामि तो पव्वयामि, तया य कत्तियपुन्निमा वट्टति, एवं सो चिंतितो पासुत्तो, पभायाए श्यनीए सुमिनए पासति-सेयं नागरायं मंदरोवरि च अत्ताणमारूढं, नंदिघोसतूरेण य विबोहितो हट्ठतुट्ठो चिंतेइ-अहो पहाणो सुविनो दिट्ठोत्ति, पुनो चिंतइ-कहिं मया एवंगुणजातितो पव्वतो दिट्ठपुव्वोत्ति चिंतयंतेन जाती संभरिया, पुव्वं मानुसभवे सामन्नं काऊण पुप्फुत्तरे विमाणे उववन्नो आसि, तत्थ देवत्ते मंदरो जिनमहिमाइसु आगएण दिट्ठपुव्वोत्ति संबुद्दो पव्वतितो 'बहुयाण०-'सिलोगो ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इओ य गंधारजनविसएसु पुरिसपुणं नाम नयरं, तत्थ नगगती राया, सो य अन्नया अनुजत्तं निग्गतो पेच्छइ-चूयं कुसुमियं, तेनेगा मंजरी गहिया, एवं खंधावारेणं लयंतेणं कट्ठावसेसो कतो, पडिनियत्तो पुच्छति-कहिं सो चूयरुक्खो ?, अमच्चेण अक्खातो एसोत्ति, तो किह कट्ठाणि कतो ?, भणति-तुब्भेहिं एक्को मंजरी गहिया, पच्छा सव्वेणवि जनेण गहिया, सो चिंतेइ-एवं रज्जसिरि त्ति, जाव रिद्धी ताव सोहति, अलाहि 'जो चूय०' गाहा, सोऽवि विहरति ४॥

चत्तारिवि विहरमाणा खिइपतिट्ठिए नयरे चाउद्दारं देउलं, पुव्वेण करकंडू पविट्ठो, दुम्मुहो दक्खिणेण, किह साहुस्स अन्नामुहो अच्छामित्ति तेन वाणमंतरेण दक्खिणपासेवि मुहं कयं, नमी अवरेण, तओऽवि मुहं कयं, गंधारो उत्तरेण, तओऽवि मुहं कयं।

तस्स किर करकंडुस्स आबालत्तणा सा कंडू अत्थि चेव, तेन कंडूयगं गहाय मसिणं कण्णो कंडूइतो, तं तेन एगत्थ संगोवियं, तं दुम्मुहो पेच्छइ, सो भणइ-'जया रज्जं०' सिलोगो, जाव करकंडू पडिवयणं न देति ताव नमी वयणसमकं इमं भणइ-'जया ते पेतिते रज्जे०' सिलोगो, किं तुमं एयस्स आउत्तगोत्ति भणति, ताहे गंधारो भणति-'जया सव्वं परिच्चज्ज०' सिलोगो, ताहे करकंडू भणति-'मोक्खमग्गपवन्नाणं०' सिलोगो "रूसऊ वा परो मा वा विसं वा परियत्तउ। भासियव्वा हिया भासा, सपक्खगुणकारिया॥" इत्येष सम्प्रदायः।

एष एव च गाथाकदम्बकभावार्थः, अक्षरार्थस्तु स्पष्ट एव, नवरं मिथिला नाम नगरी, तस्याः पतिः-स्वामी मिथिलापतिस्तस्य, अनेनान्येषामपि तत्पतीनां सम्भवात् तद्व्यवच्छेदमाह, 'नमेः' नमिनाम्नः, 'छम्मासायंकविज्जपडिसेहो'त्ति षण्मासानातङ्को-दाहज्वरात्मको रोगः षण्मासातङ्कः तत्र वैद्यैः- भिषग्भिः, प्रतिषेधो-निराकरणम्, अचिकित्स्योऽयमित्यभिधानरूपः षण्मासातङ्कवैद्यप्रतिषेधः, 'कत्तिय'त्ति कार्तिकमासे 'सुविनगदंसणंति' स्वप्न एव स्वप्नकस्तस्मिन् दर्शनं स्वप्नदर्शनम्, अभूदिति शेषः, कः ?, यः 'अहिमंदर'त्ति अहिमन्दरयोः नागराजाचलराजयोः 'नंदिघोसे येत्ति' द्वादशतूर्यसङ्घातो नन्दी तस्या घोषः, स च स्वप्नमवलोकयतो जातः, तेन चासौ प्रतिबोधितः इत्युपस्कारः।

इह च मिथिलापतिर्नमिरित्युक्तौ मा भूत्तथाविधस्य तीर्थकरस्यापि नमेः सम्भवाद्यामोह इति 'द्वौ नमी वैदेहौ' इत्याद्युक्तं। तथा 'पुप्फुत्तरातो'त्ति पुष्पोत्तरविमानाच्च्यवनं-भ्रंशनम्, एकसमयेनेति योज्यते, प्रव्रज्या च-निष्क्रमणं भवत्येकसमयेनैव, तथा प्रत्येकम्-एकैकं हेतुमाश्रित्य 'बुद्धाः' अवगततत्त्वाः प्रत्येकबुद्धाः, 'केवलिनः' उत्पन्नकेवलज्ञानाः, 'सिद्धिगताः' मुक्तिपदप्राप्ताः, त्रयाणामपि कर्मधारयः, एकसमयेनैवेति चतुर्णामपि समसमयसम्भवात्, ।

तथा 'सेयं सुजायं'त्ति श्वेतं वर्णतः सुजातं प्रथमत एवाहीनसमस्ताङ्गोपाङ्गतया, सुष्ठु-शोभने विभक्ते-विभागेनावस्थिते शृङ्गेविषामे यस्य स तथा तम्, ऋद्धि-बलोपचयात्मिकाम् अनृद्धिः-तस्यैव बलापचयतस्तर्णकादिपरिभवरूपां 'समुपेहिया णं' ति सम्यगुत्प्रेक्षेति-पर्यालोच्य पाठान्तरतः 'समुत्प्रेक्षमाणो' वा कलिङ्गराजोऽपीत्यत्रापिशब्द उत्तरापेक्षया समुच्चये। तथा 'इन्द्रकेतुम्' इन्द्रध्वजं 'प्रविलुप्यमान' मिति जनैः स्वस्ववस्त्रालङ्कारादिग्रहणतः इतश्चेतश्च विक्षिप्यमाणं। तथा 'पूरावरेयं'त्ति पूरः-पूर्णता अवरेको-रिक्तताऽनयोः समाहारे पूरावरेकं। तथा 'समञ्जरीपल्लवपुप्फचित्तं' सह मञ्जरीभिः-प्रतीताभिः पल्लवैश्च-किशलयैर्यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुष्पाणि-कुसुमानि तैश्चित्रः-कुर्बुरः मञ्जरीपल्लवपुष्पचित्रस्तं, यद्वा सहमञ्जरीपल्लवपुष्पैर्वर्तते यः स तथा चित्र-आश्चर्यो ऽनयोर्विशेषणसमासः, 'समिक्ख'त्ति आर्षत्वात् समीक्षते पर्यालोचयति, अनेकार्थत्वादङ्गीकुरुते वा, वर्तमाननिर्देशः प्राग्वत्, यद्वा 'समिक्ख'त्ति समैक्षिष्ट समीक्षितवान् 'धर्मं' यतिधर्मं। यदा 'ते' त्वया 'पैतृके' पितुरागते राज्ये कृता-विहिताः कृत्यानि कुर्वन्ति-अनुतिष्ठन्ति कृत्यकरा-नियोगिनो बहवः-प्रभूताः, तदैव कृत्यकरत्वं स्वयं तव कर्तुमुचितमासीदित्युपस्कारः, 'तेषामि'ति कृत्यकराणां कृत्यं-परापराधपरिभावनादि कर्तव्यं 'परित्यज्य' व्रताङ्गीकारादपहाय अद्य 'कृत्यकरो' नियुक्तकः-अन्यदोषचिन्तको 'भवान्' त्वं, किमिति जात इति शेषः। तथा 'मोक्खाय घडसी'ति प्राकृतत्वान्मोक्षाय-मोक्षार्थं 'घटते' चेष्टते, तथा 'अत्तणिस्सेसकारए' त्ति आत्मनो निःशेषमिति-शेषाभावं प्रक्रमात् कर्मणः करोति-विधत्त इत्यात्मनिःशेषकारकः, यद्वा 'निस्सेस'त्ति निःश्रेयसो मोक्षस्तत्कारको।

'मोक्षमार्गं मुक्त्यध्यानं 'प्रतिपन्नेषु' अङ्गीकृतवत्सु साधुषु ब्रह्मचारिषु 'अहियत्थं'ति अहितार्थं 'निवारयन्' निषेधयन् 'न दोषं' परापवादलक्षणमस्येति शेषः, 'वक्तुम्' अभिधातुमर्हसि, यथा हि भवान् अहितान्निवारयन्, कथं गर्हसीत्यादि, एवं नमिरपि अद्य कृत्यकरो भवानिति कृत्यकरत्वलक्षणादहितान्निवारयति, तथा दुर्मुखोऽपि सञ्चयं किं करोषि ? इति सञ्चयत एवाहितान्निषेधयतीति नायं परापवाद इति वक्तुमुचितं, यद्वा-'अहियत्थं निवारिंतो'त्ति सुब्व्यत्ययादहितार्थान्निवारयन्तं न 'दोष'मिति मतुब्लोपान्न दोषवन्तं वक्तुमर्हसि, तथा चार्षम्-"रूसऊ वा परो ना वा, विसं वा परियत्तउ। भासियव्वा हिया भासा, सुपक्खगुणकारिया॥"
इत्यवसितो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्यावसरः, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (२२९) *चइऊण देवलोगाओ उववन्नो मानुसंमि लोगंमि।*
उवसंतमोहनिज्जो सरती पोराणियं जाइं॥

वृ. च्युत्त्वा 'देवलोकात्' प्रतीतात्, 'उत्पन्नः' जातः 'मानुषे' मानुषसम्बन्धिनि 'लोके' प्राणिगणे उपशान्तम्-अनुदयं प्राप्तं मोहनीयं-दर्शनमोहनीयं यस्यासावुपशान्तमोहनीयः 'स्मरति' चिन्तयति, स्मेति शेषः, वर्तमाननिर्देशो वा प्राग्वत्, कामित्याह-'पोराणियं'ति पुराणामेव पौराणिकी, विनयादित्वात् ठक्, चिरन्तनीमित्यर्थः, 'जातिम्' उत्पत्तिं, देवलोकादाविति प्रक्रमः, तद्गतसकलचेष्टोपलक्षणं चेह जातिरिति सूत्रार्थः॥ ततः किमित्याह-

मू. (२३०) *जाइं सरित्तु भयवं सहसंबुद्धो अनुत्तरे धम्मे।*
पुत्तं ठवित्तु रज्जे अभिनिक्खमति नमी राया॥

वृ. 'जातिम्' उक्तरूपां स्मृत्वा, भगशब्दो यद्यपि धैर्यादिष्वनेकेषु अर्थेषु वर्तते, यदुक्तं-
"धैर्यसौभाग्यमाहात्म्ययशोऽर्कश्रुतधीश्रियः।
तपोऽर्थोपस्थपुण्येशप्रयत्नतनवो भगाः॥"इति,

तथापीह प्रस्तावाद्बुद्धिवचन एव गृह्यते, ततो भगो-बुद्धिर्यस्यास्तीति भगवान्, सहत्ति-स्वयमात्मनैव सम्बुद्धः-सम्यगवगततत्त्वः सहसम्बुद्धो, नान्येन प्रतिबोधित इत्यर्थः, अथवा 'सहस'त्ति आर्षत्वात् सहसा-जातिस्मृत्यनन्तरं झगित्येव बुद्धः, क्वेत्याह-'अनुत्तरे' प्रधाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'धर्म्मे' चारित्रधर्मे 'पुत्रं' सुतं 'स्थापयित्वा' निवेश्य, क्व ?-राज्ये 'अभिनिष्क्रामति' धर्माभिमुख्येन गृहस्थपर्यायान्निर्गच्छति, स्मेतीहापि शेषः, ततश्च प्रव्रजितवानित्यर्थः, प्राग्वत् तिङ्व्यत्ययेन वा व्याख्येयं, 'नमिः' नमिनामा राजा पृथिवीपतिरिति सूत्रार्थः ॥ स्यादेतत्, कुत्रावस्थितः ? कीदृशान् वा भोगान् भुक्त्वा सम्बुद्धः ? किं वाऽभिनिष्क्रामन् करोतीत्याह-

मू. (२६१) *सो देवलोगसरिसे अंतेउरवरगतो वरे भोए।*
भुंजितु नमी राया बुद्धो भोगे परिच्चयइ ॥

वृ. 'सः' इत्यनन्तरमुद्दिष्टः 'देवलोगसरिसे'त्ति देवलोकभोगैः सदृशा देवलोकसदृशाः, मयूरव्यंसकादित्वान्मध्यपदलोपी समासः, 'अंतेउपवरगतो'त्ति वरं-प्रधानं तच्च तदन्तःपुरं च वरान्तःपुरं तत्र गतः-स्थितो वरान्तःपुरगतः, प्राकृतत्वाच्च वरशब्दस्य परनिपातः, वरान्तःपुरं हि रागहेतुरिति तद्गतस्य तस्य भोगपरित्यागाभिधानेन जीववीर्योल्लासातिरेक उक्तः, तत्रापि कदाचिद्वराः शब्दादयो न स्युः तत्सम्भवे वा सुबन्धुरिव कुतश्चिन्निमित्तान्न भुञ्जीतापीत्याह- 'वरान्' प्रधानान् 'भोगान्' मनोज्ञशब्दादीन् 'भुक्त्वा' आसेव्य 'नमिः' नमिनामराजा 'बुद्धः' विज्ञाततत्त्वः 'भोगान' उक्तरूपान् परित्यजति, स्मेति शेषः। इह पुनर्भोगग्रहणमतिविस्मरणशीला अप्यनुग्राह्या एवेति ज्ञापनार्थमिति सूत्रार्थः ॥ किं भोगानेव त्यक्त्वाऽभिनिक्रान्तवान् ?

मू. (२३२) *मिहिलं सपुरजनवयं बलमोरोहं च परियणं सव्वं।*
चेच्चा अभिनिक्खंतो एगंतमहिट्ठिओ भयवं ॥

वृ. 'मिथिलां' मिथिलानाम्नीं नगरीं, सह पूरैः-अन्यनगरैर्जनपदेन च वर्तते या सा तथोक्ता तां न त्वेकामेव, 'बलं' हस्त्यश्वादि चतुरङ्गम् 'अवरोधं' च अन्तःपुरं 'परिजनं' परिवर्गं 'सर्वं' निरवशेषं, न तु तथाविधप्रतिबन्धानास्पदं किञ्चिदेव 'त्यक्त्वा' अपहाय 'अभिनिष्क्रान्तः' प्रव्रजितः, 'एगंत'त्ति एकः-अद्वितीयः कर्म्मणामन्तो यस्मिन्निति, मयूरव्यंसकादित्वात् समासः, तत एकान्तो-मोक्षस्तम् 'अधिष्ठितः' इव आश्रितवानिवाधिष्ठितः, तदुपायसम्यग्दर्शनाद्यासेवनादधिष्ठित एव वा, इहैव जीवन्मुक्त्यवाप्तेः, यद्वैकान्तं-द्रव्यतो विजनमुद्यानादि भावतश्च सदा

"एकोऽहं न च मे कश्चिन्नाहमन्यस्य कस्यचित्।
न तं पश्यामि यस्याहं, नासौ दृश्योऽस्ति यो मम ॥"

इति भावनात एक एवाहमित्यन्तो-निश्चय एकान्तः, प्राग्वत् समासः, तमधिष्ठितः, 'भगवान्' इति धैर्यवान् श्रुतवान् वेति सूत्रार्थः ॥ तत्रैवमभिनिष्क्रामति यदभूत्तदाह-यदिवा यदुक्तं 'सर्वं परित्यज्याभिनिष्क्रान्त' इति, तत्र कीदृक् तत् त्यज्यमानमासीदित्याह-

मू. (२३३) *कोलाहलगब्भूतं आसी मिहिलाए पव्वयंतंमि।*
तइया रायरिसिम्मि नमिम्मि अभिनिक्खमंतंमि ॥

वृ. कोलाहलः-विलपिताऽऽक्रन्दितादिकलकलः कोलाहल एव कोलाहलकः स भूत इति-जातो यस्मिंस्तत् कोलाहलकभूतम् आहितादेराकृतिगणत्वान्निष्ठान्तस्य परनिपातः, यदिवा भूतशब्द उपमार्थः, ततः-कोलाहलकभूतमिति कोलाहलकरूपतामिवापन्नं हा तात ! मातरित्यादिकलकलाकुलिततया 'आसीत्' अभूत् मिथिलायां, सर्वं गृहविहारारामादीति प्रक्रमः, क्व सति ?-'प्रव्रजति' प्रव्रज्यामाददाने 'तदा' तस्मिन् काले, राजा चासौ राज्याव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थामाश्रित्य ऋषिश्च तत्कालापेक्षया राजर्षिः, यदिवा राज्यावस्थायामपि ऋषिरिव ऋषिः-क्रोधादिषड्वर्गजयात्, तथा च राजनीतिः-

"कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा।
षड्वर्गमुत्सृजेदेनं, तस्मिंस्त्यक्ते सुखी नृपः ॥"

तस्मिन् 'नमौ' नमिनाम्नि, 'अभिनिष्क्रामति' गृहात् कषायादिभ्यो वा निर्गच्छतीति

मू. (२३४) *अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं।*
सक्को माहणरूवेणं, इमं वयणमब्बवी ॥

वृ. 'अभ्युत्थितम्' अभ्युद्यतं 'राजर्षि' प्राग्वत् प्रव्रज्यैव स्थानं तिष्ठिन्ति सम्यग्दर्शनादयो गुणा अस्मिन्निति कृत्वा प्रव्रज्यास्थानं, प्रतीति शेषः, 'उत्तमं' प्रधानं, सुब्व्यत्ययेन सप्तम्यर्थे वा द्वितीया, ततः प्रव्रज्यास्थान उत्तमे 'अभ्युपगतं' तद्विषयोद्यमवन्तं 'शक्रः' इन्द्रो 'माहनरूपेण' ब्राह्मणवेषेण, आगत्येति शेषः, तदा हि तस्मिन् महात्मनि प्रव्रज्यां ग्रहीतुमनसि तदाशयं परीक्षितु-कामः स्वयमिन्द्र आजगाम, ततः स 'इदं' वक्ष्यमाणम्, उच्यत इति वचनं-वाक्यम् 'अब्रवीत्' उक्तवानिति सूत्रार्थः ॥ यदुक्तवांस्तदाह-

मू. (२३५) *किं नु भो अज्ज मिहिलाए, कोलाहलगसंकुला।*
सुच्चंति दारुणा सद्दा, पासाएसु गिहेसु अ ? ॥

वृ. 'किम्' इति परिप्रश्ने 'नु' इति वितर्के 'भो' इत्यामन्त्रणे 'अद्य' एतस्मिन् दिने 'मिथि-लायां' नगर्यां कोलाहलकेन-बहलकलकलात्मकेन सङ्कुलाः-व्याकुलाः कोलाहलकल-संकुलाः 'श्रूयन्ते' इत्याकर्ण्यन्ते 'शब्दा' ध्वनय इति सम्बन्धः, ते च कदाचिद्वन्दिवृन्दोदीरिता अपि स्युः तन्निराकरणायाह-दारयन्ति जनमनांसीति दारुणाः-विलपिताऽऽक्रन्दितादयः, क्व पुनस्ते ?-'प्रासादेषु' सप्तभूमादिषु 'गृहेषु' सामान्यवेश्मसु, यद्वा 'प्रासादो देवतानरेन्द्रा-णा'मितिवचनात् प्रासादेषु देवतानरेन्द्रसम्बन्धिष्वास्पदेषु 'गृहेषु' तदितरेषु चशब्दात्त्रिकच-तुष्कचत्वरादिषु चेति सूत्रार्थः ॥ ततश्च-

मू. (२३६) *एयमट्ठं निसामित्ता, हेउकारणचोइओ।*
ततो नमी रायरिसी, देविंदं इणमब्बीवी ॥

वृ. 'एनम्' अनन्तरोक्तम् 'अर्थं' इत्युपचारादर्थाभिधायिनं ध्वनिं 'निशम्य' आकर्ण्य हिनोति-गमयति विवक्षितमर्थमिति हेतुः, स च पञ्चावयववाक्यरूपः, कारणं च-अन्यथाऽ-नुपपत्तिमात्रं ताभ्यां चोदितः-प्रेरितः हेतुकारणचोदितः, कोलाहलकसङ्कुलाः दारुणाः शब्दां श्रूयन्त इत्यनेन हि उभयमेतत् सूचितं, तथाहि-अनुचितमिदं भवतोऽभिनिष्क्रमणमिति प्रतिज्ञा, आक्रन्दादिदारुणशब्दहेतुत्वादिति हेतुः, प्राणव्यपरोपणादिवदिति दृष्टान्तः, यद्यदाक्रन्दादि-दारुणशब्दहेतुस्तत्तद्धर्मार्थिनोऽनुचितं, यथा प्राणव्यपरोपणादि, तथा चेदं भवतोऽभिनि-ष्क्रमणमित्युपनयः, तस्मादाक्रन्दादिदारुणशब्दादिहेतुत्वादनुचितं भवतोऽभिनिष्क्रमणमिति निगमनमिति पञ्चावयवं वाक्यमिह हेतुः, शेषावयवविवक्षाविरहितं त्वाक्रन्दादिदारुणशब्दहेतुत्वं भवदभिनिष्क्रमणानुचितत्वं विनाऽनुपपन्न मिति एतावन्मात्रं कारणम्, अनयोस्तु, पृथगुपादानं प्रतिपाद्यभेदतः साधनवाक्यवैचित्र्यसूचनार्थं, तथा चाह श्रुतकेवली-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कत्थवि पंचावयवं दसहा वा सव्वहा न पडिसिद्धं ।
न य पुण सव्वं भन्नइ हंदी सवियारमक्खायं ॥"
(तथा) "जिनवयणं सिद्धं चेव भन्नती कत्थती उदाहरणं ।
आसज्ज उ सोयारं हेऊवि कहिंचि वोत्तव्वो ॥"

अथवाऽन्वयव्यतिरेकलक्षणो हेतुः, उपपत्तिमात्रं तु दृष्टान्तादिरहितं कारणं, यथा निरुपमसुखः सिद्धो ज्ञानानाबाधप्रकर्षात्, अन्यत्र हि निरुपमसुखासम्भवात् नोदाहरणमस्ति, दृष्टान्तश्च प्रकृष्ट-मत्यादिज्ञानानाबाधाः परमसुखिनो मुनय इति ज्ञानानाबाधप्रकर्षः निरुपमसुखत्वे हेतुरुच्यते,

"हेतू अनुगमवइरेगलक्खणो सज्झवत्थुपज्जातो ।
आहरणं दिट्ठंतो कारणमुववत्तिमेत्तं तु ॥"

इह हि आक्रमन्दादिदारुशब्दहेतुत्वमेव हेतुः, तस्योक्तन्यायेनान्वयान्वितत्वात्, सति चान्वये व्यतिरेकस्यापि सम्भवात्, इदमेव चान्वयव्यतिरेकविकलतया विवक्षितमुपपत्तिमात्रं कारणम्, एवं सर्वत्र कारणभावना कार्येत्यलं प्रसङ्गेन, प्रकृतमेव सूत्रमनुस्त्रियते, 'ततः' प्रेरणाऽनन्तरं 'नमिः' नमिनामा राजर्षिः 'देवेन्द्रं' शक्रम् 'इदं' वक्ष्यमाणम् 'अव्रवीत्' उक्तवानिति सूत्रार्थः ॥

मू. (२३७) मिहिलाए चेइए वच्छे, सीतच्छाए मनोरमे ।
पत्तपुप्फफलोवेते, बहूणं बहुगुणे सता ॥

वृ. 'मिथिलायां' पुरि चयनं चितिः-इह प्रस्तावात् पत्रपुष्पाद्युपचयः, तत्र साधुरित्यन्ततः प्रज्ञादेराकृतिगणत्वात् स्वार्थिकेऽणि चैत्यम्-उद्यानं तस्मिन्, 'वच्छे' त्ति सूत्रत्वाद्विशब्दलोपे वृक्षैः शीता-शीतला छाया यस्य तच्छीतच्छायं तस्मिन्, मनः-चित्तं रमते-धृतिमाप्नोति यस्मिन् तन्मनोरमं-मनोरमाभिधानं तस्मिन्, पत्रपुष्पफलानि प्रतीतानि तैरुपेतं-युक्तं पत्रपुष्पफलोपेतं तस्मिन्, 'बहूनां' प्रक्रमात् खगादीनां, बहवो गुणा यस्मात्तत् तथा तस्मिन्, कोऽर्थः ?-फलादिभिः प्रचुरोपकारकारिणि 'सदा' सर्वकालमिति सूत्रार्थः ॥ तत्र किमित्याह-

मू. (२३८) वाएण हीरमाणंमि, चेइयंमि मनोरमे ।
दुहिया असरणा अत्ता, एए कंदंति भो ! खगा ॥

वृ. 'वातेन' वायुना 'ह्रियमाणे' इतस्ततः क्षिप्यमाणे, वातश्च तदा शक्रेणैव कृत इति सम्प्रदायः, चितिरिहेष्टकादिचयः, तत्र साधुः-योग्यश्चित्यः प्राग्वत् स एव चैत्यस्तस्मिन्, किमुक्तं भवति ?-अधोबद्धपीठिके उपरि चोच्छ्रितपताके 'मनोरमे' मनोऽभिरतिहेतौ, वृक्ष इति शेषः, दुःखं सञ्जातं येषां ते दुःखिताः 'अशरणाः' त्राणरहिता अत एव 'आर्ताः' पीडिताः 'एते' प्रत्यक्षाः 'क्रदन्ति' आक्रन्दशब्दं कुर्वन्ति 'भो' इत्यामन्त्रणे 'खगाः' पक्षिणः ।

इह च किमद्य मिथिलायां दारुणाः शब्दाः श्रूयन्ते ? इति यत्स्वजनजनाक्रन्दनमुक्तं तत् खगक्रन्दनप्रायम्, आत्मा च वृक्षकल्पः, तत्त्वतो हि नियतकालमेव सहावस्थितत्वेन उत्तरकालं च स्वस्वगतिगामितया द्रुमाश्रितस्वगोपया एवामि स्वजनादयः, उक्तं हि-

"यद्वद् द्रुमे महति पक्षिगणा विचित्राः, कृत्वाऽऽश्रयं हि निशि यान्ति पुनः प्रभाते ।
तद्वज्जगत्यसकृदेव कुटुम्बाजीवाः, सर्वे समेत्य पुनरेव दिशो भजन्ते ॥" इति,

ततश्चाऽऽक्रन्दादिदारुणशब्दहेतुत्वं हेतुत्वेनाभिधीयमानमसिद्धम्, एते हि स्वजनादयो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वातेर्यमाणद्रुमविश्लिष्यत्स्वगा इव स्वस्वप्रयोजनहानिमेवाऽऽशङ्कमानाः क्रन्दन्ति, आह च-

"आत्मार्थं सीदमानं स्वजनपरिजनो रौति हाहारवार्तो-
भार्या चात्मोपभोगं गृहविभवसुखं स्वं च यस्याश्च कार्यम्।
क्रन्दत्यन्योऽन्यमन्यस्त्विह हि बहुजनो लोकयात्रानिमित्तं,
यो वाऽन्यस्तत्र किञ्चिन्मृगयति हि गुणं रोदितीष्ठः स तस्मै ॥"

एवं चाऽऽक्रन्दादिदारुणशब्दानामभिनिष्क्रमणहेतुकत्वमसिद्धं, स्वप्रयोजनहेतुकत्वात् तेषां, तथा च भवदुक्ते हेतुकारणे असिद्धे एवेत्युक्तं भवतीति सूत्रार्थः ॥ ततश्च-

मू.(२३९) *एयमट्ठं निसामित्ता, हेउकारणचोइओ।*
ततो नमिं रायरिसिं, देविंदो इणमब्बवी ॥

वृ. एनमर्थं हेतुकारणयोः-अनन्तरसूत्रसूचितयोश्चोदितः-असिद्धोऽयं भवदभिहितो हेतुः कारणं चेत्यनुपपत्त्या प्रेरितः हेतुकारणचोदितः, ततो नमिं राजर्षिं देवेन्द्रः 'इदं' वक्ष्यमाणम् अब्रवीत् इति सूत्रार्थः ॥ किं तदित्याह-

मू.(२४०) *एस अग्गी अ वाओ अ, एयं डज्झति मंदिरं।*
भगवं! अंतेउरंतेणं, कीस णं नावपिक्खह ॥

वृ. 'एष' इति प्रत्यक्षोपलभ्यमानः 'अग्निश्च' वैश्वानरः 'वातश्च' पवनस्तथा 'एतदि'ति प्रत्यक्षं 'दह्यते' भस्मसात् क्रियते, प्रक्रमाद्वातेरितेनाग्निनैव, 'मन्दिरं' वेश्म, भवत्सम्बन्धीति शेषः, भगवन्निति पूर्ववद्, 'अन्तेउरंतेन'ति अन्तःपुराभिमुखं 'कीस'त्ति कस्मात्? 'णम्' इति वाक्यालङ्कारे 'नावप्रेक्षसे' नावलोकसे। इह च यद्यदात्मनः स्वं तत्तद्रक्षणीयं, यथा ज्ञानादि, स्वं चेदं भवतोऽन्तःपुरमित्यादिहेतुकारणभावना प्राग्वदिति सूत्रार्थः ॥

मू.(२४१) *एयमट्ठं निसामित्ता० ॥*

वृ. ततश्च 'एयं' सूत्रं प्राग्वत् ॥ किमब्रवीत्? इत्याह-

मू.(२४२) *सुहं वसामो जीवामो, जेसि मो नत्थि किंचणं।*
मिहिलाए डज्झमाणीए, न मे डज्झए किंचणं ॥

वृ. 'सुखं' यथा भवत्येवं 'वसामः' तिष्ठामः 'जीवामः' प्राणान् धारयामः, येषां 'मो' इत्यस्माकं 'नास्ति' न विद्यते 'किञ्चन' वस्तुजातं, यतः-

'एकोऽहं न च मे कश्चित्, स्वपरो वाऽपि विद्यते।
यदेको जायते जन्तुर्म्रियतेऽप्येक एव हि ॥"

इति न किञ्चिदन्तःपुरादि मत्सत्कं, यतश्चैवमतो 'मिथिलायाम्' अस्यां पुरि दह्यमानायां न मे दह्यते 'किञ्चन' स्वल्पमपि, मिथिलाग्रहणं तु न केवलमन्तःपुराद्येव न मत्सम्बन्धि किन्त्वन्यदपि स्वजनजनादि स्वस्वकर्मफलभुजो हि जन्तवः तथा तथाऽस्मिन् भ्राम्यन्तीति किमत्र कस्य स्वं परं चेति ख्यापनार्थं। ततश्चानेन प्रागुक्तहेतोरसिद्धत्वमुक्तम्, तत्त्वतो ज्ञानादिव्यतिरिक्तस्य सर्वस्यास्वकीयत्वादित्यादिचर्चः प्राग्वदिति सूत्रार्थः ॥ एतदेव च भावयितुमाह-

मू.(२४३) *चत्तपुत्तकलत्तस्स, निव्वावारस्स भिक्खुणो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पियं न विज्जई किंचि, अप्पियंपि न विज्जइ ॥

वृ. त्यक्ताः-परिहृताः पुत्राश्च-सुताः कलत्राणि च-दारा येन स तथा तस्य, अत एव 'निर्व्यापारस्य' परिहृतकृषिपाशुपाल्यादिक्रियस्य 'भिक्षोः' उक्तस्वरूपस्य 'प्रियम्' इष्टं 'न विद्यते' नास्ति 'किञ्चिद्' अल्पमपि, 'अप्रियमपि' अनिष्टमपि 'न विद्यते' नास्ति, प्रियाप्रियविभागास्तित्वे हि सति पुत्रकलत्रत्यागं न कुर्यादेव, तयोरेवातिप्रतिबन्धविषयत्वादिति भावः, एतेन यदुक्तं-नास्ति किञ्चनेति तत्समर्थितं, तत् स्वकीयत्वं हि पुत्राद्यत्यागतोऽभिष्वङ्गतः स्यात् स च निषिद्ध इति, एवमपि कथं सुखेन वसनं जीवनं वेत्याह-

मू. *(२४४) बहुं खु मुनिनो भद्दं, अनगारस्स भिक्खुणो ।*
सव्वतो विप्पमुक्कस्स, एगंतमनुपस्सओ ॥

वृ. 'बहु' विपुलं 'खुः' अवधारणे, बह्वेव 'मुनेः' तपस्विनः 'भद्रं' कल्याणं सुखं वा 'अनगारस्य' 'भिक्षोः' इति च प्राग्वत्, 'सर्वतः' बाह्यादभ्यन्तराच्च, यद्वास्वजनात् परिजनाच्च 'विप्रमुक्तस्य' इति पूर्ववत्, 'एकान्तम्' 'एकोऽह'मित्याद्युक्तरूपैकत्वभावनात्मकम् 'अनुपश्यतः' पर्यालोचयत इति सूत्रद्वयार्थः ॥

मू. *(२४५) एयमट्ठं निसामित्ता० ॥*

वृ. पुनरपि 'एय' सूत्रं प्रागवत्-

मू. *(२४६) पागारं कारइत्ता णं, गोपुरट्टालगाणि य ।*
उस्सूलए सयग्घी य, ततो गच्छसि खत्तिया ॥

वृ. प्रकर्षेण मर्यादया च कुर्वन्ति तमिति प्राकारस्तं-धूलीष्टकादिविरचितं 'कारयित्वा' विधाप्य 'गोपुराट्टालकानि च' तत्र गोभिः पूर्यन्त इति गोपुराणी-प्रतोलीद्वाराणि, गोपुरग्रहणमर्गलाकपाटोपलक्षणम, अट्टालकानिप्राकारकोष्ठकोपरिवर्तीनी आयोधनस्थानानि 'उस्सूलय'-त्ति स्वातिका परबलपातार्थमुपरिच्छादितगर्ता वा 'सयग्धीय'त्ति शतं ध्नन्तीति शतध्न्यः, ताश्च यन्त्रविशेषरूपाः 'ततः' एवं सकलं निराकुलीकृत्य 'गच्छसी'ति तिंव्यत्ययाद्गच्छ, क्षतान्त्रायत इति क्षत्रियस्तत्सम्बोधनं हे क्षत्रिय !, हेतूपलक्षणं चेदं, स चायं-यः क्षत्रियः स पुररक्षां प्रत्यवहितः, यथोदितोदयादिः, क्षत्रियश्च भवान्, शेषं प्राग्वदिति सूत्रार्थः ॥

मू. *(२४७) एयमट्ठं निसामित्ता०*

वृ. ततः 'एयं' सूत्रं प्राग्वत्-

मू. *(२४८) सद्धं नगरिं किच्चा, तवसंवरमग्गलं ।*
खंतिं निउणपागारं, तिगुत्तं दुप्पधंसयं ॥

वृ. 'श्रद्धां' तत्त्वरुचिरूपाशेषगुणाधारतया 'नगरीं'पुरीं 'कृत्वा' हृदि विधाय, अनेन च प्रशमसंवेगादीनि गोपुराणि कृत्वेत्युपलक्ष्यते, अर्गलाकपाटं तर्हि किमित्याह-परिघस्तत्प्रधानं कपाटमप्यर्गलेत्युक्तं, ततोऽर्गलाम्-अर्गलाकपाटं कृत्वेति सम्बन्धः, प्राकारः क इत्याह-'क्षांतिं' क्षमां निपुणमिव निपुणं-शत्रुरक्षणं प्रति श्रद्धाविरोध्यनन्तानुबन्धिकोपोपरोधितया 'प्राकारं' शालं, कृत्वेति सम्बन्धः, उपलक्षणं चैषां मानादिनिरोधिनां मार्दवादीनां, तिसृभिः-अट्टालकोच्चूलकशतघ्नीसंस्थानीयाभिर्मनोगुप्त्यादिभिर्गुप्तिभिः गुप्तं त्रिगुप्तं, मयूरव्यं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकादित्वात् समासः, प्राकारस्य विशेषणं, अत एव दुःखेन प्रधृष्यते-परैरभिभूयत इति दुष्प्रधर्षः स एव दुष्प्रधर्षकस्तं, पठन्ति च-'खंतिं' निउणं पागारं तिगुत्तिदुप्पधंसयं'ति, स्पष्टं।

मू. (२४९) *धनुं परक्कमं किच्चा, जीवं च ईरियं सदा।*
धिइं च केयणं किच्चा, सच्चेणं परिमंथए॥

वृ. इत्थं यदुक्तं 'प्राकारादीन् कारयित्वे'ति तत्प्रतिवचनमुक्तं, सम्प्रति तु प्राकाराट्टालकेष्ववश्यं योद्धव्यं, तच्च सत्सु प्रहरणादिषु प्रतिविधेये च वैरिणि सम्भवत्यत आह-'धनुः' कोदण्डं 'पराक्रमं' जीववीर्योल्लासरूपमुत्साहं कृत्वा 'जीवां च' प्रत्यञ्चां च 'ईर्याम्' ईर्यासमितिमुपलक्षणत्वाच्छेषसमितीश्च 'सदा' सर्वकालं, तद्विरहितस्य जीववीर्यस्याप्यकिञ्चित्करत्वात्, 'धृतिं च' धर्माभिरतिरूपां 'केतनं' शृङ्गमयधनुर्मध्ये काष्ठमयमुष्टिकात्मकं, ननु तदुपरि स्नायुना निबध्यते इदं तु केन बन्धनीयमित्याह-'सत्येन' मनःसत्यादिना 'पलिमंथए'त्ति बन्धीयात्, ततः किमित्याह-

मू. (२५०) *तवनारायजुत्तेणं, भेत्तूणं कम्मकंचुअं।*
मुनी विगसंगामो, भवाओ परिमुच्चति॥

वृ. 'तपः' षड्विधमान्तरं परिगृह्यते, तदेव कर्म प्रत्यभिभेदितया 'नाराचः' अयोमयो बाणस्तुद्यक्तेन प्रक्रमात् धनुषा, 'भित्त्वा' विदार्य कर्म-ज्ञानावरणादि कञ्चुक इव कर्मकञ्चुकस्तं, इह कर्मकञ्चुकग्रहणेनैवात्मैवोद्धतो वैरीत्युक्तं भवति, वक्ष्यति च-"अप्पा मित्तममित्तं च, दुप्पट्ठियसुपट्ठिय'न्ति, कर्मणस्तु कञ्चुकत्वं तद्गतिमिथ्यात्वादिप्रकृत्युदयवर्तिनः श्रद्धानगरमुपरुन्धत आत्मनो दुर्निवारत्वात्, 'मुनिः' प्राग्वत्, कर्मभेदे जेयस्य जितत्वात् विगतः संग्रामो यस्य यस्माद्वेति विगतसंग्रामः-उपरतायोधनः सन्, भवन्त्यस्मिन् शारीरमानसानि दुःखानीति भवः-संसारस्तस्मात् परिमुच्यते, एतेन च यदुक्तं-'प्राकारं कारयित्वे'त्यादि, तत्सिद्धसाधनम्, इत्थं श्रद्धानगररक्षणाभिधानात् भवतश्च तत्त्वतस्तदविज्ञतेति चोक्तं भवति, न च भवदभिमतप्राकारदिकरणे सकलशारीरमानसक्लेशवियुक्तिलक्षणा मुक्तिवाप्यते, इतस्तु तदवाप्तिरपीति सूत्रत्रयार्थः॥

मू. (२५१) *एयमट्ठं निसामित्ता०॥*

वृ. एवं च तेनोक्ते 'एय' सूत्रं प्राग्वत्।-

मू. (२५२) *पासाए कारइत्ता णं, वद्धमाणगिहाणि य।*
बालग्गपोइयाओ य, तओ गच्छसि खत्तिया॥

वृ. प्रसीदन्ति नृणां नयनमनांसि येषु ते प्रासादास्तान् उक्तरूपान् 'वर्द्धमानगृहाणि च' अनेकधा वास्तुविद्याऽभिहितानि 'वालग्गपोइयातो य'त्ति देशीपदं वलभीवाचकं, ततो वलभीश्च कारयित्वा, अन्ये त्वाकाशतडागमध्यस्थितं क्षुल्लकप्रासादमेव 'बालग्गपोइया य'त्ति देशीपदाभिधेयमाहुः, ततस्ताश्च क्रिडास्थानभूताः कारयित्वा, ततोऽनन्तरं गच्छ क्षत्रिय!। एतेन च यः प्रेक्षावान् स सति सामर्थ्ये प्रासादादि कारयिता यथा ब्रह्मदत्तादिः, प्रेक्षावांश्च सति सामर्थ्ये भवान्, इत्यादिहेतुकारणयोःसूचनमकारीति सूत्रार्थः॥

मू. (२५३) *एयमट्ठं निसामित्ता०॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. एवं च शक्रेणोक्ते 'एय' सूत्रं प्राग्वत्।-

मू. (२५४)   संसयं खलु सो कुनइ, जो मग्गे कुणई घरं।
जत्थेव गंतुमिच्छेज्जा, तत्थ कुव्विज्ज सासयं॥

वृ. संशीतिः संशयः-इदमित्थं भविष्यति नवेत्युभयांशावलम्बनः प्रत्ययस्तं, 'खलुः' एवकारार्थः, ततः संशयमेव स कुरुते-यथा मम कदाचिद्गमनं भविष्यतीति, यो मार्गे कुरुते गृहं, गमननिश्चये तत्कारणायोगाद्, अहं तु न संशयित इत्याशयः, सम्यग्दर्शनादीनां मुक्तिं प्रत्यवन्ध्यहेतुत्वेन मया निश्चितत्वादवाप्तत्वाच्च, यदि नाम न संशयितस्तथापि किमिहैव गृहं न कुरुषे ? अत आह-'यत्रैव' विवक्षितप्रदेशे 'गन्तुं' यातुम् 'इच्छेत्' अभिलषेत 'तत्थ'त्ति व्यवच्छेदफलत्वाद्वाक्यस्य तत्रैव-जिगमिषितप्रदेशे 'कुर्वीत' विदधीत स्वस्य-आत्मन आश्रयो-वेश्म स्वाश्रयस्तं, यद्वा शाश्वतं-नित्यं, प्रक्रमाद्गहमेव, ततोऽयमर्थः-इदं तावदिहावस्थानं मार्गावस्थानप्रायमेव, यत्र तु जिगमिषितमस्माभिस्तत् मुक्तिपदं, तदाश्रयविधाने च प्रवृत्ता एव वयं, ततस्तत्करणे प्रवृत्तत्वात्कथं प्रेक्षावत्त्वक्षतिः ?, तथा च यः प्रेक्षावानित्याद्यपि तत्त्वतः सिद्धसाधनतयैवावस्थितमिति सूत्रार्थः॥

मू. (२५५)   एयमट्ठं निसामित्ता०॥

वृ. ततः पुनरपि 'एय' सूत्रं प्राग्वत्।-

मू. (२५६)   आमोसे लोमहारे य, गंठिभेए य तक्करे।
नगरस्स खेमं काऊणं, ततो गच्छसि खत्तिया !॥

वृ. आ-समन्तात् मुष्णन्ति-स्तैन्यं कुर्वन्तीत्यामोषास्तान्, लोभानि-रोमाणि हरन्ति-अपनयन्ति प्राणिनां ये ते लोमहाराः, किमुक्तं भवति ?-अतिनिर्स्त्रिंशतया आत्मविघाताशङ्कया च प्राणान् विहत्यैव ततः सर्वस्वमपहरन्ति, तथा त वृद्धाः-लोमहाराः प्राणहारा इति, तांश्च, ग्रन्थि-द्रव्यसम्बन्धिनं भिन्दन्ति-धुर्धुरकद्विकर्तिकादिना विदारयन्तीति ग्रन्थिभेदास्तान्, चशब्दो भिन्नक्रमः, ततस्तदेव कुर्वन्तीति तस्कराः-सर्वकालं चौर्यकारिणस्तांश्च, यत आहुर्वैयाकरणाः-'तद्बहतोः करपत्योश्चौरदेवतयोः सुट् तलोपश्च' इह चोत्साद्येति गम्यते 'प्रविश्य पिण्डी' मित्युक्तौ भक्षयेतिवत्, यद्वा सप्तम्येवेयं बह्वर्थे चैकवचनं, ततश्चामोषादिषूपतापकारिषु सत्सु 'नगरस्स' पुरस्य 'क्षेमं' सुस्थं 'कृत्वा' विधाय 'ततः' तदनन्तरं गच्छ क्षत्रिय !, एतेनापि यः सधर्मा नृपतिः स इहाधर्म्मकारिनिग्रहकृत्, यथा भरतादिः, सधर्म्मनृपतिश्च भवानित्यादिहेतुकारणसूचना कृतैवेति सूत्रार्थः।

मू. (२५७)   एयमट्ठं निसामित्ता०॥

वृ. इत्थं शक्रोक्तौ 'एय' सूत्रं प्राग्वत्!-

मू. (२५८)   असइं तु मनुस्सेहिं, मिच्छादंडो पउंजइ।
अकारिणोऽत्थ बज्झंति, मुच्चई कारओ जनो॥

वृ. 'असकृद्' अनेकधा, 'तुः' एवकारार्थः, ततश्चासकृदेव 'मनुष्यैः' मनुजैः 'मिथ्या' व्यलीकः, किमुक्तं भवति ?-अनपराधिष्वज्ञानाहङ्काकादिहेतुभिरपाधिष्विव दण्डनं दण्डः-देशत्यागशरीरनिग्रहादिः 'प्रयुज्यते' व्यापार्यते, कथमिदमित्याह-'अकारिणः' आमोषाद्य-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

विधायिनः 'अत्र' इत्यस्मिन् प्रत्यक्षत उपलभ्यमाने मनुष्यलोके 'वध्यन्ते' निगडादिभिर्नियन्त्र्यन्ते 'मुच्यते' त्यज्यते 'कारकः' विधायकः, प्रकृतत्वादामोषणादीनां, 'जनः' लोकः, तदनेन यदुक्तं प्राग्-'आमोषकाद्युत्सादनेन नगरस्य क्षेमं कृत्वा गच्छेति, तत्र तेषां ज्ञातुमशक्यतया क्षेमकरणस्याप्यशक्यत्वमुक्तंयत्तु 'यः सधर्मेत्यादि' सूचितं, तत्रापरिज्ञानतोऽनपराधिनामपि दण्डमादधतां सधर्मनृपतित्वमपि तावच्चिन्त्यमित्यसिद्धता हेतोरिति सूत्रार्थः ॥

मू. (२५९) *एयमट्ठं निसामित्ता० ॥*

वृ. 'एय' सूत्रं प्राग्वत्, नवरमियता स्वजनान्तःपुरपुरादिप्रासादनृपतिधर्मविषयः किमस्याभिष्वङ्गोऽस्ति ? नेती वेति विमृश्य सम्प्रति द्वेषाभावं विवेक्तुमिच्छुर्विजिगीषुतामूलत्वात् द्वेषस्य तामेव परीक्षितुकामः शक्र इदमुक्तवान्-

मू. (२६०) जे केइ पत्थिवा तुब्भं, नानमंति नराहिवा ।
वसे ते ठावइत्ता णं, तओ गच्छसि खत्तिया ! ॥

वृ. ये केचित् इति सामस्त्योपदर्शकं 'पार्थिवाः' भूपालाः, 'तुब्भं'ति तुभ्यं 'नानमन्ति' न मर्यादया प्रह्वीभवन्ति, तुभ्यमिति च नमतियोगेऽपि चतुर्थीदर्शनात्, 'मात्रे पित्रे च सवित्रे च नमामी' त्यादिवददुष्टमेव, पठ्यते च-'तुब्भं'ति, तत्र च तवेति शेषविवक्षया षष्ठी, 'नराहिवा' इत्यत्र अकारो 'ह्रस्वदीर्घा मिथ' इतिलक्षणात्, ततश्च हे 'नराधिप!' नृपते! 'वशे' इत्यात्मायत्तौ 'तानि'ति अनानमत्पार्थिवान् 'स्थापयित्वा' निवेश्य कृत्वेतियावत्, ततो गच्छ क्षत्रिय! इहापि यो नृपतिः सोऽनमत्पार्थिवनमयिता, यथा भरतादिः, इत्यादिहेतुकारणे अर्थतः आक्षिप्ते इति।

मू. (२६१) *एयमट्ठं निसामित्ता० ॥*

वृ. एवं तु सुरपतिनोक्ते 'एय' सूत्रं प्राग्वत्-

मू. (२६२) *जो सहस्सं सहस्साणं, संगामे दुज्जए जिने ।*
एगं जिनेज्ज अप्पाणं, एस से परमो जओ ॥

वृ. 'य' इत्यनुद्दिष्टनिर्देशे 'सहस्रं' दशशतात्मकं सहस्राणां प्रक्रमात् सुभटसम्बन्धिनां 'संग्रामे' युद्धे 'दुर्जये' दुरापपरपरिभवे 'जयेद्' 'अभिभवेत्, सम्भावने लिट्, 'एकम्' अद्वितीयं 'जयेद्' यदि कथञ्चिज्जीववीर्योल्लासतोऽभिभवेत्, कम्?-'आत्मानं' स्वं, दुराचारप्रवृत्तमिति गम्यते, 'एषः' अनन्तरोक्तः, 'से' इति तस्य जेतुः सुभटदशशतसहस्रजयात् 'परमः' प्रकृष्टः 'जयः' परेषामभिभवः, तदनेनाऽऽत्मन एवातिदुर्जयत्वमुक्तं,

मू. (२६३) *अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ ? ।*
अप्पाणमेव अप्पाणं, जिणित्ता सुहमेहति ॥

वृ. तथा च-'अप्पाणमेव'-त्ति तृतीयार्थे द्वितीया, ततश्चाऽऽत्मनैव सह 'युध्यस्व' संग्रामं कुरु, यद्वा युद्धेरन्तर्भावितण्यर्थत्वात् युध्यस्वेति योधयस्व, कम्?-आत्मानं, इहाप्यात्मनैव सहेति शेषः, किं?, न किञ्चिदित्यर्थः, 'ते' तव 'युद्धेन' संग्रामेण, 'बाह्यत' इति बाह्यं पार्थिवादिकमाश्रित्य, यदिवा बाह्यत इति तृतीयार्थे तसिः, ततो बाह्येन युद्धेनेति सम्बध्यते, एवं च 'अप्पाणमेव'त्ति आत्मनैवान्यव्यतिरिक्तेनाऽऽत्मानं स्वं 'जइत्त'ति जित्वा 'सुखम्' ऐकान्तिकात्यन्तिकमुक्तिसुखात्मक् 'एधते' इत्यनेकार्थत्वाद्धातूनां प्राप्नोति, अथवा 'सुहमेहए'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुभं-पुण्यमेधते-अन्तर्भावितण्यर्थत्वात् वृद्धिं नयति।

मू. (२६४) पंचिंदियाणि कोहं, मानं मायं तहेव लोहं च।
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जितं॥

वृ. कथमात्मन्येव जिते सुखावाप्तिरित्याह-'पञ्चेन्द्रियाणि' श्रोत्रादीनि 'क्रोधः' कोपः 'मानः' अहङ्कारः 'माया' निकृतिः तथैव 'लोभश्च' गार्द्धलक्षणः 'दुर्जयः' दुरभिभवः, 'चः' समुच्चये, 'एव' इति पूरणे, अतति-सततं गच्छति तानि तान्यध्यवसायस्थानान्तराणीति व्युत्पत्तेः आत्मा-मनः, सर्वत्र च सूत्रत्वात् नपा निर्देशः, 'सर्वम्' अशेषमिन्द्रियादि, उपलक्षणत्वा-न्मिथ्यात्वादि च, 'आत्मनि' जीवे 'जिते' अभिभूते 'जित'मिति अभिभूतमेव। ननु मनसि जिते जितान्येवेन्द्रियादीनीति किं पृथक् तज्जयाभिधानेन?, सत्यं, तथापि प्रत्येकं दुर्जयत्वख्या-पनाय पृथगुपन्यास इत्यदोषः, यद्वा-'दुज्जयं चेव अप्पाणं'ति चकारो हेत्वर्थः, 'एवः' अवधारणे भिन्नकमश्च आत्मशब्दादनन्तरं द्रष्टव्यः, ततश्च-यस्माद् 'आत्मैव' जीव एव दुर्जयः ततः सर्वमिन्द्रियाद्यात्मनि जिते जितम्, अनेन चेन्द्रियादीनामेव दुःखहेतुत्वात्तज्जयतः सुखप्राप्तिः समर्थिता भवति। एवं च फलोपदर्शनद्वारेणैवंविधेव विजिगीषुता श्रेयसीत्याचष्टे, ततश्च यो नृपतिरित्याद्यपि तत्त्वतो विजीगीषुत्वदर्शनात् सिद्धसाधनतया प्रत्युक्तमिति सूत्रार्थः॥

मू. (२६५) एयमट्ठं निसामित्ता०॥

वृ. भूयोऽपि-'एय' सूत्रं प्राग्वत्। नवरमनन्तरपरीक्षातो द्वेषोऽप्यनेन परिहृत इति निश्चित्य जिनप्रणीतधर्मं प्रति स्थैर्यं परीक्षितुकामः शक्र इदमवोचत्-

मू. (२६६) जइत्ता विउले जन्ने, भोइत्ता समणमाहणे।
दच्चा भोच्चा य जट्ठा य, ततो गच्छसि खत्तिया॥

वृ. 'जइत्त'त्ति याजयित्वा 'विपुलान्' विस्तीर्णान् 'यज्ञान्' यागान् 'भोजयित्वा' अभ्यवहार्य श्रमणाश्च-निर्ग्रन्थादयो ब्राह्मणाश्च-द्विजाः श्रमणब्राह्मणास्तान्, 'दत्त्वा' द्विजादिभ्यो गोभूमिसुवर्णादीन्, भुक्त्या च मनोज्ञशब्दादीन् इष्ट्वा च राजर्षित्वावाप्तौ स्वयं यागान् ततो गच्छ क्षत्रिय!, अनेन यद्यत्प्राणिप्रीतिकरं तत्तद्धर्माय, यथा हिंसोपरमादि, प्राणिप्रीतिकराणि चामूनि यादादीनीत्यादिहेतुकारणे सूचिते एवेति सूत्रार्थः॥

मू. (२६७) एयमट्ठं निसामित्ता०॥

वृ. शक्रवचनानन्तरम् 'एय' सूत्रं प्राग्वत्!

मू. (२६८) जो सहस्सं सहस्साणं मासे मासे गवं दए।
तस्सावि संजमो सेओ, अदितंस्सवि किंचनं॥

वृ. यः 'सहस्त्रं सहस्त्राणां' दशलक्षात्मकं मासे मासे 'गवां' प्रतीतानां 'दए'त्ति दद्यात्, 'तस्यापि' एवं विधस्य दातुर्यादि कथञ्चिच्चारित्रमोहनीयक्षयोपशमेन 'संयमः' आश्रवादि-विरमणात्मकः स्यात् तदा स एव 'श्रेयान्' अतिशयप्रशस्यः; कथंभूतस्यापि?-'अददतोऽपि' अयच्छतोऽपि 'किञ्चन' स्वल्पमपि वस्तु, यद्वा 'तस्सावि'त्ति तस्मादप्युक्तरूपाद्दातुरवधित्वेन विवक्षितात्, संयच्छति-प्राणिहिंसादिभ्यः सम्यगुपरमतीति सर्वधातूनां पचादिषु दर्शनादिति संयमः-संयमवान्, साधुरित्यर्थः, 'श्रेयान्' प्रशस्यतरः, अथवा तस्यापि दातुः प्रक्रमात् गोदान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मात् 'संयमः' उक्तरूपः श्रेयान्, शेषं पूर्ववत्, गोदानं चेह यागाद्युपलक्षणम्, अतिप्रभूतजनाचरितमित्युपात्तम्, एवं च संयमस्य प्रशस्यतरत्वमभिदधता यागादीनां सावद्यत्वमर्थादावेदितं, तथा च यज्ञप्रणेतृभिरुक्तम्-

"षट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि।
अश्वमेघस्य वचनान्यूनानि पशुभिस्त्रिभिः ॥"

इयत्पशुवधे च कथमसावद्यता नाम ?, तथा दानान्यप्यशनादिविषयाणि धर्म्मोपकरणगोचराणि च धर्माय वर्ण्यन्ते, यत आह-

"अशनादीनि दानानि, धर्म्मोपकरणानि च।
साधुभ्यः साधुयोग्यानि, देयानि विधिना बुधैः ॥"

शेषाणि तु सुवर्णगोभूम्यादीनि प्राण्युपमर्दहेतुतया सावद्यान्येव, भोगानां तु सावद्यत्वं सुप्रसिद्धं। तथा च प्राणिप्रीतिकरत्वादित्यसिद्धो हेतुः, प्रयोगश्च-यत्सावद्यं न तत् प्राणिप्रीतिकरं, यथा हिंसादि, सावद्यानि च यागादीनि इति सूत्रार्थः ॥

मू. (२६९) *एयमट्ठं निसामित्ता०*

वृ. 'एयमट्ठं' सूत्रं प्राग्वत्। नवरमित्थं जिनधर्मस्थैर्यमवधार्य प्रव्रज्यां प्रति दृढोऽयमुत नेति परीक्षणार्थं शक्र इदमवादीत्-

मू. (२७०) *घोरासमं चइत्ता णं, अन्नं पत्थेसि आसमं।*
इहेव पोसहरओ, भवाहि मनुयाहिवा ! ॥

वृ. 'घोरः' अत्यन्तदुरनुचरः, स चासावाश्रमश्च आङिति-स्वपरप्रयोजनाभिव्याप्त्या श्राम्यन्ति-खेदमनुभवन्त्यस्मिन्निति कृत्वा घोराश्रमो-गार्हस्थ्यं, तस्यैवाल्पसत्त्वैर्दुष्करत्वात्,

"गृहाश्रमसमो धर्मो, न भूतो न भविष्यति।
पालयन्ति नराः शूरा क्लीबाः पाखण्डमाश्रिताः ॥"

तं 'त्यक्त्वा' अपहाय 'जहित्ता णं'ति क्वचित् पाठः, तत्र च हित्वा-'अन्यत्' एतद्वयतिरिक्तं कृषिपाशुपाल्यादि अशक्तकातरजनातिनिन्दितं 'प्रार्थयसे' अभिलषसि, 'आश्रमं' प्रव्रज्यालक्षणं, नेदं क्लीबसत्त्वानुचरितं भवादृशानामुचितमित्यभिप्रायः। तर्हि किमुचितमित्याह-'ईह' अस्मिन्नेव गृहाश्रमे, स्थित इति गम्यते, पोषं-धर्मपुष्टिं धत्त इति पोषधः-अष्टम्यादितिथिषु व्रतविशेषः, तत्र रतः-आसक्तः पोषधरतः 'भवाहि'त्ति भव, अणुव्रताद्युपलक्षणमेतद्, अस्यैव चोपादानं पोषधदिनेष्ववश्यंभावतस्तपोऽनुष्ठानख्यापकं, यत आह आससेनः-

"सर्वेष्वपि तपोयोगः, प्रशस्तः कालपर्वसु।
अष्टम्यां पञ्चदश्यां च, नियतं पोषधं वसेद् ॥"

इति 'मनुजाधिप !' नृपते !। अत्र च घोरपदेन हेतुराक्षिप्तः, तथाहि-यद्यद् घोरं तत्तद् धर्मार्थिनाऽनुष्ठेयं, यथाऽनशनादि, तथा चायं गृहाश्रमः, शेषमेतदनुसारतोऽभ्यूह्यमिति सूत्रार्थः ॥

मू. (२७१) *एयमट्ठं निसामित्ता० ॥*

वृ. 'एय' सूत्रं। प्राग्वत्-

मू. (२७२) *मासे मासे उ जो बालो, कुसग्गेणं तु भुंजइ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न सो सुक्खायधम्मस्स, कलं अग्घइ सोलसिं ॥

वृ. 'मासे मासे' इति वीप्सायां द्विर्वचनं, 'तुः' इहोत्तरम् चैवकारार्थः, ततश्च मासे मास एव, न त्वेकस्मिन्नेव मासेऽर्धमासादौ वेति, 'यः' कश्चिद् 'बालः' अविवेकः 'कुशाग्रेणैव' तृणविशेषप्रान्तेन भुंक्ते, एतदुक्तं भवति-यावत् कुशाग्रेऽवतिष्ठते तावदेवाभ्यवहरति नातोऽ-धिकम्, अथवा कुशाग्रेणेति जातवेकवचनं, तृतीया तु ओदनेनासौ भुंक्त इत्यादिवत् साधकत-मत्वेनाभ्यवह्रियमाणत्वेऽपि विवक्षितत्वात्, 'न' इति निषेधे 'स' इति यः कुशाग्रैर्भुक्ते स एवंविधकष्टानुष्ठाय्यपि सुष्ठु-शोभनः सर्वसावद्यविरतिरूपत्वादाङिति-अभिव्याप्त्या ख्यातः-तीर्थकरादिभिः कथितः स्वाख्यातः तथाविधो धर्मो यस्य सोऽयं स्वाख्यातधर्मा तस्य, चारित्रिण इत्यर्थः, 'कलां' भागम् 'अर्घति' अर्हति, 'षोडशीं' षोडशपूरणामित्युक्तं भवति, किं पुनस्तु-ल्योऽधिको वा ?, षोडशांशसमोऽपि न भवति, ततो यदुक्तम्-'यद्यद् घोरं तत्तद्धर्मार्थि-नाऽनुष्ठेयमनशनादिवदि'ति, अत्र घोरत्वादित्यनैकान्तिको हेतुः, घोरस्यापि स्वाख्यातधर्मस्यैव धर्मार्थिनाऽनुष्ठेयत्वाद्, अन्यस्य त्वात्मविघातादिवत्, अन्यथात्वात्, प्रयोगश्चात्र-यत् स्वाख्यात-धर्मरूपं न भवति घोरमपि न तद्धर्मार्थिनाऽनुष्ठेयं, यथाऽऽत्मवधादिः, तथा च गृहाश्रमः, तद्रूपत्वं चास्य सावद्यत्वाद्धिंसावदित्यलं प्रसङ्गेन । शेषं प्राग्वदिति सुत्रार्थः ॥

मू. (२७३) *एयमट्ठं निसामित्ता०*

वृ. 'एय' सूत्रं प्राग्वत् । नवरं यतिधर्मे दृढोऽयमिति निश्चित्य दुरन्तोऽयमभिष्वङ्ग इति तदभावं परीक्षितमपि पुनः परीक्षितुमिदमिन्द्र उवाच-

मू. (२७४) *हिरन्नं सुवन्नं मणिमोत्तं, कंसं दूसं च वाहणं ।*
कोसं च वड्ढइत्ता णं, तओ गच्छसि खत्तिया ! ॥

वृ. 'हिरण्यं' स्वर्णं 'सुवर्णं' शोभनवर्णं विशिष्टवर्णिकमित्यर्थः, यद्वा हिरण्यं-घटितस्वर्णमितरत्तु सुवर्णं, मणयश्च-इन्द्रनीलादयो मुक्ताश्च-मौक्तिकानि मणिमुक्तं, तथा 'कांस्यभाजनादि 'दूष्यं' वस्त्राणि, 'चः' स्वगतानेकभेदसंसूचकः, 'वाहनं' रथाश्वादि, पठन्ति च-'सवाहणं'ति सह वाहनैर्वर्त इति सवाहनं हिरण्यादीति सम्बन्धः, 'कोषं' भाण्डागारं चर्मलताद्यनेकवस्तुरूपं 'वड्ढावइत्ता णं'ति वृद्धिं प्रापय्य ततः समस्तवस्तुविषयेच्छापरिपूर्त्तौ गच्छ क्षत्रिय !, अयमाशयः-यः साकाङ्क्षो नासौ धर्मानुष्ठानयोगो भवति, यथा मम्मणवणिक्, साकाङ्क्षश्च भगवान्, आकाङ्क्षणीयहिरण्यादिवस्त्वपरिपूर्त्तेः, तथाविधद्रमकवदिति ।

मू. (२७५) *एयमट्ठं निसामित्ता०*

वृ. ततः 'एयं' सूत्रं पाग्वत्-

मू. (२७६)सुवन्न रूप्पस्स य पव्वया भवे, सिया हु केलाससमा अखंखया ।
नरस्स लुद्धस्स न तेहि किंति, इच्छा हु आगाससमा अनंतया ॥

वृ. सुवर्णं च रूप्यं च सुवर्णप्यमिति समाहारस्तस्य, 'तुः' पूरणे, यद्वाऽऽर्षत्वाद्विभक्तिलोपः, तुशब्दः समुच्चये, ततः स्वर्णस्य रूप्यस्य च पर्वता इव पर्वताः-पर्वतप्रमाणाः राशयो 'भवन्ति' भवेयुः, पर्वतप्रमाणत्वेऽपि च लघुपर्वतप्रमाणा एव स्युरत आह-'सिया हु'त्ति स्यात्, कदाचित्, हुरवधारणे भिन्नक्रमश्च, ततः 'कैलाससमा' एव कैलासपर्वततुल्या एव, न त्वन्यलघुपर्वत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणाः, तेऽपि 'असङ्ख्यकाः' सङ्ख्याविरहिताः, न तु द्वित्रा एव,

मू.(२७७) *पुढवी साली जवा चेव, हिरन्नं पसुभिस्सह।*
पडिपुन्नं नालमेगस्स, इह विज्जा तवं चरे॥

वृ. नरस्य लुब्धस्य, उपलक्षणत्वात्, स्त्रियाः पण्डकस्य वा, न तैः कैलाशसमैरपि सुवर्णरूप्यपर्वतैः 'किञ्चिदपि' अल्पमपि परितोषोत्पादनं प्रति क्रियत इति शेषः, पठ्यते च- 'न तेणं' ति अत्र च सूत्रत्वाद्वचनव्यत्ययः, कुतः पुनरिदमित्याह-'इच्छा' अभिलाषः 'हु'रिति यस्मादाकाशेन समा-तुल्या आकाशसमा 'अनन्तिका' अन्तरहिता, तथा चैतदनुवादी वाचकः-

"न तुष्टिरिह शताज्जन्तोर्न सहस्रान्न कोटितः।
न राज्यान्नैव देवत्वान्नैन्द्रत्वादपि विद्यते॥"

किं सुवर्णरूप्ये केवले एव नेच्छापरिपूर्तये इत्याशङ्कयाह-'पृथ्वी' मही 'शालयः' लोहित-शाल्यादयः, 'यवाः' प्रतीताः, 'चः' शेषधान्यसमुच्चायार्थः, 'एवः' अवधारणे स च भिन्नक्रमो नेत्यस्यानन्तरं योक्ष्यते, 'हिरण्यं' सुवर्णं ताम्राद्युपलक्षणमेतत्, 'पशुभिः' गवाश्वादिभिः 'सह' सार्धं 'प्रतिपूर्णं' समस्तं, पठन्ति च-'सव्वं तं'ति सर्वम्-अशेषं, न तु कियदेव तत्-पृथिव्यादि 'न' इत् नैव 'जलं' समर्थं, प्रक्रमादिच्छापरिपूर्तये 'एकस्य' अद्वितीयस्य, जन्तोरिति गम्यते, 'इति' एतत् श्लोकद्वयोक्तं 'विज्ज'त्ति सूत्रत्वाद् विदित्वा, यद्वा 'इती'त्यस्माद्धेतोः 'विद्वान्' पण्डितः 'तपः' द्वादशविधं 'चरेत्' आसेवेत, तत एव निःस्पृहतयेच्छापरिपूर्तिसम्भवादिति-भावः। अनेन च सन्तोष एव निराकाङ्क्षतायां हेतुः, न तु हिरण्यादिवर्धनमित्युक्तं, तथा च हिरण्यादि वर्धयित्वेत्यत्र यदनुमानमुक्तं, तत्र साकाङ्क्षत्वलक्षणो हेतुरसिद्धः, न चाकाङ्क्षणीयवस्त्वपरिपूर्तेस्तस्य सिद्धत्वं, सन्तुष्टतया ममाऽऽकाङ्क्षीयवस्तुन एवाभावादिति सूत्रार्थः॥

मू.(२७८) *एयमट्ठं निसामित्ता०*

वृ. भूयोऽपि 'एयं' सूत्रं प्राग्वत्। नवरमविद्यमानविषयेषु विषयवाञ्छानिवृत्तोऽयमिति निश्चित्य सत्सु तेष्वभिष्वङ्गोऽस्ति उत न वेति विवेचयितुमिन्द्र उवाच-

मू.(२७९) *अच्छेरगमब्भुदए, भोए जहित्तु पत्थिवा!।*
असंते कामे पत्थेसि, संकप्पेण विहम्मसि॥

वृ. 'अच्छेरगं'ति आश्चर्यं वर्तते, यत् त्वमेवंविधोऽपि 'अब्भुदए'त्ति अद्भुतकान् आश्चर्य-रूपान् 'भोगान्' कामान् 'जहासि' त्यजसि, पठ्यते च-'चयसि'त्ति, 'पार्थिव!' पृथिवीपते!, पाठान्तरतश्च क्षत्रिय!, अथवा 'अब्भुयए'त्ति अभ्युदये, ततश्च यदभ्युदयेऽपि भोगांस्त्वं जहासि तदाश्चर्यं वर्तते, तथा तत्त्यागतश्च 'असतः' अविद्यमानान् कामान् 'प्रार्थयसे' अभिलपसि यत्त-दप्याश्चर्यमिति सम्बन्धः, अथवाऽधिकस्तवात्र दोषः, 'सङ्कल्पेन' उत्तरोत्तराप्राप्तभोगाभिलाष-रूपेण विकल्पेन 'विहन्यसे' विविधं बाध्यसे, एवंविधसङ्कल्पस्यापर्यवसितत्वाद्, उक्तं हि-

"अमीषां स्थूलसूक्ष्माणामिन्द्रियार्थविधायिनाम्।
शक्रादयोऽपि नो तृप्तिं, विशेषाणामुपागताः॥"

यद्वा 'अच्छेरगमब्भुदए'त्ति मकारोऽलाक्षणिकः, ततश्च-आश्चर्याद्भुतयोरेकार्थत्वेऽप्युपादानमतिशयख्यापनार्थम्-अतिशयाद्भुतान् भोगान् जहासि पार्थिव! असतश्च कामान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रार्थयसि यत्तत्सङ्कल्पेनैव उक्तरूपेण विहन्यसे-बाध्यसे, कथं ह्यन्यथा विवेकनस्तवैतत् सम्भवेत् ? । अनेन च यः सद्विवेको नासौ प्राप्तान् विषयानप्राप्ताकाङ्क्षया परिहरति, यथा ब्रह्मदत्तचक्रवर्त्यादिः, सद्विवेकश्च भवानित्यादिनीत्या हेतुकारणे सूचिते इति सूत्रार्थः ॥

मू. (२८०) *एयमट्ठं निसामित्ता०*

वृ. तदनु 'एय' सूत्रं प्राग्वत् ।-

मू. (२८१) *सल्लं कामा विसं कामा, कामा आसीविसोपमा।*
कामे पत्थेमाणा, अकामा जंति दंग्गइं ॥

वृ. शलति देशान्तश्चलतीति शल्यं-शरीरान्तःप्रविष्टं तोमरादि शल्यमिव शल्यं, के ते ?-काम्यमानत्वात्कामाः मनोज्ञशब्दादयः, यथा हि शल्यमन्तश्चलद्विविधबाधाविधायि तथैतेऽपि, तत्त्वत एषामपि सदा बाधाविधायित्वात्, तथा वेवेष्टि-व्याप्नोतीति विषं-तालपुटादि, विषमिव विषं कामाः, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दरमिवाऽऽभाति, अथ च परिणतावतिदारुणमेवमेतेऽपि कामाः, तथा कामाः आस्यो-दंष्ट्रास्तासु विषयस्येत्याशीविषस्तदुपमाः, यथा ह्यमज्ञैरवलोक्यमानः स्फुरन्मणिफणाभूषित इति शोभन इव विभाव्यते, स्पर्शनादिभिरनुभूयमानश्च विनाशायैव भवति तथैतेऽपि कामाः, किं च-कामान् 'प्रार्णयमाना' अभिलषन्तोऽपिशब्दस्य लुप्तनिर्दिष्टत्वात् प्रार्थयमाना अपि 'अकामा' इष्यमाणकामाभावात् 'यान्ति' गच्छन्ति 'दुर्गतिं' दुष्टां नरकादिगतिं, तदनेन न केवलं शल्यादिवदनुभूयमाना एवामी दोषकारिणः, किन्तु प्रार्थ्यमाना अपीत्युक्तं भवति।

तथा च-'यः सद्विवेको नासौ प्राप्तमप्राप्तकाङ्क्षया' इत्यादौ सद्विवेकत्वमनैकान्तिको हेतुः, न ह्ययमेकान्तः यथा प्राप्तमप्राप्तार्थे न परिह्रियते, प्राप्तस्याप्यपायहेतोः तदुच्छेदकप्राप्त्यर्थं विवेकिभिः परिह्रियमाणत्वाद्, अनभ्युपगतोपालम्भश्चायं, मुमुक्षूणां क्वचिदाकाङ्क्षया एवासम्भवात्, उक्तं हि-'मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः' इति सूत्रार्थः ॥ कथं पुनः कामान् प्रार्थयमाना दुर्गतिं यान्ति ?, अत आह-

मू. (२८२) *अहे वयइ कोहेणं, माणेणं अहमा गई।*
माया गइपडिग्घाओ, लोहाओ दुहओ भयं ॥

वृ. 'अधो' नरकगतौ 'व्रजति' गच्छति 'क्रोधेन' कोपेन, 'मानेन' अहङ्कारेण 'अधमा' नीचा गतिः, भवतीति गम्यते, 'माय'त्ति सुब्व्यत्ययात्, 'मायया' परवञ्चनात्मिकया गतेः-प्रस्तावात् सुगतेः प्रतिघातो-विनाशो गतिप्रतिघातो भवति, 'लोभाद्' गार्द्ध्यलक्षणात्, 'दुहतो'-त्ति द्विधा द्विप्रकारम्-ऐहिकं पारत्रिकं च भविष्यति अस्मादिति भयं-दुःखं, तदाशङ्कातः साध्वसं वा, कामेषु हि प्रार्थ्यमानेष्ववश्यंभावी क्रोधादिसम्भवः, स चेद्दग् इति कथं न तत्प्रार्थनातो दुर्गतिगमनमित्यभिप्रायः। यद्वा-सर्वमपि यदिन्द्रिेणोक्तं तत् कषायानुपातीति तद्विपाकानुवर्णनमिदमिति सूत्रार्थः ॥ एवं बहुभिरप्युपायैस्तमिन्द्रः क्षोभयितुमशक्तः किमकरोदित्याह-

मू. (२८३) *अवउज्झिऊण माहणरुवं विउरुव्विऊण इंदत्तं।*
वंदति अभित्थुणंतो इमाहि महुराहि वग्गूहिं ॥

वृ. 'अवउज्झिय'त्ति अपोह्य त्यक्त्वा 'ब्राह्मणरूपं' धिग्वर्णवेषं 'विउरुव्विऊणं'ति विकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इन्द्रत्वम्' उत्तरवैक्रियरूपभिन्द्रस्वभावं 'वन्दते' अनेकार्थत्वात् प्रणमति 'अभिष्टुवन्' आभिमुख्येन स्तुतिं कुर्वन्, 'आभिः' अनन्तरं वक्ष्यमाणाभिः 'मधुराभिः' श्रुतिसुखाभिः' 'वग्गूहिं'ति आर्षत्वाद्वाग्भिः-वाणीभिः, तद्यथा-

मू. (२८४) *अहो ते निज्जिओ कोहो, अहो मानो पराइओ।*
अहो ते निरक्किया माया, अहो लोभो वसीकओ ॥

वृ. 'अहो' इति विस्मये 'ते' इति त्वया नितराम्-अतिशयेन जितः अभिभूतः निर्जितः 'क्रोधः' कोपः, यतस्त्वमनमत्पार्थिववशीकरणप्रेरणायामपि न क्षुभित इत्यभिप्रायः, तथा 'अहो' 'ते' त्वया 'मानः' अहमितिप्रत्यहेतुः 'पराजितः' अभिभूतः, यस्त्वं मन्दिरं दह्यते इत्याद्युक्तेऽपि कथं मयि जीवतीदमिति नाहङ्कृतिं कृतवानीति, तथा 'अहो ते नरक्किय'त्ति प्राकृतत्वान्निराकृता-अपास्ता माया, यस्त्वं पुररक्षाहेतुषु प्राकाराट्टालकोच्छूलकादिषु निकृतिहेतुकेष्वामोषकोच्छेदनादिषु च न मनो निहितवान्, तथा च अहो ते लोभो 'वशीकृत' इति नियन्त्रितः, यस्त्वं हिरण्यादि वर्द्धयित्वा गच्छेति सहेतुकमभिहितोऽपीच्छाया आकाशसमत्वमेवोदाहृतवान्, अत एव,

मू. (२८५) *अहो ते अज्जवं साहू, अहो ते साहु ! मद्दवं।*
अहो ते उत्तमा खंती, अहो ते मुत्ति उत्तमा ॥

वृ. अहो 'ते' तव 'आजवम्' ऋजुत्वं 'साधु' शोभनम्, अहो ते साधु 'मार्दवं' मृदुत्वम्, अहो ते 'उत्तमा' प्रधाना 'क्षान्तिः' कोपोपशमलक्षणा, अहो ते 'मुक्तिः' निर्लोभता उत्तमा, व्यत्ययनिर्देशस्त्वनानुपूर्व्यपि प्ररूपणाऽङ्गमितिकृत्वेति सूत्रत्रयार्थः ॥ इत्थं गुणोपवर्णद्वारेणाभिष्टुस्य सम्प्रति फलोपदर्शनद्वारेण स्तुवन्नाह-

मू. (२८६) *इहंऽसि उत्तमो भंते !, पेच्चा होहिसि उत्तमो।*
लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छति नीरओ ॥

वृ. 'इह' अस्मिन् जन्मनि 'असि' भवसि 'उत्तमः' प्रधानः, उत्तमगुणान्वितत्वात्, 'भंते'त्ति पूज्याभिधानं 'प्रेत्य' परलोके भविष्यसि उत्तमः, कथमित्याह-लोकस्य-चतुर्दशरज्ज्वात्मकस्य 'उत्तमम्' उपरिवर्ति लोकोत्तमम् 'उत्तमं' देवलोकाद्यपेक्षया प्रधानम्, अथवा 'लोगोत्तममुत्तमं'ति मकारोऽलाक्षणिकः, ततो लोकस्य लोके वा उत्तमोत्तमम्-अतिशयप्रधानं लोकोत्तमोत्तमं, तिष्ठत्यस्मिन् नातः परं गच्छतीति स्थानं, किं तदित्याह-'सिद्धिं' मुक्तिं 'गच्छति'त्ति सूत्रत्वाद्गमिष्यसि, निर्गतो रजसः-कर्मण इति नीरजा इति सूत्रार्थः ॥ उपसंहारमाह-

मू. (२८७) *एवं अभित्थुणंतो रायरिसिं उत्तमाए सद्धाए।*
पायाहिणं करेंतो पुनो पुनो वंदती सक्को ॥

वृ. 'एवम्' अमुनोक्तन्याये अभिष्टुवन् 'राजर्षिम्' उक्तरूपं, प्रक्रमान्नमिम्, 'उत्तमया' प्रधानया 'श्रद्धया' भक्त्या 'पायाहिण'न्ति प्रदक्षिणां 'कुर्वन्' विदधत् पुनः पुनः 'वन्दते' प्रणमति 'शक्रः' पुरन्दर इति सूत्रार्थः ॥ अनन्तरं च यत् कृतवांस्तदाह-

मू. (२८८) *तो वंदिऊण पाए चक्कंकुसलक्खिए मुनिवरस्स।*
आगासेणुप्पतिओ ललियचवलकुंडलतिरीडी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'ततः' तदनन्तरं, पाठान्तरतश्च 'स' इति शक्रो वन्दित्वा 'पादौ' चरणौ, चक्रं चांकुशश्च प्रतीतावेव, तत्प्रधानानि लक्षणानि ययोस्तौ तथा, मुनिवरस्य नमिनाम्न इति प्रक्रमः, तत 'आकाशेन' नभसा उदिति-ऊर्ध्वं देवलोकभिमुखं पतितो गत उत्पतितः, ललिते च ते सविलासतया चपले च चञ्चलतया ललितचपले तथाविधे कुण्डले कर्णाभरणे यस्यासौ ललितचपलकुण्डलः, स चासौ किरीटी च-मुकुटवान् ललितचपलकुण्डकिरीटी इति सूत्रार्थः ॥ स एवंविधः स्वयमिन्द्रेणाभिष्टूयमानः किमुत्कर्षं मनस्याप्तवान् उत नेत्याह-

मू. (२८९) नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ।
चाइऊण गेहं वइदेही, सामन्ने पज्जुवट्ठिओ ॥

वृ. नमिर्नमयति-भावतः प्रह्वीभवन्तमात्मानं स्वतत्त्वभावनया विशेषतः प्रगुणयति, न तूत्सिक्ततां नयति, तत्कालापेक्षया लट्, कथंभूतः सन्?-'साक्षात्' प्रत्यक्षतामुपगम्य 'शक्रेण' इन्द्रेण 'चोइतो'त्ति प्रेरितः 'त्यक्त्वा' अपहाय 'गेहं' गृहं 'वइदेही'त्ति सूत्रत्वाद्विदेहा नाम जनपदः सोऽस्यास्तीति विदेही विदेहजनपदाधिपो, न त्वन्य एव कश्चिदिति भावः, यद्वा-विदेहेषु भवा वैदेहि-मिथिला पुरी, सुब्व्यत्ययात्तां च त्यक्त्वेति सम्बन्धनीयं, 'श्रामण्ये' श्रमणभावे 'पर्युपस्थितः' उद्यतः, अभूदिति शेषः, यद्वा-नमिर्नमयति संयमं प्रति प्रवणीकरोत्यात्मानं, कीदृशः ?-शक्रेण प्रेरितः कथं ?-साक्षात् स्वयं, न त्वन्यपार्श्वप्रहितसन्देशकादिना, श्रामण्ये पर्युपस्थितः, न तु तत्प्रेरणातोऽपि धर्मं प्रति विप्लुतोऽभूदितिभाव इति सूत्रार्थः ॥ किमेष एवैवंविधः ?, उतान्येऽपीत्याह-

मू. (२९०) एवं करिंति संबुद्धा, पंडिया पवियक्खणा।
विणियट्टंति भोगेसु, जहा से नमिरायरिसि ॥ त्तिबेमि

वृ. 'एवम्' इति यथैतेन नमिना निश्चलत्वं कृतं तथाऽन्येऽपि कुर्वन्ति, उपलक्षणत्वादकार्षुः करिष्यन्ति च, न त्वयमेव, निदर्शनतयैवास्योपात्तत्वात्, कीदृशाः पुनरन्येऽप्येवं कुर्वन्ति ?-'सम्बुद्धाः' मिथ्यात्वापगमतोऽवगतजीवाजीवादितत्त्वाः 'पण्डिताः' सुनिश्चितशास्त्रार्थाः 'प्रविचक्षणाः' अभ्यासातिशयतः क्रियां प्रति प्रावीण्यवन्तः तथाविधाश्च सन्तः किं विदधति ?-'विनिवर्तन्ते' विशेषेण तदासेवनादुपरमन्ति, केभ्यः ?-'भोगेसु'त्ति भोगेभ्यः, किंवत् ?-यथा स 'नमिः' नमिराजर्षिः निश्चलो भूत्वा तेभ्यो निवृत्त इति, यद्वोपदेशपरमेतत्, यत एवं कुर्वन्ति सम्बुद्धाः पण्डिताः प्रविचक्षणाः एवमिति कथमित्याह-भोगेभ्यो विनिवर्तन्ते, विशेषेण-अत्यन्तनिश्चलतालक्षणेन निवर्तन्ते भोगेभ्यो, यथा स 'नमिः' नमिनामा राजर्षिः, ततो भवद्भिरप्येवंविधैरित्थमेव विधेयमिति सूत्रार्थः ॥

'इतिः' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्। नयाश्च प्राग्वदिति ॥

अध्ययनं ९ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
नवममध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययन १० द्रुमपत्रकं

वृ. व्याख्यातं नमिप्रव्रज्याख्यं नवममध्ययनम्, अधुना दशममध्ययनमारभ्यते, अस्य चाय-मभिसम्बन्धः-इहानन्तराध्ययने धर्मचरणं प्रति निष्कम्पत्वमुक्तं, तच्चानुशासनादेव प्रायो भवति, न च तदुपमां विना स्पष्टमिति प्रथमतः उपमाद्वारेणानुशासनाभिधायकमिदमध्ययनम्, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वार चतुष्टयमुपदर्श्यते, यावन्नामानिष्पन्ननिक्षेपे द्रुमपत्रकमिति द्विपदं ना, अतो द्रुमस्य पत्रस्य च निक्षेपमाह-

नि.[२८०] निक्खेवो उ दुमंमि चउव्विहो० ॥

नि.[२८१] जाणग सरीरमविए०

नि.[२८२] दुमयाउनामगोयं वेयंतो भावओ दुमो होइ।
एमेव य पत्तस्सवि निक्खेवो चउव्विहो होइ ॥

वृ. 'निक्षेपः' न्यासः 'तुः' पूरणे 'द्रुमे' द्रुमविषयः 'चतुर्विधः' नामादिः, द्विविधो भवति द्रव्ये आगतमो नोआगमतश्च, स त्रिविधः-ज्ञशरीरभव्यशरीरद्रुमस्तद्यतिरिक्तश्च, स पुनस्त्रिविधः-एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, द्रुमायुर्नामगोत्रं वेदयन् भावतो द्रुमो भवति, एवमेव च पत्रस्यापि चतुर्विधो भवति निक्षेप इति गाथात्रयाक्षरार्थः ॥ भावार्थस्तु पूर्ववत्, अन्वर्थ-नामतामस्यादर्शयन्नाह-

नि.[२८३] दुमपत्तेणोवम्मं अहाठिईए उवक्कमेणं च।
इत्थ कयं आइंमी तो तं दुमपत्तमज्झयणं ॥

वृ. द्रुमो-वृक्षः तस्य पर्णं-पत्रं तेनौपम्यम्-उपमा, प्रक्रमादायुषः, केन पुनर्गुणेनौपम्य-मित्याह-'यथास्थित्वा' स्वकालपरिपाकतः पातरूपया, तथा उपक्रमणं-दीर्घकालभाविन्याः स्थितेः स्वल्पकालताऽऽपादनमुपक्रमः, कोऽर्थः ?-पाकादारत एव वातादिनाऽवस्थिति-विनाशनं, तेन चात्राध्ययने 'कृतं' विहितम् 'आदौ' प्रथमं यस्मात् ततः द्रुमपत्रमित्यध्ययनमिदम्, उच्यते इति शेषः। यथा चास्य समुत्थानं तथा दर्शयंस्त्रयोविंशतिसङ्ख्यं गाथाकदम्बकमाह-

नि.[२८४] मगहापुरनयराओ वीरेण विसज्जणं तु सीसाणं।
सालमहासालाणं पिट्ठीचंपं च आगमनं ॥

नि.[२८५] पवज्जा गागिलिस्स य नाणस्स य उप्पया उ तिण्हंपि।
आगमनं चंपपुरिं वीरस्स अवंदनं तेसिं ॥

नि.[२८६] चंपाइ पुन्नभद्दंमि चेइए नायओ पहिअकित्ती।
आमंतेउं समणे कहेइ भयवं महावीरो ॥

नि.[२८७] अट्ठविहकम्ममहणस्स तस्स पगईविसुद्धलेसस्स।
अट्ठावए नगवरे निसीहिए निट्ठिअट्ठस्स ॥

नि.[२८८] उसभस्स भरहपिउणो तेलुक्कपयासनिग्गयजस्स।
जो आरोढुं वंदइ चरिमसरीरो अ सो बाहू ॥

नि.[२८९] साहुं संवासेइ अ असाहुं न किर संवसावेई।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सिद्धपव्वओ सो पासे वेअड्डसिहरस्स ॥

नि.[२९०] चरिमसरीरो साहू आरुहइ नगवरं न अन्नोत्ति।
एयं तु उदाहरणं कासीअ तहिं जिनवरिंदो ॥

नि.[२९१] सोऊण तं भगवओ गच्छइ तहि गोअमो पहिअकित्ती।
आरुहइ तं नगवरं पडिमाओ वंदइ जिनाणं ॥

नि.[२९२] अह आगओ सपरिसो सव्विड्डीए तहिं तु वेसमनो।
वंदित्तु चेइयाइं अह वंदइ गोअमं भयवं ॥

नि.[२९३] अह पुंडरीअनायं कहेइ तहि गोयमो पहियकित्ती।
दसमस्स य पारणए पव्वावेसीस कोडिन्नं ॥

नि.[२९४] तस्स य वेसमणस्सा परिसाए सुरवरो पयणुकम्मो।
तं पुंडरीयनायं गोयमकहिअं निसामेइ ॥

नि.[२९५] घित्तूण पुंडरीअं वग्गुविमाणओ सो चुओ संतो।
तंबुवने धनगिरिस्स अज्जसुनंदासुओ जाओ ॥

नि.[२९६] दिन्ने कोडिन्ने या सेवाले चेव होइ तइए य।
इक्किक्कस्स य तेसिं परिवारो पंच पंच सया ॥

नि.[२९७] हेट्ठिल्लाण चउत्थं मज्झिल्लाणं तु होइ छट्ठं तु।
अट्ठममुवरिल्लाणं आहारो तेसिमो होइ ॥

नि.[२९८] कंदाई सच्चितो हिट्ठिल्लाणं तु होइ आहारो।
बीआणं अच्चित्तो तइआणं सुक्कसेवालो ॥

नि.[२९९] तं पासिऊण इड्ढिं गोयमरिसिणो तओ तिवग्गावि।
अनगारा पव्वइआ सप्परिवारा विगयमोहा ॥

नि.[३००] एगस्स खीरभोअणहेऊ नाणुप्पया मुणेयव्वा।
एगस्स परिसादंसणेण एगस्सय य जिनंमि ॥

नि.[३०१] केवलिपरिसं तत्तो वच्चंता गोयमेण भणिआ य।
इउ एव वंदह जिनं कयकिच्च जिनेन सो भणिओ ॥

नि.[३०२] सोऊण तं अरहओ हियएणं गोयमोऽवि चिंतेइ।
नाणं मे न उपज्जइ भणिओ य जिनेन सो ताहे ॥

नि.[३०३] चिरसंसट्ठं चिरपरिचिअं चिरमणुगयं च मे जाण।
देहस्स य भेयंमि य दुन्निवि तुल्ला भविस्सामो ॥

नि.[३०४] जह मन्ने एअमट्ठं अम्हे जाणामु खीणसंसारा।
तह मन्ने एअमट्ठं विमानवासीवि जाणंति ॥

नि.[३०५] सोऊण तं भगवओ मिच्छायारस्स सो उवट्ठाइ।
तन्नीसाए भयवं सीसाणं देइ अनुसिट्ठिं ॥

वृ. एतच्चाक्षरार्थं प्रति स्पष्टमेव, नवरं मगधापुरनगरं-राजगृहं, तस्यैव तत्कालापेक्षया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मगधासु प्रधानपुरत्वादविद्यमानकरत्वाच्च, तथा 'नायओ पहियकित्ति'त्ति नायकः-सकल-जगत्स्वामी ज्ञात एव वा ज्ञातक-उदारक्षत्रियः, न्यायतो वा प्रथिमा-सकलजगत्प्रत्याख्याता कीर्तिर्यस्य स तथा, प्रकृत्या-स्वभावेन विशुद्धा-अत्यन्तनिर्मला लेश्या शुक्ललेश्या यस्य स तथा, 'निसीहिय'त्ति निषिध्यन्ते-निराक्रियन्ते अस्यां कर्म्माणीति नैषेधिकी-निर्वाणभूमिः, 'कृत्यल्युटोऽन्यत्रापि' इत्यपरिग्रहणबलात् ल्युट्, निष्ठितार्थस्य-समाप्तसकलकृतस्य यद्वा निषेधे-सकलकर्मनिराकरणलक्षणे भवा नैषेधिकी-मुक्तिगतिस्तया निष्ठितार्थो यस्तस्य ऋषभस्य-ऋषभनाम्नः, स चान्योऽपि सम्भवति अत आह-भरतपितुरिति, 'वन्दते' स्तौति प्रक्रमान्नैषेधिकीं प्रतिमां वा, तथा साधुं 'स'मिति भृशं वासयति संवासयति, कोऽर्थः ?-रात्रिं दिवं चावस्थापयति, नोऽसाधुं संहरणादिनाऽऽनीतमपि 'किल' इति परोक्षाप्तवादसूचकः, 'अथ' इत्युपन्यासे सिद्धोपलक्षितः पर्वतः सिद्धपर्वतः 'तास्थ्यात्तद्वयपदेश' इति तदधिष्ठाय-कदेवताविशेष एवोक्तः, यद्वा तत्तीर्थानुभाव एवायं यदसाधोस्तत्रावस्थानमेव न सम्पद्यते,

तथा च 'चरमशरीरः साधुः आरोहती'त्यत्र पदप्रचारेणेति गम्यते, 'उदाहरणं' कथनं 'कासीअ'त्ति अकार्षीद्, अनेन चैवंविधदेवप्रवादोत्थानकारणमुक्तं 'घेत्तूण पुंडरीयम्' इत्यादिना च प्रसङ्गागतं वैरस्वामिजन्मोक्तं, तथा 'तं पासिऊण इड्ढि'न्ति तामिति-प्रतीतामेव भगवति जङ्घाचारणरूपलब्धिरूपां, तथा 'तिवग्गावि'त्ति त्रयो वर्गा येषां ते त्रिवर्गाः, तेऽपि प्रक्रमाद्दि-न्नकोण्डिन्यशैवलिनस्त्रयोऽपि, नैको द्वौ वेत्यपिशब्दार्थः, 'अणगार'त्ति अविद्यमानगृहाः, ते च तापसादयोऽपि स्युरत आह-प्रकर्षेण व्रजिता-मिथ्यात्वादिभ्यो विनिर्गताः प्रव्रजिताः, तथा 'एगस्स खीरभोयणहेउ'त्ति क्षीरान्नभोजनमेव विशुद्धाध्यवसायविशेषोत्पत्तिनिबन्धनतया हेतुः-कारणं क्षीरभोजनहेतुः, मयूरव्यंसकादित्वात् समासः, तमाश्रित्येति शेषः, 'नानुप्पय'त्ति ज्ञान-स्योत्पादनमुत्पत् 'सम्पादादित्वात् क्विप्' ज्ञानोत्पात्,

तथा 'चिरसंसट्ठ'न्ति चिरंप्रभूतकालं संसृष्टः-स्वस्वाम्यादिसम्बन्धेन सम्बन्धो यस्तं, 'चिर-परिचितः' सहवासनादिना स पूर्वो यस्तम्, उभयत्र विस्पष्टं पटुर्विस्पष्टपटुरितिवत् सह सुपेत्यत्र सुपेति योगविभागात् समासः, चिरमनुगतमभिप्रायानुवर्तिनमात्मानमति शेषः, 'ममे'त्यात्म-निर्देशः, ततः प्रभूतमोहनीयाच्छादिततया न ते ज्ञानोत्पत्तिरित्यभिप्रायः 'देहस्य तु' शरीरस्य 'भेदे' विनाशे द्वावप्यावां 'तुल्यौ' मुक्तिपदप्राप्त्या समौ 'भविष्यावः' इति मा त्वमधृतिं कृथा इति भावः, 'यथा' येन प्रकारेण यथा 'मन्ने'त्ति आर्षत्वात् पुरुषव्यत्ययः, ततो मन्यसे त्वम् एनं ज्ञानावाप्तिलक्षणम् 'अर्थं' वस्तु 'वयं' जानीमः अवबुध्यामहे, किंविशिष्टाः सन्तः ?, इत्याह-क्षीणः पुनर्भवाभावतः संसारो येषां ते क्षीणसंसाराः, तेन प्रकारेण तथा, व्यवच्छेदफलत्वात् तथैव, किमित्याह-'मन्ने'त्ति प्राग्वत्, मन्यसे 'एनमर्थम्' अनन्तरोक्तं 'विमानवासिनोऽपि' देवा 'जानन्ति' अवबुध्यन्ते, एवं च यथा क्षीणसंसारा जानन्ति तथा विमानवासिनोऽपि जानन्ती-त्याशयवतः क्षीणसंसारिणां च परिज्ञानं प्रति साम्यमभिमतमित्यहो तव विवेकतेत्युपालब्धः।

तथा 'जाणगपुच्छं'ति ज्ञायकपृच्छया पृच्छति, न हि तस्य भगवतः समस्तज्ञेयविषयविज्ञान-चक्षुषः क्वचिदविज्ञानमस्ति, किन्तु गौतमं प्रतिबोधयन्नित्थमुपालभते, तथा यथा किम् ?-दीव्यन्ति-क्रीडन्ति देवाः तेषां वचनं वचो 'गिज्झं'ति ग्राह्यमुपादेयम्, 'आतो' त्ति आर्षत्वादाहो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वित्, जिनानां वराः-प्रधानाः जिनवराः य उत्पन्नकेवलास्तीर्थकृतस्तेषां ?, तदनेनैकमस्मत्परिज्ञानस्य देवपरिज्ञानस्य च साम्यापादनम्, अपरं तु साम्ये सत्यपि 'देहस्स य भेयंमी दोण्णिवि तुल्ला भविस्सामो'त्ति अस्मद्वचनतः शतशोऽपि श्रुतान्न विनिश्चयमपि विहितवान्, देव वचनात्तु सकृदप्याकर्णितात् तथेति प्रतिपाद्याष्टापदं प्रति प्रयात इत्यहो ते मोहविजृम्भितमित्युक्तं भवति।

श्रुत्वा तदुपालम्भवचो भगवतः सम्बन्धि 'मिच्छाचारस्स'त्ति आर्षत्वान्मिथ्याचाराद्-उक्तरूपाद्गम्यमानत्वात् प्रतिक्रमितुम् 'उपतिष्ठति' उद्यच्छति। 'तन्निश्रये'ति गौतमनिश्रया 'अनुशिष्टिं' शिक्षाम् एवद्भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

तेणं कालेणं तेणं समएणं पिट्ठीचंपा नाम नयरी, तत्थ सालो राया, महासालो जुवराया, तेसिं, सालमहासालाणं भगिनी जसवती, तीसे पिढरो भत्तारो, जसवतीए अत्ततो पिढरपुत्तो गागलीनाम कुमारो। तत्थ वद्धमाणसामी समोसढो सुभूमिभागे उज्जाने, सालो निग्गतो, धम्मं सुच्चा भणति-जं नवरं महासालं रज्जे ठावेमि, सो अतिगतो, तेन आपुच्छितो महासालो भणति-अहंपि संसारभउविग्गो जहा तुब्भे इहं मेढीपमाणं तहा पव्वइयस्सवि, ताहे गागलिं कंपिल्लातो सद्दावेऊण पट्टो बद्धो अभिसित्तो य राया जातो। तस्स माया कंपिल्लपुरे नयरे दिन्निल्लिया पिढरस्स, तेन ततो सद्दावितो, सो पुण तेसिं दो सिबियातो कारेति, जाव ते पव्वतिया, सा भगिनी समणो-वासिया जाता, तए णं ते समणा होंतगा, एक्कारस अंगाइं अहिज्जिया। तते णं समणे भगवं महावीरे बहिया जनवयविहारं विहरति।

तेणं कालेणं तेणं समएणं रायगिहं नाम नयरं, तत्थ सामी समोसढो, ताहे सामी पुनोऽवि निग्गतो चंपं पहावितो, ताहे सालमहासाला सामिं आपुच्छंतिअम्हे पिट्ठीचंपं वच्चामो जदि नाम ताण कोवि बुज्झेज्जा, सम्मत्तं लभेज्जा, सामीवि जाणति-जहा ताणि संबुज्झिहिंति, ताहे सामिणा गोयमसामी से बिइज्जओ दिन्नो, गोयमसामी पिट्ठीचंपं गतो, तत्थ समोसरणं, गागली पिढरो जसवती य निग्गयाणि, भगवं धम्मं कहेइ, ताणि धम्मं सोऊण संविग्गाणि, ताधे गगाली भणति-जं नवरं अम्मापियरो आपुच्छामि, जेट्ठपुत्तं च रज्जे ठवेमि, ताणि आपुच्छियाणि भणंति-जइ तुमं संसारभउव्विग्गो अम्हेवि, ताधे सो पुत्तं रज्जे ठावित्ता अम्मापितीहिं समं पव्वइतो, गोयमसामी ताणि घेत्तूण चंपं वच्चइ। तेसिं सालमहासालाणं पंथं वच्चंताणं हरिसो जाओ-जधा संसारं उत्तारियाणि, एवं च तेसिं सुहेणं अज्झवसानेनं केवलनाणं उप्पन्नं, इयरेसिंपि चिंता जाया-जहा एएहिं अम्हे रज्जे ठावियाणि संसारातो य मोइयाणि, एवं चितंताणं सुभेणं अज्झवसानेणं तिण्हंपि केवलनाणं उप्पन्नं।

एवं तानि उप्पन्ननाणाणि चंपं गयाणि, सामिं पायाहिणं करेमाणाणि तित्थं पणमिऊण केवलिपरिसं पहावियाणि, गोयमसामीवि भगवं वंदिऊण तिक्खुत्तो पयाहिणीकाऊण पाएसु पडितो, उट्ठिओ भणत्ति-कहिं वच्चह ?, एह तित्थयरं वंदह, ताधे सामी भणइ-मा गोयमा ! केवली आसाएहि, ताहे आउट्टो खामेति, संवेगं च गतो। तत्थ गोयमसामिस्स संका जाया-नाहं न सिज्झिस्सामित्ति, एवं गोयमसामीवि चिंतेति। इओ य देवाण संलावो वट्टइ-जो अट्ठावयं विलग्गति चेइयाणि य वंदति धरणिगोयरो सो तेन भवग्गहनेणं सिज्झइ, ताधे सामी तस्स चित्तं जाणति तावसाण य संबोहणयं, एयस्सवि थिरता भविस्सतित्ति दोवि कयाणि भविस्संति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयस्सवि पच्चतो तेवि संबुज्झिस्संति'त्ति, सोऽवि सामिं आपुच्छइ, अट्ठावयं जामित्ति, तत्थ भगवया भणियं-वच्च अट्ठापयं चेइयाणं वंदतो, तए णं भगवं हट्ठतुट्ठो वंदित्ता स गतो, तत्थ य अट्ठावए जनवायं सोऊणं तिन्नि तावसा पंचपंचसयपरिवारा पत्तेयं अट्ठावयं विलग्गामोत्ति तत्थ किलिस्संति, कोडिन्नो दिन्नो सेवाली, जो कोडिन्नो सो चउत्थं २ काऊण पच्छा मूलकंदाणि आहारेति सचित्ताणि, सो पढमं मेहलं विलग्गो, दिन्नो छट्ठं छट्ठेणं काऊणं परिसडियं पंडपत्ताणि आहारेइ, सो बीयं मेहलं विलग्गो, सेवाली अठ्ठमं २ काऊण जो सेवालो सयं मइल्लतो तं आहारेइ, सो तइयं मेहलं विलग्गो, एवं तेवि ताव किलिस्संति।

भयवं च गोयमे ओरालसरीरे हुयवहतडियतरुणरबिकिरणसरिसए तेएणं, ते तं इंतं पेच्छेत्ता ते एवं भणंति-एस किर एत्थ थुल्लतो समनो विलग्गिहिति ?, जं अम्हे महातवस्सी सुक्का भुक्खा न तरामोत्ति विलग्गिउं, भगवं च गोयमे जंघाचारणलद्धीए लूयातंतुपुडगंपि नीसाए उप्पयति, जाव ते पलोयंति-एस आगओत्ति, एसो अदंसणं गतोत्ति, ताहे ते विम्हिया जाया पसंसंति, अच्छंति य पलोयंता, जति ओयरति तो एयस्स वयं सीसा, एवं ते पडिच्छंता अच्छंति।

सामीवि चेइयाणि वंदित्ता उत्तरपुरच्छिमे दिसिभागे पुढविसिलापट्टए तुयट्टो असोगवरपायस्स अहे तं रयणिं वासाए उवागतो। इओ य सक्कस्स लोगपालो वेसमनो, सोवि अट्ठावयचेइयवंदतो एति, सो चेइयाणि वंदित्ता गोयमसामिं वंदित, ताहे सो धम्मं कहेति, भगवं अणगारगुणे परिकहिउं पवत्तो, अंताहारा पंताहारा एवं वन्नेति, वेसमनो चिंतेति-एस भगवं एरिसे साहुगुणे वन्नेइ, अप्पणो य से इमा सरीरसुकुमाराया जारिसा देवाणवि नत्थि, भगवं तस्स आकूतं नाउं पुंडरीयं नाम अज्झयणं पन्नवेइ, जहा-पुक्खलावतीविजए पुंडरिगिणीए नगरीए नलिणिगुम्मं उज्जाणं,

तत्थ णं महापउमे नाम राया होत्था, पउमावती देवी, ताणं दो पुत्ता-पुंडरीए कंडरीए य, सुकुमारा जाव पडिरूवा, पुंडरीए जुवराया होत्था। तेणं कालेणं तेणं समएणं थेरा भगवंतो जाव नलिनिगुम्मे उज्जाने समोसढा, महापउमे निग्गए, धम्मं सोच्चा भणति-जं नवरं देवाणुप्पियां ! पुंडरीयं कुमारं रज्जे ठवेमि, अहासुहं मा पडिबंधं करेहि, एवं जाव पुंडरीए राया जाए जाव विहरइ। तते णं से कंडरीए कुमारे जाए। तए णं से महापउमे राया पुंडरीयं रायं आपुच्छति-तए णं से पुंडरीए सिबियं नीनेइ, जाव पव्वतिते, नवरं चोद्दसपुव्वाइं अहिज्जति, बहूहिं छठ्ठठ्ठमहातवोवहाणेहिं बहूणि वासाणि सामन्नं पालिऊणं मासियाए संलेहणाए सट्ठिं भत्ताइं झोसित्ता जाव सिद्धे।

अन्नया य ते थोरा पुव्वाणुपुव्विं जाव पुंडरिगिणीए समोसढा, परिसा निग्गया, तए णं से पुंडरीए राया कण्डरीएणं जुवरन्ना सद्धिं इमीसे कहाए लद्धट्ठे समाणे हट्ठे जाव गए, धम्मकहा, जाव से पुंडरीए सावगधम्मं पडिवन्ने, जाव पडिगए सावए जाए। तए णं से कंडरीए जुवराया थेराणं धम्मं सोच्चा हट्ठे जाव जहेदं तुज्झे वदह, जं नवरं देवाणुप्पिया! पुंडरीयं रायं आपुच्छामि, तए णं जाव पव्वयामि, अहासुहं पव्व्यह। तते णं से कंडरीए जाव थेरे नमंसति २ थेराणं अंतितातो पडिनिक्खमति २ त्ता तमेव चाउघंटं आसहरं दुरूहति, जाव पच्चोरुहति, जेणेव पुंडरीए राया तेनेव उवागच्छति, करयल जावपुंडरीयं रायं एवं वयासी-एवं खलु मए देवानु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्पिया। थेराणं अंतिए जाव धम्मे निसंते, से य धम्मे इच्छिए पडिच्छिए अभिरुइए, तए णं अहं देवानुप्पिया ! संसारभउव्विग्गे भीए जम्मणमरणाणं इच्छामि णं तुज्झेहिं अणुन्नाए समाणे थेराण अंतिए जाव पव्वतित्तएत्ति।

तए णं से पुंडरीए राया एवं वयासी-मा णं तुमं देवानुप्पिया। इदानिं थेराणं अंतिए जाव पव्वयाहि, अहन्नं तुमं महया २ रायाभिसेएणं अभिसिंचिस्सामि, तए णं से कंडरीए पुंडरियस्स रन्नो एयमट्ठं नो आढाति नो परिजाणाति तुसिणीए संचिट्ठइ, तए णं से कंडरीए पुंडरीए दोच्चंपि तच्चंपि एवं वयासी-इच्छामि णं देवानुप्पिया ! जाव पव्वइत्तएत्ति।

तए णं से पुंडरिए राया कंडरीयं कुमारं जाहे नो संचाएइ विसयानुलोमाहिं बहूहिं आघवणाहि य पन्नवणाहि य सन्नवणाहि य विन्नवणाहि य आघवित्तए वा ४ ताहे विसयपडिकूलाहिं संजमभउव्वेगकरीहिं पन्नवणाहि य पन्नवेमाणे २ एवं वयासी-एवं खलु जाया ! निग्गंथे पावयणे सच्चे अनुत्तरे केवलिए एवं जहा पडिक्कमणे जाव सव्वदुक्खाण अंतं करेति, किंतु अहीव एगंतदिट्ठीए खुरो इव एगंतधाराए लोहमाया वा जवा चावेयव्वा वालुयाकवले इव निस्साए गंगा वा महानई पडिसोयगमणाए महासमुद्दे इव भुयाहिं दुरुत्तरेहिं तिक्खं चंकमियव्वं गरुयं लंघियव्वं असिधारं च तवं चिरयव्वं, नो य खलं कप्पई जाता ! समणाणं निग्गंथाणं पाणाइवाए वा जाव मिच्छादंसणसल्लेति वा १८ आहाकम्मेति वा उद्देसेति वा मिस्सजाए वा अज्झोयरए पूइए कीए पामिच्चे अच्छेज्जे अनिसिट्ठे अभिहडे वा ठइयए वा कंतारभत्तए इ वा दुब्भिक्खभत्तेइ वा गिलाणभत्ते इ वा पाहुणगभत्तेत्ति वा सिज्जातरपिंडे इ वा रायपिंडे इ वा मूलभोयणे इ वा कन्दभोयणे इ वा फलभोयणे इ वा बीयभोयणे इ वा हरियभोयणे इ वा भोत्तए वा पायए वा, तुमं च णं जाया ! सुहसमुचिते नालं सीतं नालं उण्हं नालं खुहा नालं पिवासा नालं चोरा नालं बाला नालं दंसा नालं मसगा नालं वात्तियपित्तियसिंभियसन्निवाइयविविहे रोगायंके उच्चावए वा गामकंटते, वा बावीसं परीसहोवसग्गे उदिन्ने सम्मं अहियासित्तएत्ति, तं नो खलु जाता ! अम्हे इच्छामो तुज्झं खणमवि विप्पओगं, तं अच्छाही ताव जाया ! अणुभवाहि रज्जसिरिं, पच्छा पव्वहिसि। तए णं से कंडरीए एयं वयासी-

तहेव णं देवानुप्पिया ! जन्नं तुज्झे वयह, किं पुन देवानुप्पिया ! निग्गंथे पावयणे कीवाणं कायराणं कापुरिसाणं इहलोयपडिबद्धाणं परलोगपरंमुहाणं विसयतिसियाणं दुरनुचरे पागयजणस्स, धीरस्स निच्छियस्स ववसियस्स नो खलु इत्थं किंचि दुक्करकरणाए, तं इच्छामि णं देवानुप्पिया ! जाव पव्वतित्तएत्ति। तए णं तं कंडरीयं पुंडरीए राया जाहे नो संचाएति बहूहिं आघवणाहि य ४ आघवित्तए वा ४ ताधे अकामए चेव निक्खमणं अणुमन्नित्था।

तए णं से पुंडरीए कोडुंबियपुरिसे सद्दावेइ २ एवं वयासी-जहा महामइग्घं महारिहं निक्खमणमहिमं करेह, जाव पव्वतितो। तओ सामाइयमाइयाइं एक्कारस अंगाइं अहिज्जियाइं, बहूहिं चउत्थच्छट्ठट्ठमाईहिं तवोवहाणेहिं जाव विहरइ। अन्नया तस्स कंडरीयस्स अंतेहि य पंतेहि य जाव रोगायंके पाउब्भूए जाव दाहवक्कंतीए यावि विहरति। तते णं ते थेरा भगवंतो अन्नया कयाइं पुव्वानुपुव्विं चरमाणा गामानुगामं विहरमाणा पुंडरिगिणीए नलिनिवने समोसढा, तए णं से पुंडरीए राया इमीसे कहाए लद्धट्ठे समाणे जाव पज्जुवासइ, पत्थुया धम्मकहा भगवया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तते णं से पुंडरीए राया धम्मं सोच्चा जेणेव कंडरीए अनगारे तेनेव उवागच्छइ २ त्ता कंडरीयं वंदइ नमंसइ २ कंडरीयस्स सरीरं सव्वाबाहं सरुयं पासति २ जेणेव थेरा तेनेव उवागच्छइ, थेरे वंदति २ एवं वयासी-अहं णं भंते ! कंडरीयस्स अनगारस्स अहापवत्तेहिं तेगिच्छिएहिं फासुय-एसणिज्जेहिं अहापवत्तेहिं ओसहभेसज्जभत्तपाणेहिं तिगिच्छं आउंटामि, तुज्झे णं भंते ! मम जाणसालासु समोसरह, तते णं थेराणं पुंडरीयस्स रन्नो एयमट्ठं पडिसुणेतिं २ जाव जाणसालासु विहरंति।

तए णं से पुंडरीए कंडरीयस्स तिगिच्छं आउंटेइ, तए णं तं मणुन्नं असणं ४ आहारेंतस्स समाणस्स से रोगायंके खिप्पामेव उवसंते हट्ठे जाए आरोगे बलियसरीरे, तओ रोगायंकाओ मुक्केऽवि समाणे तंसि मणुन्नंसि असने ४ मुच्छिए जाव अज्झोववन्ने विविहे य पाणगंसि, नो संचाएति बहिया अब्भुज्जएणं विहारेणं विहरित्तएत्ति। तते णं से पुंडरीए इमीसे कहाए लद्धट्ठे समाणे जेणेव कंडरीए तेनेव उवागच्छति २ कंडरीयं तिक्खुत्तो आयाहिणं पयाहिणं करेति २ वंदति २ एवं वयासी-धन्नेऽसि णं तुमं देवानुप्पिया ! एवं सुपन्नोऽसि णं कयत्थे कयलक्खणे सुलद्धे णं तव देवानुप्पिया ! माणुस्सए जम्मे जीवियफले, जन्नं तुमं रज्जं च जाव अंतेउरं च विच्छड्डइत्ता जाव पव्वइए, अहन्नं अहन्ने अकयपुन्ने जाव मानुस्सए भवे अनेगजाइजराम-णरोगसोगसारीरमाणसपकामदुक्खवेयणावसणसयउवद्दवाभिभूए अधुवे अनीइए असासए संज्झब्भरागसरिसे जंलबुब्बुयसमाणे कुसग्गजलबिंदुसन्निहे सुमिणगदंसणोवमे विज्जु-लयाचंचले अनिच्चे सडणपडणविद्धंसणधम्मके पुव्विं वा पच्छा वा अवस्सं विप्पजहियव्वइत्ति, तहा मानुस्सयं सरीरगंपि दुक्खाययणं विविहवाहिसयसन्निकेयं अट्ठियकट्ठुट्ठियं सिराण्हारु-जालओणद्धसंविनद्धं मट्टियभंडं व दुब्बलं असुइसंकिलिट्ठं अणिट्ठंपि य सव्वकालं संठप्पयं जराधुणियं जज्जरघरं व सडणपडणविद्धंसणधम्मयं पुव्विं वा पच्छा वा अवस्सविप्पजहियव्वं, कामभोगावि य णं मानुस्सगा असुई असासया वंतासवा एवं पित्ता० खेला० सुक्का० सोणियासवा उच्चारपासवणखेलसिंघाणवंतपित्तसुक्कसोणियसमुब्भवा अमणुन्नपु (दु) रूयमुत्तपूतिपुरीसपुन्ना मयगंधुस्सास असुभणिस्सासउव्वीयणगा बीभच्छा अप्पकालिया लघुस्सगा कलमलाहिया सुदुक्खा बहुजनसाहरणा परिकिलेसकिच्छदुक्खसज्झा अबुहजननिसेविया सदा साधुगरहिनिज्जा अनंतसंसारवड्ढणा कडुगफलविवागा चुडुलिव्व अमुंचमाणा दुक्खाणुबंधिणो सिद्धिगमनविग्घा पुव्विंवा पच्छा वा अवस्स विप्पजहियव्वा भवंति, जेऽवि य णं रज्जे हिरन्ने सुवन्ने य जाव सावइज्जे सेऽवि य णं अग्गिसाहिए चोरसाहिए रायसाहिए दाइयसाहिए अधुवे अनितीए असासए पुव्विं वा पच्छा वा अवस्सविप्पजहियव्वे भविस्सतित्ति, एवंविहम्मि रज्जे जाव अंतेउरे य मानुस्सएसु य कामभोगेसु मुच्छिए ४ नो संचाएमि जाव पव्वयित्तए, तं धन्नेऽसि णं तुमं जाव सुलद्धे णं मणुयजम्मे, जं णं पव्वइए।

तते णं से कंडरीए पुंडरीएणं एवं वुत्ते तुसिणीए संचिट्ठति, ततेणं से पुंडरीए दोच्चंपि तच्चंपि एवं वयासि-धन्नेऽसि तुमं अहं अहन्ने। तएणं से दोच्चंपि तच्चंपि एवं वुत्ते समाणे अकामए अवसंवसे लज्जाए य गारवेण य पुंडरीयरायं आपुच्छइ, थेरेहिं सद्धिं बहिया जनवयविहारं विहरई। तए णं से कंडरीए थेरेहिं सद्धिं किंचि कालं उग्गं उग्गेणं विहरित्ता तओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्छा समणत्तणनिव्विन्ने समणत्तणणिब्भत्थिए समणगुणमुक्कजोगे थेराणं अंतियातो सणियं २ पच्चोसक्कइ, जेणेव पुंडरगिणी नयरी जेणेव पुंडरीयस्स रन्नो भवने जेणेव असोगवनिया जेणेव असोगवरपायवे जेणेव पुढविसिलावट्टए तेनेव उवागच्छति २ जाव सिलापट्टयं दुरुहइ २ ओहयमनसंकप्पे जाव झियायति। तए णं पुंडरीयस्स अम्मधाई तत्थागच्छति, जाव तं तहा पासति २ पुंडरीयस्स साहति, सेऽवि य णं अंतेउरपरिवालसंपरिवुडे तत्थागच्छति २ तिक्खुत्तो आयाहिणपयाहिणं जाव धन्नेऽसि णं सव्व जाव तुसिणीए, तए णं पुंडरीए एवं वयासी-अट्ठो भंते ! भोगेहिं ?, हंत अट्ठो, तए णं कोडुंबियपुरिसे सद्दावेइ २ कलिकुलसेणेवाभिसित्तो रायभिसेएणं जावरज्जं पसासेमाणे विहरति।

तए णं से पुंडरीए सयमेव पंचमुट्ठियं लोयं करेइ २ चाउज्जामं धम्मं पडिवज्जइ २ कंडरीयस्स आयारभंडगं सव्वसुहसमुदयंपिव गिण्हति २ इमं अभिग्गहं गिण्हति-कप्पति मे थेराणं अंतिते धम्मं पडिवज्जेत्ता पच्छा आहारं आहारित्तएत्तिकट्टु थेराभिमुहे निग्गए। कंडरीयस्स उ तं पणीयं पानाभोयणं आहारियस्स नो सम्मं परिणयं, वेयणा पाउब्भूया उज्जला विउला जाव दुरहियासा, तए णं से रज्जे य जाव अंतेउरे य मुच्छिए जाव अज्झोववन्ने अट्टदुहवसट्टे अकामए कालं किच्चा सत्तमीपुढवीए तेत्तीससागरोवमट्ठिईए जाए। पुंडरीएऽवि य णं थेरे पप्प तेसिं अंतिते दोच्चंपि चाउज्जामे धम्मे पडिवज्जति, अट्ठमखमणपारणगंसि ने जाव आहारेई, तेन य कालाईक्कंतसीयललुक्खअरसिविरसेणं अपरिणतेन वेयणा दुरहियासा जाया, तए णं से अधारनिज्जमितिकट्टु करयलपरिग्गहियं जाव अंजलिं कट्टु नमोऽत्थु णं अरहंताणं भगवंताणं जाव संपत्ताणं नमोऽत्थु णं थेराणं भगवंताणं मम धम्मायरियाणं धम्मोवएसयाणं पुव्विंपि य णं मए थेराणं अंतिते सव्वे पाणाइवाए पच्चक्खाए जावज्जीवाए जाव सव्वे अकरणिज्जे जोगे पच्चक्खाए, इदानिंपि तेसिं चेव णं भगवंताणं अंतिते जाव सव्वं पाणातिवायं जाव सव्वं अकरणिज्जं जोगं पच्चक्खामि, जंपि य मे इमं सरीरगं जाव एयंपि चरिमेहिं ऊससानीसासेहिं वोसिरामित्ति, एवं आलोइयपडिक्कंते समाहिपत्ते कालमासे कालं किच्चा सव्वट्ठसिद्धे तेत्तीससागरोवमाऊ देवे जाए, तओ चइत्ता महाविदेहे सिज्झिहित्ति।

ता मा तुमं दुब्बलत्तं बलियत्तं वा गिण्हाहि, जधा सो कंडरीओ तेणं दोब्बलेणं अट्टदुहट्टवसट्टो सत्तमीए उववन्नो, पुंडरीतो, पडिपुन्नगलकवोलो सव्वट्ठसिद्धे उववन्नो, एवं देवानुप्पिया ! बलितो दुब्बलो वा अकारणं, इत्थ झाणनिग्गहा कायव्वो, झाणनिग्गहो परमं पमाणं। तत्थ वेसमणो अहो भगवया आकूयं नायंति एत्थ अतीव संवेगमान्नोत्ति वंदित्ता पडिगतो। तत्थ वेसमणस्स एगो सामानितो देवो, तेन तं पुंडरीयज्झयणं ओगाहियं पंचसयाणि संमत्तं च पडिवन्नोत्ति, केई भणंति-जंभगो सो। ताहे भगवं कल्लं चेइयाणि वंदित्ता पच्चोरुहति, ते तावसा भणंति-तुज्झे अम्हाणं आयरिया अम्हे तुब्भं सीसा, सामी भणति-तुज्झं अम्हं च तिलय-गुरू आयरिया, ते भंणति-तुब्भवि अन्नो आयरिओ ?, ताहे सामी भगवओ गुणथवणं करेइ, ते पव्वइया, देवयाए लिंगानी उवनियाणि, ताहे ते भगवया सद्धिं वच्चंति भिक्खावेला य जाया, भगवं भणति-किं आनिज्जउ ?, ते भणंति-पायसो, भगवं च सव्वलद्धिसंपुन्नो पडिग्गहगं महुसंजुत्तस्स पायसस्स भरित्ता आगतो, ताहे भणति-परिवाडीए ठाह, ते ठिया, भगवं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्खीणमहानसितो, ते धाया, ते सुट्ठुयरं आउट्टा, ताहे सयमाहारेति, ताधे पुनरवि पट्ठविया।

तेसिं च सेवालभक्खगाणं जेमंताणं चेव केवलणाणं उप्पन्नं, दिन्नस्स वग्गे छत्ताइच्छत्तं पेच्छंताणं, कोडिन्नस्स वग्गे सामिं दट्ठूण उववन्नं। गोयमसामी पुरओ पकड्ढमानो सामिं पयाहिणीकरेति, तेवि केवलिपरिसं पहाविया, गोयमसामी भणइ-एध सामिं वंदह, सामी भणइ-गोयमा! मा केवली आसाएहि, गोयमसामी आउट्टो मिच्छादुक्कडं करेति। तओ गोयम-सामिस्स सुट्ठुयरं अधिती जाया, ताधे सामी गोयमं भणति-किं देवाणं वयणं गिज्झं? आतो जिनाणं?, गोयमो भणति-जिनवराणं, तो कीस अधितिं करेसि?, ताधे सामी चत्तारि कडे पन्नवेइ, तंजहा-सुंबकडे विदलकडे चम्मकडे कंबलकडे, एवं सामीवि गोयमसामीतो कंबल-कडसमानो, किं च-चिरसंसट्ठोऽसि मे गोयमा! जाव अविसेसमणाणत्ता भविस्सामो, ताधे सामी दुमपत्तयं नाम अज्झयणं पन्नवेइ।

देवो वेसमणसामानितो ततो चइत्ता णं तुंबवनसन्निवेसे धनगिरीनाम गाधावई, सो य पव्वतिउकामो, तस्स य मायापियरो वारेंति, पच्छा सो जत्थ २ वरेंति तत्थ २ विप्परिणामेति जहा अहं पव्वइउकामो, तस्स य तयणुरूवस्स गाहावतिस्स धूया सुणंदा नाम, सा भणइ-ममं देह, ताधि सा दिन्ना, तीसे य भाया अज्जसमितो नाम पुव्वपव्वतितो, तीसे य सुनंदाए कुच्छिंसि सो देवो उववन्नो, ताधे भणति धनगिरी-एस ते गब्भो बिइज्जिओ होहिइ, सो सीहगिरिस्स पासे पव्वतितो, इमोवि नवण्हं मासाणं दारतो जातो॥ इत्यादि भगवद्वैरिस्वामिकथा आवश्यक-चूर्णितोऽवसेया इत्युक्तो नामनिष्पन्ननिक्षेपफः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सतीत्यतः सूत्रानगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (२९१) *दुमपत्तए पंडुयए जहा, निवडइ राइगणाण अच्चए।*
एवं मनुयाण जीवियं, समयं गोयम! मा पमायए॥

वृ. द्रुमो-वृक्षस्तस्य पत्रं-पलाशं तदेव तथाविधावस्थां प्राप्यानुकम्पितं द्रुमपत्रकं 'पंडुरए'त्ति आर्षत्वात् पाण्डुरकं कालपरिणामतस्तथाविधरोगादेर्वा प्राप्तवलक्षभावं, येन प्रकारेण यथा, 'निपतति' शिथिलवृन्तबन्धनत्वाद्, भ्रश्यति, प्रक्रमात् द्रुमत एव, रात्रिगणानां दिन-गणाविनाभावित्वादुपलक्षणत्वाद्वा रात्रिन्दिवससमूहानाम् 'अत्यये' अतिक्रमे, 'एवम्' इत्येवंप्रकारं 'मनुष्याणां' मनुजानां, शेषजीवोपलक्षणं चैतत्, 'जीवितं' आयुः, तदपि हि रात्रिन्दिवगणानामतिक्रमे यथास्थित्या स्थितिखण्डकापहारात्मके नाध्यवसायादिना जनितेनोपक्रमणेन वा जीवप्रदेशेभ्यो भ्रश्यतीत्येवमुच्यते, यतश्चैवमतोऽत्यन्तनिरुद्धः कालः समयस्तम्, अपिशब्दस्य गम्यमानत्वात्समयमप्यास्तामावलिकादि, 'गौतम' इति गौतमसगोत्र-स्येन्द्रभूतेरामन्त्रेणं 'मा प्रमादीः' मा प्रमादं कृथाः, शेषशिष्योपलक्ष णं च गौतमग्रहणम्, उक्तं हि निर्युक्तिकृता-'तन्निस्साए भगवं सीसाणं देइ अनुसट्ठिं', अत्र च पाण्डुरकपदाक्षिप्तं यौवनस्याप्यनित्यत्वमाविश्चिकीर्षुराह निर्युक्तिकृत्-

नि.[३०७] परियट्टिलावन्नं चलंतसंधिं मुयंतबिंटागं।
पत्तं च वसनपत्तं कालप्पत्तं भणइ गाहं॥

नि.[३०८] जह तुब्भे तह अम्हे तुम्हेवि अ होहिहा जहा अम्हे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पाहेइ पडंतं पंडुरवत्तं किसलयाणं ॥

नि.[३०९] नवि अत्थि नवि अ होही उल्लावो किसलपंडुपत्ताणं।

उवमा खलु एस कया भवियजनविबोहणट्ठाए ॥

वृ. परिवर्तितं-कालपरिणत्याऽन्यथाकृतं लावण्यम्-अभिरामगुणात्मस्येति परिवर्तितलावण्यं, यतो न तस्य प्रागिव सौकुमार्यादि विद्यते, तथा चलन्तः-शिथिलीभवन्तः सन्धयो-यस्मिंस्तत्तथा, अत एव 'मुयंत-वेंटागं'ति मुञ्चत्-त्यजत् सामर्थ्याद् वृक्षं वृन्तकं-पत्रबन्धनं यस्य तत् मुञ्चद्वृन्तकं, वृन्तस्य वृक्षमोचने पत्रस्य पतनमेव भवतीति पतदित्युक्तं भवति, 'पत्रं'(च) पर्णं, व्यसनम्-आपदं प्राप्तं व्यसनप्राप्तं तथा कालः-प्रक्रमात् पतनप्रस्तावस्तं प्राप्तं-गतं कालप्राप्तं 'भणति' अभिधत्ते, गीयत इति गाथा तां-छन्दोविशेषरूपां ॥ तामेवाह-

'यथा' इति सादृश्यते, ततो यथा यूयं सम्प्रति किशलयभावमनुभवथ स्निग्धादिगुणैर्गर्वमुद्धहथ अस्मानुपहसथ, तथा वयमप्यतीतदशायां, तथा यूयमपि च भविष्यथ यथा वयमिति, जीर्णभावे हि यथा वयमिदानीं विवर्णविच्छायतयोपहास्यानि, एवं यूयमपि भावीनीति, 'अप्पाहेइ'त्ति उक्तन्यायेनोपदिशति पितेव पुत्रस्य 'पतत्' भ्रश्यत् 'पाण्डुरपत्रं' जीर्णपत्रं 'किसलयानाम्' अभिनवपत्राणां। ननु किमेवं पत्रकिसलयानामुल्लापः सम्भवति ? येनेदमुच्यते,

'नेवास्ति' नैव विद्यते, नैव भविष्यति उपलक्षणत्वात् नैत्र भूतः, कोऽसौ ?-'उल्लापः' वचनं केषां ?-'किशलयपाण्डुपत्राणाम्' उक्तरूपाणां, आर्षत्वाच्च यलोपः, तदिह किमेवमुक्तमित्याह-'उपमा' उपमितिः, खलु एवकारार्थत्वात्, ततः उपमैव, 'एषा' अनन्तरकोक्ता 'कृता' विहिता 'भवियजनविबोहणट्ठाए'त्ति प्रतीतमेव। यथेह किशलयानि पाण्डुपत्रेणानुशिष्यन्ते तथाऽन्योऽपि यौवनगर्वितोऽनुशासनीयः, तथा चैतदनुवादिना वाचकेनावाचि-

"परिभवसि किमिति लोकं जरसा परिजर्जरीकृतशरीरम्।

अचिरात् त्वमपि भविष्यसि यौवनगर्वं किमुद्वहसि ? ॥"

तदेवं जीवितयौवनयोरनित्यत्वमवगम्य न प्रमादो विधेय इति गाथात्रयार्थयुक्तसूत्रगमार्थः॥ पुनरायुषोऽनित्यत्वं ख्यापयितुमाह-

मू.(२९२) कुसग्गे जह ओसबिंदुए, थोवं चिट्ठति लंबमानए।

एवं मनुयाण जीवियं, समयं० ॥

वृ. कुशो-दर्भसदृशस्तृणविशेषः, तनुतरत्वाच्च तस्योपादानं, तस्याग्रं-प्रान्तस्तस्मिन्, 'यथा' इत्युपमाप्रदर्शकः, अवश्यायः-शरत्कालभावी श्लक्ष्णवर्षस्तस्य बिन्दुरेव बिन्दुकः अवश्यायबिन्दुकः, 'स्तोकम्' अल्पालामिति गम्यते, 'तिष्ठति', आस्ते, 'लम्बमानकः' मनाग् निपतद्, बद्धास्पदो हि कदाचित् कालान्तरमपि क्षमेतेत्येवं विशेष्यते, 'एवम्' इत्युक्तसदृशं 'मनुजानां' मनुष्याणां, मनुजग्रहणं च प्राग्वत्, 'जीवियं'ति जीवितं, यत एवं ततः समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ अमुमेवार्थमुपसंहरन्नुपदेशमाह-

मू.(२९३) इइ इत्तरियंमि आउए, जीवितए बहुपच्चवायए।

विहुणाहि रयं पुराकडं, समयं० ॥

वृ. 'इति' इत्युक्तयायेन 'इत्वरे' अयनशीले, कोऽर्थः ?-स्वल्पकालभाविनि, एति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपक्रमहेतुभिः अनपवर्त्यतवा यथास्थित्यैवानुभवनीयतां गच्छतीति आयुः, तच्चैवं निरुपक्रमेव तस्मिन्, तथाऽनुकम्पितं जीवितं जीवितकं चशब्दस्य गम्यमानत्वात् तस्मिंश्च, अर्थात् सोपक्रमायुषि, बहवः-प्रभूताः प्रत्यपाया-उपघातहेतवोऽध्यवसाननिमित्तादयो यस्मिंस्तथा, अनेन चानुकम्प्यताहेतुराविष्कृतः, एवं चोक्तरूपद्रुमपत्रोदाहरणतः कुशाग्रजलबिन्दूदाहरणतश्च मनुजायुर्निरुपक्रमं सोपक्रमं चेत्वरम्, अतोऽस्यानित्यतां मत्वा 'विधुनीहि' जीवात् पृथक् कुरु 'रजः' कर्म 'पुरेकडंति' पुरा-पूर्वं तत्कालापेक्षया कृतं-विहितं, तद्विधुवनोपायमाह-समयमपि गौतम ! मा प्रमादीः, पठन्ति च-एवं मणुयाण जीविए एत्तिरिए बहुपच्चवायए'त्ति सुगममेवेति सूत्रार्थः ॥ स्यात्-पुनर्मनुष्यभवावाप्ता-वुद्यंस्याम इत्याह-

मू. (२१४) दुलहे खलु मानुसे भवे, चिरकालेनवि सव्वपाणिणं ।
गाढा य विवाग कम्मुणो, समयं० ॥

वृ. 'दुर्लभो' दुरवापः, 'खलुः' विशेषणे, अकृतसुकृतानामिति विशेषं द्योतयति, 'मानुषो' मनुष्यसम्बन्धी 'भवो' जन्म 'चिरकालेनापि' प्रभूतकालेनापि, आस्तामल्पकालेनेत्यपि-शब्दार्थः, 'सर्वप्राणिनां' सर्वेषामपि जीवाना, न तु मुक्तिगमनं प्रति भव्यानामिव केषाञ्चित् मनुजभवावाप्तिं प्रति सुलभत्वविशेषोऽस्ति, किमेवमत आह-'गाढा' विनाशयितुमशक्यतया दृढाः 'च' इति यस्मात्, 'विपाककम्मुणो'त्ति विपाकाः-उदयाः कर्मणां-मनुष्यगतिविघाति-प्रकृतिरूपाणां, यत एवमतः समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ कथं पुनर्मनुजत्वं दुर्लभं, यद्वा यदुक्तं 'सर्वप्राणिनां दुर्लभं मनुजत्व'मिति, तत्र एकेन्द्रियादिप्राणिनां तद्दुर्लभत्वं दर्शयितुकामः कायस्थितिमाह-

मू. (२१५) पुढवीकायमइगओ उक्कोसं जीवो य संवसे ।
कालं संखातीयं समयं गोयम ! मा पमायए ॥

वृ. पृथ्वी-कठिनरूपा सैव कायः-शरीरं पृथ्वीकायस्तमतिशयेन मृत्वा २ तदुत्पत्तिलक्षणेन गतः-प्राप्तः अतिगतः, 'उक्कोसं'त्ति उत्कर्षतो 'जीवः' प्राणी 'तुः' पूरणे 'संवसेत्' तद्रूपतयैवाव-तिष्ठेत 'कालं' सङ्ख्यातीतं, असङ्ख्यमित्यर्थः, यत एवमतः समयमपि गौतम ! मा प्रमादीरिति ।

मू. (२१६) आउक्कायम० ॥

मू. (२१७) तेउक्काय० ॥

मू. (२१८) वाउक्काय० ॥

वृ. एवमप्कायतेजस्कायवायुकायसूत्रत्रयमपि व्याख्येयं ।

मू. (२१९) वणस्सइक्काय० उक्कोसं० ।
कालमनंतदुरंतं समयं० ॥

वृ. तथा वनस्पतिसूत्रं च, नवरं कालमनन्तमिति, अनन्तकायिकापेक्षमेतत्, प्रत्येकवन-स्पतीनां कायस्थितेरसङ्ख्यातत्वात्, तथा दुष्टोऽन्तोऽस्येति दुरन्तस्तम्, इदमपि साधारणापेक्षयैव, ते ह्यत्यन्ताल्पबोधतया तत उद्धृता अपि न प्रायो विशिष्टं मानुषादिभवमाप्नुवन्ति ॥ इह च 'कालं सङ्ख्यातीत'मिति विशेषानभिधानेऽप्यसङ्ख्योत्सर्प्पिण्यवसर्पिणीमानम्, 'अनन्तमिति' चानन्तोत्सर्पिण्यवसर्पिणीप्रमानमित्यवगन्तव्यं, यत आगमः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अस्संखोसप्पिणिउस्सप्पिणीउ एगंदियाण उ चउण्हं।
ता चेव ऊ अनंता वणस्सतीए उ बोद्धव्वा ॥"

मू.(३००)　　　　बेइंदियकाय० उक्को०।
कालं संखिज्जसन्नियं समयं० ॥

वृ.तथा द्वे-द्विसङ्ख्ये इन्द्रिये-स्पर्शनरसनाख्ये येषां ते द्विन्द्रियाः-कृम्यादयः, तत्कायमतिगत उत्कर्षतो जीवस्तु संवसेत् कालं सङ्ख्येयसञ्ज्ञितं-सङ्ख्यातवर्षसहस्रात्मकम्, अतः समयमपि गौतम! मा प्रमादीः ॥

मू.(३०१)　　　　तेइंदिय० ॥

मू.(३०२)　　　　चउरिंदिय० ॥

वृ. एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये ॥

मू.(३०३)　　　　पंचिंदियकायमइगओ उक्कोसं०।
सत्तट्ठभवग्गहणे समयं० ॥

वृ. तथा पञ्च इन्द्रियाणि-स्पर्शनादीनि येषां ते तथा, ते चोत्तरत्र देवनारकयोरभिधानात् मनुष्यत्वस्य दुर्लभत्वेन प्रक्रान्तत्वात्तिर्यञ्च एव गृह्यन्ते, तत्कायमतिगतः, तत्कायोत्पन्न इत्यर्थः, उत्कर्षतो जीवस्तु संवसेत् सप्त वा अष्ट वा सप्ताष्टानि तानि च तानि भवग्रहणानि च- जन्मोपादानानि सप्ताष्टभवग्रहणानि यतः अतः समयमपि गौतम! मा प्रमादीः।

मू.(३०४)　　　　देवे नरए य गओ, उक्कोसं०।
एक्केक्क भवग्गहणे, समयं० ॥

वृ. तथा देवान्नैरयिकांश्च अतिगत उत्कर्षतो जीवस्तु संवसेत् एकैकभवग्रहणं, ततः परमवश्यं नरेषु तिर्यक्षु वोत्पादात्। यद्वा 'उक्कोसंति' उत्कृष्यते तदन्येभ्य इत्युत्कर्षस्तमुत्कृष्टं कालं-त्रयस्त्रिंशत्सागरोपममानम्, 'एगेगभवग्गहणं'ति अपेर्गम्यमानत्वादेकैकमवग्रहणमपि संवसति, अतो जीवः संवसेत् अतः समयमपि गौतम! मा प्रमादीरिति सूत्रदशकार्थः ॥ उक्तमेवार्थ-मुपसंहर्तुमाह-

मू.(३०५)　　एवं भवसंसारे संसरति सुभासुभेहिं कम्मेहिं।
जीवो पमायबहुलो, समयं० ॥

वृ.'एवम्' उक्तप्रकारेण पृथिव्यादिकायस्थितिलक्षणेन भवा एव-तिर्यगादिजन्मात्मकाः संस्रियमानत्वात् संसारो भवसंसारस्तस्मिन्, 'संसरन्ति' पर्यटन्ति शुभानि च शुभप्रकृत्यात्मकानि अशुभानि च-अशुभप्रकृतिरूपाणि शुभाशुभानि तैः 'कर्मभिः' पृथ्वीकायादिभवनिबन्धनैः 'जीवः' प्राणी प्रमादैर्बहुलो-व्याप्तः प्रमादबहुलः, यद्वा बहून्-भेदान् लातीति बहुलो मद्या-द्यनेकभेदतः प्रमादो-धर्मं प्रत्यनुद्यमात्मकोयस्य स बहुलप्रमादः, सूत्रे च व्यत्ययनिर्देशः प्राग्वत्, इह चायमाशयः-यतोऽयं जीवः प्रमादबहुलः सन् शुभाशुभानि कर्माण्युपचिनोति, उपचित्य च तदनुरूपासु गतिष्वाजवंजवीभावमुपगम्य भ्राम्यति, ततो दुर्लभत्वात् पुनर्मानुषत्वस्य प्रमादमूलत्वाच्च सकलानर्थपरम्परायाः समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ एवं मनुजभवदुर्लभत्वमुक्तम्, इदानीं तदवाप्तावप्युत्तरोगुणावाप्तिरतिदुरापैवेत्याह-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

मू. (३०६) *लद्धूणऽवि मानुसत्तणं, आयरित्तणं पुनरावि दुल्लभं।*
बहवे दसुया मिलेक्खुया, समयं० ॥

वृ. 'लब्ध्वाऽपि' प्राप्यापि 'मानुषत्वं' इदं तावदतिदुर्लभमेव कथञ्चित्तु लब्ध्वाऽपीत्यपिशब्दार्थः, 'आर्यत्वं' मगधाद्यार्यदेशोत्पत्तिलक्षणं 'पुनरपि' भूयोऽपि आकारस्त्वलाक्षणिकः, 'दुर्लभः' दुरवापं, किमिति ।, अत आह-बहवः-प्रभूता दस्यवो-देशप्रत्यन्तवासिनश्चौराः 'मिलेक्खु य'त्ति म्लेच्छा-अव्यक्तवाचो, न यदुक्तमार्यैरवधार्यते, ते च शकयवनशबरादिदेशोद्भवाः, येष्ववाप्यापि मनुजत्वं जन्तुरुत्पद्यते, एते च सर्वेऽपि धर्माधर्मगम्यागम्यभक्ष्याभक्ष्यादिसकलार्यव्यवहारबहिष्कृतास्तिर्यक्प्राया एवेति समयमपि गौतम ! मा प्रमादीः ।

मू. (३०७) *लद्धूऽवि आरियत्तणं, अहीनपंचिंदियया हु दुल्लहा।*
विगलिंदियता हु दीसइ, समयं० ॥

वृ. इत्थमार्यदेशोत्पत्तिरूपमार्यत्वमतिदुर्लभं, तथाविधमपि लब्ध्वाऽपि 'आर्यत्वम्' उक्तरूपम्, अहीनानि-अविकलानि पञ्चेन्द्रियाणि-स्पर्शनादीनि यस्य स तथा तद्भावोऽहीनपञ्चेन्द्रियता 'हुः' अवधारणे भिन्नक्रमश्च, दुर्लभा एव, यद्वा हुः पुनरर्थे, अहीनपञ्चेन्द्रियता पुनर्दुलभा, इहैव हेतुमाह-विकलानि-रोगादिभिरुपहतानीन्द्रियाणि येषां तद्भावो विकलेन्द्रियता, हुरिति निपातोऽनेकार्थतया च बाहुल्यसूचकः, ततश्च यतो बाहुल्येन विकलेन्द्रियता दृश्यते ततो दुर्लभैवाहीनपञ्चेन्द्रियता, तथा च समयमपि गौतम ! मा प्रमादीः ।

मू. (३०८) *अहीनपंचिंदियत्तंपि से लहे, उत्तमधम्मसुती हु दुल्लहा।*
मिच्छत्तनिसेवए जने, समयं ० ॥

वृ. तथा कथञ्चिदहीनपञ्चेन्द्रियतामप्युक्तन्यायतोऽतिदुर्लामपि 'स' इति जन्तुः 'लभेत' प्राप्नुयात्, तथाऽप्युत्तमः-प्रधानो यो धर्मस्तस्य 'श्रुतिः' आकर्णनात्मिका या सा तथा, 'हुः' अवधारणे भिन्नक्रमश्च, ततो दुर्लभैव, किमिति ?, यतः-कुत्सितानि च तानि तीर्थानि कुतीर्थानि च-शाक्यौलूक्यादिप्ररूपितानि तानि विद्यन्ते येषामनुष्ठेयतया स्वीकृतत्वात्ते कुतीर्थनस्तान्नितरां सेवते यः स कुतीर्थिनिषेवको जनो-लोकः, कुतीर्थिनो हि यशः सत्काराद्येषिणो यदेव प्राणिप्रियं विषयादि तदेवोपदिशन्ति, तत्तीर्थकृतामप्येविधत्वात्, उक्तं हि-

"सत्कारयशोलाभार्थिभिश्च मूढैरिहान्यतीर्थकरैः ।
अवसादितं जगदिदं प्रियाण्यपथ्यान्युपदिशद्भिः ॥"

इति सुकरैव तेषां सेवा, तत्सेविनां च कुत उत्तमप्रमादीः ।

मू. (३०९) *लद्धूणवि उत्तमं सुइं, सद्दहणा पुनरावि दुल्लहा।*
मिच्छत्त० समयं० ॥

वृ. किंच-लब्ध्वाऽपि उत्तमधर्मविषयत्वादुत्तमा तां 'श्रुतिम्' उक्तिरूपां 'श्रद्धानं' तत्त्वरुचिरूपं 'पुनरावि'त्ति पुनरपि 'दुर्लभं' दुरापम्, इहैव हेतुमाह-मिथ्याभावो मिथ्यात्वम्-अतत्त्वेऽपि तत्त्वप्रत्ययरूपं चं निषेवते यः स मिथ्यात्वनिषेवको जनो-लोकः, अनादिभवाभ्यस्ततया गुरुकर्मतया च तत्रैव प्रायः प्रवृत्तेः, यत एवमतः समयमपि गौतम ? मा प्रमादीः ।

मू. (३१०) *धम्मंपि हु सद्दहंतया, दुल्लभया काएण फासया।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह कामगुणेहिं मुच्छिया, समयं० ॥

वृ. अन्यच्च-'धर्मं' प्रक्रमात् सर्वज्ञप्रणीतम् 'अपिः' भिन्नक्रमः 'हुः' वाक्यालङ्कारे, ततः 'श्रद्दधतोऽपि' कर्तुमभिलषन्तोऽपि दुर्लभकाः कायेन-शरीरेण, उपलक्षणत्वान्मनसा वाचा च, 'स्पर्शका' अनुष्ठातारः, कारणमाह-'इह' अस्मिन् जगति 'कामगुणेषु' शब्दादिषु 'मूर्च्छिता' मूढाः, गृद्धिमन्त इत्यर्थः, जन्तव इति शेषः, प्रायेण ह्यपथ्येष्वेव विषयेष्वभिष्वङ्गः प्राणीनां, यत उक्तम्-

"प्रायेण हि यदपथ्यं तदेव चातुरजनप्रियं भवति।
विषयातुरस्य जगतस्तथाऽनुकूलः प्रिया विषयाः॥"

पाठान्तरतः कामगुणैर्मूर्च्छिता इव मूर्च्छिताः, विलुप्तधर्मविषयचैतन्यत्वात्, यतश्चैवमतो दुरापामिमामविकलां धर्मसामग्रीमवाप्य समयमपि गौतम ! मा प्रमादीरिति सूत्रपञ्चकार्थः॥ अन्यच्च सति शरीरे तत्सामर्थ्ये च सति धर्मस्पर्शनेति तदनित्यताऽभिधानद्वारेणाप्रमादोदोपदेशमाह-

मू. (३११) परिजूरइ ते सरीरयं, केसा पंडुरगा (य) भवंति ते।
से सोयबले य हायइ, समयं० ॥

मू. (३१२) परि चक्खुबले० ॥

मू. (३१३) घाणबले० ॥

मू. (३१४) रसनबले० ॥

मू. (३१५) फासबले० ॥

मू. (३१६) सव्वबले० ॥

वृ. 'परिजीर्यति' सर्वप्रकारां वयोहानिमनुभवति 'ते' तव शरीरमेव जरादिभिरभिभूयमानातयाऽनुकम्पनीयमिति शरीरकं, यद्वा 'परिजूरइ'त्ति 'निन्देर्जूर' इति प्राकृतलक्षणतात् परिनिन्दतीवाऽऽत्मानमिति गम्यते, यथा-धिग्मां कीदृशं जातमिति, किमिति ?-यतः 'केशाः' शिरसिजाः, उपलक्षणत्वात् लोमानि च पाण्डुरा एव पाण्डुरका भवन्ति, पूर्वं जननयनहारिणोऽन्यन्तकृष्णाः सम्प्रति शुक्लतां भजन्ते 'ते' तव, पुनस्तेशब्दोपादानं भिन्नवाक्यत्वात् उपदेशाधिकारत्वाच्चादुष्टम्, एवमुत्तरत्रापि, तथा 'से' इति तत् यत् पूर्वमासित् श्रोत्रयोः-कर्णयोर्बलं-दूरादिशब्दश्रवणसामर्थ्यु श्रोत्रबलं, 'चः' समुच्चये, 'हीयते' जरातः क्षयमुपैति, यद्वा-शरीरजीर्णताऽवस्थाभाव्येतद्वयमपि योज्यं, यथा-परिजीर्यते शरीरकं तथा च सति केशाः पाण्डुरका भवन्ति 'से' इत्यथ श्रोत्रबलं हीयते यतः ततः शरीरस्य तत्सामर्थ्यस्य चास्थिरत्वात् समयमपि गौतम ! मा प्रमादीः। एवं सूत्रपञ्चकमपि नेयं।

नवरमिह प्रथमतः श्रोत्रोपादानं प्रधानत्वात्, प्रधानत्वं च तस्मिन् सति शेषेन्द्रियाणामवश्यं भावात् पटुतरक्षयोपशमजत्वाच्च, तथोपदेशाधिकारादुपदेशस्य च श्रोतग्राह्यत्वात्। तथा च 'सर्वबलं'मिति सर्वेषा-करचरणाद्यवयवानां स्वस्वव्यापारसामर्थ्यं, यद्वा सर्वेषां-मनोवाक्कायानां ध्यानाध्ययचक्रमणादिचेष्टाविषया शक्तिरिति सूत्रषट्कार्थः॥ जरातः शरीरशक्तिरुक्ता, सम्प्रति रोगतस्तामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३१७) *अरई गंडं विसूईया, आयंका विविहा फुसंति ते ।*
विहडइ विद्धंसइ ते सरीरयं, समयं० ॥

वृ. 'अरति:' वातादिजनिताश्चित्तोद्वेग: 'गण्डं'गडु, विध्यतीव शरीरं सूचिभिरिति विसूचिका-अजीर्णविशेष:, आङिति सर्वात्मप्रदेशाभिव्याप्त्या तङ्कयन्ति-कृच्छ्रजीवितमात्मानं कुर्वन्तीत्यातङ्का:-सद्योघातिनो रोगविशेषा: 'विविधा:' अनेकप्रकारा: 'स्पृशन्ति' परामृशन्ति 'ते' तव, शरीरकमिति गम्यते, ततश्च 'विपतति' विशेषण बलापचयादपैति 'विध्वस्यते' जीव-विप्रमुक्त च विशेषणाध:पतित ते शरीरकम्, अत: समयमपि गौतम ! मा प्रमादी:, सर्वत्र च वर्तमाननिर्देश: प्राग्वत् । केशपाण्डुरत्वादिकं यद्यपि गौतमे न सम्भवति तथापि तन्निश्रया शेषशिष्यप्रतिबोधनार्थत्वाददुष्टमिति सूत्रार्थ: ॥ यथा चाप्रमादो विधेयस्तथा चाह-

मू. (३४८) *वुच्छिंद सिनेहमप्पणो, कुमुयं सारइयं व पाणियं ।*
से सव्वसिणेहवज्जिए, समयं० ॥

वृ. 'वोच्छिंद'त्ति विविधै: प्रकारैरुत्-प्राबल्येन छिन्द्धि अपनय व्युच्छिन्द्धि, कम् ?-'स्नेहम्' अभिष्वङ्गं, कस्य सम्बन्धिम् ?-आत्मन:, किमिव ?-'कुमुदमिव' चन्द्रोद्योतवि-काश्युत्पलमिव 'सारइयं व'त्ति सूत्रत्वाच्छरदि भवं शारदं, वेत्युपमार्थो भिन्नक्रमश्च प्राग् योजित: 'पानीयं' जलं, यथा तत् प्रथमं जलमग्नमपि जलमपहाय वर्तते तथा त्वमपि चिरसंसृष्टाचिर-परिचितत्वादिभिर्मद्विषयस्नेहवशगोऽपि तमपनय, अपनीय च 'से' इत्यर्थानन्तरं सर्वस्नेहवर्जित: सन् समयमपि गौतम ! मा प्रमादी: । इह च जलमपहायैतावति सिद्धे यच्छारदशब्दोपादानं तच्छारदजलस्येव स्नेहस्याप्यतिमनोरमत्वख्यापनार्थमिति सूत्रार्थ: ॥ किञ्च-

मू. (३१९) *चिच्चा न धनं च भारियं, पव्वइओ हि सि अनगारियं ।*
मा वंतं पुनोवि आविए , समयं० ॥

वृ. 'त्यक्त्वा' परिहृत्य 'न' इति वाक्यालङ्कारे 'धनं' चतुष्पदादि चशब्दो भिन्नक्रम:, ततो 'भार्यां च' कलत्रं च 'प्रव्रजित:' गृहान्निष्क्रान्त:, 'हि:' इति यस्मात् 'सी'ति सूत्रत्वेनाकारलोपात् 'असि' भवसि 'अनगारियं' ति अनगारेषे-भावभिक्षुषु भवमानगारिकमनुष्ठानं चस्य गम्यमान-त्वात् तच्च प्रतिपन्नवानसीति शेष:, यद्वा प्रव्रजित:-प्रतिपन्न: 'अनगारियं'ति अनगारितम्, अतो 'मा' इति निषेधे, 'वान्तम्' उद्गीर्णं 'पुणोवि'त्ति पुनरपि 'आविए'त्ति आपिब, किन्तु समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थ: ॥ कथं च वान्ताऽऽपानं न भवतीत्याह-

मू. (३२०) *अवउज्झिय मित्तबंधवं, विउलं चेव धणोहसंचयं ।*
मा तं बिइयं गवेसए समयं० ॥

वृ. 'अपोह्य' त्यक्त्वा, मित्राणि च-सुहृदो बान्धवाश्च-स्वजना इति समाहारे मित्रबान्धवं, 'विपुलं' विस्तीर्णं 'च:' समुच्चये भिन्नक्रमश्च 'एव' इति पूरणे, ततो धनं-कनकादिद्रव्यं, तस्यौध:-समुहस्तस्य पञ्चयो-राशीकरणं धनौघसञ्चयस्तं च, मा 'तदिति' मित्रादिकं, द्वितीयं, पुनर्ग्रहणार्थमिति गम्यते, 'गवेषय' अन्वेषय, तत्परित्यागात् श्रामण्यमङ्गीकृत्य पुनस्तदभिष्वङ्ग-वान् मा भू:, त्यक्तं हि तद्वान्तोपमं तदभिष्वङ्गश्च वान्ताऽऽपानप्राय इत्यभिप्राय:, किन्तु समयमपि गौतम! मा प्रमादीरिति सूत्रार्थ: ॥ इत्थं प्रतिबन्धनिराकरणार्थमभिधाय दर्शनविशुद्धयर्थमिदमाह--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३२१) *न हु जिने अज्ज दीसइ, बहुमय दीसइ मग्गदेसिए।*
संपइ नेआउए पहे, समयं० ॥

वृ. 'न हु' नैव 'जिनः' तीर्थकृद् 'अद्य' अस्मिन् काले 'दृश्यते' अवलोक्यते, यद्यपीति गम्यते, तथापि 'बहुमए'त्ति पन्थाः, स च द्रव्यतो नगरादिमार्गः, भावतस्तु सातिशयश्रुतज्ञान-दर्शनचारित्रात्मको मुक्तिमार्गः, तत्रेह भावमार्गः परिगृह्यते, 'दृश्यते' उपलभ्यते 'मग्गदेसिय'त्ति भावप्रधानत्वान्निर्देशस्य मार्गत्वेन अर्थान्मुक्तेर्देशितो-जिनैः कथितो मार्गदेशितः, अयमाशयः-यद्यपि सम्प्रति जिनो न दृश्यते तदुपदिष्टस्तु मार्गो दृश्यते, न चैवंविधोऽयमतीन्द्रियार्थदर्शिनं जिनं विना सम्भवति इत्यसन्दिग्धचेतसो भाविनोऽपि भव्या न प्रमादं विधास्यन्तीति,

अतः 'सम्प्रति' इदानीं सत्यपि मयीति भावः, 'नैयानिके' निश्चितमुक्त्याख्यलाभप्रयोजने 'पथि' मार्गे समयमपि गौतम! केवलानुत्पत्तितः संशयविधानेन मा प्रमादीः, यद्वा-त्रिकाल-विषयत्वात् सूत्रस्य भाविभव्योपदेशकमप्येतत्, ततोऽयमर्थः-यथाऽऽद्यमार्गोपदेशकं नगरं चापश्यन्तोऽपि पन्थानमवलोकयन्तस्तस्याविच्छिन्नोपदेशतस्तत्प्रापकत्वं निश्चिन्वन्ति तथा यद्यप्यद्य जिन उपलक्षणत्वान्मोक्षश्च नैव दृश्यते तथाऽपि तद्देशितः पन्था-मार्ग्यमानत्वात् मार्गो-मोक्षस्तस्य 'देसिय'त्ति सूत्रत्वाद्देशको मार्गदेशको दृश्यते, ततस्तस्यापि तत्प्रापकत्वं माम-पश्यद्भिरपि भाविभव्यैर्निश्चेतव्यं, यतश्चैवं भाविभव्यानामुपदिश्यते अतः सम्प्रतीत्यादि प्राग्वत्, द्विविधाऽपि तावदित्थं व्याख्या सूचकत्वात्, सूत्रस्येति गाथार्थः ॥ अत्रैवार्थे पुनरुपदिशन्नाह-

मू. (३२२) *अवसोहियं कंटगापहं, ओइन्नोऽसि पहं महालयं।*
गच्छसि मग्गं विसोहिया, समयं० ॥

वृ. 'अवसोहिय'त्ति अवशोध्य-अपसार्य पृथक्कृत्य परिहृत्येतियावत्, कम्?-'कंटयापहं'ति आकारोऽलाक्षणिकः, कण्टकाश्च द्रव्यतो बब्बूलकण्टकादयः भावतस्तु चरकादिकुश्रुतयस्तैरा-कुलः पन्थाः कण्टकपथस्तं, ततश्च 'अवतीर्णोऽसि' अनुप्रविष्टो भवसि 'पहं'ति पन्थानं 'महालयं'ति महान्तं महतां वाऽऽलयः-आश्रयो महालयः, स च द्रव्यतो राजमार्गः भावतस्तु महद्भिस्तीर्थङ्करादिभिरप्याश्रितः सम्यग्दर्शनादिमुक्तिमार्गस्तं, कश्चिदवतीर्णोऽपि मार्गं न गच्छेत् अत आह-'गच्छसि'-यासि मार्गं, न पुनरवस्थित एवासि, सम्यग्दर्शनाद्यनुपालनेन मुक्तिमार्गमनप्रवृत्तत्वाद्भवतः, तत्राप्यनिश्चयेऽपायप्राप्तिरेव स्यात् इत्याह-'विशोध्य' इति विनिश्चित्य, तदेवं प्रवृत्तः सन् समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ एवं च पूर्वेण दर्शनविशुद्धिमनेन च मार्गप्रतिपत्तिमभिधाय तत्प्रतिपत्तावपि कस्यचिदनुतापसम्भव इति तन्निराचिकीर्षयाऽऽह-

मू. (३२३) *अबले जह भारवाहए, मा मग्गे विसमेऽवगाहिया।*
पच्छा पच्छानुतावए, समयं० ॥

वृ. 'अबलः' अविद्यमानशरीरसामर्थ्यः 'यथा' इत्यौपम्ये भारं वहतीति भारवाहकः 'मा' निषेधे 'मग्गे' त्ति मार्गं 'विसमे'त्ति विषमं मन्दसत्त्वैरतिदुस्तरम् 'अवगाहिय'त्ति अवगाह्य प्रविश्य, त्यक्ताङ्गीकृतभारः सन्निति गम्यते, 'पश्चात्' तत्कालानन्तरं 'पश्चादनुतापकः' पश्चात्तापकृत्, भूरिति शेषः, इदमुक्तं भवति-यथा कश्चिद्देशान्तरगतो बहुभिरुपायैः स्वर्णादिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुपार्ज्य स्वगृहाभिमुखमागच्छन्नतिभीरुतयाऽन्यवस्त्वन्तर्हितं स्वर्णादिकं स्वशिरस्यारोप्य कतिचिद्दिनानि सम्यगुद्वहति, अनन्तरं च क्वचिदुपलादिसंकुले पथि अहो। अहमनेन भारेणाऽऽ-क्रान्त इति तमुत्मृज्य स्वगृहमागत: अत्यन्तनिर्धनतयाऽनुतप्यते-किं मया मन्दभाग्येन तत्परि-त्यक्तमिति ?, एवं त्यमपि प्रमादपरतया त्यक्तसंयमभार: सन्नेवंविधो मा भू:, किन्तु समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थ: ॥ बह्विदमद्यापि निस्तरणीयमल्पं च निस्पीर्णमित्यभि-सन्धिनोत्साहभङ्गोऽपि स्यादिति तदपनोदायाह-

मू.(३२४) *तिन्नो हु सि अन्नवं महं, किं पुन चिट्ठसि तीरमागओ ?।*
अभितुर पारं गमित्तए, समयं० ॥

वृ. 'तिन्नो हु सि'त्ति तीर्ण एवासि, अर्नवमिवार्णवं 'महं'ति महान्तं गुरुं, किमिति प्रश्ने पुनरिति वाक्योपन्यासे, तत: किं पुनस्तिष्ठसि ?, 'तीरं' पारम् 'आगत:' प्राप्त:, किमुक्तं भवति ?-भव उत्कृष्टस्थितीनि वा कर्माणि भावतोऽर्णव इत्युच्यते, स च द्विविधोऽपि त्वयोत्ती-र्णप्राय एव इति केन हेतुना तीरप्राप्तोऽप्यौदासीन्यं भजसे ?, नैवेदं तवोचितमित्याशय:। किन्तु 'अभितुर'त्ति अभि-आभिमुख्येन त्वरस्व-शीघ्रो भव, 'पारं' परतीरं भावतो मुक्तिपदं 'गमित्तए'त्ति गन्तुम्, अतश्च समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थ: ॥ अथापि स्यात्-मम पारप्राप्तियोग्यतेव न समस्ति, अत आह-अथवा शेषशिष्यापेक्षया किमस्याप्रमादस्य फलम् ? यत्पुन: पुनरयमुपदिश्यते इत्याह-

मू.(३२५) *अकलेवरसेणिमूसिया, सिद्धिं गोयम ! लोयं(य) गच्छसि।*
खेमं च सिवं अनुत्तरं, समयं० ॥

वृ. कलेवरं-शरीरम् अविद्यमानं कडेवरमेपामकडेवरा:-सिद्धास्तेषां श्रेणिरिव श्रेणिर्य-योत्तरोत्तरशुभपरिणामप्राप्तिरूपया ते सिद्धिपदमारोहन्ति(तां), क्षपकश्रेणिमित्यर्थ:। यद्वा कडेवराणि-एकेन्द्रियशरीराणि तन्मयत्वेन तेषां श्रेणि: कडेवरश्रेणि:-वंशादिविरचिता प्रासादादिष्वारोहणहेतु:, तथा च या न सा अकडेवरश्रेणि:-अनन्तरोक्तरूपैव ताम् 'उस्सिय'त्ति उत्सृतां, गमिष्यसीति सम्बन्ध:, यद्वा 'उस्सिय'त्ति उच्छ्रित्येवोच्छ्रित्य-उत्तरोत्तरसंयमस्थाना-वाप्त्या तामच्छ्रितामिव कृत्वा 'सिद्धिम्' इति सिद्धिनामानं 'गोयम ! लोयं गच्छसि'त्ति प्राग्वल्लोकं गमिष्यसि, संशयव्यवच्छेदफलत्वाच्चास्य गमिष्यस्येव, 'क्षेमं' परचक्राद्युपद्रवरहितं, 'च:' समुच्चये भिन्नक्रमश्च, 'शिवमनुत्तरं' च तत्र शिवमशेषदुरितोपशमेन अनुत्तरं नास्योत्तरमन्यत् प्रधानमस्तीत्यनुत्तरं, सर्वोत्कृष्टमित्यर्थ:, यतश्चैवं तत: समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थ:

सम्प्रति निगमयन्नुपदेशसर्वस्वमाह-

मू.(३२६) *बुद्धे परिनिव्वुए चरे, गाम गए नगरे व संजए।*
संतिमग्गं च बूहए, समयं० ॥

वृ. 'बुद्ध:' अवगतहेयादिविभाग: 'परिनिर्वृत:' कषायाग्न्युपशमत: समन्तात् शीतीभूत: 'चरे:' आसेवस्व, संयममिति शेष:, 'गाम'त्ति सुपो लोपात् ग्रामे 'गत:' स्थितो नगरे वा, उपलक्षणत्वादरण्यादिषु वा, किमुक्तं भवति ?-सर्वस्मिन्ननभिष्वङ्गवान्, सम्यग् यत:-पापस्थानेभ्य उपरत: संयत:, शाम्यन्त्यस्यां सर्वदुरितानीति शान्ति:-निर्वाणं तस्या मार्ग:-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्था: यद्वा शान्ति:-उपशम: सैव मुक्तिहेतुतया मार्ग: शान्तिमार्गो, दशविधधर्मोपलक्षणं शान्तिग्रहणं, चशब्दो भिन्नक्रम:, ततो बृंहयेश्च-भव्यजनप्ररूपणया वृद्धिं नये:, तत: समयमपि गौतम! मा प्रमादीरिति सूत्रार्थ: ॥ इत्थं भगवदभिहितमिदमाकर्ण्य गौतमो यत् कृतवांस्तदाह-

मू.(३२७) *बुद्धस्स निसम्म भासियं, सुकहियमट्ठपदोवसोहियं।*
रागं दोसं च छिंदिया, सिद्धिगइं गए गोयमे ॥

वृ. 'बुद्धस्य' केवलालोकावलोकितसमस्तवस्तुतत्त्वस्य प्रक्रमाच्छ्रीमन्महावीरस्य 'निशम्य' आकर्ण्य 'भाषितम्' उक्तं, सुष्ठु-शोभनेन नयानुगतत्वादिना प्रकारेण कथितं-प्रबन्धेन प्रतिपादितं सुकथितम्, अत एवार्थप्रधानानि पदानि अर्थपदानि तैरुपशोभितं-जातशोभमर्थपदोपशोभितं 'रागं' विषयाद्यभिष्वङ्गं 'द्वेषम्' अपकारिण्यप्रीतिलक्षणं, 'च:' समुच्चये छित्त्वा' अपनीय 'सिद्धिगतिं' मुक्तिगतिं 'गत:' प्राप्त: 'गौतम:' इन्द्रभूतिनामा भगवत्प्रथमगणधर इति सूत्रार्थ: ॥ 'इति:' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्, इत्युक्तोऽनुगम:, सम्प्रति नया:, ते च पूर्ववत्।

अध्ययनं-१० समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययन सूत्रे
सनिर्युक्ति: सटीकं समाप्तम्

अध्ययनं - ११ - बहुश्रुतपूजा

वृ. उक्तं दशममध्ययनं, साम्प्रतमेकादशमारभ्यते, अस्य चायमभिसम्बन्ध:-इहानन्तराध्ययनेऽप्रमादार्थमनुशासनमुक्तं, तच्च विवेकिनैव भावयितुं विवेकश्च बहुश्रुतपूजात उपजायत इति बहुश्रुतपूजोच्यते इत्यनेन सम्बन्धेनाऽऽयातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि प्ररूपयितव्यानि, यावन्नामनिष्पन्ने निक्षेपे 'बहुसूत्रपूजा बहुश्रुतपूजे'ति वा नाम, अतस्तन्निक्षेपपप्रतिपिपादयिषयेदमाह निर्युक्तिकृत-

नि.[३१०] बहु सुए पूजाए य तिण्हंपि चउक्कओ य निक्खेवो।
दव्वबहुगेण बहुगा जीवा तह पुग्गला चेव ॥

वृ. 'बहु'त्ति बहो: 'सुए'त्ति शतमुखत्वात् प्राकृतस्य सूत्रस्य श्रुतस्य वा 'पुयाए य'त्ति पूजायाश्च 'त्रयाणामपि' अमीषां पदानां 'चतुष्कस्तु' चतुष्परिमान एव 'निक्षेप:' न्यास:, स च नामादि:, तत्र नामस्थापने क्षुन्ने, द्रव्यतस्तु बह्वभिधातुमाह-'दव्वबहुएण'त्ति आर्षत्वात् द्रव्यतो बहुत्वं द्रव्यबहुत्वं तेन 'बहुका:' प्रभूता: 'जीवा:' उपयोगलक्षणा:, तथा 'पुद्गला:' स्पर्शादिलक्षणा:, चशब्द: पुद्गलानां जीवापेक्षया बहुतरत्वं ख्यापयति, ते ह्येकैकस्मिन् संसारिजीवप्रदेशेऽनन्तानन्ता एव सन्ति, 'एव:' अवधारणे, जीवपुद्गला एव द्रव्यबहव:, तत्र धर्माधर्माऽऽकाशानामेकद्रव्यत्वात् कालस्यापि तत्त्वत: समयरूपत्वेन बहुत्वाभावादिति

नि.[३११] भावबहुएण बहुगा चउदस पुव्वा अनंतगमजुत्ता।
भावे खओवसमिए खइयंमि य केवलं नाणं ॥

वृ. 'भावबहुगेणं'ति प्राग्वत् भावबहुत्वेन 'बहुग'त्ति बहुकानि 'चतुर्दश' चतुर्दशसङ्ख्यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पुव्व'त्ति पूर्वाण्युत्पादपूर्वादीनि 'अनंतगमजुत्त'त्ति अनन्ता-अपर्यवसिता गम्यते वस्तुस्वरूपमेभिरिति गमा-वस्तुपरिच्छेदप्रकाराः नामादयस्तैर्युक्तानि-अन्वितान्यनन्तगमयुक्तानि, पर्यायाद्युपलक्षणं च गमग्रहणम्, उक्तं हि-"अनंता गमा अनंता पज्जवा अनंता हेतू" इत्यादि, अनेनैतदात्मकत्वात्, पूर्वाणां तेषामप्यानन्त्यमुक्तं, क्व पुनरमूनि भावे वर्तन्ते येन भावबहून्युच्यन्ते इत्याह-'भाव' इत्यात्मपर्याये क्षायोपशमिके चतुर्दश पूर्वाणि वर्तन्ते इति प्रक्रमः, आह-किं न क्षायिके भावे किञ्चिद्भावबहु?, अस्तीताह-'क्षायिके च' कर्मक्षयादुत्पन्ने पुनः केवलज्ञानम्, अनन्तपर्यायत्वात्, तदपि भावबहुकमिति गाथार्थः ॥ उक्तं बहु, सम्प्रति सूत्रं श्रुतं वाऽऽह-

नि.[३१२] दव्वसुय पोंडवाइ अहवा लिहियं तु पुत्थयाईसुं।
भावसुयं पुन दुविहं सम्मसुयं चेव मिच्छसुयं ॥

वृ. 'दव्वसुय'त्ति अनुस्वारलोपात् द्रव्यसूत्रं द्रव्यश्रुतं च, तत्राऽऽद्यं पुण्डजादि, द्वितीयमाह-'अथवा' इति पक्षान्तरसूचकः, ततो द्रव्यश्रुतं 'लिखितम्' अक्षररूपतया न्यस्तं पुस्तकादिषु, तुशब्दाद् भाष्यमानं वा द्रव्यश्रुतमुच्यते, भावश्रुतं पुनः 'द्विविधं' द्विभेदं 'सम्यक्श्रुतं चैव' इति प्राग्वत् ततो मिथ्याश्रुतं चेति गाथार्थः ॥ एतत्स्वरूपमाह-

नि.[३१३] भवसिद्धिया उ जीवा सम्मद्दिट्ठी उ जं अहिज्जंति।
तं सम्मसुएण सुयं कम्मट्ठविहस्स सोहिकरं॥

नि.[३१४] मिच्छद्दिट्ठी जीवा अभव्वसिद्धी य जं अहिज्जंति।
तं मिच्छसुएण सुयं कम्मादानं च तं भणियं ॥

वृ. भवे भव्या वा सिद्धिरेषामिति भवसिद्धिका भव्यसिद्धिका वा, 'तुः' अवधारणे, एत एव 'जीवाः' प्राणिनः, तेऽपि 'सम्मद्दिट्ठी उ'त्ति सम्यग्दष्ट्य एव 'यत्' इति श्रुतम् 'अधीयते' पठन्ति 'तं सम्मसुएण'त्ति सम्यक्श्रुतशब्देन 'श्रुतम्' इति प्रक्रमाद् भावश्रुतम्, उच्यते इति शेषः। आह-भाष्यमानत्वेनास्य कथं न द्रव्यश्रुतत्वम्?, उच्यते, अनेनैतज्जनित उपयोग एवोपलक्षित इति न दोषः, एवमन्यत्रापि भावनीयं। तन्माहात्म्यमाह-'कम्मट्ठविहस्स'त्ति अष्टविधकर्मणः 'शुद्धिकरम्' अपनयनकर्तृ ॥ मिथ्याश्रुतमाह-मिथ्यादृष्ट्य जीवाः, भव्या इति गम्यते, 'अभव्यसिद्धयश्च' अभव्याः यदधीयते तत् 'मिथ्याश्रुतेन' मिथ्याश्रुतशब्देन 'श्रुतम्' इतीहापि भावश्रुतं भणितमिति सम्बन्धः, कर्म्म-ज्ञानावरणादि आदीयते-स्वीक्रियतेऽनेन जन्तुभिरिति कर्म्मादानं-कर्मोपादानहेतुः, 'चः' समुच्चये, 'तत्' श्रुतं 'भणितम्' उक्तमिति गाथाद्वयार्थः ॥

इदानीं पूजा, साऽपि नामादिभेदतश्चतुर्धैव, तत्राऽऽद्ये सुगमे, द्रव्यपूजामाह-

नि.[३१५] ईसरतलवरमाडंबिआण सिवइंदखंदविण्हूणं।
जा किर कीरइ पूआ सा पूआ दव्वओ होइ ॥

वृ. ईश्वरश्च-द्रव्यपतिः तलवरश्च-प्रभुस्थानीयो नगरादिचिन्तकः मडम्बं-जलदुर्गं तस्मिन् भवो माडम्बिकः-तद्भोक्ता च ईश्वरतलवरमाडम्बिकास्तेषां, तथा शिवश्च-शम्भुः इन्द्रश्च-पुरन्दरः स्कन्दश्च-स्वामिकार्तिकेयः विष्णुश्च-वासुदेवः शिवेन्द्रस्कन्दविष्णवस्तेषां, या किल क्रियते पूजा सा पूजा 'द्रव्यतः' द्रव्यनिक्षेपमाश्रित्य भवति, द्रव्यपूजेति योऽर्थः, किलशब्द-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्विहापारमार्थिकत्वख्यापकः, द्रव्यतोऽपि हि भावपूजाहेतुरेव पूजोत्यते, इयं तु द्रव्यार्थमप्रधाना वा पूजेति द्रव्यपूजा, अतोऽपारमार्थिक्येव, एतदभिधानं तु द्रव्यशब्दस्यानेकार्थत्वसूचकमिति गाथार्थः ॥ भावपूजामाह-

नि.[३१६] तित्थयरकेवलीणं सिद्धायरिआण सव्वसाहूणं ।
जा किर कीरइ पूआ सा पूआ भावओ होइ ॥

वृ. तीर्थङ्कराश्च अर्हन्तः केवलिनाश्च-सामान्येनैवोत्पन्नकेवलाः तीर्थकरकेवलिनस्तेषां, 'सिद्धाचार्याणां' प्रतीतानां, तथा सर्वसाधूनां, का ?-या किल 'क्रियते' विधीयते पूजा सा पूजा 'भावतः' भावनिक्षेपमाश्रित्य भवति, किलशब्दः परोक्षाप्तवादसूचकः, तीर्थङ्करादिपूजा हि सर्वाऽपि क्षायोपशमिकादिभाववर्तिन एव भवतीति भावपूजैव, यत्तु पुष्पादिपूजाया द्रव्यस्तवत्वमुक्तं तद् द्रव्यैः-पुष्पादिभिः स्तव इति व्युत्पत्तिमाश्रित्य सम्पूर्णभावस्तवकारणत्वेन वेति गाथार्थः ॥ सम्प्रति प्रस्तुतोपयोग्याह-

नि.[३१७] जे किर चउदसपुव्वी सव्वक्खरसन्निवाइणो निउणा ।
जा तेसिं पूया खलु सा भावे ताइ अहिगारो ॥

वृ. 'ये' प्राग्वत् 'किल' इति वाक्यालङ्कारे 'चतुर्दशपूर्विणः' चतुर्दशपूर्वधराः सर्वाणि-समस्तानि यान्यक्षराणि-अकारादीनि तेषां सन्निपातनं-तत्तदर्थाभिधायकतया साङ्गत्येन घटनाकरणं सर्वाक्षरसन्निपातः स विद्यते अधिगमविषयतया येषां तेऽमी सर्वाक्षरसन्निपातिनः 'निपुणाः' कुशलाः, या 'तेषां' चतुर्दशपूर्विणां 'पूजा' उचितप्रतिपत्तिरूपया, उपलक्षणं चेयं शेषबहुश्रुतपूजायाः, प्राधान्याच्चास्या एवोपादानं, 'खलु' निश्चितं, सा 'भावे' भावविषया, 'तया' बहुश्रुतपूजालक्षणया भावपूजया इह 'अधिकारः' प्रकृतमिति गाथार्थः ॥ इत्युक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(३२८) *संजोगा विप्पमुक्कस्स, अनगारस्स भिक्खुणो ।*
आयारं पाउक्करिस्सामि, आनुपुव्विं सुणेह मे ॥

वृ. संयोगाद्विप्रमुक्तस्यानगारस्य भिक्षोः आचरणमाचारः-उचितक्रिया विनय इतियावत्, तथा च वृद्धाः-'आयारोत्ति वा विनओत्ति वा एगट्ठ'त्ति स चेह बहुश्रुतपूजात्मक एव गृह्यते, तस्या एवात्राधिकृतत्वात्, तं 'प्रादुष्करिष्यामि' प्रकटयिष्यामि आनुपूर्व्या, शृणुत 'मे' मम कथयत इति शेषः इति सूत्रार्थः ॥ इह च बहुश्रुतपूजा प्रक्रान्ता, सा च बहुश्रुतस्वरूपपरिज्ञान एव कर्तुं शक्या, बहुश्रुतस्वरूपं च तद्विपर्ययपरिज्ञाने तद्विविक्तं सुखेनैव ज्ञायत इत्यबहु-श्रुतस्वरूपमाह-

मू.(३२९) *जे यावि होइ निव्विज्जे, थद्धे लुद्धे अनिग्गहे ।*
अभिक्खणं उल्लवई, अविनीए अबहुस्सुए ॥

वृ. 'जे यावि'त्ति यः कश्चित्, चापिशब्दौ भिन्नक्रमावुत्तरत्र योक्ष्येते, 'भवति' जायते निर्गतो विद्यायाः-सम्यक्शास्त्रावगमरूपायाः निर्विद्यः, अपिशब्दसम्बन्धात् सविद्योऽपि, यः 'स्तब्धः' अहङ्कारी 'लुब्धः' रसादिगृद्धिमान्, न विद्यते इन्द्रियनिग्रहः-इन्द्रियनियमनात्मकोऽस्येति अनिग्रहः 'अभीक्ष्णं' पुनः पुनः उत्-प्राबल्येनासम्बद्धभाषितादिरूपेण लपति-वक्ति उल्लपति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अविनीतश्च' विनयविरहितः 'अबहुस्सुए'त्ति यत्तदोर्नित्याभिसम्बन्धात् सोऽबहुश्रुतः, उच्यते इति शेषः, सविद्यस्याप्यबहुश्रुतत्वं बाहुश्रुत्यफलाभावादिति भावनीयम्, एतद्विपरीतस्त्वर्थाद् बहुश्रुत इति सूत्रार्थः ॥ कुतः पुनरीदृशमबहुश्रुतत्वं बहुश्रुतत्वं वा लभ्यत इत्याह-

मू. (३३०) अह पंचहि ठाणेहिं, जेहिं सिक्खा न लब्भइ।
थंभा कोहा पमाएणं, रोगेणालस्सेण य ॥

वृ. 'अथ' इत्युपन्यासार्थः 'पञ्चभिः' पञ्चसङ्ख्यैः तिष्ठन्तयेषु कर्म्मवशगा जन्तव इति स्थानानि तैः, 'यैः' इति वक्ष्यमानैर्हेतुभिः-शिक्षणं क्षिक्षा-ग्रहणासेवनात्मिका 'न लभ्यते' नावाप्यते, तैरीदृशमबहुश्रुतत्वमवाप्यत इति शेषः, कैः पुनः सा न लभ्यते ? इत्याह- 'स्तम्भात्' मानात् 'क्रोधात्' कोपात् 'प्रमादेन' मद्यविषयादिना 'रोगेण' गलत्कष्ठादिना 'आलस्येन' अनुत्साहात्मना, शिक्षा न लभ्यत इति प्रक्रमः, चः समस्तानां व्यस्तानां च हेतुत्वमेषां द्योतयति ॥

इत्थमबहुश्रुतत्वहेतूनभिधाय बहुश्रुतत्वहेतूनाह-

मू. (३३१) अह अट्ठहिं ठाणेहिं, सिक्खासीलेत्ति वुच्चइ।
अहस्सिरे सयादंते, न य मम्ममुयाहरे ॥

वृ. अथाष्टभिः स्थानैः शिक्षायां शीलः-स्वभावो यस्य शिक्षां वा शीलयति-अभ्यस्ततीति शिक्षाशीलः-द्विविधशिक्षाभ्यासकृद्, इतिशब्दः स्वरूपपरामर्शकः, उच्यते तीर्थकृद्गणधरादिभिरिति गम्यते, तान्येवाह-'अहस्सिरे'त्ति 'तृन इर' इति प्राकृतलक्षणादहसनशीलः अहसिता-न सहेतुकमहेतुकं वा हसन्नेवास्ते, 'सदा' सर्वकालं 'दान्तः' इन्द्रियनोइन्द्रियदमवान् 'न च' नैव 'मर्म' परापभ्राजनाकारि कुत्सितं जात्यादि 'उदाहरेत्' उद्घट्टयेत।

मू. (३३२) नासीले न विसीले, न सिया अइलोलुए।
अकोहणे सच्चरए, सिक्खासीलेत्ति वुच्चइ ॥

वृ. 'न' नैव 'अशीलः' अविद्यमानशीलः, सर्वथा विनष्टचारित्रधर्म इत्यर्थः, न 'विशीलः' विरूपशीलः, अतीचारकलुषितव्रत इतियावत, 'न स्यात्' न भवेद्, इह पूर्वत्र च सम्भावने लिट् 'अतिलोलुपः' अतीव रसलम्पटः, 'अक्रोधनः' अपराधिन्यनपराधिनि वा न कथञ्चित् क्रुध्यति, सत्यम्-अवितथभाषणं तस्मिन् रतः-आसक्तः सत्यरतः इति, निगमयितुमाह-शिक्षाशील 'इति' इत्यनन्तरोक्तगुणभाग् उच्यते, स च बहुश्रुत एव भवतीति भावः । इह च स्थानप्रक्रमेऽप्येवमभिधानं धर्मधर्मिणोः कथञ्चिदनन्यत्वख्यापनार्थं, विशेषाभिधायित्वाच्च क्वचित् केषाञ्चिदन्तर्भावसम्भवेऽपि पृथगुपादानं, परिहारद्धयमपीदमुत्तरत्रापि भावनीयमिति सूत्रत्रयार्थः ॥ किञ्च-अबहुश्रुतत्वे बहुश्रुतत्वे वाऽविनयो विनयश्च मूलकारणं, तत्त्वत उक्तहेतूनामप्यनयोरेवान्तर्भावात्, न च अविनीतविनीतयोः स्वरूपमविज्ञान तौ ज्ञातुं शक्याविति यैः स्थानैरविनीत उच्यते यैश्च विनीतस्तान्यभिधातुमाह-

मू. (३३३) अह चोद्दसहिं ठाणेहिं, वट्टमाणो उ संजए।
अविनीए वुच्चती सो उ, निव्वाणं च न गच्छइ ॥

वृ. 'अथ' इति प्राग्वत्, चतुर्भिरधिका दश चतुर्दश तेषु चतुर्दशसङ्ख्येषु स्थानेषु, सूत्रे चु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुब्व्यत्ययेन सप्तम्यर्थे तृतीया, 'वर्तमान:' तिष्ठन् 'तु:' पूरणे 'संयत:' तपस्वी, अविनीत उच्यते, 'स तु' इत्यविनीत: पुन:, किमित्याह-'निर्वाणं च' मोक्षं, चशब्दादिहैव ज्ञानादींश्च 'न गच्छति' न प्राप्नोति ॥ कानि पुनश्चतुर्दश स्थानानित्याह-

मू.(३३४) *अभिक्खणं कोही भवइ, पबंधं च पकुव्वइ।*
मित्तिज्जमानो वमति, सुयं लद्धूण मज्जइ ॥

वृ. 'अभीक्ष्णं' पुन: पुन:, यद्वा-क्षणं क्षणमभि अभिक्षणम्-अनवरतं 'क्रोधी' क्रोधन: भवति, सनिमित्तनिमित्तं वा कुप्यन्नेवास्ते, 'प्रबन्धं च' प्रकृतत्वात् कोपस्यैवाविच्छेदात्मकं 'पकुव्वइ'त्ति प्रकर्षेण कुरुते, कुपित: सन् सान्त्वनैरनेकैरपि नोपशाम्यति, विकथादिषु वाऽविच्छेदेन प्रवर्तनं प्रबन्धस्तं च प्रकुरुते, तथा 'मेत्तिज्जमानो'त्ति मित्रीय्यमानोऽपि मित्रं ममायमस्त्वितीष्यमानोऽपि अपिशब्दस्य लुप्तनिर्दिष्टत्वात् 'वमति' त्यजति, प्रस्तावान्मित्रयितारं मैत्री वा, किमुक्तं भवति ?-यदि कश्चिद्धार्मिकतया वक्ति-यथा त्वं न वेत्सीत्यहं तव पात्रं लेपयामि, ततोऽसौ प्रत्युपकारभीरुतया प्रतिवक्ति-ममालेमेतेन, कृतमपि वा कृतघ्नतया न मन्यत इति वमतीत्युच्यते, तथा 'सुयं'ति अपेर्गम्यमानत्वात् श्रुतमपि-आगममपि 'लब्ध्वा' प्राप्य 'माद्यति दर्पं याति, किमुक्तं भवति ?-श्रुतं हि मदापहारहेतु:, स तु तेनापि दप्यति।

मू.(३३५) *अवि पावपरिक्खेवी, अवि मित्तेसु कुप्पति।*
सुप्पियस्सावि मित्तस्स, रहे भासइ पावगं ॥

वृ. तथा 'अपि:' सम्भावनायां, सम्भाव्यत एतत्, यथाऽसौ पापै:-कथञ्चित् समित्यादिषु स्खलितलक्षणै: परिक्षिपति-तिरस्कुरुत इत्येवंशील: पापरिक्षेपी, आचार्यादीनामिति गम्यते, तथा 'अपि:' भिन्नक्रम:, तत: 'मित्रेभ्योऽपि' सुहृद्भ्योऽप्यास्तामन्येभ्य: 'कुप्यति' क्रुध्यति, सूत्रे तु चतुर्थ्यर्थे सप्तमी, "क्रुधिद्रुहेर्ष्यासूयार्थानां यं प्रति कोप" इत्यनेनेह चतुर्थीविधानात्, तथा 'सुप्रियस्यापि' अतिवल्लभस्यापि मित्रस्य 'रहसि' एकान्ते 'भाषते' वक्ति पापमेव पापकं, किमुक्तं ?-अग्रत: प्रियं वक्ति पृष्ठस्तु प्रतिसेवकोऽयमित्यादिकमनाचारमेवाविष्करोति।

मू.(३३६) *पइन्नावाई दुहिले, थद्धे लुद्धे अनिग्गहे।*
असंविभागी अचियत्ते, अविनीएत्ति वुच्चइ ॥

वृ. तथा प्रकीर्णम्-इतस्ततो विक्षिप्तम्, असम्बद्धमित्यर्थ:, वदतिजल्पतीत्येवंशील: प्रकीर्णवादी, वस्तुतत्त्वविचारेऽपि यत्किञ्चनवादीत्यर्थ:, अथवा-य: पात्रमिदमपात्रमिदमिति वाऽपरीक्ष्यैव कथञ्चिदधिगतं श्रुतरहस्यं वदतीत्येवंशील: प्रकीर्णवादी इति, प्रतिज्ञया वा-इदमित्थमेव इत्येकान्ताभ्युपगमरूपया वदनशील: प्रतिज्ञावादी, तथा 'दुहील'त्ति द्रोहणशीलो-द्रोग्धा, न मित्रमप्यनभिद्रुह्यास्ते, तथा 'स्तब्ध:' तपस्व्यमित्याद्यहकृंतीमान्, तथा 'लुब्ध:' अन्नादिष्वभिकाङ्क्षावान्, तथा 'अनिग्रह:' प्राग्वत्, तथाऽसंविभजनशील: असंविभागी, नाऽऽहारादिकमवाप्यतिगर्द्धनोऽन्यस्मै स्वल्पमपि यच्छति, किन्त्वात्मानमेव पोषयति, तथा 'अचियत्ते'त्ति अप्रीतिकार:-दश्यमान: सम्भाष्यमानो वा सर्वस्याप्रीतिमेवोत्पादयति, एवंविधदोषान्वित: अविनीत उच्यते इति निगमनम्। इत्थमविनीतस्थानान्यभिधाय विनीतस्थानान्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३३७) *अह पन्नरसहिं ठाणेहिं, सुविनीएत्ति वुच्चइ।*
नीयावित्ती अचवले, अमाई अकुऊहले ॥

वृ. अथ पञ्चदशभिः स्थानैः सुष्ठु-शोभनो विनीतो-विनयान्वितः सुविनीत इत्युच्यते, तान्येवाह-'नियावित्ति'त्ति नीचम्-अनुद्धतं यथा भवत्येवं नीचेषु वा शय्यादिषु वर्तत इत्येवंशीलो नीचवर्ती-गुरुषु न्यग्वृत्तिमान्, यथाऽऽह-

"नीयं सेज्जं गइं ठाणं, नियं च आसनानि य।
नियं च पाय वंदेज्जा, नीयं कुज्जा य अंजलिं ॥"

'अचपलः' नाऽऽरब्धकार्यं प्रत्यस्थिरः, अथवाऽचपलो-गतिस्थानभाषाभावभेदतश्चतुर्धा, तत्र-गतिचपलः-द्रुतचारी, स्थानचपलः-तिष्ठन्नपि चलन्नेवास्ते हस्तादिभिः भाषाचपलः-असदसभ्यासमीक्ष्यादेशकालप्रलापिभेदाच्चतुर्धाः, तत्र असद्-अविद्यमानमसभ्यं-खरपुरुषादि असीमक्ष्य-अनालोच्य प्रलपन्तीत्येवंशीला असदसभ्यासमीक्ष्यप्रलापिनस्त्रयः, अदेशकालप्रलापी चतुर्थः अतीते कार्ये यो वक्ति-यदिदं तत्र देशे काले वाऽकरिष्यत् ततः सुन्दरमभविष्यद्, भावचपलः सूत्रेऽर्थे वाऽसमाप्त एव योऽन्यद् गृह्णाति, 'अमायी' न मनोज्ञ-माहारादिकमवाप्य गुर्वादिवञ्चकः, 'अकुतूहलः' न कुहुकेन्द्रजालाद्यवलोकनपरः,

मू. (३३८) *अप्पं च अहिक्खिवति, पबंधं च न कुव्वइ।*
मितिज्जमानो भजति, सुयं लद्धुं न मज्जति ॥

वृ. 'अल्पं च' इति स्तोकमेव 'अधिक्षिपति' तिरस्कुरुते, किमुक्तं भवति?-नाधिक्षिपत्येव तावदसौ कञ्चन, अधिक्षिपन् वा कञ्चन कङ्कटुकरूपं धर्मं प्रति प्रेरयन्नल्पमेवाधिक्षिपति, अभाववचनो वाऽल्पशब्दः, तथा च वृद्धाः-"अल्पशब्दो हि स्तोकेऽभावे च", ततो नैव कञ्चनाधिक्षिपति, 'प्रबन्धं' चोक्तरूपं न करोति, 'मित्रीय्यमानः' उक्तन्यायेन 'भजते' मित्रीयितारमुपकुरुते, न तु प्रत्युपकारं प्रत्यसमर्थः कृतघ्नो वा, श्रुतं लब्ध्वा न माद्यति, किन्तु मददोष-परिज्ञानतः सुतरामवनमति,

मू. (३३९) *न य पावपरिक्खेवी, न य मित्तेसु कुप्पति।*
अप्पियस्सावि मित्तस्स, रहे कल्लाण भासइ ॥

वृ. 'न च' नैव 'पापपरिक्षेपी' उक्तरूपः, न च मित्रेभ्यः कृतज्ञतया कथञ्चिदपराधेऽपि कुप्यति, अप्रियस्यापि विधत्ते तथाऽप्येकमपि सुकृतमनुस्मरन् न रहस्यपि तद्दोषमुदीरयति,

"एकसुकृतेन दुष्कृतशतानि ये नाशयन्ति ते धन्याः।
न त्वेदकदोषजनितो येषां कोपः स च कृतघ्नः ॥"

मू. (३४०) *कलहडमरवज्जए, बुद्धे (अ) अभिआइए।*
हिरिमं पडिसंलीणो, सुविनीएत्ति वुच्चइ ॥

वृ. इति, कलहश्च-वाचिको विग्रहः डमरं च-प्राणिघातादिभिस्तद्वर्जको, 'बुद्धो' बुद्धिमान्, एतच्च सर्वत्रानुगम्यत एवेति न प्रकृतसङ्ख्याविरोधः, 'अभिजातिए'त्ति अभिजातिः-कुलीनता ता गच्छति-उत्क्षिप्तभारनिर्वाहणादिनेत्यभिजातिगः, ह्रीः-लज्जा सा विद्यतेऽस्य ह्रीमान्, कथ-ञ्चित् कलुषाध्यवसायतायामप्यकार्यमाचरन् लज्जते, 'प्रतिसंलीनः' गुरुसकाशेऽन्यत्र वा कार्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विना न यतस्ततश्चेष्टते, प्रस्तुतमुपसंहरन्नाह-'सुविनित:' सुविनितशब्दवाच्य: 'इति' इत्येवं-विधगुणान्वित: उच्यते, इति सूत्राष्टकार्थ: ॥ यश्चैवं विनीत: स कीदृक् स्यादित्याह-

मू. (३४१) *वसे गुरुकुले निच्चं, जोगवं उवहाणवं।*
पियंकरे पियंवाई, से सिक्खं लद्धुमरिहिति ॥

वृ. 'वसेत्' आसीत क्व?-गुरूणाम्, आचार्यादीनां कुलम्-अन्वयो गच्छ इत्यर्थ: गुरुकुलं तत्र, तदाज्ञोपलक्षणं च कुलग्रहणं, 'नित्यं' सदा, किमुक्तं भवति?-यावज्जीवमपि गुर्वाज्ञायामेव तिष्ठेत्, उक्तं हि-''नाणस्स होइ भागी'' इत्यादि, योजनं योगो-व्यापार:, स चेह प्रक्रमाद्धर्मगत एव तद्वान्, अतिशायने मतुप्, यद्वा योग:-समाधि: सोऽस्यास्तीति योगवान्, प्रशंसायां मतुप्, उपधानतम्-अङ्गानङ्गाध्ययनादौ यथायोगमाचाम्लादितपोविशेषस्तद्वान्, यद्यस्योपधानमुक्तं न तत् कृच्छ्रभीरुतयोत्सृज्यान्यथा वाऽधीते शृणोति वा, प्रियम्-अनुकूलं करोतीति प्रियङ्कर:, कथञ्चित् केनचिदकृतोऽपि न तत्प्रतिकूलमाचरति, किन्तु ममैव कर्मणामयं दोष इत्यवधारयन्न-प्रियकारिण्यपि प्रियमेव चेष्टते, अत एव च 'प्रियमेव'त्ति केनचिदप्रियमुक्तोऽपि प्रियमेव वदतीत्येवंशील: प्रियवादी, यद्वा-'प्रियङ्कर:' आचार्यादेरभिमताहारादिभिरनुकूलकारी, एवं 'प्रियवाद्यपि' आचार्याभिप्रामयानुवर्तिततयैव वक्ता, तथा चास्य को गुण इत्याह-'स' एवंगुण-विशिष्ट: 'शिक्षां' शास्त्रार्थग्रहणादिरूपां 'लब्धुम्' अवाप्तुम् 'अर्हति' योग्यो भवतीति, अनेनैव अविनीतस्त्वेतद्विपरीत: शिक्षां लब्धुं नार्हतीत्यर्थादुक्तं भवति, तथा च य: शिक्षां लभते स बहुश्रुत: इतर स्त्वबहुश्रुत इति भाव इति सूत्रार्थ: ॥ एवं च सविपक्षं बहुश्रुतं प्रपञ्चतोऽभिधाय प्रतिज्ञातं तत्प्रतिपत्तिरूपमाचारं तस्यैव स्तवद्वारेणाह-

मू. (३४२) *जहा संखंमि पयं निहियं, दुहओवि विरायइ।*
एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ॥

वृ. 'यथा' इति दृष्टान्तोपन्यासे 'शङ्खे' जलजे 'पयो' दुग्धं 'निहितं' न्यस्तं' दुहओवि'त्ति द्वाभ्यां प्रकाराभ्यां द्विधा, न शुद्धतादिना स्वसम्बन्धिगुणलक्षणैनैकेनैव प्रकारेण, किन्तु स्वसम्बन्ध्याश्रयसम्बन्धिगुणद्वयलक्षणेन प्रकारद्वयेनापीत्यपिशब्दार्थ:, 'विराजते' शोभते, तत्र हि न तत् कलुषीभवति, न चाम्लतां भजते, नापि च परिस्त्रवति, 'एवम्' अनेन प्रकारेण बहुश्रुते 'भिक्खु'त्ति आर्षत्वाद् भिक्षौ-तपस्विनि, 'धर्म:' यतिधर्म: 'कीर्ति:' श्लाघा 'तथा' इति धर्मकीर्त्तिवत् 'श्रुतम्' आगमो, विराजत इति सम्बन्ध:, किमुक्तं भवति?-यद्यपि धर्मकी-र्तिश्रुतानि निरुपलेपतादिगुणेन स्वयं शोभाभाज्जि तथापि मिथ्यात्वादिकालुष्यविगमतो निर्मलतादिगुणेन शङ्ख इव पयो बहुश्रुते स्थितान्याश्रयगुणेन विशेषत: शोभन्ते, तान्यपि हि न तत्र मालिन्यम् अन्यथाभावं हानिं वा कदाचन प्रतिपद्यन्ते, अन्यत्र त्वन्यथाभूतभाजनस्थपयो-वदन्यथाऽपि स्यु:, वृद्धास्तु व्याचक्षते-

'यथे' त्यौपम्ये, 'संखंमि' संखभायणे 'पयं' खीरं 'निहितं' ठवितं न्यस्तमित्यर्थ:, 'दुहतो' उभयतो संखो खीरं च, अहवा ठवंतओ खीरं च, संखे न परिस्सवति न य अंबीभवति, 'विरायति' सोभति, 'एव'मुपसंहारो अनुमाने वा 'बहुसुओ' सुत्तत्थविसारतो, जानक इत्यर्थ:, 'तस्स' एवं भिक्खुभायणे दिंतस्स धम्मो भवति कित्ती जसो तथा सुयमाराधियं भवति, अपत्ते दिंतस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असुयमेव भवति, अहवा इहलोए परलोए य सोहइ पत्तदाई, अहवा एवंगुणजाइए भिक्खू बहुस्सुए भवति, धम्मो कित्ती जसो य हवइ, सुयमाराहियं हवइ, अहवा इहलोए परलोए य विरायइ, अहवा सीलेण य सुएण य" इति सूत्रार्थः ॥ पुनर्बहु-श्रुतस्तवमाह-

मू. (३४३) *जहा से कंबोयाणं, आइन्ने कंथए सिया।*
आसे जवेण पवरे, एवं हवइ बहुस्सए॥

वृ. 'यथा'येन प्रकारेण 'स' इति प्रतीतः 'काम्बोजदेशोद्भवानां प्रक्रमादश्वानां, निर्द्धारणे षष्ठी, 'आकीर्णः' व्याप्तः, शीलादिगुणैरिति गम्यते, 'कन्थकः' प्रधानोऽश्वो, यः किल दृषच्छ-कलभृतकुतुपनिपतनध्वनेर्न सन्त्रस्यति, 'स्यात्' भवेत् 'अश्वः' तुरङ्गमः 'जवेन'वेगेन 'प्रवरः' प्रधानः 'एवम्' इत्युपनये तत ईदृशो भवति बहुश्रुतः, जिनधर्मप्रपन्ना हि व्रतिनः काम्बोजा इवाश्वेपु जातिजवादिभिर्गुणैरन्यधार्मिकापेक्षया श्रुतशीलादिभिर्वरा एव, अयं त्वाकीर्णकन्थ-काश्ववत् तेष्वपि प्रवर इति सूत्रार्थः ॥ किञ्च-

मू. (३४४) *जहाइन्नसमारूढे, सूरे दढपरक्कमे।*
उभओ नंदिघोसेणं, एवं हवइ बहुस्सए॥

वृ. यथा आकीर्ण-जात्यादिगुणोपेतं तुरङ्गमं सम्यगारुढः-अध्यासितः आकीर्णसमारुढः, सोऽपि कदाचित् कातर एव स्यादत आह-'शूरः' चारभटः दृढः-गाढः पराक्रमः-शरीरसाम-र्थ्यात्मको यस्य स तथा, 'उभउ'त्ति उभयतो वामतो दक्षिणतश्च यद्वाऽग्रतः पृष्ठतश्च 'नन्दीघोषेण' द्वादशतूर्यनिनादात्मकेन, यद्वा आशीर्वचनानि नान्दी जीयास्त्वमित्यादीनि तद्घोषेण बन्दिकोलाहलात्मकेन, लक्षणे तृतीया, एवं भवति बहुश्रुतः, किमुक्तं भवति ?-यथैवंविधः शूरो न केनचिदभिभूयते न चान्यस्तदाश्रितः, तथाऽयमपि जिनप्रवचनतुरङ्गाश्रितो दृप्यत्पर-वादिदर्शनेऽपि चात्रस्तः तद्विजयं च प्रति समर्थः उभयतश्च दिनरजन्योः स्वाध्यायघोषरूपेण स्वपक्षपरपक्षयोर्वा चिरं जीवत्वसौ येनानेन प्रवचनमुद्दीपितमित्याद्याशीर्वचनात्मकेन नान्दीघोषेणोपलक्षितः परतीर्थिभिरतीव मदावलिप्तैरवि नाभिभवितुं शक्यः, न चात्र प्रतपत्येत-दाश्रितोऽन्योऽपि कथञ्चिज्जीयत इति सूत्रार्थः ॥ तथा-

मू. (३४५) *जहा करेणुपरिकिन्ने, कुंजरे सट्ठिहायणे।*
बलवंते अप्पडिहए, एवं भवइ बहुस्सए॥

वृ. 'यथा' करेणुकाभिः-हस्तिनीभिः परिकीर्णः-परिवृतो यः स तथा, न पुनरेकाक्येव 'कुञ्जरः' हस्तीषष्टिर्हायनान्यस्येति षष्टिहायनः-षष्टिवर्षप्रमाणः, तस्य हि एतावत्कालं यावत् प्रतिवर्षं बलोपचयः ततस्तदपचय इत्येवमुक्तम्, अत एव च 'बलवंते'त्ति बलं-शरीरसाम-र्थ्यस्यास्तीति बलवान् सन् अप्रतिहतो भवति, कोऽर्थः ?-नान्यैर्मदमुखैरपि मतङ्गजैः परांमुखी-क्रियते, एवं भवति बहुश्रुतः, सोऽपि हि करेणुभिरिव परप्रसरनिरोधिनीभिरौत्पत्तिक्यादि-बुद्धिभिर्विद्याभिश्च विविधाभिर्वृतः ष्ष्टिहायनतया चात्यन्तस्थिरमतिः, अत एव च बलवत्त्वेना-प्रतिहतो भवति, दर्शनोपहन्तृभिर्बहुभिरपि न प्रतिहन्तुं शक्यत इति सूत्रार्थः ॥ अन्यच्च-

मू. (३४६) *जहा से तिक्खसिंगे, जायक्खंधे विरायइ।*
वसमे जूहाहिवती, एवं भवति बहुस्सुए॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. यथा स तीक्ष्णे-निशिताग्रे शृङ्गे-विषाणे यस्य स तथा, जातः-अत्यन्तोपचितीभूतः स्कन्धः-प्रतीत एवास्येति जातस्कन्धः, समस्ताङ्गोपाङ्गोपचितत्वोपलक्षणं चैतत्, तदुपचये हि शेषाङ्गान्युपचितान्येवास्य भवन्ति, 'विराजते' विशेषेण राजते-शोभते 'वृषभः' प्रतीतो, यूथस्य-गवां समूहस्याधिपतिः-स्वामी यूथाधिपतिः सन्, एवं भवति बहुश्रुतः, सोऽपि हि परपक्षभेत्तृतया तीक्ष्णाभ्यां स्वशास्त्रपरशास्त्राभ्यां शृङ्गाभ्यामिवलोपलक्षितः गच्छगुरुकार्यधुराधरणधौरेयतया च जातस्कन्ध इव जातस्कन्धः, अत धव च यूथस्य-साध्वादिसमूहस्याधिपतिः-आचार्यपदवीं गतः सन् विराजते इति सूत्रार्थः ॥ अन्यच्च-

मू. (३४७) जहा से तिक्खदाढे, ओदग्गे दुप्पहंसए।
सीहे मियाण पवरे, एवं भवइ बहुस्सुए ॥

वृ. यथा स तीक्ष्णाः-निशिता दंष्ट्राः-प्रतीता एव यस्य स तीक्ष्णदंष्ट्रः, 'उदग्रः' उत्कट उदग्रवयःस्थितत्वेन वा उदग्रः, अत एव 'दुप्पहंसए' त्ति दुष्प्रधर्ष एव दुष्प्रधर्षकः-अन्यैर्दुरभिभवः 'सिंहः' केशरी 'मृगाणाम्' आरण्यप्राणिनां 'प्रवरः' प्रधानो भवति, एवं भवति बहुश्रुतः, अयमपि हि परपक्षमेत्तृतया तीक्ष्णदंष्ट्राभिरिव नैगमादिनयैः प्रतिभादिगुणोदग्रतया च दुरभिभवः इत्यन्यतीर्थानां मृगस्थानीयानां प्रवर एवेति सूत्रार्थः ॥ अपरं च-

मू. (३४८) जहा से वासुदेवे, संखचक्कगदाधरे।
अप्पडिहयबले जोहे, एवं भवइ बहुस्सुए ॥

वृ. यथा स 'वासुदेवः' विष्णुः, शङ्खश्च-पाञ्चजन्यः चक्रं च-सुदर्शनं गदा च-कौमोदकी शङ्खचक्रगदास्ताधारयति-वहतीति शङ्खचक्रगदाधरः, अप्रतिहतम्-अन्यैः स्खलयितुमशक्यं बलं-सामर्थ्यमस्येत्यप्रतिहतबलः, किमुक्तं भवति?-एकं सहजसामर्थ्यवानन्यच्च तथाविधायोधान्वित इति, युध्यतीति योधः-सुभटो भवति, एवं भवति बहुश्रुतः, सोऽपि ह्येकं स्वाभाविकप्रतिभाप्रागल्भ्यवान् अपरं शङ्खचक्रगदाभिरिव सम्यग्दर्शनज्ञानचारित्रैरुपैत इति, योध इव योधः कर्मवैरिपराभवं प्रतीति सूत्रार्थः ॥ अपरं-

मू. (३४९) जहा से चाउरंते, चक्कवटी महिड्डिए।
चोद्दसरयणाहिवई, एवं हवइ बहुस्सुए ॥

वृ. यथा स चतसृष्वपि दिक्ष्वन्तः-पर्यन्त एकत्र हिमवानन्यत्र च दिक्त्रये समुद्रः स्वसम्बन्धितयाऽस्येति चतुरन्तः, चतुर्भिर्वा-हयगजरथनरात्मकैरन्तः-शत्रुविनाशात्मको यस्य स तथा, 'चक्रवर्ती' षट्खण्डभरताधितः, महती ऋद्धिः-समृद्धिरस्येति महर्द्धिकः-दिव्यानुकारिलक्ष्मीकः, चतुर्दश च तानि रत्नानि च चतुर्दशरत्नानि, तानि चामूनि-

"सेनावइ गाहावइ पुरोहिय गय तुरंग वड्डइग इत्थी।
चक्कं छत्तं चम्मं मणि कागिणी खग्ग दंडो य॥"

तेषामधिपतिः चतुर्दशरत्नाधिपतिः, 'एवं भवति बहुश्रुतः' सोऽपि ह्यासमुद्रमहीमण्डलख्यातकीर्तिः तिसृषु दिक्ष्वन्यत्र च बन्दीभूतविद्याधरवृन्द इति दिक्चतुष्टव्यापिकीर्तितया चतुरन्त उच्यते, चतुर्भिर्वा दानादिधर्मैरन्तःकर्मवैरिविनाशोऽस्येति चतुरन्तः, ऋद्धयश्चामर्षौषध्यादयश्चक्रवर्तिनमपि योधयेदित्येवंविधपुलाकलब्ध्यादयश्च महत्य एवास्य भवन्ति, सन्ति चास्यापि चतुर्दशरत्नो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपमानि सकलातिशयनिधानानि पूर्वाणीति कथं न चक्रवर्तितुल्यताऽस्येति सूत्रार्थः ॥ अन्य च्च-

मू.(३५०) *जहा से सहस्सक्खे, वज्जपाणी पुरंदरे।*
सक्के देवाहिवई, एवं हवइ बहुस्सए ॥

वृ. यथा स सहस्रमक्षीण्यस्येति सहस्राक्षः-सहस्रलोचनः, अत्र च सम्प्रदायः-'सहस्सक्खत्ति पंच मंतिसया देवाणं तस्स, तेसिं सहस्सं अच्छीणं, तेसिं नीईए विक्कमति, अहवा जं सहस्सेणं अच्छीणं दीसति तं सो दोहिं अच्छीहिं अब्भहियगरागं पेच्छती'ति। वज्रंवज्राभिधानमायुधं पाणावस्येति वज्रपाणिः, लोकोकत्वा च पूर्दारणात् पुरन्दरः, क ईदृगित्याहशक्रो 'देवाधिपतिः' देवानां स्वामी, एवं भवति बहुश्रुतः, सोऽपि हि श्रुतज्ञानेनाशेषातिशयरत्ननिधानतुल्येन लोचनसहस्रेणेव जानीते, यश्चैवं तस्यैवविधत्वोपलक्षणं, वज्रमपि लक्षणं पाणौ सम्भवतीति वज्रपाणिः, पूश्च शरीरमप्युच्यते, तद्विकृष्टतपोऽनुष्ठानतो दारयतीव दारयतीति पुरन्दरः, शक्रवत् देवैरपि धर्मेऽत्यन्तनिश्चलतया पूज्यत इति तत्पतिरप्युच्यते, तथा चाह-"देवावि तं नमंसंति, जस्स धम्मे सया मणो"त्ति सूत्रार्थः ॥ अपि च-

मू.(३५१) जहा से तिमिरविद्धंसे, उत्तिट्ठंति दिवागरे।
जलंते इव तेएणं, एवं भवइ बहुस्सुए ॥

वृ. यथा सः तिमिरम्-अन्धकारं विध्वंसयति-अपनयति तिमिरविध्वंसः, 'उत्तिष्ठन्' उद्गच्छन् 'दिवाकरः' सूर्यः, स हि ऊर्ध्वं नभोभागमाक्रामन्नतितेजस्वितां भजते अवतरंस्तं न तथेत्येवं विशिष्यते, यद्वा उत्थानं-प्रथममुद्गमनं तत्र चायं न तीव्र इति तीव्रत्माभावख्यापकमेतत्, अन्यदा हि तीव्रोऽयमिति न सम्यग् दृष्टान्तः स्यात्, 'ज्वलन्निव' ज्वालां मुञ्चन्निव 'तेजसा' महसा, एवं भवति बहुश्रुतः, सोऽपि ह्यज्ञानरूपतिमिरापहारकः संयमस्थानेषु विशुद्धविशुद्धतराध्यवसायत उपसर्पंस्तपस्तेजसा च ज्वलन्निव भवतीति सूत्रार्थः ॥ अन्यच्च-

मू.(३५२) *जहा से उडुवई चंदे, नक्खत्तपरिवारिए।*
पडिपुन्ने पुन्निमासीए, एवं भवइ बहुस्सए ॥

वृ.यथा सः उडूनां-नक्षत्राणां पतिः-प्रभुः उडुपतिः, क इत्याह-'चन्द्रः' शशी, 'नक्षत्रैः' अश्विन्यादिभिः, उपलक्षणत्वाद्ग्रहैस्ताराभिश्च परिवारः-परिकरः सञ्जातोऽस्येति परिवारितः नक्षत्रपरिवारितः 'प्रतिपूर्णः' समस्तकलोपेतः, स चेदृक् कदा भवति ? अत आह-पौर्णमास्याम्। इह च चन्द्र इत्युक्ते मा भून्नामचन्द्रादावपि सम्प्रत्ययः इत्युडुपतिग्रहणं, उडुपतिरपि च कश्चिदेकाक्येव भवति मृगपतिवत् अत उक्तं नक्षत्रपरिवारितः, सोऽप्यपरिपूर्णोऽपि द्वितीयादिषु सम्भवतीति परिपूर्णः पौर्णमास्यामित्युक्तं, एवं भवति बहुश्रुतः, असावपि हि नक्षत्राणामिवानेकसाधूनामधिपतिः तथा तत्परिवारितः सकलकलोपेतत्वेन प्रतिपूर्णश्च भवतीति सूत्रार्थः ॥

मू.(३५३) *जहा से सामाइयाणं, कोट्ठागारे सुरक्खिए।*
नानाधन्नपडिप्पुन्ने, एवं हवइ बहुस्सुए ॥

वृ. यथा स 'सामाइयाणं'ति समाजः-समूहस्तं समवयन्ति सामाजिकाः-समूहवृत्तयो लोकास्तेषां, पठन्ति च-'सामाइयंगाणं'ति तत्र च श्यामा-अतसी तदादीनि च तानि अङ्गानी च उपभोगाङ्गतया श्यामाद्यङ्गानि धान्यानि तेषां 'कोट्ठागारे'त्ति कोष्ठा-धान्यपल्यास्तेषामगारं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदाधारभूतं गृहम्, उपलक्षणत्वादन्यदपि प्रभूतधान्यस्थानं, यत्र प्रदीपनकादिभयात् धान्यकोष्ठाः क्रियन्ते तत् कोष्ठागारमुच्यते, यदिवा कोष्ठान् आ-समन्तात् कुर्वते तस्मिन्निति कोष्ठागारः, "अकर्तरि च कारके सञ्ज्ञायां" मिति धञ्, तथा सुष्ठुप्राहरिकपुरुषादिव्यापारणद्वारेण रक्षितः-पालितो दस्युमूषिकादिभ्यः सुरक्षितः, स च कदाचित् प्रतिनियतधान्यविषयोऽप्रतिपूर्णश्च स्यात् अत आह-नाना-अनेकप्रकाराणि धान्यानि-शालिमुद्गादीनि तैः प्रतिपूर्णो-भृतः नानाधान्य-प्रतिपूर्णः, आद्यपक्षे तु विशेषणे नपुंसकलिङ्गतया नेये, एवं भवति बहुश्रुतः, असावपि सामाजिकलोकानामिव गच्छवासिनामुपयोगिभिर्नानाधान्यैरिवाङ्गोपाङ्गप्रकीर्णकादिभेदैः श्रुतज्ञानविशेषैः प्रतिपूर्ण एव भवति, सुरक्षितश्च प्रवचनाधारतया, यत उक्तम्-"जेन कुलं आयत्तं तं पुरिसं आयरेण रक्खेह" इत्यादीति सूत्रार्थः ॥ अपि च-

मू. (३५४) *जहा सा दुमान पवरा, जंबूनाम सुंदसणा।*
अनाढियस्स देवस्स, एवं हवइ बहुस्सए ॥

वृ. यथा सा द्रुमानां मध्ये प्रवरा-प्रधाना जम्बूः नाम्ना-अभिधानेन सुदर्शना नाम सुदर्शना, न हि यथेयममृतोपमफला देवाद्याश्रयश्च तथाऽन्यः कश्चिद् द्रुमोऽस्ति, द्रुमत्वं फलव्यवहार-श्चास्यास्तत्प्रतिरूपतयैव, वस्तुतः पार्थिवत्वेनोक्तत्वात्, वज्रवैडूर्यादिमयानि हि तन्मूलादीनि तत्र तत्रोक्तानि, सा च कस्येत्याह-'अनादृतस्य' अनादृतनाम्नो 'देवस्य' जम्बूद्वीपाधिपते-र्व्यन्तरसुरस्य आश्रयत्वेन सम्बन्धिनी, एवं भवति बहुश्रुतः, सोऽपि ह्यमृतोपमफलकल्पश्रुता-न्वितो देवादीनामपि च पूज्यतयाऽभिगमनीयः शेषद्रुमोपमसाधुषु च प्रधान इति सूत्रार्थः ॥

मू. (३५५) *जहा सा नईण पवरा, सलिला सागरंगमा।*
सीया नीलवंतपवहा, एवं हवइ बहुस्सए ॥

वृ. यथा सा 'नदीना' सरितां 'प्रवरा' प्रधाना सलिलं-जलमस्यामस्तीति, अर्शआ-देराकृतिगणत्वादचिसलिला-नदी, सागरं-समुद्रं गच्छतीति सागरङ्गमा-समुद्रपातिनित्यर्थः, न तु क्षुद्रनदीवदपान्तराल एव विशीर्यते, 'शीता' शीतानाम्नी, नीलवान्-मेरोरुत्तरस्यां दिशि वर्षधरपर्वतस्ततः प्रभवति पाठान्तरतः प्रवहति वा नीलवत्प्रभवा नीलवत्प्रवहा वा, 'एवं' शीतानदीवद्भवति बहुश्रुतः, असावपि हि सरितामिवान्यसाधूनामशेषश्रुतज्ञानिनां वा मध्ये प्रधानो विमलजलकल्पश्रुतज्ञानान्वितश्च, तथा सागरमिव मुक्तिमेवासौ गच्छति, तदुचितानुष्ठान एवास्य प्रवृत्तत्वात्, न ह्यन्यदर्शनिनामिव देवादिभव एवास्य विवेकिनो वाञ्छा, तथा च कथमस्य तेषामिव प्रायोऽपान्तरालावस्थानं?, नीलवत्तुल्याच्च उच्छ्रितोच्छ्रितमहाकुलादेवास्य प्रसूतिः, कथमिवान्यथैवंविधयोग्यतासम्भव इति सूत्रार्थः ॥ किञ्च-

मू. (३५६) *जहा से नगाण पवरे, सुमहं मंदरे गिरि।*
नानोसहीपज्जलिए, एवं हवइ बहुस्सुए ॥

वृ. यथा स 'नगानां' पर्वतानां मध्ये 'प्रवरः' अतिप्रधानः 'सुमहान्' अतिशयगुरुरत्युच्च इतियावत्, 'मन्दरः' मन्दराभिधानः, कः पुनरसौ? इत्याह-'गिरिः, किमुक्तं भवति?-मेरु-पर्वतः, 'नानौषधिभिः' अनेकविधविशिष्टमाहात्म्यवनस्पतिविशेषरूपाभिः प्रकर्षेण ज्वलितो-दीप्तः नानौषधिप्रज्वलितः, ता ह्यतिशायिन्यः प्रज्वलन्त्य एवासत इति तद्योगादसावपि प्रज्वलित इत्युक्तः, यद्वा-प्रज्वलिता नानौषाधयोऽस्मिन्निति प्रज्वलितनानौषधिः, प्रज्वलितशब्दस्य तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परनिपातः प्राग्वत्, 'एवम्' इति मन्दरवत् भवति बहुश्रुतः, श्रुतमाहात्म्येन ह्यसावत्यन्तस्थिर इति शेषगिरिकल्पापरस्थिरसाध्वपेक्षया प्रवर एव भवति, तथाऽन्धकारेऽपि प्रकाशनक्त्यन्विता आमर्षौषध्यादयस्तत्रातिप्रतीता एवेति सूत्रार्थः ॥ किं बहुना ?-

मू. (३५७) जहा से सयंभूरमणे, उदही अक्खओदए।
नानारयणपडिपुन्ने, एवं भवइ बहुस्सुए।

वृ. यथा स 'स्वम्भूरमणः' स्वयम्भूरमणाभिधानः 'उदधिः' समुद्रः अक्षयम्-अविनाश्यु- दकं-जलं यस्मिन् स तथा, नानारत्नैः-नानाप्रकारैर्मरकतादिभिः प्रतिपूर्णो-भृतः नानारत्नप्रति- पूर्णः, एवं भवति बहुश्रुतः, अयमपि ह्यक्षयसम्यग्ज्ञानोदको नानाऽतिशयरत्नवांश्च भवति, यदिवाऽक्षत उदयः-प्रादुर्भावो यस्य सोऽक्षतोदय इति सूत्रार्थः ॥ साम्प्रतमुक्तगुणानुवादतः फलोपदर्शनतश्च तस्यैव माहात्म्यमाह-

मू. (३५८) समुद्दगंभीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया।
सुयस्स पुन्ना विउलस्स ताइणो, खवेत्तु कम्मं गइमुत्तमं गया॥

वृ. 'समुद्दगंभीरसम' त्ति आर्षत्वाद्गाम्भीर्येण-अलब्धमध्यात्मकेन गुणेन समा गाम्भीर्य- समाः समुद्रस्य गाम्भीर्यसमाः समुद्रगाम्भीर्यसमाः, 'दुरासय' त्ति दुःखेनाश्रीयन्ते-अभिभव- बुद्ध्याऽऽसाद्यन्ते वा-जेतुं सम्भाव्यन्ते केनापीति दुराश्रया दुरासदा वा, अत एव 'अचिक्किय' त्ति अचकिताः-अत्रासिताः, 'केनचिदि' ति परीषहादिना परप्रवादिना वा, तथा दुःखेन प्रधर्ष्यन्ते- पराभूयन्ते केनापीति दुष्प्रधर्षास्त एव दुष्प्रधर्षकाः, क एवंविधाः ? इत्याह-'सुयस्स पुन्ना विउलस्स' त्ति-सुब्व्यत्ययाच्छ्रुतेन-आगमेन पूर्ण्णाः-परिपूर्णा विपुलेन-अङ्गानङ्गादिभेदतो विस्तीर्णेन तायिनः त्रायिणो वा, एवंविधाश्च बहुश्रुता एव, तानेव फलतो विशेषयितुमाह- 'क्षपयित्वा' विनाश्य 'कर्म्म' ज्ञानावरणादि, गम्यत इति गतिस्ताम्, 'उत्तमां' प्रधानां, मुक्ति- मितियावत्, 'गताः' प्राप्ताः, उपलक्षणत्वाद्गच्छन्ति गमिष्यन्ति च। इह चैकवचनप्रक्रमेऽपि बहुवचननिर्देशः, पूज्यताख्यापनार्थं व्याप्तिप्रदर्शनार्थं चेति सूत्रार्थः ॥ इत्थं बहुश्रुतस्य गुणवर्णनात्मिकां पूजामभिधाय शिष्योपदेशमाह-

मू. (३५९) तम्हा सुयमहिट्ठेज्जा, उत्तमट्ठगवेसए।
जेनऽप्पाणं परं चेव, सिद्धिं संपाउणिज्जासि॥ त्तिबेमि

वृ. यस्मादमी मुक्तिगमनावसाना बहुश्रुतगुणाः तस्मात् 'श्रुतम्' आगमम् 'अधितिष्ठेत्' अध्ययनश्रवणचिन्तनादिनाऽऽश्रयेत्, उत्तमः-प्रधानोऽर्थः-प्रयोजनम्-उत्तमार्थः, स च मोक्ष एव तं 'गवेषयति' अन्वेषयतीति उत्तमार्थगवेषकः, येन किं स्यादित्याह-'येन' श्रुताश्रवणेन 'आत्मानं' स्वं 'परं' चान्यं तपस्व्यादिकं 'एवः' अवधारणे भिन्नक्रमश्च सम्प्रापयेदित्यस्यानन्तरं द्रष्टव्यः, ततः 'सिद्धिं' मुक्तिगतिं 'संपाउणिज्जासि' त्ति सम्यक् प्रापयेदेव, नेह कश्चित् सन्देह इति सूत्रार्थः ॥ 'इतिः' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि पूर्ववदेव ॥

अध्ययनं - ११ समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता उत्तराध्ययन सूत्रे एकादश अध्ययनस्य भद्रबाहुस्वामि विरचिता निर्युक्तिः एवं शान्त्याचार्य विरचिता टीका परिसमाप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययनं - १२- हरिकेशीय

वृ. व्याख्यातमेकादशमध्ययनमधुना द्वादशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने बहुश्रुतपूजोक्ता, इह तु बहुश्रुतेनापि तपसि यत्नो विधेय इति ख्यापनार्थं तपःसमृद्धिरुपवर्ण्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चतुरनयोगद्वारचर्च्चा प्रागवत् तावद्यावन्नामनिष्पन्ननिक्षेपेऽस्य हरिकेशीयमिति नाम, अतो हरिकेशनिक्षेपमाह निर्युक्तिकृत्-

नि.[३१८] नामं ठवणादविए० ॥

नि.[३१९] जाणयसरीरभविए० ॥

नि.[३२०] हरिएसनामगोअं वेअंतो भावओ अ हरिएसो ।
तत्तो समुट्ठियमिणं हरिए सिज्जंति अज्झयणं ॥

वृ. हरिकेशे निक्षेपश्चतुर्विधो नामादिः, तत्र नामस्थापने क्षुन्ने, द्विविधो भवति 'द्रव्ये' द्रव्यविषयः-आगमनोआगमतश्च, तत्र आगमतो ज्ञाताऽनुपयुक्तो, नोआगमतश्च स त्रिविधो-ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तश्च, स पुनः त्रिविधः-एवभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, हरिकेशनामगोत्रं वेदयन् भावतस्तु हरिकेश उच्यते, ततोऽभिधेयभूतात् समुत्थिमिदं हरिकेशीयं इत्यध्ययनमुच्यते इति शेषः, इति गाथात्रयार्थः ॥ सम्प्रति हरिकेशवक्तव्यतामाह निर्युक्तिकृत्

नि.[३२१] पुव्वभवे संखस्स उ जुवरन्नो अंतिअं तु पव्वज्जा ।
जाईमयं तु काउं हरिएससकुलंमि आयाओ ॥

नि.[३२२] महुराए संखो खलु पुरोहिअसुओ अ गयउरे आसी ।
दट्ठूण पाडिहेरं हुयवहरत्थाइ निक्खंतो ॥

नि.[३२३] हरिएसा चंडाला सोवाग मयंग बाहिरा पाणा ।
साणधणा य मयासा सुसाणवित्ती य नीया य ॥

नि.[३२४] जम्मं मयंगतीरे वाणारसिगंडिंतिंदुगवनं च ।
कोसलिएसु सुभद्दा इसिवंता जन्नवाडंमि ॥

नि.[३२५] बलकुट्टे बलकोट्टो गोरी गंधारि सुविनगवसंतो ।
नामनिरुत्ति छणसप्प संभवो दुंदुहे बीओ ॥

नि.[३२६] भद्दएणेव होअव्वं पावइ भद्दाणि भद्दओ ।
सविसो हम्मए सप्पो, भेरुंडो तत्थ मुच्चइ ॥

नि.[३२७] इत्थीण कहित्थ वट्टई, जनवयरायकहित्थ वट्टई ।
पडिगच्छह रम्म तिंदुअं, अइसहसा बहुमुंडिए जने ॥

वृ. एतदक्षरार्थः सुगम एव, नवरं 'अंतियं तु' इति अन्तिके-सपीमे, 'तुः' पूरणे, 'पाडिहेरं'ति प्रतिहारो-दौवारिकस्तद्वत्सदा सन्निहितवृत्तिर्देवताविशेषोऽपि प्रतिहारस्तस्य कर्म्म प्रातिहार्यं, तच्चेह हुतवहरथ्यायाः शीतलत्वं, तथा हरिकेशाश्चाण्डालाः, श्वपाकाः मातङ्गा बाह्याः पाणाः श्वधनाश्च मृताशाः श्मशानवृत्तयश्च नीचाश्चेत्येकार्थिकाः, तथा 'मयङ्गतीरे'त्ति मृतेव मृता विवक्षितभूदेशे तत्कालाप्रवाहिणी सा चासौ गङ्गा च मृतगङ्गा तस्यास्तीरं तस्मिन् ऋषिवन्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋषित्यक्ता, तथा भद्र एव भद्रको यो न कस्यचिदशुभे प्रवर्त्तते, भद्राणी-कल्याणनि, तथा स्त्रीणां कथा तासां नेपथ्याभरणभाषादिविषया 'अत्र' अस्मिन् यत्याश्रमे प्रवर्त्तते, 'जनव यरायकह'त्ति जनपदकथा मालवकादिदेशप्रशंसानिन्दात्मिका राजकथा च राज्ञां शौर्यादिगुणवर्ण्णनादिरूपा, 'पडिगच्छह'त्ति तिंव्यत्ययात् प्रतिगच्छामो-निवत्तावहे, 'अयी'त्यामन्त्रणे 'सहसे'त्यपर्यालोच्य, कोऽर्थः ?-अपरीक्षितयोग्यताविशेषो, 'बहुर्मुण्डितो जनो' मुण्डमात्रेणैव गृहीतदीक्षः प्रायो जनो, गृहीतभावदीक्षस्तु स्वल्प एवेति भावः।

तथेहाद्यगाथाय एव पादद्वयं द्वितीयगाथया स्पष्टीकृतं, ततस्तृतीयपादः स्पष्ट एवेति, शेपगाथाभिश्चतुर्थपादस्य पर्यायदर्शनतस्तत्सूचितार्थाभिधानतश्चाभिव्यञ्जनं। भावार्थस्तु कथा-नकादवसेयः, तत्र च सम्प्रदायः-महुराए नयरीए संखो नाम जुवराया, सो धम्मं सोउं पव्वतितो, विहरंतो य गयउरं गओ। तहिं च भिक्खं हिंडंतो एगं रत्थं पत्तो, सा य किर अतीव उण्हा मुम्मुरसमा, उण्हकाले न सक्कति पुरोहियपुत्तो पुच्छतितो-एसा रत्था निव्वहति ?, सो पुरोहियस्स पुत्तो चिंतेति-

एस डज्झउत्ति निव्वहति इइ वुत्तं, सो पट्ठिओ, इयरो य अलिंदट्ठिओ पेच्छति अतुरियाए गईए वच्चंतं तं, सो आसंकाए उइन्नो तं रत्थं, जाव सा तस्स तवप्पभावेणं सीतीभूया, आउट्टो-अहो इमो महातवस्सी मए आसादितो, उज्जाणट्ठियं गन्तुं भणति-भगवं! मए पावकम्मं कयं, कहं वा तस्स मुंचेज्जामि ?, तेन भण्णति-पव्वयह, पव्वइतो, जातिमयं रूवमय च काउं मओ, देवलोगगमनं, चुओ संतो मयगंगाए तीरे बलकोट्टा नाम हरिएसा, तेसिं अहिवई बलकोट्टो नाम, तस्स दुवे भारियाओ-गोरी गंधारी य, गोरीए कुच्छिसि भण्णति-महप्पा ते पुत्तो भविस्सति, समएण पसूया, दारगो जाओ कालो विरूओ पुव्वभवजाइरूवमयदोसेणं, बलकोट्टेसु जाउत्ति बलो से नामं कयं, भंडणसीलो असहणो।

अन्नया ते छणेण समागया भुंजंति सुरं च पिबंति, सोऽवि अप्पियणियं करेइत्ति निच्छूढो अच्छति समंतओ पलोएंतो, जाव अही आगतो, उट्ठिया सहसा सव्वे, सो अही नेहिं मारिओ, अन्नमुहुत्तस्स भेरुंडसप्पो आगतो, भेरुंडो नाम दिव्वगो, भीया पुनो उट्ठिया, नाए दिव्वगो-त्तिकाऊण मुक्को, बलस्स चिंता जाया-अहो सदोसेण जीवा किलेसभागिणो भवंति-तम्हा-

"भद्दएणेव होयव्वं, पावति भद्दाणि भद्दओ।
सविसो हम्मति सप्पो, भेरुंडो तत्थ मुच्चति॥"

एयं चिंतेंतो संबुद्धो पव्वतिओ। विहरंतो वाणारसिं गओ, उज्जाणं तेंदुयवणं, तेंदुगं नाम जक्खाययणं, तत्थ गंडीतेंदुगो नाम जक्खो परिवसति, सो तत्थ अनुन्नवेउं ठितो, जक्खो उवसंतो, अन्नो जक्खो अन्नहिं वणे वसति, तत्थवि अन्ने बहू साहूणो ठिया, सो य गंडीजक्खं पुच्छति-न दीससि ?, पुणाइं तेन भणियं-साहुं पज्जुवासामि, तत्थ य तेंदुएण दिट्ठो, सोऽवि उवसंतो, सो भणति-ममवि उज्जाणे बहवे साहू ठिया, एहि पासामो, ते गया, तेऽपि समावत्तीए साहुणो विकहमाना अच्छंति, ततो सो जक्खो इमं भणति-

"इत्थीण कहऽत्थ वट्टइ, जनवयरायकहत्थ वट्टई।
पडिगच्छह रम्म तेंदुगं, अइसहसा बहुमुंडिए जने॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया जक्खाययणं कोसलियरायधूया भद्दा नाम पुप्फधूवमादी गहाय अच्चिरं निग्गया पयाहिणं करेमाना तं दट्ठूण कालं विगरालं छित्तिकाऊण निट्ठूहति, जक्खेण रुट्ठेण अन्नइट्ठा काय, नीया नीयघरं, आवेसिया भणति ते-नवरं मुंचामि जइ नं तस्सेव देह, तं च साहति-जहा एईए सो साहू ओदूढो, रन्नावि जीवउत्तिकाऊण दिन्ना, महत्तरियाहिं समं तत्थाणीया, रत्तिं ताहिं भण्णति-वच्च पतिसगासंति, पविट्ठा जक्खाययणं, सो पडिमं ठिओ नेच्छति, ताहे जक्खोवि इसिसरीरं छाइऊण दिव्वरूवं दंसेति, पुणो मुणिरूवं, एवं सव्वरत्तिं वेलंबिया, पभाए नेच्छएत्ति काऊणं पविसंती सघरं पुरोहिएण राया भणिओ-एसा रिसिभज्जा बंभणाणं कप्पइत्ति, दिन्ना तस्सेव। सो य जन्ने दिक्खिज्जिउकामो सा अन्नेन लद्धा, सावि जन्नपत्तित्तिकाऊण दिक्खिया।

इत्युक्तः सम्प्रदायोऽवसतिश्च नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्यावसरः, स च सूत्रे सति सम्भवत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (३६०) *सोवगकुलसंभूओ, गुणुत्तरधरो मुनी।*
हरिएस बलो नाम, आसि भिक्खू जिइंदिओ॥

वृ. श्वपाकाः-चाण्डालास्तेषां कुलम्-अन्वयस्तस्मिन् सम्भूतः-समुत्पन्नः श्वपाककुल-सम्भूतः, तत्किं तत्कुलोत्पत्त्यनुरूप एवायमुत नेत्याह-गुणेषूत्तराः-प्रधाना गुणोत्तराः-ज्ञानादयः तान् धारयति गुणोत्तरधरः, पठन्ति च-'अनुत्तरधरे'त्ति, तत्र न विद्यते उत्तरम्-अन्यत्प्रधानमेषा-मित्यनुत्तराः, ते च प्रक्रमात्प्रकर्षप्राप्ता ज्ञानादय एव गुणास्तान् धारयत्यनुत्तरोधरो, यद्वा अनुत्तरान् गुणान् धारयतीत्यनुत्तरधर इति मयूरव्यंसकादिषु द्रष्टव्यो, मुणति-प्रतिजानीते सर्व्वविरतिमिति मुनिः, श्वपाककुलोत्पन्नोऽपि कदाचित्संवासादिनाऽन्यथैव प्रतीतः स्यादत आह-हरिकेशः सर्वत्र हरिकेशतयैव प्रतीतो बलो नाम-बलाभिधानः आसद्-अभूत, तस्य च मुनित्वं प्रतिज्ञा-मात्रेणापि स्यादत आह-'भिक्खू'त्ति भिनत्ति-यथाप्रतिज्ञातेनानुष्ठानेन क्षुधमष्टविधं वा कर्म्मेति भिक्षुः, अत एव जितानि-वशीकृतानीन्द्रियाणि-स्पर्शनादीन्यनेनेति जितेन्द्रिय इति सूत्रार्थः॥

मू. (३६१) *इरिएसणभासाए, उच्चारसमिईसु य।*
जओ आयाणनिक्खिवे, संजओ सुसमाहिओ॥

वृ. ईरणमीर्य्या एष्यत इत्येषणा अनयोर्द्वन्द्वस्ततस्ताभ्यां सहिता भाष्यत इति भाषा ईर्येषणा-भाषेति मध्यमपदलोपी समासः, तस्यां, तथा उच्चारं-पुरीषपरिष्ठापनमषीहोच्चार उक्तः, प्रश्रवणपरिष्ठापनोपलक्षणं चैतत्, तद्विषया समितिः-सम्यग्गमनं, तत्र सम्यक्प्रवर्त्तनमितियावत्, उच्चारसमितिः, तस्यां च, यतत इति यतो-यत्नवान्, तथा आदानं च-ग्रहणं पीठफलकादे-र्निक्षेपश्च-स्थापनं तस्यैव आदाननिक्षेपं, तत इहापि चकारानुवृत्तेस्तस्मिंश्च, इह च 'उच्चार-समिएसु'त्ति एकत्वेऽपि बहुवचनं सूत्रत्वात्, समितिशब्दश्च मध्यव्यवस्थितो डमरुक-मणिरिवाद्यन्तयोरपि सम्बध्यते, ततश्च ईर्यासमितावेषणासमितौ भाषासमितावादाननिक्षेप-समिताविति योज्यं, यद्वा ईर्येषणाभाषोच्चारमितिष्वत्येकमेव पदं, 'भासाए' इति च एकारोऽ-लाक्षणिकः, स चैवं कीदृगित्याह-संयतः-संयमान्वितः सुसमाहितः- सुष्ठुसमाधिमानिति सूत्रार्थः॥ तथा-

मू. (३६२) *मनगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्खट्ठा बंभइज्जंमि, जन्नवाडमुवट्ठिओ ॥

वृ.मनोगुप्त्या-मनोनियन्त्रणात्मिकया गुप्तः-संवृतो मनोगुप्तो, मध्यमपदलोपी समासः, मनो गुप्तमस्येति वा मनोगुप्तः, आहिताग्न्यादित्वाच्च गुप्तशब्दस्य परनिपातः, एवं वाग्गुप्तो-निरुद्धवाक्प्रसरः, कायगुप्तः, असत्कायक्रियाविकलो, जितेन्द्रियः प्राग्वत्, पुनरुपादानमस्य कादाचित्कत्वनिराकरणार्थमतिशयख्यापनार्थं वा, 'भिक्षार्थं' भिक्षानिमित्तं, न तु निष्प्रयोजनमेव, निष्प्रयोजनगमनस्यागमे निषिद्धत्वात्, 'बंभइज्जंमि'त्ति ब्रह्मणां-ब्राह्मणानामिज्या-यजनं यस्मिन् सोऽयं ब्रह्मेज्यस्तस्मिन्, 'जन्नवाडं'ति यज्ञवाटे यज्ञपाटे वा 'उपस्थितः' प्राप्त इति सूत्रार्थः ॥ त च तत्राऽऽयान्तमवलोक्य तत्रत्यलोका यदकुर्व्वस्तदाह-

मू. (३६३) *तं पासिऊणमिज्जंतं, तवेण परिसोसियं ।*
पंतोवहिउवगरणं, उवहसंति अनारिया ॥

वृ. 'त'मिति बलनामानं मुनिं 'पासिऊणं'ति दृष्ट्वा-निरीक्ष्य 'एज्जंत'न्ति आयान्तमा-गच्छन्तं तपसा-षष्ठाष्टमादिरूपेण परि-समन्ताच्छोषितम्-अपचितीकृतमांसशोणितं कृशीकृत-मितियावत् परिशोषितं, तथा प्रान्तं-जीर्णमलीनत्वादिभिरसारमुपधिः-वर्षाकल्पादिः स एव च उपकरणं-धर्म्मशरीरोपष्टम्भहेतुरस्येति प्रान्तोपध्युपकरणस्तं, यद्वोपधिः स एवोपकरणम्-औपग्रहिकं, द्वन्द्वगर्भश्च बहुब्रीहिः, 'उवहसंति'त्ति उहसन्ति आर्याः-उक्तनिरुक्ता न तथा अनार्याः, यद्वा अनार्या-म्लेच्छाः, ततश्च साधुनिन्दादिना अनार्या इव अनार्या इति सूत्रार्थः ॥

कथं पुनरनार्याः ?, कथं चोपहसितवन्तस्ते ? इत्याह-

मू. (३६४) *जाइमयं पडिथद्धा, हिंसगा अजिइंदिया ।*
अबंभचारिणो बाला, इमं वयणमब्बवी ॥

मू. (३६५) *कयरे आगच्छई दित्तरूवे ?, काले विकराल फुक्कनासे ।*
ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिय कंठे ॥

वृ. जातमिदो-जातिदर्प्पो यदुत ब्राह्मण वयमिति तेन प्रतिस्तब्धाः पाठान्तरतः प्रतिबद्धा वा ये ते तथाप 'हिंसकाः' प्राण्युपमर्द्दकारिणः 'अजितेन्द्रिया' न वशीकृतस्पर्शनादयोऽत एवाब्रह्म-मैथुनं तच्चरितुं-आसेवितुं शीलं धर्म्मो वा येषां तेऽमी अब्रह्मचारिणो, वर्ण्यते हि तन्मते मैथुनमपि-

"धर्म्मार्थं पुत्रकामस्य, स्वदारेष्वधिकारिणः ।
ऋतुकाले विधानेन, तत्र दोषो न विद्यते ॥"

तथा 'अपुत्रस्य गतिर्नास्ती'त्यादि, अत एव वाला इव बालक्रीडितानुकारिष्वग्निहोत्रादिषु तत्प्रवृत्तेः, उक्तं हि केनचिद्-"अग्निहोत्रादिकं कर्म, बालक्रीडेति लक्ष्यते" ईदृशास्ते किमि-त्याह-'इदं' वक्ष्यमानलक्षणं 'वचनं' वचः 'अब्बवि'त्ति आर्षत्वाद्वचनव्यत्ययेन अब्रुवन-उक्तवन्तः । किं तदित्याह-'कयरे'त्ति कतरः, एकारस्तु प्राकृतत्वात्, तथा च तल्लक्षणं-'ए होति अयारंते' इत्यादि, एवमन्यत्रापि, आगच्छति-आयाति, पठ्यते च-'को रे आगच्छइ'त्ति, ते ह्यन्योऽन्यमाहुः-कोऽयमीदृक् 'रे' इति लघोरामन्त्रणं साक्षेपवचनेषु च दृश्यते, 'दित्तरूवे'त्ति दीप्तं रूपमस्येति दीप्तरूपः, दीप्तवचनं त्वतिवीभत्सोपलक्षकम्, अत्यन्तदाहिषु स्फोटके शीतल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कव्यपदेशवत्, विकृततया वा दुर्दर्शमिति दीप्तमिव दीप्तमुच्यते, कालो वर्णतो विकरालो दन्तुरतादिना भयानकः पिशाचवत् स एव विकरालकः 'फोक्क'त्ति देशीपदं, ततश्च फोक्का-अग्रे स्थूलोन्नता च नासाऽस्येति फोक्कनासः अवमानि-असाराणि लघुत्वजीर्णत्वादिना चेलानि-वस्त्राण्यस्येत्यवमचेलकः, पांशुना-रजसा पिशाचवद्भूदतो-जातः पांशुपिशाचभूतः गमकत्वात्समासः, पिशाचो हि लौकिकानां दीर्घश्मश्रुनस्वरोमा पुनश्च पांशुभिः समविध्वस्त इष्टः,

ततः सोऽपि निष्परिकर्म्मतया रजोदिग्धदेहतया चैवमुच्यते, 'संकरे'ति सङ्करः, स चेह प्रस्तावात्तृणभस्मगोयमाङ्गारादिमीलक उक्कुरुडिकेतियावत् तत्र दुष्यं-वस्त्र सङ्करदुष्यं, तत्र हि यदत्यन्तनिष्कटं निरुपयोगी तल्लोकैरुत्सृज्यते, ततस्तत्प्रायमन्यदपि तथोक्तं, यद्वा उज्झितधर्म्मकमेवासौ गृह्णातीत्येवमभिधानं, 'परिहरिय'त्ति परिवृत्त्य, निक्षिप्येत्यर्थः क्व?-'कण्ठे' गले, स ह्यनिक्षिप्तोपकरण इति स्वमुपधिमुपादायैव भ्राम्यति, अत्र कण्ठैकपार्श्वः कण्ठशब्द इति कण्ठे परिवृत्त्येत्युच्यत इति सूत्रद्वयार्थः ॥

इत्थं दूरादागच्छन्नुक्तः, सन्निकृष्टं चैनं किमूचुरित्याह-

मू. (३६६) कयरे तुम इय अदंसणिज्जे?, काए व आसा इहमागओऽसि?।
ओमचेलगा पंसुपिसायभूया, गच्छ क्खलाहि किमिहं ठिओऽसि॥

वृ. कतरस्त्वं, पाठान्तरश्च-को रे त्वम्, अधिक्षेपे रेशब्दः 'इती' त्येवमदर्शनीयो-द्रष्टुमनर्हः, 'कया वा' किंरूपया वा?, 'आसा इहमागओऽसि'त्ति 'अचां' सन्धिलोपौ बहुल' मितिवचनादेकारलेपो, मकारश्चागमिकः, तत आशया-वाञ्छया 'इह' अस्मिन्यज्ञपट्टके आगतः-प्राप्तोऽसि-भवसि, अबमचेलकः पांसुपिशाचभूत इति च प्राग्वत्, पुनरनयोरुपादानमत्यन्ताधिक्षेपदर्शनार्थं, गच्छ-प्रव्रज, प्रक्रमादितो यज्ञवाटकात्, 'खलाहि'त्ति देशीपदमपसरेत्यस्यार्थे वर्त्तते, ततोऽयमर्थः-अस्मद्दृष्टिपथादपसर, तथा किमिह स्थितोऽसि त्वं?, नैवेह त्वया स्थातव्यमिति भाव इति सूत्रार्थः ॥ एवमधिक्षिप्तेऽपि तस्मिन् मुनौ प्रशमपरतया किञ्चिदप्यजल्पति तत्सान्निध्यकारी गण्डीतिन्दुकयक्षो यदचेष्टत तदाह-

मू. (३६७) जक्खो तहिं तिंदुयरुक्खवासी, अनुकंपओ तस्स महामुनिस्स।
पच्छायइत्ता नियगं सरीरं, इमाइं वयणाइं उदाहरित्था॥

वृ. यक्षो-व्यन्तरविशेषः, तस्मिन् अवसर इति गम्यते, तिन्दुको नाम वृक्षस्तद्वासी, तथा च सम्प्रदायः-तस्स तिंदुगवणस्स मज्झे महंतो तिंदुगरुक्खो, तहिं सो वसति, तस्सेव हेट्ठा चेइयं, जत्थ सो साहू चिट्ठति। 'अनुकंपउ'त्ति अनुशब्दोऽनुरूपार्थे ततश्चानुरूपं कम्पते-चेष्टत इत्यनुकम्पकः-अनुरूपक्रियाप्रवृत्तिः, कस्येत्याह-'तस्य' हरिकेशबलस्य 'महामुनेः' प्रशस्यतपस्विनः 'प्रच्छाद्य' प्रकर्षेणावृत्य निजकम्-आत्मीयं शरीरं, कोऽभिप्रायः? -तपस्वीशरीर एवाशिष्य स्वयमनुपलक्ष्यः सन्निमानि-वक्ष्यमानानि 'वचनानि' वचांसि 'उदाहरित्थ'त्ति उदाहार्षीदुदाहृतवानित्यर्थः, इति सूत्रार्थः ॥ कानि पुनस्तानि?, इत्याह-

मू. (३६८) समणो अहं संजउ बंभयारी, विरओ धनपयणपरिग्गहाओ।
परप्पवित्तस्स उ भिक्खकाले, अन्नस्स अट्ठा इहभागओमि॥

वृ. श्रमणो-मुनिः 'अह' मित्यात्मनिर्देशः, किमभिधानत एवेत्याशङ्क्याह-सम्यग् यतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयतः-असद्व्यापारेभ्य उपरतः, अत एव च ब्रह्मचारी-ब्रह्चर्यवान्, तथा विरतो निवृत्तः, कुतो ?-धनं च पचनं च परिग्रहश्च धनपचनपरिग्रहमिति समाहारः तस्मात्, तत्र धनं चतुष्पदादि पचनमाहारनिष्पादनं परिग्रहो द्रव्यादिषु मूर्च्छा, अत एव च परस्मै प्रवृत्तंपरैः स्वार्थं निष्पादितत्वेन परप्रवृत्तं तस्य, तुरवधारणे, ततः परप्रवृत्तस्यैव, न तु मदर्थं साधितस्येति भावः, 'भिक्षाकाले' भिक्षाप्रस्तावे, कदाचिदकालोऽयं ब्रूयादित्येवमुक्तं, 'अन्नस्य' अशनस्य 'अट्ठ'त्ति सूत्रत्वादर्थाय, भोजनार्थमिति भावः, 'इह' अस्मिन् यज्ञवाटके आगतोऽस्मि, अनेन यदुक्तं-कतर त्वं किमिहागतोऽसि ?, तत्प्रतिवचनमुक्तम्, एवमुक्ते च ते कदाचिदभिदध्युः-नेह किञ्चित् कस्मैचिद्दीयते न वा देयमस्त्यत आह-

मू. (३६९) वियरिज्जइ खज्जइ भुज्जइ य, अन्नं पभूयं भवयाणमेयं।
जाणाहि मे जायणजीविनुत्ति, सेसावसेसं लहओ तवस्सी ॥

वृ. 'वितीर्यते' दीयते दीनानाथादिभ्यः खाद्यते खण्डखाद्यादि, भुज्यते च भक्तसूपादि, अद्यत इत्यन्नं स सर्व्वमपि सामान्येनोच्यते, तदप्यल्पमेव स्यादत आह-'प्रभूतं' बहु, प्रभूतमपि परकीयमेव स्यात्, अत आह-'भवतां' युष्माकमेव सम्बन्धि 'एतदि'ति प्रत्यक्षं, तथा च 'जानीत' अवगच्छत 'मे'त्ति सूत्रत्वानां 'जायणजीविनो'त्ति याचनेन जीवनं-प्राणधारणमस्येति याचन जीवनं, आर्षत्वादिकारः, पठ्यते च-'जायणजीवणो'त्ति, इतिशब्दः स्वरूपपरामर्शकः, तत एवंस्वरूपं, यतश्चैवमतो मह्यमपि ददध्वमिति भावः, कदाचिदुत्कृष्टमेवासौ याचत इति तेषामाशयः स्यादत आह, अथवा जानीत मां याचनजीविनं-याचनेन जीवनशीलं, द्वितीयार्थे षष्ठी, पाठान्तरे तु प्रथमा, 'इती'त्यस्माद्धेतोः, किमित्याह-शेषावशेषम्-उद्धरितस्याप्युद्धरितम्, अन्तप्रान्तमित्यर्थः, लभतां-प्राप्नोतु, तपस्वी-यतिर्वराको वा भवदभिप्रायेण, अनेनात्मानं निर्द्दिर्शतीति सूत्रद्वयार्थः ॥ एवं यक्षेणोक्ते यज्ञवाटवासिनः प्राहुः-

मू. (३७०) उवक्खडं भोयण माहणाणं, अत्तट्ठियं सिद्धमिहेगपक्खं।
न ऊ वयं एरिसमन्नपाणं, दाहामु तुज्झं किमिहं ठिओऽसि ? ॥

वृ. 'उपस्कृतं' लवणवेसवारादिसंस्कृतं 'भोयण'त्ति भोजनं माहनानां-ब्राह्मणानां आत्मनोऽर्थः आत्मार्थस्तस्मिन् भवमात्मार्थिकं, ब्राह्मणैरप्यात्मनैव भोज्यं न त्वन्मस्मै देयं, किमिति ?, यतः सिद्धं-निष्पन्नं 'इह' अस्मिन् यज्ञे एकः पक्षो-ब्राह्मणलक्षणो यस्य तदेकपक्षं, किमुक्तं भवति ?-यदस्मिन्नुपस्क्रियते न तद्ब्राह्मणव्यतिरिक्तायान्यस्मै दीयते, विशेषतस्तु शूद्राय, यत उक्तम्-

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविः कृतम्।
न चास्योपदिशेद् धर्मं, न चास्य व्रतमादिशेत् ॥"

यतश्चैवमतो 'न तु' नैव वयभीदृशमुक्तरूपं अन्नं च-ओदानादि पानं च -द्राक्षापानाद्यन्नपानं 'दाहामो'त्ति दास्यामः 'तुज्झं'ति तुभ्यं, किमिह स्थितोऽसि ?, नैवेहावस्थितावपि तव किञ्चिदिति भाव इति सूत्रार्थः ॥ यक्ष आह-

मू. (३७१) थलेसु बीयाइं वयंति कासया, तहेव निन्नेसु य आससाए।
एयाइ सद्धाइ दलाह मज्झं, आराहए पुन्नमिणं खु खित्तं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'स्थलेषु' जलावस्थितिविरहितेषूच्चभूभागेषु 'बीजानि' गोधूमशाल्यादीनि 'वपन्ति' रोपयन्ति 'कासग'त्ति कर्षकाः कृषीवलाः, 'तथैव' यथोच्चस्थलेष्वेवमेव 'निम्नेषु च' नीच-भूभागेषु च 'आससाए'त्ति आशंसया-यद्यत्यन्तप्रवर्षणां भावि तदा स्थलेषु फलावाप्तिरथान्यथा तदा निम्नेष्वित्येवमभिलाषात्मिकया, एतयेवैतया-एतदुपमया, कोऽर्थः ?-उक्तरूप-कर्षकाशंसातुल्यया 'श्रद्धया' वाञ्छया 'दलाह'त्ति ददध्वं मह्यं, किमुक्तं भवति ?-यद्यपि भवतां निम्नोपमत्वबुद्धिरात्मनि मयि तु स्थलतुल्यताधीः तथापि मह्यमपि दातुमुचितम्, अथ स्याद्-एवं दत्तेऽपि न फलावाप्तिरित्याह-'आराहए पुन्नमिणं खु'त्ति खुशब्दस्यावधारणार्थस्य भिन्नक्रमत्वादाराधयेदेव-समन्तात्साधयेदेव, नात्रान्यथाभावः, 'पुण्यं' शुभमिदं-परिदृश्यमानं क्षेत्रमिव क्षेत्रं पुण्यशस्यप्ररोहहेतुतया, आत्मानमेव पात्रभूतमेवमाह, पठ्यते च-'आराहगा होहिम पुन्नखेत्त'न्ति आराधका-आवर्जका गम्यमानत्वात्पुण्यस्य भवत, अनेन दानफलमाह, कुत एतदित्याह-इदं पुण्यक्षेत्रं-पुण्यप्राप्तिहेतुः क्षेत्रं यत इति गम्यते, इति सूत्रार्थः ॥

यक्षवचनानन्तरं त इदमाहुः-

मू. (३७२) *खित्ताणी अम्हं विइयाणि लोए, जहिं पकिन्ना विरुहंति पुन्ना।*
जे माहणा जाइविज्जोववेया, ताइं तु खित्ताइं सुपेसलाइं॥

वृ.'क्षेत्राणी'ति क्षेत्रोपमानि प्रात्राण्यस्माकं 'विदितानि' ज्ञातानि, वर्तन्त इति गम्यते, 'लोके' जगति 'जहिं'ति वचनव्यत्ययाद्येषु क्षेत्रेषु प्रकीर्णानीव प्रकीर्णानि-दत्तान्यशनादीनि 'विरोहन्ति' जन्मान्तरोपसथानतः प्रादुर्भवन्ति 'पूर्णानि' समस्तानि, न तु तथाविधदोषसद्भावतः कानिचि-देव, स्यादेतद्-अहमपि तन्मध्यवर्त्त्येवेत्याशङ्क्याह-ये 'ब्राह्मणाः' द्विजाः, तेऽपि न नामत एव, किन्तु जातिश्च-ब्राह्मणजातिरूपा विद्या च-चतुर्दशविद्यास्थानात्मिका ताभ्याम् 'उववेय'त्ति उपेता-अन्विता जातिविद्योपेताः, 'ताइं तु'त्ति तान्येव क्षेत्राणि 'सुपेसलाणि'त्ति सुपेशलं नाम शोभनं प्रीतिकरं वा इति वृद्धाः, ततश्च सुपेशलानि-शोभनानि प्रीतिकराणि वा, न तु भवादृशानि शूद्रातीनि, शूद्रजातित्वादेव वेदादिविद्याबहिष्कृतानीति, यत उक्तम्-

"सममश्रोत्रिये दानं, द्विगुणं ब्राह्मणब्रुवे।
सहस्रगुणमाचार्ये, अनन्तं वेदपारगे॥"

इति सूत्रार्थः यक्ष उवाच-

मू. (३७३) *कोहो य मानो य वहो य जेसिं, मोसं अदत्तं च परिग्गहं च।*
ते माहणा जाइविज्जाविहीणा, ताइं तु खित्ताइं सुपावयाइं॥

वृ. 'क्रोधश्च' रोषः 'मानश्च' गर्वः, चशब्दान्मायालोभौ च, 'वधश्च' प्राणिघातो 'येषा'मिति प्रक्रमाद्भवतां ब्राह्मणानां 'मोसं'ति मृषा-अलीकभाषणं 'अदत्त'ति पदेऽपि पदैकदेशस्य दर्शनात्सत्यभामा सत्येतिवत् अदत्तादानमुक्तं, चशब्दान्मैथुनं, 'परिग्रहश्च' गोभूम्यादिस्वी-कारः, अस्तीति सर्वत्र गम्यते, 'ते' इति क्रोधाद्युपेता यूयं ब्राह्मणा जातिविद्याभ्यां विहीना-रहिता जातिविद्याविहीनाः, क्रियाकर्मविभागेन हि चातुर्वर्ण्यव्यवस्था, यत उक्तम्-

"एकवर्णमिदं सर्व्वं, पूर्वमासीद्युधिष्ठिर!।
क्रियाकर्मविभागेन, चातुर्वर्ण्यं व्यवस्थितम्॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्राह्मणो ब्रह्मचर्येण, यथा शिल्पेन शिल्पिकः।
अन्यथा नाममात्रं स्यादिन्द्रगोपककीटवत् ॥२॥

न चैवंविधक्रिया ब्रह्मचर्यात्मिका कोपाद्युपेतेषु तत्त्वतः सम्भवत्यतो न तावज्जातिसम्भवः, तथा विद्यापि सच्छास्त्रात्मिका, सच्छास्त्रेषु च सर्वेष्वहिंसादिपञ्चकमेव वाच्यं, यत उक्तम्-

"पञ्चैतानि पवित्राणि, सर्व्वेषां धर्म्मचारिणाम्।
अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्ज्जनम् ॥"

तद्युक्त्वयं च तत्तज्ज्ञानादेव भवति, ज्ञानस्य तु विरतिः फलं रागाद्यभावश्च, यत उक्तम्-

"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति ? शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ॥"

न चैवमग्न्याद्यारम्भिषु कोपादिमत्सु च भवत्सु विरते रागाद्यभावस्य च सम्भवोऽस्ति, न च निश्चयनयमतेन फलरहितं वस्तु सत्, तथा च निश्चयो यदेवार्थक्रियाकारि तदेव परमार्थ-सदित्याह, ततः स्थितमेतत्-'ताइं तु'त्ति तुरवधारणे भिन्नक्रमश्च, ततश्च तानि भवद्विदितानि ब्राह्मणलक्षणानि क्षेत्राणि सुपापकान्येव, न तु सुपेशलानि, क्रोधाद्युषेतत्वेनातिशयपापहेतुत्वा-दिति सूत्रार्थः ॥ कदाचिते वदेयुः-वेदविद्याविदो वयमत एव च ब्राह्मणजातयस्तत्कथं जाति-विद्याविहीना इत्युक्तावानसीत्याह-

मू. (३७४) तुब्भित्थ भो ! भारहरा गिराणं, अट्ठं न याणाह अहिज्ज वेए।
उच्चावयाइं मुणिणो चरंति, ताइं तु खित्ताइं सुपेसलाइं ॥

वृ.यूयमत्रेति-लोके 'भो' इत्यामन्त्रणे भारं धरन्तीति भारधराः, पाठान्तरतो वा-'भारवहा' वा, कासां ?-'गिरां' वाचां, प्रक्रमाद्वेदसम्बन्धिनीनाम्, इह च भारस्तासां भूयस्त्वमेव, किमिति भारधरा भारवहा वेति उच्यते, यतोऽर्थम् अभिधेयं न जानीथ-नावबुध्यध्वे ?, 'अहिज्ज'त्ति अपेर्गम्यमानत्वादधीत्यापि 'वेदान्' ऋग्वेदादीन्, तथाहि-'आत्मा वा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः" तथा "कर्म्मभिर्मृत्युमृषयो निषेदुः, प्रजावन्तो द्रविनमन्विच्छमानाः, अथापरं कर्म्मभ्योऽमृतत्वमानशुः,

परेण नाकं निहितं गुहायां, विभ्रायते यद्यतयो विशन्ति।
वेदाहमेनं पुरुषं महान्तं, तमेव विदित्वा अमृतत्वमेति ॥

'नान्यः पन्थाः अयनाये' त्वादिवचनानां यद्यर्थवेत्तारः स्युस्तत्किमित्थं यागादि कुर्व्वी-रन् ?, ततस्तत्त्वतो वेदविद्याविदो भवन्ता न भवन्ति, तत्कथं जातिविद्यासम्पन्नत्वेन क्षेत्रभूताः स्युः ?। कानि तर्हि भवदभिप्रायेण क्षेत्राणीत्याह-'उच्चावयाइं'त्ति उच्चावचानि-उत्तमाधमानि मुनयश्चरन्ति-भिक्षानिमित्तं पर्यटन्ति गृहाणि, ये इति गम्यते, न तु भवन्त इव पचनाद्यारम्भ-प्रवृत्तयः, त एव परमार्थतो वेदार्थं विदन्ति, तत्रापि भैक्षवृत्तेरेव समर्थितत्वात्, तथा च वेदानुवादिनः-

"चरेद् माधुकरीं वृत्तिमपि म्लेच्छकुलादपि।
एकान्नं नैव भुञ्जीत, बृहस्पतिसमादपि ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदिवोच्चावचानि-विकृष्टाविकृष्टतया नानाविधानि, तपांसीति गम्यते, उच्चव्रतानि वा शेषव्रतापेक्षया महाव्रतानि ये मुनयश्चरन्ति-आसेवन्ते, न तु यूयमिवाजितेन्द्रिया अशीला वा, तान्येव मुनिलक्षणानि क्षेत्राणि सुपेशलानीति प्राग्वदिति सूत्रार्थः ॥ इत्थमध्यापकं यक्षेण निर्मुखीकृतमवलोक्य तच्छात्राः प्राहुः-

मू. (३७५) *अज्झावयाणं पडिकूलभासी, पभाससे किन्नु सगासि अम्हं ?।*
अवि एयं विनस्सउ अन्नपाणं, न य णं दाहामु तुमं नियंठा ! ॥

वृ. अध्यापयन्ति-पाठ्यन्तीत्यध्यापकाः-उपाध्यायास्तेषां प्रतिकूलं-प्रतिलोमं भाषते वक्तीत्येवंशीलः प्रतिकूलभाषी सन् प्रकर्षेण भाषसे-ब्रूषे प्रभाषसे, किमिति क्षेपे, तुरित्य-क्षमायां, ततश्च धिग् भवन्तं न वयं क्षमामहे यदित्थं भवान् ब्रूते सकाशे-समीपे 'अम्हं'ति अस्माकम्, अपिः सम्भावनायां, 'एतत्' परिदृश्यमानं 'विनश्यतु' क्वथितत्वादिना स्वरूप-हानिमाप्नोतु 'अन्नपानम्' ओदनकाञ्जिकादि, 'न च' नैव 'न'मिति वाक्यालङ्कारे 'दाहामु'त्ति दास्यामस्तव हे निर्ग्रन्थ ! निष्किञ्चन !, गुरुप्रत्यनीको हि भवान्, अन्यथा तु कदाचिदनुकम्पया किञ्चिदन्तप्रान्तादि दद्यामोऽपीति भाव इति सूत्रार्थः ॥ यक्ष आह-

मू. (३७६) *समिईहिं मज्झं सुसमाहियस्स, गुत्तीहि गुत्तस्स जिइंदियस्स ।*
जइ मे न दाहित्थ अहेसणिज्जं, किमज्ज जन्नाण लभित्थ लाभं ? ॥

वृ. समितिभिः-ईर्यासमित्यादिभिर्मह्यं सुष्ठु समाहिताय-समाधिमते सुसमाहिताय गुप्तिभिः-मनोगुप्त्यादिभिर्गुप्ताय जितेन्द्रियायेति च प्राग्वत्, सर्वत्र च चतुर्थ्यर्थे षष्ठी, 'यदी'त्वभ्युपगमे 'मे' मह्यं 'मज्झं'तीत्यस्य व्यहितत्वात् क्रिया प्रति पुनरुपादानमदुष्टमेव 'न दास्यथ' न वितरि-ष्यथ, 'अथे'त्युपन्यासे आनन्तर्ये वा, 'एषणीयम्' एषणाविशुद्धमन्नदिकं, किं न किञ्चिदित्यर्थः, 'अज्ज'त्ति अद्य ये यज्ञास्तेषामिदानीमारब्धयज्ञानां, यद्वा 'अज्ज'त्ति हे आर्या ! यज्ञानां 'लभि-त्थ'त्ति सूत्रत्वाल्लप्स्यध्वे-प्राप्स्यध्वं 'लाभं' पुण्यप्राप्तिरूपं, पात्रदानादेव हि विशिष्टपुण्यावाप्तिः, अन्यत्र तु तथाविधफलाभावेन दीयमानस् हानिरेव, उक्तं हि-

"दधिमधुघृतान्यपात्रे क्षिप्तानि यथाऽऽशु नाशमुपयान्ति ।
एवमपात्रे दत्तानि केवलं नाशमुपयान्ती ॥"ति

सूत्रार्थः ॥ इत्थं तेनोक्ते यदध्यापकप्रधान आह तदुच्यते-

मू. (३७७) *के इत्थ खत्ता उवजोइया वा, अज्झावया वा सह खंडिएहिं ?।*
एयं खु दंडेण फलेण हंता, कंठंमि धित्तूण खलिज्ज जो णं ॥

वृ. के 'अत्रे'त्येतस्मिन् स्थाने 'क्षत्राः' क्षत्रियजातयो वर्णसङ्करोत्पन्ना वा तत्कर्म्मनियुक्ताः 'उवजोइय'त्ति ज्योतिषः समीपे ये त उपज्योतिषस्त एवोपज्योतिष्काः-अग्निसमीपवर्त्तिनो महनसिका ऋत्विजो वा 'अध्यापकाः' पाठकाः, ते वा उभयत्र वा विकल्पे 'सहे'ति युक्ताः, कैः ?-'खण्डिकैः' छात्रैः, ये किमित्याह-'एनं' श्रवणकं 'दण्डेन' वंशयठ्यदिना 'फलेन' बिल्वादिना 'हंते'ति हत्वा-ताडयित्वा यद्वा 'दण्डेने'ति कूर्प्पराभिघातेन 'फलेन' च मुष्टि-प्रहाग्गेणेति वृद्धाः, ततश्च 'कण्ठे' गले 'गृहीत्वा' उपादाय 'खलेज्ज'त्ति स्खलयेयुः-निष्काशयेयुः, 'यो'त्ति वचनव्यत्ययाद्ये इत्थमेतदभिघाते निष्काशने वा शक्ताः, 'नमि'ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाक्यालङ्कारे इति सूत्रार्थः ॥ अत्रान्तरे यदभूत्तदाह-

मू. (३७८) अज्झावयाणं वयणं सुनित्ता, उद्धाइया तत्थ बहू कुमारा।
दंडेहिं वित्तेहिं कसेहिं चेव, समागया तं इसि तालयंति ॥

वृ. अध्यापकानाम्-उपाध्यायानाम्, एकत्वेऽपि पूज्यत्वाद्बहुवचनं, 'वचनम्' उक्तरूपं 'श्रुत्वा' आकर्ण्य 'उद्धाविता' वेयेन प्रसृताः 'तत्र' यत्रासौ मुनिस्तिष्ठति 'बहवः' प्रभूताः 'कुमारा' द्वितीयवयोवर्त्तिनश्छात्रादय इति गम्यते, ते हि क्रीडनकपरा इत्यहो क्रीडनकमागतमिति रभसतो 'दण्डैः' वंशयष्ट्यादिभिर्वेत्रैः-जलजवंशात्मकैः 'कशैः' वध्रविकारैः, चः समुच्चये, एवेति पूरणे, 'समागताः' सम्प्राप्ता मिलिता वा तमृषिं-मुनिं 'ताडयन्ति' घ्नन्ति, सर्वत्र वर्त्तमान-निर्देशः प्राग्वत् इति सूत्रार्थः ॥ अस्मिंश्चावसरे-

मू. (३७९) रन्नो तहिं कोसलियस्स धूया, भद्दत्ति नामेन अनिंदियंगी।
तं पासिया संजय हम्ममानं, कुद्धे कुमारे परिनिव्ववेइ ॥

वृ. 'राज्ञो' नृपतेस्तत्र-यज्ञवाटे कोशलायां भवः कौशलिकस्तस्य 'धूय'त्ति दुहिता भद्रेति 'नाम्ना' अभिधानेन 'अनिन्दिताङ्गी' कल्याणशरीरा 'तं' हरिकेशबलं 'पासिय'त्ति दृष्ट्वा 'सञ्जय'त्ति संयतं तस्यामप्यवस्थायां हिंसादेः सम्यगुपरतं 'हन्यमानं' दण्डादिभिस्ताडयमानं 'क्रुद्धानं' कोपवतः 'कुमारान्' उक्तरूपान् 'परिनिर्व्वापयति' कोपाग्निविध्यापनात् समन्तात् शीतीकरोति उपशमयतीतियादविति सूत्रार्थः ॥ सा च तान् परिनिर्व्वापयन्ती तस्य माहात्म्य-मतिनिःस्पृहतां चाह-

मू. (३८०) देवाभिओगेण निओइएणं, दिन्ना मु रन्ना मनसा न झाया।
नरिंददेविंदऽभिवंदिएणं, जेनामि वंता इसिणा स एसो ॥

वृ. देवस्य-अमरस्याभियोगो-बलात्कारो देवाभियोगस्तेन 'नियोजितेन' व्यापारितेन न त्वप्रियेतिकृत्वा 'दिन्नामु'त्ति दत्ताऽस्मि, अहं यस्मै इति गम्यते, दत्ता च केन ?-राज्ञा प्रक्रमा-त्कौशलिकेन, तथापि 'मणस'त्ति अपेर्गम्यमानत्वान्मनसाऽपि-चित्तेनापि 'न ध्याता'न चिन्तिता नाभिलषितेतियावत्, प्रक्रमादेतेन मुनिना, कीदृशेन ?-नरेन्द्राश्च-नृपतयो देवेन्द्राश्च-शक्रादयो नरेन्द्रदेवेन्द्रास्तैरभि-आभिमुख्येन वन्दितः-स्तुतो नरेन्द्रदेवेन्द्राभिवन्दितस्तेन, अनभि-ध्याताऽपि नृपोपरोधतः स्वीकृता स्यादत आह-येनास्म्यहं 'वान्ता' त्यक्ता 'ऋषिणा' मुनिना, स एष युष्माभिर्यः कदर्थयितुमारब्धः, ततो न कदर्थयितुमुचित इति भावः, पुनरिममेवार्थं समर्थयितुमाह-

मू. (३८१) एसो हु सो उग्गतवो महप्पा, जिइंदिओ संजओ बंभयारी।
जो मे तया निच्छई दिज्जमानी, पिउणा सयं कोसलिएण रन्ना ॥

वृ. 'एसो हु सो'त्ति, एष एव स न मनागप्यत्र संशयः, उग्रं-उत्कटं दारुणं वा कर्म्मशत्रून् प्रति तपः-अनशनाद्यस्येति उग्रतपाः, अत एव महान्-प्रशस्या विशिष्टवीर्योल्लासत आत्मा अस्येति महात्मा, जितेन्द्रियः संयतो ब्रह्मचारी च प्राग्वत्, स इति क ? इत्याह-यो 'मि'त्ति मां 'तदा' तस्मिन् विवक्षितसमये 'नेच्छति' नाभिलषति 'दीयमानां' निसृज्यमानां, केन ?-'पित्रा' जनकेन 'स्वयं' आत्मना, न तु प्रधानप्रेषणादिना, तेनापि कीदृशा ?-कौशलिकेन राज्ञा, न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वितरजनसाधारणेन, तदनेन विभूतावपि निःस्पृहत्वमुक्तं, पुनस्तन्माहात्म्यमाह-

मू. (३८२) महाजसो एस महानुभागो, घोरव्वओ घोरपरक्कमो य।
मा एयं हीलह अहीलनिज्जं, मा सव्वे तेएण भे निद्दहिज्जा ॥

वृ. 'महायसा' अपरिमितिकीर्त्तिः 'एष' प्रत्यक्षो मुनिर्महानुभागः-अतिशयाचिन्त्यशक्तिः, पाठान्तरतो महानुभावो वा, तत्र चानुभावः-शापानुग्रहसामर्थ्यं, 'घोरव्रतो' धृतात्यन्तदुर्द्धर-महाव्रतः 'घोरपराक्रमश्च' कषायादिजयं प्रति रौद्रसामर्थ्यो, यतोऽयमीदृक् ततः किमित्याह-'मा' इति निषेधे 'एनं' यतिं 'हीलयत' अवधूतं पश्यत 'अहीलनीयम्' अवज्ञातुमनुचित्तं, किमित्याह आह-मा सर्व्वान्-समस्तांस्तेजसा-तपोमाहात्म्येन 'मे' भवतो निर्घाक्षीद्-भस्यसात्कार्षीद्, अयं हि हीलितो यदि कदाचिद्रुष्येत्तदा सर्व्वं भस्मसादेव कुर्यादिति भाव इति सूत्रत्रयार्थः ॥ अत्रान्तरे मा भूदेतस्या वचनं मृषेति यद्यक्षः कृतवांस्तदाह-

मू. (३८३) एयाइं तीसे वयणाइं सुच्चा, पत्तीइ भद्दाइ सुभासियाइं।
इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयंति ॥

वृ. 'एतानि' अनन्तरोक्तानि 'तस्याः' अनन्तरोक्तायाः 'वचनानि' भाषितानि 'श्रुत्वा' निशम्य 'पत्याः' यज्ञवाटकाधिपतेः सोमदेवपुरोहितस्य, तस्यैव वा मुनेरिति गम्यते, 'भद्राया' भद्राधिभानायाः 'सुभाषितानि' सूक्तानि वचनानीति योज्यते, ऋषेः-तस्यैव तपस्विनः 'वेयाव-डिट्ठयाए'त्ति सूत्रत्वाद्वैयावृत्त्यार्थमेतत् प्रत्यनीकनिवारणलक्षणे प्रयोजने व्यावृत्ता भवाम इत्येवमर्थं यक्षाः, यक्षपरिवारस्य बहुत्वात् बहुवचनं, कुमारान् प्रक्रमात्तानेवोपहन्तृन् 'विनिपात-यन्ति' विविधं नितरां पातयन्ति-भूमौ विलोलयन्ति, पठ्यते च-'विनिवारयंति'त्ति विशेषेणोपहतिं कुर्वतो निराकुर्व्वन्ति,

मू. (३८४) ते घोररूवा ठिअ अंतलिक्खे, असुरा तहिं तं जाणं तालयंति।
ते भिन्नदेहे रुहिरं वमंते, पासित्तु भद्दा इणमाहु भुज्जो ॥

वृ. तथा 'ते' इति यक्षाः 'घोररूपा' रौद्राकारधारिणः 'ठिय'त्ति स्थिताः 'अन्तरिक्षे' आकाशे 'असुरा' आसुरभावान्वितत्वात् त एव यक्षाः 'तस्मनि' यज्ञवाटे 'तम्' उपसर्गकारिणं 'जनं' छात्रलोकं 'ताडयन्ति' ध्नन्ति, ततस्तान् कुमारान् भिन्ना-विदारिताः प्रक्रमाद्यक्षप्रहारैर्देहाः-शरीराणि येषां ते भिन्नदेहास्तान् रुधिरं-शोणितं वमतः-उद्गिरतः 'पासत्ति'त्ति दृष्ट्वा 'भद्रा' सैव कौशलिकराजदुहिता 'इदं' वक्ष्यमानं 'आहु'त्ति वचनव्यत्ययेनाह-ब्रूते 'भूयः' पुनरिति सूत्रद्वयार्थः ॥ किं तदित्याह-

मू. (३८५) गिरिं नहेहिं खणह, अयं दंतेहिं खायह।
जायतेयं पायेहिं हणह जे भिक्खुं अवमन्नह ॥

वृ. 'गिरिं' पर्वतं 'नखैः' कररुहैः 'खनथ' विदारयथ, इह च मुख्यखननक्रियाद्यसम्भवा-दिववतिमन्तेरणाप्युपमार्थो गम्यते, ततश्च खनथेव खनथ, 'अयो' लोहं 'दन्तैः' दशनैः खादथेव खादथ, जाततेजसम्-अग्निं पादैः-चरणैर्हथेव हथ, ताडयथेत्यर्थः, ये वयं कि कुर्मः इत्याह-ये यूयं भिक्षुं प्रक्रमादेनं 'अवमन्नह'त्ति अवमन्यध्वे-अवधीरयथ, अनर्थफलत्वात्, भिक्ष्व-पमनास्येति भावः, कथमिदमित्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.(३८६) आसीविसो उग्गतवो महेसी, घोरव्वओ, घोरपरक्कमो य।
अगनिं व पक्खंद पयंगसेना, जे भिक्खुं भत्तकाले वहेह॥

वृ. आस्यो-दंष्ट्रास्तासु विषमस्येत्यासीविषः-आसीविबलब्धिमान्, शापानुग्रहसमर्थ इत्यर्थः, यद्वा आसीविष इव आसीविषः, यथा हि तमत्यन्तमवजानानो मृत्युमेवाप्नोति, एवमेनमपि मुनिमवमन्यमानानामवश्यं भावि मरणमित्याशयः, कुतः पुनरयमेवंविधो?, यतः-उग्रतपाः प्राग्वत्, 'महेसि'त्ति महान्-बृहन् शेषस्वर्गाद्यपेक्षया मोक्षस्तमिच्छति-अभिलषतीति महदेषी महर्षिर्वा, घोरव्रतो घोरपराक्रमश्च पूर्ववत, यतश्चैवमतः 'अगणिं व'त्ति अग्नि-ज्वलनं, वाशब्द इवार्थो भिन्नक्रमश्च, ततः 'पक्खंद'त्ति प्रस्तकन्दथेव-आक्रामथेव, केव?-'पतंगसेन'त्ति उपमार्थस्य गम्यमानत्वात्पतङ्गानां-शलभानां सेनेव सेना-महती सन्ततिः पतङ्गसेना तद्वत्, यथा हि असौ तत्र निपतन्त्याशु घातमाप्नोत्येवं भवन्तोऽपीति भावः, ये यूयमनुकम्पितं भिक्षुं भिक्षुकं 'भक्तकाले' भोजनसमये, तत्र दीनादेरवश्यं देयमिति शिष्टसमयो यूयं तु न केवलं न यच्छत किन्तु तत्रापि 'वधह'त्ति विध्यथ-ताडयथ, अयमाशयो-यतोऽयमासीविषादिविशेषणान्वितो मुनिरतो गिरिनखखननादिप्रायमेव यदेनं भक्तकालेऽपि भक्तार्थिनमित्थं विध्यथ।

मू.(३८७) सीसेण एयं सरणं उवेह, समागया सव्वजनेन तुम्हे।
जइ इच्छह जीवियं वा धनं वा, लोगंपि एसो कुविओ डहिज्जा॥

वृ. अथ स्वकृत्योपदेशमाह-'शीर्षेण' शिरसा 'एनं' मुनिं 'शरणार्थं' रक्षणार्थमाश्रयमुपेत-अभ्युपगच्छत, किमुक्तं भवति?-शिरःप्रणामपूर्व्वकमयमेवास्माकं शरणमिति प्रपद्यध्वं, 'समागताः' सम्मिलिताः 'सर्व्वजनेन' समस्तलोकेन, सहार्थे तृतीया, 'यूयं' भवन्तो, यदीच्छत-अभिलषत 'जीवितं' प्राणधारणात्मकं धनं वा द्रव्यं, न तस्मिन् कुपिते जीवितव्यादिरक्षाक्षममन्यच्छरणमस्ति, किमित्येवमत आह-'लोकमपि' भुवनमप्येष कुपितः-क्रुद्धो 'दहेद्' भस्मात्कृर्यात्, तथा च वाचकः-

"कल्पान्तोग्रानलवत्प्रज्वलनं तेजसैकतस्तेषाम्॥"

तथा लौकिका अप्याहुः-

"न तत् दूरं यदश्वेषु, यवाग्नौ यच्च मारुते।
विषे च रुधिरप्राप्ते, साधौ च कृतनिश्चये॥"

इति सूत्रत्रयार्थः॥ सम्प्रति तत्पतिस्तान् यादृशान् ददर्श दृष्ट्वा च यदचेष्टत तदाह-

मू.(३८८) अवहेडियपिट्ठिसउत्तमंगे, पसारियाबाहुअकम्मचिट्ठे।
निब्भेरियच्छे रुहिरं वमंते, उड्ढंमुहे निग्गयजीहनित्ते॥

वृ. 'अवे'त्यधो 'हेडिय'त्ति हेठितानि-बाधितानि, किमुक्तं भवति?-अधोनामितानि, पठन्ति च 'आवडिए'त्ति तत्र सूत्रत्वादवकोटितानि-अधस्तादामोटितानि 'पट्ठि'त्ति पृष्ठं यावत् तदभिमुखं वा सन्ति-शोभनान्युत्माङ्गानी येषां ते अवहेठितपृष्ठसदेत्तमाङ्गः अवकोटितपृष्ठसदुत्तमाङ्गो वा, प्राग्वन्मध्यपदलोपी समसास्तान्, 'पसारियाबाहुअकम्मचिट्ठ'त्ति प्रसारिता-विरलीकृता बाहवो-भुजा यैर्येषां वा ते तथा ततस्ते च ते अकर्मचेष्टाश्च-अविद्यमानकर्म्महेतुव्यापारतया प्रसारितबाह्यकर्म्मचेष्टास्तान्, यद्वा क्रियन्त इति कर्म्मारणि-अग्नौ समित्प्रक्षेप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णादीनि तद्विषया चेष्टा कर्मचेष्टेह गृह्यते-'निब्भेरिय'त्ति प्रसारितान्यक्षीणि-लोचनानि येषां ते तथोक्तास्तान्, रुधिरं वमद्-उद्गिरत् 'उड्ढंमुह'त्ति ऊर्ध्वमुखान्-उन्मुखीभूतवक्त्रान्, अत एव निर्गतानि-निःसृतानि जिह्वाश्च प्रतीता नेत्राणि च-नयनानि जिह्वानेत्राणि येषां ते तथा तान्,

मू. (३८९) ते पासिया खंडिय कट्ठभूए, विमणो विसन्नो अह माहणो सो।
इसिं पसाएइ सभारियाओ, हीलं च निंदं च खमाह भंते!॥

वृ. 'तानि'त्युक्तरूपान् 'दृष्ट्वा' अवलोक्य 'खंडिय'त्ति आर्षत्वात्सुपो लुकि खण्डिकान्-छात्रान् काष्ठभूतान्-अत्यन्तनिश्चेष्टतया काष्ठोपमान् विगतमिव विगतं मनः-चित्तमस्येति विमनाः, विषण्णः-कथममी प्रवणीभविष्यन्तीति चिन्तया व्याकुलितः 'अथे'ति दर्शनानन्तरं 'ब्राह्मणो' द्विजातिः 'स' इति सोमदेवनामा 'ऋषिं' तमेव हरिकेशबलनामानं मुनिं 'प्रसादयति' प्रसत्तिं ग्राहयति, सह भार्यया-पत्न्या तयैव भद्राभिधानया वर्त्तते इति सभार्याकः, कथमित्याह-हीलां च-अवज्ञां निन्दां च-दोषोद्घट्टनं 'खमाह'त्ति क्षमस्व सहस्व 'भंतेति' सूत्रद्वयार्थः॥

पुनः स प्रसादनामेवाह-

मू. (३९०) बालेहिं मूढेहिं अयाणएहिं, जं हीलिया तस्स खमाह भंते!
महप्पसाया इसिणो हवंति, न हु मुनी कोवपरा हवंति॥

वृ. बालैः-शिशुभिर्मूढैः-कषायमोहनीयोदयाद्विचित्तता गतैः अत एव चाज्ञैः-हिताहित-विवेकविकलैः 'यदि' त्युपप्रदर्शने 'हीलिताः' अवज्ञाताः 'तस्स'त्ति सूत्रत्वात् तत् 'खमाह'त्ति क्षमध्वं भदन्त!, अनेनैतदाह-यतोऽमी शिशवो मूढा अज्ञानाश्च तत्किमेषामुपरि कोपेन?, यतोऽनुकम्पनीया एवामी, उक्तं च केनचिद्-"आत्मद्रुहममर्यादं, मूढमुज्झितसत्पथम्। सुतरा-मनुकम्प्येत, नरकार्चिष्मदिन्धनम्॥" किं च-महान् प्रसादः-चित्तप्रसत्तिरूपो येषां ते महाप्रसादा ऋषयः-साधवो भवन्ति, व्यतिरेकमाह-'न हु'त्ति न पुनर्मुनयो-यतयः 'कोपपराः' क्रोधवशगा भवन्ति, भिन्नवाक्यत्वाच्च मुनिग्रहणमदुष्टमेवेति सूत्रार्थः॥ मुनिराह-

मू. (३९१) पुव्विं च इण्हिं च अनागयं च, मनप्पओसो न मे अत्थि कोई।
जक्खा हु वेयावडियं करिंति, तम्हा हु एए निहया कुमारा॥

वृ. 'पुव्विं च'त्ति पूर्वं च पुरा इदानीं च-अस्मिन् काले 'अनागय चे'ति अनागते च भविष्य-त्काले मनःप्रद्वेषः-चित्तानुशयलक्षणो न 'मे' ममास्तीत्युपलक्षणत्वादासीद्भविष्यति च, 'कोऽपि'त्यल्पोऽपि, इह च भाविनि प्रमानाभावेऽपि 'अनागतं प्रत्याचक्ष' इति वचनादनागत-स्यापि तस्य निषिद्धत्वाच्छ्रुतज्ञानबलतः कालत्रयपरिज्ञानसम्भवाच्चैवमभिधानं, पठन्ति च 'पुव्विं च पच्छा व तहेव मज्झे' तत्र च पूर्वं वा पश्चाद्वेति विहेठनकालापेक्षं तथैव मध्ये विहेठन-काल एव, न च कुमारावहेठनादिदर्शनात्प्रत्यक्षविरुद्धता शङ्कनीया, 'यक्षा' देवविशेषा 'हु'रिति यस्माद्वैयावृत्त्यं-प्रत्यनीकप्रतिघातरूपं 'कुर्व्वन्ति' विदधति, 'तम्ह'त्ति तस्मात् हुरवधारणे ततस्तस्मादेव हेतोरेते-पुरोवर्त्तिनो नितरां हताः-ताडिता निहताः कुमाराः, न तु मनःप्रद्वेषोऽत्र हेतुरिति भाव इति सूत्रार्थः॥ सम्प्रति तद्गुणा कृष्टचेतस उपाध्यायप्रमुखा इदमाहुः-

मू. (३९२) अत्थ च धम्मं च वियाणमाना, तुब्भे नवि कुप्पह भूइपन्ना।
तुब्भं तु पाए सरणं उवेमो, समागया सव्वजनेन अम्हे॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अर्यत इत्यर्थो-ज्ञेयत्वात्सर्व्वमेव वस्तु, इह तु प्रक्रमाच्छुभाशुभकर्म्मविभागो रागद्वेषविपाको वा परिगृहयते, यद्वा अर्थः-अभिधेयः स चार्थाच्छास्त्राणामेव तु, चशब्दस्तद्गतानेकभेदसंसूचकः, धर्मः-सदाचारो दशविधो वा यतिधर्म्मस्तं च 'वियाणमाने'त्ति विशेषेण विविधं वा जानन्तः-आगच्छन्तो यूयं 'नापि' नैव कुप्यथ-क्रोधं कुरुध्वं, भूतिप्रज्ञा इति, भूतिर्मङ्गलं वृद्धी रक्षा चेती वृद्धाः, प्रज्ञायतेऽनया वस्तुतत्त्वमिति प्रज्ञा, ततश्चः भूतिः-मङ्गलं सर्वमङ्गलोत्तमत्वेन वृद्धिर्वा वृद्धिविशिष्टत्वेन रक्षा वा प्राणिरक्षकत्वेन प्रज्ञा-बुद्धिरस्येति भूतिप्रज्ञः, अतश्च 'तुब्भं तु'त्ति तुशब्दस्यैवकारार्थत्वात् युष्माकमेव पादौ-चरणौ शरणमुपेमः-उपगच्छामः समागताः-मिलिताः, केन सह ?-सर्व्वजनेन, वयमिति सूत्रार्थः ।। किं च-

मू. (३१३) अच्चेमु ते महाभागा !, न ते किंचन नाच्चिमो ।
भुंजाहि सालिमं कूरं, नाणावंजसंजुयं ।।

वृ. 'अर्च्चयामः' पूज्यामस्ते-तव सम्बन्धि सर्व्वमपीति गम्यते, प्रविश पिण्डिमित्युक्ते यथा गृहमिति भक्षयेति च, महाभाग ! अतिशयाचिन्त्यशक्तियुक्तत्वेनेति, नैव 'ते' तव किञ्चिदिति चरणरेण्वादिकमपि नार्च्चयामो-न पूजयामो, अपि तु सर्व्वमर्च्चयामः, अस्य च पूर्व्वेणैव गतार्थत्वे पुनरभिधानमन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सुखावगमो भवतीतिकृत्वा, अथवा अर्च्चयामस्ते इति सुब्व्यत्त्ययात्त्वाम्, अनेन स्वतस्तस्य पूज्यत्वमुक्तं, उत्तरेण तु तत्स्वामित्वमपि पूज्यताहेतुरिति, तथा भुङ्क्ष्वेतो गृहीत्वेति गम्यते 'शालिम'न्ति शालिमयं, कोऽर्थः ?-शालिनिष्पन्नं 'कूरम्' ओदनं नानाव्यञ्जनैः-अनेकप्रकारैर्दध्यादिभिः संयुतं-सम्मिश्रं नानाव्यञ्जनसंयुतं, न त्वेकमेवेति सूत्रार्थः ।। अन्यच्च-

मू. (३१४) इमं च मे अत्थि पभूयमन्नं, तं भुंजसू अम्ह अनुग्गहट्ठा ।
बाढंति पडिच्छइ भत्तपानं, मासस्स ऊ पारणए महप्पा ।।

वृ. 'इदं च' प्रत्यक्षत एव परिदृश्यमानं 'मे' ममास्ति-विद्यते 'प्रभूतं' प्रचूरमन्नं-मण्डकखण्डस्वाद्यादि समस्तमपि भोजनं, यत्प्राक् पृथगोदनग्रहणं तत्तस्य सर्वान्नप्रधानत्वख्यापनार्थं, तद्भुङ्क्ष्वास्माकमनुग्रहार्थं-वयमनुगृहीता भवाम इति हेतोः, एवं च तेनोक्ते मुनिराह-'बाढम्' एवं कुर्म्म इतीत्येवं ब्रुवाण इति शेषः, 'प्रतीच्छति' द्रव्यादितः शुद्धमिति गृह्णाति, भक्तपानमुक्तरूपं, 'मासस्स उ'त्ति मासादेव, यद्वा अन्त इत्यध्याह्रियते, ततश्च मासस्यैवान्ते यत्पार्यतेपर्यन्तः क्रियते गृहीतनियमस्यानेनेति पारणं तदेव पारणकं, भोजनमित्युक्तं भवति, तस्मिन्तन्निमित्तं, 'निमित्तात्कर्म्मसंयोगे सप्तमिति' सप्तमी, माहात्म्येति प्राग्वत् इति सूत्रार्थः ।।

तदा च तत्र यदभूत्तदाह-

मू. (३१५) तहियं गंधोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।
पहया दुंदुहीओ सुरेहिं, आगासे अहोदानं च घुट्ठं ।।

वृ. 'तहियं'ति तस्मिन् मुनौ भक्तपानं प्रतीच्छति यज्ञवाटे वा गन्धः-आमोदतस्तत्प्रधानमुदकं-जलं गन्धोदकं तच्चा पुष्पाणि च-कुसुमानि तेषां वर्षं-वर्षणं गन्धोदकपुष्पवर्षं, सुरैरिति सम्बधात् कृतमिति गम्यते, दिव्या-श्रेष्ठा यदिवा दिवि-गगने भवा दिव्या, 'तहिं'ति तस्मिन्नेव नान्यत्र, अनेन कथमियतामेकत्र कल्याणानां मीलक इत्यन्यत्रैवान्यतरत्कल्याणान्तरं भविष्यती-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्याशङ्का निराकृता, वसु-द्रव्यं तस्य धारा-सततपातजनिता सन्ततिर्व'दुन्दुभयो' देवानकाः, उपलक्षणत्वाच्छेषातोद्यानि च, कैः ?-'सुरैः' देवैः, तथा तैरेव 'आकाशे' नभसि 'अहो' इति विस्मये, विस्मयनीयमिदं दानं, कोऽन्यः किलैवं शक्नोति दातुं ?, एवं दत्तं सुदत्तमिति च 'घुष्टं' संशब्दितमिति सूत्रार्थः ॥ तेऽपि ब्राह्मण विस्मतमनस इदमाहुः-

मू. (३१६) सक्खं खु दीसइ तवोविसेसो, न दीसई जाईविसेस कोई।
सोवागपुत्तं हरिएससाहुं, जस्सेरिसा इड्ढि महानुभागा ॥

वृ. 'साक्षात्' प्रत्यक्षं 'खु'रिति निश्चितं अवधारणे वा ततः साक्षादेव 'दृश्यते' अवलोक्यते, काऽसौ ?-तपो-लोकप्रसिद्धा व्रतमुपवासादिर्वा तस्य विशेषो-विशिष्टत्वं माहात्म्यमिति-यावत्तपोविशेषो, 'न' नैव दृश्यते 'जातिविशेषो' जातिमाहात्म्यलक्षणः 'कोऽपी'ति स्वल्पोऽपि, किमित्येवमत आह-यतः स्वपाकपुत्रः-चाण्डालसुतो हरिकेशश्चासौ मातङ्गत्वेन प्रसिद्धत्वात् साधुश्च यतित्वाद्धरिकेशसाधुः, पठ्यते च-'सोवागपुत्तं हरिएससाहु'न्ति, अत्र च पश्यतेति शेषः, कदाचिदन्य एव कश्चिदत आह-यस्येदृशी-दृश्यमानरूपा ऋद्धिः-देवसन्निधानात्मिका सम्पत् महानुभागा-सातिशयमाहात्म्या, जातिविशेषे हि साति सर्वोत्तमत्वाद्ब्राह्मणजातेस्तद्वतामस्माकमेव देवा वैयावृत्त्यं कुर्युरिति भाव इति सूत्रार्थः ॥

साम्प्रतं स एव मुनिस्तानुपशान्तमिथ्यात्वमोहनीयोदयानिव पश्यन्निदमाह-

मू. (३१७) किं माहणा ! जोइसमारभंता, उदएण सोहिं बहिया विमग्गहा ? ।
जं मग्गहा बाहिरियं विसोहिं, न तं सुदिट्ठं कुसला वयंति ॥

वृ. 'किं'मिति क्षेपे, ततो न युक्तमिदं, यत् 'माहना' ब्राह्मणा ! 'ज्योतिः' अग्निं 'समारभमानाः' प्रस्तावद्यागकरणतः प्रवर्त्तमानाः, यागं कुर्व्वन्त इत्यर्थः, 'उदकेन' जलेन 'सोहिं'ति शुद्धिं निर्म्मलतां 'बहिय'त्ति बाह्यां, कोऽर्थो ?-बाह्यहेतुका, यागं हि समारभमानैर्जलेन या शुद्धिर्मार्ग्यते तत्र यागस्नाने एव तत्त्वतो हेतुत्वेनेष्टे, ते च भवदभिमते बाह्ये एवेति 'विमार्गयथ' विशेषेणान्वेषयथ, किमेवमुपदिश्यत इत्याह-यद्रूपं मार्ग्गयथ बाह्यां--बाह्यहेतुकां विशुद्धिं, न तत् सुदृष्टं-सुष्ठु प्रेक्षितं 'कुशलाः' तत्त्वविचारं प्रति निपुणा 'वदन्ति' प्रतिपादयन्तीति सूत्रार्थः

यथा चैतत् सुदृष्टं न भवति तथा स्वत एवाह-

मू. (३१८) कुसं च जूवं तणकट्ठमग्गिं, सायं च पायं उदयं फुसंता।
पाणाइं भूयाइं विहेडयंता, भूज्जोऽवि मंदा ! पकरेह पावं ॥

वृ. 'कुशं च' दर्भं च 'यूपं' प्रतीतमेव तृणं च-वीरणादि काष्ठं-समिदादि तृणकाष्ठम् अग्नि-प्रतीतं, सर्वत्र परिगृह्णन्त इति शेषः, 'सायं' सन्ध्यायां, चशब्दो भिन्नक्रमस्ततः 'पायं'ति प्रातश्च प्रभाते उदकं-जलं 'स्पृशन्तः' आचमनादिषु परामृशन्तः 'पाणाइं'ति प्राणयोगात् प्राणिनो यद्वा प्रकर्षेणानन्तीति-वसन्तीति प्राणाः-द्वीन्द्रियादयः, सम्भवन्ति हि जले पूतरकादिरूपास्त इति, 'भूयाइं' इति भूतान्-तरून् 'भूताश्च तरवः स्मृता' इति वचनात्, पृथिव्याद्येकेन्द्रियोपलक्षणं चैतत् 'विहेडयंति'त्ति विहेठयन्तो-विशेषेण विविधं वा बाधमानाः विनाशयन्त इत्यर्थः, किमित्याह-'भूयोऽपि' पुनरपि, न केवलं पुरा किन्तु विशुद्धिकालेऽपि जलानलादिजीवोपमर्द्दतो 'मन्दाः' जडाः 'प्रकुरुथ' प्रकर्षेणोपचिनुथ यूयं, 'किं तत् ?-पापम्-अशुभकर्म्म,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयमाशयः-कुशला हि कर्म्ममलविलयात्मिकां तात्त्विकीमेव शुद्धिं मन्यन्ते, भवदभिमतयागस्नाने च यूपादिपरिग्रहजलस्पर्शाविनाभावित्वेन भूतोपमर्द्दहेतुतया प्रत्युत कर्म्ममलोपचयनिबन्धने एवेति नातः तत्सम्भव इति कथं तद्धेतुकशुद्धिमार्गणं सुदृष्टं ते वदेयुः ?, तथा च वाचकः-

"शौचमाध्यात्मिकं त्वक्त्वा, भावशुद्ध्यात्मकं शुभम्।
जलादिशौचं यत्रेष्टं, मूढ विस्मापकं हि तदि ॥"

ति सूत्रार्थः ॥ इत्थं तद्वचनतः समुत्पन्नशङ्कास्ते यागं प्रति तावदेवं पप्रच्छुः-

मू. (३९९) कहं चरे भिक्खु ! वयं जयामो ?, पावाइं कम्माइं पणुल्लयामो।
अक्खाहि णे संजय जक्खपूइआ, कहं सुजट्ठं कुसला वयंति ? ॥

वृ. 'कथं' केन प्रकारेण 'चरि'त्ति 'विभाषा कथमि लिं'च इति लिङ्विवचनव्यत्यये वचनव्यत्ययाच्चरेमहि-यागार्थं प्रवर्त्तेमहि, हे भिक्षो ! मुने ! वयमित्यात्मनिर्देशः, तथा 'यजामो' यागं कुर्म्मः, कथमिति योगः ?, पापानि-अशुभानि कर्म्माणि पुरोपचिताविद्यारूपाणि 'पणुल्लयामो'त्ति प्रणुदामः प्रेरयामो, येनेति गम्यते, 'आख्याहि' कथय 'नः' अस्माकं 'संयतः' पापस्थानेभ्यः सम्यगुपरतः 'यक्षपूजित' यक्षार्चित !, किमुक्तं भवति ?-यो ह्यस्मद्विदितः कर्म्मप्रणोदनोपायत्वेन यागः स युष्माभिर्दूषित इति भवन्त एवापरं यागमुपदिशन्तु, कदाचिदविशिष्टमेव यजनमुपदिशेदित्याशङ्कयाह-कथं' केन प्रकारेण 'स्विष्टं' शोभनं यजनं 'कुशला' उक्तरूपा 'वदन्ति' प्रतिपादयन्ति, न तं 'सुदिट्ठं कुसला वयंति'त्ति कुशलमुखेनैव मुनिना दूषितमिति तैरपि तथैव पृष्टमिति सूत्रार्थः ॥ मुनिराह-

मू. (४००) छज्जीवकाए असमारभंता, मोसं अदत्तं च असेवमाना।
परिग्गहं इत्थिउ मान मायं, एयं परिन्नाय चरंति दंता ॥

वृ. षड् जीवकायान्-पृथिव्यादीन् 'असमारभमाना' अनुपमर्द्दयन्तः 'मोसं'ति मृषा अलीकभाषणं 'अदत्तं चे'त्यदत्तादानं चानासेवमानाः-अनाचरन्तः परिग्रहं-मूर्च्छां स्त्रियोयोषितो 'मान'त्ति मानम्-अहङ्कारं मायां-परवञ्चनात्मिकां तत्सहचारित्वात्कोपलोभौ च, 'एतद्' अनन्तरोक्तं परिग्रहादि 'परिज्ञाय' ज्ञपरिज्ञया सर्व्वप्रकारं ज्ञात्वा प्रत्याख्यानपरिज्ञया च प्रत्याख्याय 'चरेज्ज दन्त'त्ति वचनव्यत्ययाच्चरेयुर्यागे प्रवर्त्तेरन्, भवन्त इति गम्यते, पठन्ति च-'चरन्ति दंत'त्ति अत्र च यत एवं दान्ताश्चरन्त्यतो भवद्भिरप्येवं चरितव्यमिति भाव इति सूत्रार्थः ॥

प्रथमप्रश्नप्रतिवचनमुक्तं, शेषप्रश्नप्रतिवचनमाह-

मू. (४०१) सुसंवुडा पंचहिं संवरेहिं, इह जीवियं अनवकंखमानो।
वोसट्ठकाओ सुइचत्तदेहो, महाजयं जयइ जन्नसिट्ठं ॥

वृ. सुष्ठु संवृतः-स्थगितसमस्ताश्रवद्वारः सुसंवृतः, कैः ? पञ्चभिः-पञ्चसङ्खयैः संवरैः-प्राणातिपातविरत्यादिव्रतैः 'इहे' त्यस्मिन् मनुष्यजन्मनि, उपलक्षणत्वात्परत्र च 'जीवितं' स्तावादसंयमजीवितम् 'अनवकाङ्क्षन्' अनिच्छन्, यद्वा अपेर्गम्यमानत्वाज्जीवितमपि-आयुरप्यास्तामन्यद्धनादि, अनवकाङ्क्षन्, यत्र हि व्रतबाधा तत्रासौ जीवितमपि न गणयति, अत एव व्युत्सृष्टो-विविधैरुपायैर्विशेषेण वा परीषहोपसर्गसहिष्णुतालक्षणेनोत्सृष्टः-त्यक्तः कायः-शरीरमनेनेति व्युत्सृष्टकायः, शुचिः-अकलुषव्रतः स चासौ त्यक्तदेहश्च-अत्यन्तनिष्प्रति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म्मतया शुचित्यक्तदेहो महान् जयः-कर्म्मशत्रुपराभवनलक्षणो यस्मिन् यज्ञश्रेष्ठेऽसौ महाजयस्तं, क्रियाविशेषणं वा महाजयं यथा भवत्येवं यजते यतिरिति गम्यते, ततो भवन्तोऽप्येवमेव यजन्तामिति भावः, तिडवचनव्यत्ययेन वा 'जयइ'त्ति यजतां, कमित्याह-'जन्नसेट्ठं'ति प्राकृतत्वाच्छ्रेष्ठयज्ञं, श्रेष्ठवचनेन चैतद्यजन एव स्विष्टं कुशला वदन्ति, एष एव च कर्म्मप्राणोदनोपाय इत्युक्तं भवतीति सूत्रार्थः ॥ यदीदृग्गुणः श्रेष्ठयज्ञं यजते अतस्त्वमपीदृग्गुण एव, तथा च तं यजमानस्य कान्युपकरणानि को वा यजनविधिरित्यभिप्रायेण च एवमाहुः-

मू. (४०२) के ते जोई के व ते जोइठाणा ?, का ते सूया किं च ते कारिसंगं ?।
एहा य ते कयरा संति भिक्खू !, कयरेण होमेण हुणासि जोइं ? ॥

वृ. किं, अयमर्थः-किंरूपं 'ते' तव 'ज्योति'रिति अग्निः 'के व ते जोइठाणे'त्ति किं वा ते-तव ज्योतिःस्थानं यत्र ज्योतिर्निधीयते, का श्रुवो ?-धृतादिप्रक्षेपिका दर्व्यः, 'किं च'त्ति किं वा करीपः-प्रतीतः स एवाङ्गम्-अग्न्युद्दीपनकारणं करीषाङ्गं येनासौ सन्धुक्ष्यते, एधाश्च-समिधो यकाभिरग्निः प्रज्वाल्यते, 'ते' तव कतरा इति-काः ? 'संति' त्ति चस्य गम्यमानत्वाच्छान्तिश्च-दुरितोपशमनहेतुरध्ययनपद्धतिः कतरेति प्रक्रमो, 'भिक्षु' इति भिक्षो ! कतरेण 'होमेन' हवनविधिना, समेन धावतीत्यादिवत् तृतीया, जुहोषि-आहुतिभिः प्रीणयसि, किं ?-ज्योतिः-अग्निम्, षड्जीवनिकायसमारम्भनिषेधेन ह्यस्मदभिमतो होमः तदुपकरणानि च पूर्व्वं निषिद्धानीति कथं भवतो यजनसम्भवः ? इति सूत्रार्थः ॥ मुनिराह-

मू. (४०३) तवो जोई जीवो जोईठाणं, जोगा सुया सरीरं कारिसंगं ।
कम्म एहा संजमजोग संती, होमं हुणामी इसिणं पसत्थं ॥

वृ. 'तपो' बाह्याभ्यन्तरभेदभिन्नं, 'ज्योतिः' अग्निः, यथा हि ज्योतिरिन्धनानि भस्मीकरोत्येवं तपोऽवि भावेन्धनानि-कर्म्माणि, जीवो-जन्तुर्ज्योतिःस्थानं, तपोज्योतिषस्तदाश्रयत्वात्, युज्यन्ते-सम्बन्ध्यन्ते स्वकर्म्मणेति योगाः-मनोवाक्कायाः श्रुवः, ते हि शुभव्यापाराः स्नेहस्थानीयाः, तपोज्योतिषो ज्वलनहेतुभूताः तत्र संस्थाप्यन्त इति, शरीरं करीषाङ्गं, तेनैव हि तपोज्योतिरुद्दीप्यते, तद्भावभावित्वात्तस्य, 'कर्म' उक्तरूपं एधास्तस्यैव तपसा भस्मीभावनयनात्, 'संजमजोग'त्ति संयमयोगाःसंयमव्यापाराः शान्तिः सर्व्वप्राण्युपद्रवापहारित्वात्तेषां, तथा 'होम'न्ति होमेन जुहोति तपोज्योतिरिति गम्यते, ऋषीणां-मुनीनां सम्बन्धिना 'पसत्थं'ति प्रशस्तेन जीवोपघातरहितत्वेन विवेकिभिः श्लाघितेन सम्यक्चारित्रेणेति भावः, अनेन च कतरेण होमेन जुहोषि ज्योतिरिति प्रत्युक्तमिति सूत्रार्थः ॥ तदेतेन 'किं माहना जोइसमारहंता' इत्यादिना लोकप्रसिद्धयज्ञानं स्नानस्य च निषिद्धत्वाद्यज्ञस्वरूपं तैः पृष्टं कथितं च मुनिना ॥

इदानीं स्नानरूपं पिपृच्छिषव इदमाहुः-

मू. (४०४) के ते हरए के य संतितित्थे ?, कहंसि न्हाओ व रयं जहासि ?।
आयक्ख णे संजय जक्खपूइया, ! इच्छासु नाउं भवओ सगासे ॥

वृ. कस्ते-तव 'ह्रदः' नदः ?, 'के च ते संतितित्थे'त्ति किं च ते-तव शान्त्यै-पापोपशमननिमित्तं तीर्थं-पुण्यक्षेत्रं शान्तितीर्थम्, अथवा 'कानि च' किंरूपाणि 'ते' तव 'सन्ति' विद्यन्ते 'तीर्थानि' संसारोदधितरणोपायभूतानि, लोकप्रसिद्धतीर्थानि हि त्वया निषिद्धानीति, तथा च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कहिंसि न्हाओ वे' ति वाशब्दस्य भिन्नक्रमत्वात्कस्मिन् वा स्नातः-शुचिर्भूतो रज इव रजः-कर्म्म जहासि-त्यजसि त्वं ?, गम्भीराभिप्रायो हि भवांस्तत् किमस्माकमिव भवतोऽपि ह्रदतीर्थ एव शुद्धिस्थानमन्यद्वेति न विद्म इति भावः, 'आचक्ष्व' व्यक्तं वद संयत! यक्षपूजित! 'इच्छामः' अभिलपामो 'ज्ञातुम्' अवगन्तुं 'भवतः' तव 'सकाशे' समीपे इति सूत्रार्थः ॥ मुनिराह-

मू. (४०५) *धम्मे हरए बंभे संतितित्थे, अनाविले अत्तपसन्नलेसे।*
जहिं सि न्हाओ विमलो विसुद्धो, सुसइभूओ पजहामि दोसं॥

वृ. 'धर्म्मः' अहिंसाद्यात्मको ह्रदः कर्म्मरजोऽपहन्तृत्वाद्ब्रह्मेति-ब्रह्मचर्यं शान्तितीर्थं, तदासेवनेन हि सकलमलमूलं रागद्वेषाबुन्मूलितावेव भवतः, तदुन्मूलनाच्च न कदाचिन्मल्य सम्भवोऽस्ति, सत्याद्युपलक्षणं चैतत्, तथा चाह-

"ब्रह्मचर्येण सत्येन, तपसा संयमेन च।
मातङ्गर्षिर्गतः शुद्धिं, न शुद्धितीर्थयात्रया॥"

अथवा 'ब्रह्मे'ति ब्रह्मचर्यवन्तो मतुब्लोपादभेदोपचाराद्वा साधव उच्यन्ते, सुब्व्यत्ययाच्चैकवचनं, 'संति' विद्यन्ते तीर्थानि ममेति गम्यते, उक्तं हि-

"साधूनां दर्शनं श्रेष्ठं, तीर्थभूता हि साधवः।
तीर्थं पुनाति कालेन, सद्यः साधुसमागमः॥"

किं च-भवत्प्रतीततीर्थानि प्राण्युपमर्द्दहेतुतया प्रत्युत मलोपचयनिमित्तानीति कुतस्तेषां शुद्धिहेतुता ?, तथा चोक्तम्-

"कुर्याद्वर्षसहस्रं त, अहन्यहनि मज्जनम्।
सागरेणापि कृत्स्नेन, वधको नैव शुद्ध्यति॥"

ह्रदशान्तितीर्थे एव विशिनष्टि-'अनाविले' मिथ्यात्वगुप्तिविराधनादिभिरकलुषे अनाविलत्वादेवात्मनो-जीवस्य प्रसन्ना-मानगप्यकलुषा पीताद्यन्यतरा लेश्या यस्मिंस्तदात्तप्रसन्नलेश्यं तस्मिन्, अथवा आप्ता-प्राणिनामिह परत्र च हिता प्राप्ता वा तैरेव प्रसन्नलेश्या-उक्तरूपा यस्मिंस्तदाप्तप्रसन्नलेश्यं तस्मिन्नेवंविधे धर्म्महृदे, ब्रह्माख्यशान्तितीर्थे च, यदा ब्रह्मशब्देन ब्रह्मचर्यवन्त उच्यन्ते तत्पक्षे वचनविपरिणामेन विशेषणद्वयं व्याख्येयं, 'जहिंसि'त्ति यत्रास्मि स्नात इव स्नातः-अत्यन्तशुद्धिभवनाद्विमलो-भावमलरहितोऽत एवाती(व)विशुद्धो-गतकलङ्कः, 'सुसीतीभूओ'त्ति सुशीतीभूतो रागाद्युत्पत्तिविरहतः सुष्ठु शैत्यु प्राप्तः, पठ्यते च-'सुसीलभूओ'त्ति सुष्ठु-शोभनं शीलं-समाधानं चारित्रं वा भूतः-प्राप्तः सुशीलभूतः 'प्रजहामि' प्रकर्षेण त्यजामि दूषयन्ति-विशुद्धमप्यात्मानं विकृतिं नयतीति दोषः-कर्म्म तं, अनेनैतदा- ममापि ह्रदतीर्थे एव शुद्धिस्थानं परमेवंविधे एवेति, निगमयितुमाह-

मू. (४०६) *एयं सिणाणं कुसलेण दिट्ठं, महासिणाणं इसिणं पसत्थं।*
जहिं सि न्हाया विमला विसुद्धा, महारिसी उत्तमं ठाणं पत्ति॥

वृ. 'एतदि'त्यनन्तरमुक्तं 'स्नानं' रजोहीनं 'कुशलैः' प्रागुक्तरूपैर्दष्टं-प्रेक्षितभिदमेव च महास्नानं, न तु युष्मत्प्रतीतम्, अस्यैव सकलमलापहारित्वाद्, अत एव चेदं ऋषीणां प्रशस्तं-प्रशंसास्पदं, न तु जलस्नानवत्सदोषतया निन्द्यम्, अस्यैव फलमाह-'जहिंसि'त्ति सुब्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्ययाद्येन स्नाता विमला विशुद्धा इति च प्राग्वत् महर्षयो-महामुनय उत्तमं स्थानं-मुक्तिलक्षणं 'प्राप्ताः' गता इति सूत्रद्वयार्थः ॥

इति परिसमाप्तौ, ब्रवमीति पूर्ववद्, गतोऽनुगमः, सम्प्रति नयास्ते च प्राग्वदेव ॥

अध्ययनं - १२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे द्वादशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्य विरचित टीका परिसमाप्ता

अध्ययनं - १३ - चित्रसंभूतिय

वृ. व्याख्यातं हरिकेशीयं नाम द्वादशमध्ययनम्, अधुना त्रयोदशममारभ्यते, अस्य चायमभिसंबन्धः--इहानन्तराध्ययने श्रुतवत्तपस्यपि यत्नो विधेय इति ख्यापयितुं तपःसमद्धिरभिहिता, इह तु तत्प्राप्तावपि निदानं परिहर्त्तव्यमिति दर्शयितुं यथा तत् महापायहेतुस्तथा चित्रसंभूतोदाहरणेन निदर्श्यत इति, जनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे चित्रसंभूतीयमिति नाम, अतश्चित्रसंभूतनिक्षेपाभिधानायाह निर्युक्तिकृत्-

नि.[३३०] चित्ते संभूअंमि अ निक्खेवो चउक्कओ दुहा दव्वे ।
आगमनोआगमओ नोआगमओ अ सो तिविहो ।

नि.[३३१] जाणगसरीरभविए तव्वतिरित्ते य सो पुनो तिविहो ।
एगभविअ बद्धाऊ अभिमुहओ नामगोए य ॥

नि.[३३२] चित्तेसंभूआउं वेअंतो भावओ अ नायव्वो ।
तत्तो समुट्ठिअमिणं अज्झयणं चित्तसंभूयं ॥

वृ. गाथात्रयं स्पष्टमेव, नवरं 'चित्तेसंभूयाउं'ति एकारोऽलाक्षणिकः, 'ततः समुत्थित'मिति ताभ्यां-चित्रसम्भू ताभ्यामभिधेयभूतामागतं, 'तेसुं'ति च पाटे तयोः 'समुत्थित'मिति भवं चित्रसंभूतीयं, 'वृद्धच्छः' इति छप्रत्यये वृद्धसञ्ज्ञा तु 'वा नामधेयं यस्ये'ति वचनात् ॥

सम्प्रति काविमौ चित्रसंभूतौ ? केन चानयोरत्राधिकारः ? इत्याशङ्क्याह-

नि.[३३३] सागए चंडवडिंगसयस्स पुत्तो अ आसि मुनिचंदो ।
सोऽवि अ सागरचंदस्स अंतिए पव्वए समणो ॥

नि.[३३४] तण्हाछुहाकिलंतं समणं दट्ठूण अडविनीहुत्तं ।
पडिलाहणा य बोही पत्ता गोवालपुत्तेहिं ॥

नि.[३३५] तत्तो दुन्नि दुगछं काउं दासा दसन्नि आयाया ।
दुन्नि अ उसुआरपुरे अहिगारो बंभदत्तेणं ॥

वृ. गाथात्रयमस्याप्यक्षरार्थः स्पष्ट एव, नवरं 'पव्वए समणो'त्ति प्राव्राजीत् समानं मनोऽस्येति समनाः- सर्वत्रारक्तद्विष्टचित्तः सन्, यद्वा श्राम्यतीति श्रमणः-तपस्वी सन्, निश्चयनयापेक्षं चैतत्, "नेरइए नेरइएसु उववज्जति" इत्यादिवत्, तथा 'अडविनीहुत्तं'ति अटवीनिःसृतम्, अरण्यान्निष्क्रान्तमित्यर्थः । भावार्थस्तु कथानकगम्यः, तच्चेदम्-अस्ति कोसलालङ्कारभूतं साकेतं नाम नगरं, तत्र चाभूदधिगतजीवाजीवादितत्त्वश्चन्द्रावतंसको नाम राजा, तस्य च धारिणी देवी,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदङ्गजो मुनिचन्द्रः, स च राजाऽन्यदा समुत्पन्नसंवेगस्तमेव सुतं राज्येऽभिषिच्य प्रव्रज्याम-शिश्रियत्, प्रतिपाल्य च प्रव्रज्यामपगतमलकलङ्कोऽपवर्गमगमत्।

अन्यदा च सागरचन्द्राचार्या बहुशिष्यपरिवृतास्तत्रागताः निर्गतश्च मुनिचन्द्रनृपतिस्तद्वन्दनाय, दृष्टाश्चानेन सूरयः, स्तुत्वा च तानुपविष्टस्तदन्तिके, श्रुतश्च तत्कथितो विशुद्धधर्मः, समुत्पन्नश्चास्य तत्करणाभिलाषः, ततः स्वसुतं राज्ये निवेश्य प्रतिपन्नोऽसौ श्रामण्यं, गृहीता चानेन ग्रहणासेवनो-भयलक्षणा शिक्षा, प्रवृत्ताश्चान्यदा सुसार्थेन सगच्छाः सागरचन्द्रसूरयोऽध्वानं, मुनिचन्द्रमुनिश्च तैः समं व्रजन् गुरुनियोगादेकाक्येव भक्तपाननिमित्तं क्वचित्प्रत्यन्तग्रामे प्राविशत्, प्रविष्टे चास्मिन् प्रवृत्तः सार्थो गन्तुं, प्रचलिताः सहानेन सूरयो, विस्मृतश्चायमेषां, प्रस्थितश्च क्षणान्तरेण गृहीतभक्तपानस्तदनुमार्गेण, पतितश्च मूढदिक्चक्रवालः सार्गवेषणापरो, मार्गात्परिभ्रष्टो भ्रमदनेकशार्दूलजालां द्विपकदम्बकभज्यमानशालशल्लकीप्रभृतितरुनिकरामनर्वाक्पारतया च संसारानुकारिणीं विन्ध्याटवीं, तत्र चासौ परिभ्रमन् गिरिकन्दराण्यतिक्रामन्नतिनिम्नोन्नतभूभागान् पश्यन् भयानकानेकद्वीपितरक्षाच्छभल्लादिश्वापदान् उत्तीर्णस्तृतीयदिने, तदा च क्षुत्क्षामकुक्षिः शुष्कोष्ठकण्ठतालुरेकत्र वृक्षच्छायायां मूर्च्छावशनष्टचेष्टो दृष्टश्चतुर्भिर्गोपालदारकैः, उत्पन्ना अमीषामनुकम्पा, सिक्तत्वरितमागत्य गोरसोन्मिश्रदृतिजलेन, पायितोऽसौ तदेव, समाश्वस्तश्च नीतो गोकुलं, प्रतिजागरितश्च तत्कालोचितकृत्येन, प्रतिलाभितः प्रासुकान्नादिना, कथितस्तेषा-मनेन जिनप्रणीतधर्मः, गृहीतश्चायमेतैर्भावगर्भं, गतश्चासौ विवक्षितस्थानं, तं च मलदिग्धदेहमव-लोक्य द्वयोः समजनि जुगुप्सा, तदनुकम्पातः सम्यक्त्वानुभावतश्च निर्वर्त्तितं चतुर्भिरपि देवायुः, जग्मुश्च देवलोकं, ततश्च्युतौ चाकृतजडुगुप्सौ तु कतिचिद्भवान्तरितौ द्वाविषुकारपुरे द्विजकुले जातौ, तद्वक्तव्यता च इषुकारीयनाम्यनन्तराध्ययनेऽभिधास्यते, यौ च द्वौ जुगुप्सकौ तौ दशार्ण-जनपदे ब्राह्मणकुले दासतयोत्पन्नौ, तयोश्च य इह ब्रह्मदत्तो भविष्यति तेनात्राधिकारो, निदान-स्यैवात्र वक्तुमुपक्रान्तत्वात्तेनैव च तद्विधानाद्, द्वितीयस्य तु प्रसङ्गत एवाभिधीयमानत्वात्, इह च नामनिष्पन्ननिक्षेपे प्रस्तुते प्रसङ्गतोऽर्थाधिकारोऽप्युक्त इति गाथात्रयभावार्थः।

उक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्यावसर इथि सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(४०७) जाईपराजिओ खलु कासि नियाणं तु हत्थिणपुरंभि।
चुलनीइ बंभदत्तो उववन्नो नलिन(पउम) गुम्माओ॥

वृ. 'जातिपराजितः' इति जात्या-प्रस्तावाच्चाण्डालाख्या पराजितः-अभिभूतः, स हि वाराणस्यां हस्तिनागपुरे च वक्ष्यमानन्यायतो नृपेण नमुचिनाम्ना च द्विजेन चाण्डाल इति नगर-निष्कासनन्यक्कारादिना पुरा जन्मन्यपमानित इत्येवमुक्तः, यद्वा जातिभिः-दासादिनीचस्थानो-त्पत्तिभिरुपर्युपरिजाताभिः पराजित इति-पराभवं मन्यमानोऽहो! अहमधन्यो यदित्थं नीचास्वेव जातिषु पुनः पुनरुत्पन्न इति, 'खलुः' वाक्यालङ्कारे, स चैवंविधः किमित्याह- 'कासि'त्ति अकार्षीत्, किमित्याह-'निदानं' चक्रवर्त्तिपदावाप्तिर्मम भवेदित्येवमात्मकं 'तुः' पूरणे, क्वेदं कृतवान्? इत्याह-'हत्थिणपुरंमि'त्ति हस्तिनागपुरे, चुलन्यां ब्रह्मदत्तः 'उववन्नो'त्ति उत्पन्नः 'पद्मगुल्मात्' इति नलिनगुल्मविमानाच्च्युत्वेति शेषः, इति सूत्राक्षरार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावार्थस्त्वयम्-स हि ब्रह्मदत्तः पूर्वजन्मनि वाराणस्या संभूतनामा चण्डालश्चितश्च तज्ज्येष्ठ आसीत्, तत्र च नमुचिनामा ब्राह्मणो ममान्तःपुरमपर्धषितमनेनेत्युत्पन्नकोपेन राज्ञा समर्पितो मारणनिमित्तं मातङ्गाधिपस्य तत्पितुः, उक्तश्चायमेतेन-यति मत्सुतौ सकलकलाकलापकुशलौ विधत्से ततोऽस्ति ते जीवितमन्यथा नेति, प्रारब्धं च तदर्थिनाऽनेन तद्गृह एवातिगुप्तस्थानस्थितेन तदध्यापनं, ग्राहितो तौ व्याकरणवीणापुरःसराः सकला अपि कलाः, अन्यदा च शुश्रूषापरायां तन्मातरि मोहोदयादयमुपपतित्वमाजगाम, ज्ञातस्तज्जनकेन, इष्टश्च मारयितुं, ज्ञातं तत्ताभ्यां, ज्ञापितं चास्मै, उपाध्यायोऽयभावयोस्ततो मा भूदस्यापदिति, तदवगमाच्च पलायितोऽसौ ततः स्थानात्, प्राप्तो हस्तिनागपुरं, कृतः सनत्कुमारचक्रवर्त्तिना मन्त्री।

इतश्च तौ चित्रसंभूतौ सातिशयगीतकलाक्षिप्ततरुणीजनात्यासक्तिहेतुतया त्याजितस्पृश्यास्पृश्य विभागौ जनेन राज्ञे निवेदितौ, यथाविनाशितं नगरमाभ्यां, निषिद्धस्तेन नगरस्यान्तस्तत्प्रचारः, कदाचिच्च तावतिकुतूहलतया कौमुदूमहविलोकनार्थमागतौ, दृष्टौ जनेन, कदर्थितावत्यर्थं, प्रवव्रजतुश्च तत एवोत्पन्नवैराग्यौ, जातौ विकृष्टतपोनिष्टप्तदेहौ, प्राप्ताश्चाभ्यां तेजोलेश्यादिलब्धयः, समापत्तितश्च गतौ हस्तिनागपुरं, प्रविष्टो मासक्षपणपारणके तत्र भिक्षार्थं संभूतयतिः, दृष्टश्च नमुचिना, जातोऽस्य चेतसि दुरध्यवसायो-मद्दुश्चरितमयंप्रकाशयिष्यतीति, निर्भर्त्सितो-धिग् मुण्डचाण्डाल! क्व नगरस्यान्तःऽप्रविष्टोऽसि? इत्यादिनिष्ठुरवचोभिः, प्रहत इष्टकोपलशकलादिभिस्तत्परिजनेन, तदनु च समस्तलोकेन, कुपितश्चासौ तेभ्यः समस्तजनदहनक्षमासह्यतेजोलेश्यां मोक्तुमुपचक्रमे, तत्र च मुखविनिर्यद्बहलधूमपटलान्धकारितदिक्चक्रवाले व्याकुलितः सान्तःपुरः सनत्कुमारचक्रवर्त्ती सकलो नगरलोकश्च समायातस्वत्पार्श्वे, तद्दत्तान्तश्रवणतश्चित्रश्च, प्रारब्धस्तैरनेकधा सान्त्वनवचनैरुपशमयितुं, तथाऽपि तत्रात्मानमस्मरत्यतिकोपवशगे भगवति मा भूदस्माकमकस्माद्भस्मीभवनमिति स्त्रीरत्नसहितो महीपतिस्तं क्षमयाम्बभूव, यथा-भगवन्! क्षमितव्यमस्माकमिदमिति, अस्मिंश्चान्तरे स्त्रीरत्नकोमलालकस्पर्शसमुत्पन्नतदभिलाषो विगलितानुशयश्चाण्डालजातिरेव ममैवमनेकधा कदर्थनाहेतुरिति चिन्तयंश्चित्रयतिना निवार्यमानोऽपि यदि ममास्य तपसः फलमस्ति तदाऽन्यजन्मनि चक्रवर्त्तित्वमेव मम भयाद् येनाहमप्येवं ललितललनाविलासास्पदमुत्तमजातिश्च भवामीति निदानवशगोऽनशनं प्रपेदे।

ततः स तपोऽनुभावतो नलिनगुल्मविमाने वैमानिकत्वेनाजनि, ततश्च च्युतश्चुलन्यां ब्रह्मदत्तः समुत्पेदे। क्व? इत्याह -

मू.(४०८/१) कंपिल्ले संभूओ।

वृ. 'काम्पिल्य' इति पञ्चालमण्डलस्य तिलक इव काम्पिल्यनाग्नि गनरे 'संभूत' इति पूर्वजन्मनि संभूतनामा। अमुं पादमतिक्रान्तसूत्रोत्तरपादद्वयं चैतद्गदितार्थप्रसङ्गायातार्थान्तराभिधानद्वारतः स्पृशन् सूत्रस्पर्शिकनिर्युक्तिमाह निर्युक्तिकृत्-

नि.[३३६] राया य तत्थ बंभो कडओ तइओ कणेरदत्तोति।
राया य पुप्फचूलो दीहो पुन होइ कोसलिओ॥

नि.[३३७] एए पंच वयंसा सव्वे सह दारदरिसिणो भोच्चा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवच्छरं अनूनं वसंति इक्किक्करज्जंमि ॥

नि.[३३८] राया य बंभदत्तो धनुओ सेनावई अ वरधनुओ।
इंदसिरी इंदजसा इंदुवसु चुलनिदेवीओ ॥

वृ. राजा च तत्र पाञ्चालेसु काम्पिल्ये 'ब्रह्म' इति ब्रह्मनामा कासीजनपदाधिपः कटकस्तृतीयः कुरुषु गजपुराधिपतिः कणेरुदत्त इति राजा च अङ्गेषु चम्पास्वामी पुष्पचूलो यः किल ब्रह्म-पत्न्याश्चुलिन्या भ्राता 'दीर्घ' इति दीर्घपृष्ठः पुनर्भवति कौशलिकः साकेतपुराधिपतिः एतेऽन-न्तरोक्ताः पञ्च वयस्यां 'सर्वे' समस्ताः सह दारान् पश्यन्तीत्येवंशीलाः सहदारदर्शिनः, किमुक्तं भवति ? - एककालकृतकलत्रस्वीकाराः समानवयस इतियावत् 'भोच्च' त्ति भूत्वा संव्वत्सरं वर्षम् 'अन्यूनं' परिपूर्णं 'वसन्ति' आसते, तत्कालापेक्षया वर्तमानता, 'एकैकराज्ये' एकैक-संबन्धिनि नृपतित्वे।

एष तावद्गाथाद्वयार्थः, तृतीयगाथा तु तात्पर्यतो व्याख्यायते-ब्रह्मराजस्येन्द्रश्रीप्रमुखाश्चतस्रो देव्यः, तत्र च चुलन्याः पुत्रोऽजनि, धनुर्नाम्नः सेनापतेरपि तत्रैवाहनि सुतः समुदपादि, कृतानि द्वयोरपि मङ्गलकौतुकानि, दत्तानि च दीनानाथेभ्यो दानानि, विहितं च स्वसमये राजपुत्रस्य ब्रह्मदत्त इति नाम, इतरस्य तु वरधनुरिति, कालक्रमेण च जातौ कलाग्रहणोचित्तौ, ग्राहितौ सर्वा अपि कलाः, अस्मिश्चान्तरे मरणपर्यवसानतया जीवलोकस्य मृतो ब्रह्मराजः, कृतमौद्धर्व-देहिकम्, अतिक्रान्तेषु च कतिपयदिनेषु तद्वयस्यैरभिषिक्तो राज्ये ब्रह्मदत्तः, पर्यालोचितं च तैः-तथैष नाद्यापि राज्यधुराधरणधौरेय इति पालयितुमुचितः कतिचित्संवत्सराणि, निरोपि-स्तैस्तत्र दीर्घपृष्ठः, गताः स्वस्वदेशेषु कटकादयः, जातश्च सर्वत्राप्रतिहतप्रवेशतया दीर्घपृष्ठस्य सह चुलन्या सम्बन्धः, ज्ञातं चैतदन्तःपुरपालिकया, न्यवेदि च तया धनुर्नाम्नः सेनापतिमन्त्रिणः सकलमपि तद्वृत्तं, निरूपितस्तेन वरधनुर्यथा न कदाचित्कुमारस्त्वया मोक्तव्य इति, आरब्ध-श्चासौ तथैवानुष्ठातुम्, अन्यदा चायं विदितदीर्घपृष्ठचुलनीवृत्तान्तः केनचिदुपायेनामू निवार-यामीति विजातिशकुनिकसङ्ग्रहणकमानीय कुमारायोपनिन्ये, तच्चातिनियमितमादायान्तः-पुरस्यान्तः किलान्योऽपि य एवं दुष्टशीलः सोऽस्माभिरित्थं नियन्त्रणीय इति तौ स्वयं स्वसहचरैश्च डिम्भैरुद्घोषयन्तौ प्रतिदिनमितश्चेतश्च भ्रमितुमारब्धौ, उपलब्धं च तत्ताभ्यामनुष्ठीयमानं दीर्घ-पृष्ठेन, कुपितश्चासौ कुमाराय, भणिता च चुलनी-यथाऽयमुपायेन केनापि विनाश्यतां यतो न विषकन्दल इवैष उपेक्षितः क्षेमङ्करोऽस्माकं भवेतेति, प्रतिपन्नं च तत्तया दुरन्ततया मोहोदयस्य, निरूपितश्च ताभ्यामुपायः-यथाऽस्मै पुष्पचूलमातुलेन स्वदुहिता पुष्पचूला नाम पूर्वदत्तेति तामसौ परिणाय्यते, कार्यते चैतच्छयनाय जतुगृहम्, एतश्च तन्मन्त्रितमशेषमपि तथैवान्तः पुररक्षिकया निवेदितं धनोः, तेनापि विनष्टमेतदिति पर्यालोच्य कुमारसंरक्षणाय प्रयत्नः कर्तु-मुपचक्रमे, तथाहि-पृष्टोऽसावनेन दीर्घपृष्ठो यथा वयमिदानीं वृद्धास्तत्किमिदानीमपरेण ?, युष्माभिरनुज्ञाता धर्ममेवैतत्कालोचितं कुर्मः, तेनालोचितं-यथैष दुरात्मा दूरस्थो न सून्दर इति, उक्तश्च-

यथैतत्त्वद्रहितमखिलमपि राज्यं विनश्यत्यत इहैव स्थितो जपहोमदानादिभिर्धर्ममुपचिनु, तेन चोक्तं-यदादिशन्ति भवन्तः, इत्युक्त्वा च गतः स्वगृहं, कारितं चानेन भागीरथ्यास्तटे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वनिवासस्थानं, निरूपितं तत्र सत्रं, खानिता च तत्र प्रत्ययिकपुरुषैर्जतुगृहं यावत्सुरङ्गा, ज्ञापिताऽसौ वरधनोः, इतश्च गणितं तत्परिणयनलग्नं, निष्पन्नं च जतुगृहं, प्रेषिता च मन्त्रिवचनतोऽन्यैव कन्यका मातुलेन, समागतो लग्नदिनः, कृतं सर्वसमृद्ध्योपयमनं, शायितश्च रजन्यां जतुगृहे कुमारः, प्रदीपितं च तद्द्वार एव सुप्तजनायां रजन्यां, ज्ञातं चासन्नस्थितेन वरधनुना, उत्थापितः कुमारो, दृष्टं च सर्वतः प्रदीप्तमेतेन, उक्तश्च वरधनुः-मित्र! किमिदानीं क्रियितामिति, तेनोक्तं-मा भैषीः, यतः प्रतिविहतमत्र तातेन, अत्रान्तरे चागतं नागकुमारद्वयानुकारि भुवन-मुद्भिद्य पुरुषद्वयम्, अभ्यधाश्च तत्-मा भैष्टाम्, आवां हि धनोर्गृहजातौ दासचेटकौ, तत्क्रियतां प्रसादो, निर्गम्यतां सुरङ्गामार्गेण, इत्युक्तौ च तौ गतौ सुरङ्गाद्वारं, दृष्टं च तत्र प्रधानगश्वद्वयम्, उक्तं च ताभ्यां चेटकाभ्याम्-एतावारुह्य देशान्तरापक्रमणेनात्मानं रक्षतां दीर्घपृष्ठाद्भवन्तौ यावत्क्वचिदवसरः शुभो भवति, ततस्तद्वचनमाकर्ण्य किं किमेतत् ? इत्याकुलितचेतसो ब्रह्मदत्तस्य कथितः सर्वोऽपि वरधनुना चुलनीवृत्तान्तः, अभिहितं च-यथेदमेवेदानीं प्राप्तकालमिति, विनिर्गतौ च तत्प्रधानमश्वयुगलमारुह्येति तृतीयगाथातात्पर्यार्थः।

एवं च प्राप्तावसरा ब्रह्मदत्तहिण्डी, ततस्तत्र ये कन्यालाभा ये च तत्पितरस्तदुपदर्शनाय गाथापञ्चकमाह-

नि.[३३९] चित्त अ विज्जुमाला विज्जुमई चित्तसेनओ भद्दा।
पंथग नागजसा पुन कित्तिमई कित्तिसेनो य॥

नि.[३४०] देवी अ नागदत्ता जसवइ रयणवइ जक्खहरिलो य।
वच्छी अ चारुदत्तो उसभो कच्चाइणी य सिलो॥

नि.[३४१] धनदेवे वसुमित्ते सुदंसणे दारुए य निअडिल्ले।
पुत्थी पिंगल पोए सागरदत्ते अ दीवसिहा॥

नि.[३४२] कंपिल्ले मलयवई वनराई सिंधुदत्त सोमा य।
तह सिंधुसेन पज्जुन्नसेन वाणीर पइगा य॥

नि.[३४३] हरिएसा गोदत्ता कणेरुदत्ता कनेरुपइगा य।
कुंजरकणेरुसेणा इसिवुड्ढी कुरुमई देवी॥

वृ. इदं च सोपस्कारतया व्याख्यायते-'चित्रश्च' चित्रनामा जनकस्तद्दुहितरौ विद्युन्माला विद्युन्मती च, तथा चित्रसेनकः पिता भद्रा च तद्दुहिता, तथा पन्थकः पिता नागजसा कन्यका, पुनः समुच्चये, तथा कीर्त्तिमती कन्या कीर्त्तिसेनश्च तत्पिता। तथा देवी च नागदत्ता यशोमती रत्नवती च, पिता च सर्वासामपि यक्षहरिलः, 'चः' समुच्चये, वच्छी च कन्या चारुदत्तः पिता, तथा वृषभो जनकः, कात्यायनसगोत्रा तत्सुता शिला नाम।

तथा धनदेवो नाम वणिक् अपरश्च वसुमित्रोऽन्यश्च सुदर्शनो दारुकश्च 'निकृतिमान्' मायापरः, चत्वारोऽमी कुक्कुटयुद्धव्यतिकरे मिलितास्तत्र च पुस्ती नाम कन्यका, तथा पिङ्गला नाम कन्या पोतश्च तत्पिता, सामस्तत्तश्च वणिक् तदङ्गजा च दीपशिखा। तथा काम्पिल्यः पिता मलयवती दुहिता, तथा वनराजी नाम कन्या तज्जनकश्च सिन्धुदत्तः, तथा तस्यैवान्या सोमा च नाम कन्या, तथा सिन्दुसेनप्रद्युम्नसेनयोर्यथाक्रमं वानीरनाम्नी प्रतिकाभिधाना चेति, पठ्यते च 'प्रतिभा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वे'ति, द्वे दुहितरौ।

तथा हरिकेशा गोदत्ता करेणुदत्ता करेणुपदिका च, 'कुंवरकरेणुसेण'त्ति सेनाशब्दस्य प्रत्येकमभिसंबन्धात्कुञ्जरसेना करेणुसेना च, ऋषिवृद्धिः कुरुमती च देवी सकलान्तःपुरप्रधाना अष्टौ, कुरुमती च स्त्रीरत्नं, ब्रह्मदत्तेनावासेति सर्वत्र शेषः, अतिप्रसिद्धत्वाच्च तदैतज्जनकनाम्नामनभिधानमिति गाथापपञ्चकार्थः ॥ अधुना येषु स्थानेषु असौ भ्रान्तस्तान्यभिधातुमाह-

नि.[३४४] कंपिल्लं गिरितडगं चंपा हत्थिणपुरं च साएयं।
समकडगं ओसाणं(नंदोसा)वंसीपासाय समकडगं ॥

नि.[३४५] समकडगाओ अडवी तण्हा वडपायवंमि संकेओ।
गहणं वरधनुअस्स य बंधनमक्कोसणं चेव ॥

नि.[३४६] सो हम्मई अमच्चो देहि कुमारं कहिं तुमे नीओ ?।
गुलियविरेयणपीओ कवडमओ छड्डिओ तेहिं ॥

नि.[३४७] तं सोईण कुमारो भीओ अह उप्पहं पलाइत्था।
काऊण थेररूवं देवो वोहेसिअ कुमारं ॥

नि.[३४८] वडपुरगबंभथलयं वडथलगं चेव होइ कोसंबी
वाणारसि रायगिहि गिरिपुर मुहुरा य अहिछत्ता ॥

नि.[३४९] वनहत्थी अ कुमारं जणयइ आहरण वसनगुणलुद्धो।
वच्चंतो अ पुराओ अहिछत्तं अंतरा गामो ॥

नि.[३५०] गहणं नईकुडंगं गहणतरागाणि पुरिसहिअयाणि।
देहाणि पुत्रपत्तं पिअं खुणो दोरओ जाओ ॥

नि.[३५१] सुपइट्ठे कुसकुंडि गहनतरागाणि पुरिसहिअयाणि।
देहाणि पुत्रपत्तं पिअं खुणो दारओ जाओ ॥

नि.[३५२] इंदपुरे रुद्दपुरे सिवदत्त विसाहदत्त धूआओ।
वडुअत्तनेण लहइ कन्नाओ दुन्नि रज्जं च ॥

नि.[३५३] रायगिहमिहिलहत्थिणपुरं च चंपा तहेव्र सावत्थी।
एसा उ नगरहिंडी बोद्धव्वा बंभदत्तस्स ॥

नि.[३५४] रयणुप्पया य विजओ बोद्धव्वो दीहरोसमुक्खे य।
संभरणनलिनिगुम्मं जाईइ पगासणं चेव ॥

वृ. गाथा एकादश, आसामपि तथैव व्याख्या, काम्पिल्यं पुरं यत्रास्य जन्म, ततोऽसौ गतो गिरितटकं सन्निवेशं तस्माच्चम्पां ततो हस्तिनागपुरं चानन्तरं च साकेतं साकेतात्मकटकं, ततश्च नन्दिनामकं संनिवेशं, ततोऽवश्यानकं नाम स्थानं, ततोऽपि चारण्यं परिभ्रमन् वंशीति-वंशगहनं तदुपलक्षितं प्रासादं वंशीप्रासादं, ततोऽपि समकटकं ॥

समकटकादटर्वी, तां च पर्यटतो ब्रह्मदत्तस्य तृडतिशयतः शुष्ककण्ठौष्ठतालुताऽजनि, ततस्तेनोक्तो वरधनुः-भ्रातः ! बाधते मां तृट्, तदुपाहर कुतोऽपि जलम्, अत्रान्तरे दृष्टोऽनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निटकवर्त्ती कटपादपः, शायितस्तत्र शीतलच्छाये तत्पल्लवोपरचितश्रस्तरे ब्रह्मदत्तः, कृतश्च वरधनुना तेन सह सङ्केतः- यथा यदि मां कथञ्चिद्दीर्घप्रहितपुरुषाः प्राप्स्यन्ति ततोऽहमन्योक्त्याऽभिज्ञानं करिष्ये, तत इतस्त्वया पलायितव्यमिति, गतोऽसौ जलान्वेषणाय, दृष्टं चैकत्र-पद्मिनीखण्डमण्डितं सरः, गृहीतं च पद्मिनीपत्रपुटके जलं, प्रवृत्तस्य च ब्रह्मदत्ताभिमुखमागन्तुं ग्रहणं तद्वटासन्नदेशे, कथञ्चिदुपलब्धतदपसरणवृत्तान्तैर्दीर्घपृष्ठप्रहितपुरुपैरतिरोषवद्भिर्वरधनोर्बन्धनं वल्लीवितानेन आक्रोशनं चैव दुष्टवचसा कृतं। अन्यच्च-स हन्यते मुष्टिप्रहारादिभिरमात्यो-वरधनुः, भण्यते च-यथा 'देही'ति ढोक्य कुमारमरे ! दुराचार ! क्व पुनरसौ नीतस्त्वया राजपुत्र इति ?, अत्रान्तरे सङ्केतमनुसरता पठितमिदमनेन-

'सहकारमञ्जरीमनुधावति मधुपो विमुच्य मधु मधुरम्।
कमले कलयन् पश्चात्सङ्कोचकृतां खतनुबाधाम्॥'

गुलीयविरेयणपीतो'त्ति प्राकृतत्वात्पीतविरेचनगुलिकः, स हि तैर्ग्रहीतुमुपक्रान्तोऽन्यथाऽऽत्मनो विमुक्तिमनवगच्छन् पूर्वलब्धां विरेचनगुटिकां प्रथममेव पयसा पीतवान्, विरक्तश्च तया, जाताश्च मुखे फेनबुद्बुदाः, एवं च कपटेन मृतः कपटमृतो मृत इति 'छर्दितः' त्यक्तस्तैः। इतश्च तत्पठितं श्रुत्वा कुमारो 'भीतः' इति त्रस्तः 'अथ' अनन्तरम् 'उप्पहं'ति उत्पथेन 'पलायित्थ'त्ति पलायितवान्, तथा च तं पलायमानमवलोक्य कृत्वा स्थविररूपं देवः किमस्य सत्त्वमस्त्युत नेति परीक्षणार्थं 'वाहेसिअ'त्ति वाहितवान् व्यंसितवानित्यर्थः कुवारं।

ततश्च परिभ्रमतो वटपुरकं तस्माच्च ब्रह्मस्थलकं वटस्थलकं चैव भवति विश्रामविषयः कौशाम्बी वाराणसी राजगृहं गिरिपुरं मथुरा अहिच्छत्रा च।

ततोऽपि गच्छताऽरण्यानीं प्रविष्टेन दृष्टास्तापसाः, प्रत्यभिज्ञातश्च तैर्ब्रह्मराजस्यास्मन्निजकस्य सुत इति, धृतश्चातुर्मासीं, तत्र च तापसकुमारकैः सह क्रीडतैकस्मिन् दिनेऽवलोकितो वनहस्ति, समुत्पन्नं च नृपसुतसुलभमस्य कुतूहलं, प्रारब्धश्च विविधगजशिक्षाभिरमुं खेदयितुं, आरूढश्च निष्पन्दीकृत्य तत्पृष्ठं, प्रवृत्तश्चासौ कुमारापहरणाय, वीक्षितश्च कियदपि दूरं गतेनैकस्तरुः, लग्नश्च तदधो व्रजति हस्तिनि विटपैकदेशे कुमारः, अपक्रान्ते च करिणि ततस्तरोरित्तीर्य विमूढदिग्भागो भ्रमितुमारेभे, भ्राम्यंश्चारण्याद्विनिर्गत्य गतो वटपुरं, वटपुराच्च प्रस्थितः श्रावस्तिं, गच्छंश्च प्राप्तस्तथाविधमेकमन्तरा ग्रामं, उपविष्टश्च तन्निकटविटपिनि विश्रमितुं, दृष्टश्चैकेन तत्रत्यश्रेष्ठिना, नीतश्च तेन स्वं गृहं, कृतं चाभ्यागतकर्त्तव्यं, परिणायितश्च नेमित्तिकादेशतः स्वदुहितरं, उपचरितश्च भुजगनिर्मोकसदृशैर्विविधवसनैर्लग्नेन्द्रनीलादिप्रधानमणिभिः कटककेयूरकुण्डलादिभिश्चाभरणैः, ततस्तद्गुणलुब्धमानसः स्थितस्तत्रैव कियत्कालं, जनयति तदा तद्दुहितरि कुमारं।

इतश्च प्राप्ताः कृतान्तानुकारिणो दीर्घपृष्ठप्रहितपुरुषाः, प्रारब्धाः समन्ततस्तमवलोकितुं, उपलब्धतद्वृत्तान्तश्च नष्टस्तद्भयात्, प्रचलितश्च सुप्रतिष्ठपुराभिमुखं गन्तुं, तत्र च मिलितः कश्चिद्विटः कार्पटिको, दृष्टं चाभिमुखमागच्छत् किञ्चित् तथाविधं मिथुनकं, दृष्ट्वा च तदङ्गनां उदाररूपां कुमारमयमवोचत्-यदि युष्मत्प्रसादतः कथञ्चिदेनां कामयेय इति, ततस्तदुपरोधात्तेनोक्तं-प्रविश तर्हि वंशीकुडङ्गं, स्थितः पथि कुमारः प्राप्तं च मिथुनं, उक्तस्तत्पतिः-मदीयं कलत्रमिह गर्भशूलाभ्याहतमास्ते तद्विसर्जय क्षणमेकं स्वकीयपत्नीं, विसर्जिता चासौ

तेनानुकम्पापरेण, दृष्टश्च तयाऽसौ, जातस्तस्यापि तदनुरागः, प्रवृत्तं च तयोर्मोहनकं, एवं च कियतीमपि वेलामतिक्रम्य विनिर्गताऽसौ कुडङ्गात्, उक्तं चात्मानं ख्यापयितुं कुमारं प्रति, यथा-गहनं नदीकुडङ्ग ततोऽपि गहनतराण्येव गहनतरकाणि पुरुषहृदयानि भवन्ति, अयं चानेन ध्वनितोऽर्थः-यथा वयं जानीमः स्त्रीहृदयान्यतिगहनानि भवच्चित्तेन च तान्यपि जितानीत्युक्त्वा प्रति प्रत्याययितुमाह-'देहाणि'न्ति देहीदानीं 'पूर्णपात्रम्' अक्षतभृतभाजनं प्रियं खलु 'नः' अस्माकं यद्दारको जात इति, ते (इति) वक्तव्ये यत्र इत्युक्तं तदैक्यं द्योतयितुं, इत्युक्त्वा च तया धूर्त्या गृहीतं ब्रह्मदत्तोत्तरीयं, गता च पत्यैव सह, ततश्च निर्गतोऽसौ कुडङ्गात्कृतपरिहासः प्रवृत्तो गन्तुं, प्राप्तः सुप्रतिष्ठं, तत्र च कुसकुण्डी नाम कन्या 'भिकुंडिवित्तासियंमि जियसत्तुं'ति आर्षत्वादुभयत्र सुब्व्यत्ययः, 'भिकुण्डिवित्रासिताद्' भिकुण्डिनामनृपतिनिष्काशितात् 'जितशत्रोः' जितशत्रुनामनृपतेः सकाशान्मथुरातोऽहिच्छत्रां व्रजन् 'अन्तरे' अन्तराले 'लभते' प्राप्नोति। तथेन्द्रपुरे शिवदत्तो नाम रुद्रपुरे च विशाखदत्ताभिधानस्तद्दुहितरौ 'बटुकत्वेन' दीर्घपृष्ठपुरुषभीत्या कृतब्राह्मणवेषेण लभते कन्ये द्वे राज्यं च।

ततो राजगृहं मिथिलां हस्तिनागपुरं चम्पां तथैव श्रावस्तीम्, अभ्रमीदिति शेषः 'एषा तु' अनन्तरमुपदर्शिता नगरहिण्डिर्बोद्धव्या ब्रह्मदत्तस्येति॥ एवं च भ्रमतोऽस्य मिलिताः कटक-करेणुदत्तादयः पितृवयस्याः, गृहीताः कियन्तोऽपि प्रत्यन्तराजानः, समुत्पन्नं चक्ररत्नं, प्रारब्ध-स्तदुपदर्शितमार्गेण दिग्विजयः, प्राप्तः काम्पिल्ये, निर्गतस्तदभिमुखं दीर्घपृष्ठो, लग्नमन-योरायोधनं, विनिपातितोऽसौ ब्रह्मदत्तेन, एवं च बोद्धव्यस्तस्य दीर्घपृष्ठविषयरोषमोक्षश्च, अत्रान्तरे मिलिताः परिणीतकन्यापितरः, समुत्पन्नानि च यथाऽवसरं शेषरत्नानि, साधितं षट्खण्डमपि भरतं, प्राप्ताश्च नवापि निधयः, परिणतं चक्रवर्त्तिपदं, एवं च सुकृतफलमुपभुञ्जतोऽतिक्रान्तः कियानपि कालः, अन्यदा चोपनीतं देवतया मन्दारदाम, समुत्पन्नं तद्दर्शनादस्य जातिस्मरणं-अनुभूतानि मयैवंविधकुसुमदामानि, अहं हि नलिनगुल्मविमाने देवोऽभवं॥ इत्येकादश-निर्युक्तिगाथार्थः।

इत्थं तावत्काम्पिल्ये संभूतश्चक्रवर्त्ती जातः, चित्रस्य तु का वार्त्तेत्याह-

मू.(४०८/२) *चित्तो पुण जाओ पुरिमतालंमि।*
सिट्ठिकुलंमि विसाले धम्मं सोऊण पव्वइओ॥

वृ. पादत्रयं, चित्रः पुनर्जातः पुरिमताले, स हि चित्रनामा महर्षिः तत्र संभूतिनाम्नि भ्रातरि तथाऽनशनं प्रतिपन्नवत्यहो दुरन्तो मोहश्चित्रा कर्मपरिणतिश्चञ्चलं चितमित्यादि विचिन्त्य चतुर्विधमप्याहारं प्रत्याख्यातवान्, मृत्वा च पण्डितमरणेन समुत्पन्नस्तत्रैव नलिनगुल्मनाम्नि विमाने, ततस्तत्र स्वस्थितिमनुपाल्योत्पन्नः पुरिमतालपुरे, तत्रापि क्वेत्याह-'श्रेष्ठिकुले' वणिक्-प्रधानान्वये 'विशाले' विस्तीर्णे पुत्रपौत्रादिवृद्धिमति, प्राप्तवयाश्च तथाविधस्थविरसन्निधौ 'धर्मं' यतिधर्मं क्षान्त्यादिकं 'श्रुत्वा' आकर्ण्य 'प्रव्रजितः' प्रव्रज्यां प्रतिपन्नवान् इति सूत्रभावार्थः॥ ततः किमित्याह-

मू.(४०९) *कंपिल्लंमि अ नयरे समागया दोऽवि चित्तसंभूया।*
सुहदुक्खफलविवागं कहिंति ते इक्कमिक्कस्स॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. काम्पिल्ये च नगरे-ब्रह्मदत्तोत्पत्तिस्थाने 'समादतौ' मिलितौ द्वावपि चित्रसंभूतौ जन्मान्तरनामतः 'सुखदुःखफलविपाकं' सुकृतदुष्कृतकर्मानुभवरूपं 'कहंति'त्ति कथयतः स्मेति शेषः, ततश्च कथितवन्तौ तौ चित्रजीवयतिब्रह्मदत्तौ 'एक्कमेक्कस्स'त्ति एकैकस्य परस्परमितियावत् इति सूत्राक्षरार्थः ॥ भावार्थस्तु निर्युक्तिकृतोच्यते-

नि.[३५५] जाईइ पगास निवेयणं च जाईपयासणं चित्ते।
चित्तस्स य आगमणं इड्ढिपरिच्चागसुत्तत्थो ॥

वृ. तदा हि ब्रह्मदत्तो जातिस्मरणोपलब्धस्वजातीनां 'दासा दसन्नये आसी' इत्यादिना सार्द्धश्लोकेन जनाय प्रकाशनं निवेदनं च-य इमं द्वितीयश्लोकं पूरयति तस्मै राज्यार्द्धमहं प्रयच्छामीति विहितवान्, ततस्तदर्थिना जनेनोद्घुष्यते, तद् ग्रामनगराकारादिषु पठ्यमानं चाकर्णितं कर्ण्योपकर्ण्या चित्रजीवयतिना, ततस्तथाविधज्ञानातिशयोपयोगतः स्वजातीरुपलभ्य जातोऽस्याभिप्रायो यथा-गत्वा तं जन्मान्तरनिजभ्रातरं संभूतजीवमवबोधयामीति, प्रस्थितस्ततः स्थानात्, प्राप्तः क्रमेण काम्पिल्यं, स्थितस्तद्बहिरुद्याने, श्रुतश्चारघट्टिकपरिपठ्यमानः सार्द्धश्लोकः, पूरितश्चानेन द्वितीयश्लोकः, अवधारितश्चारघट्टिकेन, धावितश्चासौ नृपसकाशं राज्यलोभेन, पठितं चैतेन तत्पुरतः, परिपूर्णं श्लोकद्वयं, जातस्तदाकर्णनात्तस्य चित्तावेशः, निरुद्धश्च तज्जनितमूर्च्छयाऽऽश्वासमार्गो, निमीलितं लोचनयुगलं, लुठितः स आसनात्, निपतितो भुवि, किमेतत् किमेतदित्यादिनाऽऽकुलितः सर्वोऽपि तत्परिच्छदः, दृष्टश्च तेनारघट्टिकः, ताडितः पार्ष्णिप्रहारादिभिः, आरटितमेतेन-न मयैतत्पूरितं न मयेति, किन्त्वन्येनैव भिक्षुणैतत्कलिकन्दमूलेनेति, अत्रान्तरे लब्धा चेतना, प्राप्तं च स्वास्थ्यं चक्रवर्त्तिना, उक्तं च-क्वासौ श्लोकपूरयिताऽऽस्त इति ?,

कथितस्तद्व्यतिकरो यथा-केनचिद् भिक्षुणैतत्पूरितं न त्वमुनेति, पृष्टं च पुनरनेन हर्षोत्फुल्लनयनयुगलेन-क्व तर्ह्यसाविति, कथितमारघट्टिकेन-देव! मदीयवाटिकायां, एतच्चाकर्ण्य प्रचलितः सबलवाहनः सकलान्तः पुरसमन्वितश्च तद्दर्शनाय, प्राप्तस्तदुद्यानं, दृष्टो मुनिः, वन्दितः सबहुमानं, उपवेशितश्चैकासने, पप्रच्छतुः परस्परमनामयं, कथयामासतुश्च यथास्वमनुभूतसुखदुःखफलविपाकं, तत्कथनानन्तरं च वर्णिता निजसमृद्धिश्चक्रवर्त्तिना, प्ररूपितस्तद्विपाकदर्शनतस्तत्परित्यागश्चित्रयतिना, एतावानेव प्रस्तुताध्ययनसूत्रस्यार्थोऽभिधेय इति सूत्रनिर्युक्तिगाथयोर्भावार्थः। सम्प्रति यदुक्तं-'सुखदुःखफलविपाकं तौ कथयामासतु'रिति, तत्र चक्रवर्त्ती यथा कथयामास तथा सम्बन्धपुरस्सरमाह-

मू.(४१०) *चक्कवट्टी महिड्ढीओ, बंभदत्तो महायसो।*
भायरं बहुमानेन, इमं वयणमब्बवी ॥

मू.(४११) *आसिमो भायरा दोऽवि, अन्नमन्नवसाणुगा।*
अन्नमन्नमनूरत्ता, अन्नमन्नहिएसिणो ॥

मू.(४१२) *दासा दसन्नये आसी, मिआ कालिंजरे नगे।*
हंसा मयंगतीराए, सोवागा कासिभूमिए ॥

मू.(४१३) *देवा य देवलोगंमि, आसि अम्हे महिड्ढिआ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमा नो छट्ठिया जाई, अन्नमन्नेण जा विना ॥

वृ. चक्रवर्त्ती 'महर्द्धिक:' वृहद्विभूतिर्ब्रह्मदत्तो महायशा: 'भ्रातरं' जन्मान्तरसोदर्यं 'बहुमानेन' मानसप्रतिबन्धेन 'इदं' वक्ष्यमानलक्षणं 'वचनं' वाक्यं 'अब्रवीद्' इत्युक्तवान्, यथा 'आसिमो'त्ति अभूवावां भ्रातरौ द्वावपि 'अन्योऽन्यं' वन्तौ, तथा अन्यौऽन्यहितैषिणौ' परस्परशुभाभिलाषिणौ, पुन: पुनरन्योऽन्यग्रहणं च तुल्यचित्ततातिशयख्यापनार्थं, मकारश्च सर्वत्रालाक्षणिक:।

केषु पुनर्भवेष्वित्थमावामभूवेत्याह-दासौ 'दशार्णे' दशार्णदेशे 'आसि'त्ति अभूव, मृगौ 'कालिञ्जरे' कालिञ्जरनाम्नि नगे, हंसौ 'मृतगङ्गातीरे' उक्तरूपे, 'श्वपाकौ' चाण्डालौ 'कासि-भूमिए'त्ति काशीभूम्यां काश्यभिधाने जनपदे, देवौ च देवलोके सौधर्माभिधानेऽभूव 'अह्ने'त्ति आवां महर्द्धिकौ न तु किल्बिषिकौ, 'इमा मे'त्ति 'इमा नो'त्ति वा उभयत्रेयमावयो: षष्ठ्येव षष्ठिका जाति:, कीदृशी येत्याह-'अन्नमन्नेणं'ति अन्योऽन्येन परस्परेण या विना, कोऽर्थ: ?-परस्परसाहित्यरहिता, वियुक्तयोर्यकेति भाव इति सूत्रचतुष्टयार्थ: ॥

इत्थं चक्रवर्तिनोक्ते मुनिराह-

मू. (४१४) कम्मा नियाणप्पगडा, तुमे राय ! विचिंतिया।
तेसिं फलविवागेणं, विप्पओगमुवागया ॥

वृ. 'कर्माणि' ज्ञानावरणादीनि नितरा दीयन्ते-लूयन्ते दीयन्ते वा खण्ड्यन्ते तथाविधसानु-बन्धफलाभावतस्तप:-प्रभृतीन्यनेनेति निदानं-साभिष्वङ्गप्रार्थनारूपं तेन प्रकर्षेण कृतानि-विहितानि निदानप्रकृतानि, निदानवशनिबद्धानीति योऽर्थ:, त्वया राजन् ! विचिन्तितानीति, तद्धेतुभूतार्त्तध्यानादिध्यानत: कर्माण्यपि तथोच्यन्ते 'तेषाम्' एवंविधकर्मणां फलं चासौ विपाकश्च-शुभाशुभजनकत्वलक्षण: फलविपाकस्तेन, यद्वा कर्माणि-अनुष्ठानानि 'नियानप-यड'त्ति निदानेनैव शेषशुभानुष्ठानस्याच्छादितत्वात्प्राग्वत्प्रकटनिदानानि त्वया राजन् ! विचिन्तितानि कृतानीतियावत्, तेषां फलं क्रमात्कर्म तद्विपाकेन 'विप्रयोगं' विरहं 'उपागतौ' प्राप्तौ, किमुक्तं भवति ?-यत्तदा त्वयाऽस्मन्निवारितेनापि निदानमनुष्ठितं तत्फलमेतद् यदावयोस्तथाभूतयोरपि वियोग इति सूत्रार्थ: ॥ इत्थमवगतवियोगहेतुश्चक्री पुन: प्रश्नयितुमाह-

मू. (४१५) सच्चसोअप्पगडा, कम्मा मए पुरा कडा।
ते अज्ज परिभुंजामो, किं नु चित्तेवि से तहा ? ॥

वृ. सत्यं-मृषाभाषापरिहाररूपं शौचम्-अमायमनुष्ठानं ताभ्यां प्रकटानि-प्रख्यातानि कर्माणि-प्रक्रमाच्छुभानुष्ठानानि शुभप्रकृतिरूपाणि वा मया पुरा कृतानि, यानीति गम्यते, तानि 'अद्य' अस्मिन्नहनि, शेषतद्भवकालोपलक्षणं चैतत् 'परिभुंजामो'त्ति परिभुञ्जे-तद्विपाको-पनतस्त्रीरत्नादिपरिभोगद्वारेण वेदये, यथेति गम्यते, किमिति प्रश्ने, 'नु' इति वितर्के, 'चित्रोऽपि' चित्रनामाऽपि, कोऽर्थ: ?- भवानपि 'से' इति तानि तथा परिभुङ्क्ते ?, नैव भुङ्क्ते, भिक्षुकत्वाद्भवत:, तथा च किमिति भवताऽपि मयैव सहोपार्जितानि शुभकर्माणि विफला-निजातानीत्याशय इति सूत्रार्थ: ॥ मुनिराह-

मू. (४१६) सव्वं सुचिण्णं सफलं नराणं, कडाण कम्मान न मुक्खु अत्थि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थेहि कामेहि अ उत्तमेहिं, आया ममं पुन्नफलोववेओ ॥

वृ. 'सर्वं' निरवशेषं 'सुचीर्णं' शोभनमनुष्ठितं, तपःप्रभृतीति गम्यते, चीर्णशब्दस्य 'सुचीर्णं' प्रोषितव्रत'मित्यादिरूढितः साधुत्वं, सह फलेन वर्त्तत इति सलेन वर्त्तत इति सफलं, नराणामिति, उपलक्षणत्वादशेषाणामपि प्राणिनां, किमिति ?, यतः कृतेभ्यः-अर्थादवश्यवेद्यतयोपरचितेभ्यः कर्मभ्यो न 'मोक्षः' मुक्तिरस्तीति, ददति हि तानि निजफलमवश्यमिति भावः, प्राकृतत्वाच्च सुब्व्यत्ययः, स्यादेतत्-त्वयैव व्यभिचार इत्याह-'अर्थैः' द्रव्यैरर्थैर्वा-प्रार्थनीयैः, वस्तुभिरिति गम्यते, कामैश्च-मनोज्ञशब्दादिभिः 'उत्तमैः' प्रधानैः, लक्षणे तृतीया, तत एतदुपलक्षितः सन्नात्मा मम पुण्यफलेन-शुभकर्मफलेनोपपेतः-अन्वितः स पुण्यफलोपपेतः इति ॥

यथा त्वं 'जानासि' अवधारयसि 'संभूत!' पूर्वजन्मनि संभूताभिधान! 'महानुभागं' बृहन्माहात्म्यं 'महर्द्धिकं' सातिशयविभूतियुक्तम् अत एव पुण्यफलोपेतं चित्रमपि 'जानीहि' अवबुद्धस्व 'तथैव' अविशिष्टमेव 'राजन्!' नृप!, किमित्येवमत आह-ऋद्धिः-सम्पत् द्युतिः-दीप्तिस्तस्यापीति-जन्मान्तरनामतश्चित्राभिधानस्य, ममापीति भावः, चशब्दो यस्मादर्थे, ततो यस्मात्प्रभूता-बह्वीत्यर्थः, यद्वाऽऽत्मा मम पुण्यफलोपेत इति, अनेन चित्र एवात्मानं निर्दिशति, तथा जानीहि संभूत इत्यादौ आत्मेत्यनुवर्त्तते, अर्थवशाच्च विभक्तिपरिणामः, ततश्चैवं योज्यते- हे संभूत! यथा त्वमात्मानं महानुभागादिविशेषणविशिष्टं जानासि तथा चित्रमपि जानीहि, चित्रनाम्नो ममापि गृहस्थभावे एवंविधत्वादेवेति भावः, शेषं प्राग्वत् ॥

मू. (४१७) *जानाहि संभूय! महानुभागं, महिड्ढियं पुन्नफलोववेयं।*
चित्तंपि जानाहि तहेव रायं!, इड्ढी जुई तस्सवि अप्पभूआ ॥

मू. (४१८) *महत्थरूवा वयणप्पमूया, गाहानुगीया नरसंघमज्झे।*
जं भिक्खुणो सीलगुणोववेया, इहऽज्जयंते समणोऽम्हि जाओ ॥

वृ. यदि तवाप्येवंविधा समृद्धिरासीत् तत्किमिति प्रव्रजित इत्याह-महान्-अपरिमितोऽनन्तद्रव्यपर्यायात्मकतयाऽर्थः-अभिधेयं यस्य तन्महार्थं रूपं-स्वरूपं न तु चक्षुर्ग्राह्यो गुणः, ततो महार्थं रूपं यस्याः सा तथा, महतो वाऽर्थान्-जीवादितत्त्वरूपान् रूपयति-दर्शयतीति महार्थरूपा, 'वयणप्पभूय'त्ति वचनेन अप्रभूता अल्पभूता वा-अल्पत्वं प्राप्ता वचनाल्पभूता वचनात्प्रभूता वा स्तोकाक्षरेतियावत्, केयमीदृशीत्याह-गीयत इति गाथा, सा चेहार्थाद्धर्माभिधायिनी सूत्रपद्धतिः, अन्विति-तीर्थकृद्गणधरादिभ्यः पश्चाद्गीता अनुगीता, कोऽर्थः ?-तीर्थकरादिभ्यः श्रुत्वा प्रतिपादिता स्थविरैरिति शेषः, अनुलोमं वा गीताऽनुगीता, अनेन श्रोत्रनुकूलैव देशना क्रियते इति ख्यापितं भवति। क्वेत्याह-नराणां-पुरुषाणां सङ्घः-समूहस्तन्मध्ये, गाथामेव पुनर्विशेषयितुमाह-'यां' गाथां 'भिक्षवः' मुनयः शीलं-चारित्रं तदेव गुणः, यद्वा गुणः पृथगेव ज्ञानं, ततः शीलगुणेन शीलगुणाभ्यां वा-चारित्रज्ञानाभ्यामुपेताः-युक्ताः शीलगुणोपेताः 'इह' अस्मिन् जगति 'अज्जयंते'त्ति अर्जयन्ति पठनश्रवणतदर्थानुष्ठानादिभिरावर्जयन्ति। यद्वा 'जं भिक्खुणो' इत्यत्र श्रुत्वेति शेषः, ततो यां श्रुत्वा 'जयंति'त्ति 'इह' अस्मिन् जिनप्रवचने 'यतन्ते' यत्नवन्तो भवन्ति, सोपस्कारत्वात्सा मयाऽप्याकर्णिता, ततः 'श्रमणः' तपस्वी अस्मि अहं जातो, न तु दुःखदग्धत्वादिति भावः, पठ्यते च-'सुमणो'त्ति सुमनाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोभनमना इति सूत्रत्रयार्थः ॥ इत्थं मुनिनाऽभिहिते ब्रह्मदत्तः स्वसमृद्ध्या निमन्त्रयितुमाह-

मू. (४१९) *उच्चोअए महुकक्के य बंभे, पवेइया आवसहा य रम्मा।*
इमं गिहं वित्तधनप्पभूयं, पसाहि पंचालगुणोववेयं ॥

वृ. उच्चोदयो मधुः कर्कः, चशब्दान्मध्यो ब्रह्मा च पञ्च प्रधानाः प्रासादाः, प्रवेदिताः, मम वर्द्धकिपुरःसरैः सुरैरुपनीता इत्यर्थः, 'आवसथाश्च' शेषभवनप्रकारा 'रम्याः' रमणीयाः, पाठान्तरतश्च आवसथाः अतिरम्याः अतिरम्याः-सुरभ्या वा, एते तु यत्रैव चक्रिणे रोचते तत्रैव भवन्तीति वृद्धाः, किञ्च-'इदं' प्रत्यक्षं 'गृहम्' अवस्थितप्रासादरूपं वित्तं-प्रतीतं तच्च तद्धनं च-हिरण्यादि तेनोपेतं-युक्तं वित्तधनोपेतं, पठन्ति च 'चित्तधणप्पभूयं'ति, तत्र प्रभूतं-बहु चित्रम्-आश्चर्यमनेकप्रकारं वा धनमस्मिन्निति प्रभूतचित्रधनं, सूत्रे तु प्रभूतशब्दस्य परनिपातः प्राग्वत्, 'प्रसाधि' प्रतिपालय पञ्चाला नाम जनपदस्तस्मिन् गुणा-इन्द्रियोपकारिणो रूपादयस्तैरूपेतं पञ्चालगुणोपेतं, किमुक्तं भवति ?-पञ्चालेषु यानि विशिष्टवस्तु तत् तद्गेह एव तदासीत्।

मू. (४२०) *नट्टेहि गीएहि य वाइएहिं, नारीजनाहिं परिवारयंतो।*
भुंजाहि भोगाइं इमाइं भिक्खू !, मम रोअई पव्वज्जा हु दुक्खं ॥

वृ. किं च 'नट्टेहिं'ति द्वात्रिंशत्पात्रोपलक्षितैर्नाट्यैर्नृत्यैर्वा-विविधाङ्गहारादिस्वरूपैर्गीतैः-ग्रामस्वरमूर्च्छनालक्षणैः, चस्य भिन्नक्रमत्वात्, 'वाइएहिं'ति वादित्रैश्च मृदङ्गमुकुन्दादिभिः 'नारीजनान्' स्त्रीजनान्-परिदृश्यमानान्, सूत्रत्वात् सर्वत्र लिङ्गव्यत्ययः, भिक्षो!, इह तु यद्गजतुरङ्गमाद्यनभिधाय स्त्रीणामेवाभिधानं तत् स्त्रीलोलुपत्वात्तस्य, तासामेव वाऽत्यन्ताक्षेपकत्वख्यापनार्थं, कदाचिच्चित्रो वदेदित्थमेव सुखमित्याह-मह्यं 'रोचते' प्रतिभाति प्रव्रज्या, 'हुः' अवधारणे भिन्नक्रमश्च, दुःखमेव, न मनागपि सुखं, दुःखहेतुत्वादिति भाव इति सूत्रद्वयार्थः ॥

इत्थं चक्रिणोक्ते मुनिः किं कृतवान् ? इत्याह-

मू. (४२१) *तं पुव्वनेहेण कयानुरागं, नराहिवं कामगुणेसु गिद्धं।*
धम्मस्सिओ तस्स हियानुपेही, चित्तो इमं वयणमुदाहरित्था ॥

वृ. 'तं' ब्रह्मदत्तं 'पूर्वस्नेहेन' जन्मान्तरप्ररूढप्रणयेन 'कृतानुरागं' विहिताभिष्वङ्गं 'नराधिपं' राजानं 'कामागुणेषु' अभिलष्यमानशब्दादिषु 'गृद्धम्' अभिकाङ्क्षान्वितं 'धर्माश्रितः' धर्मस्थितः 'तस्य' इति चक्रिणः हितं-पथ्यम् अनुप्रेक्षते-पर्यालोचयतीत्येवंशीलो हितानुप्रेक्षी-कथं नु नामास्य हितं स्यादिति विचिन्तनपरश्चित्रजीवयतिरिदं वाक्यं पाठान्तरतो वचनं वा 'उदाहरित्थ'त्ति 'उदाहृतवान्' उक्तवानिति सूत्रार्थः ॥ किं तदुदाहृतवानित्याह-

मू. (४२२) *सव्वं विलवियं गीयं, सव्वं नट्टं विडंबणा।*
सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥

वृ. 'सर्वम्' अशेषं विलपितमिव विलपितं निरर्थकतया रुदितयोनितया च, तत्र निरर्थकतया मत्तबालकगीतवत् रुदितयोनितया च विरहावस्थमृतप्रोषितभर्तृकागीतवत्, किमित्याह-'गीतं' गानं, तथा सर्वं 'नृत्यं' गात्रविक्षेपणरूपं विडम्बितमिव विडम्बितं, यथा हि यक्षाविष्टः पीतमद्यादिर्वा यतस्ततो हस्तपादादीन् विक्षिपति, एव नृत्यन्नपीति, तथा सर्वाणि 'आभरणानि'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुकुटाङ्गदादीनि 'भाराः' तत्त्वतो भाररूपत्वात्तेषां, तथाविधवनिताभर्तृकारितसुवर्ण-स्थगितशिलापुत्रकाभरणवत्, सर्वे 'कामाः' शब्दादयो 'दुःखवहाः' मृगाजीनामियायतौ दुःखा-वाप्तिहेतुत्वात्, मत्सरेर्ष्याविषादादिभिश्चित्तव्याकुलत्वोत्पादकत्वान्नरकादिहेतुत्वाच्चेति।

मू. (४२३) बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं !।
विरत्तकामान तवोधनानं, जं भिक्खुणं सीलगुणे रयाणं ॥

वृ. तथा बालानां-विवेकरहितानामभिरामाः-चित्ताभिरतिहेतवो ये तेषु 'दुःखावहेषु' उक्तन्यायेन दुःखप्रापकेषु न तत्सुखं 'कामगुणेषु' मनोज्ञशब्दादिषु, सेव्यमानेष्विति शेषः, 'राजन!' पृथ्वीपते! 'विरत्तकामानं'त्ति प्राग्वत्, कामविरक्तानां-विषयपराङ्मुखानां तप एव धनं येषां ते तपोधनास्तेषां यत्सुखमिति सम्बन्धः, 'भिक्षुणां' यतीनां शीलगुणयोर्वा सूत्रत्वाद् 'रतानां' आसक्तानामिति सूत्रद्वयार्थः ॥ बालेत्यादिसूत्रं चूर्णिकृता न व्याख्यातं, क्वचित्तु दृश्यत इत्यस्माभिरुन्नीतं ॥ सम्प्रति धर्मफलोपदर्शनपुरःसरमुपदेशमाह-

मू. (४२४) नरिंद जाई अहमा नराणं, सोवागजाई दुहओ गयाणं।
जहिं वयं सव्वजनस्स वेसा, वसीअ सोवागनिवेसनेसुं ॥

वृ. 'नरेन्द्र!' चक्रवर्त्तिन्! जायन्तेऽस्यामिति जातिः 'अधमा' निकृष्टा 'नराणां' मनुष्याणा मध्ये 'श्वपाकजातिः' चाण्डालजातिः 'दुहतो'त्ति द्वयोरपि 'गतयोः' प्राप्तयोः, किमुक्तं भवति?-यदाऽऽवां श्वपाकजातावुत्पन्नौ तदा सर्वजनगर्हिता जातिरासीत्, कदाचित्तामवाप्याप्य-न्यत्रैवोषितौ स्यातामित्याह-यस्यां वयं प्राग्वच्च बहुवचनं, 'सर्वजनस्य' अशेषलोकस्य 'द्वैष्यौ' अप्रीतिकरौ 'वसीय'त्ति अवसाय-उषितौ, केषु?-श्वपाकानां निवेशनानि-गृहाणि श्वपाक-निवेशनानि तेषु, कदाचित्तत्रापि विज्ञानविशेषादिनाऽहीलनीयावेव स्यातामित्याह-

मू. (४२५) तीसे अ जाईइ उ पावियाए, वुच्छा मु सोवागनिवेसणेसुं।
सव्वस्स लोगस्स दुगुंछणिज्जा, इहं तु कम्माइं पुरेकडाइं ॥

वृ. तस्यां च जातौ श्वपाकसम्बन्धिन्यां च, 'तुः' विशेषणे, ततश्च जात्यन्तरेभ्यः कुत्सि-तत्वं विशिनष्टि, पापैव पापिका तस्यां कुत्सितायां, पापहेतुभूतत्वेन वा पापिका तस्यां, प्रापि-कायां वा नरकादिकुगतेरिति गम्यते, 'वुच्छे'ति उषितौ 'मु' इत्यावां, केषु?-श्वपाकनिवेशनेषु, कीदृशौ?-सर्वस्य लोकस्य 'जुगुप्सनीयौ' हीलनीयौ 'इह' इत्यस्मिन् जन्मनि 'तुः' पुनरर्थस्तत इह पुनः 'कर्माणि' शुभानुष्ठानानि 'पुरेकडाइं'ति पूर्वजन्मोपार्जितानि विशिष्टजात्यादिनिबन्ध-नानीति शेषः, तत उत्पन्नप्रत्ययैः पुनस्तदुपार्जन एव यत्नो विधेयो न तु विषयाभिष्वङ्गव्या-कुलितमानसैरेव स्थेयमिति भाव इति ॥

मू. (४२६) सो दानि सिं राय! महानुभागो महिड्डिओ पुन्नफलोववेओ।
चइत्तु भोगाइं असासयाइं, आयाणहेउं अभिनिक्खमाहि ॥

वृ. यतश्चैवमतः 'सः' इति यः पुरा संभूतनामाऽनगारा आसीद् 'इदानीम्' अस्मिन् काले 'स'त्ति पूरणे यद्वा 'दाणिंसिं'ति देशीयभाषयेदानीं राजा महानुभागो महर्द्धिकः पुण्यफलोपेतश्च सन् दृष्टधर्मफलत्वेनाभिनिष्क्रोमेति सम्बन्धः, अथवा सोपस्कारत्वाद्यत् स एव त्वमिदानीं राजा महानुभागताद्यनवित इह जातस्तत्कर्माणि पुराकृतानीति पूर्वेण सम्बन्धः, कोऽर्थः?-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुराकृतकर्मविजम्भितमेवैतत्, कथमन्यथा तथाभूतस्यैवंविधसमृद्धवाप्तिरिति भावः, यतश्चैवमतोऽभिनिष्क्रामेति सम्बन्धः, किं कृत्वेत्याह-'त्यक्त्वा' अपहाय भुज्यन्त इति भोगाः-द्रव्यनिचयाः कामा वा तान् 'अशाश्वतान्' अनित्यान् आदीयते-सद्विवेकैर्गृह्यत इत्यादानः-चरित्रधर्मस्तद्धेतोरभिनिष्क्राम-आभिमुख्येन प्रव्रजितो भव, गृहस्थतायां हि न सर्वविरतिरूप-चारित्रम्भव इति भावः, पठन्ति च-'आयाणमेवा अनुचिंतयाही'ति, स्पष्टमिति सूत्रत्रयार्थः ॥

क एवमकरणे दोष इत्याह-

मू. (४२७) इह जीविए राय! असासयंमि, धनियं तु पुन्नाइं अकुव्वमानो।
से सोअई मच्चुमुहोवनीए, धम्मं अकाऊण परंमि लोगे॥

वृ. इह'जीविते' मनुष्यसम्बन्धिन्यायुपि राजन्! 'अशाश्वते' अस्थिरे 'धनियं तु'त्ति अतिशयेनैव न तु ध्वजपटप्रान्ताद्यन्यास्थिरवस्तुसाधारणतया 'पुण्यानि' पुण्यहेतुभूतानि शुभानुष्ठानान्यकुर्वाणः 'सः' इति पुण्यानुपार्जकः 'शोचते' दुःखार्त्तः पश्चातापं विधत्ते, मृत्युः-आयुःपरिक्षयस्तस्य मुखमिव मुखं मृत्युमुखं-शिथिलीभवद्बन्धनाद्यवस्था तदुपनीतस्त-थाविधकर्मभिरुपढौकितो मृत्युमुखोपनीतः सन् 'धर्मं' शुभानुष्ठानम् 'अकृत्वा' अननुष्ठाय 'परंमि'त्ति चस्य गम्यमानत्वात् परस्मिंश्च 'लोके' जन्मान्तररूपे, गत इति शेषः, नरकादिषु ह्यसह्यासातवेदनार्दितशरीरः शशिनृपतिवत्किं न मया तदैव सदनुष्ठानमनुष्ठितमिति खिद्यत एवाधर्मकारीति सूत्रार्थः ॥ स्यादेतत्-मृत्युमुखोपनीतस्य परत्र वा दुःखाभिहतस्य स्वजना-दयस्त्राणाय भविष्यन्ति, ततो न शोचिष्यन्ते इत्याशङ्क्याह-

मू. (४२८) जहेह सीहो व मियं गहाय, मच्चू नरं नेइ हु अंतकाले।
न तस्स माया व पिया व भाया, कालंमि तंमंसहरा भवंति॥

वृ. 'यथे'त्यौपम्ये 'इहे'ति लोके 'सिंहः' मृगपतिः, वेति पूरणे, यद्वा वाशब्दोऽयं विकल्पार्थे, ततो व्याघ्रादिर्वा 'मृगं' कुरङ्गं 'गृहीत्वा' उपादाय प्रक्रमात्खमुखं परलोकं वा नयतीति सम्बन्धः, एवं 'मृत्युः' कृतान्तः 'नरं' पुरुषं नयति 'हुः' अवधारणे, ततो नयत्येव, कदा?-अन्तकाले जीवितव्यावसानसमये, कुमुक्तं भवति?-यथाऽसौ सिंहने नीयमानो न तस्मै अलम्, एवमयमपि जन्तुर्मृत्युना, कदाचित्स्वजनस्तत्र साहय्यं करिष्यत्यत आह-न तस्यमृत्युना नीयमानस्य माता वा पिता वा 'भाय'त्ति वाशब्दस्येह गम्यमानत्वाद्भ्राता वा 'काले तस्मिन्' जीवितान्तरूपे अंशं-प्रक्रमाज्जीवितव्यभागं धारयन्ति-मृत्युना नीयमानं रक्षन्तीत्यंशधराः, यथा हि नृपादौ स्वजनसर्वस्वमपहरति स्वद्रविनदानतः स्वजनादिभिस्तद्रक्ष्यते नैवं स्वजीवितव्यांशदानतस्त-ज्जीवितं मृत्युना नीयमानम्, उक्तं हि-

"न पिता भ्रातरः पुत्रा, न भार्य न च बान्धवाः।
न शुक्ताः मरणात्त्रातुं, शक्ताः संसारसागरे॥"इति,

अथवाऽंशो-दुःखभागस्तं हरन्ति-अपनयन्ति ये तेऽंशहरा भवन्तीति, इदमेवाभिव्यनक्ति, आद्यव्याख्याने तु स्यादेतद्-जीवितारक्षणेऽपि दुःखांशहारिणो भविष्यन्त्यत आह-

मू, (४२९) न तस्स दुक्खं विभयंति नायओ, न मित्तवग्गा न सुआ न बंधवा।
इक्को सयं पच्चनुहोइ दुक्खं, कत्तारमेवं अनुजाइ कम्मं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. न तस्य-मृत्युना नीयमानस्य तत्कालभाविना दुःखेनात्यन्तपीडितस्य दुःखं शारीरं मानसं वा 'विभजन्ति' विभागीकुर्वन्ति 'ज्ञातयः' दूरवर्त्तिनः स्वजना न 'मित्रवर्गा' सुहृत्समूहा न 'सुताः' पुत्रा न 'बान्धवाः' निकटवर्त्तिनः स्वजनाः, किन्तु एकः-अद्वितीयः 'स्वयम्' आत्मना 'प्रत्यनुभवति' वेदयते 'दुःखं' क्लेशं, किमिति ?, यतः 'कर्तारमेव' उपार्जयितारमेव 'अनुयाति' अनुगच्छति, किं तत् ?-कर्म, येन तत्कृतं तस्यैव फलमुपनयतीति भाव इति सूत्रद्वयार्थः ॥ इत्थमशरणत्वभावनामभिधायैकत्वभावनामाह-

मू. (४३०) चिच्चा दुपयं च चउप्पयं च, खित्तं गिहं धणधन्नं च सव्वं।
कम्मप्पबीओ अवसो पयाई, परं भवं सुंदर पावगं वा ॥

वृ. 'त्यक्त्वा' उत्सृज्य 'द्विपदं च' भार्यादि 'चतुष्पदं च' हस्त्यादि 'क्षेत्रम्' इक्षुक्षेत्रादि 'गृहं' धवलगृहादि 'धण'त्ति धनं-कनकादि 'धान्यं' शाल्यादि, चशब्दाद् वस्त्रादि च, 'सर्वं' निरवशेषं, ततः किमित्याह-कर्मैवात्मनो द्वितीयमस्येति कर्मात्मद्वितीयः 'अवशः' अस्वतत्रः प्रकर्षेण याति-प्राप्नोति प्रयाति, कं ?-'परम्' अन्यं 'भवं' जन्म 'सुंदर'त्ति बिन्दुलोपात् 'सुन्दरं' स्वर्गादि 'पापकं वा' नरकादि, स्वकृतकर्मानुरूपमिति भावः ॥ तत्र किमन्यदर्शनिनामिव सशरीर एव भवान्तरं यात्युत अन्यथेति ?, उच्यते, औदारिकशरीरापेक्षयाऽशरीर एव, तर्हि तत्यक्त्वेत्यत्र का वार्त्तेत्याह-

मू. (४३१) तं इक्कगं तुच्छसरीरगं से, चिईगयं दहिउं पावगेणं।
भज्जा य पुत्तावि य नायओ अ, दायारमन्नं अनुसंकमंति ॥

वृ. 'तद्' इति यत्तेन त्यक्तम् 'एकम्' अद्वितीयं तद्द्वितीयस्य जन्तोरन्यत्र सङ्क्रमणात् तूच्छम्असारमत एव कुत्सितं शरीरं शरीरकम्, अनयोस्तु विशेषणसमासः, 'से' तस्य भवान्तर-गतस्य संबन्धि चीयन्तेमृतकदहनाय इन्धनानि अस्यामिति चितः-काष्ठरचनात्मिका तस्यां गतं-स्थितं चितिगतं दग्ध्वा 'तुः' पूरणे 'पावकेन' अग्निना भार्या च पुत्रोऽपि च ज्ञातयश्च 'दातारम्' अभिलषितवस्तुसम्पादयितारमन्यम् 'अनुसङ्क्रामन्ति' उपसर्पन्ति, ते हि गृहमनेना-वरुद्धमास्त इति तद्बहिर्निष्काश्य जनलज्जादिना च भस्मासात्कृत्य कृत्वा च लौकिककृत्या-न्याक्रन्द्य च कतिचिद्दिनानि पुनः स्वार्थतत्परतया तथाविधमन्यमेवानुवर्त्तन्ते, न तु तत्प्रवृत्तिमपि पृच्छन्ति, आस्तां तदनुगमनमित्यभिप्राय इति सूत्रद्वयार्थः ॥ किञ्च-

मू. (४३२) उवणिज्जई जीवियमप्पमायं, वण्णं जरा हरइ नरस्स रायं !।
पंचालराया ! वयणं सुणाहि, मा कासि कम्माइं महालयाइ ॥

वृ. 'उपनीयते' ढोक्यते प्रक्रमान्मृत्यवे तथाविधकर्मभिः 'जीवितम्' आयुः 'अप्रमादं' प्रमादं विनैव, आवीचीमरणतो निरन्तरमित्यभिप्रायः, सत्यपिचि जीविते 'वर्णं' सुस्निग्धच्छा-यात्मकं 'जरा' विश्रसा 'हरति' अपनयति 'नरस्य' मनुष्यस्य 'राजन्!' चक्रवर्त्ति!, यतश्चैवमतः 'पञ्चालराज!' पञ्चमण्डलोद्भवनृपते! 'वचनं' वाक्यं 'शृणु' आकर्णय, किं तत् ?-मा कार्षीः, कानि ?-'कर्माणि' असदारम्भरूपाणि 'महालयाणि'त्ति अतिशयमहान्ति, महान् वा लयः-कर्माश्लेषो येषु तानि, उभयत्र पञ्चेन्द्रियव्यपरोपणकुणिमभक्षणादीनीति सूत्रार्थः ॥ एवं मुनिनोक्ते नृपतिराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४३३) *अहंपि जाणामि जहेह साहू ! जं मे तुमं साहसि वक्कमेयं।*
भोगा इमे संगकरा भवंति, जे दुज्जया अज्जो ! अम्हारिसेहिं ॥

वृ. अहमपि, न केवलं भवानित्यापिशब्दार्थः, 'जानामि' अवबुध्ये, तथा इति शेषः, 'यथा' येन प्रकारेण 'इह' अस्मिन् जगति साधो ! यत् 'मे' मम त्वं 'साधयसि' कथयसि 'वाक्यम्' उपदेशरूपं वचः 'एतत्' यदनन्तरं भवतोक्तं, तत् किं न विपयान् परित्यजस्यत आह- 'भोगाः' शब्दादयः 'इमे' प्रत्यक्षाः 'सङ्गकराः' प्रतिबन्धोत्पादका भवन्ति ये यत्तदोश्च नित्याभिसम्बन्धात्ते दुःखेन जीयन्ते-अभिभूयन्ते इति दुर्जयाः दुस्त्यजा इतियावत् 'अज्जो'त्ति आर्य ! अस्मादृशैः, गुरुकर्मभिर्जन्तुभिरिति गम्यते, पठ्यते च- 'अहंपि जाणामि जो एत्थ सारो' पादत्रयं तदेव, अहमपि जानामि योऽत्र सारो-यदिह मनुजजन्मनि प्रधानं चारित्रधर्मात्मकं, चस्य गम्यमानत्वात्, यच्च मे त्वं साधयसि, शेषं प्राग्वदिति सूत्रार्थः ॥ किञ्च-

मू. (४३४) *हत्थिणपुरंमि चित्ता ! दट्ठूणं नरवइं महिड्ढियं।*
कामभोगेसु गिद्धेणं नियाणमसुभं कडं ॥

वृ. हस्तिनागपुरे 'चित्ता' इति आकारोऽलाक्षणिकः, हे 'चित्र !' चित्रनामन् मुने ! दृष्ट्वा 'नरपतिं' सनत्कुमारनामानं चतुर्थचक्रवर्त्तिनं 'महर्द्धिकं' सातिशयसम्पदं 'कामभोगेषु' उक्तरूपेषु 'गृद्धेन' अभिकाङ्क्षावता 'निदानं' जन्मान्तरे भोगाशंसात्मकम् 'अशुभानुबन्धि 'कृतं' निर्वर्त्तितमिति ॥ कदाचित्तत्र कृतेऽपि ततः प्रतिक्रान्तः स्यादत आह-

मू. (४३५) *तस्स मे अप्पडिकंतस्स, इमं एयारिसं फलं।*
जाणमाणोऽवि जं धम्मं, कामभोगेसु मुच्छिओ ॥

वृ. 'तस्स'त्ति सुब्व्यत्ययेन तस्मात् निदानात् 'मे' मम 'अप्रतिनिवृत्तस्य, तदा हि त्वया बहुधोच्यमानेऽपि न मच्चेतसः प्रत्यावृत्तिभूदिति, 'इदमेतादृश्यम्' अनन्तरवक्ष्यमानरूपं 'फलं' कार्यं, यत् कीदृगित्याह- 'जाणमाणोऽवि'त्ति प्राकृतत्वात् 'जानन्नपि' अवबुध्यमानोऽपि यदहं 'धर्मं' श्रुतधर्मादिकं कामभोगेषु मूर्छितः-गृद्धः, तदेतत्कामभोगेषु मूर्छनं मम निदानकर्मणः फलम्, अन्यथा हि 'ज्ञानस्य फलं विरती'रिति कथं न जानतोऽपि धर्मानुष्ठानावाप्तिः स्यादिति भाव इति सूत्रद्वयार्थः ॥ पुनर्निदानफलमेवोदाहरणतो दर्शयितुमाह-

मू. (४३६) *नागो जहा पंकजलावसन्नो, दट्ठुं थलं नाभिसमेइ तीरं।*
एवं वयं कामगुणेसु गिद्धा, न भिक्खुणो मग्गमनुव्वयामो ॥

वृ. 'नागः' हस्ती 'यथे'ति दृष्टान्तोपदर्शकः पङ्कप्रधानं जलं यत्कलमुच्यते तत्रावसन्नो-निमग्नः पङ्कजलावसन्नः, सन् 'दृष्ट्वा' अवलोक्य 'स्थलं' जलविकलभूतलं 'न' नैव 'अभिसमेति' प्राप्नोति 'तीरं' पारम्, अपेर्गम्यमानत्वात्तीरमप्यास्तां स्थलमिति भावः, इत्येवंविध-नागवत् वयमित्यात्मनिर्देश 'कामगुणेषु' उक्तरूपेषु 'गृद्धाः' मूर्च्छिता न 'भिक्षोः' साधोः 'मार्गं' पन्थानं सदाचारलक्षणम् 'अनुव्रजामः' अनुसरामः। अभी हि पङ्कजलोपमाः कामभोगाः, ततस्तपरन्त्रतया न तत्पपरित्यागतो निरपायतया स्थलमिव मुनिमार्गमवच्छन्तोऽपि पङ्कजलाव-मग्नगजवद्वयमनुगन्तुं शक्नुम इति सूत्रार्थः ॥ पुनरनित्यतादर्शनाय मुनिराह-

मू. (४३७) *अच्चेइ कालो तूरंति राइओ, न यावि भोगा पुरिसाण निच्चा।*

उविच्च भोगा पुरिसं चयंति, दुमं जहा खीणफलं व पक्खी ॥

वृ. 'अत्येति' अतिक्रामति कालः यथाऽऽयुःकालः, किमित्येवमुच्यते ?, अत आह-'त्वरन्ति' शीघ्रं गच्छन्ति 'रात्रयः' रजन्यः, दिनोपलक्षणं चैतत्, ततोऽनेन जीवितव्यस्यानित्यत्वमुक्तम्, उक्तं हि-

"क्षणयामदिवसमासच्छलेन गच्छन्ति जीवितदलानि।
इति विद्वानपि कथमिह गच्छसि निद्रावशं रात्रौ ? ॥"

अथवा 'अत्येति' अतीवयाति, कोऽसौ ?-कालः, कुत एतत् ?-यतस्त्वरन्ति रात्रयो, न चापि भोगाः पुरुषाणां 'नित्याः' शाश्वताः, अपेर्भिन्नक्रमत्वान्न केवलं जीवितमुक्तिनीतितो न नित्यं, किन्तु भोगा अपि, यत उपेत्य स्वप्रवृत्त्या न तु पुरुषाभिप्रायेण भोगाः पुरुषं 'त्यजन्ति' परिहरन्ति, कमिव क इवेत्याह-'द्रुमं' वृक्षं यथा क्षीणानिविनष्टानि फलानि यस्यासौ क्षीणफलस्तं, 'वा' इत्यौपम्ये, उक्तं हि-"पिव मिव विव वा इवार्थे" भिन्नक्रमश्चायं, ततः 'पक्षीव' विहग इव, फलोपमानि हि पुण्यानि, ततस्तदपगमे क्षीणफलं वृक्षमिव पुरुषं पक्षिवद्‌भोगा विमुञ्चन्तीति सूत्रार्थः ॥ यत एवमतः-

मू. (४३८) *जईऽसि भोगे चइउं असत्तो, अज्जाइं कम्माइं करेहि रायं ! ।*
धम्मे ठिओ सव्वपयाणुकंपी, तं होहिसि देवो इओ विउव्वी ॥

वृ. यदि तावदसि त्वं भोगान् 'त्युक्तम्' अपहातुम् 'अशक्तः' असमर्थः, पठ्यते च-'जइ तंसि भोगे चइतुं असत्ते'त्ति, यदि चैवं तावत्कर्तुं न शक्तस्ततः किमित्याह-'आर्याणि' हेयधर्मेभ्यः-अतिनिस्त्रिंशतादिभ्यो दूरयातानि शिष्टजनोचितानीतियावत् 'कर्माणि' अनुष्ठानानि कुरु राजन् ! 'धर्मे' प्रक्रमाद्‌गृहस्थधर्मे सम्यग्दृष्ट्यदिशिष्टाचरिताचारलक्षणे स्थितः सन् 'सर्वप्रजानुकम्पी' समस्तप्राणिदयापरः, ततः किं फलमित्याह-'ततः' इत्यार्यकर्मकरणाद् भविष्यसि 'देवः' वैमानिकः 'इतः' इत्यस्मान्मनुष्यभवादनन्तरं विउव्वि'त्ति वैक्रियशरीरवानित्यर्थ इति वृद्धाः, गृहस्थधर्मस्यापि सम्यक्त्वदेशविरतिरूपस्य देवलोकफलत्वेनोक्तत्वादिति भाव इति सूत्रार्थः ॥ एवमुक्तोऽपि यदाऽसौ न किञ्चित्प्रतिपद्यते तदा तदविनेयतामवधार्य मुनिराह-

मू. (४३९) *न तुज्झ भोगे चईऊण बुद्धी, गिद्धोऽसि आरंभपरिग्गहेसुं ।*
मोहं कओ इत्तिउ विप्पलावो, गच्छामि रायं ! आमंतिओऽसि ॥

वृ. 'ने'ति प्रतिषेधे तव 'भोगान्' शब्दादीन्, उपलक्षणत्वादनार्यकर्माणि वा, 'चइऊण'त्ति युक्तुं, यद्वा सोपस्कारत्वाद्‌भोगांस्त्यक्त्वा धर्मो मया विधेयइति 'बुद्धिः' अवगतिः, किन्तु 'गृद्धः' मूर्च्छितः 'असि' भवसि, केषु ?-'आरम्भपरिग्रहेषु' अवद्यहेतेषु व्यापारेषु चतुष्पदद्विपदादिस्वीकारेषु च, 'मोहं'ति मोघं निष्फलं यथा भवति एवं, सुब्व्यत्ययाद्वा मोघो-निष्फलो मोहेन वा-पूर्वजन्मनि मम भ्राताऽऽसीदिति स्नेहलक्षणेन 'कृतः' विहितः एतावान् 'विप्रलापः' विविधव्यर्थवचनोपन्यासात्मकः, सम्प्रती तु 'गच्छामि' व्रजामि राजन् ! आमन्त्रितः-संभाषितः, अनेकार्थत्वाद्धातूनां पृष्टो वा 'असि' भवसि, अयमाशयः-अनेकधा जीवितानित्यत्वादिदर्शनद्वारेणानुशिष्यमानस्यापि गुणाधिकक्लिश्यमानाविनेयेषु" इति सूत्रार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थमुक्त्वा गते मुनौ ब्रह्मदत्तस्य यदभुत्तदाह-

मू. (४४०) पंचालरायाऽविय बंभदत्तो, साहुस्स तस्स वयणं अवाउं।
अनुत्तरे भुंजिय काम भोगे, अनुत्तरे सो नरए पविट्ठो ॥

वृ. 'पंचालराआऽविय'त्ति 'अपि' पुनरर्थः, 'चः' पूरणे, ततः पञ्चालराजः पुनर्ब्रह्मदत्तो-ब्रह्मदत्ताभिधानः 'साधोः' तपस्विनः 'तस्य' अनन्तरोक्तस्य 'वचनं' हितोपदेशदर्शकं वाक्यम् 'अकृत्वा' वज्रतन्दुलवद्गुरुकर्मतयाऽत्यन्तदुर्भेदत्वादननुष्ठान 'अनुत्तरान्' सर्वोत्तमान् 'भुंक्त्वा' अनुपाल्य 'कामभोगान्' उक्तरूपान् 'अनुत्तरे' स्थित्यादिभिः सकलनरकज्येष्ठेऽप्रतिष्ठान इतियावत् 'स' ब्रह्मदत्तः 'नरके' प्रतीते 'प्रविष्टः' तदन्तरुत्पन्नः, तदनन निदानस्य नरक-पर्यवसानफलत्वमुपदर्शितं भवतीति सूत्रार्थः ॥

इह चास्य शेषवक्तव्यतासूचिका अपि निर्युक्ति-गाथाः पञ्च दृश्यन्ते, तद्यथा-

नि.[३५५] इत्थीरयणपुरोहियभिज्जाणं वुग्गहो विनासंमि।
सेनावइस्स भेओ वक्कमणं चेव पुत्ताणं ॥

नि.[३५६] संगाम अत्थि भेओ मरणं पुन चूयपायवुज्जाणे।
कडगस्स य निब्भेओ दंडो अ पुरोहितयकुलस्स ॥

नि.[३५७] जउघरपासायंमि अ दारे य सयंवरे अ थाले अ।
तत्तो अ आसए हत्थिए अ तह कुंडए चेव ॥

नि.[३५८] कुक्कडरहतिलपत्ते सुंदसणो दारुए य नयनिल्ले।
पत्तच्छिज्जसंयवर कलाउ तह आसने चेव ॥

नि.[३५९] कंचुयपज्जुन्नंमि अ हत्थो वणकुंजरे कुरुमई अ।
एए कन्नालंभा बोद्धव्वा बंभदत्तस्स ॥

वृ. एतास्तु विशिष्टसम्प्रदायाभावान्न विव्रियन्ते ॥ सम्प्रति प्रसङ्गत एव चित्रवक्तव्यतोच्यते-

मू. (४४१) चित्तोऽवि कामेहिं विरत्तकामो, उदत्तचारित्ततवो महेसी।
अनुत्तरं संजम पालइत्ता, अनुत्तरं सिद्धिगइं गओ ॥ त्तिबेमि।

वृ. 'चित्रोऽपि' जन्मान्तरनामतश्चित्राभिधानस्तपस्व्यपि, अत्रापि 'अपिः' पुनरर्थे, ततश्चित्रः पुनः 'कामेभ्यः' अभिलषणीयशब्दादिभ्यो विरक्तः-पराङमुखीभूतः कामः-अभिलाषोऽस्येति विरक्तकामः उदात्तं-प्रधानं चारित्रं च सर्वविरतिरूपं तपश्च-द्वादशविधं यस्य च उदात्तचारि-त्रतपाः, पाठान्तरतः-उदग्रचारित्रता वा महेषी महर्षिर्वा, 'अनुत्तरं' सर्वसंयमस्थानोपरिवर्तिनं 'संजम'त्ति संयमम्-आश्रवोपरमाणिदकं 'पालयित्वा' आसेव्य 'अनुत्तरां' सर्वलोकाकाशो-परिवर्तिनीमतिप्रधानां वा 'सिद्धिगतिं मुक्तिनाम्नीं गतिं 'गतः' प्राप्त इति सूत्रार्थः ॥

'इति' परिसमाप्तौ, ब्रवमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत्।

अध्ययनं १३ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
त्रयोदशमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्ययनं - १४ -इषुकारियं

वृ. व्याख्यातं त्रयोदशमध्ययनं चित्रसम्भूतीयम्, अधुना चतुर्दशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने मुख्यतो निदानदोष उक्तः प्रसङ्गतो निर्निदानतागुणश्च, अत्र तु मुख्यतः स एवोच्यते इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारचतुष्टयचर्च्चः प्राग्वत्तावद्यावन्नामनिष्पन्ननिक्षेपे इषुकारीयमिति नाम, अत इषुकारनिक्षेपमभिधातुमाह-

नि.[३६०] उसुआरे निक्खेवो चउ० ॥

नि.[३६१] जाणग मविय सरीरे० ॥

नि.[३६२] उसुआरनामगोए वेयंतो भा त्रओ अ उसुआरो।
तत्तो समुट्ठियमिणं उसुआरिज्जंति अज्झयणं ॥

वृ. गाथात्रयं स्पष्टमेव, नवरमिषुकाराभिलापेन नेयं, तथा यदिषुकारात्समुत्थितं तत्तस्मै प्रायौ हितमेव भवतीति इषुकाराय हितमिषुकारीयमुच्यते, प्राधान्याच्च राज्ञा निर्देशः, अन्यथा षड्भ्योऽप्येतत्ससुत्थानं तुल्यमेवेति ॥ सम्प्रति कोऽयमिपुकार इति तद्वक्तव्यतामाह-

नि.[३६३] पुव्वभवे संघडिआ संपीआ अन्नमन्नमनुरत्ता।
भूत्तूण भोगभोए निग्गंथा पव्वए समणा ॥

नि.[३६४] काऊण य सामन्नं पउमगुम्मे विमाणि उववन्ना।
पलिओवमाइं चउरो ठिई उक्कोसिआ तेसिं ॥

नि.[३६५] तत्तो य चुआ संता कुरुजनवयपुरवरंमि असुआरे।
छावि जना उववन्ना चरिमसरीरा विगयमोहा ॥

नि.[३६६] राया उसुयारो या कमलावइ देवि अग्गमहिसी से।
भिगुनामे य पुरोहिय वासिट्ठा भारिआ तस्स ॥

नि.[३६७] उसुआरपुरे नयरे उसुआरपुरोहिओ अ अनवच्चो।
पुत्तस्स कए बहुसो परितप्पंती दुअग्गावि ॥

नि.[३६८] काऊण समणरूवं तहिअं देवो पुरोहिअं भणइ।
होहिंति तुज्झ पुत्ता दुन्नि जणा देवलोगचुआ ॥

नि.[३६९] तेहि अ पव्वइअव्वं जहा य न करेह अंतरायं ण्हे।
ते पव्वइआ संता बोहेहिंती जनं बहुअं ॥

नि.[३७०] तं वयणं सोऊणं नगराओ निंति ते वयग्गामे।
वड्ढंति अ ते तहिअं गाहिंति अ णं असब्भावं ॥

नि.[३७१] एए समणा धुत्ता पेयपिसाया य पोरुसादा य।
मा तेसिं अल्लिअहा मा भे पुत्ता! विनासिज्जा ॥

नि.[३७२] दट्ठूण तहिं समणे जाइं पोराणिअं च सरिऊणं।
बोहितऽम्मापिअरं उसुआरं रायपुत्तं च ॥

नि.[३७३] सीमंधरो य राया भिगू अ वासिट्ठ रायपत्ती य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बंभणी दारगा चेव छप्पेए परिनिव्वुआ ॥

वृ. आसामक्षरार्थः स्पष्ट एव, नवरं 'संघडिय'त्ति सम्यग् घटिताः-परस्परं स्नेहेन संबद्धा वयस्या इतियावत्, तेऽपि कदाचिद्विगलितान्तरप्रीतयोऽपि दाक्षिण्याज्जनलज्जादितस्तथा स्युरत आह-'संप्रीताः' सम्यगान्तरप्रीतिभाजः, तथा 'अन्योऽन्यमनुरक्ताः' अतिशयख्यापनफलत्वादत्यन्तस्नेहभाजः, अथवा 'संघडिय'त्ति देशीपदमव्युत्पन्नमेव मित्राभिधायि, प्रीतिर्बाह्या अनुरागस्तु भावतः प्रतिबन्धः, पठ्यते च-'घडियाउ'त्ति घटिता-मलिताः, तथा 'भोगभोगे'त्ति भोक्तुं योग्या भोग्या ये भोगास्तान् भोग्यभोगान् भोगभोगान् वाऽतिशायिनो भोगान्, पाठान्तरतः कामभोगान् वा, 'निग्गंथा पव्वए समण'ति निर्ग्रन्थाः-त्यक्तग्रन्थाः 'प्राव्रजन्' प्रव्रज्यां गृहीतवन्तः, ततश्च 'श्रमणाः' तपस्विनोऽभूवन्निति शेषः ।

'दुयग्गावि'त्ति देशीपदं प्रक्रमाच्च द्वावपि दम्पती, तथा 'अन्तरायं' विघ्नं 'ण्हे'ति अनयोः, तथा 'निंति'त्ति निर्यन्ति आधिक्येन गच्छन्ति, कं ?-'व्रजग्रामं' गोकुलप्रायग्रामं, प्रत्यन्तग्राममित्यर्थः, 'गाहिंति अनं असब्भावं'ति ग्राहयतोऽसद्भावमसन्तम् असुन्दरं वाऽर्थ-साधुप्रेतत्वादिलक्षणं प्रेताः 'पिशाचाश्च' पिशाचनिकायोत्पन्नाः 'पोरुषादाश्च' प्रस्तावात्पुरुषसम्बन्धिमांसभक्षका राक्षसा इतियावत्, 'तेसिं'ति सूत्रत्वात् तान् 'अल्लियह'त्ति आलीयेताम्-आश्रयतां, किमित्यत आङ्-मा 'मे' भवन्तौ पुत्रौ विनश्येतामिति ।

अत्र चेषुकारमिति राज्यकालानाम्ना सीमन्धरश्चेति मौलिकनाम्नेति सम्भावयामः इति गाथैकादशकावयवार्थः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायं-जे' ते दोन्नि गोवदारया साहुअनुकंपयाए लद्धसंमत्ता कालं काउण देवलोगे उववन्ना, ते तओ देवलोगाउ चइउं खिइफइड्डियनयरे इब्भकुले दोवि भायरो जाया, तत्थ तेसिं अन्नेवि चत्तारि इब्भदारगा वयंसिया जाया, तत्थवि भोगे भुंजिउं तहारूवाणं थेराणं अंतिते धम्मं सोऊण पव्वइया, सुचिरकालं संयमं अनुपालेऊण भत्तं पच्चक्खाउं कालं काऊण सोहम्मे कप्पे पउमगुम्मे विमाने छाविजना चउपलिओवमठितिया देवा उववन्ना, तत्थ जे ते गोववज्जा देवा ते चइऊण कुरुजणवए उसुयारपुरे नयरे एगो उसुयारो नाम राया जातो, बीओ तस्सेव महादेवी कमलाबईनाम संवुत्ता, ततिओ तस्स चेव राइणो भिगुनाम पुरोहितो संवुत्तो, चउत्थो तस्स चेव पुरोहियस्स भारिया संवुत्ता वसिठ्ठा गोत्तेण जसानामं ।

सो य भिगु अनवच्चो गाढं तप्पए अवच्चनिमित्तं, उवायणए देवयाणि पुच्छइ नेमित्तिए । ते दोऽवि पुव्वभवगोवा देवभवे वट्टमाना ओहिणा जाणिउं जधा अम्हे एयस्स भिगुस्स पुरोहियस्स पुत्ता भविस्सामो, तओ समणरूवं काऊण उवगया भिगुसमीवं, भिगुणा सभारिएण वंदिया, सुहासणत्था य धम्मं कहेंति, तेहिं दोहिवि सावगवयाणि गहियाणि, पुरोहिएण भन्नतिभगवं ! अम्हं अवच्चं होज्जत्ति ?, साहूहिं भन्नति-भविस्संति दुवेऽवि दारगा, ते य डहरगा चेव पव्वस्संति, तेसिं तुब्भेहिं वाघाओ न कायव्वो पव्वयंताणं, ते सुबहुं जनं संबोहिस्संतित्ति भणिऊण पडिगया देवा, नातिचिरेण चइऊण य तस्स पुरोहियस्स भारियाए वासिट्ठीए दुवे उदरे पच्चायाया, ततो पुरोहितो सभारितो नगरविनिग्गतो पच्चंतगामे ठितो, तत्थेव सा माहिणी पसूया, दारगा जाया, तओ मा पव्वइस्संतित्ति काउं मायावित्तेहिं वुग्गा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिज्जंति-जहा एए पव्वइयगा दिव्वरूवाइं घेत्तुं मारंति, पच्छा तेसिं मंसं खायंति, मा तुब्भे कयाइं एएसिं अल्लियस्सह।

अन्नया ते तम्मि गामे रमंता बाहिं निग्गया, इओ य अद्धाणपडिवन्ना साहू आगच्छंति, ततो ते दारगा साहू दट्ठूम भयभीया पलायंता एगम्मि वडपायवे आरूढा, साहूणो समावत्तीए गहियभत्तपाना तम्मि चेव वडपायवहिट्ठे ठिया, मुहुत्तं च वीसमिऊणं भुंजिउं पयत्ता, ते वडारूढा पासंति साभावियं भत्तपाणं, नत्थि मंसंति तओ चिंतिउं पयत्ता-कत्थ अम्हेहिं एयारिसाणि रूवाणि दिट्ठपुव्वाणित्ति ?, जाई संभरिया, संबुद्धा, साहुणो वंदिउं गया अम्मापिउसमीवं, मायावित्तं संबोहिऊण सह मायावित्ते पव्वया, देवी संबूद्धा, देवीए राया संबोहिओ, तानिवि पव्वइयाणि, एवं तानि छावि केवलनाणं पाविऊण निव्वाणमुवगयाणि त्ति।

इह तु सूत्रोक्तस्याप्यर्थस्याभिधानं प्रसङ्गत इत्यदोषः। उक्तो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(४४२) *देवा भवित्ताण पुरे भवंमी, केई चुया एगविमानवासी।*
पुरे पुराणे इसुयारनामे, खाए समिद्धे सुरलोगरम्मे॥

वृ. 'देवाः' सुराः 'भूत्वा' उत्पद्य 'पुरे भवंमि'त्ति अनन्तरातीतजन्मनि 'केचित्' इत्यनिर्दिष्टनामानः 'च्युताः' भ्रष्टाः एकस्मिन् पद्मगुल्मनाम्नि विमाने वसन्तीत्येवंशीला एकविमानवासिनः 'पुरे' नगरे 'पुराणे' चिरन्तने इषुकारनाम्नि 'ख्याते' प्रथिते 'समृद्धे' ऋद्धिमत्यत एव 'सुरलोकरम्ये' देवलोकवद्रमणीये ते च किं सर्वथोपभुक्तपुण्या एव ततश्च्युता उतान्यथेत्याह-

मू.(४४३) *सकम्मसेसेण पुराकएणं, कुलेसु उग्गे(सुदत्ते०) सु य ते पसूआ।*
निव्विन्नसंसारभया जहाय, जिणिंदमग्गं सरणं पवन्ना॥

वृ. स्वम्-आत्मीयं कर्म-पुण्यप्रकृतिलक्षणं तस्य शेषम्-उद्धरितं स्वकर्मशेषस्तेन, लक्षणे तृतीया, 'पुराकृतेन' पूर्वजन्मान्तरोपार्जितेन 'कुलेषु' अन्वयेपु 'उदात्तेषु' उच्चेषु 'चः' पूरणे, 'ते' इति ये देवा भूत्वा च्युचाः 'प्रसूताः' उत्पन्नाः, 'निविन्न'त्ति आर्षत्वात् 'निर्विन्नाः' उद्विग्नाः, कुतः ?-संसारभयात्, 'जहाय'त्ति परित्यज्य, भोगादीनिति गम्यते, किमित्याह-'जिनेन्द्रमार्गं' तीर्थकृदुपदर्शितं सम्यग्दर्शनज्ञानचारित्रात्मकं मुक्तिपथं 'शरणम्' अपायरक्षाक्षममाश्रयं 'प्रपन्नाः' अभ्युपगता इत्यध्ययनार्थसूचनम्। कश्च किंरूपः सन् जिनेन्द्रमार्गं शरणं प्रपन्न इत्याह-

मू.(४४४) *पुमत्तमागम्म कुमार दोऽवि, पुरोहिओ तस्स जसा य पत्ती।*
विसालकित्ती य तहेसुआरो, रायऽत्थ देवी कमलावई य॥

वृ. 'पुंस्त्वं' पुरुषत्वम् 'आगम्य' प्राप्य 'कुमार'त्ति 'कुमारौ' अकृतपाणिग्रहणौ द्वौ, 'अपिः' पूरणे, सुलभ बोधिकत्वेन प्राधान्यख्यापनार्थं चानयोः पूर्वमुपादानम्, पुरोहितस्तृतीयस्तस्य जसा च नाम्ना पत्नी चतुर्थः, 'विशालकीर्त्तिश्च' विस्तीर्णयशाश्च तथेषुकारो नाम राजा पञ्चमः, 'अत्र' एतस्मिन भवे 'देवी' इति प्रधानपत्नि, प्रक्रमात्तस्यैव राज्ञः कमलावती नाम्ना षष्ठ इति सूत्रत्रयार्थः॥ सम्प्रति यथैतेषु जिनेन्द्रमार्गप्रतिपत्तिः कुमारयोर्जाता तथा दर्शयितुमाह-

मू.(४४५) *जाईजरामच्चुभयाभिभूया, बहिंविहाराभिनिविट्ठचित्ता।*
संसारचक्कस्स विमुक्खणट्ठा, दट्ठूण ते कामगुणे विरत्ता॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४४६) *पियपुत्तगा दुन्निवि माहनस्स, सकम्मसीलस्स पुरोहियस्स।*
सरित्तु पोराणिय तत्थ जाइं, तहा सुचिण्णं तव संजमं च ॥

वृ. जातिः-जन्म जरा-विश्रसा मृत्युः-प्राणत्यागलक्षणस्तेभ्यो भयं-साध्वसं तेनाभिभूतौ-बाधितौ जातिजरामृत्युभयाभिभूतौ, पाठान्तरतश्च जातिजरामृत्युभयाभिभूते सत्यर्थात् संसारिजने बहिः संसाराद्विहारः-स्थानं बहिर्विहारः, स चार्थान्मोक्षस्तस्मिन्नभिनिविष्टं-बद्धाग्रहं चित्तम्-अन्तःकरणं ययोस्तौ, तथा संसारश्चक्रमिव चक्रं भ्रमणोपलक्षितत्वात्संसारचक्रं तस्य विमोक्षणार्थ-परित्यागनिमित्तं 'दृष्ट्वा' निरीक्ष्य साधूनिति शेषः, यद्वा 'दृष्ट्वे' ति प्रेक्ष्य मुक्तिपरिपन्थिनोऽमी कामगुणा इति पर्यालोच्य 'तौ' अनन्तरोक्तौ 'कामगुणे' त्ति सुब्व्यत्ययात् 'कामगुणेभ्यः' शब्दादिभ्यो, विषयसप्तमी वा, 'विरक्तौ' पराङ्मुखीभूतौ प्रियौ-वल्लभौ तौ च तौ पुत्रावेव पुत्रकौ, द्वावपि नैक एव इत्यपिशब्दार्थः 'मोहनस्य' ब्राह्मणस्य 'स्वकर्मशीलस्य' यजनयाजनादिस्वकीयानुष्ठाननिरतस्य 'पुरोहितस्य' शान्तिकर्त्तुः 'सरित्तु' त्ति स्मृत्वा 'पोराणिय' त्ति सूत्रत्वात्पुराणामेव पौराणिकीं-चिरन्तनीं 'तत्रे' ति सन्निवेशे कुमारभावे वा, वर्त्तमानाविति शेषः, 'जातिं' जन्म तथा 'सुचिन्नं' त्ति सुचीर्णं सुचरितं वा निदानादिनाऽनुपहतत्वात् तपः-अनशनादिः, प्राकृतत्वाद्बिन्दुलोपः, संयमं च, तपःसंयममिति समाहारद्वन्द्वो वा, अत्र कामगुणविरक्तिरेव जिनेन्द्रमार्गप्रतिपत्तिरिति सूत्रद्वयार्थः ॥ ततस्तौ किमकार्ष्टाम् ? इत्याह-

मू. (४४७) *ते कामभोगेसु असज्जमाना, मानुस्सएसुं जे यावि दिव्वा।*
मुक्खाभिकंखी अभिजायसद्धा, तातं उवागम्म इमं उदाहु ॥

वृ. 'तौ' पुरोहितपुत्रौ 'कामभोगेषु' उक्तरूपेषु 'असज्जमान' त्ति असंसजतौ-सङ्गमकुर्वन्तौ 'मानुष्यकेषु' मनुजसम्बन्धिषु, ये चापि 'दिव्याः' देवसम्बन्धिनः कामभोगास्तेषु चेति प्रक्रमः, 'मोक्षाभिकाङ्क्षिणौ' मुक्त्यभिलाषिणौ 'अभिजातश्रद्धौ' उत्पन्नतत्त्वरुची 'तातं' पितरमुपागम्य 'इदं' वक्ष्यमानं 'उदाहु' त्ति उदाहरताम्। तयोर्हि साधुदर्शनानन्तरं क्वास्माभिरित्थंभूतानि रूपाणि पुराऽपि दृष्टानीति चिन्तयतोर्जातिस्मरणमुत्पन्नं, ततो जातवैराग्यौ प्रव्रज्याभिमुखावात्ममुत्कलीकरणाय तयोश्च प्रतिबोधोत्पादनाय वक्ष्यमानमुक्तवन्ताविति सूत्रार्थः ॥

यच्च तावुक्तवन्तौ तदाह-

मू. (४४८) *असासयं दट्ठु इमं विहारं, बहुअंतरायं न य दीहमाउं।*
तम्हा गिहंसि न रइं लभामो, आमंतयामो चरिसामु मोनं ॥

वृ. 'अशाश्वतम्' अनित्यं दृष्ट्वा 'इमं' प्रत्यक्षं विहरणं विहारं, मनुष्यत्वेनावस्थानमित्यर्थः, भण्यते हि-''भोगभोगाइं भुंजमाने विहरति'' त्ति, किमित्येवमत आह-बहवः-प्रभूता अन्तरायाः-विघ्ना व्याध्यादयो यस्य तद्बह्वन्तरायं, बह्वन्तरायमपि दीर्घत्वा (र्घाद्धा) वस्थायि स्यादित्याह-'न च' नैव 'दीर्घं' दीर्घकालस्थित्या 'आयुः' जीवितं, सम्प्रति पल्योपमायुष्कताया अप्यभावात्, यत एवं सर्वमनित्यं तस्माद् 'गिहंसि' न्ति 'गृहे' वेश्मनि न 'रतिं' धृतिं 'लभामो' त्ति लभावहे-प्राप्नुवः, अतश्च 'आमन्त्रयावहे' पृच्छाव आवां यथा 'चरिष्यामः' आसेविष्यावहे 'मौनं' मुनिभावं संयममिति सूत्रार्थः ॥ एवं च ताभ्यामुक्ते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४४९) अह तायओ तत्थ मुनीन तेसिं, तवस्स वाधायकरं वयासी।
इमं वयं वेयविओ वयंति, जहा न होई असुआण लोगो॥

वृ. 'अथ' अनन्तरं तायते- सन्तानं करोति पालयति च सर्वापद्भ्य इति तातः स एव तातकः 'तत्र' तस्मिन् संनिवेशेऽवसरे वा 'मुन्योः' भावतः प्रतिपन्नमुनिभावयोः 'तयोः' कुमारयोः 'तपसः' अनशनादेः उपलक्षणत्वाच्छेपसद्धर्मानुष्ठानस्य च 'व्याधातकरं' बाधाविधायि, वचनमिति शेषः, 'वयासि'त्ति अवादीत्, यदवादीत्तदाह -इमां वाचं वेदविदो 'वदन्ति' प्रतिपादयन्ति, यथा-'न भवति' न जायते 'असुतानाम्' अविद्यमानपुत्राणां 'लोकः' परलोकः, तं विना पिण्डप्रदानाद्यभावे गत्याद्यभावात्, तथा च वेदवचः-'अनपत्यस्य लोका न सन्ति'', तथाऽन्यैरप्युक्तम्-

''पुत्रेण जायते लोकः, इत्येषा वैदिकी श्रुतिः।
अथ पुत्रस्य पुत्रेण, स्वर्गलोके महीयते॥''

तथा- ''अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च।
गृहिधर्ममनुष्ठाय, तेन स्वर्गं गमिष्यति॥''

मू. (४५०) अहिज्ज वेए परिविस्स विप्पे, पुत्ते परिट्ठप्प गिहंसि जाया!।
भुच्चा न भोए सह इत्थियाहिं, आरन्नगा होह मुनी पसत्था॥

वृ. यत एवं तस्माद् 'अधीत्य' पठित्वा 'वेदान्' ऋग्वेदादीन् 'परिवेष्य' भोजयित्वा 'विप्रान्' ब्राह्मणान्, तथा पुत्रान् 'प्रतिष्ठाप्य' कलाकलत्रग्रहणादिना गृहस्थधर्मे निवेश्य, कीदृशः पुत्रान?-गृहे जातान्, न तु गृहीतप्रतिपन्नकादीन्, पाठान्तरे च-पुत्रान् 'परिष्ठाप्य' स्वामित्वेन निवेश्य गृहे 'जाय'त्ति हे जातौ-पुत्रौ!, तथा 'भुक्त्वा' भुक्त्वा 'ण' इति वाक्यालङ्कारे 'भोगान्' शब्दादीन् सह 'स्त्रीभिः' नारीभिस्ततोऽरण्ये भवौ आरण्यौ, 'अरण्यान्नो वक्यतव्यः' (अरण्यान्नः। वार्त्तिकं) इति नप्रत्ययः, आरण्यावेव आरण्यकौ- आरण्यकव्रतधारिणौ 'होह'त्ति भवतं-सम्पद्येथां युवां 'मुनी' तपस्विनौ 'प्रशस्तौ' श्लाघ्यौ, इत्थमेव ब्रह्मचर्याद्याश्रमव्यवस्थानात्, उक्तं हि-''ब्रह्मचारी गृहस्थश्च, वानप्रस्थो यतिस्तथे''ति, इह च 'अधीत्य वेदानि'त्यनेन ब्रह्मचर्याश्रम उक्तः परिवेष्येत्यादिना च गृहस्थाश्रमः आरण्यकावित्यनेन च वानप्रस्थाश्रमः मुनिग्रहणेन च यत्याश्रम इति सूत्रद्वयार्थः॥ इत्थं तेनोक्ते कुमारकौ यदकार्ष्टां तदाह-

मू. (४५१) सोअग्गिणा आयगुणिंधनेणं, मोहानिला पज्जलणाहिएणं।
संतत्तभावं परितप्पमानं, लोलुप्पमानं बहुहा बहुं च॥

वृ. सुतवियोगसम्भावनाजनितं मनोदुःखमिह शोकः स चाग्निरिव शोकाग्निस्तेन, आत्मनो गुणा आत्मगुणाः-कर्मक्षयोपशमादिसमुद्भूताः सम्यग्दर्शनादयस्त इन्धनमिवेन्धनं दाह्यतया यस्य स तथा तेन, अनादिकालसहचरितत्वेन रागादयो वाऽऽत्मगुणास्त इन्धनमुद्दीपकतया यस्य स तथा तेन, मोहो मूढताऽज्ञानमितियावत् सोऽनिल इव मोहानिलस्तस्मादधिकं-महानगरदाहादिभ्योऽप्यगिलं प्रज्वलनं- प्रकर्षेण दीपनमस्येति अधिकप्रज्वलनः, यद्वा प्रज्वलनेनाधिकः इतराग्न्यपेक्षया यस्तेन, भूत्र प्राकृतत्वादधिकशब्दस्य परनिपातः, तथा समिति-समन्तात् तप्त इव तप्तः अनिर्वृतत्वेन भावः- अन्तःकरणमस्येति संतप्तभावस्तम्, अत एव च 'परितप्यमानं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समन्ताद्दह्यमानम्, अर्थात् शरीरे दाहस्यापि शोकावेशत उत्पत्तेः, लोलुप्यमानं तद्वियोगशङ्का-वशोत्पन्नदुःखपरशुभिरतिशयेन हृदि छिद्यमानं, वृद्धास्तु व्याचक्षते-'लोलुप्यमानं'ति लालप्यमानं- 'भरणपोषणकुलसंताणेसु य तुब्भे भविस्सह'त्ति, 'बहुधा' अनेकप्रकारं 'बहुं' च प्रभूतं यथा भवत्येवं लोलुप्यमानं लालप्यमानं वेति सम्बन्धः,

मू. (४५२) पुरोहियं तं कमसोऽनुणंतं, निमंतयंतं च सुए धनेनं।
जहक्कमं कामगुणेहिं चेव, कुमारगा ते पसमिक्ख वक्कं ॥

वृ. 'पुरोहितं' 'पुरोधसं' 'तं'मिति प्रक्रान्तं 'कमसो'त्ति क्रमेण-परिपाठ्या 'अनुनयन्तं' स्वाभिप्रायेण प्रज्ञापयन्तं निमन्त्रयन्तं च-तौ भोगैरुपच्छन्दयन्तं 'सुतौ' पुत्रौ 'धनेन' द्रव्येण यथाक्रमं प्रक्रमानतिक्रमेण 'कामगुणैः' अभिलषणीयशब्दादिविषयैः, पाठान्तरतः-कामगुणेषु वा, 'चः' समुच्चये 'एव' इति पूरणे, कुमारकौ तावनन्तरप्रक्रान्तौ 'प्रसमीक्ष्य' प्रकर्षेणाज्ञाना-च्छादितमतिमालोच्य 'वाक्यं' वचो वक्ष्यमानमुक्तवन्ताविति गम्यते।

मू. (४५३) वेआ अधीआ न भवंति ताणं, भुत्ता दिया निंति तमं तमेणं।
जाया य पुत्ता न हवंति ताणं, को नाम ते अनुमन्निज्ज एयं ? ॥

वृ. किं तदित्याह 'वेदाः' ऋग्वेदादयः 'अधीताः' पठिता न 'भवन्ति' जायन्ते 'त्राणं' शरणं, तदध्ययनमात्रतो दुर्गतिपतनरक्षणासिद्धेः, उक्तं हि तैरपि -

"अकारणमधीयानो, ब्राह्मणस्तु युधिष्ठिरः।
दुष्कुलेनाप्यधीयन्ते, शीलं यस्य स रोचते ॥"

(तथा) "शिल्पमध्ययनं नाम, वृत्तं ब्राह्मणलक्षणम्।
वृत्तस्थं ब्राह्मणं प्राहुर्नेतरान् वेदजीवकान् ॥"

तथा 'भुज्ज'त्ति अन्तर्भावितण्यर्थत्वाद्भोजिताः 'द्विजाः' ब्राह्मणाः 'नयन्ति' प्रापयन्ति तमोरूपत्वात्तमो-नरकस्तत्तमसा-अज्ञानेन यद्वा तमसोऽपि यत्तमस्तस्मिन्-अतिरौद्रे रौरवादिन-रके नमिति वाक्यालङ्कारे, ते हि भोजिताः कुमार्गप्ररूपणपशुवधादावेव कर्मोपचयनिबन्धने असद्व्यापारे प्रवर्त्तन्त इत्यसत्प्रवर्त्तनतस्तद्भोजनस्य नरकगतिहेतुत्वमेव, अनेन च तेषां निस्तारकत्वं दूरापास्तमित्यर्थादुक्तं, तथा 'जाताश्च' उत्पन्नाः 'पुत्राः' सुता न भवन्ति 'त्राणं' शरणं नरकादिगतौ निपततामिति गम्यते, उक्तं हि तन्मतानुसारिभिरपि-

"यदि पुत्राद्भवेत्स्वर्गो, दानधर्मो न विद्यते।
मुषितस्तत्र लोकोऽयं, दानधर्मो निरर्थकः ॥"
बहुपुत्रा दुली गोधा, ताम्रचूडस्तथैव च।
तेषां च प्रथमं स्वर्गः, पश्चाल्लोको गमिष्यति ॥"

यतश्चैवं ततः को नाम ? न कश्चित्सम्भाव्यते यस्ते-तवानुमन्येत-शोभनमिदमित्यनुजानी-यात्सविवेक इति गम्यते, 'एतद्' अनन्तरमुक्तं वेदाध्ययनादित्रितयमिति, भुक्त्वा भोगानिति च चतुर्थोपदेशप्रतिवचनमाह-

मू. (४५४) खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अनिगामसुक्खा।
संसारमुक्खस्स विपक्खभूआ, खाणी अनत्थाण उ काम भोगा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. क्षणमात्रं सौख्यं येषु ते तथा, बहुकालं नरकादिषु दुःखं शारीरं मानसं च येभ्यस्ते तथाविधाः, कदाचित्स्वल्पकालमपि सुखमतिशायि स्याद् दुःखं त्वन्यथेति स्वल्पकालमपि तद्बहुकालभाविनोऽपि दुःखस्योपहन्तृ स्यादत आह-प्रकामम्-अतिशयेन दुःखं येभ्यस्ते तथा, 'अनिकामसौख्याः' अप्रकृष्टसुखाः, ईदृशा अप्यायतौ शुभफलाः स्युरत आह-संसारान्मोक्षो-विश्लेषः संसारमोक्षो निर्वृत्तिरित्यर्थस्तस्य विपक्षभूताः-तत्प्रतिबन्धकतयाऽत्यन्तप्रतिकूलाः, किमित्येवंविधास्ते इत्याह-खनिरिव खनिः-आकरः 'अनर्थानाम्' इहपरलोकदुःखावाप्तिरू-पाणां, तुशब्दोऽवधारणे भिन्नक्रमश्च ततः खनिरवे, के एवंविधाः ?-'कामभोगाः' उक्तरूपाः, अनर्थखनित्यमेव स्पष्टयितुमाह-

मू. (४५५) *परिव्वयंते अनियत्तकामे, अहो अ राओ परितप्पमाने।*
अन्नप्पमत्ते धनमेसमाने, पप्पुत्ति मच्चुं पुरिसो जरं च ॥

वृ. 'परिव्रजन्' विषयसुखलाभार्थमितस्ततो भ्राम्यन् 'अनिवृत्तकामः' अनुपरतेच्छः सन् 'अहो य राओ'त्ति आर्षत्वाच्चस्य च भिन्नक्रमादह्नि रात्रौ च अहर्निशमितियावत् 'परितप्यमानः' तदवाप्त्यै समन्ताच्चिन्ताग्निना दह्यमानः, अन्ये-सुहृत्स्वजनादयः, अथवाऽन्नं-भोजनं तदर्थं प्रमत्तः-तत्कृत्यासक्तचेता अन्यप्रमत्तः अन्नप्रमत्तो वा 'धनं' वित्तं 'एसमाने'त्ति 'एषयन्' विविधोपायैर्गवेषयमानः 'पप्पोत्ति' प्राप्नोति 'मृत्युं' प्राणत्यागं, कोऽसौ ?-पुरुषः 'जरां च' वयोहानिलक्षणाम्।

मू. (४५६) *इमं च मे अत्थि इमं च नत्थि, इमं च मे किच्च इम अकिच्चं।*
तं एवमेवं लालप्पमानं, हरा हरंतित्ति कहं पमाओ ? ॥

वृ. किञ्च-इदं च मेऽस्ति रजतरूप्यादि न कर्तुमुचितं 'त'मिति पुरुषमेवमेव-वृथैव 'लाल-प्यमानम्' अत्यर्थं व्यक्तवाचा वदन्तं हरन्ति-अपनयन्त्यायुरिति हराः-दिनरजन्यादयो व्याधि-विशेषा वा 'हरन्ति' जन्मान्तरं नयन्ति, उपसंहर्तुमाह-'इती'त्यस्माद्धेतोः 'कथं' केन प्रकारेण 'प्रमादः' अनुद्यमः प्रक्रमाद्धर्मे कर्त्तुमुचित इति शेषः ?, इति सूत्रषट्कार्थः ॥

सम्प्रति तौ धनादिभिर्लोभयितुं पुरोहितः प्राह-

मू. (४५७) *धनं पभूयं सह इत्थियाहिं, सयणा तहा कामगुणा पगामा।*
तवं कए तप्पए जस्स लोगो, तं सव्व साहीणमिहेव तुज्झं ॥

वृ. 'धनं' द्रव्यं 'प्रभूतं' प्रचुरं 'सह स्त्रीभिः' समं नारीभिः 'स्वजनाः' पितृपितृव्यादयः, तथा 'कामगुणाः' शब्दादयः 'पगाम'त्ति 'प्रकामाः' इतिशायिनः 'तपः' कष्टानुष्ठानं 'कृते' निमित्तं 'तप्यते' अनुतिष्ठति 'यस्य' धनादेः 'लोकेः' जनस्तत् 'सर्वम्' अशेषं 'स्वाधीनम्' आत्मायत्तम् 'इहैव' अस्मिन्नेव गृहे 'तुज्झं'ति सूत्रत्याद्युवयोः, यद्यपि च तयोः स्त्रियस्तदा न सन्ति तथाऽपि तदवाप्तियोग्यताऽस्तीति तासामभिधानमिति सूत्रार्थः ॥ तावाहतुः-

मू. (४५८) *धनेन किं धम्मधुराहिगारे ?, सयणेन वा कामगुणेहिं चेव।*
समणा भवस्सामु गुणोहधारी, बहिंविहारा अभिगम्म भिक्खं ॥

वृ. 'धनेन' द्रव्येण किं ?, न किञ्चिदित्यर्थः, धर्म एवातिसात्त्विकैरुह्यमानतया धूरिव धूर्धर्मधुरा तदधिकारेतत्प्रस्तावे स्वजनेन वा कामगुणैश्चैव ?, तथा च वेदऽप्युक्तं-"न प्रजया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न धनेन त्यागेनैकेनामृतत्वमानशु''रित्यादि, ततः 'श्रमणौ' तपस्विनौ भविष्यावः, गुणौघं-सम्यग्दर्शनादिगुणसमूहं धारयत इथ्येवंशीलौ गुणौघधारिणौ बहिः- ग्रामनगरादिभ्यो बहिर्वर्त्तित्वाद् द्रव्यतो भावतश्च क्वचिदप्रतिबद्धत्वाद विहारः- विहरणं ययोस्तौ बहिर्विहारौ अप्रतिबद्धविहाराविवितियावत् 'अभिगम्य' आश्रित्य 'भिक्षां' शुद्धोञ्छां तामेवाहारयन्ताविति भाव इति सूत्रार्थः ॥ आत्मास्तित्वमूलत्वात्सकलधर्मानुष्ठानस्य तन्निराकरणायाह पुरोहितः-

मू. (४५९) *जहा य अग्गी अरणीउऽसंतो, खीरे घयं तिल्लमहा तिलेसु।*
एमेव जाया सरीरंमि त्ता, संमुच्छई नासइ नावचिट्ठे॥

वृ. 'यथे' त्यौपम्ये चशब्दोऽवधारणे, यथैव 'अग्निः' वैश्वानरः 'अरणिउ'त्ति अरणितः-अग्निमन्थनकाष्ठाद् 'असन्' अविद्यमान एव संमूर्छति, तथा क्षीरे घृतं तैलमथ तिलेषु, एवमेव 'हे जातौ' पुत्रौ! 'सरीरंसि'त्ति शरीरे काये 'सत्त्वाः' प्राणिनः 'समुच्छंति'त्ति संमूर्छन्ति, पूर्वमसन्त एव शरीराकारपरिणतभूतसमुदायत उत्पद्यन्ते, तथा चाहुः-''पृथिव्यपस्तेजोवायुरिति तत्त्वानि, एतेभ्यश्चैतन्यं, मद्याङ्गेभ्यो मदशक्तिवत्'', तथा 'नासइ'त्ति नश्यन्ति-अभ्रपटलवत्प्रलयमुपयान्ति 'नावचिट्ठे'त्ति न पुनः अवतिष्ठन्ते-शरीरनाशे सति न क्षणमप्यवस्थितिभाजो भवन्ति, यद्वा शरीरे सत्यप्यमी सत्त्वा नश्यन्ति, नावतिष्ठन्ते, जलबुद्बुदवत्, उक्तं हि-''जलबुद्बुदवज्जीवाः'' अत्र च प्रत्यक्षतोऽनुपलम्भ एव प्रमानं, न ह्यसौ शरीरे शरीरव्यतिरिक्तो वा भवान्तरप्राप्तौ प्रत्यक्षत उपलभ्यत इति नास्ति, शशविषाणवदिति भाव इति सूत्रार्थः ॥ कुमारकावाहतुः-

मू. (४६०) *नो इंदियग्गिज्झु अमुत्तभावा, अमुत्तभावा चिय होइ निच्चो।*
अज्झत्थहेउं निययऽस्स बंधो, संसारहेउं च वयंति बंधं॥

वृ. 'नो' इति प्रतिषेधे इन्द्रियैः-श्रोत्रादिभिर्ग्राह्यः-संवेद्य इन्द्रियग्राह्यः, सत्त्व इति प्रक्रमः, असत्त्वादेवायमिन्द्रियाग्राह्य इथ्याशङ्क्याह-'अमूर्त्तभावात्' इन्द्रियग्राह्यरूपाद्यभावात्, अयमाशयः-यदिन्द्रियग्राह्यं सन्नोपलभ्यते तदसदिति निश्चियते, यथा प्रदेशविशेषे घटो, यत्तु तद्ग्राह्यमेव न भवति न तस्यानुपलम्भेऽप्यभावनिश्चयः, पिशाचादिवत्, तद्विषयानुपलम्भस्य संशयहेतुत्वात्, न च साधकबाधकप्रमानाभावात् संशयविषयतैवास्त्विवति वाच्यं, तत्साधकस्यानुमानस्य सद्भावात्, तथाहि-अस्त्यात्मा अहं पश्यामि जिघ्रामीत्याद्यनुगतप्रत्ययान्यथानुपपत्तेः, आत्माभावे हीन्द्रियाण्येव द्रष्टृणि स्युः, तेषु च परस्परं विभिन्नेष्वहं पश्यामि जिघ्रामीत्यादिरनुगतोऽहमितिप्रत्ययोऽनेकेष्विवप्रतिपत्तृषु न स्यात्, उक्तं हि-

''अहं शृणोमि पश्यामि, जिघ्राम्यास्वादयामि च।
चेतयाम्यध्यवस्यामि, बुध्यामीत्येवमस्ति सः॥''

वृद्धास्तु व्याचक्षते-अमूर्त्तत्वान्नोइन्द्रियग्राह्यो, नोइन्द्रियं च मनो, मनश्चात्मैव, अतः स्वप्रत्यक्ष एवायमात्मा, कस्मात्?, उच्यते, त्रैकाल्यकार्यव्यपदेशात्, तद्यथा-कृतवानहं करोम्यहं करिष्याम्यहमुक्तवानहं ब्रवीम्यहं ज्ञातवानहं जानेऽहं ज्ञास्येऽहमिति योऽयं त्रिकालकार्यव्यपदेशहेतुरहंप्रत्ययो नायमानुमानिको न चागमिकः, किं तर्हि?, प्रत्यक्षकृत एवायम्, अनेनैवात्मानं प्रतिपद्यस्व, नायमनात्मके घटादावुपलभ्यत इति, तथाऽमूर्त्तभावादपि च भवति नित्यः, तथाहि-यद्रव्यत्वे सत्यमूर्त्तं तन्नित्यं, यथा व्योम, अमूर्त्तश्चायं द्रव्यत्वे सत्यनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनाशानवस्थाने प्रत्युक्ते, न चैवममूर्त्तत्वादेव तस्य बन्धासम्भवः सम्भवे वा सर्वस्य सर्वदा तत्प्रसङ्ग इति वाच्यं, यतः 'अज्झत्थहेउं नियय़ऽस्स बंधो' अध्यात्मशब्देन आत्मस्था मिथ्यात्वादय इहोच्यन्ते, ततस्तद्धेतुः-तन्निमित्तोऽपरस्थहेतुकृतत्वेऽतिप्रसङ्गादिदोषसम्भवा-न्नियतो-निश्चितो न संदिग्धो, जगद्वैच्चित्र्यान्यथानुपपत्तेः, 'अस्य' जन्तोर्बन्धः-कर्मभिः संश्लेषः, यथा ह्यमूर्तस्यापि व्योम्नो मूर्तैरपि घटादिभिः सम्बन्धः एवमस्याप्यमूर्तस्यापि मूर्तैरपि कर्मभिरसौ न विरुध्यते, तथा चाह-

"अरूपं हि यथाऽऽकाशं, रूपिद्रव्यादिभाजनम्।
तथा ह्यरूपी जीवो, रूपिकर्मादिभाजनम्॥" इति,

मिथ्यात्दिहेतुत्वाच्च न सर्वस्य सर्वदा तत्प्रसङ्ग इत्यदोषः, एवं हि येषामेव मिथ्यात्वा-दितद्धेतुसम्भवस्तेषामेवासौ न तु तद्विरहितानां सिद्धानामपि, तथा संसारः-चतुर्गतिपर्यटन-रूपस्तद्धेतुं च-तत्कारणं बदन्ति 'बन्धं' कर्मबन्धम्, एतेनामूर्तत्वाद्व्योम्न इव निष्क्रियत्वमपि निराकृतमिति सूत्रार्थः ॥ यत एवमस्त्यात्मा नित्योऽत एव च भवान्तरानुयायी तस्य च बन्धो बन्धादेव मोक्ष इत्यतः-

मू. (४६१) जहा वयं धम्ममजाणमाना, पावं पुरा कम्ममकासि मोहा।
ओरुज्झमाना परिरक्खयंता, तं नेव भुज्जोऽवि समायरामो॥

वृ. 'यथा' येन प्रकारेण वयं 'धर्मं' सम्यग्दर्शनादिकम् 'अजानानाः' अनवबुध्यमानाः 'पावं' पापहेतुं 'पुरा' पूर्वं 'कर्म' क्रियाम् 'अकासि'त्ति अकार्ष्म कृतवन्तः 'मोहात्' तत्त्वानव-बोधात् 'अवरुध्यमाानाः' गृहान्निर्गममलभमानाः 'परिरक्षमानाः' अनुजीविभिरनुपाल्यमानाः 'तद्' इति पापकर्म 'नेव'त्ति नैव 'भूयोऽपि' पुनरपि 'समाचरामः' अनुतिष्ठामो, यतः सम्प्रत्युप-लब्धमेवास्माभिर्वस्तुतत्त्वमिति भावः, सर्वत्र च 'अस्मदो द्वयोश्चे'ति द्वित्वेऽपि बहुवचनमिति

मू. (४६२) अब्भाहयंमि लोगंमि, सव्वओ परिवारिए।
अमोहाहिं पडंतीहिं, गिहंसि न रइं लभे॥

वृ. 'अभ्याहते' आभिमुख्येन पीडिते 'लोके' जने 'सर्वत्र' सर्वासु दिक्षु 'परिवारिते' परिवेष्टिते 'अमोधाभिः' अवन्ध्यामिः, प्रहरणोपमाभिः 'पतन्तीभि' आगच्छन्तीभिः 'गिहंसि'त्ति गृहे तस्य चोपलक्षणत्वाद् गृहवासे न 'रतिम्' आसक्ति 'लभे'त्ति लभावहे, यथा हि वागुरया परिवेष्टितो मृगोऽमोधैश्च प्रहरणैर्व्याधेनाभ्याहतो न रतिं लभते, एवमावामपीति सूत्रार्थः ॥ भृगुराह-

मू. (४६३) केन अब्भाहओ लोओ, केन वा परिवारिओ।
का वा अमोहा वुत्ता?, जाया! चिंतावरो हुमि॥

वृ. केन व्याधतुल्येनाभ्याहतो लोकः ?, केन वा वागुरास्थानीयेन परिवारितः ?, का वा 'अमोघा' अमोघप्रहरणोपमा अभ्याहतिक्रियां प्रति करणतयोक्ता ?, 'जातौ !' पुत्रौ चिन्तापरः 'हुमि'त्ति भवामि, ततो ममावेद्यतामयमर्थ इति भाव इति सूत्रार्थः ॥ तावाहतुः-

मू. (४६४) मच्चुणाऽब्भाहओ लोओ, जराए परिवारिओ।
अमोहा रयणी वुत्ता, एवं ताय! वियाणह॥

वृ. 'मृत्युना' कृतान्तेनाभ्याहतो लोकः, तस्य सर्वत्राप्रतिहतप्रसरत्वात्, जरया परिवारितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्या एव तदभिधातयोग्यतापादनपटीयत्वात्, अमोघा 'रयणि' त्ति रजन्य उक्ताः, दिवसाविनाभावित्वात्तासां दिवसाश्च, तत्पतने ह्यवश्यंभावी जनस्याभिधातः, एवं तात ! 'विजानीत' अवगच्छतेति सूत्रार्थः ॥ किञ्च-

मू. (४६५) *जा जा वच्चइ रयणी, न सा पडिनियत्तई।*
अहम्मं कुणमानस्स, अहला जंति राइओ ॥

वृ. या या 'वच्चति' व्रजति 'रजनी' रात्रिरुपलक्षणत्वाद्दिनं च न सा 'प्रतिनिवर्त्तते' पुनरागच्छति, तदागमने हि सर्वदा सैवैका जन्मरात्रिः स्यात्ततो न द्वितीया मरणारात्रिः कदाचित्प्रादुष्प्यात्, ताश्चाधर्मं कुर्वतो जन्तोरिति गम्यते अफला यान्ति रात्रयः, अधर्मनिबन्धनं च गृहस्थतेत्यायुपोऽनित्यत्वादधर्मकरणे च तस्य निष्फलत्वात्तत्परित्याग एव श्रेयानिति भावः।

इत्थं व्यतिरेकद्वारेण प्रव्रज्याप्रतिपत्तिहेतुर्मभिधाय तमेवान्वयमुखेनाह-

मू. (४६६) *जा जा वच्चइ रयणी, न सा पडिनियत्तई।*
धम्मं तु च कुणमानस्स, सफला जंति राईओ ॥

वृ. 'जा जे'त्यादि पूर्ववत्, नवरं 'धम्मं च' त्ति चशब्दः पुनरर्थे धर्मं पुनः कुर्वतः सफला धर्मलक्षणफलोपार्जनतो, न च व्रतप्रतिपत्तिं विना धर्म इत्यतो व्रतं प्रतिपत्स्यावहे इत्यभिप्राय इति सूत्रद्वयार्थः ॥ इत्थं कुमारवचनादाविर्भूतसम्यक्त्वस्तद्वचनमेव पुरस्कुर्वन् भृगुराह-

मू. (४६७) *एगओ संवसित्ता णं, दुहओ संमत्तसंजुया।*
पच्छा जाया ! गमिस्सामो, भिक्खमाना कुले कुले ॥

वृ. 'एकतः' एकस्मिन स्थाने 'समुष्य' सहैवासित्वा 'दुहतो'त्ति द्वयं च द्वयं च द्वये आवां युवां च, व्यक्त्यपेक्षया बहुवचनं पुरुषप्राधान्याच्च पुंलिङ्गता, 'सम्यक्त्वसंयुताः' सम्यक्त्वेन-तत्त्वरुचिलक्षणेन संयुताः-सहिताः, उपलक्षणत्वाद्देशविरत्या च 'पश्चाद्' यौवनावस्थोत्तरकालं, कोऽर्थः ?-पश्चिमे वयसि, 'जातौ' पुत्रौ ! 'गमिष्यामः' व्रजिष्यामो वयं ग्रामनगरादिषु, मासकल्पादिक्रमेणेति शेषः, अर्थाच्च प्रव्रज्यां प्रतिपद्य, 'भिक्षमानाः' याचमानाः, पिण्डादिकमिति गम्यते, क्व ?-'कुले कुले' गृहे गृहे न त्वेकस्मिन्नेव वेश्मनि, किमुक्तं भवति ?-अज्ञातोञ्छवृत्त्येति सूत्रार्थः ॥ कुमारावाहतुः-

मू. (४६८) *जस्सऽत्थि मच्चुणा सक्खं, जस्स वऽत्थि पलायनं।*
जो जाणइ न मरिस्सामि, सो हु कंखे सुए सिया ॥

वृ. 'यस्य' इत्यनिर्दिष्टस्वरूपस्य 'अस्ति' विद्यते 'मृत्युना' कृतान्तेन 'सख्यं' मित्रत्वं, यस्य चास्ति 'पलायनं' नशनं, मृत्योरिति प्रक्रमाः, तथा 'जो जाणइ'त्ति यो जानीते यथाऽहं न मरिष्यामि, 'सो हु कंखे सुए सिय'त्ति स एव 'काङ्क्षति' प्रार्थयते 'श्वः' आगामिनि दिने स्यादिदमिति गम्यते। न च कस्यचिन्मृत्युना सह सख्यं ततो वा पलायनं तदभावज्ञानं वा।

मू. (४६९) *अज्जेव धम्मं पडिवज्जयामो, जहिं पवन्ना न पुणब्भवामो।*
अनागयं नेव य अत्थि किंची, सद्धाखमं नो विणइत्तु रागं।

वृ. अतोऽद्यैव 'धर्मं' प्रक्रमाद्यतिधर्मं 'पडिवज्जयामो'त्ति 'प्रतिपद्यामहे' अङ्गीकुर्महे, तमेव फलोपदर्शनद्वारेण विशिनष्टि-'जहिं'ति आर्षत्वाद्यं धर्मं 'प्रपन्नाः' आश्रिताः 'न पुनर्भ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वामो'त्ति न पुनर्भविष्यामो-न पुनर्जन्मानुभविष्यामः, तन्निबन्धनभूतकर्मापगमात्, जरामरणाद्य-भावोपलक्षणं चैतत्, किञ्च-'अनागतम्' अप्राप्तं नैव चास्ति किञ्चिदिति मनोरममपि विषय-सौख्यादि अनादौ संसारे सर्वस्य प्राप्तपूर्वत्वात्ततो न तदर्थमपि गृहावस्थानं युक्तमिति भावः, यद्वा 'अनागतम्' आगतिविरहितं नैव चास्ति किंचित्, किन्तु सर्वमागतिमदेव जरामरणादि व्यसनजातं, ध्रुवभावित्वादस्य भवस्थानां, यद्वाऽनागतं यत्र मृत्युरोगतिर्नास्ति तन्न किञ्चित्स्थान-मस्ति, यतश्चैवमतः श्रद्धा-अभिलाषः क्षमं-युक्तमिहलोकपरलोकयोश्च श्रेयःप्राप्तिनिमित्त-मनुष्ठानं कर्त्तुमिति शेषः, 'न' इति नोऽस्माकं 'निनीय' अपसार्य, कं ?-'रागं' स्वजना-भिष्वङ्गलक्षणं, तत्त्वतो हि कः कस्य स्वजनो न वा स्वजन इति, उक्तं च-"अयं णं' भंते ! जीवे एगमेगस्स जीवस्स माइत्ताइ (पियताए) भाइत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए भज्जत्ताए सुहिसयणसंबंधसंथुयत्ताए उववन्नपुव्वे ?, हंता गोयमा !, असतिं अदुवा अनंतखुत्तो"त्ति, इति सूत्रद्वयार्थः ॥ ततस्तयोर्वचनमाकर्ण्य पुरोहित उत्पन्नव्रतग्रहणपरिणामो ब्राह्मणीं धर्मविघ्नकारिणीं मत्वेदमाह-

मू. (४७०) पहीणपुत्तस्स हु नत्थि वासो, वासिट्ठि! भिक्खायरियाइ कालो।
साहाहि रुक्खो लहई समाहिं, छिन्नाहिं साहाहिं तमेव खाणुं॥

वृ. प्रहीणौ-प्रभ्रष्टौ पुत्रौ यस्मात्स प्रहीणपुत्रः, अथवा प्राकृते पूर्वापरनिपातस्यातन्त्रत्वा-त्पुत्राभ्यां प्रहीणः-त्यक्तः पुत्रप्रहीणः तस्य 'हुः' पूरणे 'नास्ति' न विद्यते 'वासः' अवस्थानं, मम गृह इति गम्यते, वाशिष्टि!-वशिष्टगोत्रोद्भवे, गौरवख्यापनार्थं गोत्राभिधानं, तच्च कथं नु नाम धर्माभिमुख्यमस्याः स्यादिति, भिक्षाचर्यायाः-भिक्षाटनस्य, उपलक्षणं चैतद् व्रतग्रहणस्य कालः-प्रस्तावो वर्त्तत इति शेषः। किमित्येवमत आह-'शाखाभिः' प्रतीताभिः 'वृक्षः' द्रुमः 'लभते' प्राप्नोति 'समाधिं' स्वास्थ्यं, 'छिन्नाभिः' द्विधाकृताभिः शाखाभिः 'तमेव' वृक्षं यस्ताभिः समाधिमासवान् 'खाणुं'ति स्थाणुं जनोऽप्युपदिशतीत्युपस्कारः, यथा हि तास्तस्य शोभासंरक्षणसहायकृत्यकरणादिना समाधिहेतवः एवं ममाप्येतौ सुतावतस्तद्विरहितोऽहमपि स्थाणुकल्प एवेति किं ममैवंविधस्य स्वपरयोः कञ्चिदुपकारमपुष्णत एव गृहवासेनेत्यभि-प्रायः।

मू. (४७१) पंचाविहूणो व जहेव पक्खी, भिच्चव्विहूणो व रणे नरिंदो।
विवन्नसारो वणिउव्व पोए, पहीणपुत्तोमि तहा अहंपि॥

वृ. किञ्च-पक्षाभ्यां-पतत्त्राभ्यां विहीनो-विरहितः पक्षविहीनः, 'वा' दृष्टान्तान्तरसमुच्चये, यथा 'इह' अस्मिल्लोके 'पक्षी' विहङ्गमः पलायितुमप्यशक्त इति मार्जारादिभिरभिभूयते। तथा भृत्याः-पदातयस्तद्विहीनो, वा प्राग्वत्, 'रणे' सङ्ग्रामे 'नरेन्द्रः' राजा शत्रुजनपराजयस्थान-मेव जायते, तथा विपन्नः-विनष्टः सारो-हिरण्यरत्नादिरस्येति विपन्नसारो वणिक् सांयात्रिको, वेति प्राग्वत्, 'पोते' प्रवहणे भिन्न इति गम्यते नार्वाग् न च परत इत्युदधिमध्यवर्त्ती विषीदति, पुत्रप्रहीणोऽस्मि तथाऽहमपि, कोऽर्थः ?-पक्षभृत्यार्थसारभूताभ्यां सुताभ्यां विरहितोऽहमप्येवं-विध एवेति सूत्रद्वयार्थः॥ वाशिष्ट्याह-

मू. (४७२) सुसंभिया कामगुणा इमे ते, संपिंडिया अग्गरसा पभूया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भुंजामु ता कामगुणे पगामं, पच्छा गमिस्सामु पहाणमग्गं ॥

वृ. सुष्ठु-अतिशयेन संभृताः-संस्कृताः सुसंभृताः, के ते ?-'कामगुणा' वेणुवीणाक्वनितकाकलीगीतादयः 'इमे' इति स्वगृहवर्त्तिनः, तान् प्रत्यक्षतया निर्दिशति, 'ते' तव तथा 'संपिण्डिताः' सम्यक्पुञ्जीकृताः 'अग्गरस'त्ति चशब्दस्य गम्यमानत्वादग्र्या रसाश्च-प्रधाना मधुरादयश्च प्रभूताः-प्रचुराः, कामगुणान्तर्गतत्वेऽपि रसानां पृथगुपादानमतिगृद्धिहेतुत्वाच्छब्दादिष्वपि चैषामेव प्रवर्त्तकत्वात्, कामगुणविशेषणं वा अग्र्या रसास्त एव शृङ्गारादयो वा येषु ते तथा, वृद्धास्त्वाहुः-रसानां-सुखानामग्रं रसाग्रं ये कामगुणाः, सूत्रे च प्राकृतत्वादग्रशब्दस्य पूर्वनिपातः, 'भुंजामो'त्ति भुञ्जीमहि 'तत्' तस्मादमी सुसंभृतादिविशेषणविशिष्टास्ते च स्वाधीनाः सन्ति, 'कामगुणान्' उक्तरूपान् 'प्रकामम्' अतिशयेन, ततो भुक्तभोगाः 'पश्चाद्' इति वृद्धावस्थायां 'गमिष्यामः' प्रतिपत्स्यामहे 'प्रधानमार्गं' महापुरुषसेवितं प्रव्रज्यारूपं मुक्तिपथमिति सूत्रार्थः ॥ पुरोहितः प्राह-

मू. (४७३) *भुत्ता रसा भोई ! जहाइ णे वओ, न जीवियट्ठा पजहामि भोए ।*
लाभं अलाभं च सुहं च दुक्खं, संचिक्खमानो चरिसामि मोनं ॥

वृ. 'भुक्ताः' सेविताः 'रसाः' मधुरादयः, उपलक्षणत्वाच्छेषकामगुणाश्च, यद्वा रसा इह सामान्येनैवास्वाद्यमानत्वाद्भोगा भण्यन्ते 'होति'त्ति हे भवति !, आमन्त्रणवचनमेतत्, 'जहाति' त्यजति 'नः' इत्यस्मान् वयः शरीरावस्था कालकृतोच्यते, सा चेहाभिमतक्रियाकरणक्षमा गृह्यते, ततश्च यतो भुक्ता एवानेकशो भोगा वयश्चाभिमतक्रियाकरणक्षमं जहाति, उपलक्षणत्वाज्जीवितं च, ततो यावन्नैतत्त्यजति तावद्दीक्षां प्रतिपद्यामह इत्यभिप्रायः, तत्किं वयःस्थैर्याद्यर्थं दीक्षां प्रतिपद्यसे ?, उच्यते हि कैश्चित् दीक्षा वयःस्थैर्यादिविधायिनीत्याशङ्क्याह- 'न' इति निषेधे जीवितम्-असंयमजीवितम्, उपलक्षणत्वाद्वयश्च तदर्थं 'प्रजहामि' प्रकर्षेण त्यजामि 'भोगान्' शब्दादीन्, किन्तु 'लाभम्' अभिमतवस्त्वाप्तिरूपम् 'अलामं च' तदभावरूपं 'सुखम्' अभिलषणीयविषयसम्भोगजं, चस्य भिन्नक्रमत्वाद् 'दुःखं च' बाधात्मकं 'संचिक्खमानो'त्ति समतया ईक्षमानः-पश्यन्, किमुक्तं भवति ?-लाभालाभयोस्तथा सुखदुःखयोरुपलक्षणत्वाज्जीवितमरणादीनां च समतामेव भावयन् 'चरिष्यामि' आसेविष्ये, किं तत् ?- 'मौनं' मुनिभावं, ततो मुक्त्यर्थमेव मम दीक्षाप्रतिपत्तिरिति भाव इति सूत्रार्थः ॥ वाशिष्टयाह-

मू. (४७४) *मा हू तुमं सोदरियाण संभरे, जुन्नो व हंसो पडिसोयगामी ।*
भुंजाहि भोगाइं मए समानं, दुक्ख खु भिक्खायरिया विहारो ॥

वृ. 'मा' इति निषेधे 'हूः' इति वाक्यालङ्कारे त्वं सोदरे शयिताः सोदर्याः, 'सोदराद्य इति यः प्रत्ययः, ते च समानकुक्षिभवा भ्रातरस्तेषाम्, उपलक्षणात्वाच्छेषस्वजनानां भोगानां च, 'संभरे'त्ति अस्मार्षीः, क इव ?-'जुन्नो व हंसो'त्ति इवशब्दस्य भिन्नक्रमत्वात् 'जीर्णः' वयोहानिमुपगतो 'हंस इव' प्रधानपक्षीव प्रतिकूलं स्रोतः प्रतिस्रोतस्तद्गामी सन्, किमुक्तं भवति ?-यथाऽसौ नदीस्रोतस्यतिकष्टं प्रतिकूलगमनमारभ्यापि तत्राशक्तः पुनरनुस्रोत एवानुधावति, एवं भवानपि दुरनुचरं संयमभारं वोढुमसमर्थः पुनः सहोदरादीन् भोगान् वा स्मरिष्यति, तदिदमेवास्तु, भुङ्क्ष्व भोगान् मया 'समानं'ति सह 'दुःख'मिति दुःखहेतुः 'खु'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति खलु निश्चितं 'भिक्षाचर्या' भिक्षाटनं 'विहारः' ग्रामादिष्वप्रतिबद्धविहारो, दीक्षोपलक्षणं चैतदिति सूत्रार्थः ॥ पुरोहित आह-

मू. (४७५) जहा य भोई! तनुयं भुयंगे, निम्मोअणिं हिच्च पलाइ मुत्तो।
एमेए जाया पजहंति भोए, तेऽहं कहं नाणुगमिस्समिक्को ?॥

वृ. यथा हे भवति ! पठ्यते च-'भोगि'त्ति हे भोगिनि ! तनुः-शरीरं तत्र जातां तनुजां 'भुजङ्गमः' सर्पः 'निर्मोचनीं' निर्मोकं हित्वा 'पर्येति' समन्ताद्गच्छति 'मुक्तः' इति निरपेक्षोऽनभिष्वक्त इत्यर्थः, 'एमेए'त्ति एवमेतौ, पठ्यते च 'इमेति'त्ति अत्र च तथेति गम्यते, ततस्तथेमौ 'ते' तव 'जातौ' पुत्रो 'पजहंति' प्रजहीतः प्रकर्षेण त्यजतो भोगान्, ततः किमित्याह-तौ भोगांस्त्यजन्तौ जातौ अहं कथं न 'अनुगमिष्यामि' प्रव्रज्याग्रहणेनानुसरिष्यामि 'एकः' अद्वितीयः ? । यदि तावदनयोः कुमारकयोरपीयान् विवेको यन्निर्मोकवदत्यन्तसहचरितानपि भोगान् भुजङ्गवत्त्यजतस्तत्किमिति भुक्तभोगोऽप्यहमेतान्न त्यक्ष्यामि ?, किं वा ममासहायस्य गृहवासेनेत भावः ।

मू. (४७६) छिंदितु जालं अबलं व रोहिया, मच्छा जहा कामगुणे पहाय।
धोरेयसीला तवसा उदारा, धीरा हु भिक्खायरियं चरंति॥

वृ. तथा 'छित्त्वा' द्विधाकृत्वा तीक्ष्णपुच्छादिना 'जालम्' आनायम् 'अबलमिव' जीर्णत्वादिना निःसारमिव, बलीयोऽपीति गम्यते, 'रोहिताः' रोहितजातीयाः 'मत्स्या' मीनाश्चरन्तीति सम्बन्धः, 'यथै'ति दृष्टान्तोपदर्शने, यत्तदोश्च नित्यसम्बन्धात्तथेति गम्यते, ततस्तथा जालप्रायान् कामगुणान् 'प्रहाय' परित्यज्य, धुरि वहन्ति धौरेयास्तेषामिव शीलम्-उत्क्षिप्तभारवाहितालक्षणं स्वभावो येषां ते धौरेयशीलाः 'तपसा' अनशनादिना 'उदाराः' प्रधानाः 'धीराः' सत्त्ववन्तः हुरिति यस्माद् भिक्षाचर्यां 'चरन्ति' आसेवन्ते, व्रतग्रहणोपलक्षणमेतद्, अतोऽहमपीत्थं व्रतमेव ग्रहीष्ये इति भाव इति सूत्रद्वयार्थः ॥ इत्थं तत्प्रतिबोधित ब्राह्मण्याह-

मू. (४७७) नहेव कुंचा समइक्कमंता, तयाणि जालाणि दलितु हंसा।
पलिंति पुत्ता य पई य मज्झं, तेऽहं कहं नाणुगमिस्समिक्का ?॥

वृ. 'नभसीव' आकाश इव 'क्रौञ्चाः' पक्षिविशेषाः 'समतिक्रामन्तः' तांस्तान् देशानुल्लङ्घयन्तः 'ततानि' विस्तीर्णानि 'जालानि' बन्धनविशेषरूपाण्यात्मनोऽनर्थहेतुन् 'दलयित्वा' भित्त्वा 'हंस'त्ति चशब्दस्य गम्यमानत्वाद्धंसाश्च 'पलिंति'त्ति परियन्ति-समन्ताद्गच्छन्ति 'पुत्रौ च' सूतौ 'पतिश्च' भर्त्ता मम सम्बन्धिनो, गम्यमानत्वादेतत् (नं)जालोपमविषयाभिष्वङ्गं भित्त्वा नभःकल्पे निरुपलेपतया संयमाध्वनि तानि तानि संयमस्थानानि अतिक्रामन्तस्तानहं कथं नानुगमिष्याम्येका सती ?, किन्त्वनुगमिष्याम्येव, एवंविधवयसां हि स्त्रीणां भर्त्ता वा पुत्रो वा गतिरिति, यदिवा जालानि भित्त्वेति हंसानामेव सम्बध्यते, समतिक्रामन्तः स्वातन्त्र्येण गच्छन्त इति तु क्रौञ्चानां, ततश्च क्रौञ्चोदाहरणमजाकलत्रादिबन्धनसुतापेक्षं, हंसोदाहरणं तु तद्विपरीतपत्यपेक्षमिति बावनीयमिति सूत्रार्थः ॥

इत्थं चतुर्णामप्येकवाक्यतायां प्रव्रज्याप्रतिपत्तौ यदभूत्तदाह-

मू. (४७८) पुरोहियं तं ससुयं सदारं, सुच्चाऽभिनिक्खम्म पहाय भोए।

कुडुंबसारं विउलुत्तमं तं, रायं अभिक्खं समुवाय देवी ॥

वृ. 'पुरोहितं' पुरोधसं 'तम' इति भृगुनामानं 'ससुतं' पुत्रद्वयान्वितं 'सदारं' सपत्नीकं 'श्रुत्वा' आकर्ण्य 'अभिनिष्क्रम्य' गृहान्निर्गत्य 'प्रहाय' प्रकर्षेण त्यक्त्वा 'भोगान्' शब्दादीन् प्रव्रजितमिति गम्यते, 'कुटुम्बसारं' धनधान्यादि विपुलं च-विस्तीर्णतया उत्तमं च-प्रधानतया विपुलोत्तमं 'तदि'ति यत्पुरोहितेन त्यक्तं गृह्णन्तमिति शेषः, 'रायं'ति राजानं नृपतिम् 'अभीक्ष्णं' पुनः पुनः 'समुवाच' सम्यगुक्तवती 'देवी' कमलावती नाम तदग्रमहिषी, किमुक्तवतीत्याह-

मू. (४७९) *वंतासी पुरिसो रायं!, न सो होइ पसंसिओ।*
माहणेण परिच्चत्तं, धनं आदाउमिच्छसि ॥

वृ. वान्तम्-उद्गीर्णमशितुं-भोक्तुं शीलमस्येति वान्ताशी 'पुरुषः' पुमान्, य इति गम्यते, 'राजन्!' नृप! न स 'भवति प्रशंसितः' श्लाघितो विद्वद्भिरिति शेषः, स्यादेतत्-कथमहं वान्ताशीत्यत आह-ब्राह्मणेन 'परित्यक्तं' परिहृतं 'धनं' द्रव्यम् 'आदातुं' गृहीतुमिच्छसि, परिहृतधनं हि गृहीतोज्झितत्वाद्वान्तमिय तत्तदादातुमिच्छंस्त्वमपि वान्ताशीव, न चेदमुचितं भवादृशामित्यभिप्रायः। अथवा काक्वा नीयते-राजन्! वान्ताशी यः स प्रशस्यो न भवत्यतो ब्राह्मणेन परित्यक्तं धनं त्वमादातुमिच्छसि नैवैतद्भवत उचितं, यतत्वमप्येवं वान्ताशितयाऽश्लाध्य एव भविष्यसीति काक्वर्थः ॥

मू. (४८०) *सव्वं जगं जइ तुहं, सव्व वावि धनं भवे।*
सव्वंपि ते अपज्जत्तं, नेव ताणाय तं तव ॥

वृ. किं?-'सर्वं' निरवशेषं 'जगद्' भुवनं, भवेदिति सम्बन्धः, 'यदी'त्यस्यायमर्थः-न संभवत्येवैतत्, कथञ्चित्सम्भवे वा 'तुह'न्ति तव सर्वं वाऽपि धनं-रजतरूप्यादिद्रव्यं भवेत् यदि तवेतीहापि योज्यते, तदा सर्वमपि 'ते' तव 'अपर्याप्तम्' अशक्तम्, इच्छापरिपूर्तिं प्रतीति शेषः, आकाशसमत्वेन तस्या अपर्यवसितत्वात्, तथा नैव 'त्राणाय' जरामरणाद्यापदपनोदाय 'तदि'ति सर्वं जगद्धनं वा भवति ते, इह च पुनः पुनः सर्वशब्दस्य युष्मदश्चोपादानं भिन्नवाक्यत्वादपुनरुक्तमिति भावनीयं, पूर्वेण गर्हितत्वमनेन चानुपकारितां पुरोहितधनाद्यग्रहणहेतुमादर्श्य सम्प्रत्यनित्यतां तद्धेतुमाह-

मू. (४८१) *मरिहिसि रायं! जया तया वा, मनोरमे कामगुणे पहाय।*
इक्को हु धम्मो नरदेव! ताणं, न विज्जई अज्जमिहेह किं च ॥

वृ. 'मरिष्यसि' प्राणांस्त्यक्ष्यसि 'राजन्!' नृप! 'यदा तदा वा' यस्मिंस्तस्मिन् वा कालेऽवश्यमेव मर्त्तव्यं, 'जातस्य हि ध्रुवो मृत्यु'रिति, उक्तं हि-

"कश्चित्तावत्त्यवा दृष्टः, श्रुतो वा शङ्कितोऽपि वा।
क्षितौ वा यदिवा स्वर्गे, यो जातो न मरिष्यति ॥"

तत्रापि च कदाचिदभिलषितवस्त्वादायैव मरिष्यतीत्यत आह-'मनोरमान्' चित्तह्लादकान् 'कामगुणान्' उक्तरूपान् 'प्रहाय' प्रकर्षेण त्यक्त्वा 'त्वम्' एकाक्येव मरिष्यसि, न किञ्चिदन्यत्त्वया सह यास्यतीत्यभिप्रायः। तथा 'एक्को हु'त्ति एक एव-अद्वितीयः 'धर्म एव' सम्यग्दर्शनादिरूपः 'नरदेव!' नृप! 'त्राणं' शरणमापत्परिरक्षणे क्षमं 'डन विद्यते' नास्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अन्यद्' अपरम् 'अहेहे'ति वीप्साभिधानं सम्भ्रमख्यापनार्थं, 'किञ्चिदि'ति स्वजनधनादिकं, यदिवा 'इहे'ति लोके 'इहे'त्यस्मिन् मृत्यौ धर्म एवैकस्त्राणं, मुक्तिहेतुत्वेन, नान्यत्किञ्चित्, ततः स एवानुष्ठेय इति भाव, इति सूत्रचतुष्टयार्थः ॥ यतश्च धर्मादृते नान्यन्त्राणमतः-

मू. (४८२) *नाहं रमे पक्खिणि पंजरे वा, संताणछिन्ना चरिसामि मोनं।*
अकिंचणा उज्जुकडा निरामिसा, परिग्गहारंभनियत्तऽदोसा॥

वृ. 'ने'ति निषेधे, 'अह'मित्यात्मनिर्देशे 'रमे' इति रतिमवाप्नोमि 'पक्खिणि पंजरे व'त्ति वाशब्द औपम्ये भिन्नक्रमश्च ततः 'पक्षिणीव' शकुनिकेव सारिकादिः 'पञ्जरे' प्रतीत एव, किमुक्तं भवति ?-यथाऽसौ दुःखोत्पादिनि पञ्जरे न रतिं प्राप्नोति एवमहमपि जरामरणाद्युपद्रवविद्रुते भवपञ्जरे न रमे, अतरिछन्नसन्ताना प्रक्रमाद् विनाशितस्नेहसन्ततिः सती, छिन्नशब्दस्य सूत्रे परनिपातः प्राग्वत्, 'चरिष्यामि' अनुष्ठास्यामि 'मौनं' मुनिभावम्, अविद्यमानं किञ्चनं-द्रव्यतो हिरण्यादि भावतः कषायादिरूपमस्या इत्यकिञ्चना, अत एव ऋजुमायाविरहितं कृतम्-अनुष्ठितमस्या इति ऋजुकृता, कथं चैवंभूतेत्याह-निष्क्रान्ता आमिषाद्-गृद्धिहेतोरभिलपितविपयादेः निर्गतं वा आमिर्दोपाः-अभिष्वङ्गनिस्तृंशतादयस्येभ्यो निवृत्ता-उपरता परिग्रहारम्भदोषनिवृत्ता, यद्वा परिग्रहारम्भनिवृत्ता अत एव चादोषा-विकृतिविरहिता, अनयोर्विशेषणसमासः।

मू. (४८३) *दवग्गिणा जहा रन्ने, डज्झमानेसु जंतुसुं।*
अन्ने सत्ता पमोयंति, रागद्दोसवसं गया॥

वृ. अपरं च 'दवाग्निना' दावानलेन यथा 'अरण्ये' वने 'दह्यमानेषु' भस्मसात्क्रियमानेषु 'जन्तुषु' प्राणिषु 'अन्ये' अपरे 'सत्त्वाः' प्राणिनोऽविवेकिनः 'प्रमोदन्ते' प्रकर्षेण हृष्यन्ति, किमित्येवंविधास्ते इत्याह-रागद्वेषयोर्वशः-आयत्तता रागद्वेषवशस्तं गताः-प्राप्ताः।

मू. (४८४) *एवमेव वयं मूढा, कामभोगेसु मुच्छिया।*
डज्झमानं न बुज्झामो, रागद्दोसग्गिणा जगं॥

वृ. 'एवमेवं'ति बिन्दोरलाक्षणिकत्वादेवमेव वयं 'मूढ'त्ति 'मूढानि' मोहवशगानि 'कामभोगेषु' उक्तरूपेषु 'मुच्छिय'त्ति मूर्छितानि गृद्धानि दह्यमानमिव दह्यमानं न 'बुध्यामहे' नावगच्छामो रागद्वेपावग्निरिव रागद्वेषाग्निस्तेन, किं तत्?-'जगत्' प्राणिसमूहं, यो हि सविवेको रागादिमांश्च न भवति स दावानलेन दह्यमानानन्यसत्त्वानवलोक्य अहमप्येवमनेन दहनीय इति तद्रक्षणोपायतत्पर एव भवति, न तु प्रमादवशगः सन् प्रमोदते, यस्त्वत्यन्तमज्ञो रागादिमांश्च स आयतिमचिन्तयन् हृष्यति न तु तदुपशमनोपाये प्रवर्त्तते, ततो वयमपि भोगापरित्यागादेवंविधान्येवेति भावः। ये त्वेवंविधा न भवन्ति ते किं कुर्वन्तीत्याह-

मू. (४८५) *भोगे मुच्चा वमित्ता य, लहुभूयविहारिणो।*
आमोअमाना गच्छंति, दिया कामकमा इव॥

वृ. 'भोगान्' मनोज्ञशब्दादीन् 'भोच्च'त्ति 'भुक्त्वा' आसेव्य पुनरुत्तरकालं 'वान्त्वा च' अपहाय विपाकदारुणत्वाल्लघुः-वायुस्तद्वद्भूतं-भवनमेषां लघुभूताः, कोऽर्थः ?-वायूपमाः तथाविधाः सन्तो विहरन्तीत्येवंशीलाः लघुभूतविहारिणः-अप्रतिबद्धविहारिण इत्यर्थः, यद्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लघुभूतः-संयमस्तेन विहर्त्तुं शीलं येषां ते तथाविधाः, आ-समन्तान्मोदमाना हृष्यन्त आमोदमानाः, तथाविदानुष्ठानेनेति गम्यते, गच्छन्ति वियक्षितं स्थानमिति शेषः, क इव ?-'दिया कामकमा इव' त्ति इवशब्दो भिन्नक्रमस्ततो द्विजा इव-पक्षिण इव कामः-अभिलाषस्तेन क्रामन्तीति कामक्रमाः, यथा पक्षिणः स्वेच्छया यत्र यत्रावभासते तत्र तत्रामोदमाना भ्राम्यन्ति एवमेतेऽप्यभिष्वङ्गस्य परतन्त्रताहेतोरभावाद्यत्र यत्र संयमयात्रानिर्वहणं तत्र तत्र यान्तीत्याशयः।

पुनर्वहिरास्थां निराकुर्वन्त्याह-

मू. (४८६) इमे य बद्धा फंदंति, मम हत्थऽज्जमागया।
वयं च सत्ता कामेसु, भविस्सामो जहा इमे॥

वृ. 'इमे' इत्यनुभूयमानतया प्रत्यक्षाः शब्दादयः, 'चः' समुच्चये 'बद्धाः' नियन्त्रिता अनेकधोपायै रक्षिता इथ्यर्थः, एते किमित्याह-स्पन्दन्त इव स्पन्दन्ते अस्थितिधर्मतया, ये कीदृश इत्याह-'मम हत्थऽज्जभाग- य'त्ति 'ममे' त्यात्मनिर्देशे उपलक्षणत्वात्तव च 'हस्तं' करम्, आर्य! अद्य वा 'आगताः' प्राप्ताः, कोऽर्थः ?-स्ववशाः, आत्मनोऽज्ञतां दर्शयितुमाह-'वयं च सत्त'त्ति वयं पुनः 'सक्तानि' संबद्धानि अभिष्वङ्गवन्तीत्यर्थः, अबहुत्वेऽप्यस्मदोर्द्वयोश्चेति बहुवचनं, 'कामेषु' अभिलषणीयशब्दादिषु, एवंविधेष्वपि चामीष्वभिष्वङ्ग इति मोहविलसितमिति भावः, यद्वा 'इमे चे'त्ति चशब्दाद्वयं च स्पन्दामह इव स्पन्दामहे आयुषश्चलतया परलोकगमनाय, शेषं तथैव, यत एवमतो भविष्यामो यथेमे पुरोहितादयः, किमुक्तं भवति ?-यथाऽभिश्चञ्चलत्वमवलोक्यैते परित्यक्तास्तथा वयमपि त्यक्ष्याम इति। स्यादेतद्-अस्थिरत्वेऽपि सुखहेतुत्वात्किमित्यमी त्यज्यन्ते इत्याह-

मू. (४८७) सामिसं कुललं दिस्सा, बज्झमानं निरामिसं।
आमिसं सव्वमुज्झित्ता, विहरिस्सामो निरामिसा॥

वृ. सहामिषेण-पिशितरूपेण वर्तत इति सामिषस्तं कुललमिह गृध्रं शकुनिकां वा 'दृष्ट्वा' अवलोक्य 'बाध्यमानं' पीड्यमानं पक्ष्यन्तरैरिति गम्यते, निरामिषम्-आमिषविरहितमन्यथाभूतं दृष्ट्वति गम्यते, 'आमिषम्' अभिष्वङ्गहेतुं धनधान्यादि 'सर्वं' निरवशेषम् 'उज्झित्वा' त्वक्त्वा 'विहरिस्सामो'त्ति विहरष्याम्यप्रतिबद्धविहारितया चरिष्यामीत्यर्थः, 'निरामिषा' परित्यक्ताभिष्वङ्गहेतुः। उक्तानुवादेनोपदेष्टुमाह-

मू. (४८८) गिद्धोवमे य नच्चा णं, कामे संसारवड्डणे।
उरगो सुवन्नपासिव्व, संकमानो तणुं चरे॥

वृ. गृद्ध्रेणोपमा येषां ते गृद्धोपमास्तानुक्तन्यायेन, 'तुः' समुच्चये भिन्नक्रमश्च योक्ष्यते, 'ज्ञात्वा' अवबुध्य, नमिति प्राग्वत्, कान् ?-प्रक्रमाद्विषयामिषवतो लोकान् 'कामाश्च' विषयांश्च 'संसारवर्द्धनान्' संसारवृद्धिहेतून् ज्ञात्वेति सम्बन्धः, अथवा कामयन्त इति कामा इति व्युत्पत्त्या कामयोगाद्वाऽत्यन्तगृद्धिख्यापनार्थं कामा विषयिण एवोक्ता अतस्तान् गृद्धोपमान् संसारवर्द्धनांश्च ज्ञात्वा किमित्याह-'उरगोसुवन्नपासे व'त्ति इवशब्दस्य भिन्नक्रमत्वात् आर्षत्वाच्च 'उरग इव' भुजग इव 'सौपर्णेयपार्श्वे' गरुडसमीपे 'शङ्कमानः' भयत्रस्तस्तन्विति-स्तोकं मन्दं यतनयेतियावत् 'चरेः' क्रियासु प्रवर्त्तस्व, अस्यायमाशयः-यथा सौर्पणेयोपमैर्विषयैर्न बाध्यसे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा संयममासेवस्व, ततश्च किमित्याह-

मू. (४८९) *नागुव्व बंधनं छित्ता, अप्पणो वसहिं वए।*
इति एत्थं महारायं !, उसुआरित्ति मे सुयं ॥

वृ. 'नागोव्व' अर्द्धं स्पष्टम्, आशयश्चायं-यथा नागः बन्धनं वरत्रान्दुकादि 'छित्त्वा' द्विधा विधायात्मनो 'वसतिं' विन्ध्याटवीं व्रजति, एवं भवानपि कर्मबन्धनमुपहत्यात्मनो वसतिः-कर्मविगमतः शुद्धो यत्रात्माऽवतिष्ठते सा च मुक्तिरेव तां व्रजेः, अनेन दीक्षायाः प्रसङ्गतः फलमुक्तम्। एवं चोपदिश्य निगमयितुमाह-'एतद्' यन्मयोक्तं 'पथ्यं' हितं 'महाराज !' प्रशस्यभूपते ? 'इषुकार!' इषुकारनामन्!, एतच्च न मया स्वमनीषिकयैवोच्यते, किन्तु 'इति' इत्येतन्मया 'श्रुतम्' अवधारितं साधुसकाशादिति गम्यत इति सूत्राष्टकार्थः ॥ एवं च तद्वचनमाकर्ण्य प्रतिवुद्धो नृपः, ततश्च यत्तौ द्वावपि चक्रतुस्तदाह-

मू. (४९०) *चइत्ता विपुलं रज्जं, कामभोगे अ दुच्चए।*
निव्विसया निरामिसा, निन्नेहा निप्परिग्गहा ॥

मू. (४९१) *सम्मं धम्मं वियाणित्ता, चिच्चा कामगुणे चरे।*
तवं पगिज्झऽहक्खायं, घोरं घोरपरक्कमा ! ॥

वृ. 'त्यक्त्वा' प्रहाय 'विपुलं' विस्तीर्णं 'राष्ट्रं' मण्डलं, पाठान्तरतो राज्यं वा 'कामभोगांश्च' उक्तरूपान् 'दुस्त्यजान्' दुष्परिहारान् 'निर्विपयौ' शब्दादिविषयरहितौ अत एव निरामिषौ, यद्वा विषयो-देशस्तद्विरहितौ राष्ट्रपरित्यागतः काभोगात्यागतश्च निरामिषौ-अभिष्वङ्गहेतु-विरहितौ, कुतः पुनरेवंविधौ ?, यतो 'निःस्नेहौ' निष्प्रतिबन्धौ 'निष्परिग्रहौ' क्वचिदविद्यमान-स्वीकारौ 'सम्यग्' अविपरीतं 'धर्मं' श्रुतचारित्रात्मकं 'विज्ञायं' विशेषतोऽवबुद्धय 'चेच्च'त्ति त्यक्त्वा 'कामगुणान्' शब्दादीन् 'वरान्' प्रधानान् पूर्वविशेषणैर्गताथत्वेऽपि पुनरभिधान-मतिशयख्यापकं, 'तपः' अनशनादि 'प्रगृह्य' अभ्युपगम्य 'यथाख्यातं' येन प्रकारेण तीर्थकरा-दिभिः कथितं 'घोरम्' अत्यन्तदुरनुचरं घोरकर्मा-वैरिणः प्रति रौद्रः पराक्रमो धर्मानुष्ठान-विषयसामर्थ्यात्मको ययोस्तौ तथा देवीनृपौ तथैव च कृतवन्ताविति शेष इति सूत्रद्वयार्थः ॥

सम्प्रति समस्तोपसंहारामाह-

मू. (४९२) *एवं ते कमसो बुद्धा, सव्वे धम्मपरायणा।*
जम्ममच्चुभउव्विग्गा, दुक्खस्संतगवेसिणो।

वृ. 'एवम्' अमुना प्रकारेण 'तानि' अनन्तरमुक्तरूपाणि षडपि 'क्रमशः' अभिहितपरिपाट्य 'बुद्धानि' अवगततत्त्वानि 'सर्वाणि' अशेषाणि 'धर्मपरायणानि' धर्मैकनिष्ठानि, पठयते च-'धम्मपरंपर'त्ति परम्परया धर्मो येषां तानि परम्पराधर्माणि, प्राकृतत्वाच्च परम्पराशब्दस्य पर-निपातः, तथा हि-साधुदर्शनात्कुमारकयोः कुमारवचनात्तत्पित्रोस्तदवलोकनात्कमलावत्या-स्ततोऽपि च राज्ञ इति परम्परयैव धर्मप्राप्तिः, जन्ममृत्युभयेभ्यः-उक्तरूपेभ्य एवोद्विग्नानि-त्रस्तानि जन्ममृत्युभयोद्विग्नानि 'दुःखस्य' असातस्यान्तः-पर्यन्तस्तद्गवेषकाणि तदन्वेषकाणि सापेक्ष स्यापि समासो यथा देवदत्तस्य गुरुकुलमिति। पुनस्तद्वक्तव्यतामेवाह-

मू. (४९३) *सासणि विगयमोहाणं, पुव्विं भावणभाविया।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचिरेणेव कालेन, दुक्खस्संतमुवागया ॥

वृ. 'शासने' दर्शने विगतमोहानाम्-अर्हतां 'पूर्व' मित्यन्यजन्मनि भावनया-अभ्यासरूपया भावितानि-वासितानि भावनाभावितानि, यद्वा भाविता भावना यैस्तानि भावितभावनानि, पूर्वोत्तरनिपातस्यातन्त्रत्वाद्, अत एवाचिरेणैव-स्वल्पेनैव कालेन 'दुःखस्यान्तं' मोक्षम् 'उपागतानि' प्राप्तानि, सर्वत्र च प्राकृतत्वात्पुंल्लिङ्गनिर्देशः । मन्दमतिस्मरणायाध्ययनार्थमुपसंहर्तृमाह-

मू. (४१४) *राया सह देवीए, माहणो उ पुरोहिओ ।*
माहणी दारगा चेव, सव्वे ते परिनिव्वुडि ॥ त्तिबेमि

वृ. 'राजा' इषुकारः सह 'देव्या' कमलावत्या ब्राह्मणश्च पुरोहितो भृगुनामा ब्राह्मणी तत्पत्नी यसा दारकौ तत्पुत्रौ चैवेति पूर्ववत्सर्वाणि तानि 'परिनिर्वृतानि' कर्माग्न्युपशमतः शीतीभूतानि मुक्तिं गतानीतियावदिति सूत्रत्रयार्थः ॥

'इति' परिसमाप्तौ ब्रवमीति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत् ।

अध्ययनं - १४ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययसूत्रे चतुर्दशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता

अध्ययनं - १५ - सभिक्षुकः

वृ. व्याख्यातं चतुर्दशमध्ययनं, सम्प्रति पञ्चदशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने निर्निदानतागुण उक्तः, स च मुख्यतो भिक्षोरेव, भिक्षुश्च गुणत इति तद्गुणा अनेनोच्यन्त इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि पूर्ववद्व्यावर्ण्यानि तावद्यावन्नामनिष्पन्ननिक्षेपे सभिक्षुकमिति नाम, तत्र च सशब्दो भिक्षुशब्दश्च दशवैकालिक एव निक्षिप्तस्तथाऽपि स्थानाशून्यार्थं भिक्षुनिक्षेपमाह निर्युक्तिकृत्-

नि.[३७४] निक्खेवो भिक्खुंमी चउव्विहो० ॥

नि.[३७५] जाणयसरीरभविए तव्वइरित्ते अ निण्हगाईसु ।
जो भिंदेइ खुहं खलु सो भिक्खू भावओ होइ ॥

वृ. 'निक्षेपः' न्यासः भिक्षौ विचार्ये चतुर्विधो नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे, द्विविधो भवति द्रव्ये विचार्ये आगमतो नोआगमतः, तत्रागमतो भिक्षुपदार्थज्ञस्तत्र चानुपयुक्तो, नोआगमतश्च स त्रिविधः-'जाणगसरीरभविए'त्ति ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तश्च, तत्राद्यौ सुगमावेव, तद्यतिरिक्तस्तु द्रव्यभिक्षुर्निह्नवादिषु, आदि

शब्दात्सरजस्कादिषु चान्यतरो विवक्षित इति गम्यते, द्रव्यत्वं चास्य रागादिलक्षण-क्षुद्भेत्तृत्वाभावात्, भार्वभिक्षुमाह-यो 'भिनत्ति' विदारयति क्षुधं 'खलुः' अवधारणे भिन्नक्रमश्च, ततः स एव भिक्षुर्भावतो भवतीति गाथाद्वयारथः ॥ इह च भिनत्तीत्युक्तमतः कर्तुकरणकर्मभिः प्रयोजनं, सकर्मकत्वाद्भिदेः, अत आह-

नि.[३७६] भेत्ता य भेअणं वा नायव्वं भिंदियव्वयं ।
इक्किक्कंपि अ दुविहं दव्वे भावे अ नायव्वं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि.[३७७] रहकारपरसुमाई दारुगमाई अ दव्वओ हुंति।
साहू कम्मऽट्ठविहं तवो अ भावंमि नायव्वो ॥

नि.[३७८] रागद्दोसा दंडा जोगा तह गारवा य सल्ला य।
विगहाओ सन्नाओ सुहं कसाया पमाया य ॥

वृ. भेत्ता च कर्त्ता यो भिनत्ति, भेदनं करणं येन भिनत्ति 'वा' समुच्चये 'ज्ञातव्यं' बोद्धव्यं भेत्तव्यमेव भेत्तव्यकं कर्म यद्भिद्यते, 'चः' समुच्चये, 'एव' इति पूरणे, 'एकैकमपि चे'ति भेत्ता भेदनं भेत्तव्यकं च 'द्विविधं' द्विभेदं द्रव्ये भावे च विचार्यमाने 'ज्ञातव्यम्' अवगन्तव्यं।

तत्र द्रव्ये 'रहगारपरसुमाइ'त्ति आदिशब्दस्य प्रत्येकमभिसम्बन्धातद् रथकारः-तक्षकस्तदादिर्द्रव्यतो भेत्ता, आदिशब्दादयस्काशदिपग्रहः, परशुः-कुठारस्तदादिर्द्रव्यतो भेदनम्, आदिशब्दाद् घनादयो गृह्यन्ते, 'दारुगमाई य'त्ति दारुकं-काष्ठं तदादि च द्रव्यतो भेद्यम्, आदिशब्दाल्लोहादि परिग्रहः, भवन्तीति सर्वापेक्षं बहुवचनम्। 'साधुः' तपस्वी 'कर्म' ज्ञानावरणादि 'अष्टविधम्' अष्टप्रकारं 'तपश्च' अनशनादि भावे विचार्ये भेत्ता भेत्तव्यं भेदनं च क्रमेण ज्ञातव्यम्। इत्थं 'जो भिंदई खुहं खलु' इति ग्रहणकवाक्यं गतं, भिनत्तीति व्याख्याय क्षुधं व्याख्यातुमाह-

'रागद्वेषौ' उक्तरूपौ 'दण्डाः' मनोदण्डादयो 'योगाः' करणकारणानुमतिरूपाः, पठन्ति च-'रागद्दोसा छुहं दंडा' अत्र च 'छुहं'ति क्षुध्-बुभुक्षा उच्यते, तथा 'गौरवाणि च' ऋद्धिगौरवादीनि 'शल्यानि च' मायाशल्यादीनि 'विकथाः' स्त्रीकथादयः 'सञ्ज्ञाः' आहारसञ्ज्ञादयः, 'खुहं'ति एतद्भावभावित्वादष्टविधकर्मरूपायाः क्षुधः एतान्यपि क्षुदित्युच्यन्ते, प्राकृतत्वाच्च नपा निर्देशः, 'कषायाः' क्रोधादयः 'प्रमादाश्च' मद्यादयः क्षुदिति सम्बन्धनीयमिति गाथात्रयार्थः ॥ उपसंहर्तृमाह-

नि.[३७९] एयाइं तु खुहाइं जे खलु भिंदंति सुव्वया रिसओ।
ते भिन्नकम्मगंठी उविंति अयरामरं ठाणं ॥

वृ. 'एतानि' रागादीनि 'खुहाइं'ति क्षुच्छब्दवाच्यानि ये खलु 'भिंदिति' विदारयन्ति, खलुशब्द एवकारार्थो भिन्दन्त्येवेति शोभनानि अनतिचारतया व्रतानि-प्राणातिपातविरत्यादीनि येषां ते सुव्रताः 'ऋषय्ः' मुनयः, ते किमित्याह-भिन्नः कर्मैवातिदुर्भेदतया ग्रन्थिः कर्मग्रन्थिर्यैस्ते तथाविधाः 'उपयान्ति' प्राप्नुवन्ति 'अजरामरं स्थानं' मुक्तिपदमिति गाथार्थः ॥

उक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (४९५) मोनं चरिस्सामि समिच्च धम्मं, सहिए उज्जुकडे नियाणछिन्ने।
संथवं जहिज्ज अकामकामे, अन्नायएसी परिव्वए स भिक्खू ॥

वृ. मुनेः कर्म मौनं तच्च सम्यक्चारित्रं 'चरिस्सामो'त्ति सूत्रत्वात् चरिष्यामि-आसेविष्ये इत्यभिप्रायेणेत्युपस्कारः, 'समेत्य' प्राप्य 'धर्मं' श्रुतचारित्रभेदं दीक्षामित्युक्तं भवति, 'सहितः' सम्यग्दर्शनादिभिरन्यसाधुभिर्वेति गम्यते, स्वस्मै हितः स्वहितो वा सदनुष्ठानकरणतः, कश्चैवम् ?-ऋजुः-संयमस्तत्प्रधानं ऋजु वा-मायात्यागतः कृतम्-अनुष्ठानं यस्येति ऋजुकृतः, ईदृक्क इत्याह-निदानं-विषयाभिष्वङ्गात्मकं, यदिवा 'निदान बन्धने' ततश्च करणे ल्युट्, निदानं-प्राणातिपातादिकर्मबन्धकरणं छिन्नम्-अपनीतं येन स तथा, क्तान्तस्य परनिपातः प्राग्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्प्राकृतत्वात्, छिन्ननिदानो वा अप्रमत्तसंयत इत्यर्थः, 'संस्तवं' पूर्वसंस्तुतैर्मात्रादिभिः, पश्चात्संस्तुतैश्च श्वश्र्वादिभिः परिचयं 'जह्यात्' त्यजेत्, 'शकि च लिङ्' इत्यनेन शक्यार्थे लिङ्, ततः संस्तवं हातुं शक्तो य इति,

एवं लिङर्थभावना सर्वत्र कार्या, तथा कामान्-इच्छाकाममदनकामभेदान् कामयते-प्रार्थयते यः स कामकामो न तथा अकामकामः यद्वाऽकामो-मोक्षस्तत्र सकलाभिलाषनिवृत्तेस्तं कामयते यः स तथा, अत एव अज्ञातः-तपस्वितादिभिर्गुणैरनवगतः एषयते-ग्रासादिकं गवेषयतीत्येवंशीलोऽज्ञातैषी 'परिव्रजेद्' अनियतविहारितया विहरेत् 'स भिक्खुत्ति' यत्तदोर्नित्याभिसम्बन्धाद् य एवंविधः स भिक्षुः, अनेन सिंहतयैव विहरणं भिक्षुत्वनिबन्धनमुक्तमिति सुत्रार्थः ॥ तच्च सिंहतया विहरणं यथा स्यात्तथा विशेषत आह-

मू. (४१६) राओवरयं चरिज्ज लाढे, विरए वेदवियाऽऽयरक्खिए।
पन्ने अभिभूय सव्वदंसी, जे कम्हिवि न मुच्छिए स भिक्खू ॥

वृ. रागः-अभिष्वङ्ग उपरतो-निवृत्तो यस्मितद्रागोपरतं यथा भवत्येवं 'चरेद्' विहरेत्, क्तान्तस्य परनिपातः प्राग्वत्, अनेन मैथुननिवृत्तिरुक्ता, रागाविनाभावित्वान्मैथुनस्य, यद्वाऽऽवृत्तिन्यायेन 'रातोवरयं'ति रात्र्युपरतं 'चरेत्' भक्षयेदित्यनेनैव रात्रिभोजननिवृत्तिरप्युक्ता, 'लाढे'त्ति सदनुष्ठानतया प्रधानो विरतः-असंयमान्निवृत्तः, अनेन च संयमस्याक्षेपात्प्राणातिपातनिवृत्तिः सावद्यवचननिवत्तिरूपत्वाद्वाक्संयमस्य मृषावादनिवृत्तिश्चाभिहिता वेदितव्या, वेद्यतेऽनेन तत्त्वमिति वेदः-सिद्धान्तस्तस्य वेदनं वित्तया आत्मा रक्षितो-दुर्गतिपतनान्त्रातोऽनेनेति वेदविदात्मरक्षितः, यद्वा वेदं वेत्तीति वेदवित्, तथा रक्षिता आयाः-सम्यग्दर्शनादिलाभा येनेति रक्षितायः, रक्षितशब्दस्य परनिपातः प्राग्वत्, 'प्राज्ञः' हेयोपादेयबुद्धिमान् 'अभिभूय' पराजित्य परीषहोपसर्गानिति गम्यते, 'सर्वं' समस्तं गम्यमानत्वात्प्राणिगणं पश्यति-आत्मवत्प्रेक्षत इत्येवंशीलः, अथवाऽभिभूय रागद्वेषौ सर्वं वस्तु समतया पश्यतीत्येवंशीलः सर्वदर्शी, यदिवा सर्वं दशति-भक्षयतीत्येवंशीलः सर्वदंशी, उक्तं हि-

"पडिग्गहं संलिहित्ता णं, लेवमायाए संजए।
दुग्गंधं वा सुगंधं वा, सव्वं भुंजे न छड्डए ॥"

अत एव यः कस्मिंश्चित्सचित्तादिवस्तुनि न मूर्च्छितः-प्रतिबद्धः, एतेन परिग्रहे निवृत्तेरभिधानमप्रतिबद्धश्च कथमदत्तमाददीत? इत्यदत्तादाननिवृत्तेश्च, तथा च य एवं मूलगुणान्वितः स भिक्षुरित्युक्तं भवतीति सूत्रार्थः ॥ अन्यच्च-

मू. (४१७) अक्कोसवहं विदित्तु धीरे, मुनी चरे लाढे निच्चमायगुत्ते।
अव्वग्गमने असंपहिट्ठे, जो कसिणं अहिआसए स भिक्खू ॥

वृ. आक्रोशनमाक्रोशः-असभ्यालापो वधो-घातस्ताडनं वा, अनयोः समाहारद्वन्द्वे आक्रोशवधं तद्विदित्या स्वकृतकर्मफलमेतदिति मत्वा 'धीरः' अक्षोभ्यः सम्यक् सोढेतियावत् 'मुनिः' यतिः 'चरेत्' पर्यटेद् अनियतविहारतयेति गम्यते, ततश्चानेनाक्रोशवधचर्यापरीषहसहनमुक्तं, 'लाढे'त्ति प्राग्वत्, 'नित्यम्' इति सदा 'आत्मा' शरीरम्, आत्मशब्दस्य शरीरवचन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यापि दर्शनात्, उक्तं हि-

"धर्मधृत्यग्निधीन्द्वर्कत्वक्तत्त्वस्वार्थदेहिषु।
शीलानिलमनोयत्नैकवीर्येष्वात्मनः स्मृतिः ॥" इति,

तेन गुप्त आत्मगुप्तो-न यतस्ततः करणचरणादिविक्षेपकृत्, यद्वा गुप्तो-रक्षितोऽसंयमस्थानेभ्य् आत्मा येन स तथा, अव्यग्रम्-अनाकुलमसमञ्जसचिन्तोपरमतो मनः-चित्तमस्येत्यव्य ग्रमना न संप्रहृष्टः असंप्रहृष्टः- आक्रोशादिषु न प्रहर्षवान्, यथा कश्चिदाह-"कश्चित् पुमान् क्षिपति मां परिरूपवाक्यैः, श्रीमत्क्षमाभरणमेत्य मुदं व्रजामि" इत्यादि, प्रकृतोपसंहारमाह-यः 'कृत्स्नम्' उत्कृष्टादिभेदतः समस्तमाक्रोशवधम् 'अध्यास्ते' सहते समतयेति गम्यते, स भिक्षुरिति सूत्रार्थः ॥ किं च-

मू. (४९८) *पंतं सयनासनं भइत्ता, सीउण्हं विविहं च दंसमसगं।*
अव्वग्गमने असंपहिट्ठे, जो कसिणं अहिआसए स भिक्खू ॥

वृ. 'प्रान्तम्' अवमं शयनं च-संस्तारकादि आसनं च-पीठकादि शयनासनम् उपलक्षण-त्वाद्भोजनाच्छादनादि च 'मुक्त्वा' सेवित्वा शीतं चोषणं च शीतोषणम्-उक्तरूपं, चस्य गम्यमानत्वात्तच्च सेवित्वा 'विविधं च' नानाप्रकारं दंशाश्च मशकाश्च दंशमशकं प्राग् व्याख्यात-मेव प्राप्येति शेषो, मत्कुणाद्युपलक्षणं चैतत्, अव्यग्रमना असंप्रहृष्टो यः कृत्स्नमध्यास्ते स भिक्षुरिति प्राग्वत्। इह च प्रान्तं शयनासनं भुक्त्वेति अतिसात्त्विकतादर्शनार्थं, प्रान्तशयनादितायां हि सुदुःसहाः शीतादयः, अनेन शीतोष्णदंशमशकपरीषहसहनमुक्तमिति सूत्रार्थः ॥ अपरं -

मू. (४९९) *नो सक्कियमिच्छई न पूअं, नोवि य वंदणगं कुओ पसंसं ?।*
से संजए सुव्वए तवस्सी, सहिए आयगवेसए स भिक्खू ॥

वृ. 'नो' निषेधे 'सत्कृतं' सत्कारमभ्युत्थानानुगमादिरूपम् 'इच्छति' अभिलषति, प्राकृत-त्वाच्च सूत्रे दीर्घनिर्देशः, न 'पूजां' वस्त्रपात्रादिभिः सपर्यां, 'नो अपि च' इति नैव च 'वन्दनकं' द्वादशावर्त्तादिरूपं, कुतः 'प्रशंसां' निजगुणोत्कीर्त्तनरूपां ?, नैवेच्छतीत्यभिप्रायः, 'सः' एवं-विधः सम्यग् यतते सदनुष्ठानं प्रतीति संयतोऽत एव च सुव्रतः, सुव्रतत्वाच्च 'तपस्वी' प्रशस्या-तपाः, तथा च सहितः सम्यग्ज्ञानक्रियाभ्यां, यद्वा सह हितेन-आयतिपथ्येन अर्थादनुष्ठानेन वर्त्तत इति सहितः, तत एव चात्मानं-कर्मविगमाच्छुद्धस्वरूपं गवेषयति-कथमयमित्थंभूतो भवेदित्यन्वेषयते यः स आत्मगवेषकः, यद्वा आयः-सम्यग्दर्शनादिलाभः सूत्रत्वादायतो वा-मोक्षस्तं गवेषयतीत्वाय गवेषक आयतगवेषको वा यः स भिक्षुरिति सूत्रार्थः ॥

अनेन सत्कारपुरस्कारपरीषहसहनमुक्तं, सम्प्रति स्त्रीपरीषहसहनमाह-

मू. (५००) *जेन पुनो जहाइ जीवियं, मोहं वा कसिणं नियच्छई।*
नरनारिं पयहे सया तवस्सी, न य कोऊहलं उवेइ स भिक्खू ॥

वृ. येन हेतुना, पुनःशब्दोऽस्य सर्वथा संयमघातित्वविशेषद्योतकः, 'जहाति' त्यजति 'जीवितं' संयमजीवितं 'मोहं वा' मोहनीयं वा कषायनोकषायापायादिरूपं 'कृत्स्नं' समस्तं कृष्णं वा शुद्धाशयविनाशकतया 'नियच्छति' बन्धाति तदेवंविधं नरश्च नारी च नरनारी 'प्रजह्यात्' प्रकर्षेण त्यजेत् यः 'सदा' सर्वकालं तपस्वी, न च 'कुतूहलम्' अभुक्तभोगतायां स्त्र्यादिविषयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कौतुकम्, उपलक्षणत्वाद्भुक्तभोगताया स्मृतिं ,च 'उपैति' गच्छति स भिक्षुरिति सूत्रार्थः ॥ इत्थं परीषहसहनेन भिक्षुत्वसमर्थनात् सिंहविहारित्वमुक्त्वा तदेव पिण्डविशुद्धिद्वारेणाह-

मू. (५०१) छिन्नं सरं भोमं अंतलिक्खं, सुविनं लक्खणं दंड वत्थुविज्जं।
अंगविगारं सरस्सविजयं, जो विज्जाहिं न जीवई स भिक्खू ॥

वृ. छेदनं छिन्नं वसनदशनदार्वादीनां, तद्विषयशुभाशुभनिरूपिका विद्याऽपि छिन्नमित्युक्ता, एवं सर्वत्र। 'देवेसु उत्तमो लाभो' इत्यादि, तथा 'सरं'त्ति स्वरस्वरूपाभिधानं,

"सज्जं रवइ मयूरो, कुक्कुडो रिसभं सरं।
हंसो रवति गंधारं, मज्झिमं तु गवेलए ॥"

इत्यादि, तथा- "सज्जेण लहइ वित्तिं, कयं च न विनस्सई।
गावो पुत्ता य मित्ता य, नारीणं होइ वल्लहो ॥"

रिसहेण उ ईसारियं, सेणावच्चं धणाणि य" इत्यादि। तथा भूमिः-पृथ्वी भूमौ भवं भौमं-भूकम्पादिलक्षणं, यथा-

"शब्देन महता भूमिर्यदा रसति कम्पते।
सेनापतिरमात्यश्च, राजा राष्ट्रं च पीड्यते ॥"

इत्यादि। तथा अन्तरिक्षम्-आकाशं तत्र भवम् आन्तरिक्षं-गन्धर्वनगरादिलक्षणं, यथा-

"कपिलं शस्यघाताय, माञ्जिष्टे हरणं गवाम्।
अव्यक्तवर्णं कुरुते, बलक्षोभं न संशयः ॥१॥
गन्धर्वनगरं स्निग्धं, सप्राकारं सतोरणम्।
सौम्या दिशं समाश्रित्य, राज्ञस्तद्विजयङ्करम् ॥२॥"

इत्यादि। तथा 'स्वप्नं' स्वप्नगतं शुभाशुभकथनं, यथा-

"गायने रोदनं ब्रूयान्नर्त्तने वधबन्धनम्।
हसने शोचनं ब्रूयात्पठने कलहं तथा ॥"

इत्यादि। तथा 'लक्षणं' स्त्रीपुरुषयोर्यथा-

'चक्खुसिनेहे सुहितो दंतसिनेहे य भोयणं मिट्ठं।
तयनेहेण य सोक्खं नहनेहे होइ परमघनं ॥"

इत्यादि, गजादीनां च यथायथं वालुकाप्यादिविहितम्। तथा 'दंड'त्ति 'दण्डः' यष्टित्स-त्स्वरूपकथनम्, "एवपव्वं पसंसंति, दुपव्वा कलहकारिय"त्ति, इत्यादि। तथा 'वास्तुविद्या" प्रासादादिलक्षणाभिधायिशास्त्रात्मिका

"कुटिला भूमिजाश्चैव, वैनीका द्वन्द्वजास्तथा।
लतिनो नागराश्चैव, प्रासादाः क्षितिमण्डनाः ॥१॥
सूक्ताः पदविभागेन, कर्ममार्गेण सुन्दराः।
फलावाप्तिकरा लोके, भङ्गभेदयुता विभोः ॥२॥
अण्डकैस्तु विविक्तास्ते, निर्गमैश्चारुरूपकैः।
चित्रपत्रैर्विचित्रैश्च, विविधाऽऽकाररूपकैः ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि। तथा 'अङ्गविकार:' शिर:-स्फुरणादिस्तच्छुभाशुभसूचकं शास्त्रमप्यङ्गविकारो यथा 'दक्षिणाक्षिस्पन्दने प्रियं भविष्यती'त्यादि। तथा स्वर:-पोदकीशिवादिरुतरूपस्तस्य विषय:-तत्सम्बन्धी शुभाशुभनिरूपणाभ्यास:, यथा-

"गतिस्तारा स्वरो वाम:, पोदक्या: शुभद: स्मृत:।
विपरीत: प्रवेशे तु, स एवाभीष्टदायक:॥

तथा "दुर्गास्वरत्रयं स्याज्ज्ञातव्यं शाकुनेन नैपुण्यात्।
चिलिचिलिशब्द: सफल: सुसु मध्यश्चलचलो विफल:॥"

इत्यादि। ततो य एताभिर्विद्याभिर्न जीवति नैता एव जीविका: शुभाशुभ: प्रकल्प्य प्राणान् धारयति स भिक्षुरिति सूत्रार्थ:॥ अनेन निमित्तलक्षणोत्पादनादोषपरिहार उक्त:,

सम्प्रति मन्त्रादिरूपतदोषपरिहारायाह-

मू. (५०२) मंतं मूलं विविहं विज्जचिंतं, वमनविरेयनधूमनित्तसिणाणं।
आउरे सरणं तिगिच्छियं च, तं परिन्नाय परिव्वए स भिक्खू॥

वृ. 'मन्त्रम्' ॐकारादिस्वाहापर्यन्तो ह्रींकारादिवर्णविन्यासात्मकस्तं, 'मूलं' सहदेवी-मूलिकाकल्पादि तत्तच्छास्त्रविहितं मूलकर्म वा 'विविधं' नानाप्रकारं 'वैद्यचिन्त' वैद्यसम्बन्धिनीं नानाविधौषपथ्यादिव्यापारात्मिकां, विविधामित्यत्रापि डमरुकमणिन्यायेन योज्यते, वमनम्-उद्गिरणं विरेचनं-कोष्ठशुद्धिरूपं धूमं-मन:शिलादिसम्बन्धि नेत्तंति-नेत्रशब्देन नेत्रसंस्कारमिह समीराञ्जनादि परिगृह्यते, स्नानम्-अपत्यार्थं मन्त्रौषधिसंस्कृतजलाभिषेनं, वमनादीनां च स्नानावसानानामिह कृतसमाहाराणां निर्देश:, 'आउरे सरणं'ति, सुब्व्यत्ययाद् 'आतुरस्य' रोगादिपीडितस्य 'शरणं' स्मरणं हा तात! हा मात:! इत्यादिरूपं 'चिकित्सितं च' आत्मनो रोगप्रतीकाररूपं 'तद्' इति यदनन्तरमुक्तं 'परिन्नाय'त्ति ज्ञपरिज्ञय परिज्ञाय प्रत्याख्यानपरिज्ञया च प्रत्याख्याय 'परिव्रजेत्' सर्वप्रकारं संयमाध्वनि यायाद्य: स भिक्षुरिति सूत्रार्थ:॥ अपरं च-

मू. (५०३) खत्तियगणउग्गरायपुत्ता, माहणभोई य विविहा य सिप्पिणो।
नो तेसिं वयइ सिलोगपूअं, तं परिन्नाय परिव्वए स भिक्खू॥

वृ. क्षत्रिया:-हैहेयाद्यन्वयजा गणा:-मल्लादिसमूहा:उग्रा:-आरक्षकादय: राजपुत्रा:-नृपसुता:, एषां द्वन्द्व:, 'माहनभोगिका:' तत्र माहना ब्राह्मणस्तथा भोगेन-विशिष्टनेपथ्यादिना चरन्ति भोगिका:-नृपतिमान्या: प्रधानपुरुषा:, 'विविधाश्च' नानाप्रकारा: 'शिल्पिन:' स्थपतिप्रभृतय:, पठन्ति च-'सिप्पिनोऽन्ने' तत्र चान्ये इति शिल्पिविशेषणमुभयत्र च य इति शेष:, 'नो' नैव 'तेषां' क्षत्रियादीनां 'वदति' प्रतिपादयति, के?-'श्लोकपूजे' श्लोकं-श्लाघां यथैते शोभना इति, पूजां च-यथैतान् पूजयतेति, उभयत्र पापानुमत्यादिमहादोषसम्भवात्, किंतु 'तदि'ति श्लोकपूजादिकं द्विविधयाऽपि परिज्ञया परिज्ञाय परिव्रजेद्य: स भिक्षुरिति सूत्रार्थ:॥ अनेन वनीपकत्वस्य परिहार उक्त:, साम्प्रतं संस्तवपरिहारमाह-

मू. (५०४) गिहिणो जे पव्वइएण दिट्ठा, अप्पव्वईएण व संथुया हविज्जा।
तेसिं इहलोयफलट्ठयाए, जो संथवं न करेइ स भिक्खू॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'गृहिण:' गृहस्था ये 'प्रव्रजितेन' गृहीतदीक्षेण दृष्टा उपलक्षणत्वात्परिचिताश्च 'अप्रव्रजितेन वा' गृहस्थावस्थेन सह 'संस्तुता:' परिचिता भवेयुर्गृहिणो य इति सम्बन्ध: 'तेसिं'ति 'तै:' उभयावस्थयो: परिचितैर्गृहिभि: 'इहलौकिकफलार्थं वस्त्रपात्रादिलाभनिमित्तं य: 'संस्तवं' परिचयं न करोति स भिक्षुरिति सूत्रार्थ: ॥ तथा-

मू. (५०५) *सयनासनपानभोयणं, विविहं खाइमसाइमं परेसिं।*
अदए पडिसेहिए नियंठे, जे तत्थ न पओसई स भिक्खू ॥

वृ. 'शयनासनपानभोजन'मिति शयनादीनि प्रतीतानि 'विविधम्' अनेकप्रकारं 'खादिम-स्वादिम'मिति खादिमंपिण्डखर्जूरादि स्वादिमम्-एलालवङ्गादि, उभयत्र समाहार: 'परेसिं'ति 'परेभ्य:' गृहस्थादिभ्य: 'अदइ'त्ति अददद्भ्य: 'प्रतिषिद्ध:' क्वचित् कारणान्तरे याचमानो निराकृत: स: 'निर्ग्रन्थ:' मुक्तद्रव्यभावदग्रन्थो व: 'तत्र' इत्यदाने 'न प्रदुष्यति' न प्रद्वेषं याति पुनर्दास्यतीत्यभिधायकक्षपकर्षिवत्स भिक्षुरिति सूत्रार्थ: ॥ अनेन क्रोधपिण्डपरिहार उक्त:, उपलक्षणं चैतदशेषभिक्षादोषपरिहारस्य, इदानीं ग्रासैषणादोषपरिहारमाह-

मू. (५०६) *जं किंचाहारापानगं विविहं, खाइमसाइमं परेसिं लद्धुं।*
जो तं तिविहेण नानुकंपे, मनवयकायसुसंवुडे जे स भिक्खू ॥

वृ. 'यत् किञ्चित्' अल्पमपि 'आहारपानम्' अशनपानीयं विविधं 'खाइमसाइमं'ति चस्य गम्यमानत्वात् स्वादिमस्वादिमं च उक्तरूपं 'परेसिं'ति 'परेभ्य:' गृहस्थेभ्य: 'लद्धुं'ति 'लब्ध्वा' प्राप्य य: 'तं'ति सुब्व्यत्ययात्तेनाहारादिना 'त्रिविधेन' मनोवाक्कायलक्षणेन प्रकारत्रयेण नानु-कम्पते, कोऽर्थ: ।-ग्लानबालादीन्नोपकुरुते न स भिक्षुरिति वाक्यशेष:, यस्तु मनोवाक्कायै: सुष्ठु संवृतो निरुद्धतथाविधाहारद्यभिलाष: सुसंवृता वा मनोवाक्काया यस्येति सुसंवृतमनो-वाक्काय:, तत एव ग्लानादीननुकम्पत इति गम्यते, स भिक्षु:, यदिवा 'नानुकम्पते' इत्यत्र 'ना' पुरुषोऽनुकम्पते (नानुरूपो न कम्पते) मनोवाक्कायसुसंवृत: सन् स भिक्षुरिति सूत्रार्थ: ॥

अनेनार्थतो गृद्धयभावाभिधानादङ्गारदोषपरीहार उक्त:, सम्प्रति धुमपरिहारमाह-

मू. (५०७) *आयामगं चेव जवोदनं च, सीयं सोवीरजवोदगं च।*
नो हीलए पिंडं नीरसं तु, पंतकुलाणि परिव्वए स भिक्खू ॥

वृ.आयाममेव आयामकम्-अवश्रावणं चशब्द उत्तरापेक्षया समुच्चये स्वगतानेकभेद-ख्यापको वा, 'एव' इति प्राग्वत्, 'यवोदनं च' यवभक्तं 'सीयं'ति शीतं-शीतलमन्तप्रान्तोप-लक्षणं चैतत्, सोवीरं-आचाम्लं यवोदकं च-यवप्रक्षालनं पानीयं सोवीरयवोदकं, तच्च 'नो हीलयेत्' धिगिदं किमनेनामनोज्ञेनेति न निन्देत्, पिण्ड्यते-सङ्घात्यते, कोऽर्थ: ? गृहिभ्य: उपलभ्य संमील्यत इति पिण्डस्तमायामकाद्येन 'नीरसं' विगतास्वादं' 'तु:' अप्यर्थस्ततो नीरसमपि, अत एव 'प्रान्तकुलनि' तृच्छाशयगृहाणि दरिद्रकुलानि वा य: परिव्रजेत्स भिक्षुरिति सूत्रार्थ: ॥ अन्यच्च-

मू. (५०८) *सद्दा विविहा भवंति लोए, दिव्वा मानुसया तहा तिरिच्छा।*
भीमा भयभेरवा उराला, जो सुच्चा न बिहिज्जई स भिक्खू ॥

वृ.'शब्दा:' ध्वनय: 'विविधा:' विमर्शप्रद्वेषादिना विधीयमानतया नानाप्रकारा: 'भवन्ति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायनत् 'लोके' जगति 'दिव्याः' देवसम्बन्धिनः 'मानुष्यकाः' मनुष्यसम्बन्धिनस्तथा 'तैरश्चाः' तिर्यक्सम्बन्धिनः 'भीमाः' रौद्राः भयेन भैरवाः-अत्यन्तसाध्वसोत्पादका भयभैरवाः 'उदाराः' महान्तो यः 'श्रुत्वा' आकर्ण्य प्रक्रमादुक्तविशेषणविशिष्टानेव शब्दान् 'न व्यथते' न बिभेति धर्मध्यानतो न चलति वा स भिक्षुरिति सूत्रार्थः ॥ अनेनोपसर्गसहिष्णुत्वं सिंहविहारितायां निमित्तमुक्तं, सम्प्रति समस्तधर्माचारमूलं सम्यक्त्वस्थैर्यमाह-

मू. (५०९) *वायं विविहं समिच्च लोए, सहिए खेयानुगए अ कोवियप्पा ।*
पन्ने अभिभूय सव्वदंसी, उवसंते अविहेडए स भिक्खू ॥

वृ. 'वादं' च स्वस्वदर्शनाभिप्रायवचनविज्ञानात्मकं 'विविधम्' अनेकप्रकारं, धर्मविषयेऽपि ह्यनेकधा विवदन्ते, यथोक्तं-

"सेतुकरणेऽपि धर्मो भवत्यसेतुकरणेऽपि किल धर्मः ।
गृहवासेऽपि च धर्मो वनेऽपि वसतां भवति धर्मः ॥"

मुण्डस्य भवति धर्मस्तथा जटाभिः सवाससां धर्मः" इत्यादिरूपं 'समेत्य' ज्ञात्वा लोके सहितः स्वहितो वा पाग्वत् खेदयत्यनेन कर्मेति खेदः-संयमस्तेनानुगतो-युक्तः खेदानुगतः 'चः' पूरणे कोविदः-लब्धशास्त्रपरमार्थ आत्माऽस्येति कोविदात्मा, 'पन्ने अभिभूय सव्वदंसी उवसंते'त्ति प्राग्वत्, 'अविहेठकः' न कस्यचिद्विबाधको यः स भिक्षुरिति सूत्रार्थः ॥ तथा-

मू. (५१०) *असिप्पजीवि अगिहे अमित्ते, जिइंदिओ सव्वओ विप्पमुक्के ।*
अनुक्कसाई लहु अप्पभक्खी, चिच्चा गिहं एगचरे स भिक्खू ॥

वृ. शिल्पेन-चित्रपत्रच्छेदादिविज्ञानेन जीवितुं शीलमस्येति शिल्पजीवी न तथाऽशिल्पजीवी 'अगृहः' गृहविरहितः तथा अविद्यमानानि मित्राणी-अभिष्वङ्गहेतवो वयस्या यस्यासावमित्रः, जितानि-वशीकृतानि 'इन्द्रियाणि' श्रोत्रादीनि येन स तथा, 'सर्वतः' बाह्यादभ्यन्तराच्च ग्रन्थादिति गम्यते, विविधैः प्रकारैः प्रकर्षेण मुक्तो विप्रमुक्तः, तथा अनवः-स्वल्पाः सञ्ज्वलननामान इतियावत् कषायाः-क्रोधादयो यस्येति सर्वधनादित्यादिनि प्रत्ययेऽणुकषायी, प्राकृतत्वात्सूत्रे ककारस्य द्वित्वं, यद्वा उत्कषायी-प्रबलकषायी न तथाऽनुत्कषायी अल्पानि-स्तोकानि लघूनि-निः निष्पावादीनि भक्षयितुं शीलमस्येति अल्पलघुभक्षी, सूत्रे तिङ्व्यत्ययः प्राग्वत्, 'त्यक्त्वा' अपहा भेदभिन्नम्, एको-रागद्वेषरहितः तथाविधयोग्यतावाप्तावसहायो वा चरति-विहरत्येकचरो अनेनैकाकिविहार उपलक्षित इति सूत्रार्थः ॥

'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववदेव,

अध्ययनं - १५ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे पञ्चदशमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं - १६ - ब्रह्मचर्यसमाधिः

वृ. उक्त पञ्चदशमध्ययनम्, अधुना षोडशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने भिक्षुगुणा उक्ताः, ते च तत्त्वतो ब्रह्मचर्यव्यवस्थितस्य भवन्ति, तदपि च ब्रह्मगुप्तिपरिज्ञानत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वा इहाभिधीयन्ते इत्यनेन सम्बन्धनायातस्यास्याध्ययनस्य चतुरनुयोगद्वारचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे दशब्रह्मचर्यसमाधिस्थानमिति नाम, ततो दशादिपदानां पञ्चानां निक्षेप: कर्त्तव्य:, तत्र च नैककाद्यभावे दशसम्भव इत्येककनिक्षेपमाह निर्युक्तिकृत्-

नि.[३७९]　　नामंठवणादविएमाउयपयसंगहेक्कए चेव।
पज्जव भावे अ तहा सत्तेए इक्कगा हुंति ॥

वृ. एतदर्शस्तु चतुरङ्गीयाध्ययन एव कथित इति न प्रतन्यते ॥ एतदनुसारतश्च द्वयादिनिक्षेप: सुकर एवेति तमुपेक्ष्यैव दशनिक्षेपमाह-

नि.[३८०]　　दससु अ छक्को दव्वे नायव्वो दसपएसिओ खंधो।
ओगाहणाठिईए नायव्वो पज्जवदुगे अ।

वृ. दशसु च निक्षेसव्येपु पट्को निक्षेप इति गम्यते, स च नामस्थापनाद्रव्यक्षेत्रकालभाव-भेदात्, तत्र नामस्थापने क्षुन्ने, 'दव्वे'त्ति द्रव्यविषयेषु दशसु विचार्यमानेषु 'ज्ञातव्य:' अवगन्तव्य: दश प्रदेशा: परिमानमस्येति दशप्रदेशिक: स्कन्धो दशोच्यते, दशपरमानुद्रव्य-निष्पन्नत्वात्, तथा 'ओगाहणाट्ठिईए'त्ति स्कन्ध एवावगाहनायां चिन्त्यमान: प्रक्रमाद्दश-प्रदेशावगाढ: क्षेत्रदशोच्यते, 'स्थितौ च दशसमयस्थितिक: स एव कालदशोच्यते, उपलक्षणं चैतत्सर्वं, यत आह चूर्णिकृत्-"द्रव्यदश दश सचित्तादीनि द्रव्याणि, क्षेत्रदश दशाकाशप्रदेशा:, कालदश दश समया इति ज्ञातव्या:" 'पज्जव'त्ति पर्याया दशसङ्ख्यत्वेन विवक्षिता भावदश (क्षये) (क्वये) पर्याया इत्याह-'द्विके च' जीवाजीवरूपे 'च:' पूरणे, तत्र जीवपर्याया विवक्षया कषायादय:, अजीवपर्यायाश्च पुद्गलसम्बन्धिनो वर्णादय इति। इदानीं ब्रह्मनिक्षेपमाह-

नि.[३८१]　　बंभंमि उ चउक्कं ठवणाबंभंमि बंभणुप्पत्ती।
दव्वंमि वत्थिनिग्गहु अन्नाणीणं मुणेयव्वो ॥

नि.[३८२]　　भावे उ वत्थिनिग्गहु नायव्वो तस्स रक्खणट्ठाए।
ठाणाणि तानि वज्जिज्ज जाणि भणियाणि अज्झयणे ॥

वृ. 'बंभंमि उ'त्ति ब्रह्मणि पुनर्विचार्ये 'चउक्कं'ति चतुष्को नामस्थापनाद्रव्यभावभेदान्निक्षेप इति गम्यते, तत्र नामब्रह्म यस्य ब्रह्मेति नाम, स्थापनाब्रह्मणि ब्राह्मणोत्पत्तिर्वक्तव्या, यथाऽऽ-चारनाम्नि प्रथमाङ्गे-

"एका मणूसजाई रज्जुप्पत्तीय दो कया उसभे।
तिन्नि य सिप्पवणिए सावगधम्मंमि चत्तारि॥"

इत्यादिना निर्युक्तिकृताऽभिहिता, 'द्रव्ये बस्तिनिग्रह:' उपस्थनिरोधमात्रम् 'अज्ञानिनां' मिथ्यादृशां दशब्रह्मचर्यसमाधिस्थानावगमशून्यानां 'मुणितव्य:' प्रतिज्ञातव्यो ब्रह्मेति प्रक्रम:, 'भावे उ'त्ति भावे पुनर्विचार्ये बस्तिनिग्रहो 'ज्ञातव्य:' अवगन्तव्य:, कस्य सम्बन्धीत्याह-'तस्य' इति ब्रह्मणो 'रक्षणार्थाय' रक्षणप्रयोजनाय 'स्थानानि' विविक्तशयनासनसेवनादीनि तानि 'वर्जयेत्' परिहरेद्यस्तस्येति प्रक्रम:, स च ज्ञान्येव, तानि कानीत्याह-यानि 'भणितानि' उक्तानि 'अध्ययने' इहैव प्रक्रान्त इति गाथाद्वयार्थ: ॥ चरणनिक्षेपमाह-

नि.[३८३]　　चरणे छक्को दव्वे गईचरणं चेव भक्खणेचरणं।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

खित्ते काले जंमि उ भावे उ गुणाण आयरणं ॥

वृ. चरणविषयः 'षट्कः' षट्परिणाम उक्तरूपो निक्षेपः, तत्र नामस्थापने गतार्थे, द्रव्ये गतिरूपं चरणं गतिचरणं ग्रामादिगमनात्मकमित्यर्थः, 'चः' समुच्चये भिन्नक्रमश्च 'एवे'त्ति पूरणे, 'भक्खणेचरणं'ति एकारोऽलाक्षणिकस्ततो भक्षणचरणं, चरणशब्दस्योभयार्थत्वात्, पठ्यते हि 'चर गतिभक्षणयोः' इति, चथा 'खेत्ते काले जंमि'त्ति यस्मिन् क्षेत्रे काले वा चरणं चर्यते व्यावर्ण्यते वा तत्क्षेत्रचरणं कालचरणं चेति प्रक्रमः, भावे तु 'गुणानां' मूलोत्तरगुणरूपाणाम् 'आचरणम्' आसेवनमिति गाथार्थः ॥ समाधिनिक्षेपमाह-

नि.[३८४] समाहीइ चउक्कं दव्वं दव्वेण जेन उ समाही ।
भावंमि नाणदंसणतवे चरित्ते अ नायव्वं ॥

वृ. समाधौ 'चउक्कं'ति पाग्वच्चतुष्को नामादिनिक्षेपः, तत्र नामस्थापने प्रसिद्धे, 'द्रव्य'मिति द्रव्यमसाधिः 'द्रव्येण' माधुर्यादिगुणान्वितेन 'येन' हेतुना 'तुः' पूरणे 'समाधिः' स्वास्थ्यमुपजायते तदेव समाधिहेतुत्वात्समाधिरिति । 'भावंमि नानदंसणतवे चरित्ते अ'त्ति सूत्रत्वाद्भावे ज्ञानदर्शनतपांसि चरित्रं च स्वस्वरूपाविरोधेनावस्थानात्समाधिर्ज्ञातव्यः, यद्वा ज्ञानं च दर्शनं तपश्चेति समाहारः ततो ज्ञानदर्शनतपसि चरित्रे च, प्रक्रमाद्यः समाधिः-अमीषामेव परस्परमविरोधेनावस्थानं स भावसमाधिरिति ज्ञातव्यमिति गाथार्थः ॥ स्थाननिक्षेपमाह-

नि.[३८५] नामंठवणादविए खित्तद्धा उड्ढउवरई वसही ।
संजमपग्गह जोहे अचलगणणसंधणा भावे ॥

वृ. सर्वत्र स्थानमिति योजनीयं, नामस्थानमित्यादि, तत्र नामस्थानं प्रतीतं, स्थापनास्थानं तु यो यद्गुणोपेतो यस्मिन्नाचार्यादिपदे स्थाप्यते स एव तिष्ठत्वस्मिन् स्थान इति स्थापनास्थानमुच्यते, 'द्रव्यस्थानम्' आकाशम्, अत्र हि जीवादिद्रव्याणि तिष्ठन्तीति, क्षेत्रस्थानमप्याकाशमेव, यतः क्षेत्रमाकाशं तच्चाकाश एव तिष्ठति, उक्तं हि-'आकाशं तु स्वप्रतिष्ठित'मिति, अद्धास्थानमर्द्धतृतीययद्वीपसमुद्ररूपं समयक्षेत्रं, तत्रैव समयावलिकाद्युपलक्षितस्याद्धाकालस्य स्थितेः, 'ऊर्द्धस्थानं' यत्रोद्धर्वं स्थीयते, तच्च कायोत्सर्गः, 'उपरतिस्थानं' यत्र सर्वसावद्यविरतिवाप्यते, 'वसतिस्थानं' यत्र स्त्रीपण्डकादिदोपविकले यतिनिवासः, संयमस्थानं-शुभशुभतराध्यवसायविशेषा येषु संयमस्यावस्थितिः, प्रग्रहस्थानं यद्यस्यायुधस्य ग्रहणस्थानं, योधस्थानम्-आलीढप्रत्यालीढादि, अचलस्थानं यस्मिन्न मनागपि चलनसम्भवः, तच्च मुख्यतो मुक्तिरेव, गणनास्थानं यत्रैककादौ शीर्षप्रहेलिकावसाने गणनाऽवतिष्ठते, 'संघण'त्ति सन्धानस्थानं यत्र देशे त्रुटितमुक्तावल्यादेरेकत्वं विधीयते, 'भावस्थानम्' औदयिकादिभावानां यथास्वमवस्थानविषय इति गाथार्थः ॥ गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (५११) सुअं मे आउसं ! तेणं भगवया एवमक्खायं-इह खलु थेरेहिं भगवंतेहिं दसबंभचेरसमाहिठाणा पन्नत्ता, जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा ॥

वृ. श्रुतं मयाऽऽयुष्मंस्तेन भगवतैवम् 'आख्यातं' कथितं, कथमित्याह-सोपस्कार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वात्सूत्रस्य यथेति गम्यते, ततो यथेह क्षेत्रे प्रवचने वा 'खलु' निश्चयेन स्थविरैः-गणधरैः 'भगवद्भिः' परमैश्वर्यादियुक्तैर्दशब्रह्मचर्यसमाधिस्थानानि 'प्रज्ञप्तानि' प्ररूपितानि, कोऽभिप्रायः ?-नैषामियं स्वमनीषिका, किन्तु भगवताऽप्येवमाख्यातं मया श्रुतं ततोऽत्र मा अनास्थां कृथाः, तान्येव विशिनष्टि-'ये' इति यानि ब्रह्मचर्यसमाधिस्थानानि भिक्षुः 'श्रुत्वा' आकर्ण्य शब्दतः 'निशम्य' अवधार्यार्थतः 'संजमबहुले'त्ति संयमम्-आश्रवविरमणादिकं बहु इति-बहुसङ्ख्यं यथाभवत्येवंलाति-गृह्णाति,

कोऽभिप्रायः ?-विशुद्धविशुद्धतरं पुनः पुनः संयमं करोतीति संयमबहुलः, मयूरव्यंसकादित्वात्समासः, यदिवा बहुलः-प्रभूतः संयमोऽस्येति बहुलसंयमः, सूत्रे पूर्वापरनिपातस्यातन्त्रत्वात्, अत एव संवरः-आश्रवद्वारनिरोधः तद्बहुलो बहुलसंवरो वा, तत एव समाधिः-चित्तस्वास्थ्यं तद्बहुलो बहुलसमाधिर्वा, 'गुप्तः' मनोवाक्कायगुप्तिभिः, गुप्तत्वादेव च गुप्तानि विषयप्रवृत्तितो रक्षितानि इन्द्रियाणि-श्रोत्रादीनी येन स तथा, तत एव गुप्तं नवगुप्तिसेवनात् 'ब्रह्मे'ति ब्रह्मचर्यं चरितुम्-आसेवितुं शीलमस्येति गुप्तब्रह्मचारी 'सदा' सर्वकालम् 'अप्रमत्तः' प्रमादविरहितः 'विहरेत्' अप्रतिबद्धविहारितया चरेत् ॥ एतेन संयमबहुलत्वादि दशब्रह्मचर्यसमाधिस्थानफलमुक्तम्, एतदविनाभावित्यात्तस्येति सूत्रार्थः ॥

मू. (५१२) कयरे खलु थेरेहिं भगवंतेहिं दसबंभचेरसमाहिठाणा पन्नत्ता ?, इमे खलु ते जाव विहरिज्जा, तंजहा-विवित्ताइं सयणासणाइं सेविज्जा से निग्गंथे, तो इत्थीपसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-

निग्गंथस्स खलु इत्थिपसुपंडगसंसत्ताइं, सयणासणाइं सेवमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउनिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ वा भंसिज्जा, तम्हा नो इत्थिपसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥

वृ. कतराणीत्यादिप्रश्नसूत्रम् इमानीत्यादि निर्वचनसूत्रं च प्राग्वत्, तान्येवाह-'तं जहे'त्यादि, 'तद्यथे' त्युपन्यासे 'विविक्तानि' स्त्रीपशुपण्डकाकीर्णत्वविरहितानि, शय्यते येषु तानि शयनानि च-फलकसंस्तारकादीनि, आस्यते येषु तानि आसनानि च-पादपीठापुञ्छनादीनि शयनासनानि, उपलक्षणत्वात्स्थानानि च 'सेवेत' भजेत यः सः 'निर्ग्रन्थः' द्रव्यभावग्रन्थान्निष्क्रान्तो भवतीति शेषः । इत्थमन्वयेनाभिधायाव्युत्पन्नविनेयानुग्रहायामुमेवार्थं व्यतिरेकेणाह-

· 'नो' नैव स्त्रियश्चदिव्या मानुष्यो वा पशवश्च-अजैडकादयः पण्डकाश्च-नपुंसकानि स्त्रीपशुपण्डकास्तैः संसक्तानि-आकीर्णानि स्त्रीपशुपण्डकसंसक्तानि 'शयनासनानि' उक्तरूपाणि 'सेविता' उपभोक्ता भवति, 'तदि'त्यनन्तरोक्तं 'कथं' केनोपपत्तिप्रकारेण ?, 'इति चेद्' एवं यदि मन्यसे, अत्रोच्यते-निर्ग्रन्थस्य खलं निश्चितं स्त्रीपशुपण्डकसंसक्तानि शयनासनानि 'सेवमानस्य' अपभुञ्जानस्य 'बंभयारिस्स'त्ति अपिशब्दस्य गम्यमानत्वाद् ब्रह्मचारिणोऽपि सतो ब्रह्मचर्ये 'शङ्का वा' किमेताः सेवे उत नेत्येवंरूपा, यदिवा इहान्येषामिति गम्यते, ततः शङ्का वाऽन्येषांयथा किमसावेवंविधशयनासनसेवी ब्रह्मचार्युत नेति, 'काङ्क्षा' वा स्त्र्याद्यभिलाषरूपा 'विचिकित्सा' वा धर्मं प्रति चित्तविप्लुतिः 'समुत्पद्यते' जायते, अथवा शङ्का

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्र्यादिभिरत्यन्तापहृतचित्ततया विस्मृतसकलसोपदेशस्य-

"सत्यं वच्मि हितं वच्मि, सारं वच्मि पुनः पुनः।
अस्मिन्नसारे संसारे, सारं सारङ्गलोचनाः ॥"

इत्यादिकुविकल्पान् विकल्पयतो मिथ्यात्वोदयतः कदाचिदेतत्परिहार एव न तीर्थकृद्भिरुक्तो भविष्यति, एतदासेवने वा यो दोष उक्तः स दोष एव न भवीत्येवंरूपः संशय उत्पद्यते, काङ्क्षा वा तत एव हेतोः

"प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः ?।
प्राप्यते येन निर्वाणं, सरागेणापि चेतसा ॥"

इत्याद्यभिधायकान्यान्यनीलपटादिदर्शनाग्रहरूपा, विचिकित्सा वा-धर्मं प्रतिकिमेतावतः कष्टानुष्ठानस्य फलं भविष्यति न वा ? तद्वरमेतदासेवनमेवास्त्वित्येवंरूपा, 'भेदं' वा विनाशं चारित्रस्येति गम्यते, 'लभेत, प्राप्नुयात्, 'उन्मादं वा' कामग्रहात्मकं प्राप्नुयात् स्त्रीविषयाभिलाषातिरेकतस्थाविधचित्तविप्लवसंभवात् 'दीर्घकालिकं वा' प्रभूतकालभावि रोगश्च-दाहज्वरादिरातङ्कश्च-आशुघाती शूलादि रोगातङ्कं 'भवेत्' स्यात्, संभवति हि स्त्र्याद्यभिलाषातिरेकतोऽरोचकत्वं ततश्च ज्वरादीनि, केवलिप्रज्ञप्तात्, 'धर्मात्' श्रुतचारित्ररूपात् समस्ताद् 'भ्रश्येत्' अधः प्रतिपतेत्, कस्यचिदतिक्लिष्टकर्मोदयात्सर्वथा धर्मपरित्यागसम्भवात्, यत एवं तस्मादित्यादिनिगनवाक्यं प्रकटार्थमेवेति सूत्रार्थः ॥ उक्तं प्रथमं समाधिस्थानं द्वितीयमाह-

मू. (५१३) *नो इत्थीणं कहं कहित्ता हवइ से निग्गंथे, तं कहमिती चेदायरियाऽऽह-निग्गंथस्स खलु इत्थीणं कहं कहेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा नो इत्थीणं कहं कहिज्जा ॥*

वृ. नो स्त्रीणामेकाकिनीनामिति गम्यते, 'कथा' वाक्यप्रबन्धरूपा, यदिवा स्त्रीणां कथा,-'कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया' इत्यादिका, अथवा जातिकुलरूपनेपथ्यभेदाच्चतुर्धा स्त्रीकथा, तत्र जातिर्ब्राह्मण्यादिः कुलम्-उग्रादि रूपं-महाराष्ट्रिकादि संस्थानं-तत्तद्देशप्रसिद्धं, तां कथयिता भवति 'से निग्गंथे'त्ति य एवंविधः स निर्ग्रन्थः।

शेषं प्रश्नप्रतिवचनाभिधायि पूर्ववदिति सूत्रार्थः ॥ तृतीयमाह-

मू. (५१४) *नो इत्थीहिं सद्धिं संनिसिज्जागए विहरित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-निग्गंस्स खलु इत्थीणं सद्धिं संनिसिज्जागयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा नो निग्गंथे इत्थीहिं सद्धिं संनिसिज्जागए विहरइ ॥*

वृ. नो स्त्रीभिः 'सार्द्धं' सह सम्यग् निषीदन्ति-उपविशन्त्यस्यामिति संनिषद्या-पीठाद्यासनं तस्यां गतः-स्थितः संनिषद्यागतः सन् 'विहर्त्ता' अवस्थाता भवति, कोऽर्थः ?-स्त्रीभिः सहैकासने नोपविशेत्, उत्थितास्वपि हि तासु मुहूर्त्तं तत्र नोपवेष्टव्यमिति सम्प्रादयः, य एवंविधः स निर्ग्रन्थः, न त्वन्य इत्यभिप्रायः, शेषं प्रश्नप्रतिवचनाभिधायि पूर्ववदिति सूत्रार्थः ॥ चतुर्थमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू.(५१५) नो इत्थीणं इंदियाइं मनोहराइं मनोरमाइं आलोइत्ता निज्झाइत्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाऽऽह-निग्गंस्स खलु इत्थीणं इंदियाइं मनोहराइं मनोरमाइं जाव निज्झाएमाणस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं इंदियाइं निज्झाइ ॥

वृ. नो स्त्रीणां 'इन्द्रियाणि' नयननासिकादीनि मन:-चित्तं हरन्ति दृष्टमात्राण्यप्याक्षिपन्तीति मनोहराणि, तथा मनो रमयन्तीति दर्शनानन्तरमनुचिन्त्यमानान्यह्लादयन्तीति मनोरमाणि 'आलोकिता' समन्ताद्रष्टा 'निर्ध्याता' दर्शनानन्तरमतिशयेन चिन्तयिता, यथा-अहो! सलवणत्वं लोचनयो:, ऋजुत्वं नासावंशस्येत्यादि, यद्वा 'आङीषदर्थे' तत 'आलोकिता' ईषद्दृष्टा 'निर्ध्याता' प्रबन्धेन निरीक्षता भवति य: स निर्ग्रन्थ:, अन्यत्प्रतीतमेवेति सूत्रार्थ: ॥ पञ्चममाह-

मू.(५१६) नो निग्गंथे इत्थीणं कुड्डंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा कूइयसद्दं वा रुइयसद्दं वा गीयसद्दं वा हसियसद्दं वा थणियसद्दं वा कंदियसद्दं वा विलवियसद्दं वा सुणित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-इत्थीणं कुड्डंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा जाव विलवियसद्दं वा सुणमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं कुड्डंतरंसि वा जाव सुणेमाने विहरिज्जा ॥

वृ. नो स्त्रीणां कुड्यं-खटिकादिरचितं तेनान्तरं-व्यवधानं कुड्यन्तरं तस्मिन् वा, दूष्यं-वस्त्र तदन्तरे वा, यवनिकान्तर, इत्यर्थ:, भित्ति:-पक्केष्टकादिरचिता तदन्तरे, वाशब्द: सर्वत्र विकल्पाभिधायी, स्थित्वेति शेष:, 'कूजितशब्दं वा' विविधविहगभाषयाऽव्यक्तशब्दं सुरत-समयभाविनं 'रुदितशब्दं वा' रतिकलहादिकं मानिनीकृतं 'गीतशब्दं वा' पञ्चमादिहुंकृतिरूपं 'हसितशब्दं वा' कहकहादिकं 'स्तनितशब्दं वा' रतिसमयकृतं 'क्रन्दितशब्दं वा' प्रोषितभर्तृकादिकृताक्रन्दरूपं 'विलपितशब्दं वा' प्रलापरूपं श्रोता यो न भवति स निर्ग्रन्थ:, शेषं स्पष्टमिति सूत्रार्थ: ॥ षष्ठमाह-

मू.(५१७) नो निग्गंथे पुव्वरयं पुव्वकीलियं अनुसरित्ता हवइ, तं कहं इति चेदायरियाह-निग्गंथस्स खलं इत्थीणं पुव्वरयं पुव्वकीलियं अनुसरमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं पुव्वरयं पुव्वकीलियं अनुसरिज्जा ॥

वृ. नो निर्ग्रन्थ: पूर्वस्मिन्-गृहावस्थालक्षणे काले रतं-स्त्र्यादिभि: सह विषयानुभवनं पूर्वरतं, 'पूर्वक्रीडितं वा' स्त्र्यादिभिरेव पूर्वकालभावि दुरोदरादिरमणात्मकं वाशब्दस्य गम्यमानत्वात्, 'अनुस्मर्त्ता' अनुचिन्तयिता भवति, शेषं प्राग्वदिति सूत्रार्थ: ॥ सप्तममाह-

मू.(५१८) नो निग्गंथे पणीयं आहारं आहासरित्ता हवइ से निग्गंथे, तं कहं इति चेदाय-रियाह-निग्गंथस्स पणीयं पानभोयणं आहारेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे पणीय आहारं आहारिज्जा ॥

वृ. 'नो' नैव 'प्रणीतं' गलद्बिन्दु, उपलक्षणत्वादन्यमप्यत्यन्तधातूद्रेककारिणम् 'आहारम्' अशनादिकम् 'आहारयिता' भोक्ता भवति यः स निर्ग्रन्थः, शेषं व्याख्यातमेव, नवरं 'प्रणीतं पानभोजनम्' इति पानभोजनयोरेवोपादानम्, एतयोरेव मुख्यतया यतिभिराहार्यमानत्वात्, अन्यथा खाद्यस्वाद्ये अप्येवंविधे वर्जनीये एवेति सूत्रार्थः ॥ अष्टममाह-

मू. (५१९) *नो अइमायाए पानभोयणं आराहित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह- अइमायाए पानभोयणं आहारेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे अइमायाए पानभोयणं भुंजिज्जा ॥*

वृ. 'नो' नैव 'अतिमात्रया' मात्रातिक्रमेण, तत्र मात्रा-परिमानं, सा च पुरुषस्य द्वात्रिंशत्कवलाः स्त्रियाः पुनरष्टाविंशतिः, उक्तं हि-

"बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ ।
पुरिसस्स महिलियाए अठ्ठावीसं भवे कवला ॥"

अतिक्रमस्तु तदाधिक्यसेवनं 'पानभोजनं' प्रतीतमेव 'आहारयिता' भोक्ता भवति यः स निर्ग्रन्थः, शेषं तथैवेति सूत्रार्थः ॥ नवममाह-

मू. (५२०) *नो विभूसानुवाई हवइ से निग्गंथे, तं कहं इति चेदायरियाह-विभूसावत्तिए विभूसियसरीरे इत्थिजनस्से अभिलस्सणिजे हवइ, तओ णं तस्स इत्थिजनेनं अभिलसिज्जमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे विभूसाणुवाई सिया ॥*

वृ. 'नो' नैव विभूषणं विभूषा-शरीरोपकरणादिषु स्नानधावनादिभिः संस्कारस्तदनुपाती, कोऽर्थः ?-तत्कर्त्ता भवति यः स निर्ग्रन्थः, तत्कथमिति चेदुच्यते-'विभूसावत्तिए'त्ति विभूषां वर्त्तयितुं-विधातुं शीलमस्येति विभूषावर्ती, ताच्छीलिकोणिन्, स एव विभूषावर्त्तिकः, स किमित्याह-विभूषितम्-अलंकृतं स्नानादिना संस्कृतमितियावत् शरीरं-देहो यस्य स विभूषितशरीरः, तथा च 'उज्ज्वलवेषं पुरुषं दृष्ट्वा स्त्री कामयते' इति वचनाद्युवतिजनप्रार्थनीयो भवति, आह च सूत्रकारः-'इत्थिजनस्स अहिलसणिज्जे हवइ'त्ति, ततः को दोष इत्याह-'ततः' स्त्रीजनाभिलषणीयत्वतः, नमिति प्राग्वत्, 'तस्य' निर्ग्रन्थस्य 'स्त्रीजनेन' युवतिजनेनाभिलष्यमानस्स-प्रार्थ्यमानस्य ब्रह्मचारिणोऽपि ब्रह्मचर्ये शङ्का वा, यथा किमेतास्तावदित्थं प्रार्थयमाना उपभुञ्जे ?, आयतौ तु यद्भावि तद्भवतु, उतश्चित्कष्टाः शाल्मलीश्लेष्मादयो नरक एतद्विपाका इति परिहारमीत्येवंरूपः संशयः, शेषं प्राग्वदिति सूत्रार्थः ॥ दशममाह-

मू. (५२१) *नो सद्दरूवरसगंधफासाणुवाई हवइ से निग्गंथे, तं कहं इति चेदायरियाह-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निग्गंथस्स खलु सद्दरूवरसगंधफासाणुवाइयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे सद्दरूवरसगंधफा-साणुवाई हवइ से निग्गंथे, दसमे बंभचेरसमाहिठाणे हवइ ॥

वृ. 'नो' नैव शब्दो-मन्मनभाषितादि रूपं-कटाक्षनिरीक्षणादि चित्रादिगतं वा स्त्र्यादि-सम्बन्धि रसो-मधुरादिरभिबृंहणीयो गन्धः-सुरभिः स्पर्शः-स्पर्शनानुकूलः कोमलमृणाला-देरेतानभिष्वङ्गहेतून् अनुपतति-अनुयातीत्येवंशीलः शब्दरूपरसगन्धस्पर्शानुपाति भवति यः स निर्ग्रन्थः । तत्कथमिति चेदित्यादि सुगमं, दशमं ब्रह्मचर्यसमाधिस्थानं भवतीति निगम-नम् । इह च प्रत्येकं स्त्र्यादिसंसक्तशयनादेः शङ्कादिदोषदर्शनं तदत्यन्तदुष्टतादर्शकं प्रत्येक-मपायहेतुतां प्रति तुल्यबलत्वख्यापकं चेति सूत्रार्थः ॥

[भवन्ति य इत्थ सिलोगा, तंजहा-]

'भवन्ति' विद्यन्ते 'अत्रे'ति उक्त एवार्थे, किमुक्तं भवति ?-उक्तार्थाभिधायिनः 'श्लोकाः' पद्यरूपाः, 'तद्यथा' इत्युपप्रदर्शने ।

मू. (५२२) *जं विवित्तमणाइन्नं, रहियं थीजनेन य ।*
बंभचेरस्स रक्खट्ठा, आलयं तु निसेवए ॥

वृ. जमित्यादिसूत्राणि दश । यः 'विविक्तः' रहस्यभूतस्तत्रैव वास्तव्यस्त्र्याद्यभावाद् 'अना-कीर्णः' असंकुलस्तत्तत्प्रयोजनागतस्त्र्याद्यनाकुलत्वात्, 'रहितः' परित्यक्तोऽकालचारिणा वन्दनश्रवणादिनिमित्तागतेन स्त्रीजनेन, चशब्दात्पण्डकैः षिड्गादिपुरुषैश्चः प्रक्रमापेक्षया चैवं व्याख्या, अन्यत्रापि चैवं प्रक्रमाद्यपेक्षत्वं भावनीयम्, उक्तं हि-"अर्थात् प्रकरणाल्लिङ्गादौ-चित्याद्देशकालतः । शब्दार्थाः प्रविभज्यन्ते, न शब्दादेव केवलात् ॥ 'ब्रह्मचर्यस्य' उक्तरूपस्य 'रक्षार्थं' पालननिमित्तम् 'आलयः' आश्रयः, सर्वत्र लिङ्गव्यत्ययः प्राग्वत्, यत्तदोर्नित्यसम्ब-न्धात्तं 'तुः' पूरणे 'निषेवते' भजते ॥

मू. (५२३) *मनपल्हायजननी, कामरागविवड्ढणी ।*
बंभचेररओ भिक्खू, थीकहं तु विवज्जए ॥

वृ. मनः-चित्तं तस्य प्रल्हादः अहो ! अभिरूपा एता इत्यादिविकल्पज आनन्दस्तं जनयतीति मनःप्रह्लादजनी ताम्, अत एव कामरागो-विषयाभिष्वङ्गस्तस्य विवर्द्धनी-विशेषेण वृद्धि-हेतुः कामरागविवर्द्धनी तां, शेषं स्पष्टं, नवरं, 'स्त्रीकथां' "तद्वक्रं यदि मुद्रिता शशिकथा" इत्यादिरूपां ॥

मू. (५२४) *समं च संथवं थीहिं, संकहं च अभिक्खणं ।*
बंभचेररओ भिक्खू, निच्चओ परिवज्जए ॥

वृ. 'समं च' सह 'संस्तवं' परिचयं स्त्रीभिर्निषद्या प्रक्रमादेकासनभोगेनेति गम्यते, 'संकथां च' ताभिरेव समं सन्ततभाषणोत्मिकाम् 'अभीक्ष्णं' पुनः पुन 'निच्चसो'त्ति नित्यमन्यत्स्पष्टम् ॥

मू. (५२५) *अंगपच्चंगसंठाणं, चारुल्लवियपेहियं ।*
बंभचेररओ थीणं, सोअगिज्झं विवज्जए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अङ्गानि-शिरःप्रभृतीनि प्रत्यङ्गानि-कुचकक्षादीनि संस्थानं-कटीनिविष्टकरादिसन्निवेशात्मकम्, अमीषां समाहारनिर्देशः, अङ्गप्रत्यङ्गयोर्वा संस्थानम्-आकारविशेषोऽङ्गप्रत्यङ्गसंस्थानं चारुशोभनम् उल्लपितं च-मन्मनभाषितादि तत्सहगतमुखादिविकारोपलक्षणमेतत् प्रेक्षितं च-अर्द्धकटाक्षनिरीक्षितादि उल्लपितप्रेक्षितं ब्रह्मचर्यरतः स्त्रीणां सम्बन्धि चक्षुषा गृह्यत इति चक्षुर्ग्राह्यं सद्विवर्जयेत् किमुक्तं भवति ?-चक्षुषि हि सति रूपग्रहणमवश्यंभावि, परं तद्दर्शनेऽपि तत्परिहार एव कर्त्तव्यो न तु रागवशगेन पुनः पुनस्तदेव वीक्षणीयमिति, उक्तं हि-

"असक्का रूवमद्दुं, चक्खुगोयरमागयं।
रागद्दोसे उ जे तत्थ, ते बुहो परिवज्जए॥"

*मू. (५२६) कुइयं रुइअं गीयं, हसियं थणिय कंदियं।
बंभचेररओ थीणं, सोअगिज्झं विवज्जए॥*

वृ. कुइयंसूत्रं प्रायो व्याख्यातमेव, नवरं कुड्यन्तादिष्वति शेषः ॥

*मू. (५२७) हासं खिड्डुं रइं दप्पं, सहसावत्तासियाणि य।
बंभचेररओ थीणं, नानुचिंते कयाइवि॥*

वृ. हाससूत्रमपि तथैव, नवरं 'रतिं' दयिताङ्गसङ्गजनितां प्रीतिं 'दर्पं' मनस्विनीमानदलनोत्थं गर्वं 'सहसाऽवत्रासितानि च' परांमुखदयितादेः सपदि त्रासोत्पादकान्यक्षिस्थगनमर्मघट्टनादीनि, पठ्यते च-'हस्सं दप्पं रइं किड्डुं सह भुत्तासियाणि य' अत्र च 'सहे'ति स्त्रीभिः सार्द्धं भुक्तानि च-भोजनानि आसितानि च-स्थितानि भुक्तासितानि, शेषं स्पष्टं, नवरं सर्वत्र पूर्वकृतत्वं प्रक्रमादपेक्षणीयम् ॥

*मू. (५२८) पनीयं भत्तपानं च, खिप्पं मयविवड्डणं।
बंभचेररओ भिक्खू, निच्चसो परिवज्जए॥*

वृ. पणीयंसूत्रं निगदसिद्धमेव, नवरं मदः-कामोद्रेक इह गृह्यते, तस्य विवर्द्धनम्-अतिबृंहकतया विशेषतो वृद्धिहेतुं परिवर्जयेत् ॥

*मू. (५२९) धम्मलद्धं मियं काले, जत्तत्थं पणिहाणवं।
नाइमत्तं तु भुंजिज्जा, बंभचेररओ सया॥*

वृ. धर्मादनपेतं धर्म्यमेषणीयमित्यर्थः 'लब्धं' प्राप्तं गृहस्थेभ्य इति गम्यते, न तु स्वयमेवोपस्कृतं, पठ्यते च, 'धम्मलद्धं'ति धर्मेण हेतुनोपलक्षणत्वाद्धर्मलाभेन वा न तु कुण्डलादिकरणेन लब्धं धर्मलब्धं पठ्यते च-'धर्म्मलद्धुं'ति धर्म्मः-उत्तमः क्षमादिरूपः, यथाऽऽह वाचकः-'उत्तमः क्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणि धर्मः" इति, तं 'लब्धुं' प्रासुं, कथं ममायं निरतिचारः स्यात् इति, 'मितम्' 'अद्धमसणस्स' इत्याद्योगमोक्तमानान्वितमाहारमिति गम्यते, 'काले' प्रस्तावे 'यात्रार्थं' संयमनिर्वाहणार्थं न तु रूपाद्यर्थं 'प्रणिधानवान्' चित्तस्वास्थ्योपेतो न तु रागद्वेषवशगो भुञ्जीत 'न' इति निषेधे मात्रामतिक्रान्तः अतिमात्रः-अतिरिक्त इत्यर्थस्तं, यदिवा 'ईषदर्थे क्रियायोगे, मर्यादायां परिच्छद' इत्यादिना मात्राशब्दस्य मर्यादार्थस्यापि दर्शनाद् 'अतिमात्रम्' अतिक्रान्तमर्यादं, तुशब्दस्यैवकारार्थत्वाद्व्यवहितसम्बन्धत्वाच्चा नैव 'भुञ्जीत' अभ्यवहरेद् ब्रह्मचर्ये रतः-आसक्तो ब्रह्मचर्यरतः 'सदा'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वकालं, कदाचित्कारणतोऽतिमात्रस्याप्याहारस्यादुष्टत्वात् ॥

मू. (५३०) *विभूसं परिवज्जिज्जा, सरीरपरिमंडणं।*
बंभचेररओ भिक्खू, सिंगारत्थं न धारए॥

वृ. 'विभूषाम्' उपकरणगता भुत्कृष्टवस्त्राद्यात्मिकां 'परिवर्जयेत्' परिहरेत् 'शरीरपरिमण्डनं' केशश्मश्रुसमारचनादि ब्रह्मचर्यरतो भिक्षुः 'शृङ्गारार्थं' विलासार्थं 'न धारयेत्' न स्थापयेत् न कुर्यादितियावत् ॥

मू. (५३१) *सद्दे रूवे य गंधे य, रसे फाले तहेव य।*
पंचविहे कामगुणे, निच्चसो परिवज्जए॥

वृ. 'सद्दे' सूत्रं स्पष्टमेव, नवरं कामः-इच्छामदनरूपस्तस्य द्विविधस्यापि गुणाः-साधनभूता उपकारका इतियावत्, उक्तं हि-'गुणः साधनमुपकारकं' कामगुणास्तानेवंविधान् शब्दादीनिति सूत्रदशकार्थः ॥

सम्प्रति यत्प्राक् प्रत्येकमुक्तं शङ्का वा स्यादित्यादि तद्दृष्टान्ततः स्पष्टयितुमाह-

मू. (५३२) *आलओ थीजणाइन्नो, थीकहा य मनोरमा।*
संथवो चेव नारीणं, तासिं इंदियदरिसणं॥

मू. (५३३) *कुइयं रुइयं गीयं, हसियं भुत्तासियाणि य।*
पनीयं भत्तपानं च, अइमायं पानभोयणं॥

मू. (५३४) *गत्त भूसणमिट्ठं च, कामभोगा य दुज्जया।*
नरस्सऽत्तगवेसिस्सा, विसं तालउडं जहा॥

वृ. नवरं 'संस्तवः' परिचयः, स चेहाप्येकासनभोगेनेति प्रक्रमः, कूजितादीनि हसितपर्यन्तानि कुड्यन्तराद्यवस्थितिनिषेधोपलक्षणानि, भुक्तासितानि च स्मृतानीति शेषः, तत्र भुक्तानि-भोगरूपाणि आसितानि-स्त्र्यादिभिरेव सहावस्थितानि, हास्याद्युपलक्षणं चैतत्, गात्रभूषणमिष्टं चेति, चशब्दोऽपिशब्दार्थः, तत इष्टमप्यास्तां विहितं, तथा काम्यन्त इति कामाः भुज्यन्त इति भोगाः विशेषणसमासस्ते चेष्टाः शब्दादयः, नरस्योपलक्षणत्वात्स्त्र्यादेश्च आत्मगवेषिणः 'विषं' गरलः 'तालपुटं' सद्योघाति यत्रौष्ठपुटान्तर्वर्त्तिनि तालमात्रकालविलम्बतो मृत्युरुपजायते, 'यथे'त्यौपभ्ये, ततोऽयमर्थः-यथैतद्विपाकदारुणं तथा स्त्रीजनाकीर्णालयाद्यपि, शङ्कादिकरणतः संयमात्मकभावजीवितस्येतरस्य च नाशहेतुत्वादिति सूत्रत्रयार्थः ॥

सम्प्रति निगमयितुमाह-

मू. (५३५) *दुज्जए कामभोगे य, निच्चसो परिवज्जए।*
संकाठाणाणि सव्वाणि, वज्जिज्जा पणिहाणवं॥

वृ. दुःखेन जीयन्त इति दुर्जयास्तान्, 'कामभोगान्' उक्तरूपान् 'निच्चसो'त्ति नित्यं 'परिवर्जयेत्' सर्वप्रकारं त्यजेत् 'शङ्कास्थानानि च' अनन्तरोक्तानि, पूर्वत्र चस्य भिन्नक्रमत्वात् 'सर्वाणि' दशापि वर्जयेद्, अन्यथा आज्ञाऽनवस्थामिथ्यात्वविराधनादोषसम्भवः 'प्रणिधानवान्' एकाग्रमनाः। एतद्वर्जकश्च किं कुर्यादित्याह-

मू. (५३६) *धम्मारामे चरे भिक्खू, धिइमं धम्मसारही।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धम्मारामरए दंते, बंभचेरसमाहिए ॥

वृ. धर्म आराम इव पाप सन्तापोपतप्तानां जन्तूनां निर्वृत्तिहेतुतयाऽभिलषितफलप्रदानतश्च धर्मारामस्तस्मिन् 'चरेत्' गच्छेत् प्रवर्त्ततेतियावत्, यद्वा धर्मे आ-समन्ताद्रमत इति धर्मारामः 'संचरेत्' संयमाध्वनि यायाद् भिक्षुः प्राग्वत् 'धृतिमान्' धृतिः-चित्तस्वास्थ्यं तद्वान्, स चैवं धर्मसारथिः-"ठिओ उ ठावए परं" इति वचनादन्येषामपि धर्मे प्रवर्त्तयिता, ततोऽन्यानपि धर्मे व्यवस्थितानुपलभ्य विशेषतो धर्मारामे रतः- आसक्तिमान् धर्मारामरतः, तथा च 'दान्तः' उपशान्तो ब्रह्मचर्ये समाहितः-समाधानवान् ब्रह्मचर्यसमाहित इति सूत्रद्वयार्थः ॥

ब्रह्मचर्यविशुद्धयर्थोऽयं सर्वोऽप्युपक्रम इति तन्माहात्म्यमाह-

मू. (५३७) *देवदानवगंधव्या, जक्खरक्खसकिन्नरा ।*
बंभयारिं नमंसंति, दुक्करं जे करंति तं ॥

वृ. देवाः-ज्योतिष्कवैमानिकाः दानवाः-भुवनपतयः गन्धर्वयक्षराक्षसकिन्नराः-व्यन्तर-विशेषाः समासः सुकर एव, उपलक्षणं चैतद्भूतपिशाचमहोरगकिंपुरुषाणाम्, एते सर्वेऽपि 'ब्रह्मचारिणं' ब्रह्मचर्यवन्तं यतिमिति शेषः, 'नमस्यन्ति' नमस्कुर्वन्ति 'दुष्करं' कातरजनदुरनुचरं 'जे' इति यः 'करोति' अनुतिष्ठति 'तदि'ति प्रक्रमाद्ब्रह्मचर्यमिति सूत्रार्थः ॥

सम्प्रति सकलाध्ययनार्थोपसंहारामाह-

मू. (५३८) *एस धम्मे धुवे नियए, सासए जिनदेसिए ।*
सिद्धा सिज्झंति चानेनं, सिज्झिस्संति तहापरे ॥

वृ. 'एषः' इत्यनन्तरोक्तः 'धर्मः' ब्रह्मचर्यलक्षणः, ध्रुवः परप्रवादिभिरप्रकम्प्यतया प्रमाण-प्रतिष्ठित इतियावत् 'नित्यः' अप्रच्युतानुत्पन्नस्थिरैकस्वभावो द्रव्यार्थितया 'शाश्वतः' शश्वदन्या-न्यरूपतया उत्पन्न(:)पर्यायार्थितया, यद्वा 'नित्यः' त्रिकालमपि सम्भवात् 'शाश्वतः' अनवरत-भवनात्, एकार्थिकानि वा नानादेशजविनेयानुग्रहार्थमुक्तानि, जिनैः-तीर्थकृद्भिर्देशितः-प्रतिपादितो जिनदेशितः, अस्यैव त्रिकालगोचरफलमाह-'सिद्धाः' पुरा अनन्तासूत्सर्पिण्य-वसर्पिणीषु सिद्धयन्ति 'चः' समुच्चये महाविदेहे इहापि वा तत्कालापेक्षया 'अनेन' इति ब्रह्मचर्यलक्षणेन धर्मेण सेत्स्यन्ति तथा 'परे' अन्येऽनन्तायामनागताद्धायामिति सूत्रार्थः ॥ 'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत् ॥

अध्ययनं १६ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययसूत्रे षोडशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्तम्

४३-१	चतुर्थ-मूलसूत्रं "उत्तराध्यनानि-१" समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

પંચમ ગણધર શ્રી સુધર્મા સ્વામી	ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી
દશ પૂર્વધર શ્રી શય્યંભવસૂરિ	(અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ
દેવવાચક ગણિ	શ્રી શ્યામાચાર્ય
દેવર્દ્ધિગણિ ક્ષમાશ્રમણ	જિનભદ્ર ગણિ ક્ષમાશ્રમણ
સંઘદાસગણિ	સિદ્ધસેન ગણિ
જિનદાસ ગણિ મહત્તર	અગત્સ્યસિંહ સૂરિ
શીલાંકાચાર્ય	અભયદેવસૂરિ
મલયગિરિસૂરિ	ક્ષેમકીર્તિસૂરિ
હરિભદ્રસૂરિ	આર્યરક્ષિત સૂરિ (?)
દ્રોણાચાર્ય	ચંદ્ર સૂરિ
વાદિવેતાલ શાંતિચંદ્ર સૂરિ	મલ્લધારી હેમચંદ્રસૂરિ
શાંતિચંદ્ર ઉપાધ્યાય	ધર્મસાગર ઉપાધ્યાય
ગુણરત્નસૂરી	વિજય વિમલગણિ
વીરભદ્ર / ઋષિપાલ	બ્રહ્મમુનિ / તિલકસૂરિ

સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

આનંદ સાગરસૂરિજી	ચંદ્રસાગર સૂરિજી	મુનિ માણેક
જિન વિજયજી	પુન્યવિજયજી	ચતુરવિજયજી
જંબુ વિજયજી	અમરમુનિજી	કનૈયાલાલજી
લાભસાગરસુરિજી	આચાર્ય તુલસી	ચંપક સાગરજી

સ્મરણાંજલિ

બાબુ ધનપતસિંહ	પં૦ બેચરદાસ	પં૦ જીવરાજભાઈ
પં૦ ભગવાનદાસ	પં૦ રૂપેન્દ્રકુમાર	પં૦ હીરાલાલ
શ્રુત પ્રકાશક સર્વે સંસ્થાઓ		

Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

क्रम	आगमसूत्रनाम	मूल श्लोक प्रमाण	वृत्ति-कर्ता	वृत्ति श्लोकप्रमाण
१.	आचार	२५५४	शीलाङ्काचार्य	१२०००
२.	सूत्रकृत	२१००	शीलाङ्काचार्य	१२८५०
३.	स्थान	३७००	अभदेवसूरि	१४२५०
४.	समवाय	१६६७	अभयदेवसूरि	३५७५
५.	भगवती	१५७५१	अभयदेवसूरि	१८६१६
६.	ज्ञाताधर्मकथा	५४५०	अभयदेवसूरि	३८००
७.	उपासकदशा	८१२	अभयदेवसूरि	८००
८.	अन्तकृद्दशा	९००	अभयदेवसूरि	४००
९.	अनुत्तरोपपातिकदशा	१९२	अभयदेवसूरि	१००
१०.	प्रश्नव्याकरण	१३००	अभयदेवसूरि	५६३०
११.	विपाकश्रुत	१२५०	अभयदेवसूरि	९००
१२.	औपपातिक	११६७	अभयदेवसूरि	३१२५
१३.	राजप्रश्निय	२१२०	मलयगिरिसूरि	३७००
१४.	जीवाजीवाभिगम	४७००	मलयगिरिसूरि	१४०००
१५.	प्रज्ञापना	७७८७	मलयगिरिसूरि	१६०००
१६.	सूर्यप्रज्ञप्ति	२२९६	मलयगिरिसूरि	९०००
१७.	चन्द्रप्रज्ञप्ति	२३००	मलयगिरिसूरि	९१००
१८.	जम्बूद्वीपप्रज्ञप्ति	४४५४	शान्तिचन्द्रउपाध्याय	१८०००
१९थी २३.	निरयावलिका (पञ्च उपाङ्ग)	११०० –	चन्द्रसूरि –	६०० –
२४.	चतुःशरण	८०	विजयविमलयगणि	(?) २००
२५.	आतुर प्रत्याख्यान	१००	गुणरत्नसूरि (अवचूरि)	(?) १५०
२६.	महाप्रत्याख्यान	१७६	आनन्दसागरसूरि (संस्कृतछाया)	१७६
२७.	भक्तपरिज्ञा	२१५	आनन्दसागरसूरि (संस्कृतछाया)	२१५
२८.	तन्दुल वैचारिक	५००	विजयविमलगणि	(?) ५००
२९.	संस्तारक	१५५	गुणरत्न सूरि (अवचूरि)	११०
३०.	गच्छाचार★	१७५	विजयविमलगणि	१५६०
३१.	गणिविद्या	१०५	आनन्दसागरसूरि (संस्कृतछाया)	१०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रम	आगमसूत्रनाम	• मूल श्लोक प्रमाण	वृत्ति-कर्ता	• वृत्ति श्लोकप्रमाण
३२.	देवेन्द्रस्तव	३७५	आनन्दसागरसूरि (संस्कृत छाया)	३७५
३३.	मरणसमाधि ★	८३७	आनन्दसागरसूरि (संस्कृत छाया)	८३७
३४.	निशीथ	८२१	जिनदासगणि (चूर्णि) सङ्घदासगणि (भाष्य)	२८००० ७५००
३५.	बृहत्कल्प	४७३	मलयगिरि+क्षेमकीर्ति सङ्घदासगणि (भाष्य)	४२६०० ७६००
३६.	व्यवहार	३७३	मलयगिरि सङ्घदासगणि (भाष्य)	३४००० ६४००
३७.	दशाश्रुतस्कन्ध	८९६	- ? - (चूर्णि)	२२२५
३८.	जीतकल्प ★	१३०	सिद्धसेनगणि (चूर्णि)	१०००
३९.	महानिशीथ	४५४८	–	–
४०.	आवश्यक	१३०	हरिभद्रसूरि	२२०००
४१. -	ओघनिर्युक्ति पिण्डनिर्युक्ति ★	नि.१३५५ नि. ८३५	द्रोणाचार्य मलयगिरिसूरि	(?)७५०० ७०००
४२.	दशवैकालिक	८३५	हरिभद्रसूरि	७०००
४३.	उत्तराध्ययन	२०००	शांतिसूरि	१६०००
४४.	नन्दी	७००	मलयगिरिसूरि	७७३२
४५.	अनुयोगद्वार	२०००	मलधारीहेमचन्द्रसूरि	५९००

નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, ૧૨ થી ૨૩ उपांगसूत्रो, ૨૪થી૩૩ प्रकीर्णकसूत्रो ૩૪થી ૩૯ छेदसूत्रो, ૪૦ થી ૪૩ मूळसूत्रो, ૪૪-૪૫ चूलिकासूत्रोના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત वृत्ति-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ वृत्ति-चूर्णि આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे "आगमसुत्ताणि"मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड ए बंने निर्युक्ति विકल्पे छे. जे हाल मूळसूत्र રૂપે પ્રસિધ્ધ છે. જે બંનેની वृत्ति અમે આપી છે. તેમજ તેમાં ભાષ્યની ગાથાઓ પણ સમાવિષ્ટ થઈ છે.

(૬) ચાર प्रकीर्णक सूत्रो અને महानिशीथ એ પાંચ આગમની કોઈ वृत्ति આદિ ઉપલબ્ધ થવાનો ઉલ્લેખ મળતો નથી. प्रकीर्णक ની संस्कृत छाया ઉપલબ્ધ છે તેથી મૂકી છે. निशीथ-दशा-जितकल्प એ ત્રણેની चूर्णि આપી છે. જેમાં दशा અને जीतकल्प એ બંને ઉપરवृत्ति મળતી હોવાનો ઉલ્લેખ છે, પણ અમે તે મેળવી શક્યા નથી. જ્યારે निशीथ ઉપર તો માત્ર વીસમા उद्देशकःની જ वृत्ति નો ઉલ્લેખ મળે છે.

➧ વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ निर्युक्तिः ➧

क्रम	निर्युक्ति	श्लोकप्रमाण	क्रम	निर्युक्ति	श्लोकप्रमाण
१.	आचार-निर्युक्ति	४५०	६.	आवश्यक–निर्युक्ति	२५००
२.	सूत्रकृत-निर्युक्ति	२६५	७.	ओघनिर्युक्ति	१३५५
३.	बृहत्कल्प-निर्युक्ति ★	–	८.	पिण्डनिर्युक्ति	८३५
४.	व्यवहार-निर्युक्ति ★	–	९.	दशवैकालिक-निर्युक्ति	५००
५.	दशाश्रुत०-निर्युक्ति	१८०	१०.	उत्तराध्ययन-निर्युक्ति	७००

નોંધ :-

(૧) અહીં આપેલ શ્લોક प्रमाण એ ગાથા સંખ્યા નથી. "૩૨ અક્ષરનો એક શ્લોક" એ પ્રમાણથી નોંધાયેલ શ્લોક प्रमाण છે.

(૨) ★ बृहत्कल्प અને व्यवहार એ બંને સૂત્રોની निर्युक्ति હાલ भाष्य માં ભળી ગઈ છે. જેનો યથાસંભવ ઉલ્લેખ वृत्तिकार महर्षि એ भाष्य ઉપરની वृत्तिમાં કર્યો હોય તેવું જોવા મળેલ છે.

(૩) ओघ અને पिण्डनिर्युक्ति સ્વતંત્ર मूलआगम સ્વરૂપે સ્થાન પામેલ છે તેથી તેનું સ્વતંત્ર સંપાદન आगम-४१ રૂપે થયેલ છે. (તેમજ આ સંપાદનમાં પણ છે.)

(૪) બાકીની છ निर्युक्तिमांथी दशाश्रुतस्कन्ध निर्युक्ति ઉપર चूर्णि અને અન્ય પાંચ निर्युक्ति ઉપરની वृत्ति અમે અમારા સંપાદનમાં પ્રકાશીત કરી છે. જ્યાં આ છ निर्युक्ति સ્પષ્ટ અલગ જોઈ શકાય છે.

(૫) निर्युक्तिकर्ता તરીકે भद्रबाहुस्वामी નો ઉલ્લેખ જ જોવા મળે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

क्रम	भाष्य	श्लोकप्रमाण	क्रम	भाष्य	गाथाप्रमाण
१.	निशीषभाष्य	७५००	६.	आवश्यकभाष्य ★	४८३
२.	बृहत्कल्पभाष्य	७६००	७.	ओघनिर्युक्तिभाष्य ★	३२२
३.	व्यवहारभाष्य	६४००	८.	पिण्डनिर्युक्तिभाष्य ★	४६
४.	पञ्चकल्पभाष्य	३१८५	९.	दशवैकालिकभाष्य ★	६३
५.	जीतकल्पभाष्य	३१२५	१०.	उत्तराध्ययनभाष्य (?)	–

નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા મૂળભાષ્ય રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે भाष्यगाथा જોવા મળે છે.

(૭) भाष्यकर्ता તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ चूर्णि:

क्रम	चूर्णि	श्लोकप्रमाण	क्रम	चूर्णि	श्लोकप्रमाण
१.	आचार-चूर्णि	८३००	९.	दशाश्रुतस्कन्धचूर्णि	२२२५
२.	सूत्रकृत-चूर्णि	९९००	१०.	पञ्चकल्पचूर्णि	३२७५
३.	भगवती-चूर्णि	३११४	११.	जीतकल्पचूर्णि	१०००
४.	जीवाभिगम-चूर्णि	१५००	१२.	आवश्यकचूर्णि	१८५००
५.	जंबूद्वीपप्रज्ञप्ति-चूर्णि	१८७९	१३.	दशवैकालिकचूर्णि	७०००
६.	निशीथचूर्णि	२८०००	१४.	उत्तराध्ययनचूर्णि	५८५०
७.	बृहत्कल्पचूर्णि	१६०००	१५.	नन्दीचूर्णि	१५००
८.	व्यवहारचूर्णि	१२००	१६.	अनुयोगदारचूर्णि	२२६५

નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिમાંથી निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार તરીકે जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

"આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"

૧ વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે सुव्यवस्थित पंचांगी એક માત્ર आवश्यक सूत्रની ગણાય.

૨ नंदीसूत्रમાં पंचांगीને બદલે संग्रहणी, प्रतिपत्तिઓ વગેરેના પણ ઉલ્લેખ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धनो છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક मूलनो છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા श्रुतस्कन्ध માં જ છે.

(२) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(३) **स्थान** - स्थानं/अध्ययनं/मूलं

(४) **समवाय** - समवायः/मूलं

(५) **भगवती** - शतकं/वर्ग्गः-अंतरशतकं/उद्देशकः/मूलं
અહીં शतक ના પેટા વિભાગમાં બે નામો છે. (૧) वर्ग्गः (૨) अंतरशतक જેમકે शतक ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ वर्ग्गः જ જણાવેલ છે. शतक - ३३,३४,३५,३६,४० ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(६) **ज्ञाताधर्मकथा-** श्रुतस्कन्धः/वर्ग्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग्ग નામે છે અને તે वर्ग्ग ના પેટા વિભાગમાં अध्ययन છે.

(७) **उपासकदशा-** अध्ययनं/मूलं

(८) **अन्तकृद्दशा-** वर्ग्गः/अध्ययनं/मूलं

(९) **अनुत्तरोपपातिकदशा-** वर्ग्गः/अध्ययनं/मूलं

(१०) **प्रश्नव्याकरण-** द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(११) **विपाकश्रुत-** श्रुतस्कन्धः/अध्ययनं/मूलं

(१२) **औपपातिक-** मूलं

(१३) **राजप्रश्नीय-** मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४) **जीवाजीवाभिगम-** ★प्रतिपत्तिः/★ उद्देशकः/मूलं
આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(१५) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(१६) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(१७) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(१८) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં वर्ग-१, निरयावलिका, वर्ग-२ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशेपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

क्रम	आगमसूत्र	मूलं	गाथा	क्रम	आगमसूत्र	मूलं	गाथा
१.	आचार	५५२	१४७	२४.	चतुःशरण	६३	६३
२.	सूत्रकृत	८०६	७२३	२५.	आतुरप्रत्याख्यान	७१	७०
३.	स्थान	१०१०	१६९	२६.	महाप्रत्याख्यानं	१४२	१४२
४.	समवाय	३८३	९३	२७.	भक्तपरिज्ञा	१७२	१७२
५.	भगवती	१०८७	११४	२८.	तंदुलवैचारिक	१६१	१३९
६.	ज्ञाताधर्मकथा	२४१	५७	२९.	संस्तारक	१३३	१३३
७.	उपासक दशा	७३	१३	३०.	गच्छाचार	१३७	१३७
८.	अन्तकृद्दशा	६२	१२	३१.	गणिविद्या	८२	८२
९.	अनुत्तरोपपातिक	१३	४	३२.	देवेन्द्रस्तव	३०७	३०७
१०.	प्रश्नव्याकरण	४७	१४	३३.	मरणसमाधि	६६४	६६४
११.	विपाकश्रुत	४७	३	३४.	निशीष	१४२०	–
१२.	औपपातिक	७७	३०	३५.	बृहत्कल्प	२१५	–
१३.	राजप्रश्निय	८५	–	३६.	व्यवहार	२८५	–
१४.	जीवाभिगम	३९८	९३	३७.	दशाश्रुतस्कन्ध	११४	५६
१५.	प्रज्ञापना	६२२	२३१	३८.	जीतकल्प	१०३	१०३
१६.	सूर्यप्रज्ञप्ति	२१४	१०३	३९.	महानिशीथ	१५२८	८
१७.	चन्द्रप्रज्ञप्ति	२१८	१०७	४०.	आवश्यक	९२	२१
१८.	जम्बूदीपप्रज्ञप्ति	३६५	१३१	४१.	ओघनिर्युक्ति	११६५	११६५
१९.	निरयावलिका	२१	–	४१.	पिण्डनिर्युक्ति	७१२	७१२
२०.	कल्पवतंसिका	५	१	४२.	दशवैकालिक	५४०	५१५
२१.	पुष्पिता	११	२	४३.	उत्तराध्ययन	१७३१	१६४०
२२.	पुष्पचूलिका	३	१	४४.	नन्दी	१६८	९३
२३.	वण्हिदशा	५	१	४५.	अनुयोगद्वार	३५०	१४१

નોંધ :- ઉક્ત ગાથા સંખ્યાનો સમાવેશ મૂલં માં થઈ જ જાય છે. તે મૂલ સિવાયની અલગ ગાથા સમજવી નહીં. મૂલ શબ્દ એ અમો સૂત્ર અને ગાથા બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. ગાથા બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–: અમારા પ્રકાશનો :–

[૧] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[૩] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[૪] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[૫] कृदन्तमाला
[૬] चैत्यवन्दन पर्वमाला
[૭] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[૮] चैत्यवन्दन चोविशी
[૯] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[૧૦] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ - ૧- શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ - ૨- શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ - ૩- શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય - આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો - [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[४२]	आयारो	[आगमसुत्ताणि-१]	पढमं अंगसुत्तं
[४३]	सूयगडो	[आगमसुत्ताणि-२]	बीअं अंगसुत्तं
[४४]	ठाणं	[आगमसुत्ताणि-३]	तइयं अंगसुत्तं
[४५]	समवाओ	[आगमसुत्ताणि-४]	चउत्थं अंगसुत्तं
[४६]	विवाहपन्नति	[आगमसुत्ताणि-५]	पंचमं अंगसुत्तं
[४७]	नायाधम्मकहाओ	[आगमसुत्ताणि-६]	छट्ठं अंगसुत्तं
[४८]	उवासगदसाओ	[आगमसुत्ताणि-७]	सत्तमं अंगसुत्तं
[४९]	अंतगडदसाओ	[आगमसुत्ताणि-८]	अट्ठमं अंगसुत्तं
[५०]	अनुत्तोववाइयदसाओ	[आगमसुत्ताणि-९]	नवमं अंगसुत्तं
[५१]	पण्हावागरणं	[आगमसुत्ताणि-१०]	दसमं अंगसुत्तं
[५२]	विवागसूयं	[आगमसुत्ताणि-११]	एक्कारसमं अंगसुत्तं
[५३]	उववाइयं	[आगमसुत्ताणि-१२]	पढमं उवंगसुत्तं
[५४]	रायप्पसेणियं	[आगमसुत्ताणि-१३]	बीअं उवंगसुत्तं
[५५]	जीवाजीवाभिगमं	[आगमसुत्ताणि-१४]	तइयं उवंगसुत्तं
[५६]	पन्नवणासुत्तं	[आगमसुत्ताणि-१५]	चउत्थं उवंगसुत्तं
[५७]	सूरपन्नतिः	[आगमसुत्ताणि-१६]	पंचमं उवंगसुत्तं
[५८]	चंदपन्नतिः	[आगमसुत्ताणि-१७]	छट्ठं उवंगसुत्तं
[५९]	जंबूद्दीवपन्नति	[आगमसुत्ताणि-१८]	सत्तमं उवंगसुत्तं
[६०]	निरयावलियाणं	[आगमसुत्ताणि-१९]	अट्ठमं उवंगसुत्तं
[६१]	कप्पवडिंसियाणं	[आगमसुत्ताणि-२०]	नवमं उवंगसुत्तं
[६२]	पुप्फियाणं	[आगमसुत्ताणि-२१]	दसमं उवंगसुत्तं
[६३]	पुप्फचूलियाणं	[आगमसुत्ताणि-२२]	एक्कारसमं उवंगसुत्तं
[६४]	वण्हिदसाणं	[आगमसुत्ताणि-२३]	बारसमं उवंगसुत्तं
[६५]	चउसरणं	[आगमसुत्ताणि-२४]	पढमं पईण्णगं
[६६]	आउरपच्चक्खाणं	[आगमसुत्ताणि-२५]	बीअं पईण्णगं
[६७]	महापच्चक्खाणं	[आगमसुत्ताणि-२६]	तीइयं पईण्णगं
[६८]	भत्तपरिण्णा	[आगमसुत्ताणि-२७]	चउत्थं पईण्णगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६९]	तंदुलवेयालियं	[आगमसुत्ताणि-२८]	पंचमं पईण्णगं
[७०]	संथारगं	[आगमसुत्ताणि-२९]	छट्ठं पईण्णगं
[७१]	गच्छायार	[आगमसुत्ताणि-३०/१]	सत्तमं पईण्णगं-१
[७२]	चंदावेज्झयं	[आगमसुत्ताणि-३०/२]	सत्तमं पईण्णगं-२
[७३]	गणिविज्ञा	[आगमसुत्ताणि-३१]	अट्ठमं पईण्णगं
[७४]	देविंदत्थओ	[आगमसुत्ताणि-३२]	नवमं पईण्णगं
[७५]	मरणसमाहि	[आगमसुत्ताणि-३३/१]	दसमं पईण्णगं-१
[७६]	वीरत्थव	[आगमसुत्ताणि-३३/२]	दसमं पईण्णगं-२
[७७]	निसीह	[आगमसुत्ताणि-३४]	पढमं छेयसुत्तं
[७८]	बुहत्कप्पो	[आगमसुत्ताणि-३५]	बीअं छेयसुत्तं
[७९]	ववहार	[आगमसुत्ताणि-३६]	तइयं छेयसुत्तं
[८०]	दसासुयक्खंधं	[आगमसुत्ताणि-३७]	चउत्थं छेयसुत्तं
[८१]	जीयकप्पो	[आगमसुत्ताणि-३८/१]	पंचमं छेयसुत्तं-१
[८२]	पंचकप्पभास	[आगमसुत्ताणि-३८/२]	पंचमं छेयसुत्तं-२
[८३]	महानिसीहं	[आगमसुत्ताणि-३९]	छट्ठं छेयसुत्तं
[८४]	आवसस्सयं	[आगमसुत्ताणि-४०]	पढमं मूलसुत्तं
[८५]	ओहनिज्जुत्ति	[आगमसुत्ताणि-४१/१]	बीअं मूलसुत्तं-१
[८६]	पिंडनिज्जुत्ति	[आगमसुत्ताणि-४१/२]	बीअं मूलसुत्तं-२
[८७]	दसवेयालियं	[आगमसुत्ताणि-४२]	तइयं मुलसुत्तं
[८८]	उतरज्झयणं	[आगमसुत्ताणि-४३]	चउत्थं मूलसुत्तं
[८९]	नंदीसूयं	[आगमसुत्ताणि-४४]	पढमा चूलिया
[९०]	अनुओगदारं	[आगमसुत्ताणि-४५]	बितिया चूलिया

પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[૯૧]	આયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	પહેલું અંગસૂત્ર
[૯૨]	સૂયગડ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	બીજું અંગસૂત્ર
[૯૩]	ઠાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ત્રીજું અંગસૂત્ર
[૯૪]	સમવાય -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ચોથું અંગસૂત્ર
[૯૫]	વિવાહપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૨]	પાંચમું અંગસૂત્ર
[૯૬]	નાયાધમ્મકહા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	છઠ્ઠું અંગસૂત્ર
[૯૭]	ઉવાસગદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	સાતમું અંગસૂત્ર
[૯૮]	અંતગડદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	આઠમું અંગસૂત્ર
[૯૯]	અનુત્તરોપપાતિકદસા-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	નવમું અંગસૂત્ર
[૧૦૦]	પણ્હાવાગરણ-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	દશમું અંગસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૦૧]	વિવાગસૂય -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	અગિયારમું અંગસૂત્ર
[૧૦૨]	ઉવવાઇય	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	પહેલું ઉપાંગસૂત્ર
[૧૦૩]	રાયપ્પસેણિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	બીજું ઉપાંગસૂત્ર
[૧૦૪]	જીવાજીવાભિગમ -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ત્રીજું ઉપાંગસૂત્ર
[૧૦૫]	પન્નવણાસુત્ત	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ચોથું ઉપાંગસૂત્ર
[૧૦૬]	સૂરપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	પાચમું ઉપાંગસૂત્ર
[૧૦૭]	ચંદપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	છઠ્ઠું ઉપાંગસૂત્ર
[૧૦૮]	જંબુદ્દીવપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	સાતમું ઉપાંગસૂત્ર
[૧૦૯]	નિરયાવલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	આઠમું ઉપાંગસૂત્ર
[૧૧૦]	કપ્પવડિંસિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	નવમું ઉપાંગસૂત્ર
[૧૧૧]	પુપ્ફિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	દશમું ઉપાંગસૂત્ર
[૧૧૨]	પુપ્ફચૂલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	અગિયારમું ઉપાંગસૂત્ર
[૧૧૩]	વણ્હિદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	બારમું ઉપાંગસૂત્ર
[૧૧૪]	ચઉસરણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલો પયન્નો
[૧૧૫]	આઉરપ્પચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજો પયન્નો
[૧૧૬]	મહાપચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજો પયન્નો
[૧૧૭]	ભત્તપરિણ્ણા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથો પયન્નો
[૧૧૮]	તંદુલવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમો પયન્નો
[૧૧૯]	સંથારગ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠો પયન્નો
[૧૨૦]	ગચ્છાયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૧
[૧૨૧]	ચંદાવેજ્ઝય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૨
[૧૨૨]	ગણિવિજ્જા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	આઠમો પયન્નો
[૧૨૩]	દેવિંદત્થઓ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	નવમો પયન્નો
[૧૨૪]	વીરત્થવ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	દશમો પયન્નો
[૧૨૫]	નિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલું છેદસૂત્ર
[૧૨૬]	બુહતકપ્પ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજું છેદસૂત્ર
[૧૨૭]	વવહાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજું છેદસૂત્ર
[૧૨૮]	દસાસુયક્ખંધ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથું છેદસૂત્ર
[૧૨૯]	જીયકપ્પો -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમું છેદસૂત્ર
[૧૩૦]	મહાનિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠું છેદસૂત્ર
[૧૩૧]	આવસ્સય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	પહેલું મૂલસુત્ર
[૧૩૨]	ઓહનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૧
[૧૩૩]	પિંડનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૨
[૧૩૪]	દસવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	ત્રીજું મુલસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર

[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા

[૧૩૭] અનુયોગદ્વાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.

[૧૩૮] દીક્ષા યોગાદિ વિધિ

[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ

[१४०]	आचाराङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१
[१४१]	सूत्रकृताङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२
[१४२]	स्थानाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-३
[१४३]	समवायाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-४
[१४४]	भगवतीअङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-५/६
[१४५]	ज्ञाताधर्मकथाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-७
[१४६]	उपासकदशाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-७
[१४७]	अन्तकृद्दशाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-७
[१४८]	अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-७
[१४९]	प्रश्नव्याकरणाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-७
[१५०]	विपाकश्रुताङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-८
[१५१]	औपपातिकउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-८
[१५२]	राजप्रश्नियउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-८
[१५३]	जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-९
[१५४]	प्रज्ञापनाउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१०/११
[१५५]	सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१२
[१५६]	चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१२
[१५७]	जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१३
[१५८]	निरयावलिकाउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१५९]	कल्पवतंसिकाउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६०]	पुष्पिताउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६१]	पुष्पचूलिकाउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६२]	वण्हिदसाउपाङ्गसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६३]	चतुःशरणप्रकीर्णकसूत्र सटीकं	आगमसुत्ताणि सटीकं-१४
[१६४]	आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६५]	महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१६६]	भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६७] तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६८] संस्तारकप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६९] गच्छाचारप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१७०] गणिविद्याप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१७१] देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१७२] मरणसमाधिप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१७३] निशीथछेदसूत्रं सटीकं आगमसुत्ताणि सटीकं-१५-१६-१७
[१७४] बृहत्कल्पछेदसूत्रं सटीकं आगमसुत्ताणि सटीकं-१८-१९-२०
[१७५] व्यवहारछेदसूत्रं सटीकं आगगम सुत्ताणि सटीकं-२१-२२
[१७६] दशाश्रुतस्कन्धछेदसूत्रं सटीकं आगमसुत्ताणि सटीकं-२३
[१७७] जीतकल्पछेदसूत्रं सटीकं आगमसुत्ताणि सटीकं-२३
[१७८] महानिशीथसूत्रं (मूलं) आगमसुत्ताणि सटीकं-२३
[१७९] आवश्यकमूलसूत्रं सटीकं आगमसुत्ताणि सटीकं-२४-२५
[१८०] ओघनिर्युक्तिमूलसूत्रं सटीकं आगम सुत्तामि सटीकं-२६
[१८१] पिण्डनिर्युक्तिमूलसूत्रं सटीकं आगमसुत्ताणि सटीकं-२६
[१८२] दशवैकालिकमूलसूत्रं सटीकं आगमसुत्ताणि सटीकं-२७
[१८३] उत्तराध्ययनमूलसूत्रं सटीकं आगमसुत्ताणि सटीकं-२८-२९
[१८४] नन्दी-चूलिकासूत्रं सटीकं आगमसुत्ताणि सटीकं-३०
[१८५] अनुयोगद्वारचूलिकासूत्रं सटीकं आगमसुत्ताणि सटीकं-३०

પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

—: સંપર્ક સ્થળ :—
'આગમ આરાધના કેન્દ્ર'
શીતલનાથ સોસાયટી-વિભાગ-૧, ફલેટ નં-૧૩, ૪થે માળે
શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર
અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

आगमसुत्ताणि	समाविष्टाआगमाः
भाग-१	आयार
भाग-२	सूत्रकृत
भाग-३	स्थान
भाग-४	समवाय
भाग-५-६	भगवती (अपरनाम व्याख्याप्रज्ञप्ति)
भाग-७	ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण
भाग-८	विपाकश्रुत, औपपातिक, राजप्रश्निय
भाग-९	जीवाजीवाभिगम
भाग-१०-११	प्रज्ञापना
भाग-१२	सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति
भाग-१३	जम्बूद्वीपप्रज्ञप्ति
भाग-१४	निरवायलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि
भाग-१५-१६-१७	नीशीथ
भाग-१८-१९-२०	बृहत्कल्प
भाग-२१-२२	व्यवहार
भाग-२३	दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ
भाग-२४-२५	आवश्यक
भाग-२६	ओघनिर्युक्ति, पिण्डनिर्युक्ति
भाग-२७	दशवैकालिक
भाग-२८-२९	उत्तराध्ययन
भाग-३०	नन्दी, अनुयोगद्वार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org